122 2014 500

ISBN : 978-81-85924-15-1

आर्यार्णवः

(नूतनसंस्कृतकविता)

लेखकः

डॉ.शिवदत्तशर्मा चतुर्वेदः

राष्ट्रपति संमानितः
पूर्व अध्यक्ष साहित्य विभाग
काशी हिन्दू विश्वविद्यालय,
वाराणसी।

देववाणी-परिषद्, दिल्ली

Aryarnav

(Nootan Sanskrit Kavita)

By-
Dr. Shivadatta Sharma Chaturvedi

PREFACE

It is extremely gratifying to learn that an anthology of Sanskrit verses composed in the mellifluous meter called आर्या (Arya) by my friend Dr.Shiva Datta Sharma Chaturvedi is being published as a sequel to a big number of publications of the same author comprising different genres and natures in different languages i.e. Sanskrit, Hindi etc.The title of the anthology आर्यार्णव: is self-explanatory. Tt is an ocean of Arya verser poems expressive of different subjects conveying different messages, poised in different styles,contemplated in different moods.These are the creative writings of a learned and erudite poet written from time to time now being compiled.

It is divided in 18 chapters.The chapters are titled as द्वीप (island) (Dweepas). Tt is believed that in the cosmic ocean "अर्णव" there are eighteen continents or island. In these eighteen chapters the verses also have been given some titles which specify the subject-matter of the cluster of poems.The subject traverse a huge gamut of space and time; some of them prostrating before different gods,some eulogising different celebrities some commenting upon different events, some thrashing different incongruities in society and some communicating to the reader in a pleasant style the poet's mind.you would have concluded by now that the meter "Arya" is particularly dear to the poet. I need not mention that this meter which has a bright history of thousands of years and has enjoyed special favour of Sanskrit poets and Prakrit poets

alike owes its origin to the Prakrit language. It is a Matrik rete, pleasantly lyrical, can be composed to music also.We have a long chain of anthologies comprising many centuries of verses in Prakrit Gathas and Sanskrit Aryas both.

The famous गाथासप्तशती (Gatha Saptashati) comprising 700 verses in Prakrit composed in Arya Verses (गाथा) compiled by हाल (HALA) is well-known in the history of Prakrit and Sanskrit liteature alike.The practice of compiling 700 verses in the name of सप्तशती became so popular that many सप्तशती appeared over the 20 or 25 conturies. Prof. Shiva Datta Chaturvedi has surpassed the effort of pooling up 700 verses. He has composed thousands of Aryas on different subjects over the last 4 or 5 decades, this ocean of Aryas being the climactic publication.You will find that these verses are composed in a pleasent and communicative, easy and lucid style, the language is chaste and unstinted, Every verse of the आर्यार्णव speaks volumes of the scholarly disposition of its poet.

Dr. Shiva Datta Chaturvedi inherits a magnanimous legaley of top-ranking scholars of India. His father late Mahamahopadhyaya Pandit Giridhar Sharma Chaturvedi (1881-1966) was the most outstanding Sanskrit scholar of India, most distinguished and scintillating orator verated throughout the length and breadth of the country, honoured by the President of India as the top most Sanskrit luminary, this award initiating the practice of certificate of honour award to Sanskrit Pandits in the year 1958 For thousands like me he was the greatest model the most eminent Sanskrit spokesman of the 20th century, the very summit of all-round scholorship of all the Shastras with a wonderful com-

mand over the language and immeasurable capacity of sound expression with a thunderous voice and choicest words. He was the Principal of the famous Maharaja Sanskrit College Jaipur before Independence (1926-1944) and was respectfully invited by Mahamana Madan Mohan Malaviya and later Shri Govinda Malaviya to head the Orintal Reseach wing of the Banaras Hindu University where he lived for the rest his life upto June 1966. Shiva Datta as the younger son of this great Sanskrit scholar studied at Jaipur then at Banaras, worked in the Punjab University and also at the Banaras Hindu University as a Professor.

It was quite natural that a worthy son of a worthy father should inherit his qualities of scholarship, oratory and expression.It is a matter of greater satisfaction that Dr. Shiva Datta Chaturvedi inculcated in addition the art of poetry writing in Sanskrit and also story writing. His books of poetry have won the awards of Rajasthan Sanskrit Academy and other learned bodies of Sanskrit. His चर्चामहाकाव्यम् was given the highest award called माघ पुरस्कार by the Rajasthan Sanskrit Academy in 1988-89.

It was also natural that a scholar of such a calibre should in the Presidential award of Certificate of Honour being given to Sanskrit scholar which is the highest award of the country for oriental scholarship.He got this honour in 1999.

The arrival of आर्यार्णव will prove that Sanskrit, the oldest living language of the world is still vibrant with youth and vitality, the poets of this ancient language are not confined to the subjects like देवस्तुति, Puranic and Mythological narratings or समस्यापूर्ति. The Sankrit poet of today writes on

the flavour of tea, Television and other gadgets, electrical energy and family welfare etc. slashes the polluters of environment and speaks about the worship of majority vote in Democracy. These form the subject of some poems in the Anthology also. You will also find tributes givens to great Sanskrit luminaries like कालिदास, श्रीहर्ष, पाणिनि, भवभूति etc., just as to great scholars of the modern age like गिरिधरशर्मा-चतुर्वेदी, भट्ट मथुरानाथ शास्त्री मञ्जुनाथ, चन्द्रधर गुलेरी but the poet has not missed other great personalities who have shone by their dazzling contributions to our Nation and also the world. There are आर्या composed not only on तुलसीदास, कबीर, लोकमान्य तिलक, जवाहरलाल नेहरु, वीर सावरकर etc. but also on Karl Marx and C.V.Raman. Such awareness of the contemporary Sanskrit poetry embellishes the Sanskrit language with youthful exhuberenc. The आर्यार्णव, Therefore, should form a pleasant reading for the old and new generation alike, I hope.

I convey my heartfelt felicitations to Dr. Shiva Datta Chaturvedi on the occasion of the appearance of this sweet and welcome anthology.

Devarshi Kalanath Shastry

Chairperson, Modern Sanskrit Chair J.R.Rajasthan Sanskrit University, Cheif Editor, BHARATI, Sanskrit Monthly, Ex-president, Rajasthan Sanskrit Academy and Former Director, Sanskrit Education and Bhasha vibag, Government of Rajasthan.

Manju Nikunj C/8 Prithvi Raj Road

C . Scheme, Jaipur-30 2001

Rajasthan

भूमिः

आर्या छन्द इतना अधिक प्रिय है इसकी प्रत्यभिज्ञा होती ही चली गई। प्रारम्भिक रूप में तो आर्या छन्द में कुछ अरुचि का अनुभव होने का स्मरण है, परन्तु 'मातङ्गी-स्तोत्र' कण्ठस्थ करने पर और पूज्य स्वर्गीय महामहोपाध्याय परमेश्वरानन्द जी शास्त्री से उसका सस्वर उच्चारण सीखने पर 'आर्या' परम प्रिय मातृतुल्या लगने लगी जो अपने अंचल में शब्दार्थ की दुग्ध धाराओं को पिलाने के लिए सर्वदा उदारता से सामने ही दिखाई देती है। काव्य प्रकाश में आचार्य मम्मट ने आरम्भ आर्या से ही किया–

नियतिकृतनियमरहितां ह्लादैकमयीमनन्यपरतन्त्राम्।
नवरसरुचिरां निर्मितिमादधती भारती कवेर्जयति।।

व्याकरण महाभाष्य में भी आर्या छन्द के दर्शन आचार्य पतञ्जलि ने अनेकत्र कराए हैं। इसी के अनुकरण पर प्राकृत में गाथा का विकास हुआ। यह सारा विषय इस ग्रन्थ के अंग्रजी भाषा के Preface में आदरणीय विद्वत्प्रवर श्रीमान् देवर्षि कलानाथ शास्त्री जी ने स्पष्ट कर दिया है और मेरी आर्या छन्दोरचना प्रवृत्ति के मूल को भी वहां संकेतित कर दिया गया है। आर्या छन्द में मेरी रचना कहने योग्य प्रथम प्रस्तुति श्रीमान् गोस्वामी तुलसीदासजी के वन्दन के रूप में विरचित "गोस्वामितुलसिदासशतकम्" नाम से प्रकाशित होकर पुस्कृत हुई और आगे यह क्रम ऐसा चला कि आज सहृदयों की सेवा में "आर्यार्णवः" प्रस्तुत करने का अवसर आ गया। यह गोस्वामी तुलसीदासजी की वन्दना की अपनी सफलता यदि मैं समझ रहा हूँ तो वह शायद विद्वान् महानुभाव उचित हो मानेंगे।

पूज्यपिताजी (महामहोपाध्याय पण्डित श्री गिरिधर शर्मा जी चतुर्वेदी) ने अपने महाकाव्यसंग्रह नामक ग्रन्थ के अन्त में प्रायः ३० आर्याछन्दों में अपना मनोमोहक परिचय गुम्फित किया, उसे पढ़कर आनन्द की तरंगे उठती रहती हैं। उसी छन्दमाला को उन्होंने और अधिक बढ़ाकर अपने सिद्धान्त वादनामक व्याख्या ग्रन्थ में परिपूर्ण किया और अन्तिम छन्द उन्होंने लिखा-

सम्प्रति सपुत्रदारः कविराजोदितशिवागमाधारः।
वाराणस्यां निवसन् ध्यायति जगदीश्वरीं शिवोरस्थाम्।।

इस पुस्तक के नामकरण का कारण केवल आर्या छन्दोबद्ध अपनी रचनाओं का एकत्रीकरण करते हुए छन्दों की संख्या में वृद्धि का होते चले जाना कहा जा सकता है। साथ ही 'अर्णव' पदान्त काव्यों की भी प्रचुर मात्रा में उपलब्धि और प्रसिद्धि भी इस संज्ञा का कारण है। पहिले तो "शिवलीलार्णवः" एक विख्यात रचना सुप्रसिद्ध है ही, आधुनिक काल की रचनाओं में "श्रीतिलकयशोर्णवः" लोकमान्य बालगङ्गाधरतिलक के जीवनचरित्र पर प्रकाश डालने वाली अपूर्व रचना है श्रीमाधवहरि अणे महनुभाव की, जो बिहार प्रान्त के प्रथम राज्यपाल थे। महामहोपाध्याय श्री रामावतार शर्मा जी ने 'वाङ्मयार्णवः' नामक एक महती 'कोशरचना' प्रस्तुत की है। "श्रीविद्यार्णवः" नाम का एक उपासना पद्धति का प्रतिपादक ग्रन्थ भी सुप्रसिद्ध है। 'अर्णव' शब्द घटित संज्ञाओं का यह प्रायोगिक रूप भी इस प्रस्तुत "आर्यार्णवः" नामकरण का हेतु अवचेतन में बना हुआ प्रतीत हो रहा है।

मैंने अपने कविता संसार विचरण में जिनसे प्रेरणा ग्रहण की उनकी स्मृतियां अत्यन्त उदात्त भी हैं और विभोर कर देने वाली भी हैं, इतना ही नहीं कभी कभी तो याद आने पर आनन्दाश्रुधाराओं को रोक पाना भी कठिन हो जाता है, लगता है वह भी क्या ही जीवनकाल प्रवाह था जो महज निमिषों में ही गुजर गया और जीवन को सफल बना गया। आज भी ७९वें वर्ष की आयु की परिपूर्णता में ये स्मृतियां कुछ लिखने और पढ़ने की निरन्तर प्रेरणा देती रहती है।

मेरा जन्म और बाल्यवय और किशोरवयस्सन्धि का अधिकांश जयपुर अपने मातृनगर के अपने पैतृक आवास में रहते ही व्यतीत हुआ। यह राजस्थान की राजधानी जयपुर नगर आज से ६०-६५ वर्ष पहिले मेरी अपनी प्रारंभिक स्मृतियों के काल में बड़ी ही मनोरम झांकियों से लदा हुआ है। यहां संस्कृत और हिन्दी की कविताओं का एक निरन्तर सर्जनात्मक प्रवाह था जो राज्याश्रय प्राप्त भी था और आन्दोलन प्रेरित भी था, और स्वतः स्फूर्त सारस्वतप्रार्थनारूप तो था ही। संस्कृत कवियों में मैंने कविशिरोमणि भट्ट श्री मथुरानाथ शास्त्री जी, आशुकवि श्री हरिशास्त्री जी प्रभृति विख्यात कवियों का सान्निध्य पाया। हिन्दी कविसम्मेलनों की भी जयपुर में धूम रहती थी। राज्याश्रय के रूप में

कवियों को जागीरें भी प्राप्त थीं जिनमें हमारे पूर्व पुरुषों का स्थान चला आता था और 'कवीश्वर' यह उपाधि राज्यप्रदत्त थी। मैंने देखा था कि पूज्य पिताजी सप्ताह में एक निश्चित दिवस पर राजदरबार में जाते और इससे पूर्व की सभा में घोषित 'समस्या' या कविता के प्रतीक शब्द की पूर्ति करके उसका दरबार में प्रभाव पूर्ण सस्वर वाचन करते थे। इन अवसरों पर एकाधिक बार वे मुझे भी अपने साथ ले गए थे जिससे दरबार में महाराजा के समक्ष अनेक कवीश्वर उपाधिधारी महानुभाव व्रजभाषा या खड़ी बोली और कभी-कभी जयपुर में बोली जाने वाली ढूंढारी भाषा या बोली में ताजा रचनाओं का अत्यन्त आकर्षक वाचन करते थे। जयपुर में अनेक विद्याशलाओं के प्रगतिमान होने के कारण वहां के वार्षिकोत्सवों के अवसर पर प्राय: कविसम्मेलनों के आयोजन होते थे। उनमें भी अत्यन्त आधुनिकता से भरी हुई कविताओं के श्रवण का आनन्द प्राप्त होता रहता था।

जयपुर में हमारे आवास से ही संस्कृत भाषा में अनेक दशाब्दियों तक मासिकपत्र "संस्कृतरत्नाकर:" इस नाम से प्रकाशित होता था। उसके प्रारम्भ कर्ताओं में जयपुर का संस्कृत विद्वन्मण्डल पूर्णतया सम्मिलित था, मेरे पूज्यपिता महामहोपाध्याय पण्डित श्री गिरिधरशर्मा जी चतुर्वेदी कविशिरो मणि भट्ट श्रीमथुरानाथशास्त्री, जिनका कविता का उपनाम "मञ्जुनाथ" था, प्रारंभ में "संस्कृतरत्नाकर:" के सम्पादक थे। बाद में मेरे पूज्य पिताजी का नाम और हमारे घर का पता प्रकाशक के रूप में मुद्रित होता था।

उसके प्रत्येक मास के अंक में एक आर्याछन्दोबद्धरचना आदर्श वाक्य के रूप में छपती थी-जिसका निर्माण जयपुर के राजगुरु श्रीचन्द्रदत्तजी ओझा गुरुप्रवर ने किया था-

"चित्रं द्विजपतिमण्डलकलासमृद्ध्याऽयमेधमानोऽपि।
वेलामनतिक्रामन् संस्कृतरत्नाकरो जयति।।"

चन्द्रमा (द्विजपति) की कलाओं के बढ़ने पर रत्नाकर या समुद्र अपनी तरंगों से बहुत ऊपर उठकर भी तट के आगे नहीं बढ़ता वैसे ही (द्विजपाति मण्डल) विद्वद्गण की विद्वत्ताओं के गुणों से बढ़ती हुई भी यह "संस्कृत रत्नाकर:" नामक मासिकपत्रिका वेला या समय का अतिक्रमण नहीं करती, नियत समय पर प्रकाशित होती है। मुझे याद है कि मैं प्रात: काल उठकर 'अमरकोश' का उच्चस्वर में उच्चारण करता था जिसे मेरे पिता जी घर के

भीतर के चौक में दांतन करते हुए घूमते जाते और सुनते जाते थे। इस प्रकार के दैनिक क्रम से पूरा अमरकोश बचपन में ही कण्ठस्थ कर लिया गया था।

मेरे पूज्यपिताजी ने विख्यात जयपुर संस्कृतकोलेज के अध्यक्ष पद से १९४४ में अवकाश ग्रहण किया, तब मैं इसी संस्था के स्कूल विभाग में पंचम कक्षा में अध्ययन कर रहा था। पिताजी ने यहां से सेवा निवृत्त होकर लाहौर (पंजाब) में एक शोधसंस्थान की स्थापना विद्यापीठ के रूप में करवा कर वहां का संचालक पद अपने सिर पर ले लिया था और तभी वे मुझे भी लाहौर अपने साथ ले गए थे। इससे पहिले भी पूज्य पिताजी लाहौर में १० वर्ष वहां के संस्कृत कोलेज के अध्यक्ष के रूप में मेरे जन्म से पहिले रह चुके थे, अत: लाहौर नगर की संस्कृत और धार्मिक जनता उनसे सुपरिचित थी। वहां भी मैंने संस्कृत, पंजाबी और उर्दू, फारसी कविता के प्रवाह में अवगाहन का पर्याप्त आनन्द प्राप्त किया। इसके पश्चात् हरिद्वार के ऋषिकुल में निवास करते हुए श्रीमान् शशिधरशास्त्री जी का भी सहवास प्राप्त कर नित्यनूतन संस्कृत रचनाओं के प्रवाह में बहते रहने का अवसर मिलता रहा। अलवर के प्राय: २ वर्षों के निवास में भी हिन्दी कविताओं का गोष्ठियों और कवि सम्मेलनों में रस मिलता रहा।

अपनी सर्जनात्मकता से मेरा निकट और निरन्तर का साथ यद्यपि उक्त स्थानों पर रहते हुए होने पर भी प्रधानता से यह उल्लास अनुभूतियां तो काशी में आने पर ही हुईं चण्डीगढ़ में भी श्री परमेश्वरानन्दजी के सान्निध्य में एक रचना प्रतिदिन का उनके उपदेश से नियम बना लिया गया था। मेरे पूज्य पिताजी (महामहोपाध्याय पण्डित श्री गिरिधर शर्मा चतुर्वेदी जी) ने एक बार एक महान् अंग्रेजी भाषा के लेखक के विषय में अपनी सुनी हुई बात कही थी कि उस लेखक की लिखी और छपी पुस्तकों से एक पूरी आलमारी भरी हुई जब उनके एक घनिष्ठ मित्र ने उनके निवास में देखी तब इतनी पुस्तकें कैसे आपने लिख डालीं इस प्रश्न पर मेजबान लेखक ने उत्तर दिया कि मैंने लिखने का अपनी किशोर वय से ही यह नियम बना लिया था कि-एक पंक्ति रोज लिखना। उसी नियम को आज तक अंजाम देने से इतना साहित्य तैयार हो सका। मनोविज्ञान यह है कि नियम कम से कम का अपनाना उचित है सत्कार्य के प्रति। कोई अच्छी भावना वाला लेखक एक पंक्ति नहीं लिखेगा, वह कितने ही पन्ने लिख डालेगा, परन्तु यदि परिस्थिति

वश अवसर नहीं मिला तो भोजनादि नित्य प्रक्रियाओं की भांति एक पंक्ति वह अवश्य लिखेगा।

काशी में गोस्वामितुलसिदासशतकम्' की रचना के साथ मेरा दैनिक नियम प्रातः ५ से ६ बजे के बीच काशीहिन्दूविश्वविद्यालय में अपने आवास से छोटी पॉकिट डायरी और फाउन्टेन पैन लेकर घर से निकल कर भ्रमण करते हुए किसी भी स्वतःस्फूर्त विषय पर घूमते हुए आर्याछन्द में लिखने का बन गया और प्रायः किसी प्रारब्ध विषय पर एक सौ आर्या मार्ग में ही डायरी के पन्नों पर संख्या डालते हुए लिख ली जातीं और तत्काल घर लौट कर कार्बन लगे कागजों पर उन्हें फेयर लिख कर तैयार कर पत्रादि लिखते हुए संस्कृत की साप्ताहिक, मासिक पत्रिकाओं को या तो उसी दिन या दूसरे दिन प्रेषित कर दी जातीं। ये सभी रचनाएं उन पत्रिकाओं में प्रकाशित होती जातीं। प्रेषण का यह क्रम कुछ काल बाद शुरू किया गया था, प्रारम्भिक दिनों में फेयर लिख लेने के उपरान्त मैं इन रचनाओं को मेरे उत्साह वर्धक श्रीमान् स्वर्गीय रतिनाथजी झा महोदय जो प्रतिदिन कालेज में अध्यापक के रूप में दर्शन देते थे, उन्हें तथा कभी-कभी अपने गुरु श्रीमान् आचार्य बटुकनाथशास्त्री खिस्ते जी को दिखा देता था और ये महानुभाव भी कृपापूर्वक तत्काल पढ़ कर आवश्यक संशोधन कर देते थे। संशोधन की यह प्रेरणा मैंने श्रीमान् गुरुवर रामकुबेर मालवीय जी से भी प्राप्त की थी, जहां उनकी कविताओं में मैं स्वयं कुछ संशोधन प्रस्तुत करता और जिसको सुनकर वे बड़े हर्ष से उछल से पड़ते थे। मैंने देखा कि मेरे सुझाव के साथ उनकी कविता चमकती हुई उच्चारित होकर आनन्ददादिनी बन जाती थी, बाद में अपनी रचना के लिए यह कार्य श्री रतिनाथ झा जी के द्वारा मैंने प्राप्त किया। लेखन प्रवाह में कई बार भाषा की व्याकरण सम्बन्धी त्रुटि हो जाना स्वाभाविक था, परन्तु उससे अधिक स्वाभाविक था उसका अज्ञान वश ठीक होने का मिथ्या अहसास। यह अहसास अन्यत्र एक ज्वर की तरह मस्तिष्क को अभिभूत रखता है, यह मैंने इन महानुभावों के अतिरिक्त लोगों के प्रति स्वयं में भी अनुभूत किया तथा अन्यत्र अनेकों को तो इस रोग से ग्रस्त ही निरन्तर देख कर मन ही मन उनके प्रति हँसी का अनुभव किया।

यह 'ज्वर' की संज्ञा तक पहुँचा हुआ रोग-"ज्वर इव मदो मे व्यपगतः" इन शब्दों में भर्तृहरि महाराज ने संकेतित किया है। पत्रिकाओं में अनेक

आर्या छन्दोबद्ध रचनाओं के प्रकाशित होने के उपरान्त अनेक अभिनन्दन ग्रन्थों और स्मृति ग्रन्थों में प्रकाशनार्थ अनेक आदरणीय महानुभावों के प्रति अपने उद्‌गारों को भी आर्या छन्दों की शतक काव्यरचनाओं में मैं अपने प्रभात भ्रमण में लिखता गया और वे सभी रचनाएं यथास्थान मुद्रित होती जाने और विद्वान् सहृदयों के द्वारा प्रशंसात्मक समालोचनाओं के श्रवण से उत्साह बना ही रहा। यह शतक रचनाक्रम आज भी निरन्तर प्रचलित है और प्रस्तुत "आर्यार्णव:" जितनी ही संख्या की रचनाएं इस के अतिरिक्त पुन: प्रस्तुत हैं। अनेक शतकरचनाओं की मूल और प्रकाशित दोनों प्रतियां मेरे पास अब स्मृति में ही उपलब्ध हैं, संग्रह से लुप्त हो चुकी हैं। मेरी चार आर्या छन्दोबद्ध संग्रह रचनाएं "स्फूर्तिसप्तशती" "चर्चामहाकाव्यम्" "सत्यं शिवं सुन्दरम्" तथा "शतकसंहिता" इन नामों से प्रकाशित चर्चित और पुरस्कृत हो चुकी हैं, साथ ही ये उक्त सभी रचनाएं अनुपलब्ध भी हैं। अनेक मैसूर, चण्डीगढ़, देहली आदि विश्वविद्यालयों के प्रोफेसर महोदयों ने उक्त रचनाओं पर अपने छात्रों को पी.एच.डी. उपाधि के लिए शोध करने का विषय देकर पुस्तक की अनुपलब्धता से त्रस्त लहजे में मुझे फोन किया, पत्र भी लिखे, मेरे स्वयं के पास भी उक्त रचनाओं की केवल एक-एक प्रति ही सुरक्षित रह पाई हैं अत: उनकी फोटोप्रतियों की उन्होंने स्वयं व्यवस्था करवा कर शोध कार्य पूर्ण कराया। इस 'आर्यार्णव:' में उन सभी का समावेश कर लेने से यह रचना बड़ी हो गई है। इस ग्रन्थ के टंकण में जाने तक जितनी अन्य नूतन रचनाएं लेखन में अवतरित हुईं उनका भी समावेश इनमें होता गया है। रचनाओं के विरचन की प्रेरणा में उनका तत्काल मुद्रण हो जाना प्रमुखता रखता आया है मेरे अपने लिए। मेरे अनेक छात्रों ने भी अनेक रचनाओं को मुझसे लिखवा कर अपनी पत्रिकाओं में प्रकाशित किया है। आज भी यह क्रम जारी है। अभी "राष्ट्रकविमैथलीशरणगुप्तशतकम्" तथा "दिनकरवन्दनम्" रचनाएं लिखी जा रही हैं, इनको प्राप्त करने का आवाहन प्राय: प्रतिदिन ही फोन पर मिल रहा है, ऐसी ही प्रेरणाएं हुई हैं और मिल रही हैं। "कार्लमार्क्स शतकम्" की रचना के साथ एक जो विलक्षणता हुई वह याद आ रही है।

श्री राहुल सांकृत्यायन पर शोध करने वाले एक शोध छात्र से घनिष्ठता एकाएक बढ़ जाने पर उनके द्वारा एकत्र की गई, राहुल जी की सभी रचनाओं को मैंने क्रम क्रम से पढ़ लिया और तत्काल उनके द्वारा प्रतिपादित कार्ल मार्क्स

के जीवन पर एक शतकरचना आर्या छन्द में अपने दैनिक भ्रमण क्रम में तैयार हो गई। काशीहिन्दूविश्वविद्यालय की विख्यात पत्रिका "प्रज्ञा" का उन्हीं दिनों "कार्लमार्क्स" विशेषांक प्रकाशित होने का निश्चय हुआ यह बात विश्वविद्यालय के आवास में मेरे प्रतिवेशी, 'प्रज्ञा' के सम्पादक डॉ. राममोहन पाण्डेय से वार्ताक्रम में जब मुझे ज्ञात हुई तब मैंने उनसे अपनी संस्कृत रचना "कार्लमार्क्सशतकम्" का उनसे जिक्र किया, उन्होंने मुझे यह कहा कि विशेषांक के सम्पादक डा. दीपकमलिक महोदय नियुक्त हुए हैं, वे अभी एक मीटिंग करके उसकी रूप रेखा निश्चित करेंगे,मैं जब आपसे रचना देने की कहूं तब आप मुझे दे दें, तब तक अपने पास ही सुरक्षित कर लें। इस बात को कई माह का समय बीत जाने पर एक दिन जब पुन: पाण्डेय जी से भेंट हुई और मैंने अपनी कार्लमार्क्स सम्बन्धी शतक रचना की उन्हें याद दिलायी तो उन्होंने बतलाया कि 'प्रज्ञा' का कार्लमार्क्स विशेषांक तो छप कर पूर्ण रूप से तैयार भी हो चुका है, आपने अभी तक दिया क्यों नहीं अपना 'शतककाव्य'। यह उलटा उलाहना सुनकर मैंने उन्हें उनकी कही हुई बात का जब स्मरण दिलाया तो मुझसे उन्होंने तत्काल रचना लेकर संपादक महोदय को उसे दिया। उसे देखकर संपादक महोदय ने कहा कि 'कार्लमार्क्स' पर संस्कृत भाषा में काव्य रचना एक सुखद आश्चर्य है यद्यपि जयपुर के श्रीपद्म शास्त्री जी की "लेनिनामृतम्" नाम की संस्कृत रचना विख्यात हो चुकी है। उन्होंने "कार्लमार्क्सशतकम्" रचना को 'प्रज्ञा' के विशेषांक में बिना पृष्ठसंख्या के ही सर्वारम्भ में प्रकाशित करने का निश्चय कर वैसे ही प्रकाशित कर दिया और उस रचना पर सोवियतएम्बेसी से प्रशंसात्मक धन्यवाद पत्र भी प्राप्त हुआ।

ऐसी घटना अन्यत्र भी घटित हुई थी, जिनका उल्लेख अनावश्यक है। राष्ट्रपति सम्मानित जयपुर में निवास करते हुए श्रीमान् आचार्य डा.नारायण लाल जी कांकर और उनके पूज्य पिता राष्ट्रपति संमानित आचार्यप्रवर श्रीनवलकिशोर जी कांकर महानुभाव तथा सर्वोपरि मेरे पूज्य पिता जी (महामहोपाध्याय पंडित श्री गिरिधरशर्मा जी चतुर्वेदी) कवि शिरोमणि भट्ट श्री मथुरानाथ जी शास्त्री मञ्जुनाथ उनके आज विश्वविख्यात तथा अन्तर्राष्ट्रीय ख्याति प्राप्तप्राच्य पाश्चात्यसाहित्य विशारद् राष्ट्रपति संमानित श्रीदेवर्षिकलानाथ जी, आशुकवि कविभूषण श्रीमान हरिशास्त्री जी आदि के साहित्य तथा संस्था निर्माण और संचालन का संस्थापक सदस्य के रूप में उनके द्वारा प्रेरित

होकर वही प्रेरणा लेकर १९५२ में मध्यमा कक्षा के तृतीयवर्ष से अपना अध्ययन आगे बढ़ाने के लिए मैं पूज्य पिताजी के साथ वाराणसी आ गया। जयपुर में मेरे प्रेरणा स्रोतों में आचार्य भवदत्त जी मैथिल महानुभाव, आचार्य दुर्गादत्तजी महोदय, आचार्य 'पट्टाभिराम' शास्त्री जी, डा.मंडनमिश्र जी, श्रीमान रविकिरण दास महंत, श्रीरमाकान्त शर्मा जी प्रभृति अनेक पुरुष श्रेष्ठ ऐसे थे कि जिनसे मैं अपनी रचना प्रक्रिया में निरन्तर प्रेरण पाता रहा। आचार्य प्रभुनारायण जी नाट्याचार्य, सहृदय भी हमारे प्रमुख प्रेरणा स्रोत थे। पिता जी की अपनी विशाल लाइब्रेरी और प्रतिमास ही क्या प्रतिदिन ही डाक से आने वाली विभिन्न पत्रिकाओं के अवलोकन से रचना प्रक्रिया का प्रेरित होना स्वाभाविक है। अपनी कविता यात्रा में प्रारम्भिक महत्त्व पूर्ण भूमिका रही अन्त्याक्षरी प्रयोगों की। बाल्यकाल में रचना न हो सकने पर अपनी कण्ठस्थीकरण की प्रवृत्ति को गतिमान रूप से अनुप्राणित करने के लिए छात्रों में श्लोकों और हिन्दी पद्यों में अन्त्याक्षरी स्पर्धाओं का प्रचलन बहुत ही लाभदायक था, मेरा अपना अनुभव आज भी यह है कि मुझे कितने श्लोक कण्ठस्थ हैं उनकी गणना मैं नहीं कर सका। अन्त्याक्षरी के महीनों वर्षों चले दैनिक जैसे क्रमों में नई-नई कविता बोल पाने और अन्तिम विजय पाने की ललक के कारण कविताओं की कण्ठस्थ करने की प्रवृत्ति उस काल में अत्यन्त जागरूक भी थी और कुछ ही आवृत्तियों पर श्लोक या कविताएं कण्ठस्थ हो जाती थीं जिन्हें अन्त्याक्षरी में बोलकर एक चमत्कार की सृष्टि कर दी जाती थी। इससे नए नए शब्दों से नित्य परिचित होते जाने का जो सुअवसर हाथ लगा वही आगे स्वयं की रचनाओं को सम्बल देता दिखाई दिया। यह एक पूरे छात्रवर्ग के द्वारा अपनाई गई प्रक्रिया थी, जिसे इस काल मैं अपने "आर्यार्णव:" रचना की निर्मिति के क्षणों को रूपायित करते हुए लिपिबद्ध कर रहा हूँ। जयपुर की "संस्कृतवाग्विवर्धिनी परिषद" जिसके प्रमुख प्रारम्भक श्रीमान् आचार्य नारायणलालजी कांकर महानुभाव तथा मैं स्वयं हैं, उन्होंने हम लोगों में भी पर्याप्त प्रेरणा का संचार किया। जयपुर नगर में दादाभाई के नाम से विख्यात श्रीमान् माननीय स्वर्गीय गिरिराजकिशोर जी महानुभाव राष्ट्रीय स्वयं सेवकसंघ में सम्मिलित होने के लिए निरन्तर प्रेरित करने वाले और काव्यप्रवृत्तियों को निरन्तर गति देने वाले महापुरुष के रूप में हम लोगों में देखे जा रहे थे जिन्होंने इस काल पूरे विश्व में "भारती"

पत्रिका के माध्यम से संस्कृत जगत् में अपना अक्षुण्ण स्थान बना लिया है। मैं इसी अपने स्मृति संसार को सहेजता हुआ काशी पहुंचा था।

काशीहिन्दूविश्वविद्यालय हमारी हृदय की धड़कनों का संचालक है, जिसमें महामना का पुण्यप्रवाह निरन्तर गतिमान है। मेरे स्वर्गीय पूज्य पिताजी (महामहोपाध्याय पण्डित श्रीगिरिधरशर्माचतुर्वेदी) का ब्रह्मर्षि मालवीय जी महाराज से प्राय ६०, ७० वर्ष पुरातन संबध रहा, धार्मिक आयोजनों और संस्कृत से सम्बन्धित महामनाजी के अनेक देशव्यापी और संसारव्यापी आयोजनों में पिताजी को उन्होंने निरन्तर आहूत किया था। हिन्दूविश्वविद्यालय की संस्कृत 'शिक्षा' सम्बन्धी सभी समितियों और धार्मिक समितियों में भी महामनाजी पिताजी को बराबर बुलाते थे। अपने लाहौर निवासकाल में पिताजी ने वहां महामना जी के अनेक धार्मिक भाषणों को आयोजित किया और पिताजी भी अपने लाहौर में स्थापित विद्यापीठ के पाकिस्तान बन जाने के कारण योजना के समाप्त हो जाने की खिन्नता के कारण काशी आने को तैयार हो गए और आ भी गए। एक वर्ष बाद ही जयपुर संस्कृत कालेज के उपाध्याय कक्षा की परीक्षाएं पूर्ण कर मैं भी काशी में पिताजी के द्वारा आहूत कर लिया गया और तभी से मुझे अपने कवि जीवन की धीमी बहती धारा को अधिक प्रवाह देने का अवसर मिलता गया।

इस विवरण के विस्तार को देखते हुए पाठक महानुभाव यह सोच सकते है कि यह 'आर्यार्णव:' पुस्तक की "भूमि:" है या आत्मकथा है। यहां भी एक छोटी सी कथा कह देना अनिवार्य है, श्रीमान् देवर्षि कलानाथ शास्त्री जी काशी में सम्पूर्णानन्दसंस्कृतविश्वविद्यालय में जब दीक्षान्त भाषण करने पधारे और कुलपति आवास में मैंने उनसे भेंट की तो "आर्यार्णव:" का मेरे निवेदन पर उनका अंग्रेजी में लिखा Preface मेरे हाथ में था। विचार हुआ कि मैंने स्वयं संस्कृत में भूमिका लिख दी है। अंग्रेजी में उनका Preface प्राप्त हो ही चुका है, अब हिन्दी में भी एक भूमिका भाग होकर तीनों भाषाओं में भूमिका हो जाने से यह सारस्वत अनुष्ठान सम्पन्न हो जायगा। हिन्दी में लिखने के लिये आदरणीय श्रीविद्वद्वर जगन्नाथपाठक जी महानुभाव को लिखने का निश्चय किया गया, वे मेरे परमादरणीय हैं। जब मेरी संस्कृत में भूमिका का पहिला प्रूफ मेरे हाथ में आया और उसकी कुछ पंक्तियां मैंने पढीं तब कुछ तो अपनी घसीट लिखावट को ठीक से न पढ़ा जाने के कारण और

कुछ छन्दों के अभ्यास से अलग हटकर कम्प्यूटराइज करने की दिक्कत के कारण इतनी अधिक अशुद्धियां दिखाई दीं कि आधा पेज पढ़ते-पढ़ते और शुद्ध करते-करते सिर चकरा गया और आस्वादन का आनन्द तो बहुत दूर निकला सा लगा। तभी मैंने उस संस्कृतभूमिका को स्थगित करके अपनी भूमिका हिन्दी में ही लिखने का निश्चय किया और तब से यह लेखनी चल रही है।

आचार्य डा.जगन्नाथ जी से भेंट हुए अनेक वर्ष हो गए। वे मेरी कविता यात्रा के प्रमुख प्रेरक हैं। पहिले संस्कृत महाविद्यालय काशी हिन्दू विश्वविद्यालय में, एम.ए. (संस्कृत) में दो वर्षों तक मेरा और उनका साथ रहा, तीसरे थे आचार्य डॉ.कैलाश पति जी त्रिपाठी, जिनका विगत वर्ष दु:खद तिरोधान हो गया। केवल डा.जगन्नाथ जी से मिलने के लिए ही मैं काशीहिन्दूविश्वविद्यालय के स्वतन्त्रताभवन में उनके तथा अन्य पुराछात्रों के सम्मान के आयोजन में तीन घंटे बैठा रहा, परन्तु अफसोस कि जब सभा समाप्त होने पर उनसे मिलने का अवसर आया तब शारीरिकरोधक अक्षमता से अधिक त्रस्त होकर वहां की लम्बी कतार के कारण प्राय: १५ मिनिट के व्यतिक्रम के बाद मैं उन्हें सायंकाल तक ढूंढ़ता ही रहा कि वे कहां मिलेंगे, वहां तो वे नहीं मिले, लेकिन बाद में भी आज तक उनसे भेंट नहीं ही हो पाई। उनके पते और फोन आदि से भी मैं वंचित बैठा हूँ। वे और मैं दोनों ही अभी सशरीर हैं इसलिए बलवती आशा है कि कभी उनसे मिलना संभव होगा।

मैं पुन: अपने काशी आगमन पर लौटता हूँ। पिताजी के साथ काशी आने के बाद मुझे पहिली बार अनुभव हुआ कि यह जीवन बहुमूल्य है और यहां इतना अधिक अर्जित करने को है। वर्ना जयपुर आदि स्थानों पर रहते हुए अपने भविष्य के प्रति धारणा बहुत सामान्य स्तर की ही थी। काशीहिन्दू-विश्वविद्यालय में दर्शन विभाग के प्रमुख डा.चन्द्रधर शर्मा महानुभाव से जो यहां हमारे प्रतिवेशी थे, बहुत प्रभाव ग्रहण करता रहा। वे संस्कृत काव्य रचनाओं में भी बहुत प्रवीण थे और "स्तोत्रश्री श्रद्धाभरणम्" नामक खण्ड काव्य उनकी मनोरम रचनाओं को प्रतिदिन निर्मिति काल में सस्वर सुनने का सुखप्रद अवसर मुझे निरन्तर मिलता रहा। संस्कृत पद्यों के स्वर श्रवण का आनन्द मेरे पूज्य पिताजी के सनातनधर्म के मंचों पर साथ रहने वाले पांच-महाकाव्यों के रचयिता कविरत्न अखिलानन्दजी के द्वारा भी मिलता रहा और

उस श्रवण काल में चित्त की विगलितवेद्यान्तर स्थिति का अनुभव भी होता रहा। हिन्दी कविता में स्वर का वैसा ही जादू श्रीगोपालदासनीरज की कविताओं के पाठ स्वर में भी मैंने अनुभव किया। यहां कवितापाठ और रचना को प्रोत्साहित करने वालों में प्रमुख गुरुप्रवर श्री रामकुबेरमालवीय जी थे, श्रीमान् आचार्य मधुसूदन शास्त्री जी भी यहां विख्यात थे। मैंने यहां के सुप्रसिद्ध श्यामासंस्कृतविद्यालय से व्याकरण मध्यमा के अवशिष्ट दो खण्ड पूरे किये। इसी बीच डा. चन्द्रधर शर्मा जी की सत्प्रेरणा से 'हाई स्कूल' परीक्षा भी मैंने उत्तीर्ण की।

मेरा यह काशी में अपने पूज्य पिताजी के साथ आना काशी विश्वनाथ की ही महती कृपा का परिणाम मेरे जीवन को आलोकित करता चला आ रहा है। अपने कण्ठगत विपुल और सुदुर्लभ श्लोकों या संस्कृत कविताओं के कारण मेरी संस्कृत और हिन्दी भाषा में प्रवाह आता चला गया, सभाओं में और व्यावहारिक संभाषणों में कुछ ही दिनों में उस समय के काशी के संस्कृत और हिन्दी छात्र समुदाय में मैंने अपना एक स्थान बना लिया। मेरे मित्रों में डा. श्रीरामशंकरभट्टाचार्य, श्रीनारायणदत्तशर्मा, स्वामी केशवपुरी जी, श्रीरामरंगशर्मा, आचार्य डा. कैलाशपतित्रिपाठी जी, आचार्य डा. श्रीजगन्नाथपाठक, आचार्य श्रीगंगाचरणअग्निहोत्री, श्रीमान् रामसुमिरणाचार्यजी, डा.उमाशंकरव्यास जी, पोलैण्ड निवासी श्री व्रिस्की आदि थे। डा.रेवाप्रसाद द्विवेदी जी आदि मुझ से एक कक्षा आगे के छात्र थे। सांगवेद विद्यालय जो यहां का एक प्रतिष्ठित पुरातन समृद्ध विद्यालय है, वहां के अनेक छात्र न्याय शैली में अत्यन्त ओजस्वी थे जिनमें आचार्य हरिराम 'शास्त्री' जी के सुयोग्य सुपुत्रों का स्मरण आलोकित करता है। श्री दामोदरजी 'शास्त्री' भी अपनी विविध आयामी प्रतिभा से आनन्दित करते थे।

काशीहिन्दूविश्वविद्यालय में भारत विख्यात हिन्दी और संस्कृत के विद्वानों का जमघट था। अपने संस्कृतमहाविद्यालय के अनुभवों को तो मैंने अपने एक स्वतन्त्र विस्तृत लेख में शब्दपूजा अर्पित कर दी है, आचार्य हजारीप्रसाद जी द्विवेदी, डा.वासुदेवशरणअग्रवाल एवं डा. राजबलीपाण्डेय आदि अनेक विश्वविख्यात विभूतियों के प्राय: साप्ताहिक सान्निध्य का आनन्द भी हमने खूब लिया। आचार्य बलदेवउपाध्याय जी महानुभाव से तो एम.ए. कक्षा में अध्ययन भी किया और उनका सौप्रस्थानिक भी सम्पन्न

किया। बाद में काशीहिन्दूविश्वविद्यालय में आचार्य नरेन्द्रदेव के कुलपति पद से निवृत्त हो जाने पर और शीर्ष संचालकों के परिवर्तन होने पर पिताजी ने अपना हिन्दूविश्वविद्यालय से पद सम्बन्ध और आवास का विसर्जन कर दिया परन्तु काशी निवास नहीं छोड़ा और नगर में काशीविश्वनाथमन्दिर के नितान्त समीप श्रीमान् राजा बलदेवदासबिड़ला के द्वारा निर्मित आवास में निवास किया। हम चार लोग यहां थे, मेरे माता पिता, मैं तथा भागिनेय श्री दिनेशचन्द्र। यहां आने पर अपनी साहित्यशास्त्री और साहित्याचार्य कक्षाओं में तथा इण्टरमीडियट की कोचिंग कक्षाओं में जो विद्वानों और मित्रों का सान्निध्य मिला, गर्व और आनन्द होता है उन्हें वर्तमान में ऊँचे ऊँचे पदों पर प्रतिष्ठित देखकर और उनसे विगत दिवसों के अनुभवों को साझा करने का आनन्द भी प्राप्त होता ही रहता है। इस काल में अपनी साहित्य सेवा के आनन्द में निरन्तर वृद्धि करने के उद्देश्य से "वाराणसेयसंस्कृतसंसद" नाम की संस्था का प्रारंभ हुआ, जिसके द्वारा, कालिदासजयन्ती सप्ताह के सफल आयोजनों को समस्त काशी के प्रमुख कोलेजों के प्रांगणों में आयोजित किया गया। तीनों विश्वविद्यालयों में तथा प्रमुख नगरस्थ विद्यालयों में वाराणसेय संस्कृतसंसद के अनेक साप्ताहिक अधिवेशन सम्पन्न किये जाने से यहां के संस्कृत जगत् में एक संगठनामृत का आस्वाद होने लगा और धीरे धीरे वाराणसेयसंस्कृतसंसद के अधिवेशनों की प्रतिक्षा की जाने लगी।

मैंने अपने इन चार वर्षों के काशी निवास में ही अपने भीतर ज्ञान की पिपासा की और कविता के सौन्दर्य की ललक का तीव्र अनुभव ही नहीं किया अपितु पूज्य पिताजी के सहचरभाव का चिरआकांक्षित और स्पृहणीय लाभ लेते हुए उन वांछाओं की अभीष्ट परिपूर्ति भी की। मैं स्वयं को काशी में विश्वनाथ भगवान् की कृपा की वर्षा से ओतप्रोत अनुभव करते हुए यह भी अहसास करता रहा कि विगत प्रायः ६ वर्षों का मेरा जीवन लाहौर, हरिद्वार, अलवर और जयपुर के निवास में देशाटन, स्थान दर्शन महान् व्यक्तित्वों के साक्षात्कार की पूंजी के बाद गंभीर ज्ञानार्जन की दृष्टि से नगण्य ही रहा जिसकी आंशिक परिपूर्ति के रूप में श्री विश्वनाथ के चरणों का सन्निधान काशी में मिला।

मैंने शास्त्री कक्षा में अपना विषय साहित्य ग्रहण कर लिया, जब कि मध्यमा और जयपुर की उपाध्याय कक्षाओं में मेरा विषय संस्कृत का

व्याकरणशास्त्र था, और सिद्धान्तकौमुदी का पूर्णतया पठन मध्यमाकक्षा में हुआ। जयपुर की शास्त्री और आचार्य कक्षा और परीक्षाओं को मैंने व्याकरण विषय लेकर ही व्यक्तिगत छात्र के रूप में उत्तीर्ण किया, जब कि काशी में मैं विश्वविख्यात गवर्नमैन्टसंस्कृतकोलेज, जो आज संपूर्णानन्दसंस्कृतविश्व-विद्यालय के रूप में पूर्णतया विश्वविख्यात और प्रतिष्ठित है, वहां का नियमित छात्र बन गया। इस संस्था में गुरुवर मुकुन्दशास्त्री खिस्ते, गुरुवर बटुकनाथशास्त्री खिस्ते तथा आचार्य द्विजेन्द्रनाथमिश्र निर्गुण ये तीनों साहित्य विषय के अध्यापक के रूप में हमें प्राप्त हुए, तथा श्रीमान् अनन्तशास्त्री फड़के, आचार्य रघुनाथशास्त्री जी, भूपनारायणझा, आचार्य देवदत्तजी, आचार्य बदरीनाथ शुक्ल आदि देशख्यात विद्वानों के प्रतिदिन दर्शन और उनका सान्निध्य अपने आप में कविताएं ही थीं।

मैंने काशीनागरीप्रचारिणी, श्रीतुलसीपुस्तकालय भदैनी तथा काशी विद्यापीठ और काशीहिन्दूविश्वविद्यालय के संस्कृत और हिन्दी विभागों तथा रुइया और बिरला छात्रावासों में अनेक काव्य गोष्ठियों को सुना और कई गोष्ठियों में स्वयं भी प्राय: भाग लिया। श्रीमान् पद्मनारायणाचार्य, कान्तानाथ पाण्डेय राजहंस, डा. श्रीकृष्णलालशुक्ल, डा. रामनरेशवर्मा, श्रीमान् बेढ़ब बनारसी, श्रीमान् बेधड़कबनारसी आदि आचार्यों और कवियों के अनेक श्री साक्षात् श्रवण के अवसर मिलते रहे।

'वाराणसेयसंस्कृतसंसद' के द्वारा एक वर्ष शायद १९५४-५५में कालिदास जयन्ती सप्ताह समारोह का जो आयोजन हुआ उसके उपरान्त उज्जयिनी में आचार्य पद्मभूषण सूर्यनारायण व्यासजी महानुभाव के सत्प्रयत्नों के फलस्वरूप राष्ट्रपति देशरत्न महामहिम श्रीराजेन्द्रबाबू जी ने अब तक निरन्तर वार्षिक रूप से गतिमान सप्ताह व्यापी अखिल भारतीय कालिदास समारोह का उद्घाटन किया। इससे प्रोत्साहित होकर उसके अग्रिम वर्ष काशी में भी हम लोगों ने "वाराणसेय संस्कृतसंसद' की ओर से कालिदासजयन्ती पक्ष की पूरी रूप रेखा बना कर काशी की विभिन्न संस्थाओं के प्रधानाचार्यों से संपर्क और उनकी सम्मति लेते हुए, विभिन्न विषय, सभापति और प्रमुख वक्ताओं के नामों के साथ पूरा कार्यक्रम छपाकर वितरित किया जिसमें दो विशेषताएं यह रहीं कि एक तो संस्कृत से दूर-दूर तक सम्बन्ध न रखने वाले साइन्स इंग्लिश आदि शिक्षण केन्द्रों में इन आयोजनों को सम्पन्न किया, इस विचार में

प्रमुखता यह रही कि कालिदासजयन्ती के आयोजन संस्कृत विद्यालयों के लिए कोई नई बात नहीं, कविकुलगुरुकालिदास से तो सभी संस्कृत के छात्र परिचित ही रहते हैं। जिनमें कालिदास से परिचित होने की गुंजाइश देर तक नहीं है, उनके बीच जाकर कालिदास जयन्तियों के आयोजन से इस भविष्य के स्पृहणीय वर्ग में कालिदास की विशेषताओं के उजागर करने से उनकी स्मृति में कालिदास के द्वारा वर्णित आदर्श और विचार निरन्तर प्रकाशित होते रहने का अवसर हाथ लगना उचित होगा। यही विचार मैंने प्रतिवर्ष महिमामय श्रीमान् कर्णसिंह जी महानुभाव के द्वारा केन्द्रीयशिक्षा मन्त्री के रूप में प्रवर्तित रक्षाबन्धन के अवसर पर 'संस्कृत दिवस' के आयोजन के सम्बन्ध में भी अपने निकटस्थ संस्कृत विद्वद्वर्ग के सामने रक्खे कि संस्कृत कालेजों तथा महाविद्यालयों तथा संस्कृतविश्वविद्यालय में तो प्रतिदिन की संस्कृत दिवस होता है, इस दिवस को मनाने का उद्देश्य तो संस्कृतेतर शिक्षण संस्थाओं में संस्कृत भाषा की विशेषताओं से वहां के महानुभावों, छात्रों प्राध्यापकों को बतलाना होना चाहिए। यही संस्कृतदिवस की सार्थकता होगी। इसका प्रयत्न संस्कृत के ही विद्वानों द्वारा होना चाहिए।

दूसरी विशेषता कालिदास पक्ष की यह रही कि कुछ ऐसे तात्कालिक छन्दोरचना करने वाले लोग सामने आए जो मंच पर खड़े होने के उपरान्त छन्द रचना तत्काल करते हुए सुनाते जाते थे, वे उन्हें लिखते नहीं कहते थे, केवल बोलते जाते थे। यह कार्यक्रम जैसी कि कल्पना थी अत्यन्त आकर्षक रहा और समारोह के अन्तिम भाग के रूप में प्रतिदिन कार्यरूप में परिणत होता गया। इसी में आचार्य स्वर्गीय श्री रामशंकर भट्टाचार्य, उनके अनुज श्री मनुदेवभट्टाचार्य, मैं स्वयं, नारायणदत्तशर्मा, उमाशंकर आदि प्रायः १०,१२ तत्कालीन छात्रों ने अपना वर्चस्व प्रदर्शित किया। उन दिनों टेप रिकार्डर इतना प्रसारित नहीं था, अन्यथा आज भी वे सारे तात्कालिक काव्य अपनी भंगिमा बिखेरते कर्णगोचर हो पाते।

संस्कृतभाषा के माध्यम से सम्पन्न होने वाले काशी के साप्ताहिक आयोजनों के अतिरिक्त श्रीमान्वासुदेवजी द्विवेदी महानुभाव के द्वारा प्रवर्तित और परिचालित संस्था "सार्वभौमसंस्कृतप्रचारपरिषद" अनेक दशकों पूर्व स्थापित और अधिवेशनों के सम्पादन में पूर्ण प्रगति रखती थी। ये आयोजन होलिका आदि के अवसर पर काशी में विशेषरूप से होते रहते थे। इस संस्था के काशी

के बाहर भी लखनऊ, कानपुर, देहली, देवरिया, गोरखपुर, कलकत्ता, बम्बई आदि विशिष्ट नगरों में सम्पन्न अधिवेशनों में सम्मिलित होने और उनमें अध्यक्षता और कविता प्रस्तुत करने आदि के अवसर मिलते रहे।

अखिल भारतीय स्तर के कवि सम्मेलनों में काशी के श्रीमान् गुरुवर बटुकनाथ शास्त्री खिस्ते, आचार्य रतिनाथ झा, श्री रामनारायण दत्त पाण्डेय श्रीमान् शिवजी उपाध्याय, श्रीयुत मनुदेवभट्टाचार्य, श्रीमान् रेवाप्रसादजी द्विवेदी, श्रीलीलाधर पन्त आदि महानुभावों का साथ रहा। पंजाब में श्रीमान् शशिधर शास्त्री जी संस्कृत और हिन्दी में रचना को प्रवाहित कर रहे हैं। प्रयाग में अभिराज राजेन्द्रमिश्र, देहली के रमाकान्तशुक्ल उनके ज्येष्ठ भ्राता महोदय संस्कृत कविता मंच को सुसज्जित और सुभूषित करते रहे। इन कवि सम्मेलनों में अधिकांश गीतिकाओं का ही सस्वर प्रस्तुतीकरण होता आ रहा है अथवा पारम्परिक छन्दों में भी कविताएं प्रस्तुत होती आ रही है। आकाशवाणी और दूरदर्शन भी संस्कृत कार्यक्रम के प्रसारणों में, विशेषकर संस्कृत की नयी कविताओं के प्रस्तुतीकरण में मैं अपना योगदान अपने प्रायः सभी केन्द्रों से करता रहा।

मैंने जब अपने दैनिकक्रम में ज्वलन्त प्रत्यक्ष समीपस्थ विषयों पर आर्या में लिखने का क्रम अपनाया तो देखा कि आर्या छन्द में अपनी बात को कविता में कहते हुए कथ्य विषय का स्वयं ही विकास होता जाता है और उस विषय की बारीकियां स्वतः सामने आती जाती हैं। अनेक आर्या छन्द गद्यायित पद्य हो जाते हैं जिसकी राजशेखर आदि आचार्यों ने सराहना की है। इसमें अन्वय के झंझट में पड़ने से भी स्वभावतः छुट्टी मिल जाती है और कविता के भाव बड़ी ही सरलता से पाठक के मन तक पहुँचने में सफल हो जाते हैं।

कविशिरोमणिमञ्जुनाथ जी का प्रभूत लेखन संस्कृत साहित्य की नवरचना प्रक्रिया में अमूल्य महती उपलब्धि है। आर्या छन्द भी गजल शैली के बहुत नजदीक है यह कई बार मैंने स्वयं अनुभव किया और आचार्य जगन्नाथ पाठक महोदय से विचार भी किया कि आर्या को हिन्दी में लिखने पर वह गजल होने में किसी परेशानी का अनुभव नहीं होने देती।

यह भी अनुभव हुआ कि केवल संस्कृत के ही छन्द ऐसे हैं जिनमें अन्त में तुक मिलाने की आवश्यकता नहीं होती। अन्य भाषाओं में हिन्दी, उर्दू

इंग्लिश आदि की कविताओं में भी इस प्रकार के भेद मिलते जाँयगे, परन्तु वे दुर्लभ होंगे। उनमें प्रायः किसी सीमा पर तुक या अन्तिम स्वर व्यंजन मिलाने पर ही आनन्द की उपलब्धि हो पाती है। परन्तु संस्कृत में जब कहीं ऐसा होता है तब उसे 'अन्त्यानुप्रास' नाम दिया जाता है, और वह एक प्रकार का शब्दालंकार हो जाता है। कविता में जिस प्रकार किसी अलंकार का नियमतः प्रयोग आवश्यक नहीं माना जाता वही बात संस्कृत छन्दों में तुकान्त के सन्दर्भ में है, यदि ऐसा हुआ तो अनुप्रास हो गया नहीं हुआ तो अन्य अलंकार वस्तु, रस, आदि वहां अनुभूति में आयेंगे।

संस्कृत और हिन्दी में प्रायः समकालीन दो सुविख्यात कवि ऐसे हैं, जिन्होंने अपनी भाषा के मूल छन्दों से हटकर अन्य भाषा के छन्दों में परन्तु उसी भाषा में विख्यात कृतियों का सृजन किया। हिन्दी में ऐसे कवि हैं अयोध्यासिंह उपाध्याय 'हरिऔध', जिन्होंने अपनी कविता की भाषा तो हिन्दी, उसमें भी खड़ी बोली रक्खी, परन्तु छन्द संस्कृत के लिये, जो अतुकान्त होते हैं। उनका प्रियप्रवास महाकाव्य विश्वविख्यात रचना है। इसका यह तात्पर्य नहीं कि उन्होंने हिन्दी के तुकान्त छन्द लिखे नहीं। परन्तु उनका आकर्षण संस्कृत छन्दों पर और संस्कृत निष्ठभाषा पर अधिक रहा, और यही उनकी कविता में प्रवाहमय भाषा का रहस्य प्रतीत होता है।

संस्कृत भाषा के उन्हीं के प्रायः समकालीन कवि, कविशिरोमणि भट्ट मथुरानाथ शास्त्री जी, जो "हरिऔध" की तरँह 'मञ्जुनाथ' नाम से काव्य रचना में साहित्य जगत पर छाये हुए हैं, उन्होंने कविता की भाषा तो संस्कृत रक्खी, परन्तु छन्द हिन्दी उर्दू आदि के तुकान्त ग्रहण किये। कवित्त या "घनाक्षरी" छन्द के तो संस्कृत में वे सम्राट् ही हैं। घनाक्षरी या कवित्त नामके हिन्दी के छन्द में जितनी संख्या में उन्होंने रसवर्षा की, उतनी संख्या में कवित्त या घनाक्षरी छन्द हिन्दी में भी कम ही कवियों ने लिखे होंगे। इसके अतिरिक्त संस्कृत के छन्दों के तो वे स्वतः सिद्ध ही प्रजापति थे। यह भी यहां प्रस्तावित करने की इच्छा के लोभ का संवरण मैं इस बेला नहीं कर पा रहा हूँ कि विश्वविद्यालयों के संस्कृत और हिन्दी विभागों के विद्वान् महानुभावों का इधर भी ध्यान जाना चाहिए। एक ही लक्ष्य को सामने रखने वाले संस्कृत और हिन्दी के सुप्रसिद्ध कवियों का एक बहुमूल्य वैचारिक आकलन हो जिसमें बहुत सार्थक तुलनाएं अपना स्थान बनाती हुई दृष्टिगोचर हो रही हैं परन्तु जो

प्रत्यक्षतः एक दूसरे से कहीं से भी प्रभावित नहीं हैं, उनकी समानता तुल्य-देहि-वत् अत्यन्त मनोरम उदात्त समान भूमि पर आरोहित है। जैसे एक दृष्टान्त के रूप में हमने अभी श्रीमान् अयोध्या सिंह उपाध्याय "हरिऔध" और कविशिरोमणि भट्ट श्री मथुरानाथ शास्त्री "मञ्जुनाथ" जी का प्रस्तुतीकरण किया। अगर ऐसे कुछ तुलनात्मक अध्ययन सामने आयेंगे तो उनसे उन रचयिता महानुभावों के प्रति श्रद्धा निवेदन तो होगा ही उससे जो अनुप्राणन या प्रेरणा प्राप्ति होगी वह हमारी अपनी स्थायी संस्थिति का दर्शन कराने में प्रकाश प्रदायिनी सिद्ध होगी और साहित्य की जो एक उछलती नाना विचारों से परिपूर्ण निर्बाध बाढ़ सी आई हुई है, जिसमें रसाभासों की ही प्रमुखता छाई ही है और सामाजिक विप्लव वाले जिसके अत्यन्त कुत्सित परिणाम दृष्टिगोचर हो रहे हैं उन पर एक सौम्य स्वच्छ नियन्त्रण की ओर उन्मुखीकरण का प्रयास होगा जैसा कि हमारे ही सामने एक अत्यन्त ही आदर्श पूर्ण स्तुतियोग्य प्रस्तुति विगत शताब्दी में पंडित पद्मसिंहशर्मा जी महानुभाव के द्वारा बिहारी सतसई सञ्जीवनभाष्य और उसकी विस्तृतभूमिका के रूप में प्रस्तुत की गई और निकट अतीत में "उग्रगालिब" में जिस मनोरम शैली के दर्शन हुए। वय के प्रभाव के कारण हम अन्य राष्ट्रीय ख्याति के समालोचकों को देख रहे है, जो आज से १० वर्ष पूर्व कितनें उद्दाम और प्रखर थे और आज कितने सौम्य और शान्त दिखाई दे रहे हैं। निःसन्देह अपनी इस लम्बी साधना में वे प्रणम्य हैं, अनुकरणीय हैं, आदर्श हैं फिर अभारतीय के कारण अनेकत्र शोचनीय भी हैं। विश्वविद्यालयों के संस्कृति संस्कृत, हिन्दी विभागों में तथा संस्कृतविश्वविद्यालयों और संस्कृत महाविद्यों की हमारे देश में संख्या सहस्रों में है, और हजारों आचार्य गण विद्वान्गण संस्कृत के शतशः सहस्रशः संस्कृत ग्रन्थों का अध्यापन लक्षशः छात्रों को हमारे देश में प्रतिदिन करा रहे हैं। शोध कार्य भी अबाध गति से चल रहा है और शतशः शोधोपाधियां प्रतिवर्ष दी जा रही हैं, इसी संदर्भ में कुछ ऐसे नवनीत के निकलने की संभावना की जा सकती है कि साहित्य तथा दार्शनिक वैचारिक और राजनैतिक दृष्टि से विसंगतियों से ओतप्रोत वर्तमान के इस जीवन प्रवाह में हम अपनी आत्मा के प्रकाश में निरन्तर बने रहें और यह कार्य केवल अपनी भाषा और अपनी कविता ही कर सकती है। इसके लिए त्रिपिटक, जैनसाहित्य, बौद्धसाहित्य, वाल्मीकि, व्यास, कालिदास, तुलसीदास, कबीर, रैदास, मैथलीशरण, जयशंकर प्रसाद,

अयोध्या सिंह उपाध्याय, मञ्जुनाथ भट्ट आदि ही कर सकते हैं, कौन नहीं कर सकते यह न कहने के लिए क्षमा किया जाय क्योंकि जिनका इस लक्ष्य की प्राप्ति कराने में निषेध किया जायगा, वे अपने अन्य उद्देश्य की पूर्ति के लिए विख्यात और आदरणीय हैं, परन्तु मूलतः उस उद्देश्य में भौगोलिक भेद होने से वे हमारे लिए उतने उपास्य कोटि में नहीं आते या अनुकरणीय नहीं हो पाते, किन्तु साहित्य और कला की अद्वितीयता में वे सर्वथा प्रणम्य हैं।

यह सर्वथा प्रतीक्षित अभिनन्दित प्रयास था, है और रहेगा कि भारत का हजारों लाखों वर्ष पुरातन ऐश्वर्य जब संसार को आकृष्ट कर रहा था, उस काल से चले आ रहे अखंड़ वाङ्मय को विशेषकर संस्कृत वाङ्मय को जागृत रक्खा जाय। क्योंकि प्रतिक्षण परिवर्तनशील संसार में प्रेरणा यहीं से आज तक मिलती आ रही है और निरन्तर मिलती रहेगी। संस्कृत साहित्य में एक ओर जहां शिक्षण शतशः संस्थाओं में चल रहा है और शोध कार्य निरन्तर गतिमान है, वहां इसकी धारा को निरन्तर नवनिर्मितयों द्वारा भी गतिशील रक्खा जा रहा है उसी प्रेरणा के पुंजी भूत रूपों से यह 'आर्यार्णवः' जैसे उछलकूद मचाने वाले प्रयास भी है। कविता के क्षेत्र में वाल्मीकि से अम्बिकादत्त व्यास तक की रचनाओं से छात्रगण पाठ्यक्रमों में परिचित होते आ रहे हैं। कविकुलगुरु कालिदास आदि धुरन्धर कवियों के रघुवंश, शिशुपालवध, किरातार्जुनीय, नैषधीयचरित आदि महाकाव्यों के अंश पाठ्यक्रमों में निर्धारित हैं। इन निर्धारित पाठ्यक्रमों में कुछ दूरदृष्टिपूर्ण सुधार की आवश्यकता है। महाकाव्यों के कतिपय सर्गों को पढ़कर छात्रगण समझते हैं कि हमने अमुक काव्य पढ़े है। रघुवंश के द्वितीय आदि कुछ सर्ग, कुमारसंभव, आदि के कुछ सर्ग पढ़कर हम पूरा काव्य पढ़े यह अनुभव नहीं कर पाते। यह भी संभव नहीं है कि पाठ्यक्रमों में पूरे काव्य निर्धारित कर दिये जांय। परन्तु यह सहृदय विद्वानों के विचारार्थ उपस्थापना की जा रही है कि जितने सर्ग काव्यों के निर्धारित हैं पाठ्यक्रमों में उनकी श्लोक संख्या की गणना करके उतनी संख्या के श्लोकों का चयन पूर्ण काव्य से करा लिया जाय। कथाक्रम को पकड़ने वाले और अन्त तक पहुंचाने वाले श्लोक पूरे महाकाव्य से उतनी ही संख्या में एकत्र करते हुए समुचित व्याख्या आदि के साथ विभिन्न समुचित नाम देते हुए उन्हें प्रकाशित पाठ्यक्रम में लेने से सम्पूर्ण महाकाव्य के कथानक क्रम का बोध भी होगा और महाकवि के

विशिष्ट अवदान वाले पद्यों को न छोड़ते हुए आन्तरिक परिचय भी होगा। इस प्रकार के प्रयास विद्वानों से कराए जाने पर उसके अच्छे परिणाम सामने आयेंगे। कम से कम छात्रों को यह विश्वास तो रहेगा ही कि उन्होंने सम्पूर्ण काव्य के कथानक और कवि के विशेष स्थलों का अध्ययन कर लिया है, फिर विशेष जिज्ञासा होने पर जिन अंशों को छोड़ा गया है उनके भी अध्ययन के लिए वे प्रेरित हो सकेंगे।

नाट्य प्रस्तुतियों का भी इस काल में पर्याप्त प्रवाह काशी, उज्जयिनी आदि अनेक स्थानों पर दृष्टिगोचर हो रहा है। इस ओर भी लोकोपयोगी दृष्टि से एक विचार विन्दु उपस्थित करना विद्वानों के सामने अभीष्ट है कि नाट्य प्रस्तुतियों में कवियों के द्वारा जो प्राकृत अंश विरचित हुआ है, उसका तात्कालिक उद्देश्य वर्ग विशेष में संस्कृत के ज्ञान के अभाव के कारण उनके प्रयोग की सुविधा के लिए कवियों ने उनके द्वारा प्रकृत भाषा का प्रयोग करवाया है, क्योंकि प्रकृत भाषाएं बोलियों के रूप में उनके व्यवहारों में आदरणीय थीं। वर्तमान में प्रकृतभाषाएं व्यवहार में संस्कृत भाषा से भी अधिक दूर चली गई हैं इसीलिए वर्तमान प्रस्तुतियों में प्राकृत प्रयोगों के स्थान पर संस्कृत का प्रयोग किया जाता है, जो मुद्रित पुस्तकों में प्राकृत के संकेतों पर छापी जाती हैं। स्पष्ट भासित हो रहा है कि कवियों के रचना काल में संस्कृत में व्यवहार की जो कठिनता थी और जिसके कारण विशेष नाटकीय पात्रों के द्वारा कवियो ने प्राकृत का प्रयोग करवाया, वही स्थिति इस समय उन प्राकृत सन्दर्भों की हो गई और उनके द्वारा संस्कृत ही प्राकृत से अधिक सरल और हृदयंगम मालुम हो रही है। यहां भी लोककर्षण के उद्देश्य से यह उचित प्रतीत होता है कि कवियो ने जहां जहां प्राकृत का प्रयोग करवाया है, उसके स्थान पर उन पात्रों से उन स्थलों पर हिन्दी का प्रयोग करवाया जाय साथ ही विभिन्न प्रान्तों में प्रस्तुतियों में वहां की गुजराती, मराठी, बंगला आदि का प्रयोग करवाया जाय। आखिर कवि की लेखनी से तो संस्कृत का उच्चारण करवा कर हटना ही पड़ रहा है, परन्तु जिस उद्देश्य से कविवर ने प्राकृत का प्रयोग किया वह उद्देश्य तो संस्कृत के प्रयोग से सिद्ध नहीं हो रहा अपितु हिन्दी तथा प्रान्तीय भाषा में उन स्थलों की प्रस्तुति से वह उद्देश्य सिद्ध किया जा सकता है। जब हमने अपने विद्वान् मित्रों से तथा नाट्य प्रयोगों के वर्तमान पुरोधाओं से यह चर्चा की तो खेद

हुआ यह जानकर कि वे लोग अपने को अत्याधुनिक कहते और मानते हुए भी इस विषय में रूढ़िवादी बने रहना ही पसन्द करते हैं। उन्हें नाट्य प्रस्तुतियों में प्राकृत के स्थान पर हिन्दी आदि के प्रयोग पर यह खतरा नजर आ रहा है कि इससे उपस्थित दर्शक समुदाय में संस्कृत के प्रति अरुचिका संचार होने लगेगा, क्योंकि हिन्दी आदि भाषाएं उन्हें तत्काल रुचिकर लगेंगी। इस विचार को सुनने पर इन पुरोधाओं की रूढ़िधार्मिता ही तो सामने आ रही है। आखिर कवि ने उस समय हिन्दी आदि की तरह ही व्यवहार में आने वाली प्राकृत की विधाओं का जब प्रयोग किया तब क्या यह खतरा नहीं था। बस लकीर पीटने के अतिरिक्त इस विचार में कोई दम नहीं नजर आता। केवल देवर्षि कलानाथ शास्त्री जी ने सर्वथा इस विचार से सहमति प्रकट की और जयपुर में संभवतः वेणीसंहार के अभिनय में इसका प्रयोग भी करवाया। जो अत्यन्त आकर्षक और सफल माना गया।

संस्कृत के विद्वान् चाहें कितने भी अपने को अत्याधुनिक सिद्ध करने की मंचों पर चेष्टा करें परन्तु वे रूढ़ियों से इतने जकड़े हुए रहते हैं कि लोक से कटकर रहने में ही अपनी श्रेष्ठता की रक्षा मानते हैं। अपनी 'आर्यार्णवः' में प्रस्तुत अनेक रचनाओं पर मुझे भी पर्याप्त भर्त्सनाएं पुरस्कार के रूप में प्राप्त हो चुकी हैं, जिन पर मुझे केवल हँसी ही आती है, कि कहां से ये लोग आधुनिक बने हुए हैं। यह इनका एक विशुद्ध नाटक ही तो बन कर सबके सामने प्रकट है। संस्कृत भाषा व्यवहार की भाषा आज नहीं है। वे ही लोग व्यवहार में संस्कृत बोलते हैं जो हिन्दी आदि बोल पाने में अपनी प्रान्तीयता के कारण, विशेष कर दक्षिण के विद्वान् संस्कृत का भिन्न प्रदेश वासियों के साथ व्यवहार में प्रयोग करते हैं। जब हम संस्कृत के प्रयोग के क्षेत्र में अपनी बोलचाल में उतरते हैं, तब अनेक भाषागत अशुद्धियां प्रवाह में आती हैं और ये रूढ़िवादी लोग उस पर उपहास करने पर आमादा हो जाते हैं। इनमें कितने ही लोगों से हमने पूछा कि संस्कृत भाषा में द्विवचन का प्रयोग क्यों प्रचलित हैं जिससे कण्ठस्थीकरण में प्रत्येक शब्द में द्विवचन को कण्ठस्थ करने का गौरव सामने आ रहा है। संस्कृत के अतिरिक्त अन्य किस भाषा में द्विवचन का पृथक् पृथक् शब्दों में रूप मिलता है और द्विवचन के प्रयोग का कौन सा भाग उन भाषाओं में छूट हुआ है। सभी भाषाओं के शब्दों में एक वचन के बाद बहुवचन ही काम में लिया जाता है, जब दो के बोधन की अभिलाषा

होती है तो उसके लिए दो शब्द का पृथक्तः प्रयोग कर दिया जाता है तथा कहीं भी अर्थ की प्रेषणीयता में कभी नहीं आती। परन्तु संस्कृत भाषा की बनावट में द्विवचन प्रारम्भ से, वेद से दृष्टिगोचर हो रहा है-

''द्वासुपर्णा सयुजा सखाया
समानं वृक्ष परिषस्वजाते।''

यदि यह द्विवचन संज्ञाओं और क्रियाओं से हटा दिया जाय तो परिश्रम में कितना लाघव प्राप्त हो जाये जैसा कि अन्य भाषाओं में प्रत्यक्ष है।

प्राचीन सन्दर्भों में उसकी अनिवार्यता बनी रहेगी। परन्तु आखिर इसका तर्क सम्मत कारण तो प्रस्तुत किया जाना चाहिए कि इतना गौरव क्यों प्रचलित हुआ और अन्य भाषाओं में वह क्यों नहीं दिखाई देता।

नहीं जानता कि भाषा के विपुल प्रयोग प्रवाह में संस्कृत भाषा के शब्दों में यह संख्या में द्विवचन स्थापित करने के पीछे आचार्यों ने क्या तर्क दिये हैं। अभी तो संस्कृत के भाषिक अध्ययन की स्थिति में जहां छोटी अवस्था में रटने या कण्ठस्थ करने की एक प्रकार से अनिवार्यता है, यद्यपि यह सभी भाषाओं के प्रारम्भिक ज्ञान में उसी प्रकार अनिवार्य है, कण्ठस्थ करने का थोड़ा अभ्यास तो भाषा ज्ञान के प्रारम्भ में सर्वत्र करना ही पड़ता है, परन्तु व्यवहार में नित्य प्रति आने वाली भाषाओं से संस्कृत आदि में यह प्रक्रिया कुछ अधिक बढ़ी हुई मिलती है क्योंकि व्यवहार की भाषाओं में व्यवहारों में शब्दों और उनके आवश्यकतानुसार वचनों और कारकों के परिवर्तनों का प्रवाह अपने आप उन स्वरूपों का ज्ञान करा देता है जबकि संस्कृत आदि में यह व्यवहार की निरन्तरता का प्रवाह सुलभ नहीं है। यह सभी लेखकों का अनुभव है कि यह हमारी उदात्त और लेखनोन्मुख विचार शृंखला समुचित शब्दोपस्थिति की अपेक्षा रखती है और उसमें अल्पतम रुकावट भी बड़ा बौद्धिक मन्थन करा लेती है। संस्कृत भाषा इस दृष्टि से व्यावहारिक हिन्दी इंग्लिश आदि की तुलना में कठिनता को अपने स्वरूप में स्थापित रक्खे हुए है। कारकों के विभक्तियों वचनों और सन्धियों के साथ शब्द के रूप में ही समाविष्ट रहने से कण्ठस्थीकरण की प्रक्रिया अनिवार्य हो उठती है और उसके व्याकरण सम्मत नियम जानने के लिए पहिले तो शब्दरूपावली और धातु रूपावली याद रखना आवश्यक है और फिर अष्टाध्यायी या लघुसिद्धान्तकौमुदी या सिद्धान्तकौमुदी, माधवीयधातुवृत्ति या काशिका आदि ग्रन्थों से निकट

परिचय अपेक्षित हो उठता है। यह सारा श्रम व्यावहारिक भाषाओं के साथ उतना नहीं है जितना संस्कृत आदि व्यवहार से बाहर हो चुकीं भाषाओं के साथ है। नपुंसकलिंग भी संस्कृत भाषा में अधिक है, जो अन्य भाषाओं में नहीं है और जिसमें शब्दों के स्वरूप में पूर्णतया परिवर्तन हो उठता है।

मेरी इस संस्कृत कविता रचना की पूर्णता 'कविभारती' नामक वाराणसी की प्रतिष्ठित संस्था की शब्द पूजा के बिना नहीं हो सकती। उस संस्था की निर्मिति और संचालन के अपने अनुभव को मैं ललिता पत्रिका में प्रकाशित स्वतंत्र लेख में अभिव्यक्ति दे चुका हूँ। काशी और भारत की संस्कृत रचनाओं को हम लोगों ने कविभारती संस्था से सम्बन्धित किया था। मेरी संस्कृत रचना प्रक्रिया में कविभारती की महनीय प्रेरणा फलभूत है।

मैं नें अपनी कविता रचना और 'आर्यार्णव:' नामक प्रस्तुत संग्रह ग्रन्थ रचना की चर्चा से प्रारम्भ किया था। यह रचनासंकल्प श्रीमान् मोहनलाल जी पाण्डेय (जयपुर) श्रीमान् आचार्य श्रीनिवासरथ महोदय (उज्जयिनी) श्रीमान् रमेश चतुर्वेदी महाशय (देहली) श्रीमान् सूर्यप्रकाश व्यास महोदय आदि के साथ समय-समय पर विचार विमर्श से प्रारम्भ और रूपायित होता गया। इसकी कार्यरूप में परिणति का आरम्भ डा. श्रीशरदिन्दु तिवारी जी के साथ विचार विमर्श में हुआ और उन्होंने मेरी अनुपलब्ध पुस्तकों का संग्रह करके श्रीयुत धर्मपाल जी को कम्प्यूटर से प्रेस कापी प्रस्तुत करने के लिए दे दिया। पुस्तकों में जो रचनाएं नहीं आ सकी थीं उन्हें भी मैंने उन्हें मुद्रित पत्रिकाओं के रूप में अपने संग्रह की खोज करके दिया, परन्तु कुछ महत्त्व की रचनाएं अभी भी इस 'आर्यार्णव:' में समाविष्ट नहीं हो पायी, वे स्मृति में तो हैं, पत्रिकाओं में और अभिनन्दन ग्रन्थों तथा स्मृतिग्रन्थों तथा विभिन्न पुस्तकों की भूमिकाओं के रूप में मुद्रित भी हैं, परन्तु वे मुझे अपने संग्रह में उपलब्ध नहीं हैं, कुछ उपलब्ध रचनाएं भी मेरे दे दिये जाने पर भी 'आर्यार्णव:' में नहीं आ सकीं, उनकी संख्या भी अधिक है। मैं अभी भी अपने लेखन क्रम में सामयिक घटनावलियों से प्रभाव ग्रहण करते हुए रचना प्रक्रिया को संचालित रखता हूँ, इसका संकेत मैं कर चुका हूँ। डा.शरदिन्दु जी पर काशीहिन्दूविश्वविद्यालय के बिरलाछात्रावास में वार्डेन नियुक्त होने के उपरान्त समय का दबाव बढ़ जाने से और प्रूफ संशोधन की प्रतीक्षा रहने से प्राय: पूरी पुस्तक के कम्प्यूटर हो जाने पर भी मुद्रणोन्मुखता नहीं आ सकी। तब

मैंने मित्रवर डा.शिवराम शर्मा जी, तथा आचार्य चक्रपाणि त्रिवेदी जी से इस ग्रन्थ को मुद्रण की पूर्णता तक पहुंचा देने का आग्रह किया और इन महानुभावों ने इस सन्दर्भ में मुझे पर्याप्त सहायता दी। परन्तु इन विद्वानों के अन्यान्य कार्यों में व्यस्त रहने तथा स्वास्थ्य के असन्तुलन के कारण अन्तिम स्वरूप तक पहुंचा पाना इस रचना को संभव होता जब नहीं दिखा तो भगवत्प्रेरणा से मुझे ही इन सारे कार्य को प्रारम्भ से हाथ में लेना पड़ा। प्रूफ संशोधन करते करते प्राय: ३, वर्ष के काल में यह रचना अपने मुद्रणार्थ स्वरूप में आ सकी है। अभी भी इसका मुद्रण कहां से होगा, इसका निश्चय नहीं हो पाया है। इस सारे संकल्प की पूर्ति में प्रवीण कम्प्यूटरविद्या के सिद्धहस्त श्री धर्मपाल महाशय साधुवाद के अधिकारी हैं। सुन्दर पाठ्य प्रस्तुति ने ही मेरा उत्साह इस विषय में बढ़ाया जो काशी विश्वनाथ की कृपा का ही फल मैं मानता हूँ।

देवर्षि श्रीमान् माननीय कलानाथ जी शास्त्री महानुभाव से मैंने जब जो निवेदन किया उन्होंने विलक्षण आत्मीयता प्रदान करते हुए उसे आज तक पूर्ण किया। उनके विश्वविख्यात पूज्यपिता कविशिरोमणि भट्ट श्री मथुरानाथ जी शास्त्री महानुभाव तथा मेरे स्वर्गीय पूज्य पिता जी में जितनी घनिष्ठता का हमने प्रत्यक्ष दर्शन किया, वह अवर्णनीय है, अलौकिक है। अपने नामाक्षरों को पूर्णतया सार्थक करने वाले श्रीमान् देवर्षि कलानाथ शास्त्री ने मुझे बहुत सम्बल प्रदान किया। यहां तक कि जब मैंने अपने ६५वें वर्ष में प्रवेश किया और राष्ट्रपति पुरस्कार की आरम्भिक वय: सीमा मेरे समीप आई, उससे एक वर्ष पूर्व ही श्रीमान् देवर्षि जी को राष्ट्रपति पुरस्कार घोषित होकर प्राप्त हो चुका था और वे अपनी ओर से आगामी वर्षों के लिए एक नाम इस पुरस्कार के लिए प्रस्तावित करने के निमित्त अधिकृत हो चुके थे। काशी जब उनका आगमन हुआ और मेरे साथ वार्तालाप के क्रम में जब मेरी वय का उन्हें पता चला तो उन्होंने मेरा बायोडाटा लेकर मेरा नाम १९९९ वर्ष के पुरस्कार के लिए प्रस्तावित करने की अपनी अमोघ कृपा की और उस वर्ष मुझे वह पुरस्कार प्राप्त हुआ।

संस्कृत, पाली, प्राकृत, अरबी, फारसी भाषाओं में साहित्य सेवा में लगे विद्वानों के लिए यह वार्षिक रूप से जीवन भर मिलने वाला साथ ही विख्याति दिलाने वाला राष्ट्रीय पुरस्कार है। मुझे इस पुरस्कार मिलने में एक विशेषता

यह भी रही कि सन् १९५८ में जब यह पुरस्कार भारत के राष्ट्रपति के द्वारा दिया जाना प्रारंभ किया गया तब संस्कृत के भारत से चार विद्वानों में पहिला नाम मेरे पुण्यश्लोक पूज्य पिताजी का था। राष्ट्रपतिभवन में सम्मान समारोह के उपरान्त जब उनसे पत्रकारों ने पूछा कि इस सम्मान को ग्रहण कर आप कैसा अनुभव कर रहे हैं तब उन्होंने कहा था कि "मुझे बिटिश शासन ने भी 'महामहोपाध्याय' पदवी दी थी, परन्तु स्वतन्त्र भारत के प्रथम राष्ट्रपति के द्वारा इस सम्मान से मैं अधिक प्रसन्नता का अनुभव कर रहा हूँ। वही पुरस्कार सन् १९९९ में मुझे घोषित हुआ तो मैं पिता-पुत्र दोनों पुरस्कृत हुए इस कोटि में आगया। देहली के श्रीमान् डा. सत्यव्रत शास्त्री जी तथा उनके पिता श्री चारुदेव शास्त्री जी, एवं जयपुर के आचार्य श्रीनवलकिशोर जी कांकर तथा उनके पुत्र आचार्य श्री नारायणलाल कांकर भी पिता-पुत्र दोनों इस पुरस्कार के मिलने की कोटि में आ चुके थे, अब मेरा भी समावेश इस कोटि में हो गया, यह अवसर श्रीमान् देवर्षि कलानाथ जी की अमोघ कृपा का मेरे लिए परिणाम रहा। मैंने उनसे अपनी हिन्दी पुस्तक 'वाल्मीकिरामायण में राजनीति' का पुरोवाक् लिखने का निवेदन किया, उनके पुरोवाक् के साथ ही वह छपी। पुनः 'पाणिनिपरिशीलन' की भूमिका भी उन्होंने लिखी और वह भी छपी। अब इस "आर्यार्णवः" पर भी उन्होंने Preface भेजा, वह भी मेरे आग्रह पर उन्होंने अंग्रेजी में भेजा और वह भी इस ग्रन्थ में प्रारंभ में प्रस्तुत है। उनके विशाल अभिनन्दनग्रन्थ की रूपरेखा बन चुकी है, वह यथा शीघ्र मुद्रित होकर उन्हें समर्पित हो उसकी कामना हम सभी को है। भगवान् वह दिन भी हम जैसे लोगों को शीघ्र दिखाए कि श्रीमान् देवर्षि कलानाथ शास्त्री जी राज्यपाल के महामहिम पद पर प्रतिष्ठित होकर संस्कृत के विद्वान् के रूप में किसी प्रान्त के सर्वोच्च पद पर प्रतिष्ठित होने का गौरव संस्कृत जगत् को प्रदान करें।

'आर्यार्णवः' की प्रस्तुति में श्रीमान् डा. शरदिन्दु जी तिवारी महाशय धन्यवाद के पात्र हैं, जिन्होंने इस कार्य का बीडा उठाया और इसे आगे बढ़ाया, प्रूफ संशोधन में तथा परामर्श में आचार्य डा. शिवराम शर्मा जी ने पर्याप्त सहायोग दिया, वे हमारे धन्यवाद के अधिकारी हैं। श्रीमान् विद्वद्वरचक्रपाणि जी त्रिवेदी महाशय ने अपनी रुग्णावस्था में भी प्रूफ संशोधन का कार्य संपन्न किया उन्हें मेरे अनेक धन्यवाद और साधुवाद हैं। सर्वाधिक धन्यवाद हम देते हैं श्रीयुत धर्मपाल जी को। इन्होंने न केवल सुन्दर कम्पोजिंग कम्प्यूटर से

करके मनोमोहक आकर्षण प्रस्तुत किया अपितु श्री डा. शरदिन्दु तिवारी जी ने जिस सम्पादन कार्य को अपनी व्यस्तता के कारण छोड़ दिया था, उसको भी हमारे साथ पूर्ण परामर्श पूर्वक सम्पन्न किया, अन्ततः यह कार्य समय अधिक ले रहा था, अतः कुछ शीघ्रता में हुआ, इसलिए पाठक महानुभावों को ऐसा लग सकता है कि इस कविता पुस्तक को कुछ और अधिक निखार कर प्रस्तुत किया जा सकता था, परन्तु समय बीतता जा रहा था, मैं भी अपनी आयु के ७९वें वर्ष की दहलीज पर खड़ा हूं। नेत्र भी कभी कभी काम देना रोक देते है, इसलिए धर्ममाल जी से ही सम्पादन के परामर्श के साथ जैसा भी हो इसे प्रस्तुत कर दिया जाय, इस मनीषा से शीघ्रता के कारण जो न्यूनता हुई विद्वान् पाठक गण उसके लिए हमें क्षमा प्रदान करेंगे ऐसी आशा है। इसके प्रकरण विभाजन में 'अर्णव' के समानान्तर द्वीप शब्द का प्रयोग किया गया है, जो संभवतः इस ग्रन्थ में अपनी नवीनता रखता है, हमने मित्र विद्वानों से परामर्श कर ऐसा किया और "अष्टादशद्वीपनिखातयूपः" इस कालिदासोक्ति को, तथा, 'नवद्वयद्वीपपृथग्जयश्रियाम्' इस श्रीहर्षोक्ति को देखते हुए अष्टादश संख्या में द्वीप रख कर इनकी प्रस्तुति यहां की गई है। अनेक मित्र विद्वानों ने यह कहकर इस सन्दर्भ में हमें उत्साहित किया कि यह यहां की अन्वर्थ प्रमुख सर्गस्थानीय विभाजक संख्या अपने में एक नवीनता को प्रकट कर रही है।

मेरी संसार यात्रा मे सारे संकटों को अपने में समेटने वाली और मुझे पूर्णतया निश्चिन्त रखने वाली मेरी अर्धांगिनी श्रीमती सरोज चतुर्वेदी को धन्यवाद देना तो अपने को ही स्वयं धन्यवाद देना है, क्योंकि वह और मैं तो शरीर मात्र में दो हैं, वस्तुतः तो एक ही हैं, परन्तु अपने ही शरीर को भी हम कई बार साधुवाद देते हैं, उसी प्रकार मेरी समस्त रचना यात्रा की कर्णधार श्रीमती सरोज चतुर्वेदी को ही यह साराश्रेय जाता है, कार्य की परिपूर्णता का मेरे पुत्र डा. श्यामाप्रसाद चतुर्वेदी या संजय चतुर्वेदी ने वह काम किया जो यदि वह नहीं करता तो वह मुझे स्वयं करना पड़ता और तब मैं बाजार और घर के चक्कर लगाने में ही समय को कम समझता, कविता रचना आदि के लिए तो समय निकाल पाना असंभव ही हो गया होता। परन्तु श्यामा प्रसाद या प्रमाणपत्रीय संज्ञावाले डां.संजय चतुर्वेदी ने मुझे न केवल मुझे शोधकार्य को पूर्ण करने में साथ बैठकर सहयोग दिया अपितु घर

की सभी छोटी बड़ी आवश्यकताओं की स्वयं परिपूर्ति करते हुए मुझे पूर्ण निश्चिन्त रखा। तभी मैं कुछ लिख पाया।

साथ ही तृतीय पुत्र डा. प्रयास चतुर्वेदी (पवन चतुर्वेदी) ने भी ऐसा उदाहरण प्रस्तुत कर दिया कि संस्कृत के परम्परागत विद्वद्गृह में जन्म लेकर और पढ़ कर फ्रेंच भाषा का पूर्णज्ञान प्राप्त कर काशी हिन्दू विश्वविद्यालय की अपनी मातृ संस्था में अध्यापन करते हुए उस विभाग की विभागाध्यक्षता सम्पन्न की। मेरे इस पुत्र ने अध्यापन कार्य के स्थान के विषय में भी मेरी ही तरह पहिले पंजाब विश्वविद्यालय चण्डीगढ़ में तीन वर्ष तक फ्रैंच असिस्टैण्ट प्रोफेसर का पद ग्रहण किया और अनन्तर महामना के इस महान् विश्वविद्यालय में अध्यापन कार्य को वह सम्पन्न कर रहे हैं। अभी कुछ दिन पूर्व अपने अब तक एक मात्र पौत्र का पितामह होने का सुख भी डा. प्रयास ने मुझे दिया।

मेरी साहित्यिक गतिविधियों में मेरे दो पुत्र विकास चतुर्वेदी और प्रसन्न चतुर्वेदी तथा इनकी सबकी पत्नियों ने भी मेरे कार्यों में संस्कृत न समझते हुए भी सराहनाएं की हैं, मेरी पुत्री डा. प्रीति चतुर्वेदी और जामाता नागेश चतुर्वेदी भी समय समय पर मुझे अपने कार्यों में सम्बल देते रहे। मैं इन सभी को अपनी अवस्था के इस पड़ाव पर पहुँच कर आशीर्वाद देता हूँ।

इसी निवेदन के साथ अपनी त्रुटियों के लिए क्षमा मांगते हुए इस "भूमिः" को पूर्ण करता हूँ।

मकर संक्रान्ति, सं.२०६९

विद्वानों का कृपाकांक्षी
शिवदत्त शर्मा चतुर्वेदी
(राष्ट्रपति संमानित)
विजयनगर कोलोनी, भेलूपुर, वाराणसी।

वसन्तपञ्चमी 2060

आर्यार्णवः

विषयानुक्रमणिका

प्रथमद्वीपः

	विषयावलिः	पृष्ठाङ्काः
	Preface देवर्षिकलानाथशास्त्रिणः	
	भूमिः	
१.	गणपतिः	१
२.	राधा	३
३.	महालक्ष्मीः	४
४.	सरस्वती	५
५.	आर्या	६
६.	गीता	७
७.	लोकमान्यतिलकः	८
८.	प्रतिभा	९
९.	मङ्गलम्	१०
१०.	उपनिषत्	११
११.	श्रद्धा	११
१२.	स्मृतिलीला	१४
१३.	संस्कृतभाषा	१७
१४.	सहृदयः	२१
१५.	सहयोगः	२१
१६.	कथा	२३
१७.	देवाः	२४
१८.	जगदम्बा	३४

द्वितीयद्वीपः

	विषयावलिः	पृष्ठाङ्काः
१९.	दृश्यावलिः	४५
२०.	औदार्यम्	४६
२१.	एकान्ताः	४७
२२.	मेघमाला	४८
२३.	वेदना	४९
२४.	सिद्धस्थानम्	५०
२५.	स्वरलहरी	५१
२६.	सा कापि	५२
२७.	दूरे अन्तिके	५३
२८.	ऊर्जा विद्युत्	५४
२९.	कृष्णद्वैपायनः, श्रीकृष्णः	५५
३०.	वाल्मीकिः	६३
३१.	तुलसिदासः	६८
३२.	श्रीगिरिधरशर्माणः	७८

तृतीयद्वीपः

३३.	रतिः	८८
३४.	जीवनम्	८९
३५.	संघर्षः	९१
३६.	आवाहनम्	९२
३७.	विवशा भाषा	९२
३८.	विवशता	९३
३९.	प्रेरणा	९४
४०.	वैज्ञानिकधारा	९५
४१.	कुण्ठा	९६
४२.	निषिद्धकाव्यम्	९७

	विषयावलिः	पृष्ठाङ्काः
४३.	पुरातनं सुन्दरं भवति	९८
४४.	विभासते	९८
४५.	मिश्रणवेला	९९
४६.	उपेक्षा	१००
४७.	क्रोधशक्तिः	१०१
४८.	कृपाणधारा	१०१
४९.	धैर्यम्	१०२
५०.	कामः	१०३
५१.	परिचयमहिमा	१०३
५२.	निन्द्यतायामाशा	१०४
५३.	बहुमतम्	१०५
५४.	अवमूल्यनम्	१०५
५५.	नैपुण्योद्घोषः	१०६
५६.	परस्परम्	१०७
५७.	धिक् तान्	१०८
५८.	किन्तुः	१०९
५९.	आशा	११९
६०.	तिथिः	१२१
६१.	परिवेशः	१२१
६२.	भारतेन्दुः	१२२

चतुर्थद्वीपः

६३.	वृन्दावनम्	१२८
६४.	गोसेवा	१३८
६५.	श्रीरामचन्द्रः	१४८
६६.	श्रीगोपीनाथकविराजः	१५८
६७.	कवि-शिरोमणिः	१६३

पंचमद्वीपः

	विषयावलिः	पृष्ठाङ्काः
६८.	प्रतारकः	१६९
६९.	लक्ष्मणरेखा	१७०
७०.	वाक्	१७१
७१.	संसद्	१७१
७२.	आशा	१७२
७३.	अभीष्टम्	१७३
७४.	चायपेयम्	१७४
७५.	ज्योतिर्विद्या	१७५
७६.	व्याकुलता	१७६
७७.	समाजः	१७६
७८.	युद्धक्षेत्रम्	१७७
७९.	श्रीचन्द्रधरशर्मा गुलेरिः	१७९
८०.	सी.वी.रमणः	१८१
८१.	श्रीराजेन्द्रप्रसादः	१९९
८२.	कार्लमार्क्सः	२०४

षष्ठद्वीपः

८३.	नारी	२१५
८४.	समस्या	२१६
८५.	उत्सवः	२१७
८६.	गणतन्त्रम्	२१७
८७.	दीपावलिः	२२०
८८.	महाशिवरात्रिविभूतिः	२२२
८९.	कविता	२२४
९०.	वार्ता	२२४
९१.	आश्चर्यम्	२२५

	विषयावलिः	पृष्ठाङ्काः
९२.	विद्यावैभवम्	२२६
९३.	यात्रा	२३६
९४.	प्रियप्रयोजनम्	२४६

सप्तमद्वीपः

९५.	सम्मेलनम्	२५७
९६.	वार्ता	२६३
९७.	बहुमतम्	२६४
९८.	गोधूली	२६५
९९.	शास्त्रम्	२६६
१००.	वृषभः	२६७
१०१.	विजयः	२६९
१०२.	देशभक्तिः	२६९
१०३.	समालोचना	२७१
१०४.	सेवा	२७२
१०५.	सत्यम्	२७५
१०६.	शिवम्	२८५
१०७.	सुन्दरम्	२९६

अष्टमद्वीपः

१०८.	संयोगः	३०८
१०९.	पुत्रस्य विमर्शः	३१०
११०.	वैषम्यम्	३११
१११.	वाचालता	३११
११२.	ग्रामाः	३१३
११३.	प्राचीनं नवीनं च	३१७
११४.	संस्कृतसेवा	३१७
११५.	संघटनम्	३१८

विषयावलिः		पृष्ठाङ्काः
११६.	संस्कृतशिक्षा	३२०
११७.	परिवारकल्याणम्	३२१
११८.	दूरदर्शनम्	३२२
११९.	भ्रमः	३२४
१२०.	व्यसनम्	३२५
१२१.	आतंकवादः	३२६
१२२.	कथाः	३२७
१२३.	काव्यकारणम्	३३८
१२४.	सौन्दर्यविवरणम्	३४५
१२५.	तन्त्रशास्त्रे प्रतिभादर्शनम्	३४६
१२६.	शोधः	३४८

नवमद्वीपः

१२७.	मानसम्	३५९
१२८.	पत्रकारिता	३६०
१२९.	समयः	३६०
१३०.	यन्त्राणि	३६१
१३१.	षोड़शो वर्षः	३६२
१३२.	आगमश्च निगमश्च	३६४
१३३.	मैत्री	३६५
१३४.	नमस्काराः	३७०
१३५.	धन्यवादः	३७१
१३६.	विरोधः	३७४
१३७.	कालिदासः	३७७
१३८.	शङ्कराचार्यः	३८५
१३९.	स्वातन्त्र्यवीरः	३९५
१४०.	जवाहरः	३९६

विषयावलिः		पृष्ठाङ्काः
१४१.	राष्ट्रगुरुः	३९९
१४२.	पाणिनिः	४०३

दशमद्वीपः

१४३.	भारविः	४१६
१४४.	सूचना	४२१
१४५.	संपादनम्	४२६
१४६.	अनुवादाः	४३१
१४७.	नारीदर्शनम्	४३७
१४८.	यावत्-तावत्	४४२
१४९.	धर्ममर्म	४५२
१५०.	साहित्यम्	४५७

एकादशद्वीपः

१५१.	टंकन-वन्दनम्	४६९
१५२.	आरक्षणम्	४७२
१५३.	भाषणभव्यता	४७४
१५४.	कबीरः	४८०
१५५.	वेदाः	४८६
१५६.	इतिहासः	४९६

द्वादशद्वीपः

१५७.	वाक्स्पर्शः	५०७
१५८.	मत्कुणाः	५०७
१५९.	उपदेशाः	५०९
१६०.	प्रश्नाः	५११
१६१.	बटुकनाथाः	५१३
१६२.	बाधा	५१४

विषयावलिः		पृष्ठाङ्काः
१६३.	अवज्ञा	५१५
१६४.	शास्त्रम्	५१६
१६५.	प्रतीकाः	५१९
१६६.	जयपुरम्	५२१
१६७.	गुरुः	५३१
१६८.	ब्रह्मर्षिर्मालवीयः	५४१

त्रयोदशद्वीपः

१६९.	व्यसनम्	५५०
१७०.	कान्तासम्मिता	५५१
१७१.	द्विर्नाभिभाषते	५५५
१७२.	राजनीतिः	५५६
१७३.	वाहनानि	५६६
१७४.	शैली	५७६
१७५.	काशी	५८५

चतुर्दशद्वीपः

१७६.	अवतारोत्तारौ	५९६
१७७.	भवभूतिः	५९७
१७८.	धर्मपरिपाटी	६०३
१७९.	अभिनवदेवगुप्तः	६०८
१८०.	सङ्गोपनम्	६१३
१८१.	श्रीपरमेश्वरानन्दाः	६१६
१८२.	शक्तिः	६२१
१८३.	गङ्गा	६३०
१८४.	अलङ्काराः	६४०

पञ्चदशद्वीपः

१८५.	वैतण्डिकः	६५०

	विषयावलिः	पृष्ठाङ्काः
१८६.	विश्वासाः	६५१
१८७.	श्रीहर्षवन्दना	६५३
१८८.	चैत्रचरित्रम्	६५५
१८९.	पुस्तकानि	६५७
१९०.	छिद्राणि	६५९
१९१.	संगीतम्	६६२
१९२.	रणरणकम्	६७२
१९३.	तन्त्रम्	६८३
१९४.	शीतम्	६९३

षोडशद्वीपः

१९५.	सन्देशाः	७०४
१९६.	संवादाः	७०६
१९७.	एकः शब्दः	७०८
१९८.	वाग्विलासः वाक्कलहः	७११
१९९.	सुविधाः	७१६
२००.	श्रीनेहरुः	७२६
२०१.	डॉ.राधाकृष्णनः	७३७
२०२.	महाकविर्माघः	७४७

सप्तदशद्वीपः

२०३.	राष्ट्रपिता	७५८
२०४.	वसुसुभाषचन्द्रः	७५९
२०५.	वल्लभभाइपटेलः	७५९
२०६.	लालबहादुरशास्त्री	७६०
२०७.	देवर्षिश्रीकलानाथाः	७६१
२०८.	रेवाप्रसादाः	७६२

	विषयावलिः	पृष्ठाङ्काः
२०९.	एनीबेसेन्टवन्दनम्	७६४
२१०.	तिरस्कारः	७६७
२११.	तद् दूरे तदु अन्तिके	७६९
२१२.	काण्डात्काण्डात्	७७०
२१३.	निर्माणम्	७७१
२१४.	पाञ्चरात्रसिद्धान्तः	७७२
२१५.	प्रतीक्षा	७८२
२१६.	अथवा	७९२
२१७.	अधिकारः	८०१
२१८.	भगवान् बुद्धः	८१०

अष्टदशद्वीपः

२१९.	परिक्रमा	८२०
२२०.	सम्बन्धः	८३०
२२१.	अकस्मात्	८४०
२२२.	गालीगाथा	८५०
२२३.	स्वातन्त्र्यस्वर्णजयन्ती	८६०
२२४.	श्रीकरपात्रस्वामी	८७०

❁❁❁❁❁❁

गालीगाथा
या
गाली पूजा

आर्यार्णवः

प्रथमद्वीपः

१. गणपतिः

गणपतिरस्तु नितान्तं शान्तो दान्तो हृदन्तरे कान्तः।
त्रैलोक्याभरणानां सारा स्तुतिरेतदीयैव।।१।।

शुभ्राभिर्वा द्युतिभिः सन्दीपितभास्वरो जयति।
हेरम्बो देवानामधिपः प्राणप्रदाता नः।।२।।

सोऽयं कुरुते निखिलं कामानां वर्षणं कामम्।
सद्यः प्रणामतुष्टः करुणापूर्णः सदा देवः।।३।।

श्रीगणपतिः प्रभुरयं हृन्मन्दिरमध्यराजितो जयति।
आबाल्याज्जनमानस-मध्ये नीराजितो देवः।।४।।

सोऽयमनादिरनन्तो गणेशरूपो विराजते देवः।
सर्वादौ यत्पूजनमविकलससिद्धिरस्ति कार्याणाम्।।५।।

गणपतिरद्य नितान्तं प्रणम्यते सर्वभावेन।
भाद्रे शुक्लचतुर्थीतिथौ प्रभाभासुरो देवः।।६।।

देवा ऋषयः सर्वे पितरो मुनयस्तथा च गन्धर्वाः।
अप्सरसोऽथो यक्षा मनुजा यच्चरणभक्तिसंलग्नाः।।७।।

यः कामान् पूरयते पापान् संदूरयति निखिलान्।
पूतं चाऽन्तःकरणं सन्तनुते तं गणाधिपं वन्दे।।८।।

गणपतिरस्तु नितान्तं मानसमध्ये सदा ध्यातः।
पूरयतु कार्यमखिलं जन्म यदर्थं च लब्धमिदम्।।९।।

सर्वजगद्वन्द्यतमं यं देवं मानसे कृत्वा।
कीदृशमपि कठिनतमं कार्यं सारल्यमाप्नोति।।१०।।

आज्ञा यस्य समन्तात् प्रचरति दीप्ता प्रभावपूर्णाभा।
यस्यैव स्मृतिमात्रात् सर्वं संजायते कार्यम्।।११।।

काव्यकलाकलनायामन्तःकरणे कवीन्द्राणाम्।
ज्योतिरयं सन्तनुते नव नव सस्फूर्तिदायकं दिव्यम्।।१२।।

देवो वर्षतु किञ्चित्तामसमां सत्कृपाधाराम्।
भाषाभावधुरीणा काऽपि मतिर्नूनमायातु।।१३।।

इदमस्ति शून्यशून्यं मनो मदीयं गणेश, चरणे ते।
संस्थापितं तदेतद्दीपय हे देव, दृष्टिदानैः स्वैः।।१४।।

मलिनं चान्तःकरणं चरणे विनिवेदितं पुरतः।
शोधय देव, नितान्तं शक्तिस्पर्शं दयाऽस्पदं देहि।।१५।।

भीतो जडः सदैवाऽलसभावैः पूर्णरूपेणै-
वाऽक्रान्तोऽहं दीनो श्रीगणपतिमद्य संश्रये देवम्।।१६।।

बाला वयं गणपतेः सर्वे सौभाग्यलालिताः सन्तः।
बालोचितचेष्टाभिर्गणपतिमाराधयामो वा।।१७।।

सर्वेषामपि गुरुरयमाद्यो भगवान् प्रपूजितः सततम्।
सन्मतिगतिरतिदानैः संपोषयते जगत् सर्वम्।।१८।।

लक्ष्मीप्रदानकुशलः सिद्धीनां सम्प्रदाताऽसौ।
सिद्धिविभूषितकायो गणपतिरेव प्रपूजनीयो नः।।१९।।

नाना नवचेष्टाभिर्भरिते काये विगतमाये।
आवाहयामि देवं गणाधिपं देवदेवेशम्।।२०।।

कालुष्यैरत्यन्तं भरिते विश्वे स्मृतः सततम्।
कालुष्याणां पटलीर्दूरीकुरुते प्रकृत्यैव।।२१।।

२.राधा

भवबाधाया हर्त्री दात्री सा जीवनस्य धारायाः।
उल्लासस्य प्रतिमा शश्वद्वितरेत् सुखं राधा।।२२।।

स्थावर-जंगम-विश्वं शुभ्रैर्भावैस्तरलयन्ती।
कृष्णमयं संसारं रचयन्ती कैर्न राधिता राधा।।२३।।

कामानेषा सूते सर्वैर्भावैः प्रपूजिता सद्यः।
गोलोके कृतवसतिः कृष्णेनाराधिता राधा।।२४।।

माधवकलाविलासैः कथं भवेन्मोहिनी सृष्टिः।
यदि नो कुर्यात्स्वीयं कृपाकटाक्षं स्वयं राधा।।२५।।

निखिलाऽनन्दसमुद्रं विलासभासैस्तरलयन्ती।
सुन्दरतासौभाग्याऽधारा राधा स्वयं राधा।।२६।।

नानाविधसांसारिक-जालैर्ये खेदमापन्नाः।
तैर्वा मानसमध्ये कथं न संसाध्यते राधा।।२७।।

अहमहमिका कवीन्द्रैरारचिताऽस्ते यदीयपूजायाम्।
मान्या जगतां धन्या हृदये देवी स्वयं राधा।।२८।।

वृन्दारण्यनिकुञ्ज-क्रीडारासेश्वरी जयति।
निर्गुणमपि सकलगुणे परिणमयन्ती स्वयं राधा।।२९।।

३. महालक्ष्मीः

मातर्लक्ष्मि, नमस्ते समस्तसन्देहनाशिशुभकाये।
मत्सन्देहान्देहान्नाशय कृपया कृपाब्धिसंकाये।।३०।।

दूरय, दूरय मातर्दुरितान्मेऽन्तः स्थितानेतान्।
जाज्वल्यमानदीप्तिर्नित्यं दृष्टा त्वदीयकरुणायाः।।३१।।

अन्तःस्थितान् सुविषमान्कामादीन्नाशय कृपया।
सत्वरमेव कटाक्षं पातय मातर्महामाये।।३२।।

त्वां पूजयितुं मनसा वाचा कायेन संभारैः।
सर्वेऽप्येते देवा मनुजाः पितरःसमुत्सुका नित्यम्।।३३।।

एहि महालक्ष्मि त्वं शुभदात्री सर्वशुभकाये।
कृपया कृपाकटाक्षैर्मोहय मे हृत्कमलमधुपालिम्।।३४।।

मातर्मेऽन्तर्हृदये प्रकाशतां ते चरणनखरेखा।
दूरीभूयादथ तच्चिरार्जितं ध्वान्तमेतावत्।।३५।।

वरदे, देहि नितान्तं स्मरणं ते सन्मुखारविन्दस्य।
यस्य स्पृहालवानां मध्ये तिष्ठन्ति देवताः सर्वाः।।३६।।

नारायणप्रणयिनि, कृपया मे सत्वरं देहि।
करुणार्णवकणमालां यां संप्राप्यैव मुक्तः स्याम्।।३७।।

४. सरस्वती

इयमस्ति दिव्यरूपा सरस्वतीनामिका काचित्।
ज्ञानाऽकाशोन्मेषे चरमादर्शा सरस्वतीधारा।।३८।।

वैदिकमन्त्राणां सा प्रभावपूर्णा स्वरोद्दीप्ता।
यस्यास्तटप्रदेशे प्रवाहमाला समादृष्टा।।३९।।

अन्तःसलिला सेयं सरस्वती शोभिता दिव्या।
यस्यान्तः संकाये ऋषयः सर्वा समृद्धिमायाताः।।४०।।

आद्यो विभवः सोऽयं सरस्वतीसंज्ञको जयति।
नव नव शोभादर्शनकालः सन्तिष्ठते यस्मिन्।।४१।।

कामपि कायोद्दीप्तां स्फूर्तिं सञ्चारयन्तीयम्।
योगोन्मेषविशेषैर्नाशितकलुषा सरस्वती जयती।।४२।।

हिमवत्प्रदेशमध्ये सोमलतायाः समुद्भूतिम्।
सम्यक् प्रदर्शयन्ती सरिदियमाभाति भावपरिपूता।।४३।।

तदनुकुरुक्षेत्रेषु प्रवहन्तीयं समादृष्टा।
तत्रापि च भूमिष्ठा पुनः प्रयागेषु दृष्टिमुपयाता।।४४।।

नाना गाथा यस्याः प्राक्तनसाहित्यविस्तीर्णाः।
पूर्वपुरुषभणितीनामाश्रयभूता विभासन्ते।।४५।।

धन्या महानुभावाः पूज्यास्ते वै प्रभावपरिपूर्णाः।
नाना शोधविधाने सरस्वतीं तां निषेवन्ते।।४६।।

अद्य समस्ते विश्वे गौरवभूतां सरस्वतीमेनाम्।
नाना शोधविधाभिः परिपूर्णां द्रष्टुमिच्छा नः।।४७।।

५. आर्या

आर्या सैषा रम्या यदि प्रसादं करोति तन्मन्ये।
भावाऽभावाऽभावः सत्वरमेवाऽत्र जागर्ति।।४८।।

संस्कृतवाक्संरम्भे लोके संक्षीणतामाप्ते।
आर्या वाक्यविलासैर्भरतितरां वा मनो हर्षैः।।४९।।

प्रकृतिकुमारीसुषमा सुन्दरभावाभिसाररमणीया।
विश्वसमादृतसारा त्रिभुवनजयिनी जयत्यार्या।।५०।।

कासारेषु नितान्तं सन्दृष्टं यत् सुगन्धपरिपूर्णम्।
पीतं यच्च नितान्तं पानीयं तेन तुल्यार्या।।५१।।

नाना नवसंचारैर्नूतनभावार्थसंभारैः।
कस्यान्तःकरणे बत विलोभनं नो करोत्यार्या।।५२।।

प्रातः सुषमाकाले कापि नवीना स्मृतिः स्फुरति।
रात्रावथ काऽप्यन्या काले काले नवीनाऽर्या।।५३।।

६. गीता

भारतसंस्कृतिमूला संसारेषु प्रदीप्ततमा।
भानु-सहस्र-प्रतिमा विद्वद्भिर्मानिता गीता।।५४।।

जीवननवसंचारे नालोक्यं तत् समुन्नतं तत्त्वम्।
यस्य हि परिचयदाने पश्चाद् भावं भजेद् गीता।।५५।।

षोडश-कलावतंसो योगीश्वर-वन्दितः स्वयं कृष्णः।
उपदेष्टाऽसीद्यस्याः कं महिमानं परित्यजेद् गीता।।५६।।

सर्वागमस्वतन्त्रः शङ्कर इव शंकराचार्यः।
प्रथमो यद्व्याख्याता प्राथम्यं सा लभेद् गीता।।५७।।

श्रीरामानुज-वल्लभ-मध्व-मुखैरेभिराचार्यैः ।
नव-नव-वाक्यालोकैर्नूनं नीराजिता गीता।।५८।।

श्रीमधुसूदनवर्यैरभिनवगुप्तार्यपादैश्च ।
गणनातीतैरन्यैराचार्यैष्टीकिता गीता।।५९।।

गीतारहस्यकर्त्रा कर्मक्षेत्रेषु लोकमान्येन।
अप्याधुनिकयुगेऽस्मिन् वीरैर्भावैः प्रपूजिता गीता।।६०।।

अरविन्देनाराद्धा महात्मना गांधिना च भृशम्।
सर्वात्मना समीडित-चरणा साफल्यभूर्गीता।।६१।।

गीताप्रवचनकर्त्रा महीयसा मालवीयेन।
राष्ट्रीयग्रन्थतया सर्वत्रोद्घोषिता गीता।।६२।।

निर्मलमन्तःकरणं प्रकाशपूर्णं च या कुरुते।
जन्मनि जन्मनि यायात् सदा समाराध्यता गीता।।६३।।

७. लोकमान्यतिलकः

गीताज्ञानसमादृतसर्वस्वं संप्रयोक्तारम्।
श्रीलोकमान्यतिलकं को नामाद्यापि न स्मरति।।६४।।

भारतराष्ट्रविनाशकवैदेशिकपारतन्त्र्यमयकाले।
गीताज्ञानं धृत्वा लोके यो माननीयोऽभूत्।।६५।।

राष्ट्रीये जागरणे प्रतीकभूतस्तु लोकमान्योऽयम्।
शतशः कोटिजनानां वन्द्यो नेता महाविद्वान्।।६६।।

प्राचीनाचार्याणां सद्ग्रन्थान् सम्यगालोच्य।
पाश्चात्यानां विदुषां ग्रन्थानाद्यन्तमालोक्य।।६७।।

भारतजीवनमार्गे प्रकाशदानं यथा विहितम्।
गीतारहस्यरचने तेन तु नितरां प्रकाशितो लोकः।।६८।।

लोकोत्तरैश्चरित्रैः प्रमाणपूर्णैर्वचोभिः स्वैः।
श्रीलोकमान्यतिलको नितरां वन्द्यः समस्तजनतायाः।।६९।।

केसरिनाम्ना पत्रं प्रकाशितं सत्वरं सम्यक्।
भारतकेसरिरूपं स्वीकृतवानसमसाहसी वीरः।।७०।।

वन्दितदिव्यचरित्रः प्रभावसाराभिरामरमणीयः।
सर्वैर्विदांवरेण्यैर्बलि गङ्गाधरो मान्यः।।७१।।

८. प्रतिभा

प्रतिभे, रसनिर्झरिणी त्वं या जीवनसुधन्यताकरणी।
तव विरहेऽन्धं सर्वं जगदिदमाभासमानं वा।।७२।।

प्रतिभे, प्रभा त्वदीयाऽनन्दसमुद्रे निमज्जयति।
वाचां लहर्य एताः प्रतिपदमालिङ्गनानि यच्छन्ति।।७३।।

प्राणानां त्वं प्राणे, देवि प्राणेश्वरी यथा भवसि।
सर्वं स्पन्दनजालं चालय माये, महामाये।।७४।।

त्वद्विरहेणैवान्धः पतितः वूरुपे तमोरूपे।
पालय पालय पालय मातः कृपया त्वमेव हे प्रतिभे।।७५।।

एषोऽस्म्यहं चरणयोः पतितश्चाथो कृतज्ञश्च।
देवि, प्रतिभे, भास्वरसाम्राज्ये, त्वत्कृपाभिक्षुः।।७६।।

त्वं चैतन्यसमुद्रोन्मथिता साक्षात् सुधालहरी।
त्वत्स्पर्शमात्रसिद्धाः सर्वास्ताः सिद्धयो विपुलाः।।७७।।

नवनवविधिप्रवीणे देवि, प्रतिभे, त्वदीयसंस्पर्शात्।
घोरे पारावारेऽप्यसमाऽनन्दस्य दृश्यते लहरी।।७८।।

शान्तं पतितं चालससिन्धौ सर्वत्र शून्यतमदृष्टिम्।
प्रतिभे, कणिकामात्रं तव दीनं दीप्तमातनुते।।७९।।

९. मङ्गलम्

मङ्गलमेतत्सर्वं सैषा मङ्गलमयी सृष्टिः।
निखिला मङ्गलवेला सोऽयं प्राभातिकः कालः।।८०।।

समये सर्वं जातं सर्वेऽप्युत्थानसंभाराः।
आकर्षणपरिमाणा इमे अनन्ताः समाभान्ति।।८१।।

काचित् कमनीयतमा धारेयं विद्यते पुरतः।
रचना सर्वापीयं नित्यं मङ्गलमयी भाति।।८२।।

असमा भावोन्मेषा सर्जनशक्तिस्तथा नवीनेयम्।
मङ्गलभावे चेतः सर्वं नूनं निबध्नाति।।८३।।

परिपाकदशा प्राप्ता आकाशो निर्मलो नित्यः।
तस्मिन् शब्दगुणत्वं सर्वे तत्रैव संभाराः।।८४।।

अवकाशा अपि निर्मलभावे संयोजयन्तीव।
सैषा सर्वा सरणिर्नूतनतायाः पराकाष्ठा।।८५।।

आकृतयो या लब्धा दिव्यतराः सन्ति सर्वास्ताः।
सैषा प्रसादमाला विश्वेशस्य प्रसादरूपैव।।८६।।

चरमे समीपभावे बाधानां पूर्णपरिहारः।
क्षणमात्रेऽपि विलम्बे सर्वमिदं लुप्यते विश्वम्।।८७।।

कम्पनमिव नूतनमिदमाहो स्पन्दनमिदं कथितम्।
कामे विरामशून्ये नूतनतासृष्टिराभाति।।८८।।

१०. उपनिषत्

उपनिषदिति शब्दोऽयं सिद्धान्तार्थे प्रयुक्तोऽस्ति।
सिद्धान्ताविर्भावे कथितं "तत्रेयमुपनिषद् भवति"।।८९।।

प्रथमं सिद्धान्तानां स्फूर्तिः संजायते चित्ते।
पश्चात् क्रियासु तेषां प्रयोगयोगः समायाति।।९०।।

वेदान्तेषु ग्रन्था उपनिषदिति वा समाख्याताः।
परमात्मतत्त्वसाक्षात्कारे सिद्धान्तभूतास्ते।।९१।।

"आत्मा वा द्रष्टव्यः श्रोतव्यश्चाथ मन्तव्यः।
अथ च निदिध्यासनमपि कार्यं तस्येति" ऋषिराह।।९२।।

कोऽसावात्मा? तस्य च दर्शनमननादयः कथं वा स्युः?।
सर्वेऽप्येते विषयाः साङ्गोपाङ्गाः समादिष्टाः।।९३।।

ऊहापोहाः सर्वे मतभेदाश्चाथ भाष्येषु।
सम्यक् प्रदर्शिता वा मान्यतमैस्तावदाचार्यैः।।९४।।

सर्वापीयं सरणिः परमेशान्वेषणे दृष्टा।
संसारे ज्ञानानां गौरवभूता प्रतिष्ठिता भवति।।९५।।

लोके विज्ञानानां विपुलं यत् यत् क्रियारूपम्।
सर्वेषामपि तेषां मूलं सुविचारितोपनिषत्।।९६।।

११. श्रद्धा

जीवनमेतन्निखिलं भवति नितान्तं परिक्लिष्टम्।
श्रद्धाऽभावे नितरां मालिन्यं तत्र जागर्ति।।९७।।

श्रद्धा केवलमेका जीवनमत्यन्तशुभ्रतमरूपे।
प्रकटयति नाऽस्ति सा चेत्कष्टं संजायते सर्वम्।।९८।।

श्रद्धा जीवनमध्येऽमृततत्त्वं संप्रवाहयति।
घोषयति कर्मजालं निमिषे निमिषे स्वयं दीप्त्या।।९९।।

श्रद्धाया रूपाणां गणना नो ध्यातुमपि शक्या।
कणकणमध्ये विश्वे श्रद्धारूपाण्यनन्तानि।।१००।।

श्रद्धायाः साम्राज्यं यत्रैतद् दृश्यते विमलम्।
निखिला सुखस्य धारा तत्र प्राप्या मनुष्येण।।१०१।।

मा भूद्गुणलवलेशः केवलमात्रं तु श्रद्धैव।
सर्वां गुणगणमालां तत्राविर्भावयति मधुराम्।।१०२।।

प्रस्तरखण्डे येयं सर्वेशं प्रकटितं कुर्यात्।
सा श्रद्धा ननु वन्द्या जीवनकाले परा संपत्।।१०३।।

श्रद्धादरिद्रपुरुषस्त्वपि नन्दनकानने विचरन्।
कीदृशमपि सामर्थ्यं प्राप्तुं नो वा समर्थः स्यात्।।१०४।।

सेयं सर्वा धरणिर्निखिलः कालो विभूतयो विपुलाः।
सङ्कल्पानां सरणिः श्रद्धाऽधारे प्रतिष्ठता भवति।।१०५।।

कल्याणानां सुषमा श्रद्धामात्रेण लभ्या स्यात्।
तदभावे कालुष्याऽक्रमणं संजायते घोरम्।।१०६।।

नेत्रोन्मीलनकार्ये श्रद्धाया एव भूमिका निखिला।
शिष्यत्वस्यावाप्तिः श्रद्धाऽभावे कथं वा स्यात्।।१०७।।

सर्वे तुच्छतमास्ते भावाः संसारजालेऽस्मिन्।
विद्युद्वत्या पूणीः प्रयान्ति निखिलेऽपि जीवने नियतम्।।१०८।।

सर्वेषामथ तेषां निम्नतमानां प्रतीकारे।
श्रद्धामात्रं शरणं मानवमात्रस्य संजातम्।।१०९।।

काले काले क्षीणा श्रद्धाया वीक्ष्यते धारा।
तेन क्षोभः कश्चिद् हृत्पटले जायते विपुलः।।११०।।

अघटितघटनानामपि घटयित्री सा वरेण्येयम्।
हृत्कमलमध्यसंस्था सौरभमत्यद्भुतं किरति।।१११।।

श्रद्धामात्रं केवलमेकं वा सम्पुटीकृत्य।
निखिलं जीवनमिह खलु संसारे जायते सफलम्।।११२।।

विश्वस्मिन्नतिगहने विभासमानाऽमृता लहरी।
कामं प्रकाशमाना श्रद्धेयं सर्वमोहिनी वन्द्या।।११३।।

नितरामाशादीप्तिर्विकसितरूपा विलोक्यते याऽसौ।
सा सर्वा चिन्मयता श्रद्धासाम्राज्यरूपैव।।११४।।

सर्वस्मिन्नपि देशे पूर्णश्रद्धामयाः पुरुषाः।
द्वित्रा अपि चेद् दृश्यास्तैरुल्लासो भवेन्निखिले।।११५।।

श्रद्धावानेकोऽपि प्रत्यक्षं कोटिशो मनुष्याणाम्।
जागरणे पर्याप्तो भवति नितान्तं प्रकटदीप्तिः।।११६।।

सा भूमिर्धन्यतरा यस्यां जन्म गृहीतवते।
माता स्वीये दुग्धे श्रद्धाधारां निपाययति।।११७।।

ज्ञाने कर्मणि भक्तौ सर्वे देशेऽथ कालेषु।
श्रद्धादूरीकर्तुं नो कुत्रापीह शक्या स्यात्।।११८।।

१२. स्मृतिलीला

स्मृतिरेषा या मानवजीवनकाले तरंगिणी रम्या।
तां तु विनैतज्जीवनमास्ते विक्षिप्ततायुक्तम्।।११९।।

यस्य स्मृतिर्विलुप्ता दीनोऽसौ विस्तृते जगति।
यस्य स्मृतिर्विलसिता सर्वं सम्पन्नवैभवं तस्य।।१२०।।

जन्मनि जन्मनि जातः स्वीयं स्मृतिवैभवं सम्यक्।
यदि निध्यायति हृदये लास्यं सर्वत्र जीवने तस्य।।१२१।।

नानादर्शनशास्त्रान्वेषणसंचारचारुपरिपाकाः।
आचार्या रचनायां स्मृतितत्वं वर्णयामासुः।।१२२।।

परिपाकजठरपतितैर्मनुजैर्नूनं यदविरामम्।
जीवनकालः परितो विलोक्यते यत्प्रभावेण।।१२३।।

स्मृतिशक्तिमाश्रयामस्तदा पठामोऽथ विद्यास्ताः।
तस्यास्त्वभावकाले का विद्या, का तथा चोक्तिः।।१२४।।

यत्प्रत्यक्षं ज्ञातं कदापि तस्यैव भासमानत्वम्।
चेतसि संजातं चेत् कुतश्चिदुद्बोधकात् स्मृतिः सैषा।।१२५।।

कस्योदबोधकतेयं कं प्रति संजायते कदा कुत्र।
सर्वमनिश्चितमेतत् तेनैवाऽत्रास्ति रम्यतोल्लासः।।१२६।।

निश्चितमथ चेत् सर्वं जडतारूपं तु निस्सारम्।
नवतरविलासरहितं जीवनमेतत् प्रजायेत।।१२७।।

यदिदं यन्त्रमयं वा सर्वैः संभारसार्थैश्च।
सम्पूर्णं विज्ञानं स्मृतिस्वरूपे पराक्रमते।।१२८।।

तत्तु मनोविज्ञानं प्रथितं विश्वे प्रखरशास्त्रमिदम्।
स्मृतिवेलायामभिनवचित्रं चित्रे निवेशयति।।१२९।।

यन्त्राणामग्रे यत् स्मरणं संजायते विपुलम्।
यन्त्रैर्निखिलं तत्तत् शतशश्चित्रेषु दर्श्यते पुरतः।।१३०।।

सोवियतनाम्नि देशे यन्त्राणां वैभवं तादृक्।
स्वीयं तत् स्मृतिचित्रं विस्मापयतीह दर्शकान् सर्वान्।।१३१।।

आनन्दात्परतत्त्वात्पृथग्भवे तस्य जीवस्य।
सर्वं दुःखमयत्वं तस्माद्वा प्रच्युतिस्तस्य।।१३२।।

स्मृतिरेवास्ति समीपे यामाश्रित्यैव जीवोऽयम्।
पुनरप्यनन्तरूपं स्वीयं प्राप्नोति भोगमोक्षेऽस्मिन्।।१३३।।

पर्यन्तस्मृतिरेषा या नाम्ना प्रत्यभिज्ञेति।
काश्मीरेषु च तादृशदर्शनमास्ते समुद्भूतम्।।१३४।।

प्रत्यक्षानुभवे वा यद्यात् सर्वं समायाति।
नीरूपे संसारे परिणतरूपं भवति तत्तत्।।१३५।।

स्मृतिशब्दो विख्यातो मन्वादिग्रन्थरत्नेषु।
याथार्थ्येन तु निखिला या रचना सा स्मृतिः सर्वा।।१३६।।

आयातैव यदेयं मानसपटले स्मृतिः कापि।
चन्दनविलेपनमयमानन्दं सर्वथा तनुते।।१३७।।

प्रत्यक्षानुभवेषु तु द्वन्द्वानामस्ति साम्राज्यम्।
सुखदुःखोभयरूपा धारा प्रवहतितरां तत्र।।१३८।।

किन्तु स्मृतौ तु केवलमानन्दानां प्रकाशमयतैव।
दुःखानामपि नूनं स्मृतिरानन्दं विलासयत्येव।।१३९।।

प्रत्यक्षे या काचिद्विलासमयताऽस्ति दुःखं वा।
तस्य स्मृतौ न दुःखं सर्वं तत्पूर्वमेव गतम्।।१४०।।

कवितायाः संसारे स्मृतिरेषा रसपदे स्थित्वा।
सहृदयहृदयान्सर्वानानन्दे वा निमज्जयति।।१४१।।

प्रत्यक्षैरथ नित्यं ये संस्कारा विनिर्मिताः सन्ति।
संख्यायां ते विपुलाः स्थायिषु भावेषु परिगणिताः।।१४२।।

संचारिष्वपि तेषां गणना संजायते नूनम्।
गहनत्वं सूक्ष्मत्वं तेषां तत्तद्विपर्यये हेतुः।।१४३।।

उद्बुद्धताऽथ तेषां विपुले वैचारिके विश्वे।
स्मृतिरेव सर्वरूपा विभाव्यते नित्यमासीना।।१४४।।

उद्बोधकस्य तावत् संस्कारेणैव संयोगः।
नितरां सूक्ष्मो यो वा स्मरणे तस्यैव कारणता।।१४५।।

पूर्वाऽनुभवाऽभावे स्मारकताया अभावे वा।
स्मृतिरपि नूनं न स्यात् केन स्यात् कस्य वा च स्यात्।।१४६।

अस्मिन् जन्मनि नितरां यो वाऽनुभवः स्मृतावस्ति।
जन्मान्तरे तदीयं प्रत्यक्षत्वं कल्पनीयं स्यात्।।१४७।।

जन्ममरणसरणीनां मोक्षं यावत्प्रवर्तमानत्वे।
सर्वे भारतदर्शनमनीषिणः संवदन्ते नु।।१४८।।

स्थूलशरीरादधिकं सूक्ष्मं यद् विद्यते शरीरं नः।
तत्र तु सर्वाऽपीयं स्मृतिः स्थिता सूक्ष्मरूपेषु।।१४९।।

स्वप्ने दृष्टेऽद्भुततरूपं यद् यद् विराजतेऽनुभवे।
सर्वं तत् स्मृतिरूपं जागृततो भिन्नमेव स्यात्।।१५०।।

स्मृतिसंसारे विचरणमथ चेन्न स्यान्मनुष्यस्य।
सर्वा मधुधारेयं नूनं दूरीकृतैव स्यात्।।१५१।।

१३. संस्कृतभाषा

प्रेमप्रकर्षभरिता विद्योतितवेदवेदाङ्गा।
संसृतिशिवस्वरूपा संस्कृतभाषा चिरं जयति।।१५२।।

संस्कारैरापूर्णा मान्या देवैरथापि देवेशैः।
ऋषिभिर्महर्षिभिर्वा ज्ञातास्वादा चिरं जयति।।१५३।।

प्राभातिकवेलावन्मधुरिमभरितां सुसम्पूर्णाम्।
ज्ञानदिनेशोल्लसितां भाषां संस्कृतिमयीं नौमि।।१५४।।

भारतभाभिर्भरितां भावोल्लासैस्तरङ्गितामेनाम्।
दिव्यां संस्कृतभाषां को वा नोपासयेत्सुजनः।।१५५।।

मानवधर्मविबोधक-तत्त्वैरापूरितां भाषाम्।
भूतभविषयद्भावैः सौख्यैरापूरितां स्तौमि।।१५६।।

अष्टादशविद्यानां यस्यां जागर्ति नवनवोन्मेषः।
रसमयभणिति-चमत्कृति-पूर्णा या द्योतते विश्वे।।१५७।।

सर्वासां भाषाणां जननी जागर्ति जाह्नवीवेयम्।
विश्वस्मिन्नेकत्वं बोधयतीयं सदा भाषा।।१५८।।

सर्वं वेदात्सिध्यति नान्यत्रास्तीति चात्रयन्नास्ति।
अवितथभणितिमयेयं भाषा कैर्नास्ति वन्दनीयतमा।।१५९।।

यत्र जरारोगाद्याश्चिन्ता दूरे स्थिता भान्ति।
नित्यरसरङ्गसुषमालसिता भाषा प्रणम्यास्ति।।१६०।।

संस्कृतमिति शब्दोऽयं साधु सुधावर्षणं कुरुते।
यत्रात्मा परमात्मा संस्काराश्चापि सम्मिलिताः।।१६१।।

संस्कृतभारतशब्दौ पर्यायत्वेन देशेषु।
परिचीयेते नितरामन्योन्यं सर्वसंश्लिष्टौ।।१६२।।

किं भारतमिति पृष्टे यत्र तु वेदाः पुराणानि।
गीताऽस्ति कालिदासः सा भूरित्युत्तरं लभते।।१६३।।

किमियं संस्कृतभाषा ब्राह्मणभाषेति वक्तुमास्थेया।
यद्वा शोषकभाषा वक्तुं शक्येयमाभाति।।१६४।।

नानाधर्मविधानैः सामाजिकपाशसंकुलितैः।
जडतां प्राप्ता भाषा संस्कृतभाषेति केऽपि कथयन्ति।।१६५।।

वर्णाश्रमव्यवस्थानियन्त्रणे जागरूकेयम्।
शूद्राणां दलितानामस्पृश्यानां विरोधमातनुते।।१६६।।

यद्यप्युपनिषदादिष्वौदार्यस्यापि दृश्यते गाथा।
व्यवहारे किन्तु मनाग्गलविवरान्नो बहिर्याति।।१६७।।

राज्ञां सामन्तानां छत्राधस्तात्सुपोषिता भाषा।
कष्टव्याकुलितानां लोकानां क्वोपकारमथ कुर्यात्।।१६८।।

एते तु पूर्वपक्षा लेखनभाषणगता विलोक्यन्ते।
तत्रोत्तराणि सततं विद्वद्भिः संप्रदत्तानि।।१६९।।

सत्यं संस्कृतभाषा ब्राह्मणभाषेति नास्ति सन्देहः।
किन्तु ब्राह्मणशब्दो वर्णे रूढोऽत्र न ग्राह्यः।।१७०।।

यस्य ज्ञानपिपासा श्वासे श्वासे विलोक्यते सततम्।
ज्ञानार्जनकर्मणि योऽमरतां स्वीयां विजानाति।।१७१।।

को वा ब्राह्मण इत्यपि संस्कृतभाषैव बोधयति।
जातिब्राह्मणनिन्दा तत्राऽप्यालोकनीयैव।।१७२।।

ब्राह्मणवर्णाद् बाह्याः संस्कृतविद्यासु निष्णाताः।
जगति नितान्तं दीप्ताः सन्तः किं नावलोक्यते।।१७३।।

किन्तु ज्ञानपिपासा तेषां नित्यं प्रजागर्ति।
तस्माद् ब्राह्मणशब्दस्तेष्वप्याऽस्ते सुचरितार्थः।।१७४।।

प्राक्कालादद्यावधि तेषां ज्ञानस्य वाहिका सततम्।
संस्कृतभाषा नूनं ब्राह्मणभाषाऽस्ति नास्ति निन्देयम्।।१७५।।

शोषकभाषाऽप्यास्तेऽज्ञानं यच्छोषयन्तीयम्।
स्वीयं दिव्यं रूपं सर्वत्रैव प्रकाशयति।।१७६।।

अनभिमतास्तु विचारा भाषायां ये प्रकाश्यन्ते।
तत्र तु गुणदोषा ये विचारकेष्वेव ते ज्ञेयाः।।१७७।।

काले बृहत्प्रवाहे संस्थाभेदे व्यवस्थासु।
ये चाऽद्यत्वे दोषा गण्यन्ते ते पुरा गुणा गणिताः।।१७८।।

संस्कृतभाषा तेषां प्रकाशनस्यापि माध्यमीभूता।
पश्चात्तद्विपरीतस्यापि विचारस्य माध्यमीभूता।।१७९।।

वर्णविरोधे शोषणकार्यविरोधे च रचनानाम्।
संकलने नैवास्ते तत्रापीयं दवीयसी संख्या।।१८०।।

भाषाया वैशिष्ट्ये विरोभावोन्मिषन्तीनाम्।
रचनानां परिगणना नितरां शोभावहा भवति।।१८१।।

राज्ञां सामन्तानां छत्राऽधस्तात्सुपोषितापीयम्।
जनतन्त्रात्मकशासनपरिपुष्टा दृश्यतेऽद्यत्वे।।१८२।।

इयमपि गौरवगाथा भाषायाः संस्मृतौ धार्या।
यद्विपरीताऽवस्थापद्धतयोऽप्याश्रयन्त्येनाम् ।।१८३।।

रामायणमत्रास्ते रावणरचना अपि स्वच्छाः।
ब्राह्मणनिन्दास्तुतयो दीनानां चित्रणं चाऽस्ते।।१८४।।

१४. सहृदयः

सहृदयधुरीण! तुभ्यं समर्पिताः सर्वसौख्यकराः।
रसमयभणितीनां वा विकस्वराः शब्दसंचाराः।।१८५।।

त्वां दृष्टिपथं नीत्वा कविवर्याः लेखनीं करे कुर्युः।
आस्वादयितुरभावे किं स्यात् कवितावराक्या वा।।१८६।।

भवभूतिस्त्वां छन्दसि समानधर्मेति घोषयामास।
तस्य तदेतत्पद्यं कण्ठेहारायितं जातम्।।१८७।।

नूनं लेखकवर्याः सचेतसं त्वामनाराध्य।
पदे पदे प्रस्खलिताः काव्यफलाद् दूरमुपयाताः।।१८८।।

उद्याने कुसुमानां चित्रविचित्रः समुन्मेषः।
सहृदयहृदयाभावे व्यर्थतमः का स्थितिस्तस्य।।१८९।।

किं बहुना लोकेऽस्मिन् सहृदयताशून्यतोन्मेषे।
वैभवभरितेऽप्यखिले दारिद्र्यस्यैव साम्राज्यम्।।१९०।।

सहृदयसंश्रितचित्ताः कविगुरवः कालिदासाद्याः।
आचन्द्रतारकं वा सुस्थिरयशसो विभासन्ते।।१९१।।

सहृदयसमर्थनानामसमो महिमा समालोक्यः।
यद्वशतः सृष्टिरियं क्षणदा नवतामुपागता निखिला।।१९२।।

१५. सहयोगः

एकेनैके युक्ते संख्यैकादशतमा भवति।
सहयोगस्याभावे द्वित्वं वा केवलं तिष्ठेत्।।१९३।।

क्षिप्रसमर्थनसरणिः कार्ये वा सत्वरो योगः।
सहयोगेऽमृतधारा कापीयं पीयते पुरुषे।।१९४।।

परमोऽयं व्यामोहो विषमा काचित् स्थितिः पुंसाम्।
तावत् तिष्ठति यावत्सहयोगो नैव लब्धः स्यात्।।१९५।।

कठिनात्कठिनं कार्यं सहयोगेनैव सिद्धं स्यात्।
दृष्टान्तानां संख्या महती तत्राऽनुसन्धेया।।१९६।।

सत्ययुगे ननु शक्तिर्भवति नितान्तं सुपरिपूर्णा।
एकैकस्मिन्नपि वा नापेक्षा तत्र सहयोगे।।१९७।।

कलियुग एष नितान्तं शक्तिपरिक्षीणता चात्र।
सहयोगस्तत्राऽयं परमाराध्यः क्रियासिद्धौ।।१९८।।

सहयोगसरणिरेषा यावद् यावद् दृढा भवति।
नूनमकल्प्यं सर्वं प्रत्यक्षं जायते नित्यम्।।१९९।।

नित्यं यत् साफल्यं तन्नूनं प्रेरकं भवति।
कादाचित्के तस्मिन् कः स्यात् पुरुषार्थसंश्लेषः।।२००।।

तदिदं चित्रं विश्वे चराचरे भाति सहयोगे।
यदि सहयोगो न स्याद् दृश्यं प्रलयस्य समुखस्थं स्यात्।२०१।

देवैर्मनुजानां यः सहयोगः सोऽस्त्ययं यज्ञः।
आहूतास्ते देवाः साहाय्यं प्रस्तुवन्त्येव।।२०२।।

अथ विद्यते विरोधः सहयोगस्यासमः शत्रुः।
सम्पूर्णं कल्याणं तिरोहितं तेन वा भवति।।२०३।।

येषां नित्यविरोधः सहयोगे सोऽपि शान्तिमातनुते।
पुरातनाश्रमवर्णनचित्राण्यत्र प्रमाणानि।।२०४।।

परिवाराख्या संस्था सहयोगस्यासमं रूपम्।
यद्वशतो विश्वस्मिन् जीवनधारा प्रवाहिता भवति।।२०५।।

शासनसंस्था सर्वा सहयोगाधारिता जयति।
रक्षितमनया रूपं विश्वस्मिन् सभ्यतानां यत्।।२०६।।

यद्यपि तु 'योग' शब्दः सहभावं संव्यनक्त्येव।
किन्तु निरुपपदकाये पतंजलिं वा परामृशर्मि।।२०७।।

जीवनमपि तु धरित्र्यां सहयोगादेव चायातम्।
पालनपोषणवर्धनरूपा धाराऽपि सहयोगे।।२०८।।

एकं प्रमुखं कृत्वाऽन्ये वै सार्धं चलन्त्यत्र।
परमप्रकृष्टभूतः सहयोगः सर्वकाम्यश्च।।२०९।।

१६. कथा

गाथानामपि महिमा श्रेष्ठतरं रूपमाधत्ते।
जनजनमानसमध्ये तरंगितेयं कथा भवति।।२१०।।

रससृष्टिविरचनायां कथाः समस्ता इमा विपुलाः।
रमणीयं संचारं चित्रविचित्रं पुरस्कुर्युः।।२११।।

नायकशौर्यकथानां बालानामुपरि तादृशी छाया।
निपतति यावज्जीवनमेते रक्षन्ति भाण्डमिव।।२१२।।

मानसिके संसारे सृज्यन्ते या नवा गाथाः।
तासां प्रकृतिरतीवोन्मुग्धां छायां विलासयति।।२१३।।

नो लभ्यं संसारे स्थानं तत्तत्कथाशून्यम्।
यासु दृढो विश्वासः सर्वेषां जीवनं तनुते।।२१४।।

रक्ताभेयं प्रकृतिर्जीवनरमणीव मोहयति।
मन्दस्मितच्छटाभिर्गाथानां गुम्फनं कुरुते।।२१५।।

कालानां कलनायामाकलनं लोकगाथानाम्।
दूरस्थितमपि विश्वं सर्वत्रैकं विबोधयति।।२१६।।

राष्ट्रचरित्रोद्याने गाथाकुञ्जो नितान्तमुत्फुल्लः।
सौरभसरित्प्रवाहे संचारं नूनमादिशति।।२१७।।

१७. देवाः

सुखसंसारानुभवं कर्तुं देवाः समाराध्याः।
तेषामेवौदार्यैः सुखसंसारः समायाति।।२१८।।

देवाः सुसूक्ष्मजगतां नियामकाः सन्ति नूनं ते।
सर्वविधं सौन्दर्यं दातुं सामर्थ्यसंयुक्ताः।।२१९।।

देवानां सत्कृपया सर्वे विषयाः समीहिता ये स्युः।
सत्वरमहमहमिकया सर्वं रूपं प्रदर्शयन्त्येव।।२२०।।

देवानां पूज्यत्वं येषां बुद्धौ समायातम्।
तेषां कर्मणि नितरां सौकर्यं जायते सर्वम्।।२२१।।

देवाः सन्ति समन्तात् प्रभावमालाभिरापूर्णाः।
तेषां कृपाकटाक्षेष्वाऽस्ते कल्याणमयधारा।।२२२।।

अस्माकं पूर्वतमैः पुरुषैर्देवाः समाराद्धाः।
सर्वं कार्यं तेषां निर्विघ्नं साधु संजातम्।।२२३।।

जीवनमथ संसारे सर्वैः कष्टैरभिव्याप्तम्।
देवानां श्रद्धातो भवतितरां श्रेष्ठतायुक्तम्।।२२४।।

भूमीयं धन्याऽऽस्ते देवानां मन्दिराणि यत्पृष्टे।
जीवनसुखसञ्चारे श्रद्धासर्वस्वभूतानि।।२२५।।

देवकृपया नूनं सर्वः क्लेशो विदूरितो भवति।
तेभ्यः प्रणाममात्रात् शोभा सर्वा समीहिताऽऽयाति।।२२६।।

संसारे देवानां सर्वाऽभीष्टप्रदं स्थानम्।
सम्यक् संस्थितमाऽस्ते तेनैवेयं सुरम्यपरिपाटी।।२२७।।

देवाः सदा प्रणम्याः सर्वेष्वपि देशकालेषु।
सर्वास्वपि च समन्ताच्छोभनघोरास्ववस्थासु।।२२८।।

देवानां परिचर्चा शब्दमयी सेयमर्चना तेषाम्।
नाना जन्मसमर्जितपुण्यमयी काऽपि रेखाऽस्ते।।२२९।।

देवा एव नितान्तं संसारे सर्वसिद्धीनाम्।
सम्यग्वितरणसिद्धास्ते वन्द्याः सर्वभावेन।।२३०।।

सर्वासां शक्तीनामाकारा एव ते देवाः।
सम्यग् सुपूजिताः स्युर्मनसा वाचाऽथ कायेन।।२३१।।

देवाः सेवासुलभास्सेवेयं सर्वभावेन।
तेभ्यः समर्पणं तत् प्रसादमालासमाविष्टम्।।२३२।।

देवानां महिमानः सन्त्येतास्त्रिभुवनव्याप्ताः।
सर्वविधं सत्कार्यं देवा एवाऽनुगृहणान्ति।।२३३।।

निखिलः प्राणिसमूहः स्थूलां दृष्टिं विधारयत्येताम्।
प्राणे रहस्यभूतं जानन्त्येते च दर्शिनो देवाः।।२३४।।

देवानां सम्बुद्धौ वेदानां मन्त्रमालेयम्।
आसृष्टेराप्रलयं समुल्लसन्ती चिराल्लब्धा।।२३५।।

सर्वेषां भूतानां गूढं रूपं विधारयन्तोऽमी।
विश्वविधारितसुषमासाम्राज्यानां प्रकल्पका देवाः।।२३६।।

शोभितशोभाभारैर्विभवैरापूर्यमाणानाम् ।
देवानां संस्मरणं कल्याणानां प्रदायकं लोके।।२३७।।

दिनमणिरेष समुदितो देवानीकस्वरूपाणाम्।
सर्वविधसिद्धविद्याभाण्डाराणां गृहं भव्यम्।।२३८।।

चिन्मयतासम्प्राप्तिर्जायेतैवाऽथ देवसेवातः।
सुप्ताश्चैते शुभ्रा भावाः सद्यस्तरंगिता दृष्टाः।।२३९।।

देवानां सा काचिद् दृष्टिः पतिता यदा जन्तौ।
पूर्णतमे साम्राज्ये सम्यक् संस्थापितं कुरुते।।२४०।।

को वा जानीयादथ देवानां रूपमद्भुतं तदिदम्।
ते चेत् कृपां स्वकीयां दद्युः किमसम्भवं तत्र।।२४१।।

मानव एव यदा वा शरणं संयाति देवानाम्।
ते च प्रसन्नभावे संयाताः किं न यच्छन्ति।।२४२।।

तेषामथ देवानां प्रसादमासाद्य मनुजोऽयम्।
सर्वानकल्पितांस्तान्संभारान्धारयत्येव ।।२४३।।

संसृतिकण-कण-मध्ये देवानां सा प्रभावपरिपाटी।
देवाराधनगीतैः सततं नूनं विभावनीयास्ते।।२४४।।

देवानामथ मनुजैः स्नेहः परिपूर्णतां प्राप्तः।
कामपि दिव्यां दीप्तिं विलासयति कल्पनाकाम्याम्।।२४५।।

मानवशरीरमात्रे विलासमायान्ति ते देवाः।
तेषां कृपाप्रसादात्संप्राप्तेयं शरीरसम्पत्तिः।।२४६।।

अङ्गोपाङ्गानां यत्संगठनं मानवे दृष्टम्।
देवा एव नितान्तं तत्रैते कारणीभूताः।।२४७।।

वाणीयं सम्प्राप्ता मञ्जुविचाराभिरामरमणीया।
देवानामेवैषा नितरां धार्या कृपालहरी।।२४८।।

यत्र नरे श्रेष्ठत्वं विलोकितं पूर्णरूपेण।
तत्रैवेदं तेषां देवानां दर्शनं जातम्।।२४९।।

यत्राऽपि च सन्मनुजे प्रभावदीप्तिः समाद्रियते।
देवा एव समन्तात्तत्रैते कारणीभूताः।।२५०।।

सर्वा विचाराधारा बुद्धौ या चालयति सर्वम्।
तस्याः प्रेरणकर्मणि संलग्नास्ते निरन्तरं देवाः।।२५१।।

आकस्मिकं च घटनाचक्रं घटते पुरोऽस्माकम्।
तत्सर्वं सुविचरितमास्ते तस्य प्रवर्तका देवाः।।२५२।।

आपाते रमणीयं परिणामे दुःखदायकं यदिदम्।
तत्रापि तत्त्वमयतासंपूर्णा सन्ति ते देवाः।।२५३।।

आवाहनं च पूजनमथ च विसर्जनमथैतेषाम्।
कर्मणि कर्मणि दृष्टं तत्सर्वस्य प्रकल्पका देवाः।।२५४।।

सूक्ष्मे जगति निविष्टाः स्थूले रूपेऽपि सन्दृश्याः।
सर्वैश्वर्यसमेताः संपूज्या एव ते देवाः।।२५५।।

अधिगतयथातथ्याः सर्वाभीष्टप्रदातारः।
नानाविधसंभारैः पूजितकायाश्च ते देवाः।।२५६।।

नन्दितवैभववन्दितकामांकुरवर्धनेषु संलग्नाः।
नानाकर्मविधाने मनुजानां प्रेरका देवाः।।२५७।।

पर्वतनदीसमुद्रोद्यानवनानां च तीर्थानाम्।
सर्वेषां रूपाणामभिमानिन एव ते देवाः।।२५८।।

आस्तिकनास्तिकधारा संचालनवर्धनादिसद्भावे।
सदसत्तादीप्तीनां समविषमनियामका देवाः।।२५९।।

कालत्रितयाऽनन्त्ये नाना सुषमा समारूढाः।
अनुनम्यन्ते देवाः सुन्दरतायां समासीनाः।।२६०।।

अरुणोदयशुभवेलायामतिशयभानसम्पन्नाः ।
पुण्यैरेते मिलिता ध्यानस्थैः सत्वरं देवाः।।२६१।।

विविधर्तुमण्डिता अपि पुण्यैर्लभ्या मनुष्यमात्रेण।
सच्चिन्मयताभरिता आनन्दे संस्थिता देवाः।।२६२।।

मन्त्रमयी सा वाणी यानाह्वयते च कल्याणी।
ज्योतिर्यानारूढाः कृपया संयान्ति ते देवाः।।२६३।।

वेदे पुराणनिवहे काव्ये नाट्ये विशालसाहित्ये।
देशे तथा विदेशे देवानां लोक्यते महिमा।।२६४।।

गीतायां स्पष्टतया दैवो भावो विवेचितो दृष्टः।
मानससंचयमध्ये ते देवा जागरूकाः स्युः।।२६५।।

यत्सात्विकं स्वरूपं मानसमध्ये तरंगितं जातम्।
देवा एव नितान्तं तत्रैते कारणं जाताः।।२६६।।

आसुरभावे द्वन्द्वो देवैः सह जायते विपुलः।
आसुरभावो बाध्यो देवैर्युद्धे भवत्येव।।२६७।।

गहनान्धकारपटली कामं संजायतां नाम।
क्षीणापि दीप्तिरेखा सर्वं तद्वै विलोपयत्येव।।२६८।।

तद्वत्कामं सर्वश्चासुरभावः स्वमायया निखिलः।
व्यक्तित्वं संवृणुते पुनरपि देवाः समीपस्थाः।।२६९।।

रक्षन्त्येव समान्तन्मनुजं कृपया परामृष्टाः।
आसुरभावानुभवो देवानां दार्ढ्य भावनायैव।।२७०।।

आसुरभावो न स्याद् यदि विश्वस्मिन् सुविस्तीर्णे।
परितः प्रकाशमाना अपि देवा नानुभूयेरन्।२७१।।

यद्येवं च कदाचित् सूर्यस्याऽस्तंगमो न स्यात्।
नूनं सूर्यमहत्वं दृष्टौ सर्वं विलुप्येत।।२७२।।

सेयं विरुद्धधारा सर्वा सम्पोषयत्येव।
नित्यं तं महिमानं यत्कृपया जायते विश्वम्।।२७३।।

यत्र प्रणामधारानम्रत्वं जागृयान्नाम।
सर्वत्र तत्र देवाः समन्विता मार्गमादिशन्त्येव।।२७४।।

देवा एव नितान्तं समुन्नतेः कारणीभूताः।
यैवोन्नतिः प्रलब्धा सर्वा तेषां कृपाभूता।।२७५।।

देवान्विहाय नास्त्येवोन्नतिरेषा कदापि संसारे।
सर्वा च सा समृद्धिर्देवानामेव दानमुन्नेयम्।।२७६।।

तेषां पूर्णसमर्पणबुद्ध्यैवास्ते परा पूजा।
किञ्चिदिवाऽन्तरभावे विलुप्यते रम्यतासरणिः।।२७७।।

लोके वेदे स्थावरजङ्गमविश्वे पुरोऽथ पश्चाद्वा।
देवानां तन्मङ्गलमूलं रूपं परिस्फुरति।।२७८।।

प्रत्यक्षं ते सर्वे सर्वेषां सर्वदाऽऽयान्ति।
किन्तु प्रणाममयतासंतुष्टिर्दर्शने हेतुः।।२७९।।

प्रत्यक्षा अपि चैते पदार्थसार्थाऽन्यचेतसा नैव।
सम्यग्द्रष्टुं शक्याः किम्पुनरेते सुसूक्ष्मतमरूपाः।।२८०।।

देवाः प्रत्यक्षा स्युः कृपा न चेत्स्यात्तदीयैव।
भक्तानां पुनरेते सन्त्येवाद्यापि सम्मुखे सुस्थाः।।२८१।।

देवानां सेवेयं स्वात्मोन्नतये चिरं ध्येया।
देवानां सेवातः कोऽपि कथं दूरमागच्छेत्।।२८२।।

येषामखिलं स्वीयं ब्रह्माण्डस्थं विलोक्यते रूपम्।
तेषामाज्ञा सर्वा संसारे संप्रतीक्षमाणाऽस्ते।।२८३।।

ते भक्तिमात्रलभ्याः श्रद्धाधाराश्चिराद्दृष्टाः।
श्रद्धातपःप्रभावात्तेषां प्रत्यक्षदर्शनं भूयात्।।२८४।।

देवाः के वा ते स्युर्ये नैवाद्यापि दर्शने याताः।
हृद्देशे संस्फूर्तौ ये प्रकटाः सन्ति ते देवाः।।२८५।।

'देवा' इति शब्दोऽयं परमप्रेमाऽमृतैर्भरितः।
प्रेम्णः प्रोच्छलितत्त्वे मुखे समायात्यहो देवाः।।२८६।।

विमलमनोवाक्कायैर्वाक्यामृतनिर्भरे काले।
यत्र प्रयाति दृष्टिस्तत्रैते संस्थिता देवाः।।२८७।।

संगीताऽमृतनिर्झरधाराबन्धे सुसंचाराः।
सर्वनमस्काराऽवलिमध्येऽत्रैते स्थिता देवाः।।२८८।।

देहेन्द्रियेषु मानसमध्ये बुद्धौ स्थिता देवाः।
कमनीयं संसारं सर्वेभ्यो दर्शयन्त्येव।।२८९।।

इह यद्यत्कमनीयं दृश्ये - दृश्ये समुल्लसितम्।
भारतवर्षीणां दृष्टौ नान्यत् परं देवाः।।२९०।।

घोरतरं विद्रूपं दुःखाकरमस्ति यच्चैतत्।
सा सर्वाऽसुरसरणिर्दुर्दान्ता दृश्यते हन्त।।२९१।।

एतच्छशरीरमास्ते देवासुरयुद्धभूमिः सा।
प्रतिपदमनुभवमार्गे संयाता को न जानीयात्।।२९२।।

अनुपदमेव समेषां काम्योऽसौ देवताविजयः।
सर्वं सुखमयरूपं कस्तावन्नाभिवाञ्छेत।।२९३।।

स्वीयं सुखं च यदिदं तेषां वा मारकं जातम्।
सा सर्वाऽसुरगाथा तत्रोन्नतकन्धरा दृष्टा।।२९४।।

दैवश्चासुरभावः सर्वः संग्रन्थितश्चित्ते।
अनुभवपथमारूढः प्रमाणमन्यत् किमत्र वा देयम्।।२९५।।

यदिदं मनो मदीयं विस्तारेषु स्थितं जातम्।
देवानामेवैषा व्याख्या काचित् स्फुटीभूता।।२९६।।

देवानां प्राबल्ये विपरीतानां प्रधर्षणीयत्वे।
जीवनकालोऽप्रतिमः क्षणवद् व्यतियापितो भवति।।२९७।।

आसुरभावाऽम्भोधौ निमज्जिताः सन्ति ये पुरुषाः।
पर्वततुल्यः कालस्तेषां स्वल्पोऽप्यनुभवे यातः।।२९८।।

एते देवाः परितो राराजन्ते सुशोभिताः सुलभाः।
संदर्शनसंक्षमता यदि जन्तौ जागृता भूयात्।।२९९।।

आयाता चेद् दृष्टिर्देवानां सत्कृपापूर्णा।
जीवनकाले सेयं विलासभाषा समुल्लसिता।।३००।।

देवा ज्योतिर्मार्गे गमनागमनं प्रकुर्वन्तः।
क्षणमात्रेण समस्तं विश्वभ्रमणं समापयन्त्येव।।३०१।।

शिशुकाले कैशोर्ये यौवनकाले च वार्धक्ये।
देहादूर्ध्वं सर्वे देवा एते स्थिता एव।।३०२।।

एतत्पर्यावरणं देवानां सूक्ष्मतमरूपे।
यन्त्राणां विज्ञानैरपि नो लभ्यं सुसूक्ष्मत्वात्।।३०३।।

कोटिमितास्तेदेवा लक्षार्बुदरूपसंयुक्ताः।
पुनरप्येको देवस्सर्वा तस्यैव दृश्यते लीला।।३०४।।

मान्यतमे संसारे मान्यानां सरणिरेषाऽस्ते।
ते निखिलेऽस्मिन् विश्वे नमन्ति देवान् सदैव सम्पूज्यान्।३०५।

प्राणस्पन्दनसरणिर्येषां कृपया समुच्छलिता।
ते मानससाम्राज्योल्लासितसद्वैभवा देवाः।।३०६।।

देव्यो देवा वैषा नैवाऽस्ते भेदधारणा कापि।
जगतां माता देवी जगतां पितरस्तथा देवाः।।३०७।।

सर्वं मिथ्याभूतं देवानां विरहवेलायाम्।
सर्वं सत्यं तथ्यं यत्रैवाऽमृतभुजो देवाः।।३०८।।

कर्मणि कर्मणि सौख्यं शान्तिसमृद्धिं प्रकुर्वन्तु।
पूज्यतमास्ते देवाः पूजां स्वीयां प्रयच्छन्तु।।३०९।।

देवानां करुणायाः सम्प्राप्तौ दिव्यताऽऽयाता।
जन्मेदं सफलत्वे पादान्यासात्मकं तदा जातम्।।३१०।।

देवाः केवलमेते विद्याशोभाप्रदानेषु।
धनवैभवकल्याणप्रदानवेलासु सोल्लासाः।।३११।।

नित्यमनुभूयमाना देवानां सा कृपाधारा।
वर्षणसुषमाभरिता कुरुते स्वर्गं करस्थितं सर्वम्।।३१२।।

त्रैकालिकसत्तायां प्रभावमालाविभावपरिपूर्णाः।
देवा एते नित्यं निजभावं रक्षयन्त्येव।।३१३।।

मान्यतमानां मान्यास्ते देवा जीवनेऽस्माकम्।
सततं पूजनमयतां स्वीयां सर्वां प्रयच्छन्तु।।३१४।

देवानां सेवातः सम्पूर्णत्वं समायातम्।
दूरयति चाल्पभावं भूमाभावः समुल्लसति।।३१५।।

जन्तौ जन्तौ सुखमयसंसारोद्घाटने याताः।
देवाः सदा प्रणम्याः परितः सर्वत्र संस्थितिस्तेषाम्।।३१६।।

बद्धाञ्जलयः सर्वे सृष्टौ जाताश्च जन्तवो नूनम्।
देवानां सेवायां संलग्नाः पूर्णरूपेण।।३१७।।

भारतसंस्कृतिशोभा येषामाधारभूतानाम्।
सेवायां संलग्ना ते देवाः सर्वदा वन्द्याः।।३१८।।

१८. जगदम्बा

जगतां सेयमधीशा जगदम्बा नम्यते सर्वैः।
देवैस्तथा मनुष्यैर्ब्रह्मादिस्तम्बपर्यन्तैः।।३१९।।

सृष्टीनां निर्मात्री संहर्त्री या यदृच्छया सततम्।
सर्वगुणकर्मलीला सैषा सर्वेश्वरी जयति।।३२०।।

दुर्गा शिवा मृडानी शर्वाणी पार्वती तारा।
पीताम्बराऽथ त्रिपुरा धूमा काली च सिद्धिदात्रीयम्।।३२१।।

महिषासुरप्रमथिनी शुम्भनिशुम्भोद्धता दलिनी।
परमैश्वर्यं वितरति परमोदारैः कटाक्षसञ्चारैः।।३२२।।

तस्याः स्मरणं तस्याः कृपां विना नैव सम्भवति।
तां सर्वभाग्यलभ्यां परमोदारां प्रणौमि देवेशीम्।।३२३।।

स्मृतिमात्रं वा तस्या वितरति सौभाग्यपरिपाटीः।
साक्षाद्दर्शनलाभो ब्रह्मादीनां कदाचित् स्यात्।।३२४।।

सेयं सर्वोदारैश्वर्यैः सततं कृपाशीला।
यस्मिन् जन्तौ स्निह्यति सोऽयं सर्वेश्वरो भवति।।३२५।।

मन्दाराद्यैर्वृक्षैरनन्ततायां सुसेव्यमानेयम्।
भुवनत्रितयाऽनन्त्ये विचरति चित्रान्विता सततम्।।३२६।।

नानाश्चर्यसमृद्धैर्देवैः सततं समाराद्धा।
वितरति सत्सौभाग्यं भक्तिभराऽन्दोलिता नित्या।।३२७।।

संसाराख्ये चित्रे रंगान् सञ्चारयन्तीयम्।
विभ्राजते नितान्तं परमोदाराभिरामरमणीया।।३२८।।

देवी शिलामयीयं दुर्गा दुर्गेश्वरी जयति।
जगतां विश्वासानामाधारा या निराकारा।।३२९।।

सर्वाकारमयी सा परमाऽराध्याऽखिलैर्वन्द्या।
नम्रतरे जनवृन्दे वितरति सद्भक्तिमीशानी।।३३०।।

निखिलकलासंकायाऽधारा भ्रान्तेर्विलोपयित्रीयम्।
परितोऽपि दिव्यभावान् विकिरन्ती सन्ततं जयति।।३३१।।

आगमनिगमनिवेदितसर्वस्वा या परं ज्योतिः।
पश्यन्ती च परा या मध्या वा वैखरी वापि।।३३२।।

कमला पद्मा लक्ष्मीर्हरिप्रिया विश्वमातेयम्।
वन्द्या जगतां धन्या जीवानां मोहिनी नम्रा।।३३३।।

नानाकोटिब्रह्माण्डाविर्भावैस्तिरोभावैः ।
सततं क्रीडनशीला शुभदात्री जायतां नित्यम्।।३३४।।

शत्रुविदारणकार्ये ब्रह्माद्यैः संप्रपूजिता सेयम्।
स्वीयाऽट्टहासशब्दैर्विदारयति शत्रुहृत्पटलीः।।३३५।।

दुर्दान्तदैत्यनिवहैरापूर्णा युध्यमानेयम्।
सर्वेषां वधशीलाऽप्यन्ते तेषां सुखं तनुते।।३३६।।

युद्धे शस्त्रैः पूता असुरा दिव्येषु लोकेषु।
नीता यया नितान्तं जननीभावो नु तत्रापि।।३३७।।

कालत्रितये यस्या निर्द्वन्द्वो वा प्रभावमयमहिमा।
तारयति कष्टनिवहैर्देवान् मनुजान् ऋषीन् भक्तान्।।३३८।।

आध्यात्मिकाऽधिदैविकभौतिककष्टान् विदूरयन्तीयम्।
जगतां जननी धन्या प्रबोधयन्ती सुतान् सर्वान्।।३३९।।

अर्धं निष्क्रान्तं तं महिषं पुनरर्धमादिशती।
वीरैर्भावैर्वन्दितरूपा साऽस्ते जगन्माता।।३४०।।

मधुकैटभप्रमाथे निद्रारूपं विदूरयन्ती स्वम्।
नारायणाय युद्धं सन्दिशती स्वं तिरश्चक्रे।।३४१।।

हुंकारेण समस्तं बलमाराद् भस्मकुर्वती सेयम्।
धूम्राक्षं धूम्रमयं कुरुते सेयं जगन्माता।।३४२।।

नानाऽसुरसंघातोत्पादकतां धारयन्तं वा।
तं रक्तबीजमसुरं पञ्चत्वं गमयती धन्या।।३४३।।

नित्यस्पन्दनरूपा त्रयीमयी चेतनाधारा।
नाना सत्कार्याणां प्रवर्तिका शोभनं कुरुते।।३४४।।

जीवनकाले या सा मातुर्लभ्या कृपामयी धारा।
यामाराध्य सुसफलं जीवनमेतत्सुदुर्लभं लोके।।३४५।।

यत्र च चकिताः सन्तः परां भजन्तेऽथ योगमयदीप्तिम्।
सर्वे काले देशे लोकानां शिक्षणे दक्षाः।।३४६।।

जगदम्बायाः करुणा निखिलबलं सर्वजीवानाम्।
यत्सविधे च विभ्रमाः सर्वे ब्रह्मादयो देवाः।।३४७।।

याचन्ते तां करुणां निखिलैश्वर्यैः परिव्याप्ताम्।
तां सर्वलोकजननीं बालां यौवनवतीं धन्याम्।।३४८।।

तया प्रदत्तैर्विभवैः पूजनमपि तत्प्रकुर्वते नित्यम्।
सा चाधिकां समृद्धिं नित्यं प्रददाति भक्तेभ्यः।।३४९।।

तंत्रे पूजा यस्या नानारूपे समुल्लसिता।
मन्त्रमयी यन्त्रमयी यन्मूर्तिः सिद्धसेविता जयति।।३५०।।

शाक्तद्वैते द्वैते दर्शनमयताप्रकाण्डसाहित्ये।
यन्महिमा विख्यातो लोके सर्वप्रचारमायातः।।३५१।।

ज्ञाने विज्ञाने वा लोके वा पारलौकिके सर्वे।
यस्याः प्रभावगाथा दिव्यतमास्ता विभाविता लोकैः।।३५२।।

केनोपवर्णनीयं के शब्दास्तत्र के चार्थाः।
सान्तं सर्वं वर्णनमेतत्किं जायते ह्यनन्तायाः।।३५३।।

देव्याः कलाभिरामैः संपूरितसर्वविश्वायाः।
काले कलितां कलनामधरीकुरुते प्रभावपरिपाटी।।३५४।।

मान्यतमानां मान्या या च वदान्या वदान्यानाम्।
निखिलेश्वरी प्रणम्या पूर्णतया स्वात्मतर्पणायाऽपि।।३५५।।

नवरात्रेष्वथ यस्या दर्शनपूजनमयी शोभा।
त्रैलोक्येषु विलसिता देव्याः प्रीतिं सुपुष्णाति।।३५६।।

नवरात्रावलिकाले नाना संभारसारसर्वस्वैः।
सन्दर्शनं च यस्याः प्रतिमानां प्रीतिमावहते।।३५७।।

सर्वत्र समाराद्धं सप्तशतीस्तोत्रमेतस्याः।
जगदम्बाया भक्तिं द्रढयति सर्वं प्रयच्छति च।।३५८।।

कीलककवचस्तोत्रं नवार्णमन्त्रेण सम्पुटितम्।
मलिनमनोवाक्कायं शश्वद्दिव्यं समातनुते।।३५९।।

येषां शिरस्सु खेलति जगदम्बायाश्चरणरेणुः।
स्वीये काले तेषामुच्चतमत्वं सुविख्यातम्।।३६०।।

जगदम्बाचरितानां स्मृतिरथ यान् हर्षगद्गदान् कुरुते।
निखिलेऽस्मिन् भूवलये ते नूनं वन्दनीयतमाः।।३६१।।

ते सात्त्विकोन्नतीनां शिखरे - शिखरे चरन्तोऽपि।
निर्लिप्ताश्च नितान्तं हृदये जगदीश्वरीचरणलग्नाः।।३६२।।

सर्वाऽमोघकृपायाः सिन्धोर्विन्दुं वितीर्यैव।
या सज्जनान्विधत्ते सर्वोत्तमवैभवैर्लसितान्।।३६३।।

या सर्वकालसुलभा भक्त्यान्दोलितमनोविभवैः।
हृत्सिंहासनसंस्थां तां दृष्ट्वा सुकृतिनोऽथ कृतकृत्याः।।३६४।।

ब्रह्मादिस्तम्बान्ते ब्रह्माण्डे या ममत्त्वसंयुक्ता।
उत्पादयते रक्षति रूपान्तरतां च कारयते।।३६५।।

जन्मनि-जन्मनि निखिलाऽऽधारा सन्तिष्ठते नियता।
जन्मनि-जन्मनि जन्तुस्तत्क्रोडे क्रीडतेऽपैति।।३६६।।

माता सरस्वती सा ब्रह्माणी ब्रह्मभाग्येशी।
धन्यश्चासनरूपः सन्मानसराजहंसोऽस्याः।।३६७।।

अन्धं तमसा व्याप्तं यया विनाऽऽस्ते जगज्जालम्।
सर्वाधिष्ठात्रीयं केन्द्रीभूता प्रकाशानाम्।।३६८।।

देवीचरित्रमध्ये चरमचरित्रेषु चित्रिता नित्या।
धूम्रं चण्डं मुण्डं शुम्भनिशुम्भौ विदारयामास।।३६९।।

तं रक्तबीजमसुरं नियताद्भुतभावमारूढम्।
विस्तीर्णं स्वं वदनं कृत्वाऽसौ चर्वयामास।।३७०।।

मानव-दानव-विनता प्रणतानिखिलैश्च कोटिभिर्देवैः।
जडचेतनमयजगतामाधारा सा परेशानी।।३७१।।

याऽक्षरमालारूपा या च पराऽऽद्ये चतुष्टये व्याप्ता।
वाणी वीणापाणिर्वन्दितविभवा वदान्यताऽऽराध्या।।३७२।।

सरिगमपधनिससरिताप्रवाहमालाऽऽकुला देवी।
हृदयमिलिन्दकमलिनी सौरभमत्यद्भुतं तनुताम्।।३७३।।

या कुन्देन्दुतुषारैर्हारैरत्यन्तधवलाभा।
शुभ्रमरालाऽऽसीना स्फाटिकवीणासमाराध्या।।३७४।।

त्रिभुवनसारा तारा नीला चेयं सरस्वती जयति।
नन्दनविचरणशीला कविताकान्ता सदा शान्ता।।३७५।।

नाना नृत्योन्मेषैर्या त्रिकसंविधानैर्या।
नारदतुम्बरुसहितैर्देवैराराधिता देवी।।३७६।।

अस्मिन् काले येयं नव्या वैज्ञानिकी धारा।
नाना साधनसहिताऽनन्ते रूपे सुविस्तीर्णा।।३७७।।

यामालम्ब्य मनुष्योऽद्यत्वे जातो जगज्जेता।
यामासाद्य क्रामति पाताले चान्तरिक्षेऽपि।।३७८।।

सा निखिलाऽपि समुन्नतिरास्ते यस्याः कटाक्षसंरम्भे।
तदिदं रहस्यजातं ये वा जानन्ति ते धन्याः।।३७९।।

जगदीश्वरीकृपातो यातो मनुजः समुन्नतिं परमाम्।
यां विस्मृत्य मनुष्यो भयसंयुक्तो भवत्येव।।३८०।।

सेयं त्रिकालसिद्धा साक्षाद्देवी महामाया।
शश्वत्सुताऽपराधान् सहते नित्यं प्रसन्नाऽऽस्या।।३८१।।

दुर्दान्तैरपि पूज्या देवर्षिभिरस्ति पूजनीयतमा।
सर्वैर्विरुद्धमतिभिस्सेवितकाया महामाया।।३८२।।

खड्गप्रभासमूहैरज्ञानं युद्धशीलानाम्।
या नाशयति नितान्तं स्वीयं रूपं च दर्शयते।।३८३।।

दुर्द्दान्तशत्रुसंघेऽप्येषा सततं कृपां कुरुते।
शस्त्रविदारितकायानेतान् लोकान् प्रयच्छति या।।३८४।।

याऽलौकिकाऽपि सततं व्याप्ता सर्वेषु लोकेषु।
पुनरपि लोकातीता लीला यस्या विलासमायाता।।३८५।।

त्रैलोक्यशुद्धचरिते ऋषिभिर्मुनिभिस्तथा च देवाद्यैः।
यच्चरणधूलिकणतासम्प्राप्तिर्भाग्यलभ्याऽऽस्ते ।।३८६।।

जड़चेतनसंसारे या काचित् शक्तिरूपता दृष्टा।
सा सर्वाऽपि वरेण्या देव्येवेत्यादि ऋषिराहः।।३८७।।

यद् भक्तिमयीरचना मूकं मुखरं समातनुते।
मूर्खं वृहस्पतिसमं कुरुते यस्याः कटाक्षसंपातः।।३८८।।

कैलासाचलसदृशेऽरावलिशिखिरे सुदर्शनं ददती।
कैलादेवी भक्तैर्वन्दितविभवा जयत्येषा।।३८९।।

पीताम्बरा भगवती दतिया क्षेत्रे प्रतिष्ठिता वरदा।
धूमावती च देवी तत्रस्था पावयति लोकान्।।३९०।।

विन्ध्याचलमध्यस्था सा नित्यं विन्ध्यवासिनी देवी।
दर्शयते निजरूपं श्रीकृष्णस्याग्रजा माता।।३९१।।

सर्वसमीहितचरणा भक्तेर्मन्दाकिनीं धाराम्।
सेयं प्रवाहयन्ती देवी जगदम्बिका सेव्या।।३९२।।

निष्किञ्चनेऽपि भक्ते या यच्छति दिव्यवैभवं सततम्।
निष्किञ्चनतामथवा बहुमन्यन्ते चिराद् भक्ताः।।३९३।।

हृदये नन्दनकाननसमं संचारयन्तीयम्।
मानसपरिसरतटिनीकूले तान् कल्पपादपान् सूते।।३९४।।

सम्पत्तयो विपत्तय एता लभ्याः कृपान्वयैर्यस्याः।
व्यतिरेकैश्च नितान्तं देवी सा कैर्न वा नम्या।।३९५।।

मातर्मानसमध्ये मोहौ मधुकैटभौ हत्वा।
सद्यो मां परिपालय हन्ये नो यावदेताभ्याम्।।३९६।।

बुद्धिं मानसमिन्द्रियसंघं संव्याप्त तिष्ठन्तम्।
क्रोधाख्यं महिषासुरमुन्माथय सत्वरं मातः।।३९७।।

तौ काम प्रतिरूपौ शुम्भ निशुम्भौ मनसि तिष्ठन्तौ।
सर्वोपद्रवजनकौ सपरिकरं दारय कृपया।।३९८।।

मायामयरूपाणां गणना नाऽस्त्येव चैतेषाम्।
केवलमेकैव त्वं सर्वेषामप्यभिज्ञासि।।३९९।।

नाहं जाने चैतान् सूक्ष्मे देहे स्थितानसुरान्।
मूलाघातं ये वै कुर्वन्तो मोदमायाताः।।४००।।

एतैरसमर्थः सन् त्वां हे जगदीश्वरीं याचे।
एतान्नाशय कृपया मातर्मेऽन्तः स्थितानसुरान्।।४०१।।

बुद्धिं श्रद्धां भक्तिं मानसमध्ये द्रुतं देहि।
दाने तु काऽपि बाधा ते न स्याद्दानशीलायाः।।४०२।।

तान्तक्लान्तनितान्तोन्मथितस्वान्ते कृपाऽमृताऽलेपम्।
कुरुते जगदम्बेयं भक्तिविनम्रैस्तु निर्ध्याता।।४०३।।

नाना देशे काले पात्रे दीप्तिं प्रकुर्वती सेयम्।
नित्यं प्रणाममात्रे सर्वां शोषयति मलपटलीम्।।४०४।।

स्वीयमनन्यं भक्तं निवेशयन्ती समुन्नतेः शिखरे।
आदेशयति यथेच्छं तस्मै सौभाग्यसंभारान्।।४०५।।

अमरीकबरीगन्धभ्रमरीमुखरीकृतप्रान्तौ ।
चरणावरुणौ कुङ्कुममणिप्रभारञ्जितौ तयताम्।।४०६।।

सत्सौरभसाम्राज्योल्लासितविभवे मणिद्वीपे।
सौभाग्यानां धारा दिव्या काचित्प्रवाहिता सततम्।।४०७।।

नाना नवोपकरणैर्मण्डितकाया जगन्माया।
यत्किञ्चिदर्पयन्तं वितरति नानोपकरणानि।।४०८।।

अशनं वसनं पानान्यावासा दिव्ययानानि।
स्वप्नेष्वपि दुर्लभतां गतानि वर्षन्ति यत्कृपया।।४०९।।

गार्हस्थ्यस्य च शकटं बोढुं ससुखं वितीर्णशक्तिर्या।
वैभवपूर्णं कुरुते कन्यादानोत्सवं काले।।४१०।।

सकुटुम्बं या नित्यं संवर्धयते निजं भक्तम्।
एतादृशी हि ममता पूर्णा माता न कैर्नभ्या।।४११।।

वाचां विस्तारं या यच्छति सद्भक्तिसन्तुष्टा।
भक्तश्चकितं कुरुते वाचां सद्वैभवैर्विश्वम्।।४१२।।

ज्ञानं विनिर्मलं या ददाति विभ्रमविलोपकं नित्यम्।
यत्संप्राप्य समाधिर्भक्तः कृतकृत्यतां यातः।।४१३।।

नानाऽकारविलासैर्विमोहयत्येव संभ्रान्तान्।
सन्तः पूतनिकायाश्चैकां ध्यायन्ति निखिलां ताम्।।४१४।।

देवी जगदुद्याने सौरभमत्यद्भुतं ददती।
नाना जन्मोपार्जितदुर्गन्धिं दुरयतु तूर्णम्।।४१५।।

विजया विजयं दद्याद्विजयः सर्वस्य काम्योऽयम्।
सांसारिकसंग्रामे विजयं को नाभिवाञ्छते नित्यम्।।४१६।।

आस्तां तावत्सर्वं किं स्यादेतैर्मुधाऽलापैः।
स्वात्मनि यः सुतभावस्तं सैवाऽलोकते नित्यम्।।४१७।।

द्वितीयद्वीपः

१९.दृश्यावलिः

नम्रतरः संचारो व्यवहाराणां विकस्वरां दीप्तिम्।
सर्वेषु भावनानां कोमलतायाः करोति विस्तारम्।।४१८।।

विलसितमेतदगाधे सुविस्तृते भावनाजगति।
कामपि करोति मधुमयसुषमां सर्वां प्रकाशमयीम्।।४१९।।

वैपुल्ये यद्विलसति चैतदसामान्यरूपेषु।
तद्वै निखिलं लोकं संचारेषु प्रदीपयति।।४२०।।

नानारहस्यलास्यैर्विलसितमाभाति काननं पुरतः।
सौगन्ध्यविस्तरोऽयं तस्यैवास्ते दिशासु सर्वासु।।४२१।।

मधुरिमनवनिर्झरिणी रंगमयी वा प्रवाहशीलेयम्।
लसति नितान्तं कान्ता तरंगिता यौवनोल्लासैः।।४२२।।

सर्व तदिदं निकटे कुसुमितभावे समर्पितं दृष्ट्वा।
धन्यत्वं जागर्ति प्रकाशमायात्यहो भावः।।४२३।।

नन्दनकाननसदृशीं कोटिगुणां शोभितां छायाम्।
मण्डलभावे कलितां संपश्यन् को न मुग्धः स्यात्।।४२४।।

नर्तनमिव गायनमिव कम्पनमिव हृत्तरंगेषु।
वर्षणमिव हर्षाणां दिशती दृश्यावलिर्जयति।।४२५।।

उत्साहे तरलत्वं विकस्वरोन्मादसंचारः।
गरलाभं हीनत्वं विदूरयति काममुद्भ्रान्तम्।।४२६।।

२०. औदार्यम्

पठितं तथा च लिखितं पाठितमथ लेखितं चापि।
विद्वत्ता विख्याता वाग्मित्वं वा प्रशस्ततरम्।।४२७।।

निखिला सहानुभूतिः पराक्रमाणां पराकाष्ठा।
औदार्यस्याभावे धूलिप्रक्षेपमात्रं स्यात्।।४२८।।

धनिकाः कलुषितकायाः कार्पण्येनैव संश्लिष्टाः।
विषबीजं पुष्णन्तो विक्षोभं केवलं कुर्युः।।४२९।।

विकसितकुसुमामोदः कियदौदार्यं नु शिक्षयति।
मधुकरमाला निपतति परितः सा सौरभोद्भ्रान्ता।।४३०।।

निन्दितनिःश्वासानां धारौदार्येण शून्यतरा।
संकोचयति नितान्तं कमनीयं काव्यसंसारम्।।४३१।।

प्रेष्ठश्रेष्ठवरिष्ठा अपि कार्पण्येन संपूर्णाः।
कारुण्यं स्वीकर्त्तुं स्वप्नेष्वपि न क्षमन्ते ते।।४३२।।

शारीरं मानसिकं बौद्धिकमपि तर्पणं कर्त्तुम्।
येषां सविधे शक्तिस्ते धन्या एव संसारे।।४३३।।

अङ्गुलिगणनीया अपि तादृशभावैरलंकृता एते।
संसारे सुखयन्तो भूतलभूषणतमा जयन्त्येव।।४३४।।

२१. एकान्ताः

कोलाहलेन शून्या एकान्ता भावनाधौताः।
वैचारिकविश्वस्मिन् प्रवेशमार्गा इमे धन्याः।।४३५।।

एकान्तव्यसनितया प्रकृतिर्जागर्ति विश्वस्मिन्।
विपुलतमं वा विश्वं प्रकाशमायाति चैकान्ते।।४३६।।

एकान्ते चैतन्यं निर्मथितं स्वेन रूपेण।
सन्दृश्यते समन्तात् नानारूपेण चित्रेषु।।४३७।।

एकान्तः सा कान्ता मोहयतीवाऽमृतास्वादैः।
मथयतितरां मृतत्वे या वृत्तिर्जायते चित्ते।।४३८।।

रङ्गे रङ्गे रिङ्गणरेखा रम्या तथैकान्ते।
भव्या नव्या सरणिर्मिलतितरां वा तथैकान्तै।।४३९।।

मानसपटले वर्षा चित्राणां विद्यते विपुला।
नितरां प्रकर्षयोगो भवतितरां वा तथैकान्ते।।४४०।।

अणुपरमाणुमहत्त्वं संघर्षाणां नवीनरूपाणि।
एकान्तानां गाथां कथयन्तीवाऽमृतास्वादैः।।४४१।।

भ्रान्तिर्नश्यति सद्यो निश्चयभावः समायाति।
एकान्तानां लाभा नैकविधा जीवने दृष्टाः।।४४२।।

मौनतमे वा गगने गंगा याऽस्ते तरंगिता नित्यम्।
तस्या एवाऽवतरणकर्मणि दक्षास्तथैकान्ताः।।४४३।।

२२. मेघमाला

मेघानां यानेष्वारुह्य तु सततं पयोऽत्युच्चैः।
घटयति जनताजीवनसंतरणं शुभ्रपाथेयम्।।४४४।।

कविकुलगुरुरपि मेघे कान्तिं कृष्णां समालोक्य।
यक्षं जायामलकां रामगिरिं चापि कल्पयामास।।४४५।।

सघना मेघच्छाया जलमिश्रा शीतसंचारा।
घर्मप्रतप्तजनतानन्दकरी संततं जयति।।४४६।।

आसृष्टेरारम्भादद्यावधि मेघडम्बरः सोऽयम्।
बालान् वृद्धांस्तरुणान् कामिजनान् मादयत्यतुलम्।।४४७।।

सौन्दर्यभूमिकेयं नीला जीमूतमालिका नभसि।
कं वा जनं न कुरुते हर्षाकारं विमानमारूढम्।।४४८।।

नीरदलीलाऽऽकाशे चित्रविचित्रा समाभाति।
यत्र धरित्रीलीला सापत्न्यं द्वेषमातनुते।।४४९।।

अलकावलीव सेयं विकीर्णवर्णा मनोहरा दृश्या।
या सृष्टिनायिकायाः सौन्दर्यं दर्शयन्तीव।।४५०।।

कल्पनकल्पलतेयं मेघानां मालिका नम्या।
ईदृक्ता चेयत्ता यस्या गणिता न केनापि।।४५१।।

मेघाः सन्ति कियन्तो नभसि समुद्रात् समुद्भूताः।
जीवनसम्प्रेषणतो हर्षाद् वर्षा वितन्वन्ति।।४५२।।

जाज्वल्यमानघर्माऽकाण्डं ताण्डवमहो शान्तम्।
तप्तोऽयमपि समीरः सुतरां शीतो नु संजातः।।४५३।।

घर्मांशुः कथमेवं प्रतियात्यविचारयञ्जगतीम्।
प्रतिवर्ष सरणिरियं धर्मो मेघस्तथा पवनः।।४५४।।

मृतकानामपि संख्या तापाल्लहरीं समाश्लिष्य।
आकाशवाणिनादैः पत्रैरपि सूच्यते नूनम्।।४५५।।

ये तापमूर्च्छिता अपि रक्षितवन्तः स्वमात्मानम्।
ते ननु सुखस्य वर्षाः का अप्यसमाः करे कुर्युः।।४५६।।

शोषणकररविकिरणान् स्थगयत्यम्भोदमालेयम्।
नैवं यदि बोभूयाद् जीवनचिह्नं कुतोऽवशिष्टं स्यात्।।४५७।।

नीचैस्तलप्रदेशात् क्षिप्रतरं वा समुद्भूय।
उच्चादुच्चतरं तत्स्थानं मेघा द्रुतं प्रयान्ति ननु।।४५८।।

अण्वस्त्राणां स्फोटे संसारे सर्वथा क्षुब्धे।
अम्बुदमालापीयं कंचित् क्षोभं बिभर्त्येव।।४५९।।

२३. वेदना

मनसि विषमता वचसां निम्नोन्नतमार्गसंचारः।
काये क्रान्तिविधुरता मूर्तिमती वेदना सेयम्।।४६०।।

बहु बहु बहु करणीयं न किमपि संजायते नूनम्।
सरणिर्नो लब्धा सा या करणीयेऽग्रसारयति।।४६१।।

बहुभिर्बहुसम्पादितमेतद् यद् विद्यते पुरतः।
लाभास्तेषामेषां नभःस्पृशो लोकनीयतराः।।४६२।।

आसन्निमे विपन्नाः साश्रुमुखा दीनतायुक्ताः।
किन्तु स्वेदोद्योगस्तानद्यत्वे विलासयति।।४६३।।

अन्ये चासन् भरिताः सुखिनो भोगेषु संसक्ताः।
ते निम्नत्वे तेषामधिकृतभावेषु संस्थिता दृश्याः।।४६४।।

एतानथ तान् सर्वान् दृष्ट्वैतच्चेतसा ध्येयम्।
बहु करणीयं पुनरपि नैवात्मनि निम्नता धार्या।।४६५।।

कार्यमये संसारे करणीयं सर्वमेवैतत्।
सामान्यं वैशिष्ट्येनायं क्षणसङ्ग्रहः कार्यः।।४६६।।

कालः कियती मात्रा योऽसावाधारभूतो वा।
तत्रोच्चावचभावा दृश्यन्ते न त्वरा काचित्।।४६७।।

२४. सिद्धस्थानम्

तदिदं सिद्धस्थानं प्रसन्नताभिः परामृष्टम्।
नाना सुषमामण्डितरूपं नित्यं मनो हरति।।४६८।।

सूक्ष्माणां स्थूलानां रूपाणामत्र भाग्यानि।
निर्मीयन्ते सततं नानारूपाण्यनन्तानि।।४६९।।

चेतसि निर्भारत्वं वचसि च वाद्यामृतास्वादः।
स्थानेऽस्मिन् सम्प्राप्ते सर्वेष्वन्तः समुद्भवति।।४७०।।

शुभ्रा विचारसरणिः कल्याणानां समीपताकरणी।
स्थानेऽस्मिन्नायासं विनैव सद्यस्तरङ्गिता भवति।।४७१।।

चञ्चलतायाश्चित्रं व्यथयति यद्वा मनोजगत्सर्वम्।
स्थानेऽस्मिंस्तल्लुप्तं तथा यथा नास्ति परिचयः कोऽपि।४७२।

गुणगणनवप्रकर्षस्त्वाधारवशः सदा सिद्धः।
भारविवाक्यं तडिदिव स्थाने ह्यस्मिन् समुन्मिषति।।४७३।।

सर्वेन्द्रियतोषकराः सम्भाराः सात्त्विका यत्र।
स्थानं तदिदं दिव्यं वरदानं वा समालोक्यम्।।४७४।।

दर्शं दर्शं यत्र त्वहो ध्वनिः केवलं हृदये।
वर्षा इव हर्षाणां कुर्वन्निःसरति भावानाम्।।४७५।।

२५. स्वरलहरी

बाला काचित् स्वीयां स्वरलहरीं संविलासयति।
सर्वेन्द्रियाणि मन्ये श्रोत्रे सद्यो विलीनानि।।४७६।।

स्वरलहरीयं काचित् विषमान् भावान् विदूरयति।
एकाकारां मुद्रामाविर्भावे विलासयति।।४७७।।

एषा प्रभातवेला सैषा विभुता विलक्षणा भावाः।
स्वरसंचारमधुरता मधुपूर्णोऽयं विभाति संसारः।।४७८।।

लालितपालितवर्धितसरणिः सैषा स्वराणां या।
अवरोहारोहक्रमनिःश्रेणीयं विलासमायाति।।४७९।।

अधुनैवैकक्षणके स्वर्गे गमनं सदेहं वा।
तनुते लहरी सेयं स्वरामृताऽस्वादसम्पूर्णा।।४८०।।

सरिगमपधनिर्बन्धे प्रकम्पमानेव मधुमयी संवित्।
रंगमयी चित्रमयी विभामयी वा विभासते धारा।।४८१।।

रसमयनवनिर्झरिणी मानसगगने तरंगिता सेयम्।
प्रीतिमयं संसारं प्रकाशयति सर्वसम्पूर्णम्।।४८२।।

गन्धमयीयं पृथिवी स्वरसौगन्ध्येन सम्पूर्णा।
स्वर्णे सौरभभावं निस्तन्द्रं प्रस्फुटं कुरुते।।४८३।।

जीयादेषा लहरी निस्तन्द्रा छन्दसां माला।
स्थूलतराः शब्दास्ते यत् सौन्दर्यं विलोपयन्त्येव।।४८४।।

२६. सा काऽपि

हंहो, तडिदिव वेगात् संयान्ती मधुमयं चित्रम्।
चित्ते विकिरन्तीयं मोहाम्भोधौ निमज्जयति।।४८५।।

मधुकलशं नु वहन्ती वितरन्ती मधुमयं गन्धम्।
सा गन्धवाहसहजा कस्मान्नो परवशा भवति।।४८६।।

नेत्रमयं संसारं रचयन्ती वा पिपासयाऽकुलितम्।
अधिदेवतेव तत्र स्थिता विशति मर्महृदयेषु।।४८७।।

दैनन्दिनिकी चर्या क्षणदात्री वा क्षणलयं दधती।
मनसा कर्णैर्निपेया रंगमयी चेतना कापि।।४८८।।

मानसिके संसर्गेऽपि स्वर्गं करगतं दिशती।
सर्वविभावैर्वलिता कलिता सुषमा लता काचित्।।४८९।।

रूपाणां गन्धानां स्पर्शाणां संगमीभूता।
अन्तःस्थितसंसारोद्घाटनपरमा परा संसत्।।४९०।।

नियमानां सर्वेषां संहर्त्री नवनियमकर्त्री।
रचनासंसारेषु प्रथमा सेयं स्वरालेखा।।४९१।।

उपमानानां सैषा दारिद्र्यादेशिका नितराम्।
अद्भुततरमिव रूपं दृष्टिपथे नूनमायातम्।।४९२।।

२७. दूरे-अन्तिके

अन्तिकतमस्थितिर्या सा बाधा रम्यतायां स्यात्।
दूरतमा संस्थितिरपि रम्यत्वं नो विलासयति।।४९३।।

परमं यद् रमणीयं समीपसमसंस्थितं भाति।
तद् रमणीयमितीयं दृष्टिर्दूरान् निबध्नाति।।४९४।।

सामीप्यातिशयादपि तस्य न रमणीयताऽनुभवः।
तद् हृदये संजातोऽन्येषां हृदये यथा भवति।।४९५।।

स्वीया यद्यपि सुन्दरभावे लभते परां काष्ठाम्।
परकीयैव मनोज्ञा सततं चेतो निबध्नाति।।४९६।।

दूरे चाथ समीपे यस्या स्थितिरीदृशी भूयात्
नितरां मनोज्ञरूपा चित्ते नूनं समादरं लभते।।४९७।।

सौन्दर्यानुभवोऽयं दूरान्तिकसंगमेनैव।
छायामसमां स्वीयां विस्तारयति प्रकामरमणीयाम्।।४९८।।

जगदीश्वरसंस्थितिरपि मायाऽवरणेन दूरिता याऽसौ।
सर्वाऽन्तिकतायामपि चरमानन्दस्वरूपाऽस्ते।।४९९।।

२८. ऊर्जा विद्युत्

विद्युल्लीला मीलितविभवैः सन्तोषिता भवति।
सर्वेन्द्रियपञ्चामृतरूपा नगरस्य जीवनं सेयम्।।५००।।

ऊर्जा यन्त्रमयीयं सर्वं देशं विलासयति।
नवनायिकेव परितो यद्वशतो भाति नगरीयम्।।५०१।।

आकाशे या विद्युन्माला मेघेषु चञ्चला भाति।
तादृशमपि चाञ्चल्यं यन्त्राधारा प्रकाशयत्येव।।५०२।।

विद्युत्प्रकाशकार्ये काचाः सर्वत्र गोलकाकाराः।
रंगानां संयोगस्तत्र तु दृष्टीर्निबध्नाति।।५०३।।

अद्यत्वे यदि विद्युद्वैभवशून्यो भवेन्मनुजः।
जीवनमस्ति तदात्वे सर्वं भारायितं भवने।।५०४।।

क्षीणतमं ध्वनिमपि वा विद्युद्विस्मारयति कामम्।
श्रोत्राणां तोषकरं रूपं विद्युद् विलासयति।।५०५।।

शीतानां तापानां नियन्त्रणे वा पराक्रमते।
स्पर्शमयः संसारः सर्वः करसंगतो भवति।।५०६।।

मनसि च वचसि च काये कोटिगुणां शक्तिमादधती।
विद्युदियं संसारे विज्ञानस्यासमा संपत्।।५०७।।

२९. कृष्णद्वैपायनः

कृष्णद्वैपायनतो हिमालयात् सम्प्रवृत्ता या।
नानाकथानकानां गंगा तोषयति संसारम्।।५०८।।

सा शेमुषी प्रणम्या यस्यां विपुलः कथालोकः।
प्रादुर्भूय नितान्तं भूवलयं मोहयाञ्चक्रे।।५०९।।

अगणितजीवनलहरीप्रवाहधारातरङ्गाणाम् ।
आकर्षकचित्राणां प्रदर्शिनी व्यासलेखनी धन्या।।५१०।।

नानापुराणपाथोनिधिमध्ये द्वीपदर्शिनी सेयम्।
श्रीकृष्णद्वैपायन-लेखनधारा नमस्याऽस्ति।।५११।।

विघ्नाद्रीणां वज्रे गणाधिपे लेखके जाते।
निखिलः कथासमुद्रो निमिषैर्मर्यादितो जातः।।५१२।।

ये चानन्ता वेदाश्चतुष्टयत्वेऽथ तान् गृह्णन्।
वेदव्याससमाख्यां लयपर्यन्तां प्रसाधितवान्।।५१३।।

व्यासस्याख्या तावन्नितरां लोकेषु जागृता जाता।
अद्यापि तु दृश्यन्ते सहस्रशो व्यासरूपाणि।।५१४।।

लोकोत्तरसच्चरिताः पुरुषा यन्नामवन्तः स्युः।
तत्तन्नाम च लोके सर्वेषामीप्सितं भवति।।५१५।।

कमनीयः संसारो वेदव्यासेन निर्मितो दीप्तः।
निखिलानां लोकानां श्लोकेष्वाभान्ति चित्राणि।।५१६।।

सम्पूर्णं संसारं कर्मक्षेत्रे समाकर्षन्।
पुण्यमहाभारतमथ रचयन् व्यासो न वन्द्यः कैः।।५१७।।

कौरवपाण्डवगाथा-प्रवाहमध्ये समानीता।
सम्पूर्णेयं सृष्टिः प्रारंभाद् व्यासदेवेन।।५१८।।

अष्टादशैः पुराणैर्निदर्शितान्येव सर्वाणि।
सूक्ष्माणां स्थूलानां जगतां रूपाण्यनन्तानि।।५१९।।

जीवनधारा धन्या संजाता चेतनापुञ्जैः।
असमचरित्रोन्मेषैर्व्यासस्येदं महद् दानम्।।५२०।।

सुचरितसहस्रविवरणलाभैर्धन्या सुवासिता धरणी।
नभ्रतरोऽयं लोको व्यासस्याराधनं कुरुते।।५२१।।

वेदे पुराणनिवहे दर्शनजलधौ च सेतुनिर्माणम्।
व्यासकृतं तत् सर्वं मानवता तेन धन्यतमा।।५२२।।

वेदान्तसूत्ररचने दर्शनशास्त्रस्य सर्वस्वम्।
संग्रथितं यद् दिव्यं निर्मथिता सा सुधैव ननु।।५२३।।

भक्तिमयी या धारा श्रीभागवते प्रवर्तिता दिव्या।
भावानां संसारे घटना दिव्यैव सा सेयम्।।५२४।।

श्रीकृष्णः शरणं मम भारतभाभास्वरो भगवान्।
गुरुवर्यो लोकानामधीश्वरः पालको गोपः।।५२५।।

सर्वजगत्प्रभुरसमः साक्षात्पूर्णः कलानाथः।
आनन्दानां कन्दो वन्द्यो जगतामनिर्देश्यः।।५२६।।

आनन्दमात्रनिष्ठः सर्वाऽनन्दस्वरूपोऽसौ।
श्रीकृष्णचन्द्रभगवान् मानवता तारको भूयात्।।५२७।।

यस्यकृपाकटाक्षैरद्याप्यसमा कला नित्यम्।
चेतसि नवतामयतां संस्फूर्ति संविलासयत्येव।।५२८।।

कारागारे नितरां निविडे प्रच्छन्नतमराज्ये।
प्रकटीभूय नितान्तं हर्षं भरयाम्बभूव भूवलये।।५२९।।

वर्षतु देवोऽस्मदुपर्याशां सञ्चारयन् मधुराम्।
गोपीमोहनमन्त्रो राधाऽऽराधितपदः प्रभुः कृष्णः।।५३०।।

एषोऽस्मि दीनहीनो लीनो विषयेषु निद्येषु।
देवेशस्य कृपायाः पात्रत्वं कुत्र वा चाऽस्ते।।५३१।।

पुनरपि करुणारूपं सर्वान्तर्यामिनं कृष्णम्।
याचे जगदानन्दं मलिनमतिः शुभ्रताऽवाप्त्यै।।५३२।।

भगवन्, माधव सेवा तव नित्यं निर्मला जयति।
यस्यां भावोन्मेषैरधिगतमेवाऽस्ति सर्वसाम्राज्यम्।।५३३।।

माधवसेवाविमुखो सर्वो दीनो भवत्येव।
तत्कृपयैव तदीया सेवा भाग्येषु लिख्यते कैश्चित्।।५३४।।

भगवन्, भवान् नमस्यः कथमिव संजायसे नित्यम्।
पुण्यप्रभावभाभिर्भरिता ये ते नमस्यन्ति।।५३५।।

भगवन्, कालियमर्दन चित्ते चित्ते विलोक्यते सर्पः।
तत्कुरु मानसयमुनास्थितमेनं चरणताड़नैर्दूरे।।५३६।।

तत्र तु जीवाः सर्वे बद्धाः स्वीयैश्च कर्ममयपाशैः।
दुःखफलं ननु भोक्तुं जनिं लभन्ते, वदन्ति शास्त्राणि।।५५७।।

भगवान् ननु कर्ममयैः पाशैर्दूरेऽप्यसंस्पृष्टः।
कथमुद्भवति जगत्यां स्थाने प्रश्नस्तदुत्तरं विविधम्।।५५८।।

कारागाराऽध्यक्षोऽपि तु बद्धान्वीक्षितुं काले।
स्वेच्छावशतो गच्छति कारागारे तथैव यात्रेयम्।।५५९।।

कारागाराध्यक्षो बद्धान् संपीडितान् जीवान्।
परया कृपयाऽविष्टः संमोचयतीति तस्य सामर्थ्यम्।।५६०।

सर्वसमर्थो भगवान् श्रीकृष्णः कर्मसंसारे।
कारागारे स्वेच्छावशतो नूनं समायातः।।५६१।।

संमोचिता अनन्ता जीवास्तेन कृपाऽऽलेशैः।
अद्यापि तस्य लीलाचिन्तनमेवं कृपां कुरुते।।५६२।।

श्रीकृष्णचिन्तनानामानन्दोन्मादतत्त्वानाम् ।
सेयं प्रकाशधारा मूलाऽविद्यां विनाशयति।।५६३।।

क्षणमात्रेण सुदाम्नो दारिद्र्यं दूरयन्कृष्णः।
दूरीकरोतु कृपया सर्वं दारिद्र्यसंचारम्।।५६४।।

जगदीश्वरो नु देयादीश्वरतां मे महीयसीं दिव्याम्।
यद्विरहे पापमयं जीवनमेतद्विनिन्दितं चाऽस्ते।।५६५।।

श्रीकृष्णवाक्यधाराप्रकाशितं जीवनं भूयात्।
यद्वशतः संसारे भक्तेर्मन्दाकिनी वहति।।५६६।।

भगवान् श्रीकृष्णो ननु धन्यतरं जीवनं कुर्यात्।
गोपालमण्डलीशो निखिलान्तःस्थस्तमोहारी।।५६७।।

श्रीकृष्णः खलु नित्यं पूजां सम्भारभासुरां मनसा।
संकल्पितां समन्तात् स्वीकुर्यात्तापमपहन्तुम्।।५६८।।

सर्वेषां हि जनानां श्रीकृष्णः कर्षणं कुरुते।
स्वीयैर्विविधै रूपैर्मोहनमन्त्रस्वरूपोऽयम्।।५६९।।

नो तादृशः कलावान् पुरुषो दृष्टस्तथा ज्ञातः।
येनार्जितकलया नो श्रीकृष्णाऽराधना विहिता।।५७०।।

चित्रकलायां निपुणाश्चित्राणीमानि कृष्णस्य।
निर्माय तूलिकाभिर्धन्यतमास्ते भवन्त्यहोभाग्याः।।५७१।।

स श्यामसुन्दरो ननु शुभ्रामसमां चमत्कृतिं दद्यात्।
यस्याः शुभप्रभावो बाधां दूरीकरोति दुरितानाम्।।५७२।।

मूर्तिकलायां कुशलः शिल्पी नैवाऽथ दृष्टः स्यात्।
येन कृष्णाऽऽराधनधारा न स्यात्प्रवाहिता मूर्तौ।।५७३।।

कवयो न तादृशा स्युर्दौर्भाग्यैर्वा परामृष्टाः।
श्रीश्यामसुन्दरोऽसौ न वर्णितो यैर्नवैर्वृत्तैः।।५७४।।

योऽसौ युद्धक्षेत्रे स्थितो हसन्नेव विज्ञानम्।
गीताऽमृतस्वरूपं ददौ प्रणम्यो न कस्याऽऽस्ते।।५७५।।

श्रीकृष्णोऽसौ भगवानानन्दानां प्रणेतास्ति।
जगच्छरण्यः सोऽयं निखिलजगद्वन्दनीयोऽस्ति।।५७६।।

इदमन्धं भूमण्डलमाखण्डलतुल्यधामभिर्लोकैः।
विद्योतितं भगवतः कृपाकटाक्षस्य संचारैः।।५७७।।

कवितापि तत्कृपायाः कणिकामात्रं चिरं लब्ध्वा।
भवति नितान्तं सरसा मा भूद्वा तत्र पाण्डित्यम्।।५७८।।

अविदितगुणलवलेशा कविता श्रीकृष्णनामसंवलिता।
विद्योतितरसराज्या प्रभवति सर्वान् वशीकर्तुम्।।५७९।।

सरसा सालंकारा संवलिता सर्वगुणयोगैः।
अपि कविता नो वन्द्या हीना श्रीकृष्णनाममाधुर्यैः।।५८०।।

श्रीकृष्णनामघटिता पंक्तिर्वा तादृशं सूते।
पुण्यं प्रभावममलं पाण्डित्यानां रहस्यमत्रैव।।५८१।।

पीयूषपूरपूर्णा कविवर्याणां हृदयसरसी।
श्रीकृष्णस्मृतिकमलं विकासयन्ती चिरं जयति।।५८२।।

यत्रैवास्तेकृष्णस्तद्वै वृन्दावनं भव्यम्।
आनन्दानां निखिला धारास्तत्रैव खेलन्ति।।५८३।।

श्रीकृष्णो वरिवस्या प्रभवति सर्वान् वशीकर्तुम्।
वल्ली साऽपि च वन्द्या या वितता कृष्णमन्दिरे दिव्ये।।५८४।

धन्यतमास्ते दिवसा येषु समाराधितो भवेत् कृष्णः।
निखिलाश्चान्ये दिवसाः एतेषां भूमिकारूपाः।।५८५।।

वन्द्या कृष्णमयी सा धरणिस्तच्चरणधूलिचित्रमयी।
एकैकशस्तु देवाः सर्वे यां वै नमन्त्येते।।५८६।।

अवसरसहस्रलभ्या श्रीकृष्णे भक्तिधारेयम्।
जयति नितान्तं काम्या श्रेयोरूपा परा शक्तिः।।५८७।।

मा मा माधव गच्छेत्यश्रुपरिच्छिन्ननेत्रालिः।
स्वप्ने कृष्णं दृष्ट्वा तन्मयशब्दावलिर्जयति।।५८८।।

स्मेरास्ये श्रीकृष्णे चरमोत्कण्ठा पिपासा या।
भक्तिमयी कालिन्दी नित्यं परितोषदायिनी वहतु।।५८९।।

श्रीकृष्णनाममन्त्रो हृद्देशे जागृयात् सततम्।
दारिद्र्यं सर्वविधं समूलमुच्छेत्तुमद्य सम्पूर्णम्।।५९०।।

अद्यैव कृष्णचरणे मम मानसराजहंसोऽयम्।
कोमलतमसाम्राज्ये वासं कुर्यात् परमरम्ये।।५९१।।

विलपामि कृष्णरूपैरेभिर्नित्यं परामृष्टः।
श्रीकृष्णस्य निकामं नामावलिमेव सन्ध्यायन्।।५९२।।

प्रतिभाप्रभाप्रकर्षो नानाविधकाव्यकलनासु।
श्रीकृष्णस्य कृपाया लेशेनैवोदियान्नाम।।५९३।।

कृष्णस्य दास्यभावाद्देवी दिव्या सरस्वती साक्षात्।
लेखनकर्मणि सततं संतोषेण प्रकाशिता भूयात्।।५९४।।

अद्यापि वासनानां सुचिराऽभ्यस्तास्ति परिपाटी।
भगवांस्तत्र च नित्यं स्वीयं सन्निध्यमाधेयात्।।५९५।।

३०. वाल्मीकिः

सिद्धाः सन्ति सुकवयः संसारे सर्वभावेन।
सन्दीप्तास्तिग्मांशुप्रखरैरेभिर्यशोभिरतिकान्तैः ।।५९६।।

वैदिकवाग्विभवानां कवितायां सा प्रकाशना जाता।
आदिकविरेष तस्मात् स्वयम्भुरेवाऽस्ति संगतो लोके।।५९७।।

वेदान्तर्गतकवितावैभवमत्यद्भुतं जयति।
यद्वशतो देवा अपि समुपस्थातुं सुविवशाः स्युः।।५९८।।

दिव्योदात्तस्वरितानामारोहावरोहाद्यैः ।
सर्वा वैदिकवाणी सर्वेषां सर्वथा वन्द्या।।५९९।।

आद्यास्ते वा ऋषयः सर्वेषां वन्दनीयतमाः।
येषां ऋतं च सत्यं सर्वं सन्मार्गमादिशति।।६००।।

विश्वामित्रवसिष्ठा दिव्यास्ते वामदेवाद्याः।
ते याज्ञवल्क्यमुख्या मन्त्राणां दर्शनेषु विख्याताः।।६०१।।

स्वरसंदूषणदूषितमेतच्छन्दः प्रतीपार्थम्।
प्रकटीकृतवान् वृत्रः समजनि शक्रेण यो निहतः।।६०२।।

परमे व्योमनि संस्थितमेतत्कविधाम यस्मिन् हि।
सर्वं प्रपञ्चमेतल्लीनं क्रीडति सदुन्मिषति।।६०३।।

आदि कविः परमात्मा काव्यं तस्यास्ति चैतदतिविततम्।
पश्य तदेतकात्यं यन्न ममाराथ नो जीर्णम्।६०४।

गद्ये पद्ये गाने ऋग्यजुषः सामनामानः।
मन्त्राश्चेमे नियतं किमप्यपूर्वं समादिशन्त्येव।।६०५।।

आदिकविर्वाल्मीकिः कविता यस्यैव सर्वतः प्रथमम्।
लोके प्रादुर्भूता श्रीमद्रामायणे दिव्ये।।६०६।।

वाल्मीकिरेष सुमहानद्रिः कवितानदीनां वा।
नानारसभरितानां समुद्भवो यत्र संजातः।।६०७।।

वाल्मीकिवाङ्नदीनां प्रवाहमालासु संपतिताः।
सज्जननिवहाः स्वीयं जन्म सुसफलं समाचक्रुः।।६०८।।

वाल्मीकिरेष भगवान् प्राचेतस इति समाख्यातः।
पूर्वं यद् दुर्वृत्तं पश्चात्संसारतारकं जातम्।।६०९।।

ऋषिसाक्षात्काराणां कश्चिन्महिमा समुद्योतः।
सञ्जातो यद् हर्षान्मानवतावर्षणं जातम्।।६१०।।

नारदसाक्षात्कारावसरे यद् वाल्मीकिना प्रोक्तम्।
जिज्ञासितमथ यद्वा श्रीरामस्तत्र निर्णीतः।।६११।।

प्राक्स्वाभाविककविता विनिर्गता मा निषादेति।
मानवगतकरुणाया निष्यन्दस्तत्र सञ्जातः।।६१२।।

प्रथमं लोके छन्दस्तदिदं सदनुष्टुभं नाम।
तेनैव छन्दसा ननु पश्चात्सृष्टिः परिव्याप्ता।।६१३।।

श्रीरामस्य चरित्रं पूर्णपुरातनसुपुरुषस्य।
सर्वविधमङ्गलानां मूलं वाल्मीकिना गीतम्।।६१४।।

नानाविधचरितानां या संसृष्टिः कृता तत्र।
तस्मिन्नादिमकाव्ये का तुलनाऽन्यत्र तस्य स्यात्।।६१५।।

दशरथजनकादीनां राजर्षीणां रहस्यमयचरितम्।
विश्वामित्रवसिष्ठप्रभृतिऋषीणां चरित्राणि।।६१६।।

रामं भरतं लक्ष्मणमथ शत्रुघ्नं च वीरभावेषु।
सम्वर्णयन्नितान्तं चादिकविः सर्वतोषणं कुरुते।।६१७।।

कौसल्या च सुमित्रा कैकेयी वन्दिता माता।
रामादीनां चैता सर्वजगन्मातृरूपाणि।।६१८।।

यज्ञानां सा रक्षा ताडकमारीचशासनं च पुनः।
दिव्यधनुर्भङ्गविधौ गाथा सर्वा विनिर्णीता।।६१९।।

जनकस्य च राजर्षेश्चरितावलिमध्यभागेषु।
गौतममहर्षिगाथाऽहल्यागाथा च वर्णिता जाता।।६२०।।

सीतास्वयंवरे या काव्येऽस्मिन्माधुरी कथिता।
सर्वेषामपि सहृदयहृदयानां स्पन्दनं तत्र।।६२१।।

एका भूषणभूषितसर्वाङ्गा वानरी दासी।
खलचरितं संसारे विख्यातं चेष्टयामास।।६२२।।

दुर्मन्त्रणासु शक्तिः कियती सन्तिष्ठतेत्येतत्।
किं किं वा नहि घटते तस्या वा मृग्यमत्रैव।।६२३।।

वेदेष्वपीतिहासास्ते सन्त्येवेदृशाः ख्याताः।
सोऽयं मनः स्वभावः संसारोन्मेषसंरम्भः।।६२४।।

राज्याभिषेकवेला वनवासाय प्रकल्पिता जाता।
श्रीरामस्य च लोकोत्तरता तत्र प्रकाशमायाता।।६२५।।

एतेन तत्र काले भारतवर्षे ऋषीणां सा।
संस्कृतिरपि प्रकाशं प्राप्ता नित्यं समुज्ज्वला याऽसीत्।६२६।

रावणसदृशा अपि वाऽभिमानतादात्म्यतापन्नाः।
आसुरभावे दीप्ता राजानस्तत्र संलोक्याः।।६२७।।

वानरभल्लूकानां साम्राज्यं तत्र वर्णितं सम्यक्।
श्रीमद्हनुमच्चित्रं रामायणवर्णितं नम्यम्।।६२८।।

संग्रामाणां शतशश्चित्राण्यत्रैव दृश्यानि।
सर्वेषां च रसानां सम्यक् तत्रास्ति परिपाकः।।६२९।।

कोटिमितेप्यथ काव्ये यन्नासाद्यं समुन्नतं तत्त्वम्।
वाल्मीकिवाक्प्रवाहे तद्वै सर्वत्र विस्तीर्णम्।।६३०।।

मानसिकसद्रहस्यस्फोरणनवजातमाधुर्या ।
वाल्मीकीया वाणी कोकिलनिःस्वानमाधुरीं सूते।।६३१।।

भारतवर्षीयाणां तस्मिन् काले परिस्थितिर्याऽसीत्।
सा सर्वापि सुरचिता रामायणगुम्फिता जयति।।६३२।।

भूभागानामथवा मनोरमं सुन्दरं चित्रम्।
वैपुल्येन विकासितमास्ते रामायणे तस्मिन्।।६३३।।

दिव्यचरित्रावलिभिर्मण्डितमेतद्विचित्रताभरितम् ।
वाल्मीकीयं काव्यं कस्य न चेतश्चमत्कुरुते।।६३४।।

यत्र च रसनिष्यन्दः परमां काष्ठां समुन्नीतः।
सर्वेऽप्येते शब्दार्थालङ्काराश्चमत्कृता जाताः।।६३५।।

सर्वविधं गरिमाणं संधारयदादिमं काव्यम्।
श्रीवाल्मीकिसुयशसां निधानभूतं विरजितं दिव्यम्।।६३६।।

३१. तुलसिदासः

श्रीमांस्तुलसीदासः पूर्णं साक्षात् परं ब्रह्म।
यस्य विवर्तः सोऽयं मानसरूपेण बाभाति।।६३७।।

नाना निगम-पुराणैर्गिरिभि-र्भास्वन्ति रत्नानि।
खचितानि तेन नैजे मानस-भवनेऽतिशुभ्राणि।।६३८।।

यस्मिन्काले विषमे मानवता दीर्घमुच्छ्वसन्त्यासीत्।
तस्मिंस्तुलसीमेघस्तां काले रक्षयामास।।६३९।।

अद्यत्वेऽपि वयं यन्निगमे चर्चां समुज्ज्वलां कुर्मः।
तदिदं तस्य सुमनयः सद्यत्नस्यैव साम्राज्यम्।।६४०।।

रामस्य नाम विमलं विमलचरित्रं च वैभवैर्वलितम्।
परमस्य तस्य पुंसः सर्वैर्गीतं तु मुक्तकंठेन।।६४१।।

श्रीमांस्तुलसीदासस्तां स्तान्सर्वांस्तु सम्यगालोच्य।
स्वीये राम-चरित्रे भाषाललिते सुगुम्फयामास।।६४२।।

तेनासीमा तृप्तिर्जनताया भारतीयायाः।
आवालवृद्धवनितासंघानां जायतेऽनुदिनम्।।६४३।।

वेदैस्तथा पुराणैर्नाटकमुख्यैर्न काव्यैश्च।
जनतासु पदं लब्धं तथा यथा मानसेनात्र।६४४।।

आसाद्य कविधुरीणं गीर्वाणी हन्त शोभते नितराम्।
भाषान्तरे हि सत्यपि संस्कृतमेवास्ति सर्वत्र।।६४५।।

ये त्वारोपणकुशलास्तुलसीपूजासमारंभात्।
वेदाविद्रुमपूजाव्यतिक्रमं कल्पयन्ति तदसम्यक्।।६४६।।

एष तु नूनं दोषस्तेषामेवास्ति धीराणाम्।
यते तेषामर्यामद्यत्वे न प्रकल्पन्ते।।६४७।।

यद्येष नाभविष्यतुलसी वैषम्य-कवलिते काले।
वेदपुराणादीनां नामाप्यवशिष्टमत्र नाभविष्यद्वा।।६४८।।

गणनाधिकजनताया वेदाद्यैर्नामभिः परामर्शम्।
विमलं मानसमेवाद्यत्वे सर्वत्र कारयति।।६४९।।

तुलसीकौस्तुभमणिना प्रसारितेनातिशुभ्रेण।
जीवनतेजःपुञ्जेनैवालोकितमिदं सर्वम्।।६५०।।

नवनीतसमस्तुलसी नवभावान्पोषयामास।
तेन बलाधानेनैवामृतमिव लेपितं लोके।।६५१।।

जंगमतरुरेष महानानन्दे कानने चरति।
तुष्टावेति च निगदन् श्रीमान् मधुसूदनस्वामी।।६५२।।

निखिलेन्द्रियवशकरणे गोस्वामित्वं तु चरितार्थम्।
तस्यैव विमलशिक्षां मानसमाधाति मानसेषु सताम्।।६५३।।

आद्याक्षरेण नाम्नस्तुरीयरूपस्य परमतत्त्वस्य।
रामस्य रूपमखिलं विदन्नसौ धारयामास।।६५४।।

मध्याक्षरेण लक्ष्मणरूपं तं जीवनामानम्।
चरमाक्षरेण सीतां मायां विज्ञेषु बोधयति।।६५५।।

एवं तुलसीशब्दे ब्रह्म च जीवं च मायां च।
क्रोडीकुर्वन्स्वीयं दासत्वं तेषु बोधयति।।६५६।।

नित्यनिरंजनशान्तं निरुपाख्यं यत् परं ज्योतिः।
चकिताः सदा समाहुः श्रुतयो यन्नेति नेतीति।।६५७।।

लोके करुणापरवश-रूपं तत्त्ववततार यदा।
तद्वर्णने कृतमतिः श्रुतिरपि रामायणं जातम्।।६५८।।

अथ लोकमानसे तज्ज्योतिः पुनरप्यवातरत् साक्षात्।
रामायणमेव तदा तुलसीदासस्य मानसं प्रबभौ।।६५९।।

एवं वर्णनलोभात् तस्यैव निरञ्जनस्य शान्तस्य।
श्रुतिरनुगच्छति नित्यं सैषा यात्रास्ति रमणीया।।६६०।।

झिल्लीरववत्केचन् कवयः कथयन्ति यत्किञ्चित्।
रामचरित्रे विमले शंखरवस्तुलसिदासस्य।।६६१।।

श्रीमद्हनुमद्भक्त-स्तुलसीदासः स्वमानसे विमले।
तस्यातुलबलराशे-र्विमलचरित्रं निरूपयांचक्रे।।६६२।।

आदिकविर्वाल्मीकिः पन्थानं दर्शयामास।
भक्तिप्रपूरितोऽयं तुलसी तं पूजयांचक्रे।।६६३।।

विमला हनुमद्गाथा रामकथामालिकासु मध्यमणिः।
सर्वासां सिद्धीनां साम्राज्यं तत्र विभाति।।६६४।।

सुन्दरकाण्डे रम्ये तस्यैव बुद्धिमद्वरिष्ठस्य।
लोकोत्तरं सुकार्यं वर्णितमादाय रामकथाम्।।६६५।।

हनुमद्बाहुककाव्ये चमत्कृते भावपरिपूर्णे।
मारुतितनयस्तवनं शोभनपद्यैः प्रकल्पयांचक्रे।।६६६।।

स्वयमपि मारुतिमूर्तिं वाराणस्यां प्रतिष्ठाप्य।
संकटमोचननाम्ना स्तोत्रं तत्रापि गुम्फयामास।।६६७।।

अद्य तदेतन्मन्दिरमद्भुतश्रद्धास्पदं समाजस्य।
स्तोत्रं च तद्विनिर्मित-महर्निशं जप्यते लोकैः।।६६८।।

ये केचन सम्बन्धा भारतवर्षस्य सर्वस्वाः।
तेषां मूलं तत्त्वं तुलसी व्याख्यातवानतुलम्।।६६९।।

सम्बन्धबन्धनं तद् मानुषजनुषोऽस्ति भूषणं मधुरम्।
तेन विना पशुताया मानवतायाश्च को भेदः।।६७०।।

सम्बन्धानां व्यूहः परिवारः कथ्यते लोकैः।
अत्र हि गौरवमतुलं देशस्यास्यैव संसारे।।६७१।।

सम्बन्धसूत्रमेतद् यावद् यावद् दृढं भवति।
तावच्चरमां काष्ठा-मध्यारूढं विलोक्यते राष्ट्रम्।।६७२।।

वैदेशिकैस्तु योगे जाते कालुष्यमत्र यद् दृष्टम्।
नूनं तस्यैव फलं दीर्घा परतन्त्रताऽस्माकम्।।६७३।।

सम्बन्धसूत्रकिल्बिष-मेतं तुलसी विलोकितवान्।
देशस्य दुर्दशाया मूलं तत्रैव निश्चिकाय सुधीः।।६७४।।

गार्हस्थ्ये परिपूर्णं जीवनमासीत्तुलसिदासस्य।
भारतसंस्कृतिचित्रे तस्यैवोज्ज्वलतमा रेखा।।६७५।।

श्रीमान् स सूर्यकान्त-स्त्रिपाठिवर्यो निरालाख्यः।
तुलसीस्नेहचरित्रं गार्हस्थ्ये रूपयामास।।६७६।।

एतत्काव्यविलोकनवेलायां ज्ञायते सुधीवर्य्यैः।
मानसकाव्यरचयितुः कुत्रासीत्प्रेरणा रम्या।।६७७।।

कविकुलगुरुः स आसी-न्निपुणतमः कालिदासोऽत्र।
विद्योत्तमैव निखिलं कारणमासीत्तदीयरचनासु।।६७८।।

रत्नावली तथैवात्रापि निगूढं विराजते हृदये।
परिवर्तितं यदनया मानसमेतस्य मानसे रम्ये।।६७९।।

निर्मलराम-चरित्रे सीताचरितं विमलतरम्।
निखिले रामचरित्रे तस्या एवास्ति साम्राज्यम्।।६८०।।

सम्बन्धानां बन्ध-स्तया यथा वर्तितो विमलः।
सोऽनुगतोऽद्यावध्यनवच्छिन्नः प्रवाहेण।।६८१।।

जन्मान्तरेषु गच्छति सम्बन्धः संस्कृतः सोऽयम्।
तत्तत्त्वं विज्ञातुं मानसमालोक्यतां सर्वम्।।६८२।।

त्रैलोक्यादपि लब्धुं समुन्नतिं प्राज्ञधुर्याणाम्।
नम्रत्वं राममये निखिले जड़चेतने समुल्लसति।।६८३।।

ये ये प्रणतिप्रवणा विश्वजगन्मोहिनीषु रचनासु।
ते मेरुमन्दरमुखै-रप्युच्चतरा विलोक्यन्ते।।६८४।।

नम्रतमोऽयं तुलसीदासः कस्यास्ति न प्रणम्यतमः।
यद्राममयं निखिलं विश्वं ध्यात्वा सदा नमति।।६८५।।

मानसमेतन्निखिलं निर्मलचारित्रचित्रणागारम्।
वारं वारं येषां श्रवणं मननं समुल्लसति।।६८६।।

श्री राघवेन्द्रचरितं त्रैलोक्यां श्लाघनीयतमम्।
मानससरस्वतीयं तेनैवालोकि वन्द्यतमा।।६८७।।

वाल्मीकिगिरेः शिखरात् रामचरित्रस्य या धारा।
सुविशाले जनमानसमहाह्रदे वेशिता नित्या।।६८८।।

मानसगंगा विमला प्रवाहिता येन वीरेण।
सोऽयं भगीरथोऽभूत्तुलसीदासः कवीन्द्रमणिः।।६८९।।

तद्रक्तकणकणेषु प्राधावद्रामनामाऽसौ।
निखिलो निरञ्जनः सन् यः सर्वत्रैव संततं भाति।।६९०।।

योऽसौ भुवनवनानां कर्ता धर्ता तथा च संहर्ता।
पूरुषरूपेणाद्यः पुरुषः सोऽवातरत् साक्षात्।।६९१।।

धन्या मानवतेयं धन्यः कालो धरित्री च।
यस्मिन्नासीदत्र हि नयनालोक्यं परं तत्त्वम्।।६९२।।

धन्यः स वाङ्मयोऽयं तदीयचारित्रवर्णनानिपुणः।
सैवाऽपूर्वा घटना दिव्यतमा यत्र चोल्लसति।।६९३।।

वेदानां यत्तत्त्वं रामाख्यं तत् परं ज्योतिः।
तद्वर्णनानिपुणता वेदानां वेदनीयाऽस्ते।।६९४।।

पौराणिकमपि निखिलं वाङ्मयमाभाति निर्मलं नित्यम्।
रामाख्यस्यैवीशस्यातितमां तत्र साम्राज्यम्।।६९५।।

वेदपुराणमहागिरिशिखरद्वयसन्निधानेऽत्र ।
वाल्मीकीया वाणी कोकिलकण्ठी समुल्लसति।।६९६।।

रामचरित्रोन्मेषस्याविर्भूता निकाममधुलहरी।
यस्यास्वादननिरता निरन्तरायं न पश्यन्ति।।६९७।।

कविकुलगुरुरथचासीद्रामचरित्रस्य गायको विमलः।
रधुवंशनाम काव्यं तस्यैवास्ते सुविख्यातम्।।६९८।।

रामगिरेराश्रमतो जानक्या चादिपूजितया।
मेघाख्यं तत्काव्यं लोके ख्यातिं परामापत्।।६९९।।

भवभूतेरथ वाणी संसारे वन्दनीयतमा।
रामस्य रूपमश्रुतपूर्वं यत्रास्ति दर्शनीयं तत्।।७००।।

उत्तररामचरित्रे लोकोत्तरनायकाऽलोके।
स्वीयां वाणीं कविरयमत्यन्तं पूजयामास।।७०१।।

एतद्वर्णनसरणेरालोके राघवेन्द्ररूपाणि।
कस्मिन्कस्मिंश्चेतसि द्युतिमत्वं न प्रकुर्वन्ति।।७०२।।

'अपिग्रावे' त्यादि तु वाक्यकदम्बः प्रशस्यतमः।
सहृदयचेतसि नियतं खचित इवाभाति भावनाभातः।।७०३।।

रामचरित्रे स्वीयां मतिमाख्यातुं कवीन्द्राणाम्।
अहमहमिका समासील्लोके तेनैव वन्द्यतोल्लासः।।७०४।।

यदि क्षुण्णं पूर्वैरित्यादिकमाहरन् मुरारिकविः।
स्वीये नाटकरत्ने रामचरित्रं प्रकाशयति।।७०५।।

हनुमन्नाटकरचना हनुमत्कविना कृता विमलहृदा।
शब्दानां सा धारा वारं वारं प्रणम्यास्ति।।७०६।।

एतादृशलोकोत्तरशतशतकाव्येषु रामचरितस्य।
या धारा सञ्चरिता तस्यां तुलसी निमज्जनं चक्रे।।७०७।।

नानापुराणनिवहे निगमागमकाननेष्वपारेषु।
वाल्मीकिवाक्प्रवाहे सर्वास्वन्यासु रचनासु।।७०८।।

तुलसीदासः सम्यक् कृतवान् बोधं विमलतरम्।
रामचरितमानसमिदमतिशयितं सम्प्रकल्पयामास।।७०९।।

एषा सरला रीतिः पटीयसी चापि वर्णना शैली।
रामचरित्रे गीता तुलसीदासेन साधुवर्येण।।७१०।।

इदमार्यसभ्यताया गौरवतत्त्वानि दर्शयति।
अन्धं जगदिदमखिलं ज्योतिस्तत्त्वेन भासयति।।७११।।

हानोपादानादिप्रदर्शने यन्निदर्शनं पुंसाम्।
रावणरामचरित्रं सर्वत्रैवास्ति चर्चितं नूनम्।।७१२।।

आस्तिक्यं जनतायामतिशयितं यत्प्रबोधयति।
काव्यं तदेव काव्यमितराणि पुस्तकान्येव।।७१३।।

आस्तिक्यबोधनं तन्निष्प्राणं तावदनुभवेन विना।
चञ्चत्स्फुलिंगशून्ये काष्ठौघानां निवेश इव।।७१४।।

अनुभवितुं प्रभुसेवामृतसमं पर्यटत सोऽयम्।
प्रायः कृत्स्ने देशे पद्भ्यां नैकत्रा पूर्णः।।७१५।।

या व्याकुलता दृष्टा तुलसीवर्यस्य मानसे प्रभुं द्रष्टुम्।
सै व समस्ते विश्वे विभुरूपं दर्शयामास।।७१६।।

सैव च कारणभूता निखिलस्य तत्स्थितस्य ज्ञानस्य।
ज्ञाने सा निर्मलता कुत्राऽप्यन्यत्र नो दृष्टा।।७१७।।

दार्शनिकसरणिरूढ़ा उपनिषदुद्यानवल्लीषु।
गहनतराः सुविचाराः सारल्येनात्र लक्ष्यन्ते।।७१८।।

सोऽयं कथाप्रवाहः संवादानां निकामभव्यत्वम्।
तुलसीकाव्ये विमले नान्यत्रान्यत्र संदृष्टम्।।७१९।।

वेदोदितसरणीनां गुम्फनमत्यन्तसरलतया।
भागीरथीप्रवाहं न्यक्कुरुते यत्र तत्रापि।।७२०।।

एतत्त्वनुभवशून्ये विज्ञाने नैव संभवति।
चैतन्यामरसत्ता प्रत्यक्षं येन जायेत।।७२१।।

अद्यत्वे बत लोके हिन्दुत्वं वैदिकत्वं वा।
दार्शनिकत्वं सर्वं तुलसीदासादवाप्यन्ते।।७२२।।

ये तु प्रचण्डमहिमा-मण्डितदिव्यप्रभावाश्च।
विद्वांसो लोकेऽस्मि-न्नहर्निशं ते निमग्नाःस्युः।।७२३।।

ये चाप्यविहितभावा अभावधारावृताऽखिलस्वान्ताः।
आश्रयवसनविहीना-स्ते तुलसीवाचि मोदन्ते।।७२४।।

नाना कथानकाद्यैः स्वरमाधुर्यैरुदारैश्च।
भाषाभावधुराभिर्व्यासाः कथयन्ति मानसं रुचिरम्।।७२५।।

भूषणनामा व्यासो यशसो वैपुल्यमत्राप।
मानसकथा प्रवाहः प्रवाहितस्तेन विज्ञेन।।७२६।।

विन्दुर्नाम्ना सिन्धु-र्गाम्भीर्ये वाक्प्रवाहे च।
व्यासासने स्थितः सन् यशसा सर्वत्र दीप्यते विमलः।।७२७।

मानसराजमरालो विजयानन्दस्त्रिपाठिवर्योऽभूत्।
तेन हि वाराणस्यां गाथा रामस्य सस्वरं गीता।।७२८।।

व्यासाः सहस्रशोऽन्ये जाता जायन्त एवाद्य।
लोके ख्यातिं विमलां लब्ध्वा कमलादृगञ्चले लग्नाः।।७२९।

लोकस्य सर्वबाधाप्रशमनसामर्थ्यपरिपूर्णम्।
तुलसीवाक्यकदम्बं भेषजमसमं समुल्लसति।।७३०।।

भारतस्वन्त्रताया अनन्तरं कविरयं महान् भूयः।
विपुलं यशो वितानं विस्तारयति प्रकामरमणीयम् ।।७३१।।

लोकोत्तरकविगणना यदा यदा जायते रुचिरा।
तुलसीदासः प्रथमस्तदा तदा नूनमाद्रियते।।७३२।।

भारतराष्ट्रस्य शिरस्तथोन्नतं जायतेऽनेन।
निखिलं तदिदं विश्वं ऋणीभवेदेव सन्देशैः।।७३३।।

यावद्यावत्कालः संसरतेऽग्रे विकासमाप्तः सन्।
तुलसीदासो नित्यं तत्रस्थो मार्गदर्शनं कुरुते।।७३४।।

तस्मात्तुलसीदासं सर्वे मनसा स्मरन्ति विद्वांसः।
श्रद्धाञ्जलिं समेता नित्यं वाचा प्रकल्पन्ते।।७३५।।

वन्दामहे कविवरं मनसा नतिकोटिभिः सततम्।
तद्दर्शिते च मार्गे संचारं वा चिकीर्षामः।।७३६।।

३२. श्रीगिरिधरशर्माणः

जयपुरनगरी धन्या नाना नववैभवैर्जुष्टा।
श्रीमधुसूदनशिष्यो यात्राऽसीद् गिरिधरः शर्मा।।७३७।।

सर्वदिगन्तेष्वास्ते यशोवितानं निकाममदसीयम्।
कमनीयनवकलेवरधर्ताऽसौ गिरधरः शर्मा।।७३८।।

अध्ययने संलग्नो विस्तारे याऽथ संक्षेपे।
शैली काले काले सर्वा यस्मै प्रसन्नाऽभूत्।।७३९।।

भागीरथ्यास्तीरे दिव्यहरद्वारनगरेऽथो।
ऋषिकुलनाम्नीं संस्थां स्वीयाऽध्यक्ष्ये सनाथितवान्।।७४०।।

तत्रैव हरिद्वारे गुरुकुलसंस्था समारम्भे।
शास्त्रार्थेषु समन्तादेकपदे ख्यातनामाऽभूत्।।७४१।।

'सोऽयं' 'सोऽयं' वादो यत्र गतस्तत्र चलतिस्म।
देशे मान्यतमानां मान्यतमोऽयं सुसञ्ज्ञातः।।७४२।।

देशेऽस्मिन् विविधानां संस्कृतसंस्कृतिक्रियाकलापानाम्।
संचालयिता नितरां विख्यातः सर्वजनतासु।७४३।

सर्वविधं संमानं सर्वस्मिन् भारते देशे।
विख्यातिं च समग्रां सम्प्राप्तो गिरिधरः शर्मा।।७४४।।

सर्वोच्चशिखरसंस्थो ज्ञानाद्रीणां विधारकः सोऽयम्।
सर्वोच्चतापसानां वन्द्योऽभूद्गिरिधरः शर्मा।।७४५।।

नित्यतपस्यानिरतो गार्हस्थ्ये जीवने लग्नः।
जगतीतलं सुवासितमथ कृतवान् गिरिधरः शर्मा।।७४६।।

वाणी यस्य मुखाब्जात् बिगलितपीयूषधारेव।
प्रवहति शास्त्राम्भोनिधिमन्थनसंभूतसारेव।।७४७।।

यस्य विमलसन्मूर्तिर्मनुजैराराध्यतां गमिता।
अवताराणां शोभां विपुलां विस्तारयामास।।७४८।।

गम्भीर्ये पाण्डित्ये व्याख्याने लेखने निखिले।
चरमां काष्ठामङ्गीकृतवान् यो गिरिधरः शर्मा।।७४९।।

पत्राणां सम्पादनसंस्थासंस्थापनादिसत्कार्यैः।
सामाजिकसंसेवां सम्यग् यः साधयामास।।७५०।।

लाहौराख्ये नगरे पञ्चापस्य प्रधनतामाप्ते।
दिव्यां सुषमां विकिरन् समा दशं यापयामास।।७५१।।

वैदिकमर्मोद्घाटनवैदिकविज्ञानसत्प्रचारेषु ।
नो तस्यास्ते तुलना संसारेषु प्रदीप्तेषु।।७५२।।

सर्वासां संस्थानामाह्वानेषु कृताऽग्रहः सततम्।
दिव्यैः स्वैर्व्याख्यानैर्नेत्रोन्मीलनमथ कृतवान्।।७५३।।

जनतायाः संमर्दस्तादृश आसीत्तु भाषणे यस्य।
नेतारोऽपि च चकिता आसन् यत्स्वागतेषु विपुलेषु।।७५४।।

यस्यां व संस्थायां जयपुरनगरेऽथ संस्कृते पीठे।
सम्यगधीतं तत्राऽध्यक्षपदं स्वीचकार परिपूर्णम्।।७५५।।

विंशतिवर्षाणामप्यवधिः स्वल्पो नु सञ्जातः।
विद्यालयोऽपि सोऽयं संसारे विश्रुतो जातः।।७५६।।

एकस्तथा च सोऽयं विश्वकविद्यालयोऽस्ति निजरूपे।
परिपूर्णतमां ख्यातिं सर्वे देशे परां प्रापत्।।७५७।।

सर्वेषां वेदानां ज्ञातारश्चाथ विद्वांसः।
पाठनकर्मनियुक्ता वेदोद्घोषं निकाममुपचक्रुः।।७५८।।

सर्वेषां शास्त्रणामध्यापकदिग्गजश्रेणी।
कोलेजेऽस्मिन् जयपुरनगरस्थे सुप्रतिष्ठिता जाता।।७५९।।

श्रीचन्द्रदत्तमैथिलवर्यो व्याकरणशास्त्रमूर्तिरिव।
अध्यक्षचतुर्वेदस्यासीदपरस्त्वसौ प्राणः।।७६०।।

दाधिमथश्रीमानथ सोऽपि कन्हैयाद्यलालान्तः।
न्यायनये विख्यातो विराजते दर्शनप्रौढः।।७६१।।

श्रीमान् भट्टवरेण्यो मथुरानाथः प्रणम्यसन्मूर्तिः।
देशेऽस्मिन् विख्यातो मञ्जुकविःसुप्रतिष्ठितश्चासीत्।।७६२।।

आयुर्वेदमहोदधिमथने सन्मन्दरीभूतः।
स्वामी लक्ष्मीरामः शोभां विस्तारयामास।।७६३।।

सर्वस्मिन्नपि देशे संस्थानस्यास्य सा ख्यातिः।
विस्तीर्णा संजाता छात्राः सर्वे समाजग्मुः।।७६४।।

कालान्तरे च त इमे छात्रश्रेष्ठास्तु देशेऽस्मिन्।
सर्वोच्चोच्चपदेष्वथ सत्प्रान्तेषु प्रतिष्ठिता जाताः।।७६५।।

नाना संस्कृतनाटकसदभिनये ख्यातिरासीत् सा।
जयपुरराज्यनरेन्द्रः स्वयं तथा मुग्ध एवाऽसीत्।।७६६।।

उत्तररामचरित्रस्याभिनये दक्षतां दृष्ट्वा।
छात्राणामाद्यत्वे नो दृष्टस्तादृशाभिनयः।।७६७।।

भूयः पाण्डवविजये सन्नाटकसम्प्रयोगेऽत्र।
सर्वा जनता मुग्धा जाता सद्यः प्रभावपरिपूर्णा।।७६८।।

श्रीगिरिधरशर्माऽसौ सर्वत्राऽसीदुपस्थितः सततम्।
समचालयत् समस्तां लोकोत्तरकार्यपद्धतिं स्वीयाम्।।७६९।।

प्रतिवर्षमुपाधीनां वितरणसंरंभवेलासु।
चकिता नागरिकास्तेऽधिकारिणश्चापि मोदमुपजग्मुः।।७७०।।

श्रीमद्गिरिधरशर्मचतुर्वेदख्यातिकारणादपि वा।
विद्यालयोऽपि सोऽयं देशे सर्वत्र विश्रुतो जातः।।७७१।।

श्रीमांस्तु चतुर्वेदो यत्राऽगात्तत्र चाध्यक्षः।
संजातः सा संस्था सद्यो विख्यापिता जाता।।७७२।।

संस्कृतरत्नाकर इति विख्यातं मासिकं पत्रम्।
अध्ययनाऽवस्थायामेव प्रकाशितं चलितम्।।७७३।।

लोकाऽनुरूपपाठ्यक्रमनिर्माणेऽपि सावधानोऽयम्।
नव्यानां विषयाणां निवेशने जागरूक एवाऽसीत्।।७७४।।

नानाऽन्दोलनकार्ये संचालकतामुपागतः सोऽयम्।
धार्मिकविषयेष्वासीदघोषितो हृदयराष्ट्रपतिः।।७७५।।

हिन्दूविश्वविद्यालयनिर्मात्राऽथ मालवीयेन।
साकं मैत्री गाढा संजाताऽसीत् तदीयैव।।७७६।।

महामहोपाध्यायानां पञ्चकमासीत्तु जयपुरे नगरे।
चरमस्त्वयमेवाऽसीद् गिरिधरशर्मा चतुर्वेदः।।७७७।।

आर्यसनातनवैदिकधर्मरहस्यप्रकाशनायाऽयम् ।
पर्यटितसर्वदेशो धार्मिकभावान् सुपोषयामास।।७७८।।

संस्कृतसाहित्योदधिनिर्मथनोत्थं च पीयूषम्।
वितरितवान् संमोहनसिद्ध्या वाचां विलासनिर्झरिण्यैव।७७९।।

भूयश्च मनोमोहकलेखाद्यैश्चाथ काव्यधाराभिः।
परिपूरितवानन्तःकरणं दिव्यं विदांवरेण्यानाम्।।७८०।।

संस्कृतसाहित्याख्यस्य च सम्मेलनप्रकृष्टस्य।
मन्त्रित्वं धारितवान् सुदीर्घकालाय सारथीभूत्वा।।७८१।।

पुनरथ तस्यैवाध्यक्षत्वे वारत्रयं वृतः सोऽयम्।
देशस्य सर्वभागे यात्राः सम्पादयामास।।७८२।।

तद् ब्रह्मचारिनाम्ना हिन्दीभाषामयं पत्रम्।
प्रत्येकस्मिन्मासे सम्पादितवान् सुदीर्घकालाय।।७८३।।

संस्कृतहिन्दीमासिकपत्रद्वितयं च समकालम्।
सम्पादितवान् शतशः कार्यकलापेषु लग्नोऽपि।।७८४।।

एतस्यैव ख्यात्या न केवलं संस्कृतस्य कोलेजः।
किन्तु नगरमप्येतद् भारतदेशेऽथ सुन्दरन्ध्वनितम्।।७८५।।

बहवस्तदीयभाषणसंमोहितान्तरङ्गपरितुष्टाः ।
मान्यास्तथा वदान्याः जयनगरं द्रष्टुमाजग्मुः।।७८६।।

जयपुरनगरनरेन्द्रस्तुष्टस्तस्यास्य परमया ख्यात्या।
संपूर्णं संमानं तस्मै संप्रकटयामास।।७८७।।

देशस्यान्यनरेन्द्राः काले-काले समाहूय।
श्रीगिरिधरशर्माणं धन्याः सन्तः सभाजयाञ्चक्रुः।।७८८।।

केचन सद्व्याख्यानैरपरे ब्राह्मेण वर्चसाऽकृष्टाः।
केचन धार्मिकजीवनसच्चारित्र्यान्विता जाताः।।७८९।।

परमा काष्ठा दृष्टा विज्ञानानां तथा चरित्रस्य।
सर्वासां च कलानां वदान्यतायाश्च निखिलायाः।।७९०।।

तस्याऽराधनपुण्यं लोकोत्तरमेव समभवत्किमपि।
वहवो तपसा पूता आचार्याः कामयन्ते तम्।।७९१।।

मध्याह्नोत्तरसीमाऽन्हिककर्मणि समुपविष्टस्य।
दिवसे नियता, रात्रौ तृतीययामोऽभवत् सीमा।।७९२।।

प्रीता देवगणा अपि सिद्धीः संवर्षयामासुः।
नो चेत् सा लोकोत्तरसीमा किं सेवते मनुजम्।।७९३।।

श्रीलक्ष्मीनाथा अथ शास्त्रिवरेण्याः पुराऽध्यक्षाः।
कोलेजस्य सुशिष्यांस्तान् सत्प्राप्यैव मोदयांचक्रुः।।७९४।।

श्रीजीवनाथमैथिलवर्या ज्ञानप्रभापुञ्जाः।
सर्वेषामपि गुरवः सविशेषं स्नेहयांचक्रुः।।७९५।।

विद्यावाचस्पतयो वैदिकविज्ञानमार्तण्डाः।
श्रीमधुसूदनमैथिलमहानुभावाः सुसेवितास्तेन।।७९६।।

माधवसिंहाख्यस्य तु जयपुरनगराधिराजस्य।
विद्वत्सभाप्रधाना मधुसूदनझामहोदया आसन्।।७९७।।

वाराणस्यां विद्याऽवाप्तौ विहितश्रमा एते।
श्रीशिवकुमारशास्त्रिप्रवरेषु च्छात्रतां याताः।।७९८।।

द्वादशवर्षाऽवधि ते तत्रैवाऽधीतवन्तोऽथ।
निखिले शास्त्रगभीरे पाण्डित्ये द्योतिता आसन्।।७९९।।

स्वामिदयानन्देन च सह सच्छास्त्रार्थवेलायाम्।
वेदप्रौढिन्यूना सा काशी खेदमापन्ना।।८००।।

श्रीमधुसूदनवर्यं ते विद्वांसः प्रणोदयामासुः।
वेदानामथ मनने पूर्णां शक्तिं समाधातुम्।।८०१।।

सोऽपि वचनपरतन्त्रो मधुसूदनझामहाभागः।
स्वीयं सर्वं कालं वेदेष्वेवाऽथ यापितवान्।।८०२।।

तेन च विज्ञानानां पुरातनानां च नव्यानाम्।
सर्वा विकासमाला वेदेष्वासादिता सम्यक्।।८०३।।

ग्रन्थानां द्विशती सा रचिता तेनाऽथ सा दिव्या।
मोहयति येयमद्याप्यासादितवैभवं चेतः।।८०४।।

सा सर्वाऽपि च विद्या श्रीमधुसूदनमहोदयैरेभिः।
गिरिधरशर्मचतुर्वेदप्रवरायाऽध्यापिता सम्यक्।।८०५।।

स्फीतामथ तां सर्वां दिव्यां ज्योतिर्मयीं विद्याम्।
अधिगत्य परां तृप्तिं समनुभवद् गिरिधरः शर्मा।।८०६।।

चकिता सर्वा जनता तत्सर्वं श्रोतुमायाता।
दीर्घे दीर्घतरेऽपि च काले नोद्वेगमुपयाता।।८०७।।

जयपुरसंस्कृतकोलेजस्याप्ययं च गिरिधरः शर्मा।
सर्वविधां परिपूर्णां सेवां कुर्वन् प्रसन्न एवाऽसीत्।।८०८।।

छात्राणामुत्साहे सम्पूर्णां वृद्धिमुपयाते।
काऽपि विशिष्टा वार्ता सर्वाऽसाधारणी दृष्टा।।८०९।।

प्रतिपक्षं व्याख्यानप्रदानगोष्ठीषु सच्छात्राः।
वाग्मित्वे सुप्रखरा निष्ठासंधारणे दक्षाः।।८१०।।

एतस्मिन्नपि काले तत्राऽधीता विदांवर्याः।
देशेऽस्मिन् शीर्षस्थं स्थानं धृत्वा सुशोभन्ते।।८११।।

श्रीगिरिधरसेवाया वाणीशोभाविवर्तसन्मूर्तिः।
संस्कृतसरस्वती सा नितरां तुष्टा सदैवाऽसीत्।।८१२।।

सेवातो विश्रामग्रहणे सर्वा प्रतीक्षिता जनता।
कोणे कोणे सर्वत्राऽहूतवती स्वीयधन्यताऽवाप्त्यै।।८१३।।

तद् राजकीयसेवातो विश्रामो नवं जन्म।
यात्रा नैरन्तर्ये व्याख्याने चाथ सञ्जातम्।।८१४।।

अलवरनगरे संस्कृतकोलेजाऽध्यक्षतां प्राप्तः।
राज्यस्य च तस्य पुनः प्रधानपण्डित इति प्रथितः।।८१५।।

भूयः पञ्चनदस्थे लवपुरनगरे नवीनशोधानाम्।
विद्यापीठस्थापनसञ्चालनयोजने द्युतिः प्रथिता।।८१६।।

देशविभाजनकाण्डादनन्तरं दुःखितो भूत्वा।
धर्मग्लानिं नितरां दूरीकर्तुं प्रयत्नवान् जातः।।८१७।।

विश्वासां विद्यानामालयभूतस्य मालवीयानाम्।
काश्यां विश्वकविद्यालयस्य सेवां तथा चक्रे।।८१८।।

काश्यामध्ययनार्थं गमनं जातं वरेण्यानाम्।
किन्तु श्रीमान् गिरधरशर्मा गतवांस्तु तत्र पाठयितुम्।।८१९।।

शोधार्थं पठनार्थं गभीरतरशास्त्रसदरहस्यानाम्।
तत्रत्या विद्वांसः समागताः श्रीचतुर्विदां निकटे।।८२०।।

तत्र च सम्मानसभामध्येऽसौ यावदेव सम्प्राप्तः।
सर्वोच्चा विद्वांसोऽप्यभ्युत्थानेन पूजयाञ्चक्रुः।।८२१।।

व्याख्यानेषु गुरूणां मधुसूदनझावरेण्यानाम्।
लक्ष्मीनाथानामथ जीवाद्यानां च नाथानाम्।।८२२।।

संस्मरणेषु नितान्तं रोमाञ्चैरञ्चितो भूत्वा।
सर्वविधादर्शाणां पुञ्जीभूतेव सन्मूर्तिः।।८२३।।

आस्तिकदिग्गजमेनं स्मृत्वा स्मृत्वा नरो धन्यः।
विद्वत्ताऽपि तदीया विश्वं शिष्यं विभावयति।।८२४।।

या सद्भाषणवर्षा भारतवर्षे कृता तेन।
गहनतमं विज्ञानं सारल्येनैव बोधितं सर्वम्।।८२५।।

वाणीतस्य पवित्रा सर्वविधं वैभवं दधती।
कोटिजनाऽदृतमेनं दृष्ट्वा सद्यः प्रसन्नाऽभूत्।।८२६।।

गीताप्रवचनकर्ता काश्यामाजीवनं योऽसौ।
उपनिषदुक्तं तत्त्वं धन्यो मान्योऽथ बोधयामास।।८२७।।

खण्डत्रितये सैषा गीताव्याख्यानमयमाला।
संमुद्रिता नितान्तं विदुषां चेतः समाहरति।।८२८।।

पञ्चाशत्सद्ग्रन्था हिन्दीसंस्कृतमया यस्य।
सारस्वतं तदीयं वैभवमनुमापयन्त्येव।।८२९।।

अद्याप्यनेकतायाममुद्रितो ग्रन्थराशिरयम्।
मुद्रणभावं स्वीयं प्रतीक्षते सज्जनान् द्रष्टुम्।।८३०।।

पत्रावली तदीया तं संबोध्यैव या प्रथिता।
विदुषां नेतृणामपि तस्मिन् श्रद्धां प्रकाशयन्त्यास्ते।।८३१।।

मित्राणां भक्तानां सत्पुरुषाणां तथाऽनुरोधेन।
स्वीयं दिव्याचरितं हिन्दीग्रन्थे विलेखयामास।।८३२।।

गिरिधरशर्मसदृशाः श्रीमन्तो ज्ञानसम्पूर्णाः।
विद्वांसो लोकेऽस्मिन् यदा कदैव प्रजायन्ते।।८३३।।

तृतीयद्वीपः

३३. रतिः

सुन्दरवाग्विस्तारेष्वथ सम्प्राप्तेषु सादरं मनसि।
नूतनजीवनधारा प्रतिक्षणं मोदमावहति।।८३४।।

मुदिते त्वन्तःकरणे सर्वा दृश्यावलिः सेयम्।
स्वयमेव नूतनानां भावानां स्फोरणं कुरुते।।८३५।।

दुर्दान्तैरथ सत्यैः पलायनं ये प्रकुर्वन्ति।
जीवनसौगन्ध्यं ते वितरीतुं नैव जानन्ति।।८३६।।

देहे राक्षसशक्तिर्मनसि विचारे च कोमलता।
प्रागल्भ्यं सौन्दर्ये रोचकता चादृता काव्ये।।८३७।।

हृदयस्योल्लासाश्चेत् प्राकट्यं नो विजानन्ति।
का वा सार्थकता स्यात् तादृशलेखेषु लोकानाम्।।८३८।।

प्रेम्णो रूपाणीमान्यपि सम्यग्वर्णितानि कविवर्यैः।
येषां चरमोत्कर्षो विलोक्यते काव्यसंसारे।।८३९।।

प्रेम परेश्वररूपं जीवनसर्वस्वभूतं च।
यदि तन्नास्ति तदात्वे शून्यं तज्जीवनं जातम्।।८४०।।

प्रेम्णोऽनन्ता धाराः प्रवाहिताः सन्ति सर्वत्र।
स्वर्गे तथा धरायां पातालेष्वपि च निखिलेषु।।८४१।।

चेतसि निर्मलधारा प्रेमारूढा परिस्फुरति।
आर्द्रं तदिदं विश्वं सर्वं संजायते तया नूनम्।।८४२।।

यत्रैवाऽस्मच्चेतः स्वत एवाबद्धतां याति।
तत्रैव रश्मिरेषा प्रीतिपरानुभवमार्गगा जाता।।८४३।।

स्वीयसमपर्णबुद्धौ मनसि शरीरे च सम्प्रवृत्तायाम्।
निर्वचनेषु सबाधा प्रेम्णोऽर्चिर्दृश्यतेऽगाधा।।८४४।।

मनसो विज्ञानेषु प्रख्याता ये च विद्वांसः।
निखिलेऽपि हि संसारे रतिभावं मूलमेवाहुः।।८४५।।

रतिरेवैषा विश्वं रतिरेवाऽस्तेऽथ विश्वतो व्याप्ता।
प्रेम तदेव हि विमलं रतिभावे यत् सुसंनद्धम्।।८४६।।

सर्वेऽप्येते लोके रतिभावस्यैव साक्षिणः सन्ति।
ये याता ये सन्ति ये चैवाग्रे भविष्यन्ति।।८४७।।

मनसोऽगाधसमुद्रे वैचारिकमन्दरैर्मथिते।
या दीप्तिः प्रस्फुरिता रतिरेषा सा सुधा प्राप्ता।।८४८।।

३४. जीवनम्

जीवनमायातं चेत् नूनमिदं भावनीयमपि।
तस्य च परिपालनमपि संवर्धनमपि कार्यमेव स्यात्।।८४९।।

जीवनतत्त्वानीमान्यागच्छेयुर्यदा काले।
तेषां वा सर्वेषां स्वागतमथ कुर्महे सततम्।।८५०।।

विषमैर्भावैर्भरिता दूरस्थितकामनाकुशलाः।
एते वयं स्थिता स्मः किं जीवनमेतदेव ननु।।८५१।।

नित्योत्सवेषु मिलिताः संतोषितसाङ्गसर्वस्वाः।
संगठितशक्तिदीप्ता नम्रतराः कामभोगेषु।।८५२।।

ये मानवा भवेयुर्जीवनमेतैर्विभावितं भवति।
ते च यथार्थे रूपे सर्वस्वं व्याहरन्तीव।।८५३।।

लक्ष्यात् स्वीयाद् भ्रष्टाः नानाविधकार्यसंलग्नाः।
न किमपि कर्त्तुं लोके सामर्थ्यं जायते तेषाम्।।८५४।।

कर्मणि कर्मणि नित्यं तेषामिच्छैव जागर्ति।
लघुतरमप्यनुकर्त्तुं नैवास्ते कोऽपि संयोगः।।८५५।।

ननु दुःखमेव तेषां भाग्ये सर्वत्र सन्दृश्यम्।
सर्वैर्विभवैर्हीना नास्तितरां जीवनं तत्र।।८५६।।

जीवनमिदमत्यन्तं जटिलतरं शीततापमयम्।
स्थितिगतिसंयुतमखिलं विभावितं तत्त्वतो विज्ञैः।।८५७।।

जडचेतनयोर्मध्ये संग्रामे जीवनोन्मेषः।
निस्तन्द्रसान्द्ररूपं सर्वत्रैवं रचितमास्ते।।८५८।।

शतशतधारावर्षैः सन्तर्पितमप्यनेकपरिपुष्टम्।
सीमासघनवनानां विभ्रंशकभावमातनुते।।५८९।।

आकाशीयरहस्यान् ज्ञातुं ध्यातुं परं यतते।
सृष्टीनां सर्वस्वं स्वात्मन्याधातुमीष्टे वा।।८६०।।

तज्जीवनमस्तीदं विरोधिभावोन्मिषन्तीनाम्।
घटनानां संघट्टो जातानां जायमानानाम्।।८६१।।

नैष्ठिकतापरिपाके सर्वेऽप्येते समारम्भाः।
कामं सन्तुष्टा अपि मूर्च्छामेकां प्रयच्छन्ति।।८६२।।

३५. संघर्षः

संघर्षाख्यं तदिदं जीवनपरिचायकं तत्त्वम्।
यत्र स्पन्दनमास्ते तत्रैवास्तेऽथ संघर्षः।।८६३।।

एकाधिकसत्तायां संघर्षोऽनिवार्यतां भजते।
एकोऽहं हि बहु स्यामित्यासीदादिमं रूपम्।।८६४।।

संघर्षे रमणं वा मरणं वा जीवनं तदिदम्।
नित्यं संघर्षमयं सैव स्यात्प्रेरणाभूमिः।।८६५।।

संघर्षे शस्त्राणामुपार्जनं विजयदायकं भवति।
शिक्षा-दीक्षा-गुणगणगरिमा शस्त्राणि सर्वाणि।।८६६।।

संघर्षे साफल्यं भूपृष्ठे शत्रवः समाप्ताः स्युः।
स्वीयप्रभाववशतः सर्वे मित्रत्वमाप्ताः स्युः।।८६७।।

एतादृशसंघर्षे सर्वे सर्वत्र व्यापृता दृष्टाः।
संघर्षाणां रूपं भिन्नं भिन्नं च सर्वत्र।।८६८।।

ये निर्बलास्तु दीनाः पलायमानाश्च संघर्षे।
तेषां पराजयो ननु निश्चित एवाऽस्ति दुःखकरः।।८६९।।

जयशस्त्राणामर्जनकर्मणि निरताश्च पुरुषशार्दूलाः।
संघर्षेष्वथ सर्वेष्वसमं विजयं लभन्तेऽत्र।।८७०।।

३६. आवाहनम्

आवाहनमिदमसमं परमं तत्त्वं समुल्लसितम्।
औदार्यधन्यताया यस्मिन्नास्ते विलाससंचारः।।८७१।।

किञ्चित् किञ्चित् लब्ध्वा पुनरावाहनमभूत्तूष्णीम्।
वैपुल्याधिगमोऽपि च तेन तु सुतरां निवेदितो भवति।।८७२।।

आवाहनेन पूर्णः पुरुषः पुरुषोत्तमो जातः।
कथमन्यथा विभावैः कमनीयत्वस्य संचारः।।८७३।।

चेतसि चेन्नम्रत्वं विनयः स्फूर्तिः समर्पणे सुमतिः।
आवाहनसंभारा इमे तदा सत्यसंनिहिताः।।८७४।।

अविनयशतप्रकर्षे नितरामेवाभिमानसंचारः।
आवाहनसंभारे सैषा सर्वा क्षतिस्त्वसमा।।८७५।।

चेतसि कमनीयत्वं विशृंखलं चेदितस्ततः पतितम्।
तस्य समीकरणे यः श्रमस्तदावाहनं जातम्।।८७६।।

सेवायामथ सर्वाप्यावाहनभूमिका भवति।
गहनतमोऽयं धर्मः क्षेत्रे सर्वत्र दृश्यते विपुलः।।८७७।।

प्रकृतिरियं मातृत्वे दृश्या परितोऽपि निर्मला भाति।
ऐकान्तिकमेतस्या आवाहनमत्र संसाध्यम्।।८७८।।

३७. विवशाभाषा

भाषा भवत्यपूर्णा भावानां संप्रकाशने नियतम्।
वर्ण्याणुतमोऽप्यंशो भाषायां संप्रकाशितो नो वा।।८७९।।

यानि हिमालयरूपाण्यालोक्यन्तेऽथ भाषासु।
कोटितमोऽप्यंशो वा पर्वतराजस्य तत्र नैवास्ते।।८८०।।

वस्तूनां गुणधर्मा वस्तुगता वा प्रभावा ये।
तत्रोदाहरणानामानन्त्यं सर्वतो दृष्टम्।।८८१।।

कवितारसगणनायामद्याप्येतादृशा रसा दृष्टाः।
येषां वर्णनकाले भाषेयं कुण्ठिता भवति।।८८२।।

बीभत्स-करुण-रौद्रा भयानका वा रसा एते।
भाषायां स्वल्पत्वादल्पतरोदाहृता दृष्टाः।।८८३।।

येषामपि वा विषये 'बहु कथितम्' धीरियं भवति।
उक्तात् सहस्रगुणितं वक्तुं तत्रावशिष्यते नियतम्।।८८४।।

भाषाया अल्पत्वं तदिदं सर्वं विलोकयता।
केनापि कविवरेण्येनान्यादृश्युक्तिरादृताऽर्यायाम्।।८८५।।

३८. विवशता

काऽपि विवशता चित्ते दौर्बल्यं बोधयन्तीव।
जीवेश्वरयोर्मध्ये भेदं विज्ञापयन्त्यास्ते।।८८६।।

ईश्वर एव कदाचित् दूरे स्याद्विवशतायोगात्।
पतनोत्पतनं जीवा सेवन्ते विवशतापाशे।।८८७।।

चैतन्यस्य समुद्रे लहरीरूपा विवशताऽस्ते।
सर्वमहत्परिमाणं यद्वशतः संकुचितमास्ते।।८८८।।

एकाकिनो न रमणं नानात्वे चादिमा तृष्णा।
महतोऽपि यो महीयान् विवशः सोऽपीति सत्यमाभाति।८८९।

अथ पंचकंचुका वा पंचमला वाऽथ संस्काराः।
स्वातन्त्र्येतरतत्त्वस्यैवाख्येयानि रूपाणि।।८९०।।

विवशीभावस्य पुनश्चरमा काण्ठा तु मृत्युरित्युक्ता।
स्ववशे सर्वं नीत्वाप्यवशो जन्तुर्मरणकाले।।८९१।।

स्ववशविहारः सर्वो यदि संसिद्धो जगति बोभूयात्।
जगतः सर्वं रूपं नूनं परिवर्तितं निमेषे स्यात्।।८९२।।

स्ववशे यद् वैवश्यं वैवश्येऽपि स्ववशभावः।
ऐन्द्रं धनुरिव जीवनरूपं चित्रं समातनुते।।८९३।।

३९. प्रेरणा

प्रेरणभावः परमः श्रेयोमार्गे निवेशयति।
प्रबलतरोऽपि विषीदति लाभकरप्रेरणाऽभावे।।८९४।।

अग्रेसरीकरणमथ शक्तिमती प्रेरणा कुरुते।
मित्राण्यथ गुरवो वा विपुलास्ते प्रेरणापुञ्जाः।।८९५।।

आश्रयदातारो ये पुरायुगे प्रेरका आसन्।
शासनमथ चाद्यत्वे नानाविधवैभवं दद्यात्।।८९६।।

स्वीये मार्गे बाधां महतीं दृष्ट्वा जनाः क्षुब्धाः।
अल्पीयस्यपि धारा प्रेरणरूपाऽत्र जीवनं दद्यात् ।।८९७।।

"मा भैरेवं कार्यं" "ननु तुच्छा विद्यते बाधा।"
व्यथिताऽन्तरेऽमृतमयं वाक्यकदम्बं समाश्वसेत्सद्यः।।८९८।।

उचितं पारिश्रमिकं ख्यातिप्राप्तिः समर्थनावाप्तिः।
प्रेरणरूपाणीमान्यसमसमुल्लासदायीनि ।।८९९।।

कार्ये विषमां वृत्तिं समतायां या नियोजयति।
यतः कुतश्चिल्लभ्या मानवमात्रेण प्रेरणाशक्तिः।।९००।।

देवाराधनरूपे नानादीक्षाविधानेषु।
अध्यात्मप्रेरणया विश्वासे दीप्यते शक्तिः।।९०१।।

४०. वैज्ञानिकधारा

एषाऽस्ति काऽपि कुण्ठा या नूतनसेचने नितराम्।
किमपि विरोधं तनुते तेनास्ते वा विरामोऽयम्।।९०२।।

चिन्तनधारा सर्वा किञ्चित् किञ्चित् प्रकाशमायाता।
सत्वरमेव समस्तं रूपं परितः समापयति।।९०३।।

यस्मिन् देशे काले वयं स्थिताः स्मो न यदि तस्मिन्।
चिन्तनसरणिरुदीयात् का सिद्धिः स्याद्विचारेषु।।९०४।।

वैज्ञानिके युगेऽस्मिन् विज्ञानान्वेषितः पन्थाः।
नाङ्गीकृतो यदि स्यात् दूरे स्यात् साधना निखिला।।९०५।।

वैज्ञानिकधारा सा या वै कुण्ठां विदूरयति।
यस्यां वृद्धिविलासा अद्यत्वे सार्थकाः सन्ति।।९०६।।

सा पद्धतिर्नवीना यस्यां जागर्ति कोऽपि विश्वासः।
रूपाणां निखिलानां धारा क्रमभावमायाति।।९०७।।

यस्यां शृण्वन्ति जनाः श्रोतव्यं प्रेरिताः सन्तः।
वक्तव्यमपि च निखिलं स्पष्टं सरलं तथा भवति।।९०८।।

वैज्ञानिक-पद्धत्या कुण्ठा सर्वा विदूरिता भवति।
निश्चयबुद्धेर्नूनं विकासभाषा समुल्लसति।।९०९।।

वैज्ञानिकपद्धत्या सततं संचारशीलेन।
सर्वा विकासरणिर्नित्यं सौम्याऽनुसन्धेया।।९१०।।

यस्यां विचारकार्ये विरामधाराविरामः स्यात्।
सा वैज्ञानिकसरणिर्मता समस्तेषु भावेषु।।९११।।

नाना चिन्तनधारा विस्तारं यत्र दर्शयति।
सामर्थ्यं विपुलतरं चित्ते विस्फारितं भवति।।९१२।।

यद्वै सर्वं निर्मलमानन्दे संनिवेशयति।
तन्नूतनमिह कथितं विमलतरं यन्मनः कुरुते।।९१३।।

आरादियमतिघोरा चिन्तारेखा विशोषयन्तीव।
एतस्या निर्यासे नूतनतायाः समुल्लासः।।९१४।।

४१. कुण्ठा

येनोन्नतिर्निर्तान्तं चरणं परिचुम्बते सततम्।
मार्गा विस्तीर्यन्ते नो विहितस्तादृशोऽभ्यासः।।९१५।।

भाषाया दारिद्र्यं न विद्यते हन्त कुत्रापि।
नानाविधविषयाणामवलिः सर्वत्र दृश्यते ललिता।।९१६।।

प्रोद्दामेच्छाशक्तेर्दारिद्र्यं दृश्यते किन्तु।
कुण्ठाग्रस्तं चेतोऽभ्यस्तं पूर्णेन कालेन।।९१७।।

स्वच्छन्दता च निखिला पूर्णविरामे समाप्नोति।
स्वातन्त्र्यशून्यतायां किं कुर्यात्कोऽपि सुन्दरं यत् स्यात्।।९१८।

सर्वविधं चिन्तनमयनिबद्धभावे समायाति।
रमणीयताविलोपः कुण्ठां व केवलां दद्यात्।।९१९।।

संस्कारैराबद्धा बुद्धिर्नैष्फल्यमादिशति।
निगडितचिन्तनमेतद् बलिवर्दभ्रमणरूपं भोः।।९२०।।

४२. निषेधकाव्यायिम्

पठितं पठितुं दृष्टं यद्दर्शनीयमत्रासीत्।
सम्प्रत्यस्ति नितान्तं चलनीयञ्चाग्रिमोद्देशे।।९२१।।

विजयपराजयभावे परिणतिरुग्रा मनःपटले।
नैवाऽनुभवव्यालैरास्वाद्या रक्षणीया सा।।९२२।।

येयं करालदंष्ट्रा भीषणतां सम्प्रदर्शयति पुरतः।
भग्ना सती तथैषा प्रकोष्ठसौन्दर्यवर्धिनी भूयात्।।९२३।।

गगने येषां पादौ क्षितौ सदा कुत्सिता दृष्टिः।
तेषां चरितं सर्वं निषेधकाव्यायितं भवति।।९२४।।

४३. पुरातनं सुन्दरं भवति

कीदृशमपि वा तत्स्यात् घोरतरं वा कुरूपं वा।
अद्यतनात्तुलनायां पुरातनं सुन्दरं भवति।।९२५।।

प्रत्यक्षतः कदाचित्संसर्गो नो विजायते तस्य।
स्मृतिमात्रे सुलभं तद् रेखाचित्रेषु दृश्यते विविधम्।।९२६।।

मिश्रितमेतन्निखिलं चाद्यतनं भासते पुरतः।
कष्टेनाऽपि हि तत्र स्वीयं पदमर्पितं भवति।।९२७।।

यद्यत्पुरातनं वा यस्मिन्कालेऽद्यतनमासीत्।
मिश्रितभावाऽनुभवो नूनं तस्याऽपि तत्राऽसीत्।।९२८।।

कालेन शोधितं तद्रूपं तस्यैव भासते चित्ते।
कष्टस्य मिश्रणं तद् दूरीकृतमेव कालेन।।९२९।।

ताजमहल-निर्माणे यादृक् कष्टं समुद्भूतम्।
कर्मकराणां नित्यं नैवाऽस्ते तत्पुरोऽद्यत्वे।।९३०।।

पूर्वं दुःखाऽनुभवः संजातोऽप्यद्य संस्मृत्या।
सौरभमसमं चित्ते निवेशयत्येव मधुपूर्णम्।।९३१।।

निखिलपुरातनरूपस्यास्ते स्मृत्यैव सम्बन्धः।
मनसः क्रियया तस्मात् पुरातनं सुन्दरं भवति।।९३२।।

४४. विभासते

सायं प्रातर्यदिदं कौमार्यं सुस्फुटीभवति।
बन्धं भित्त्वा छित्वाऽविर्भूतं तद्विभासते पुरतः।।९३३।।

श्वासे श्वासे प्रवहत्युद्दामोन्मादमालेयम्।
स्तुतिशतकैरप्राप्या निन्दितवैभवयुता चास्ते।।९३४।।

कण्टकजालैरावृतसर्वाङ्गी सा निषिद्धधाराऽपि।
शूद्रकराजसभायामास्ते चाण्डालकन्येव।।९३५।।

नहि नहि नहि कुर्वाणा सर्वां स्वीकृतिमियं वहती।
आकृत्याऽप्रतिमा तत् कृष्णं रूपं स्फुटीकुरुते।।९३६।।

नन्दनवनसाम्राज्यं नित्यनवीनं समादिशती।
काले मिलिन्दमालां विक्षोभयतीव भासते मधुरा।।९३७।।

पौनःपुन्यैरपि या नित्यनवीनां श्रियं वहती।
दृश्या नूतननिर्णयगरिमाणं स्थूलयन्तीव।।९३८।।

भाग्यसहस्रैरर्चितसर्वस्वा दीप्ततररेखा।
स्थितिगतिरञ्जितकाया सांस्कृतिकीं रात्रिमासूते।।९३९।।

नन्दितसहस्रकिरणैरर्धोन्मादैरभीष्टदा नित्यम्।
विचरति हतभाग्यानां कायोन्मत्तेषु काननेषु चिरम्।।९४०।।

४५. मिश्रणवेला

न पुरुषमनसो रूपं नारी मनसा विभासते तुल्यम्।
पुरुषस्य धैर्यहानिर्नारीमनसस्तथा दृढता।।९४१।।

संयममयता यासौ नारी काये समुल्लसति।
पुरुषाणां व्यूहोऽसौ दीपे शलभायितो दृष्टः।।९४२।।

स्वर्णरजतनिर्झरिणी वहतितरां कान्तिमयकाये।
निर्णयकर्मणि निरताः स्वयं निमग्ना सदा दृष्टाः।।९४३।।

रूपं दर्शं दर्शं कर्णे कर्णे मनुष्याणाम्।
वाणी समुच्छ्वसति सा निःश्वासो नैव निर्याति।।९४४।।

नैराश्यधूम्रमयता दर्शकमनसो विराममादिशति।
दुःखानां च सुखानां मिश्रणवेलेयमाभाति।।९४५।।

"किं वा कथितवतीयं भवतः कर्णे मुखं दत्त्वा"
स्मितविस्मारितहृदया एते ज्ञातुं समुत्सुका जाताः।।९४६।।

४६. उपेक्षा

ज्ञानार्जने निकामं समुपेक्षा वा कृता काले
दुष्फलमेतदतीवोन्मयपत्यद्यापि यन्नितराम्।।९४७।।

एताः पिपीलिका अपि गजभावे परिणता दृष्टाः।
मामुपहसन्ति मन्ये संकुचितं सर्वभावेन।।९४८।।

कामं निमीलिताक्षस्तिष्ठाम्येवं क्षिपन् कालम्।
अद्यापि कापि सरर्णिर्नो लब्धा या सुखं देयात्।।९४९।।

गलितं पलितं सर्वं रूपं हीनं तथा च नो जातम्।
कृत्ये नवीनता का संजाता सद्विधानेषु।।९५०।।

अधिगतयाथातथ्याः शान्ता एते महात्मानः।
रूपेणैव नितान्तं मामाकर्षन्ति वर्षासु।।९५१।।

सामीप्यं चैतेषाममन्दमानन्दमादातुम्।
सम्प्रेरयति नितान्तं विषमं भावं विदूरयितुम्।।९५२।।

पर्वतमाला गगने मण्डलमाबध्नती दृष्टा।
हृष्टा तथा च पुष्टा कुरुते मनसोऽसमां दृढताम्।।९५३।।

४७. क्रोधशक्तिः

क्रोधोऽयं समुदाये शक्तिं प्रबलां प्रबोधयति।
विगतक्रोधरयाणां का सिद्धिर्जीवनेषु स्यात्।।९५४।।

सिंहः क्रोधवशान्ननु निखिलां सुषमां समाप्नोति।
क्रोधाऽभावे न स्यात् तस्मिन्नसमश्चसत्कारः।।९५५।।

ये वर्तमानकाले भूतं भव्यं करे कुर्युः।
क्रोधावेशस्तेषां विख्यातः सर्वलोकेषु।।९५६।।

क्रोधो जीवनचिह्नं वह्नौ दाहो यथा भवति।
राष्ट्राणामितिहासा युद्धेष्वाधारिताः सन्ति।।९५७।।

४८. कृपाणधारा

कालान्धकारपटलीसंछादितमेतदङ्गणं मनसः।
दीपा अप्याशानां निर्वाताऽस्ते विरोधिभिर्वातैः।।९५८।।

श्वासप्रश्वासानां गतागतैरेवमनुमेया।
जीवनसरणिः काचित् खद्योतानां प्रकाशरेखेव।।९५९।।

शिथिलतरं संवृत्तं गात्राणां सन्धिबन्धनं तदिदम्।
भूलुण्ठितमिव सर्वं विभावनीयं पुरस्तान्मे।।९६०।।

हाहाकारं कृत्वा काचिद् बाला करोति रोमाञ्चम्।
विस्मृतमेव यदनया मनोगतं सर्वमाकूतम्।।९६१।।

एषा कृपाणधारा कोपाविष्टे करे कृष्टा।
नयनारुणिमविभावं समर्पयन्ती पुरःस्थितैवास्ते।।९६२।।

सर्वसमर्पणशीलं मामप्येवं समासाद्य।
विभुता ननु प्रयाता कस्यां दिशि नैव जानामि।।९६३।।

४९. धैर्यम्

धैर्यभ्रंशे शान्तिर्दूरं गच्छति समीकृता याऽसीत्।
आगच्छति दुःखानां क्लेशानां वा परीपाकः।।९६४।।

आश्रितजनसंमर्दः सहसैवोत्थानमायातः।
कामं प्रवहति निमिषैर्विषमैर्भावैरलं ज्वलितः।।९६५।।

घंटानादो विवशीभावनां द्योतितो भवति।
तत्राऽभ्यासविपुलता नूनं संदृश्यते बहुधा।।९६६।।

आयातेन च तेनैवेदृशमारोपितं विषं बीजम्।
वल्ली दग्धा सेयं बीभत्सं रूपमातनुते।।९६७।।

तृणवन्मत्वा यदिदं नाशितमासीत्सुसाम्राज्यम्।
चित्रचरित्रं मत्वा केवलमेतस्य दर्शनायासः।।९६८।।

अल्पतरप्राणानामीदृशमहिमा समुद्योतः।
कलुषीकुरुते दिव्यं सरोवरं दर्शनीयचरम्।।९६९।।

क्षणमात्रे या हानिः संजाता सत्यसन्धीनाम्।
न ज्ञायते कदाचित् भूयोऽप्यासां समागमः स्याद्वा।।९७०।।

भ्रमविभ्रमसंचरणे शक्तिर्या नाशिता दिव्या।
तां वा प्रत्यानेतुं विकटश्रमसाधना योज्या।।९७१।।

५०. कामः

कामात्मता प्रशस्ता नाभिमता जीवने काचित्।
नो लभ्यं संसारे निखिलेऽस्मिन् कामशून्यत्वम्।।९७२।।

समुचितकामनिषेवणरूपोऽयं मध्यमो मार्गः।
संसेव्यते निकामं जीवनसंसिद्धिकामेन।।९७३।।

मर्यादानां बन्धो विश्वासे नैष्ठिकी धारा।
स्वच्छन्दकामचारं नियमे स्थापयति सम्पूर्णम्।।९७४।।

सोऽयं वा तटबन्धस्तटिनी कामस्य संयता येन।
तेन समाजे जीवनमास्ते नितरां सुसम्बद्धम्।।९७५।।

५१. परिचय-महिमा

गुणगणपरिगणनायां गुणसाम्राज्याभिषेकवेलायाम्।
परिचयगुणमद्यत्वे सर्वश्रेष्ठं विजानीयात्।।९७६।।

दयया पूर्णोऽपि स्यात् प्रभावपूर्णोऽपि शमदमैः सर्वैः।
त्यागी भवेद्विवेकी परिचयरहितो न पूज्यते लोकैः।।९७७।

साक्षात्कारावसारे चामन्त्रितसर्वयोग्यतायुक्तः।
यदि परिचयेन शून्यो न तमां विनियुज्यते श्रेष्ठैः।।९७८।।

'जानाम्यहं तमेन' ''पुत्रोऽयं तस्य तस्य किल बन्धुः''।
अध्यक्षोऽपि तदात्वे कथयति ''तेनैतदर्थमहमुक्तः''।९७९।

श्रेणी चास्य तृतीया प्रमाणपत्रे विलिखिताऽस्ते।
अनुभवशून्योऽपि पुनः परिचयबलतो वृतो भवति।।९८०।।

श्रीभगवानपि पूर्वं स्तोत्रध्यानादिसत्क्रियालाभैः।
परिचयपूर्वकमेव प्रवर्तते वा वरप्रदानेषु।।९८१।।

परिचयमहिमाऽनन्तः हीनस्तेनाऽमृताऽस्वादे।
सद्यो बहिष्कृतः सन् नैवाप्नोत्यादरं क्वापि।।९८२।।

तस्मात्सर्वं त्यक्त्वा परिचयवृद्धिंकरोपायान्।
अन्वेषयन्ति धीरास्तेनैवैषां समुल्लासः।।९८३।।

५२. निन्द्यतायामाशा

निन्द्यप्रवाहे पतितः पुनरुत्थानं च कामयते।
तेनाऽपि न भेतव्यमुत्थानं तत्करे संस्थम्।।९८४।।

क्षणनिश्चयसंचयने यदि लग्नः प्रोज्ज्वलं ध्यायेत्।
सद्यः कृपाप्रवाहः सम्प्राप्यो वा परेशितुस्तेन।।९८५।।

निन्द्यानपि स्वभावान् स्वीकर्तुं नो स्वतन्त्रता चास्ते।
सर्वं त्वेतदतीवोन्मिषितं परमेशितुर्मंस्थाः।।९८६।।

निन्द्याऽचरणे तोषो यदि भूयात् तत्र नो हानिः।
केवलमीशेच्छायाः संस्मरणं तत्र काम्यतरम्।।९८७।।

अन्तःस्थितसज्ज्योतिर्यथा यथा चालयति नित्यम्।
निन्द्ये वाऽथ पवित्रे मार्गे तन्मङ्गलं सर्वम्।।९८८।।

रावणसदृशा नैके येऽन्तःस्थेनैव निन्द्यतममार्गे।
संचालिता अपि पुनः प्रापुर्जगदीशसामीप्यम्।।९८९।।

सर्वमपीदं विश्वं निन्द्यं वा शंसनीयं वा।
महतो महीयसोऽस्यैवेच्छा लीलायितं भवति।।९९०।।

५३. बहुमतम्

सम्प्राप्ते स्वातन्त्र्ये सर्वमकाव्यायितं जातम्।
आसीद्यत्तु ससीमं सीमाभङ्गः कृतस्तत्र।।९९१।।

निखिलमनर्थकमेतद् राजा राज्यं च वर्णाश्च।
अस्पृश्यता च धर्मः सर्वमसम्बद्धमेवाऽद्य।।९९२।।

स्वातन्त्र्ये सम्प्राप्ते बन्धनसामान्यसंन्यासः।
संजातो न यदि तदा स्वातन्त्र्यमनर्थकं जातम्।।९९३।।

बन्धन-भङ्गः कार्यो यदि, किमिदं बन्धनं नाम?
देशः? शासक-परिषद्? न्यायालयसंविधानादि?।९९४।

प्रश्नानामेतोषामद्यत्वे त्वेकमुत्तरं ध्येयम्।
बहुमतमथ यत्राऽस्ते तत्सर्व सम्मतं नाम।।९९५।।

५४. अवमूल्यनम्

देशस्यादर्शाणामवमूल्यनमत्र यज्जातम्।
राष्ट्रस्वरूपलोपस्तेन क्रमशो विलोक्यते नित्यम्।।९९६।।

शौर्यस्वरूपनाशो गौरवभावस्तथा नष्टः।
विद्याविलासकान्तिर्गता तथा भारतीयानाम्।।९९७।।

जीवनमप्यवशिष्टं भृतिकार्ये वेतनाऽवाप्तौ।
सामूहिकः स्वभावो जनतायाः सत्वरं नष्टः।।९९८।।

यान्त्रिकविज्ञानेषु प्रबलतमैस्तैर्विदेशीयैः।
जाङ्गलिकं विद्रूपं साधितमस्मत्सुपुरुषाणाम्।।९९९।।

ऐक्यास्वादविहीना एकैकस्मिंस्तु संकुचिताः।
एतद्देशे मनुजा मानवरूपादपि भ्रष्टाः।।१०००।।

अवमूल्यनमीदृशमथ मानवधर्मस्य संजातम्।
विश्वगुरुत्वे संस्थितमेतद् राष्ट्रं विपन्नमभूत्।।१००१।।

स्वीये राष्ट्रे सर्वे प्रथमश्रेणीपरिगणनयोग्याः।
मध्यमनिम्नश्रेण्यां सर्वे ते स्थापिता आंग्लैः।।१००२।।

वर्गाणां देशेऽस्मिन् रूपं तैस्तादृशं गठितम्।
स्वातन्त्र्येऽपि तदेतत्सौख्यकरं शासकानां वा।।१००३।।

सत्यान्नीतिर्दूरा कर्तव्यं दूरतरभूतम्।
स्वार्थमयः सन्तोषः केवलमेकः समाभाति।।१००४।।

५५. नैपुण्योद्घोषः

नैपुण्येनैवैषा चर्या काचित्समादिष्टा।
यद्वशमायातोऽयं चक्रभ्रान्तः पतामि न चलामि।।१००५।।

निपुणोऽयमिति ख्यातिर्विगुणत्वं वा विरूपत्वम्।
क्षमताया राहित्यं मयि नित्यं संनिवेशयति।।१००६।।

'अग्रे इमे स्थिता ये निपुणतमा वन्द्यतायुक्ताः।
मूर्खास्ते, ज्ञानं मे नैपुण्योद्घोषलाभोऽस्ति।।१००७।।

अद्याऽहं कोऽप्यसमः संजातस्तादृशो जगति।
यस्य कलामात्रं वा शेषे सर्वत्र सन्दृश्यम्।।१००८।।

जाड्यातिशयमिदं यन्मामेते सर्वसंसिद्धम्।
शुभ्रप्रभावपूर्णं द्विषन्ति मन्दा जलं पीत्वा।।१००९।।

पश्यतु काले प्राप्ते समागते किञ्चिदधिकारे।
एतांस्तु चूर्णयित्वा कृतकार्योऽहं भविष्यामि।।१०१०।।

ज्ञास्यन्त्यन्येऽपि जना मत्सार्धं यो विरुध्येत।
का भूयात्तस्य गतिरित्यालोचनपरो भवामि ननु।।१०११।।

भूयान् कालो नित्यं व्यत्येत्येवं विचारेषु।
परितोद्घोषितनैपुण्यस्य फलं तन्मया प्राप्तम्।।१०१२।।

भतृहरिर्ज्वररूपेणैतादृशवर्णनं कृतवान्।
यदि सत्यं नो जाने ज्वरोऽयमस्तं गमिष्यति वा।।१०१३।।

अधुना तूक्तविचारैस्तरङ्गितं मे भवत् स्वान्तम्।
सुखसाम्राज्यं लभते त्ववसरमात्रे प्रतीक्षा मे।।१०१४।।

५६. परस्परम्

अहमत्र त्वं तत्र स्थित्वा सर्वं समासाद्यम्।
कः पृच्छति को हेतुः पृच्छेदपि मुद्रणीयं तत्।।१०१५।।

विद्वत्तायाः सरणिः सोऽहं विद्वत्सु मूर्धन्यः।
त्वं मामेवं घोषय नूनमहं त्वां तथैव कर्तास्मि।।१०१६।।

स्वल्पेऽस्मिन्नधिकारक्षेत्रे चैवं परस्परं कार्यम्।
क्षेत्रमिमं वर्धयितुं विवशाः सर्वे भजन्तेऽस्मान्।।१०१७।।

एवं कृते कतिपयैर्दिवसैस्तादृक् स्थितिर्भविता।
त्वमहं चाऽस्मिंल्लोके विषयेऽस्मिन् सूर्यचन्द्रौ स्वः।।१०१८।।

त्वं मामाह्वय नैजे चाह्वानेऽहं सदाऽह्वयामि त्वाम्।
भूयानेवं भूयादुभयोरप्यावयोर्लाभः।।१०१९।।

लाभकरं सर्वं स्यात् नो लाभो यत्र तत्त्याज्यम्।
मूर्खाः प्रलापशूराः शममेष्यन्त्येव सर्वेऽपि।।१०२०।।

यदि ताडनसहने वा लाभः कुत्रापि दृश्येत।
स्वर्णावसरं मत्वा सोढव्यास्ते समाघाताः।।१०२१।।

प्राप्तेऽवसरे त इमे आघातास्तीव्रसत्कारैः।
अस्मान् कृतार्थयेयुर्धार्यं वा निश्चयेनैतत्।।१०२२।।

देशस्वतन्त्रायाः सङ्ग्रामे सम्प्रवृत्ते वा।
लुण्टाका अपि ये वा कारागारे गताः सुखं तेषाम्।।१०२३।

तेऽपि लभन्ते वृत्तिं प्रमाणपत्रं प्रदर्शयित्वा स्वम्।
कारागारे स्थितिरथ तस्मिन् कालेऽर्थदायिनी जाता।।१०२४।

गोप्यं सर्वं गोप्यं गोपनमुद्रा न परिहार्या।
नन्वनयैव जनानां हृदयेष्वातंकलाभः स्यात्।।१०२५।।

निखिलं यत्र स्पष्टं तत्रापि तु गोपनीयतरम्।
निखिलं रहस्यजातं कल्पनयैव प्रकल्पनीयं स्यात्।।१०२६।।

५७. धिक् तान्

धिक्कारास्तान् विद्वन्मन्यान् नूनं महादर्पान्।
विनयस्य तु नो दृश्यं यत्रेदं लेशमात्रमपि।।१०२७।।

नानाकुण्ठाग्रस्ताननर्थकरणे परमदक्षान्।
स्वीयाचरितमहत्त्वोत्कीर्तनमात्रे परं लग्नान्।।१०२८।।

अन्ये कीटपतङ्गाः सर्वे इति ये सदाऽस्थेयुः।
धिक् तान् वारं वारं घृणास्पदं ते न सन्देहः।।१०२९।।

स्वेनोच्चं वर्गं ये दृष्ट्वा बकवद् विनम्राः स्युः।
वारं वारं धर्षितपूर्वा अपि तेषु गच्छेयुः।।१०३०।।

विद्याऽभासाऽधिगमो येषां श्वासेषु धर्ममादध्यात्।
स्वसदृशमण्डलमध्यस्थितिरेषां प्रेयसी भूयात्।।१०३१।।

विष्ठानिर्मितिसदृशा दुर्गन्धानां महागेहाः।
धिक्कारयितुं योग्या मनसा वाचा च कर्मणा वापि।।१०३२।

अन्तर्बहिश्च मिथ्या भाषणलेखनमथापि वा मिथ्या।
मिथ्या येषां जननी मिथ्यैवास्तेऽथ जीवनं तेषाम्।।१०३३।।

प्रातर्येषां दर्शनमास्ते भोजनविलोपकरम्।
सायं तन्निद्राया लोपकमास्ते तु धिग्धिक् तान्।।१०३४।।

धार्मिकचिह्नाऽक्रान्तान् जपमालानर्तने शूरान्।
वाग्व्याहारे देवान् कार्ये रक्षःस्वरूपान् धिक्।।१०३५।।

अन्येषां श्रमरचना स्वीयेति ख्याप्यते यैर्वा।
तान्धनयशःपिशाचान् सर्वेषामस्तु धिङ् नित्यम्।।१०३६।।

५८. किन्तुः

दिव्यचरित्रावलिभिर्मण्डितमेजज्जगत्त्रयं किन्तु।
व्यालावलिरपि सर्वं नाशयितुं सोत्सुका लोके।।१०३७।।

संन्यासिनो निकामं संलग्ना मार्गदर्शने किन्तु।
मठनिर्माणकुशलता तेषां गूढं प्रकाशयति।।१०३८।।

सर्वविधसौख्यजननी भाषा सुमुखाद्विनिर्गता किन्तु।
कर्मणि विपरीतत्वं सर्वेषां मारकं भवति।।१०३९।।

ज्ञानालोको नूनं सन्मार्गे प्रेषयति किन्तु।
व्यवहारजटिलतेयं दूरीकुरुतेऽथ सन्मार्गात्।।१०४०।।

सर्वेऽप्येते संघा शक्तिं विपुलां समाश्रिताः किन्तु।
विस्फोटकता तेषां प्रबन्धशूलायिता भवति।।१०४१।।

आराधना नितान्तं शान्तं कुरुते मनः किन्तु।
नानाऽडम्बरमाला व्यथितं सर्वं मनः कुरुते।।१०४२।।

सर्वोच्चपदप्राप्तिर्जाता सन्तोषदायिनी किन्तु।
लालाटिकबाहुल्यं नाटकमसमं समादिशति।।१०४३।।

आदर्शानां जननी सेयं भारतबसुन्धरा किन्तु।
रूढीनामुन्मादो दूरीकर्तुं न शक्योऽस्ति।।१०४४।।

ग्रन्थानां बाहुल्यं ग्रन्थागारेषु लोक्यते किन्तु।
तत्राऽडम्बरमात्रं नानारूपाणि धारयति।।१०४५।।

विद्या विनयं यच्छति विख्यातं सर्वदा किन्तु।
विनयाऽभावोत्पत्तौ विद्यैवाऽद्यास्ति कारणीभूता।।१०४६।।

वार्धक्ये संशान्तं भवति नितान्तं मनः किन्तु।
दीर्घाऽभ्यासवशादिव कौटिल्यं नैव विजहाति।।१०४७।।

कारणसामग्रीयं सिद्धा सर्वार्थदायिनी किन्तु।
संसर्गदूषणं तद् घोरं सर्वं विनाशयति।।१०४८।।

नानाविधसंस्कारैः सुसंस्कृतोऽयं सुतः किन्तु।
जीवति पितरि समस्तं मृतसंस्कारं समीहते तस्य।।१०४९।।

ऐक्यं नाम रसायनमसमं बलवर्धकं किन्तु।
स्वार्थमयं विषमुल्बणमद्यत्वे तद्विलोपयति।।१०५०।।

रामेण नाशितोऽभूत् राक्षसवर्गः परः किन्तु।
कलिकालेऽसौ नितरां समुन्नतोऽखर्वगर्वेण।।१०५१।।

दूरीकृतदुरितानां संसारे पूज्यता किन्तु।
दुरितानां नेतारो न न्यूनास्ते च बलवन्तः।।१०५२।।

लक्ष्मी कृपां कृतवती सौख्यं जातं परं किन्तु।
रोगाणां बाहुल्यं व्यथयति निर्दयतया चेतः।।१०५३।।

निखिले लोके व्याप्तं धवलतरं सद् यशः किन्तु।
द्रव्याऽभावो विषमो जीवनमुन्मूलयति वेगात्।।१०५४।।

आशालता समन्तात् प्ररसति सौरभमयी किन्तु।
प्रतिबन्धकसद्भावः प्रबलतरं शोषणं कुरुते।।१०५५।।

दुग्धेन पूरितं तत् पात्रं पुरतो विलोक्यते किन्तु।
मृतमक्षिकाविलोकनविक्षेपोऽत्रापि संजातः।।१०५६।।

नानाविधकामानां पूर्तिः संजायते किन्तु।
अधिकाऽधिकं समीहा तेषां नाशयति संसारम्।।१०५७।।

कठिनपरिश्रमकरणे संलग्नास्ते जनाः किन्तु।
परिचयहीनाः सन्तो साफल्यं नो लभन्तेऽत्र।।१०५८।।

नाना चुनावचर्चाविरोधिकोलाहलः किन्तु।
सत्तापक्षे विजयो जनताऽभीष्टो विपरिणमते।।१०५९।।

सर्वेऽपि राष्ट्रभाषासमर्थका स्युर्नराः किन्तु।
तामिलनाडुविरोधो तस्या ग्रहणेऽभवद्राहुः।।१०६०।।

अर्थोन्नतिर्विशिष्टा देशे प्रविलोक्यते किन्तु।
सच्चारित्र्यविलोपो नैराश्यं घोरमादिशति।।१०६१।।

द्रव्याऽभावे भ्रमणं नैवाभीष्टं भवति किन्तु।
मा भूत्क्रयशक्तिः सा नयनसुखं को निवारयति।।१०६२।।

जगदीश्वरः समन्ताद् व्याप्तो विद्योतते किन्तु।
सघनतरावरणानां पटलो तं दूरयति नित्यम्।।१०६३।।

सत्याग्रहे समस्ता शक्तिः केन्द्रीकृता किन्तु।
विपुलप्रचाररचनासिद्धौ तस्याः फलं प्राप्तम्।।१०६४।।

मन्दिरदर्शनवेलासंगमनं सात्त्विकं किन्तु।
वक्षोजदर्शनानां रजोमयी तुष्टिरेवेयम्।।१०६५।।

दिव्या मूर्तिरियं ते विष्णो, सर्वाघनाशिनी किन्तु।
पादत्राणविलोपो नूनं दुःखाकरो जातः।।१०६६।।

जनतासेवकभावो नितरां मोदावहः किन्तु।
अहमहमिकेयमत्राप्यायाता कलिकला विषमा।।१०६७।।

सेवाकार्यनियुक्तो वर्गः सुखमेधते किन्तु।
मतदाताऽसौ राजा शुष्को दीनश्च हीनश्च।।१०६८।।

ध्वनिविस्तारकयन्त्रं वाग्वरदानोपमं किन्तु।
अतिचारस्तत्रत्यो कर्णे शूलायितो भवति।।१०६९।।

संख्यातीतसफलता गणिता शासनगता किन्तु।
दस्यूनामपि गणना संख्यातीतैव संजाता।।१०७०।।

धर्मो देशो राष्ट्रमिति शब्दाः प्रोन्नताः किन्तु।
धूर्तमुखैर्निर्गमनादेते सर्वे निरर्थका जाताः।।१०७१।।

सर्वत्र संविधाने नेतारो व्याकुलाः किन्तु।
स्वगृहनिधानं तेषामापणचर्चावहं जातम्।।१०७२।।

आद्योपान्तविभेदः सिद्धान्ते विद्यते किन्तु।
सत्तासाधनसुषमा तेषामप्यैक्यमातनुते।।१०७३।।

जनतन्त्रात्मकपद्धतिरत्यन्तं निर्मला किन्तु।
जनचारित्र्यसुदृढता यावन्नास्ते तदा हानिः।।१०७४।।

सर्वं रहस्यभूतं परितोऽप्येतद्विलोक्यते किन्तु।
सुस्पष्टं प्रत्यक्षं निखिलञ्चैतद्विपरिणमते।।१०७५।।

सर्वा सरणिः सेयं सौरभसारार्चिता किन्तु।
सैरिभलीला परितो व्याप्ता नो वाञ्छनीयाऽस्ते।।१०७६।।

शतशो निभृतैर्यत्नैः कृष्णधनं सञ्चितं किन्तु।
दस्यूनामाक्रमणे शुक्लधनञ्चापि निर्यातम्।।१०७७।।

गौडोऽयं द्रविडोऽयं मैथिल इति वाग्मिता किन्तु।
हिन्दुरयं वा सम्यङ्नाद्यत्वे द्रष्टुमीहास्ते।।१०७८।।

हिन्दूर्मुस्लिमहरिजनठाकुरकायस्थगणनिका किन्तु।
निर्वाचनपरिचर्चा 'मानव' इति नैव जानाति।।१०७९।।

सर्वापत्तिनिवारकमन्त्रः संसाधितः किन्तु।
सर्वापद्विनिवृत्तौ जीवनवैयर्थ्यमपि जातम्।।१०८०।।

भाषणसरणिरियं ते नितरां मोदावहा किन्तु।
मादकवस्तुसुयोगस्तत्राऽस्ते कारणं न भवान्।।१०८१।।

रामभरतयोश्चरितं कथाप्रवाहे श्रुतं किन्तु।
कालेऽस्मिन् श्रीरामो भरतं निर्वासयति दूरे।।१०८२।।

नानानाटकरचने कालो व्यतियापितः किन्तु।
पर्यन्ते निर्वाहो नो कर्तुं पारितो भवता।।१०८३।।

न्याय्यं सर्वं दातुं समीहते सत्वरं किन्तु।
तस्य समीहा केवलमास्ते भोजनसमीहैव।।१०८४।।

नाट्यं यावज्जीवनमनेन नित्यं कृतं किन्तु।
नाट्यं कर्तुं सोऽयं सर्वानन्यान्निषेधयति।।१०८५।।

एतावत्तव नाट्यं सफलं संचिन्तये किन्तु।
पर्यन्तदर्शकानां का स्थितिरास्ते त एव जानीयुः।।१०८६।।

देवीभक्तः पूर्वं कृष्णे भक्तिं प्रदर्शयति किन्तु।
यत्राऽस्ते गुडसत्ता पिपीलिकास्तत्र गच्छन्ति।।१०८७।।

आसीत्सर्वा शक्तिर्नेयं नूत्ना समागता किन्तु।
यावत्तु विनायासं कार्यं सिद्धं न हानिः सा।।१०८८।।

कथनीयं तत्कथितं न मनागालोचितं किन्तु।
दीनदयालुः सोऽयं तिलस्य तालं विनिर्माति।।१०८९।।

विद्वन्! भवदीयेयं वार्ता मोदावहा किन्तु।
परमलघीयानंशो ननु तस्याः साधितो भवता?।।१०९०।।

नवनवकाव्यविरचने स्फूर्तिः संजायते किन्तु।
मुद्रापणदौरात्म्यादुत्साहो नाशितो भवति।।१०९१।।

विपुलधनव्ययकरणे शासनमेतत्सुसक्रियं किन्तु।
चिक्कणविधिपरिचर्या मूलं निखिलं विशोषयति।।१०९२।।

अध्ययनमननचिन्तनपरायणाः सन्ति ते किन्तु।
न्यायालयस्य बाधा तेषां प्रतिबन्धिका भवति।।१०९३।।

सा संविधानभाषा स्पष्टा सरला समीपगा किन्तु।
न्यायालयवाक्कलहे जटिलं रूपं प्रकाशयति।।१०९४।।

नानाऽनुष्ठानैरथ पदमेतत्प्राप्तमपि किन्तु।
न्यायालयनिर्णयतः पुनरपि मूषकगतिर्जाता।।१०९५।।

गमनागमनैर्नित्यमध्यक्षः सेवितः किन्तु।
हा तत्स्थानान्तरणं कार्यात्पूर्वं हि सञ्जातम्।।१०९६।।

संस्कृतसुधीसमाजे धनलाभो दृश्यते किन्तु।
क्रयशक्तिर्लुप्ता सा सेवाभावोऽपि लुप्तोऽयम्।।१०९७।।

संस्कृतसाहित्यमिदं समुज्ज्वलं दृश्यते किन्तु।
व्यवहारादतिदूरे स्थितिरेषा तस्य कालेऽस्मिन्।।१०९८।।

विद्वांसस्तु निकामं विद्याभ्यासे रताः किन्तु।
धूर्ताऽधिपत्यभावस्तापं तेषां समातनुते।।१०९९।।

नानासत्काराणां विदुषां स्यात्पात्रता किन्तु।
अर्धं तव मम चार्धमित्येषा धूर्तता तत्र।।११००।।

आदर्शपुरुषगाथा विमलं कुरुते मनः किन्तु।
विपरीतेऽस्मिन् काले सा सर्वा मूर्खता कथिता।।११०१।।

कीर्तिः समुज्ज्वलासीदेतद्देशस्य सा किन्तु।
वानरगणबाहुल्याद्विलोपिता पूर्णरूपेण।।११०२।।

सा राजनीतिरसमा देशेऽस्मिन् साधिता किन्तु।
धनपदहरणं दाराहरणं चाद्यास्ति नीतिरवशिष्टा।।११०३।।

निष्ठावन्तो लोकाः सन्त्येवाद्यापि ते किन्तु।
साधनविहीनतायामवसरलाभं प्रतीक्षन्ते।।११०४।।

आकाशवाणिलहरी निनादभाषा समुज्ज्वला किन्तु।
विद्युत्संचरबाधा धारां सर्वां विखण्डयति।।११०५।।

चलचित्राणामवलिर्दृश्यं काव्यं समद्भुतं किन्तु।
सर्वं निषेधकाव्यं विधिरूपेणैव परिणमते।।११०६।।

प्रातःकाले पत्रे जातं विश्वस्य दर्शनं किन्तु।
हत्या लुण्ठनकार्यं व्यभिचारश्चेति संक्षेपः।।११०७।।

सस्योत्पत्तिनिमित्तं जलमार्गा निर्मिताः किन्तु।
गगने मेघाऽभावे श्रमव्ययौ केवलं जातौ।।११०८।।

पूगीफले निकामं गणपतिरभ्यर्चितः किन्तु।
विघ्नाग्निकाण्डकाले गणपतिरपि तत्र निक्षिप्तः।।११०९।।

नानादर्शनसरणिर्विख्याता तेजसा किन्तु।
कलहोऽनुयायिवर्गे गौरवमसमं विलोपयति।।१११०।।

चिन्ताक्लान्ते चित्ते शब्दस्फूर्तिर्न जायते किन्तु।
घटनानुभवपिपासा नवतां नूनं विलासयति।।१११।।

किञ्चित्किञ्चिच्चलनं लक्ष्यं प्रति सम्मतं किन्तु।
विपरीततरे मार्गे धावनमपि मारकं भवति।।१११२।।

नित्यमियं जपसरणिः करमालावऽर्तनं किन्तु।
मार्गे तरुणीदर्शनवेलायां विस्मृतिर्जाता।।१११३।।

क्षणिकोऽनुभवोऽप्यतिशयमानन्दं प्रेषयति किन्तु।
यावज्जीवनबाधा नेयं साधारणी काचित्।।१११४।।

पञ्चावयवी भाषा शुकवद् रटितैव सा किन्तु।
ज्ञाने कियती वृद्धिर्जाता नालोचितं सम्यक्।।१११५।।

संभोगतः समाधिं विनिर्दिशन्त्येव ते किन्तु।
पारेसमुद्रमास्ते तेषां स्थितिरन्तिमे काले।।१११६।।

क्षुद्रस्वार्थे पङ्के विनिमग्नास्ते जनाः किन्तु।
स्पृश्याऽस्पृश्यविवेके सन्त्येवाद्याऽपि निष्णाताः।।१११७।।

अतिशयगोप्यं पत्रं कार्यालयतः समागतं किन्तु।
बहुविधबहुजनसविधे तदिदं पत्रं गतं पूर्वम्।।१११८।।

नयनस्मितमाधुर्यं मोहयतीवान्तरं किन्तु।
मधुरा कृपाणधारा सेयं स्याद्वा न जानामि।।१११९।।

लीलायितदेहलतां भवतीं पश्यामि हा किन्तु।
स्तब्धीभूय नितान्तं यद्वा तद्वा विचिन्तयामि ननु।।११२०।।

शयनं शान्तं सुखदं मोदकरं वा भवति किन्तु।
श्रमसरणिरेव नूनं सुखदं शयनं समादिशति।।११२१।।

नारीणां कोमलता विख्याता सर्वथा किन्तु।
वृद्धकुमारीचित्ते कठोरता नैव तुलनार्हा।।११२२।।

बालानामपि बाला एतेषां सुस्थिताः किन्तु।
संज्ञाऽद्यापि च तेषां व्यवहारे 'ब्रह्मचारी जी'।।११२३।।

एकस्यापि प्रश्नस्याशयमपि वेत्ति नो किन्तु।
छात्रोऽयं न न्यूनान्सत्पत्यङ्कान् समीहते नम्रः।।११२४।।

पूर्णेन न्यायेनैवोत्तरपुस्तकपरीक्षणं किन्तु।
सर्वेऽनुत्तीर्णा इति परीक्षको नायमतियोग्यः।।११२५।।

उच्चोच्चतमग्रन्थाः कक्षानिर्धारिताः किन्तु।
प्रश्नोत्तरी सुदूरं तान् सर्वान् प्रक्षिपत्यद्य।।११२६।।

अध्यापकैरतितरां शास्त्राण्यालोडितानि वा किन्तु।
छात्रविवेकाऽभावे बुद्धौ जीर्णानि जायन्ते।।११२७।।

बालो नवविद्यालयमध्येऽध्येतुं प्रवेशितः किन्तु।
व्ययपरिचर्चां श्रुत्वा कापि शिरोवेदना महती।।११२८।।

नव्यं पादत्राणं समीहतेऽयं सुतः किन्तु।
तस्य तु पादत्राणं शिरसि पितुर्वेदनाऽभिनवा।।११२९।।

एकस्यां यात्रायां कार्यं बहुधा कृतं किन्तु।
मार्गव्ययोऽपि पञ्चस्थानेभ्यः प्राप्त एव ननु।।११३०।।

अवसरसहस्रलाभो विस्त्रीर्णो जायते किन्तु।
पणकानामपि काले प्राणान् दातुं सुसन्नद्धः।।११३१।।

भाषामात्रविभेदे राज्याद् राज्यं विभिद्यते किन्तु।
एकं तदिदं राष्ट्रं भावनया ज्ञायते नित्यम्।।११३२।।

तुच्छात्तुच्छतराणामथ संख्या वर्धते किन्तु।
गौरवगाथानामिह भाण्डागारः समुल्लसति।।११३३।।

भूभारदूरणार्थं भगवानायात्यसौ किन्तु।
भारोऽपि तादृशः स्यात्सोढव्यो यो भवेन्नैव।।११३४।।

मृत्योरनन्तरं स्यात्कापि गतिश्चर्चिता किन्तु।
जीवननवसाफल्यं पापेभ्यो नो विदूरयति।।११३५।।

५९. आशा

आशायाः संसारे सर्वे भावाः प्रपूरिताः सन्तः।
कामपि सुषमां दिव्यां जीवनपटले समर्पयन्तितराम्।।११३६।।

अद्यप्याशादास्यं सर्वेषां दासतां नयति।
आशा यदि दासी स्यान्निखिलो लोकस्तदा दासः।।११३७।।

एतादृशभणितीनां मर्मविदः केऽपि ये सन्ति।
ते पुरुषार्थोपेताः संसारे वन्दनीयाः स्युः।।११३८।।

इतरेषां सर्वेषामाशादेवी सदा वन्द्या।
तस्याश्छायायामथ सर्वे ससुखं विराजन्ते।।११३९।।

आशा सदा प्रणम्या सा कर्तव्येषु योजयति।
तस्यां जागर्तितरां सर्वो लोकः परा संपत्।।११४०।।

आशाऽकाशविहीनाः किञ्चिन्नैवाऽत्र जानन्ति।
सुखदुःखात्मकविश्वे सैषा प्राणान्विधारयति।।११४१।।

परमोच्चशिखरसंस्था ये पुरुषाः सन्ति संसारे।
तेऽपि निमेषनिमेषेष्वाशापाशाञ्चिता दृष्टाः।।११४२।।

आशा जीवनमूलं सैवाशा जीवनस्य सर्वस्वम्।
कियती धरणी पूर्णा सर्वाप्याशासुगन्धेन।।११४३।।

दारिद्र्यान्वितकाया नानाऽभावैः परामृष्टाः।
आशाचरणनिपतिता जीवनभाषां समालपन्तितराम्।।११४४।।

मानापमाननिबिडे प्रातर्मार्गे भ्रमन्ति ये केचित्।
सायं सर्वं सुस्थं स्यादित्येवाभिकाङ्क्षन्ति।।११४५।।

ईश्वररूपा चेयं सर्वेषामन्तरे प्रजागर्ति।
पशवः स्युर्मनुजा वा सर्वं विश्वं समावृणोत्याशा।।११४६।।

दैवी चैषा सततं जागरिता स्वान्तराले चेत्।
दर्शयति मार्गमखिलं जीवनसंचारकं पुण्यम्।।११४७।।

निन्दा याऽथ कृताऽस्ते गीतासु ग्रन्थरत्नेषु।
सर्वा साऽथ दुराशारूपाणामेव विज्ञेया।।११४८।।

कादम्बरीप्रकरणे शुकनासस्योपदेशेषु।
लक्ष्मीर्विनिन्दिताभून्नो लक्ष्मीः किन्त्वलक्ष्मीः सा।।११४९।।

लक्ष्मीरूपं तदिदं चाशायाः परिणतिर्भवति।
यैवाशा परिपूर्णा सैव समासादिता लक्ष्मीः।।११५०।।

६०. तिथिः

संवत्सरप्रतिपदा तिथिरत्यन्तं समादृता जयति।
सर्वविधमङ्गलानां विधायिका मातृशक्तिरिव।।११५१।।

सर्वसमृद्धिमयीयं संवत्सरसौख्यमयरूपा।
जयति नितान्तं दिव्या हर्षैर्जीवनमहः समृद्धिमती।।११५२।।

मनसस्तन्द्रां नितरां दूरीकुर्याद्विधेयाच्च।
सर्वसमृद्धिं नितरां सर्वे तुष्टा भवन्तु विनयेन।।११५३।।

यद्वा गतं तु सर्वं पुनरागच्छेत्तदेव निकटतरम्।
नागतमद्यावधि यत् तद्वै भूयात् परेश्वरीकृपया।।११५४।।

अवरुद्धं यत्कार्यं परिपूर्णं सुप्रसन्नतया।
सर्वं तद्बोभूयान्मा भूयात् कापि वा हानिः।।११५५।।

६१. परिवेशः

इतिहासे दीनानां गाथा नो विद्यते लिखिता।
पूर्णप्रभावमहिता गाथा एवात्र लिख्यन्ते।।११५६।।

वैपुल्यं दीनत्वे तिष्ठति नैवात्र सन्देहः।
विरलतमत्वं पूज्यं भवति तथा चेतिहासानाम्।।११५७।।

दूषितमथ शुभ्रं वा चरित्रजातं यदेव सम्प्राप्तम्।
तत्सर्वं परिवेशे विलोकनीयं विचार्यं वा।।११५८।।

सामान्येऽथ विशेषे परिवेशः सर्वसामान्यः।
कारणभूतो विदितस्तस्यैवास्ते विशेषत्वम्।।११५९।।

निम्नतरे परिवेशे सर्वो निम्नो भवत्येव।
भिन्नेऽथ तत्स्वरूपे वैचित्र्यं जायते नृणाम्।।११६०।।

परिवेशोऽयं नितरां कारणभूतः समृद्धौ वा।
दारिद्र्ये वा नाना समुन्नतौ वाऽथ पतने वा।।११६१।।

ह्रास-विकास-कलायां नियमावलिरेव कापीयम्।
कर्ममयी सुविचित्रा पुरातनी नूतना चैव।।११६२।।

६२. भारतेन्दुः

भारतभूषणभूतो भूमाभावं गतः कोऽपि।
दिव्यहरिश्चन्द्रोऽसौ जयतितरां भारतेन्दुरिह।।११६३।।

मान्यानामपि मान्यो नित्यं प्रणयी वदान्यानाम्।
यशसा धवलितविश्वो सारस्वत कोश इव दीप्तः।।११६४।।

अयमस्ति शेमुषीभिर्भरितः साहित्य-निर्माता।
भामाशाहप्रतिमो वित्तेशानां नवोन्मेषः।।११६५।।

सर्वस्मिन्संसारे सुविस्तृताऽस्ते यदीयसत्कीर्तिः।
तं सर्वगुणैर्वन्द्यं भारतचन्द्रं नमस्कुर्मः।।११६६।।

वाराणसी यदीये निवासकाले सुविख्याता।
पुरा हरिश्चन्द्रकथां पुनरपि संस्मरति सत्यतां-याताम्।।११६७।

हिन्दीभाषा नूनं यस्योत्साहैर्नवोन्मेषैः।
साहित्यमानदण्डं नूतनमद्यापि धारयति।।११६८।।

काशीयं दृष्टवती सततमुदारैर्मनोभावैः।
तस्य हरिश्चन्द्रस्य प्रखरतमां कार्यपरिपाटीम्।।११६९।।

नित्यनवैरुत्साहैः संवलितोऽभूद् हरिश्चन्द्रः।
सारस्वतसेवायां सन्नद्धो जागरूकश्च।।११७०।।

एतादृशैः सुपुत्रैर्वसुन्धरा धन्यतां याता।
नूतनमेकं युगमिव पुरस्कृतं भारतेन्दुना किमपि।।११७१।।

यस्यावदातचित्रं युगे युगे नूतनं भाति।
तं सारस्वतवैभवभरितं नित्यं नमस्कुर्मः।।११७२।।

नूतनमेकं युगमिव प्रादुर्भूतं तदीयरचनाभिः।
साहित्यगगनमध्ये सत्यं चन्द्रो हरिश्चन्द्रः।।११७३।।

मानेनोन्नतकायो सेवाकार्ये विगतमायः।
सर्वस्वीकृतहिन्दीसेवासंसारसच्छायः ।।११७४।।

हिन्दीसेवागौरवमतुलं यो धारयामास।
तं सारस्वतसुषमामण्डितरूपं जगन्नमते।।११७५।।

यस्य प्रकृष्टभाषा सर्वं रोमाञ्चितं कुरुते।
सहृदयहृदयस्पन्दनसमं रेखाङ्कितं कुरुते।।११७६।।

लेखनशैली काचित् समद्भुताङ्गीकृता तेन।
व्यंग्यैस्तथा विनोदैर्वशीकृतः सर्वलोकोऽयम्।।११७७।।

कालः कश्चन तादृश आसीद् देशस्य विपरीतः।
सा देशभक्तिधाराऽत्यन्तं कठिना च कण्टकैः पूर्णा।।११७८।

राष्ट्रस्याहोभाग्यात् हृदये साम्राज्यमातन्वन्।
विपरीतेऽप्यथ काले सोऽयं वीरः समुत्पन्नः।।११७९।।

तस्मिन्क्रूरे काले आंग्लानां सर्वभावेन।
जड़ताप्रपूरितेऽप्यथ जागृत आसीत् हरिश्चन्द्रः।।११८०।।

दैन्यं न वा पलायनमभीष्टमासीद् वरेण्यस्य।
वैभवपूर्णा चासीत् काचित् तस्यैव परिपाटी।।११८१।।

संपूर्णमपि समाजं पूर्णसमुत्साहयोगेन।
गौरवपूर्णं स्थानं दापितवान् श्रीहरिश्चन्द्रः।।११८२।।

सर्वेषामाराध्या मङ्गलमूला च मातृभाषेयम्।
नित्यं नव नव भावैरापूर्णा वा कथं न स्यात्।।११८३।।

निजभाषोन्नतिरेवोन्नतिमूलं सर्वदेशस्य।
भाषाजननी मध्ये विभेदलेशोऽपि लोपितस्तेन।।११८४।।

सत्यशिवसुन्दराणां संगमभूतानि काव्यानि।
सहृदयहृदयविहारीण्यारचितानीति को न जानीते।।११८५।।

नव-रसमयभणितीनां नाना सत्प्रेरणाप्रसूतानाम्।
सागर इवाऽप्रमेयः सत्यमयं भारतेन्दुरेवाऽसीत्।।११८६।।

यैर्नकदाचिद् दृष्टस्तैरनुभूतः सदा निकटे।
असमं मित्रमिवास्ते भारतवर्षे हरिश्चन्द्रः।।११८७।।

निजभाषासेवार्थं समाजरक्षाविधानार्थम्।
प्रतिभाप्रभाप्रकृष्टं रचितं सन्मित्रमण्डलं तेन।।११८८।।

स्वीयं विपुलं तादृशमैश्वर्यं राष्ट्रसेवार्थम्।
हिन्दीसेवाकार्ये निखिलं नूनं समर्पितं तेन।।११८९।।

गरलं निपीय नूनं सुधावितरणं समाजमध्ये यत्।
श्रीविश्वनाथचरितं तन्नूनं भारतेन्दुनाऽधिकृतम्।।११९०।।

राष्ट्रस्वतन्त्रतायाः कृते यदान्दोलनं जातम्।
तन्मूले ये पुरुषास्तेष्वसमोऽयं हरिश्चन्द्रः।।११९१।।

देशस्य राष्ट्रभाषां गुणगणनमितां समृद्धिसंपूर्णाम्।
नित्यनवीनोत्साहैरारचितां यः प्रपूजयामास।।११९२।।

देशस्य मङ्गलानां संस्कर्ता जागरूकोऽयम्।
संस्कारैरापूर्णः प्रियो वदान्यो हरिश्चन्द्रः।।११९३।।

आंग्लानां गुणभागान् स्वीकृतवान् यः समुन्नतये।
भाषापत्रप्रकटनकार्यं तूर्णं समारब्धम्।।११९४।।

वाराणसीप्रकाशाद् दिव्यहरिश्चन्द्रचन्द्रिकामेकाम्।
सत्पत्रिकां सुतामिव स्वीयां संवर्धयामास।।११९५।।

पुनरपि भव्यं पत्रं स्वीयहरिश्चन्द्रमैगजीनाख्यम्।
सम्यक् प्रकाश्य नूनं नव्यां धारां प्रवाहितवान्।।११९६।।

एतादृशलोकोत्तरगुणप्रकर्षेषु संलग्नः।
स्वल्पेऽप्यायुषि सम्यग् लोकोत्तरतां प्रसाधितवान्।।११९७।।

सामाजिकसत्कार्येष्वसमोऽयं जागरूकः सन्।
लेखनभाषणकार्यैरुत्साहं वर्धयामास।।११९८।।

बलियानगरे भाषणमनेन यद्दत्तमद्यापि।
तत्प्रेरणां प्रकुरुते पठितं पठितं पुनः-पुनः पठितम्।।११९९।।

सर्वस्मिन्नपि देशे विद्वांसो लेखका नूनम्।
ग्रन्थैर्महाप्रबन्धैर्गायन्त्येतस्य गुणगणान् भक्त्या।।१२००।।

एतस्यैव निकामं हृद्यं तन्नाट्यसाहित्यम्।
अभिनेतृणामभिनयकार्येष्वाधारतां यातम्।।१२०१।।

मुद्राराक्षसनाटकविरचनवेलासमुल्लसितः ।
दिव्यं विशाखदत्तं नूनमसौ धारयामास।।१२०२।।

शतशो मञ्चितमेतन्नाट्यं देशस्य मञ्चेषु।
चाणक्यस्य सफलतां राष्ट्राधारां प्रकाशयति।।१२०३।।

यण्यङ्चेरापूर्णं तन्नाटकमन्धेरनगरीति।
दृष्टं यदैव नु तदा विनोदलहरीं प्रसारयति।।१२०४।।

अन्यन्नाटकमेकं भारतदेशस्य दुर्दशाख्यं यत्।
तद् दृष्ट्वा च पठित्वाऽन्दोलितमेवास्ति सहृदयं हृदयम्।।१२०५।।

एवं विधचैतन्यैरापूर्णं नाट्यसाहित्यम्।
श्रीभारतेन्दुहृदयं संसारे संप्रकाशयामास।।१२०६।।

छन्दोमयसंसारे विचरन् काव्यानि दिव्यानि।
संरचयन् संसारं रसपरिपूर्णं सुसाधितवान्।।१२०७।।

प्राचीनं साहित्यं विचारयन् नव्यभावेषु।
जनजनहृदयस्पन्दनशैलीमसमां प्रसाधितवान्।।१२०८।।

भक्तौ नवमाधुर्यं हासोल्लासो विनोदचातुर्यम्।
नूतनतासौभाग्यं सर्वं श्रीभारतेन्दुलेखनी धत्ते।।१२०९।।

देशस्य विकासार्थं स्वतन्त्रताऽवाप्तये नित्यम्।
नव नव भावेन्मेषं प्रकटीकुरुतेऽस्य लेखनी दिव्या।।१२१०।

नानानिबन्धमाला सत्यं सत्प्रेरणापुञ्जा।
विज्ञानोन्मेषाणां प्रभाप्रभावेण सन्दीप्ता।।१२११।।

यात्रा विवरणवर्णनमेतेनैव प्रकाममादिष्टम्।
साहित्य-सबलधारामग्रे नव्यां प्रवाहयामास।।१२१२।।

श्रीभारतेन्दुरसमः सेनानी सत्यसन्धोऽसौ।
सर्वैर्विदां वरेण्यैः सम्पूज्यो माननीयश्च।।१२१३।।

चतुर्थद्वीपः

६३. वृन्दावनम्

सर्वेषां सौख्यानां सारामृतसारसर्वस्वम्।
श्रीकृष्णकीर्तनीयं धन्यं वृन्दावनं धाम।।१२१४।।

निखिलब्रह्माण्डानामाध्यात्मिकमूलभूतं यत्।
विलसति यमुनातीरे तदिदं वृन्दावनं धाम।।१२१५।।

गेहे गेहे राधाकृष्णमयं मानसं यत्र।
अधरीकुरुते स्वर्गं तदिदं वृन्दावनं धाम।।१२१६।।

सर्वेऽप्यत्र चरन्तः सन्तः सच्चिन्मयाकाराः।
कृष्णऽनन्दनिमग्नास्तदिदं वृन्दावनं धाम।।१२१७।।

राधामाधवलीलाचरितानां गायनं यत्र।
सायुज्यमोक्षालभं वितरति वृन्दावने धाम्नि।।१२१८।।

नाना जन्मोपार्जितपुण्यैर्यद् दर्शनं लभ्यम्।
श्रीकृष्णचरणरेणुर्विलसति वृन्दावने धाम्नि।।१२१९।।

देवा नित्यं यात्रां कृत्वा यत्र प्रमोदन्ते।
सर्वान् सर्वं यच्छति तदिदं वृन्दावनं धाम।।१२२०।।

तरणितनूजातरणे तारावलिरत्र दृश्यते निखिला।
दिनमणिरपि निजतनयाभाग्यं धन्यं सदा मनुते।।१२२१।।

एषा तमालनीला कदम्बवृक्षैः परिव्याप्ता।
वनपंक्तिरपि नितान्तं सद्भक्तानां विनोदमातनुते।।१२२२।।

श्रीकृष्णचरणरेणुप्रसादपरिपक्वतां याताः।
सन्तो यत्र रमन्ते न काऽपि वाञ्छाऽपराथ तच्चित्ते।।१२२३।।

करुणामयनारायणभूर्येषां मानसे पदं धत्ते।
मुक्तिर्वा भुक्तिर्वा तेषां दासायते सर्वम्।।१२२४।।

वृन्दावनयात्रायां यमुनामध्ये निमज्जनं येषाम्।
ते वै निरञ्जनपदं देहेऽस्मिन्नेव सम्प्राप्ताः।।१२२५।।

लोकाः सर्वेऽप्यथ ते सर्वे ते लोकपाला वा।
कैङ्कर्ये तिष्ठन्तो यत्राऽहोभाग्यतां यान्ति।।१२२६।।

पाराशर्यनिगदितं भागवतं नाम पीयूषम्।
कर्णैराचामन्तो धन्या नूनं परं धन्याः।।१२२७।।

श्रीपद्मनाभगाथामृतपानेन प्रमत्तानाम्।
अग्रे निखिलं तृणवत् संजातं वैभवं सुरेन्द्राणाम्।।१२२८।।

विहरति यत्र विहारी वृन्दारकवन्दनीयपदरेणुः।
भक्तानां हृन्मध्ये मधुरं मधुरं समालपति।।१२२९।।

यत्र पुरातन चिह्नान्यद्याप्यायान्ति लोचने तेषाम्।
येषां निर्मलमानसमध्ये नारायणो लसति।।१२३०।।

नित्यनवीना सरणिर्भक्तानामुल्लसति यत्र।
प्राक्तनमप्यति-नूत्नं तदिदं वृन्दावनं धाम।।१२३१।।

शंकरभगवत्पादैः श्रीमद्रामानुजाचार्यैः।
प्रभुवरवल्लभवर्यैः सेवितमेतच्चिरं धाम।।१२३२।।

मध्वाचार्यवरेण्यैर्मधुसूदनवन्द्यपादैर्वा ।
श्रीगौरांगमहाप्रभुसेवितमेतच्चिरं धाम।।१२३३।।

सर्वैर्धर्माचार्यैर्विद्वद्वर्यैस्तथा च दार्शनिकैः।
वैभवमत्र विलोकितमास्ते विपुलं तथा नित्यम्।।१२३४।।

षोडषकलाऽवतंसः श्रीकृष्णो यत्र योगेशः।
संक्रीडते निकामं तदिदं वृन्दावनं धाम।।१२३५।।

श्रीराधायाश्चरणे निपतति तस्याः प्रसादमभिकांक्षन्।
श्रीकृष्णो योगीश्वरवन्दितचरणश्चिरं यत्र।।१२३६।।

भगवत्या राधाया वैभवमत्रैव दृश्यते विपुलम्।
त्रैलोक्यैक-स्वामी कृपाकटाक्षं समीहते तस्याः।।१२३७।।

यत्र हि युगलकिशोरप्रणयप्राङ्गणमयी भव्या।
भक्तानां हृदयाब्जे धारा वृन्दावने जयति।।१२३८।।

चिरयुगलमपि तदेतच्चिरविरहं वा सहैव संभजते।
संयोगविप्रलम्भे माधुर्य नित्यमुल्लसति।।१२३९।।

सुचिरं कृतशर-सन्धिः साक्षाद्वा कामदेवोऽपि।
भग्नं कुरुते स्वीयं धनुरद्यापि स्वभक्तिसंलग्नः।।१२४०।।

घोरेऽस्मिन् कलिकालेऽप्यतिशयभीतः कलिर्यत्र।
दूरे तिष्ठन् प्रणमति भक्तजनानां चरणरेणूः।।१२४१।।

कलिवात्याऽवर्तेस्मिन् शकटासुरवत्प्रवर्धमानेऽपि।
चिन्ता न काऽपि कार्या यतो मुकुन्दः समुल्लसत्यत्र।।१२४२।।

श्रद्धा विश्वासाभ्यां सम्पुष्टा भक्तिनवधारा।
वृन्दाऽरण्ये निखिले लोकं सर्वं विनिर्मलं कुरुते।।१२४३।।

वृन्दावने प्रविष्टा मनुजाः पशुपक्षिणश्चान्ये।
जीवा जडा अपि पुनर्धन्या धन्या न सन्देहः।।१२४४।।

पापप्रथाप्रशान्तिः श्रीकृष्णस्य प्रभासमवलम्बात्।
क्षणमात्रेणैवाऽस्मिन् भूभागे सर्वसुलभास्ते।।१२४५।।

वत्सरसहस्रशतशतचलिता धारा कलिन्दकन्यायाः।
श्रीयमुनाया लोचननिपात-मात्रेण तापमाहरते।।१२४६।।

लोकोत्तरसौगन्धिकमालाभिः पूज्यमानोऽत्र।
विविधैस्तथोपचारैः श्रीकृष्णः प्रीतिमान् भवति।।१२४७।।

क्षणमात्रेण चरणयोर्ध्याने जाते मुकुन्दस्य।
सर्वा क्लान्तिर्गच्छति जन्मसहस्रार्जिताऽपि वा सा स्यात्।।१२४८।।

वृन्दावनस्य सुषमासौभाग्यं वर्णयेत् को वा।
व्यासः साक्षाद् भगवान् गद्गदभावं परं प्राप्तः।।१२४९।।

कारागारे श्रीमत्या देवक्या स्वां जनिं लब्ध्वा।
पुनर्यशोदां गत्वा कृष्णो द्वैमातुरो जातः।।१२५०।।

श्रीचैतन्यमहाप्रभुरत्रागत्यात्मभावेन ।
श्रीकृष्णाख्ये तेजसि सततं सन्तिष्ठते लीनः।।१२५१।।

गोस्वामिप्रवराभ्यां श्रीरूपश्रीसनातनाभ्यां वा।
तदिदं वृन्दारण्यं वैकुण्ठत्वेन सन्दृष्टम्।।१२५२।।

रसखानकाव्यरचना कालिन्द्याः कूलमुल्लिख्य।
स्वीयाऽमरत्व-भावे नूनं संस्थापिता जाता।।१२५३।।

ब्रजभाषाविनिबद्धं धन्यस्यैवाऽथसूरदासस्य।
लोकातीतं काव्यं कस्य न चेतो हरति नित्यम्।।१२५४।।

वृन्दावनस्य शोभां कवयन् श्रीसूरदासोऽयम्।
भाषा-काव्याऽकाशे सत्यं सूर्यः सुसञ्जातः।।१२५५।।

गणनातीताचार्यैर्भक्तैर्विद्वद्वरेण्यैर्वा ।
वृन्दावनसेवायामहमहमिकया प्रवृत्तमेवाऽसीत्।।१२५६।।

असितगिरेस्तुल्या यदि मसीभवेत् सिन्धुपात्रे सा।
सा कल्पवृक्षशाखा यदि लेखिन्येव बोभूयात्।।१२५७।।

सकला चेयं पृथिवी पत्रस्थानं भवेत् प्राप्ता।
वाग्देवी सा सर्वं कालं दद्याद् स्वलेखने धन्या।।१२५८।।

वृन्दावनगुणगणना तदापि नेयं समाप्तिमागच्छेत्।
सर्वाऽमरैर्वरेण्यं तदिदं वृन्दावनं धाम।।१२५९।।

वृन्दावनं नवनवं नित्यं नवनवायमानतारुण्ये।
विस्मितशोभं यमुना तरंगितं राजते भुवने।।१२६०।।

वृन्दावनस्य मध्यात् किञ्चिन्मात्रं कणं नीत्वा।
धाता सृजते नूनं ब्रह्माण्डानां परम्परा निखिलाः।।१२६१।।

वृन्दारण्यस्वामी निखिलं रूपं विधारयति।
स्वीयाऽराध्यां देवीं राधामाराधयति यत्र।।१२६२।।

राधयते या सर्वं मनोमुकुन्दस्य सा यत्र।
नित्यं युक्ताऽप्येषा विरहे तपते मुकुन्दस्य।।१२६३।।

'हा माधव' इति निगदति राधा विरहाकुला यत्र।
हे राधे'ति मुकुन्दोप्यतिशयविरहं तनोति युक्तोऽपि।।१२६४।।

प्रेम्णः परमाकाष्ठा योगवियोगौ समौ यत्र।
परमात्मनोऽथ तस्य च तस्याश्चैवादिशक्तेर्वा।।१२६५।।

सेयं चरमाकाष्ठा प्रेम्णो रसराजतां याता।
वृन्दावनस्य कुञ्जे रासं नित्यं समातनुते।।१२६६।।

संयोगविप्रलम्भौ सर्वैरन्यै रसैः परं पुष्टौ।
त्रैलोक्यनाथरासे वृन्दारण्ये प्रसादमायातौ।।१२६७।।

श्रुतिरपि निगदति नित्यं रसस्वरूपं परं परामृशती।
निश्चप्रचं तदेतत् स एव कृष्णो रसोऽस्त्येकः।।१२६८।।

इत्येव घोषयन्ती रासाऽख्यं तद् रहस्यसंस्पृष्टम्।
वृन्दावनान्तरंगे सुषमासारं विबोधयते।।१२६९।।

वृन्दावनसंलापानन्दं सर्वस्वमुज्झित्य।
विपरीते विरमन्तः सन्तो वा भाग्यहीना वा।।१२७०।।

करगतबदरीसदृशं सर्वं विश्वं समुल्लसति यत्र।
वृन्दावनं तमेनं कोऽधन्यो नो निषेवेत।।१२७१।।

सर्वस्वं जीवानां भूलोके विद्यते विपुलम्।
त्रैकालिकं मनोज्ञं तदिदं वृन्दावनं धाम।।१२७२।।

नानापुराणनिगमागमवर्णननैपुणीं यातम्।
विश्वविमोहनशीलं तदिदं वृन्दावनं धाम।।१२७३।।

दुःखाऽगाधसमुद्रे निमज्जतामाश्रयीभूतम्।
परमचमत्कृतिपुञ्जं तदिदं वृन्दावनं धाम।।१२७४।।

दुग्धं दधि नवनीतं धाराबद्धं समुच्छलति यत्र।
साराऽमृतं च तदिदं सर्वं वृन्दावनं धाम।।१२७५।।

अधुना मधुमयभावोच्छलिताभिर्दिव्यलहरीभिः।
संयोजयति नितान्तं तदिदं वृन्दावनं धाम।।१२७६।।

विश्वप्रेमवशीकृतसंलापैः सत्कथाऽलापैः।
नित्यप्रवाहयुक्तं तदिदं वृन्दावनं धाम।।१२७७।।

स्वामिश्रीहरिदासो मोहिनि देवोऽपि राजते यत्र।
तदियास्थानं दिव्यं तदिदं वृन्दावनं धाम।।१२७८।।

आन्तरिकभावनानां साम्राज्यं विस्तृतं यत्र।
प्रीतिसमुद्रोन्मथितं तदिदं वृन्दावनं धाम।।१२७९।।

विश्वविमोहनशीलं सर्वं कल्याणदं पुण्यम्।
देवैरहमहमिकया काम्यं वृन्दावनं धाम।।१२८०।।

देशविदेशोन्मेषप्रवाहधारासमाश्लिष्टम् ।
श्रीकृष्णचरितचर्चा सुभगं वृन्दावनं धाम।।१२८१।।

कलिवात्याभिः संस्थितमतिदूरे सत्प्रभादीप्तम्।
दिव्याऽरण्यमुनीनां गमकं वृन्दावनं धाम।।१२८२।।

शान्तिसमेधितसुषमासम्पूर्णं सत्प्रतिष्ठितं दिव्यम्।
दिव्यावदानपूर्णं तदिदं वृन्दावनं धाम।।१२८३।।

श्रीकृष्णचरणवन्दनमभिलाषीकृत्य संततं पतितैः।
ब्रह्मोपेन्द्रमहेन्द्रैर्भरितं वृन्दावनं धाम।।१२८४।।

यत्राऽगत्य जनानां सञ्जातो ह्यान्तरोन्मेषः।
गूढार्थदर्शकं तद् जयति तु वृन्दावनं धाम।।१२८५।।

सेवाकुञ्जसुसेवासम्मिलिता यत्र देवा वा।
श्रीराधापरिचारकभूता वृन्दावने धाम्नि।।१२८६।।

सर्वोत्सवभूमिरियं नानाविधसौख्यमयदृश्यम्।
सर्वैः क्षणैर्विचेयं तदिदं वृन्दावनं धाम।।१२८७।।

श्रीमद्भागवतस्य च कथा सदा जायते यत्र।
व्याख्यायन्ते श्लोकास्तदिदं वृन्दावनं धाम।।१२८८।।

यत्र परमहंसानां मोदितविभवाश्च सञ्चाराः।
श्रीकृष्णचरणरेणुप्रकर्षयुक्ता विजायन्ते।।१२८९।।

अद्यापि सर्वविधतत्कलाविलासैः परिव्याप्तम्।
सर्वाकर्षणशीलं तदिदं वृन्दावनं धाम।।१२९०।।

कामगवी कामानां सर्वे वृक्षाश्च काममयदेहाः।
संक्रमराजितगेहा यत्र तु वृन्दावनं धाम।।१२९१।।

मनसा वाचाऽगोचरसौभाग्यं यस्य सद्रूपम्।
पर्वतराशिविभूषितमेतद् वृन्दावनं धाम।।१२९२।।

साङ्गः सायुधवर्गः परिवारैः कोटिभिर्युक्तः।
श्रीकृष्णः कृतवसतिर्यत्र तु वृन्दावनं धाम।।१२९३।।

एतस्य कलामात्रं सर्वे वा नगरधौरेयाः।
उपजीवन्ति नितान्तं तदिदं वृन्दावनं धाम।।१२९४।।

सर्वौषधाऽमृतमयी भूरियमाभाति परितोऽपि।
नैकशतवार्षिका अपि सन्तो निभृता विराजन्ते।।१२९५।।

राधाकृष्णपदाम्बुजकिञ्जल्कोन्मादविस्मृतस्वान्ताः ।
सन्तो निर्जितकामास्तदिदं वृन्दावनं धाम।।१२९६।।

निखिलैश्वर्यं यच्छति यत्रत्या भक्तिमययात्रा।
सर्वा समृद्धिसुलभा तदिदं वृन्दावनं धाम।।१२९७।।

यत्र च कलिन्दजायाः कूले विहरन्सदैव सन्मनुजः।
भक्तावोतप्रोतस्तदिदं वृन्दावनं धाम।।१२९८।।

ब्रजनाथो यत्र गतोऽनुमतो शिवनाथ विश्वनाथाभ्याम्।
श्रीमत्सुरेशनमितस्तथा रमेशेण धन्यतां गमितः।।१२९९।।

भक्तेर्नवमन्दाकिनिधारायां ये निमज्जन्तः।
विधिविलसितसौभाग्यास्तेषां वृन्दावनं धाम।।१३००।।

नानाजन्मसमर्जितपुण्योपायेन यल्लभ्यम्।
भूमीभूषणभूतं तदिदं वृन्दावनं धाम।।१३०१।।

सर्वब्रह्माण्डानां मूलं गोलोकमयरूपम्।
परमे व्योमनि संस्थं तदिदं वृन्दावनं धाम।।१३०२।।

काशीप्रयागसुभगा साऽयोध्याऽसौ जगन्नाथः।
श्रीबदरीनाथोऽपि च सर्वेऽप्यत्रैव संस्थिता नित्यम्।।१३०३।।

सर्वेश्वरस्य रूपं समुज्ज्वलं यस्तु नीलमणिः।
कोटिकचन्द्रकलायुतश्रीराधासंगतो यत्र।।१३०४।।

श्रीमद्विहारिमन्दिरमध्ये सन्दर्शनस्य संस्फूर्तिः।
भक्तिर्दासीभूत्वा सर्वानन्दान् विधारयति।।१३०५।।

श्रीरङ्गमन्दिरं तद् विपुलं सौवर्णिकैर्युक्तम्।
स्थापत्ये साम्राज्योन्मेषो यत्राऽथ संस्फुरति।।१३०६।।

गोदामन्दिरमतिशयरम्यं शतशः प्रतिमसंयुक्तम्।
दर्शकचेतोहरणे नव्यतमं भावमादिशति।।१३०७।।

अंग्रेजमन्दिरं तन्नूतनं गौरांगभक्तिसंयुक्तम्।
वेदान्तप्रभुपादे विशेषतो यत्र भक्तिरुल्लसति।।१३०८।।

पागलबाबामन्दिरमस्तीदं सुबहुमूर्तिभिर्युक्तम्।
सर्वविधं सौभाग्यं लोचनयुगलस्य धारयति।।१३०९।।

श्रीमथुरास्थितजन्मस्थानं कृष्णस्य नूतनत्वे वा।
विलसति नानाभास्वरसंभारैर्भूषितं विपुलम्।।१३१०।।

सेयं मथुरा नगरी सप्तपुरी परिगणितविभावाभा।
श्रीवृन्दावनपार्श्वे श्रीकृष्णं ध्यायतीव हृदयेशम्।।१३११।।

कोटिब्रह्माण्डानामुत्पादयिता च पालयिता।
संहर्ताऽपि च तेषां जन्म स्वयं यत्र वा लेभे।।१३१२।।

कलियुगमेतद्यद्यपि कंसभयं शैशुपालभयम्।
श्रीकृष्णे धृतकाये चिन्ताऽस्मान्दूरतस्त्यजति।।१३१३।।

सर्वं सदा विनष्टं भविष्यतीति प्रतीतं नः।
श्रीकृष्णस्तु स भगवान् सततं स्थास्यति न सन्देहः।।१३१४।।

६४. गोसेवा

परितोऽपि मे भवन्त्विति श्रीकृष्णेनाभिवाञ्छिता यासाम्।
सन्निधिरेता नित्यं नवजीवनसंगता गावः।।१३१५।।

वेदानामपि मध्ये यासां महिमा विराजते शुभ्रः।
देवा अपि यासां वा वपुषि विराजन्ति ता गावः।।१३१६।।

भारतसंस्कृतिमध्ये सबलनिषेकोऽभवद् यासाम्।
ताः सर्वपूतकाया विश्वस्मिन् वन्दिता गावः।।१३१७।।

कमनीयतमं रूपं मानुषवपुषो विराजते निखिलम्।
यत्कृपया ता एताः पूज्यतमाः सन्ति नो गावः।।१३१८।।

याज्ञे कर्मणि नित्यमेतद्देशस्य सर्वस्वे।
यासां विना पदमपि नो गन्तुं पार्यते गावः।।१३१९।।

पूततमेयं संस्कृतिरद्यत्वेऽपि प्रतिष्ठिता लोके।
तत्र तु मूलं निखिलं ता एता मातरो गावः।।१३२०।।

सर्वविधं मलजातं धार्मिक-कार्येषु संग्राह्यम्।
तादृश्यस्ता एव हि संसारे मातरो गावः।।१३२१।।

विश्वविमोहनमूर्तिर्यासां दूरीकरोति पापानाम्।
पटलीं दर्शनमात्रे ता एताः सन्ति मातरो गावः।।१३२२।।

रघुवंशमहाकाव्ये रघुगाथायां लसन्ति याः सुषमाः।
तत्राऽपि मूलसूत्रं ता एताः सन्ति मातरो गावः।।१३२३।।

सद्यो जाते बाले यासां दुग्धं सुधा भवति।
मानवसंकायेऽस्मिन् सर्वोपरि मातरो गावः।।१३२४।।

काव्यमये संसारे नवता याऽसौ विलोकिता भवति।
सर्वस्या अपि तस्याः समुद्भवा मातरो गावः।।१३२५।।

निखिलायां मेदिन्यां सुषमा यासां सुगन्धिमातनुते।
नानावर्णविनिर्मितकायास्ता मातरो गावः।।१३२६।।

यासां संरक्षार्थं राज्ञामासीद्धनं विपुलम्।
कायश्चाथ समेषां तेषां ता मातरो गावः।।१३२७।।

यासां गुणगणनायां पाश्चात्यो जायते शेषः।
नवनवगुणगणभरितास्ता एता मातरो गावः।।१३२८।।

मानोन्नतिर्यदीया विश्वस्मिन् सर्वतो वन्द्या।
मानवरक्तकणानां मध्ये ता मातरो गावः।।१३२९।।

यासां दर्शनमात्रं पापानां लोपकं भवति।
शुद्धे भावोद्रेके ता एता मातरो गावः।।१३३०।।

दिव्यपयोधरभूताश्चतुःसमुद्रा भवन्ति यासां ताः।
परितो महत्त्वपूर्णाः सत्यं सन्त्येव मातरो गावः।।१३३१।।

छायेव महीपतयो यासां सेवासु संलग्नाः।
वन्दितविभवैर्युक्तास्ता एता मातरो गावः।।१३३२।।

नद्यः पूततमास्ता यासां सुषमा समुद्भूताः।
निर्मलरसमयधारा संयुक्ता मातरो गावः।।१३३३।।

सत्ये विश्वे रूपे यासां रूपाण्यनन्तानि।
दृष्टान्येव समन्तात्ता एता मातरो गावः।।१३३४।।

मानुषमातुर्नियतं मलपरिरम्भस्तु नो कार्यः।
मनुजेन, किन्तु कार्यस्तासां ता मातरो गावः।।१३३५।।

मानुषमातुर्मूत्रमस्पृश्यं स्नानसापेक्षम्।
किन्तु यदीयं पेयं सत्यं ताः सन्ति मातरो गावः।।१३३६।।

यासां खुरगतपांसुः स्वर्गाणां दायको भवति।
सर्वमभीष्टं यच्छति ता एता मातरो गावः।।१३३७।।

यासां शृंगविभूषा संसृष्टेर्मानचित्रमिव।
ऋषिभिर्मन्त्रे दृष्टास्ता एता मातरो गावः।।१३३८।।

सर्गस्थितिलयकर्ता कृष्णो गोपालतां गमितः।
नो गण्योऽसौ महिमा यासां ता मातरो गावः।।१३३९।।

विश्वामित्रवसिष्ठप्रवादमध्ये समागता यासाम्।
गाथा नित्यनवीनास्ता एता मातरो गावः।।१३४०।।

यत्सेवनवन्दनपरिचर्या निखिलेष्वभीष्टदा भवति।
जात्यादिदोषहीनास्ता एता मातरो गावः।।१३४१।।

वाचां विस्तारोऽयं विभवो वा तादृशः सुकरः।
यासां दर्शनमात्राल्लभ्यस्ता मातरो गावः।।१३४२।।

ब्राह्मणगोवंशानां समुद्भवश्चैककुलमूलः।
यज्ञार्थहवीरूपं यत्र तु ता मातरो गावः।।१३४३।।

यासां संसेवार्थं ब्रह्म तु पुरुषोत्तमो जातः।
सर्वविधशक्तियुक्तास्ता एता मातरो गावः।।१३४४।।

जन्मोत्सवसमयानां यासां दानेषु भव्यता दृश्या।
प्राचीनास्ता गाथा यासां ता मातरो गावः।।१३४५।।

मन्त्रमयसिद्धिरूपास्ता एता भान्ति पुरतोऽपि।
सर्वविधशान्तिदात्र्यस्ता एता मातरो गावः।।१३४६।।

प्राणाहुतिपर्यन्तं रक्षा विहिता दिलीपेन।
यशसां राशिर्लब्धस्ता एता मातरो गावः।।१३४७।।

सर्वा समाजरचना देशेऽस्मिन्सा यदाधारे।
संजाता कल्याणी ता एता मातरो गावः।।१३४८।।

मैथिलजनकसभायां यासां ग्रहणेन याज्ञवल्क्यर्षिः।
सन्दीप्तोऽभून्नितरां ता एता मातरो गावः।।१३४९।।

निम्नतमेऽस्मिन् कलियुगकाले जागर्ति यत् पुण्यम्।
सर्वस्य तस्य शोभा यासां ता मातरो गावः।।१३५०।।

ज्ञानं भक्तिः कर्म च सर्वं यासां समाश्रयेणैव।
नितरां सिद्ध्यति काले ता एता मातरो गावः।।१३५१।।

यासां संज्ञामात्रं सर्वार्थानां प्रदायकं भवति।
सर्वाङ्गास्ताः कथमिव कथ्यन्तां मातरो गावः।।१३५२।।

सर्वे धर्माचार्या यासां सेवाऽमृतेन सन्तुष्टाः।
वीराणां पुरुषाणां ता एताः कीर्तयो गावः।।१३५३।।

साक्षात् स्रोतस्विन्यस्ता वा विज्ञान-धाराणाम्।
संकथ्यन्तां कथमिव ता एता मातरो गावः।।१३५४।।

दधि गव्यं नवनीतं गव्यं गोदुग्धमथ गव्यम्।
गोमूत्रं तद् गव्यं गोमयगव्यप्रदा गावः।।१३५५।।

गो चर्मणि-गोमांसे या चेयं कुत्सिता दृष्टिः।
पापीयसी तु मज्जा दृष्टिः केषांचिदद्य संदृष्टा।।१३५६।।

तेषामेषामपि तां परिपूरयितुं कुपालुतादृष्टिः।
यासां ता एवैताः परिपूर्णा मातरो गावः।।१३५७।।

संसारे पापानां गणना नास्तीति यद्विदितम्।
ते पापमयाः पुरुषा गोहत्या सञ्चयो येषाम्।।१३५८।।

ते स्वात्महानिमसमां प्रदर्शयन्तोऽपि नो तुष्टाः।
अन्यानप्यवशिष्टान् स्वीये पापे प्रणोदयन्त्येव।।१३५९।।

गोमांसविक्रयाणां कर्तारो दैत्यरूपास्ते।
धिक्कारास्तान् सर्वान् नराधमान् थूत्कृतिस्तेभ्यः।।१३६०।।

ये गोहत्यापापे पारम्परिकेऽपि संलग्नाः।
धिक् तान् वारं वारं धृणास्पदास्ते न सन्देहः।।१३६१।।

घोराद् घोरतरं यद् धोरतमं चापि यत्पापम्।
तद् गोहत्यापापात् कोटिगुणां न्यूनतां भजते।।१३६२।।

सन्ततिरप्यथ तेषां जाता पापीयसी सर्वा।
गोब्राह्मणहितकर्ता गोपालस्तान् सुशिक्षयिष्यति वा।।१३६३।।

आयास्यति गोपालश्चक्रं धृत्वा सुदर्शनं स्वकरे।
गोहत्यासंलग्नान्नराधमान् शिक्षयिष्यति वै।।१३६४।।

शासनतन्त्रे सर्वे पापेऽस्मिन्निष्क्रिया जाताः।
नूनं कलिमलधारा सर्वं तूर्णं मलमयं कुरुते।।१३६५।।

यस्मात् कालाद् भारतबाह्या संस्कृतिरिहाऽयाता।
शासनकर्मपरीता तस्मात् कालात्तु पापमिदम्।।१३६६।।

अतिशय-दुर्दमनीयं संप्रारब्धं नितान्तमस्वर्ग्यम्।
नरकप्रदं तु घोरं सर्वसमृद्धिप्रणाशकरम्।।१३६७।।

भारतबाह्या एते जाङ्गलिकाः शोभनैस्तु संस्कारैः।
नितरां हीनाः कथमिव स्वीकुर्युर्धार्मिकं मार्गम्।।१३६८।।

अर्थे वा कामे वा नितरां मग्नास्तु दाम्भिका एते।
धर्मस्यापि सुरक्षां कुर्वन्त्यथ कामसम्पूर्त्यै।।१३६९।।

अन्नमयं सौम्य-मनो यद्यद्वाऽप्यद्यते तदेवान्नम्।
गोमांसाशनशीलास्तादृशमेवाऽभिधारयन्ति मनः।।१३७०।।

तादृशशासनपुष्टा एते चाप्यद्य देशीयाः।
कथमिव वा तद्भिन्नं मनसो रूपं विजानीयुः।।१३७१।।

एकेनाऽपि तदात्वे पाण्डेयेनैव यत्कृतं कर्म।
सांसारिकेतिहासे तद्वै स्वर्णाक्षरैलिखितम्।।१३७२।।

सन्त-विनोवाभावे स्वात्मानं यः समर्पितवान्।
गाथा नवतां गमिता प्राचीना भारतीयानाम्।।१३७३।।

गोहत्याकर्मणि ये प्रत्यक्षतया परोक्षरूपे वा।
संलग्नास्तेषामथ सन्ततिरपि निरयमाप्नोति।।१३७४।।

कामं केषांचित् सा धनवृद्धिर्हिंसयाऽथ गवाम्।
संजाता तेषामथ नामापि विलोपितम् भवति।।१३७५।।

रावणकंसादीनां गोब्राह्मणहिंसकानां वा।
निजतनयाय न कोऽपि तु नामापि ददाति सम्बुद्धौ।।१३७६।।

पार्यन्तिके च काले सर्वबले शेषतां गमिते।
गोहिंसाऽख्यं तदिदं कर्म तु मृत्युं विदूषयति।।१३७७।।

नैवाऽस्ते काचिदियं मिथ्यारूपा विधारणा सर्वा।
मान्यतमानां सरणिर्जातेयं भारतीयानाम्।।१३७८।।

या माता रुद्राणामथ च वसूनां हि या दुहिता।
पीयूषस्य च नाभिः सा गौर्वन्द्या जगन्माता।।१३७९।।

सा जन्मभूमि-सदृशी नहि नहि सा वै ततोऽप्यधिका।
यद्रक्षायां लग्नं साकारं तत् परं ब्रह्म।।१३८०।।

केषामपि जीवानां पापानां घोररूपाणाम्।
वृद्धिरतीवोत्कृष्टा सञ्जायेतेति हिंसनं तासाम्।।१३८१।।

वेदेष्वथ च पुराणेष्वास्ते व्याप्तो गवां महिमा।
अवतारा आचार्याः सर्वे गोरेणु-रूषिता जाताः।।१३८२।।

गोशब्दस्यार्थानामपि संख्या विपुलतां याता।
आवेदयति नितान्तं गोशब्दस्यार्थगाम्भीर्यम्।।१३८३।।

गोभक्तानां काचिद् परिस्थितिर्विद्यतेऽथ विषमैव।
स्वीयां मातरमपि ये गावं पश्यन्ति दुग्धया दृष्ट्या।।१३८४।।

क्वाऽस्ते सा गोभक्तिः सा त्वद्यत्वे धनग्रहे निपुणा।
गोनामग्रहणस्य व्यापारे सन्धिलग्नास्ते।।१३८५।।

संमानग्रहणार्थं या गोभक्तिः प्रदर्श्यते निपुणैः।
निपुणाभिश्च नितान्तं गोहत्या साधकं न किमु।।१३८६।।

सर्वं सुखमयरूपं परितोऽप्युपभुञ्जमानानाम्।
परिचर्चा-गोभक्तिः काष्ठा-चरमैव दृष्टेयम्।।१३८७।।

एते ननु गोभक्ताः सर्वविधं सुखमयं भोगम्।
भुञ्जाना अपि नित्यं गोरक्षाया व्रतं दधति।।१३८८।।

पाखण्डानां सेयं चरमाऽवस्था पुरस्थितैवास्ते।
नहि नहि कोऽपि हि शक्तो वक्तुं तेषां रहस्यमयरूपम्।।१३८९।।

इयमतिजरठा काचिन् नवबालाभिः समं समस्तेषु।
धनिकेषु गवां भक्तिं कथयति धनसंग्रहायैव।।१३९०।।

अयमथ वकगोभक्तस्तिष्ठति सर्वत्र सर्वाग्रे।
यत्राऽस्ते गोभक्तिव्याख्यानं सोऽप्यसौ तत्र।।१३९१।।

शोभनभाषणकाले करतलतालीप्रदानसंलग्नः।
नूनं द्रविणं वाञ्छति गोरक्षां तां परां कर्तुम्।।१३९२।।

रे रे लोकाः किमवच्छिन्नं नाद्याऽपि मोहमयजालम्।
एतान् यत् कापुरुषानद्यत्वेप्याश्रयध्वे यत्।।१३९३।।

यदि गवि माता दृष्टा मातृश्रद्धा च जागृता जाता।
सर्वस्वलुण्ठनात्प्राग्गोसेवां स्नेहभक्तियुताम्।।१३९४।।

नूनं तूर्णं हृदये संधार्यैवं प्रवर्तन्ताम्।
येन किमप्यवशिष्टं यत् पुण्यं तत् फलेग्रहि स्याद् वा।।१३९५।।

गोदुर्दशा तु घोरा कदर्थना या गवां क्रियते।
सा सर्वा परिवर्त्या भक्तौ परिपूर्णरूपेषु।।१३९६।।

मातृश्रद्धा यावन्मनसि तथा नैव जागर्ति।
सा श्रद्धा च गवां प्रति यावन्नो धारिता भवति।।१३९७।।

कार्यमये व्यवहारे यावन्नैषा विलोक्यते पुरतः।
तावद् गोसेवाया वाणी सर्वा प्रचारमात्रं स्यात्।।१३९८।।

यत्र च मिलन्ति गावस्तत्रैव स्युः प्रणामपरिपाटीः।
यत् किञ्चिद् वा भोज्यं तासामग्रे निवेदनीयं नु।।१३९९।।

पृच्छा काचन कार्या प्रवर्तनीयं गवां विषये।
स्वल्पाऽयासेनेत्थं गोरक्षा सा समीपमागच्छेत्।।१४००।।

नो वाञ्छन्ति समेषां योगं त इमे प्रचारका धूर्ताः।
तेन तु गोसेवायां श्रेष्ठत्वं तद् विनश्येत।।१४०१।।

नानायानारूढाः नेतारश्चाथवाऽचार्याः।
कीदृशमप्यथ गावं यानारूढं न कृतवन्तः।।१४०२।।

किञ्चिदपि वैपरीत्ये जाते ते चैव सद् गावम्।
लोष्टाश्मकराऽघातैः प्रताडयन्त्येव कालेषु।।१४०३।।

अलक्षिताऽभ्युत्पतना गोहत्यायां चिराल्लग्ना।
निजदेहार्पणदृष्ट्या सर्वेप्येते समालोक्याः।।१४०४।।

तस्मान् न्यूनां भाषां न श्रोष्यन्त्येव ते सर्वे।
तेषां जीवनमूला गोहत्या तान् समीरयत्येव।।१४०५।।

सा पारणा तदीया तत्र च यः शोभनः पन्थाः।
कविकुलगुरुणा दृष्टो नान्यः पन्थाऽयनाय द्रष्टव्यः।।१४०६।।

सर्वविधदुःखजातं शीतोष्णोत्थं परं सोढ्वा।
या माताऽस्मान् रक्षति तद्रक्षायै सदाहुतिर्देया।।१४०७।।

तस्मादन्यं मार्गं गोरक्षार्थं य एव संदिशति।
धूर्तवरेण्यो नितरां स्वार्थे लग्नः स मन्तव्यः।।१४०८।।

मामप्येवं छन्दसि विलासवाणीषु शूरं हि।
मा स्वीकुर्वन्तुतरां वा गोरक्षायां कदापि संलग्नम्।।१४०९।।

किन्तु समस्तां गाथां गोरूपे जाग्रतां विलोक्यैवम्।
सा स्थितिरङ्गीकार्या यया परा जायते रक्षा।।१४१०।।

कोऽपि न तिष्ठेत्तादृशपाखण्डे लग्नतामात्रात्।
सर्वश्रेष्ठादरतायुक्तः पूज्यः समाजेषु।।१४११।।

ये या धूर्तवरेण्या नानारूपाणि सन्धार्य।
श्रद्धाया उपयोगे संलग्नास्ते तु धिक् कार्याः।।१४१२।।

मरणादूर्ध्वं तेषां मोक्षस्य तु का कथैवाऽस्ते।
यद्याऽस्ते कोऽपि यमः स एव तान् द्रक्ष्यते सर्वान्।।१४१३।।

सर्वस्वाहुतिदानान्न्यूना नास्त्येव गोरक्षा।
वाचो विग्लापनमथ यदि कार्यं वा यमस्तत्र।।१४१४।।

यद्यपि कलौ युगेऽस्मिन् पाखण्डभ्राजितानि रूपाणि।
काले संशोभन्ते पर्यन्ते निरय एव स्यात्।।१४१५।।

६५. श्रीरामचन्द्रः

रामं नौमि नितान्तं शरणं मनुजस्य निर्मलं नित्यम्।
दासीकृता समस्ता मानवता यत्कृपालेशैः।।१४१६।।

यस्य तु नामस्मरणं विपद्विदलनं करोति नित्यं भोः।
तस्य चरणयुगलं कुरु हृदये शान्तिप्रपत्यर्थम्।।१४१७।।

श्रीरामचन्द्रमूर्तिर्हृदये मणिरिव यदि स्थिता भूयात्।
क्वास्ते विपत्तिताण्डवदावाग्निः क्वाऽथवा दुःखम्?।।१४१८।।

रामस्य स्मितरेखा यदि किञ्चित् स्मृतिपथे सुसंलग्ना।
निखिलानां पापानां संहर्त्री सा क्षणेनैव।।१४१९।।

श्रीरामं विमलतमं नित्यं ध्यायन्ति मनुजा ये।
तेषां सर्वसमृद्धिः करतल-ललिता सुनिश्चिता भवति।।१४२०।।

श्रीरामभद्रमनिशं स्वीयमनोमन्दिरे रक्षन्।
मनुजः कामं सकलां बुद्धिसमृद्धिं विलासयति।।१४२१।।

राक्षसगणाः समन्ताद् येषां विचरन्ति भूयिष्ठाः।
श्रीरामस्मृतिमात्रं तेषां संरक्षणे दक्षम्।।१४२२।।

नैराश्यस्याक्रमणं यदुपरि संजायते घोरम्।
श्रीरामनामजपतो दूरीभूतं भवेत्तद्वै।।१४२३।।

लीलाविग्रहशीलः श्रीरामो हृदयदेशसंलग्नः।
मनसि च वचसि च काये संपूर्णां दीप्तिमातनुते।।१४२४।।

भूयान् कालो यैर्वा व्यतिगमितो व्यर्थ-भावेन।
तेषामपि साफल्यं रामस्मरणेन संजातम्।।१४२५।।

सम्पूज्यः श्रीरामो मनसा ध्येयः समर्चनीयश्च।
यदि साफल्यं काम्यं जीवनकाले मनुष्येण।।१४२६।।

दारिद्र्य-दुःख-शान्त्यै श्रीरामः सेवनीयतमः।
तत्क्षणपरितुष्टोऽयं क्षणमात्रेणैव दहति दारिद्र्यम्।।१४२७।।

चित्तस्य तापशान्ति-र्मनसो नैर्मल्यभावश्च।
सर्वविधासुसमृद्धि-र्लभ्या श्रीरामसेवातः।।१४२८।।

रामः कलिमलमथनः कालुष्यक्षालने नितराम्।
आज्ञां स्वीयाममलां सततं सम्प्रेषयति सदयः।।१४२९।।

श्रीरामस्यैवाज्ञा विचरति लोकेषु मूर्तिमती।
रक्षति साधुसमाजं धूर्तगणान् मूर्छितान् कुरुते।।१४३०।।

यशसां सम्प्राप्त्यर्थं लोकोत्तरकर्म संस्कर्त्तुम्।
श्रीरामचन्द्रसेवा सततं धार्या मनुष्येण।।१४३१।।

सर्वात्मस्नपनं तद् श्रीरामे प्रेम यज्जातम्।
घोरतमां कलिवात्यां निमिषेणैव प्रशामयति।।१४३२।।

रामचरित्रोद्याने विचरन् मनुजः समस्त कालुष्यम्।
दूरीकरोति नियतं रामस्याज्ञा-प्रभावेण।।१४३३।।

मनुजः कियती मात्रा देवा वा दानवाः सर्वे।
पितरो ऋषयः सर्वे रामाज्ञापालने निरताः।।१४३४।।

परम-पवित्र-चरित्रा-वलिभिर्देदीप्यमानं तम्।
श्रीरामं हृन्मन्दिर-मध्ये कुर्वन्नरो धन्यः।।१४३५।।

यस्मिन्देशे काले श्रीरामः संस्फुरेच्चित्ते।
धन्यतमास्ते देशा-स्ते कालाश्चाऽपि धन्यतमाः।।१४३६।।

श्रीरामचन्द्रसेवापरायणानां परा सम्पत्।
संततमाविर्भावं नूत्नं नूत्नं विभासयति।।१४३७।।

बुद्धौ तथा शरीरे नानावचसां प्रचारे च।
साफल्यं भवति तदा यदा हि रामः कृपां समातनुते।।१४३८।।

श्रीरामनाममन्त्रं कलिमलहरणं निखिलपापघ्नम्।
सर्वसमृद्धिकरं तज्जपतो मनुजस्य नास्ति भयलेशः।।१४३९।।

सर्वाभिलाषपूर्तिं श्रीरामः संततं कुरुते।
निश्छलभावध्यातः सन्मार्गं सर्वमादिशति।।१४४०।।

अद्यावधि जीवानां गणना नो ध्यातुमपि शक्या।
ये श्रीरामपदाब्जे मनो निधायैव संतीर्णाः।।१४४१।।

श्रीराममन्त्रजपतः स्वीयं जीवनमहोभावे।
नीतवतां जीवानामग्रे तुच्छं भवति सर्वम्।।१४४२।।

यद्यपि नास्ति समीपे कीदृशमपि वस्तुजातं वा।
विनिवेदयितुं पुरतस्तथापि मनसा प्रकल्पनीयं तत्।।१४४३।।

श्रीरामो चित्तस्थो ग्रहणं कुरुते मनःस्थस्य।
प्रत्यक्षं तत्सर्वं ददाति संकेतमात्रेण।।१४४४।।

पापीयान् देहोऽयं मनस्तथैवाथ भूरिपापीयम्।
सर्वं निर्मलभावे नीतं श्रीराममन्त्रेण।।१४४५।।

भगवन्तं श्रीरामं नित्यं ध्यायन्ति मनुजा ये।
तोषस्तेषामधिको विलीयते चापदां धारा।।१४४६।।

रामचरित्रे मननं चिन्तनमथ यैः कृतं नित्यम्।
वीरा भावास्तेषां हृदये तूर्णं विभासन्ते।।१४४७।।

मालिन्यं यत् पतितं मनसि नितान्तं परिव्याप्तम्।
दूरीभवति समग्रं तत्सर्वं रामनाम्नैव।।१४४८।।

सर्वा निश्चयबुद्धिः प्रदर्शिता येन राममयतायाम्।
कल्याणानां नित्यं परम्परा तत्र जागर्ति।।१४४९।।

श्रीरामचन्द्रचरिते चिन्तन-करणेन सा नित्यम्।
चेतसि विमला स्फूर्तिः सद्यः प्रकरोति रोमाञ्चान्।।१४५०।।

श्रीरामः क्षणमात्रं ध्यातः सद्यो विशोधयति।
कालुष्याणां सरणिं नाना जन्मार्जितानां ताम्।।१४५१।।

श्रीरामभद्रसूर्यो हृदये जागर्ति सद्यश्चेत्।
क्वाऽस्ते तमः-प्रभावः क्वाऽस्ते वा दुःखलेशोऽपि।।१४५२।।

हृत्पुण्डरीकमध्ये भृङ्गायितमेव तं रामम्।
सन्तः सदा स्मरन्तो सर्वां सिद्धिं समश्नुवते।।१४५३।।

सर्वापीयं भूमिर्विहिता पुण्या प्रभावैः स्वैः।
श्रीरामेण तथैवाऽऽन्दोलितमेतज्जगत्सर्वम्।।१४५४।।

सर्वं ददाति रामः पूर्णं कुरुते सदा ध्यातः।
दुःखं चालसभावं सर्वं सद्यो विशोधयति।।१४५५।।

पूर्णपुरातनपुरुषः सदा नवीनो वसन् हृदये।
नवनीलनीरदाभो चरणे दद्यात् समाश्रयं किंञ्चित्।।१४५६।।

विततं येन चराचर-मेतन्निखिलं स्वमायया सहितम्।
तं श्रीरामं शरणं कृत्वाऽस्ते धन्यता जनुषि।।१४५७।।

श्रीरामे कृतकामे वल्लभता स्वीकृता येन।
सद्यस्तस्य विमुक्तिर्जाता क्लेशैश्च दारिद्र्यैः।।१४५८।।

विषमेषुवाण-खिन्नाः पतन्ति ये घोरतमजाले।
श्रीरामादन्यः कस्तानुद्धर्तुं सुसन्नद्धः।।१४५९।।

श्रीरामचन्द्रलीला येषां हृदयेषु जागर्ति।
ते न किमपि कुर्वाणाः कुर्वन्त्यखिलं स्वजीवनं धन्यम्।१४६०।।

रामे सत्यचरित्रे समस्तरूपेषु विश्वस्मिन्।
परितः प्रदृश्यमाणे नास्तितमां कोऽपि भयलेशः।।१४६१।।

कीदृशमपि तद् घोरं शुभ्रं वा कर्ममयजालम्।
श्रीरामार्पितरूपं कल्पद्रुमतां समाप्नोति।।१४६२।।

वसतुतमां श्रीरामो हृदये काये तथा वाचि।
सम्प्रार्थनां सदैव स्वीकुर्यात्कर्मभोगेषु।।१४६३।।

श्रीमद्रामो मनसा ध्यातो नित्यं करोतु सुममृद्धीः।
सम्प्रार्थनां समन्तादपि देवाः कुर्वते नित्यम्।।१४६४।।

श्रीरामचन्द्रनाम्ना सम्पूर्णं स्यान्मनः सततम्।
भूयो भूयो याञ्चा भक्तानां जायते नित्यम्।।१४६५।।

श्रीरामो निखिलानां पापानां दाहको भूयात्।
स्वीकृतसाधुचरित्रा लोकाः सर्वेऽभिवाञ्छन्ति।।१४६६।।

श्रीरामस्य कथायां मनसः प्रेमाऽनिशं भूयात्।
तस्य कृपयैवैतत्सर्वं सुन्दरमभूज्जगद्विदितम्।।१४६७।।

प्रातः स्वस्थे चित्ते श्रीरामस्यैव रूपाणि।
प्रत्यक्षतां गतानि स्युश्चेन्निश्चप्रचा मुक्तिः।।१४६८।।

निन्दितचरितं तूर्णं सम्पूर्णं तत्तिरोभूयात्।
श्रीरामनामजपतो नैर्मल्यं नित्यमाप्नुयाद् देही।।१४६९।।

सम्पूर्णे व्यक्तित्वे श्रीरामो दीप्तिमाधेयात्।
करतलगतमिव सर्वं विभासतां रामसंस्मरणात्।।१४७०।।

अवरुद्धानि तु कार्याण्यपि सम्पूर्णानि सद्यः स्युः।
श्रीरामचन्द्रकृपया नान्या गतिरस्ति विश्वस्मिन्।।१४७१।।

श्रीरामस्मृतिमात्रं सन्तमसानां विनाशकं भवति।
निखिला समृद्धिरनुगा संजाता रामचिन्तनेनैव।।१४७२।।

किञ्चातो माङ्गल्यं भूयाज्जन्मनि मनुष्यस्य।
यद्रामभद्रचरितं मानसमान्दोलितं कुर्यात्।।१४७३।।

सर्वाऽप्यक्षरमाला ज्ञानं सर्वं विचारणा निखिला।
श्रीरामेत्यक्षरगत-दीप्त्या दीप्ता विभासन्ते।।१४७४।।

निर्मलतामुपगच्छति मानसमिदमस्ति यत्तुच्छम्।
श्रीरामदिव्यमूर्तिस्मरणस्यैव - प्रभावेण।।१४७५।।

श्रीरामेऽमृतपूर्णं चरितं सर्वत्र दृश्यते विमलम्।
स्मृतिरपि तस्यामलतां जन्मनि जन्मनि विलासयति।।१४७६।।

सद्यस्तावन्मनसा ध्यातः श्रीरामचन्द्रोऽयम्।
सर्वविधां सम्पत्तिं ददाति मनसाऽप्यपरिमेयाम्।।१४७७।।

औदार्येणापूर्णो दयया नित्त्यं तरङ्गितो रामः।
संमुखमायातस्य तु सर्वं संपूर्णतां नयति।।१४७८।।

सर्वचराचरकणकणवन्दित-चरणारविन्दोऽयम् ।
श्रीरामचन्द्रभगवान् देयात् स्वीयं प्रसादमाधुर्यम्।।१४७९।।

मालिन्यतापशान्त्यै भूयाद्रामस्य संस्मरणम्।
शुभ्रं कर्म सदैवाऽमृतमयतामादिशेत् काले।।१४८०।।

श्रीरामचन्द्रचिन्तनमान्दोलितमेव जीवनं कुर्यात्।
संपूर्णां वाग्धारां प्रवाहयेन्मानसे विमले।।१४८१।।

न्यूनं यद्यज्जातं तत्सर्वं पूर्णतां यातु।
श्रीरामचरणवन्दनपरायणानां सदैवाऽत्र।।१४८२।।

अमलात्मनां विलासा तत्र सदैवाऽथ जायन्ते।
श्रीरामचन्द्रचरणे कल्पतरौ सर्वभावेन।।१४८३।।

यशसां तत्साम्राज्यं सम्पूर्णं करगतं भवति।
श्रीरामप्रणतिरियं यदि नित्यं जागृयान्मनुजे।।१४८४।।

शुकवद्रटनं तावद्यन्नाम्नो निखिल--सम्पदं देयात्।
तं श्रीरामं रसना नित्यं रसयतु विनाऽयासम्।।१४८५।।

वक्तृत्वे नित्यं सा दीप्तिः संस्फुरतु चित्ते या।
श्रीरामस्य कृपातो लोके रञ्जनमहो कुरुते।।१४८६।।

निश्चयभावः सततं सर्वेष्वपि कर्मजालेषु।
श्रीरामस्य कृपातः सततं लभ्यो भवेन्मनुजे।।१४८७।।

श्रीरामचन्द्रसंस्मृतिरमला नित्यं दहतु दारिद्र्यम्।
संपूर्णं जीवनमथ धन्यं कुर्यात् सदा कुशलम्।।१४८८।।

सर्वा सृष्टिरियं स्यात् कृपया पूर्णा नितान्तरमणीया।
कष्टानां संसारस्तिरोभवेद् रामसेवातः।।१४८९।।

नास्ति किमपि संसारे रामादन्यत् शुभं किञ्चत्।
श्रीरामोऽथ नितान्तं मङ्गलभावं करोति सर्वत्र।।१४९०।।

स्वीकृतदयार्द्रहृदयः श्रीरामः केवलं मनसा।
ध्यातः पूर्णं सर्वं कार्यं शोभनतमं कुरुते।।१४९१।।

भद्रमयं सर्वं तत्प्रजायते रामचर्चायाम्।
सर्वं रहस्यभूतं स्फुटीभवति रामसेवातः।।१४९२।।

जटिलतमग्रन्थीनां जीवनकालेऽथ दृष्टानाम्।
श्रीरामस्य स्मरणं शीघ्रतरं भेदनं कुरुते।।१४९३।।

शोकस्याऽपूर्वा या तरंगमाला प्रदृश्यते पुरतः।
या दुरदृष्टा माया क्षणमात्रेणैव लुप्यते सर्वा।।१४९४।।

नव्यतरे परिवेशे प्राचीनं सर्वमायाति।
श्रीरामस्मृतिचिन्तामणिना किं नो कृतं मनुजे।।१४९५।।

विषमतरोऽपि समाजो जडभावे यो निवेशयति।
श्रीरामचन्द्रचर्चाऽभावस्तत्कारणं मृग्यम्।।१४९६।।

श्रीरामे शुभदातरि सर्वं शुभमेव वोभूयात्।
किञ्च विनैवायासं सर्वसमृद्धिः स्वयं वृणुयात्।।१४९७।।

स तु सर्वत्रैवाऽस्ते श्रीरामो नाऽपरं किञ्चित्।
सर्वस्तस्य विलासो रूपे रूपे समाभाति।।१४९८।।

सर्वे काले देशे ज्ञाने वा साधनेषु सर्वेषु।
श्रीरामस्यैवेच्छा सामान्या कारणीभूता।।१४९९।।

रामे गुणगणवासो धन्यत्वं स्वीयमेव ननु।
घोषयतीति नितान्तं तस्य तु रमणीयता जाता।।१५००।।

कल्पद्रुमः समन्तात्प्रभविष्णू राममन्त्रोऽयम्।
सर्वं सौख्यमनश्वरमविरलतायां समादिशति।।१५०१।।

श्रीरामचन्द्रभक्तिः सुदुर्लभा यदि कृपा कुर्यात्।
अणुमात्रामपि पूर्णां समृद्धिमत्रैव चाप्नुयान्मनुजः।।१५०२।।

सर्वविधं काठिन्यं श्रीरामो ध्यानमात्रेण।
दूरीकरोति नित्यं तत्सेवाऽस्ते परा संपत्।।१५०३।।

सन्देहानां सर्पा गरलं यत्फूत्कृतौ घोरम्।
सततं वमन्ति दूरीभवन्ति ते राममन्त्रेण।।१५०४।।

नैराश्यस्य पिशाची रामेत्यक्षरश्रवणसमकालम्।
दृष्टिपथादतिदूरे याता न पुनः समीपमायाति।।१५०५।।

श्रीरामचन्द्रचिन्तनमौषधभूतं भवाऽमयस्यैवम्।
रोगस्य मूलरूपं प्रोन्मूलयितुं सुसन्नद्धम्।।१५०६।।

सैषा प्रकृतिः सर्वा कोटिषु संजागृता निखिला।
श्रीरामचन्द्रसेवाकर्मणि नित्यं सुसंलग्ना।।१५०७।।

परमं ज्योतिर्विमलं सृष्टौ सर्वत्र नैर्मल्यम्।
विस्तारयति नितान्तं श्रीरामान्नित्यनिष्पन्नम्।।१५०८।।

श्रीरामो हृद्ग्रन्थीर्भिन्द्यात् सततं स्वयं दीप्त्या।
निर्मलमथ चारित्र्यं प्रकाशितं प्रार्थितं कुर्यात्।।१५०९।।

श्रीरामचन्द्रचरणे चेतो भूयात्तथा लग्नम्।
घोरे विपत्तिजालेऽप्यविचलितं वा यथा तिष्ठेत्।।१५१०।।

पालयति पालकोऽयं श्रीरामः सज्जनान् सर्वान्।
दैवीसम्पन्नित्यं संप्राप्या राम-संस्मृत्या।।१५११।।

आदिशतु रामभद्रः स्वीयां सेवां मनसि नित्यम्।
तापस्य भवेच्छान्तिर्यया मनस्येव कल्पितया।।१५१२।।

करुणापूर्णा वृत्तिर्यासौ तस्यैव विद्यते परितः।
श्रीरामस्तां करुणां चेतसि कृपया समाधेयात्।।१५१३।।

संसारे वसतिरियं निन्द्या दौर्गत्य-परिपूर्णा।
मान्या तथा वदान्या जाता श्रीरामसंस्मरणात्।।१५१४।।

कालोऽनन्तः सोऽयं श्रीरामेण प्रपूरितो निखिलः।
तद्रतिसौख्यमनन्तं नूनं संजायते काले।।१५१५।।

६६. श्रीगोपीनाथकविराजः

श्रीमद्गोपीनाथं कविराजं राष्ट्रसद्वन्द्यम्।
महामहोपाध्यायं विद्वन्मान्यं सदा वन्दे।।१५१६।।

वङ्गे प्रादुर्भूतं जयपुरनगरे विहितविद्यम्।
वाराणस्यामस्यां विहिततपस्यं सदा वन्दे।।१५१७।।

संस्कृत-जगति तथैवागमतन्त्रेऽथ साधनाऽकाशे।
भास्वन्तमेव पूर्णं शुभ्रयशोराशिराजितं वन्दे।।१५१८।।

अस्मत्पितृसदृक्षाणामप्युपदेशपाण्डित्यम् ।
वार्धक्ये बिभ्राणं गोपीनाथं सदा वन्दे।।१५१९।।

वैदेशिकेऽपि विद्वत्संघे सर्वत्र संपूज्यम्।
नाना भाषानिपुणं वन्दे सारस्वतं तेजः।।१५२०।।

जंगमपुस्तकमन्दिरतामेकां साधु बिभ्राणम्।
कण्ठेधारितविद्यावैभवसमं विभास्वरं मन्ये।।१५२१।।

आनन्दमयी निकटे सर्वां शिशुतां विधारयन्तं तम्।
काश्यां विहितावासं वृहस्पतिं को न जानाति।।१५२२।।

विश्वस्मिन् सर्वोच्चा संस्कृतसंस्था विराजते काश्याम्।
तस्या अध्यक्षत्वं गोपीनाथः सनाथितवान्।।१५२२।।

सेवावधिप्रपूर्तेरनेकवर्षात् प्रपूर्वमेव ननु।
अवकाशग्रहणेन च व्यक्तीकृतमेव निःस्पृहं तेजः।।१५२४।।

भगवत्यपि सा देवी सरस्वती स्वीयवरदानैः।
यशसा दीपितमेनं मनसा सम्यक् प्रसादयामास।।१५२५।।

जयपुरनगरे यदिदं सुविशालं पुस्तकागारम्।
तस्य समस्तग्रन्था वितीर्णतामापुरेतस्मै।।१५२६।।

संपूर्णे संसारे विद्वत्संघैः समादृतः सततम्।
यशसा धवलितविश्वः श्रीगोपीनाथकविराजः।।१५२७।।

प्राच्यप्रतीच्यविद्या-निष्णातेष्वाद्यगणनीयः ।
श्रद्धाभारविनम्रः श्रीगोपीनाथकविराजः।।१५२८।।

तादृशमनीषिवर्यस्य च दिव्या लोकयात्रेयम्।
दिव्ये जीवनमार्गे संप्रेरयते मनीषिमूर्धन्यान्।।१५२९।।

तन्त्रशिखरमारुढं लोकान्तरसंचरणशीलम्।
स्वामिविशुद्धानन्दं संसेवितवान् सुदृढ़भक्तियुतः।।१५३०।।

तान्त्रिकवाङ्मयमध्ये शाक्तां दृष्टिं विवेचयन् सोऽयम्।
भारतसंस्कृतिहृदये साधनमार्गं विलेखयामास।।१५३१।।

वेदान्तप्रमुखाणां दर्शनविश्रुतविचाराणाम्।
मर्मोद्घाटननिपुणो नाना ग्रन्थान् समर्पयति।।१५३२।।

वाराणस्या विद्वत्परंपराप्राप्तमितिहासम्।
गम्भीरान्वेषणसद्विधया नूनं प्रकाशयति।।१५३३।।

सरस्वतीभवनाख्ये पाण्डुलिपीनां महागारे।
स्थित्वा पुरातनानां ग्रन्थानां सत्प्रकाशनं कुरुते।।१५३४।।

तत्तत्सद्ग्रन्थानां विभिन्नविषयान्वितानां च।
प्राक्कथनेषु गभीरान् सिद्धान्तान् संविवेचयामास।।१५३५।।

विश्वविमोहकसुषमामण्डितवङ्गीयभाषासु ।
नाना साधकचित्रं नैकैर्ग्रन्थैर्विरचयामास।।१५३६।।

बौद्धानां सिद्धान्तान् सूक्ष्मेक्षिकया निभालयन् निखिलान्।
आचार्यनरेन्द्रदेवग्रन्थप्राक्कथनमण्डितानकरोत् ।।१५३७।।

महामहोपाध्यायेत्याङ्गलसम्राट्समर्पितोपाधिम् ।
स्वीकृत्य सर्वविद्वत्संमान्यत्वं चिरात् प्राप्तः।।१५३८।।

स्वातन्त्र्यानन्तरमपि भारतराष्ट्रस्य राष्ट्रपतिः।
संमानितवानेनं स्वतंत्रतादिवसमालक्ष्य।।१५३९।।

नव्यैरुपाधिभिर्वा सर्वसुसम्मानमारब्धम्।
पद्मविभूषणनाम्नोपाधिं तत्रापि भूषयामास।।१५४०।।

आनन्दकाननेऽस्मिन् ज्ञानाख्यं यज्ञमातन्वन्।
साधकनिजस्वरूपे निखिलं कालं समर्पयामास।।१५४१।।

सम्प्रार्थितोऽपि वहुधा न स्वीकृतवान् पदं कुलाधिपतेः।
संस्कृतविश्वकविद्यालयमध्ये स्वात्ममार्गस्थः।।१५४२।।

तस्य च नित्यं सविधे देशविदेशस्थिताः सन्तः।
नाना प्रश्नान् स्वीयानुत्तरदानाय संस्थितांश्चक्रुः।।१५४३।।

आध्यात्मिकीं सुदीप्तिं पुञ्जीभूतां स्वनेत्राभ्याम्।
विकिरन्मन्दैर्हास्यैर्लास्यमिव क्रीडयामास।।१५४४।।

संन्तोषितसद्विद्यः सारस्वतवैभवैर्हृद्यः।
सर्वाऽविद्याकाराविनिर्गतः पूर्णतां यातः।।१५४५।।

सत्यशिवसुन्दराख्ये धामनि नित्यं सुविश्रान्तः।
एतत्साधनमार्गेऽग्रेऽग्रे पर्याप्ततामागात्।।१५४६।।

सर्वत्रैव व्याप्तं मूलं तत्त्वं समन्विष्यन्।
शक्तेर्विराट्स्वरूपं तन्त्रग्रन्थेषु दर्शयामास।।१५४७।।

कांचनवर्णो नित्यं सौम्याञ्चितसर्वतः स्वान्तः।
बालसुलभजिज्ञासाभरितो दृष्टः सदैव कविराजः।।१५४८।।

नाना भाषाभिज्ञो नाना साहित्यनिष्णातः।
नाना विषयविलेखननिपुणः सौम्यत्वलालितश्चासीत्।।१५४९।।

सिद्धस्वभावपूजापूजितकायो विगतमायः।
सिद्धैरभीष्टदायो सिद्धसमासेवितच्छायः।।१५५०।।

वाराणस्यामन्तिममहामहोपाध्यायतां यातः।
सर्वाङ्गीकृतविषयेऽन्तिमभावं सर्वथा प्राप्तः।।१५५१।।

वादो जल्पस्तावत्कापि वितण्डा मता विज्ञैः।
विदुषां त्रिधारया ननु वहते वैचारिकी गङ्गा।।१५५२।।

निर्भ्रान्ताः सिद्धान्ता व्याख्यायन्तेऽनुकूलसत्तर्कैः।
यत्र विवेचननिपुणैर्वादोऽयं कथ्यते विनाऽऽयासम्।।१५५३।।

यत्र परस्परविमुखे विचारसंचारसाम्राज्ये।
एकं स्वमनसि कृत्वाऽन्यखण्डनं जल्प एवासौ।।१५५४।।

यत्र तु खण्डनमात्रं लक्ष्यं स्यादभिनिविष्टानाम्।
स्वीयाभिमताऽभावे सेयं सर्वा वितण्डा स्यात्।।१५५५।।

वादाऽख्ये शुभधामनि कापि तपस्या सदा साध्या।
सिद्धान्तेषु भ्रान्तिर्नूनमियं दूरतः कार्या।।१५५६।।

महदध्ययनं चैतत्कर्मणि नियतं भवेत् सम्यक्।
मानससाक्षात्कारः सिद्धान्तानां भवेदनिशम्।।१५५७।।

सोऽयं ऋषि शब्दार्थः साक्षात्कारावसायितादीप्तः।
निखिलं जीवनमेतत्स्वल्पीभूतं भवेद्यत्र।।१५५८।।

अङ्गुलिगणनीया वा तादृशभावन्विता लोके।
दृश्यन्ते ऋषिभावैरलंक्रियासंगताः पुरुषाः।।१५५९।।

श्रीमान् गोपीनाथो धन्यतमस्तेषु गणनीयः।
वादे वादे येषां निर्मलभावेन जीवनं याति।।१५६०।।

सा पुण्यमयी धारा गोपीनाथप्रवाहिता जयति।
नाना ज्ञानपिपासाऽकुलितान् या तर्पयति कामम्।।१५६१।।

शाक्तागम-तन्त्राणां दुरूहतायां समादिष्टा।
गोपीनाथवरैण्यैस्सेयं हृदये समानीता।।१५६२।।

मौनमयैर्व्याख्यानैरपि येऽन्तःकरणसंशुद्धिम्।
तन्वन्तिस्म नितान्तं ते गोपीनाथकविराजाः।।१५६३।।

मनसि च वचसि च काये परोपकारे नितान्तसंलग्नाः।
वन्दितदिव्यचारित्रास्ते गोपीनाथकविराजाः।।१५६४।।

मन्त्राणामावर्तनमेतेषां सिद्धभावेषु।
सत्प्रेरणां प्रसूते कृत्स्नस्यापीह विश्वस्य।।१५६५।।

अमृतोदधिस्वरूपां तेषां स्मृतिमात्मदेहस्थाम्।
वन्दामहे नितान्तं नम्रतमैः स्वैर्मनोभावैः।।१५६६।।

६७. कवि-शिरोमणिः

निकटे एवातीते जयपुरनगरेऽत्र कविशिरोमणिभिः।
श्रीमज्जुनाथभट्टैः काव्यनिकुञ्जः समारचितः।।१५६७।।

यत्सौरभं समन्ताद् भूवलये तादृशं व्याप्तम्।
सहृदयमिलिन्दमाला तेनाऽसीत्सर्वदाऽऽकृष्टा।।१५६८।।

संस्कृतभाषानिर्मितकाव्यानां कीदृशी सुषमा।
अद्याप्यस्ति नितान्तं स्पृहणीयाऽऽलोक्यतां तत्र।।१५६९।।

अस्यां विंशशताब्द्यां संस्कृतकवितामये जगति।
श्रीमज्जुनाथसदृशो नैवाऽसीद् वा भविष्यति वा।।१५७०।।

काचिदपूर्वा धारा काव्यनिकुञ्जे प्रवाहिता कविभिः।
मथुरानाथ-सुधीन्द्रैस्तया तु लोको वशंवदीभूतः।।१५७१।।

साहित्यवैभवाख्यं काव्यं नितरां मनोहारि।
संस्कृतकाव्याऽकाशे चान्द्रीं सुषमां समेधयति।।१५७२।।

नाना चत्वररचिता शोभा नन्दनवनं नूनम्।
सहृदयहृदये पुरतः प्रोद्घाटितमेव सर्वथा कुरुते।।१५७३।।

राजस्थानप्रान्ते उर्दूव्रजकाव्यधारायाम्।
कविता-वनिता नितरां विभूषिताऽङ्गी समुच्छलन्त्यासीत्।।१५७४।

स्पर्धायामपि तस्यां संस्कृतकवितां निवेशयन् सम्यक्।
सर्वोत्कृष्टे रूपे कविरयमाकारयामास।।१५७५।।

ब्रजभाषाया आसीत्कविताक्षेत्रेषु साम्राज्यम्।
हिन्दीभाषाकवितारूपे सैवात्र परिचिता जाता।।१५७६।।

तस्यां घनाक्षरीतिच्छन्दो नितरां समुल्लसितम्।
तद्वा 'कवित' संज्ञां धारयते वा प्रदीप्ततरम्।।१५७७।।

संस्कृतकाव्यक्षेत्रे वृत्तानामुज्ज्वला सरणि-
र्विख्याताऽसीन्नितरां नाना काव्येषु सा दृश्या।।१५७८।।

छन्दस्तत्त्वं तदिदं कवितासृष्टौ तथोच्चतरम्।
यस्याकर्षणमसमं कविसहृदययोः समं स्फुरति।।१५७९।।

आदिकवेर्यत्प्रथमं लोके छन्दः समुच्छलितम्।
आसीत्काचित्क्रान्तिर्यदा जगन्नूतनं जातम्।।१५८०।।

तदनु विचित्रैवासीन्नव्यानां छन्दसां सृष्टिः।
निखिलं जगदद्यावध्याप्यायितमेतया भवति।।१५८१।।

अस्मत् क्रान्तियुगेऽस्मिन् संस्कृतकविता जडीभूत्वा।
स्वीये काये क्रान्तिं नव्यामेकां प्रतीक्षमाणासीत्।।१५८२।।

कविता-निकुञ्जरचनाचतुरैः श्रीकविशिरोमणिभिः।
नव्यतरे परिवेशे कवितायां क्रान्तिरारचिता।।१५८३।।

संस्कृतमासिकपत्रं सम्पादितवन्त एवैते।
वातारणं रम्यं रचयामासुः समीहितं सम्यक्।।१५८४।।

सर्वविधैश्छन्दोभिर्हिन्दीउर्दूप्रसिद्धैस्तैः ।
संस्कृतकाव्यं नितरां रमणीयं गुम्फयामासुः।।१५८५।।

पिङ्गलशास्त्रे योऽसावास्ते छन्दोमयो निचयः।
सर्वत्राऽपि समाना गतिरासीद् भट्टवर्याणाम्।।१५८६।।

कोमलकान्तपदावलिरेतेषां तादृशं सूते।
संसारं चित्रतरं मनसि च धन्यत्वमायाति।।१५८७।।

साहित्यवैभवेऽस्मिन्विलक्षणे शब्दसंसारे।
श्रीमञ्जुनाथसदृशः प्रजापतिर्वन्दनीयोऽस्ति।।१५८८।।

सर्वेऽप्यथ ते विषयाश्चिरन्तनैश्चर्चिताः काव्ये।
सुन्दरतरपरिवेशे नव्यं जन्मैव धारयामासुः।।१५८९।।

जयपुरवैभवकाव्ये नव्या छन्दोमयी रचना।
नूतनयुगमिव संस्कृतकाव्येषूल्लासयामास।।१५९०।।

कस्याप्यन्यस्याऽस्ते नगरस्यैतादृशं भाग्यम्?
यत्स्यादीदृशरचनाचित्रैरमरत्वसाधने निपुणम्।।१५९१।।

अत्रत्या राजानो विद्वांसो वा कलाकाराः।
स्थानान्यथ सा सुषमा प्राकृतिकी दर्शनीयाऽत्र।।१५९२।।

श्रीमञ्जुनाथरचिते गोविन्दे वैभवे काव्ये।
भक्तिमयी नवसरणिः कं वा नोत्साहितं कुर्यात्।।१५९३।।

सर्वेष्वपि काव्येष्वास्वाद्या नव-छन्दसां धारा।
नवता येषामास्ते संस्कृतसाहित्यसम्बन्धात्।।१५९४।।

काव्ये भाषाशक्तिर्या दृष्टा मञ्जुनाथेषु।
संस्कृतकाव्योन्मेषे विरलैवास्तेऽथ साऽन्यत्र।।१५९५।।

काव्योपस्थापनमथ रुचिसञ्चारेण परिपूर्णम्।
नाना चित्रोल्लसितं नैवाऽन्यत्राथ दृष्टचरम्।।१५९६।।

सर्वोत्तमकाव्यनामपि यैषा दुर्दशा क्रियते।
मुद्रणकाये सर्वा दुनोति नो कस्य सा चेतः।।१५९७।।

स्वीया टीका काव्ये कविवर्यैरेव तादृशी रचिता।
सर्वं रहस्यजातं संकेतयतीव दृश्यते मधुरा।।१५९८।।

कादम्बरी च यासौ बाणस्याऽस्तेऽसमा सम्पत्।
चषकाख्या टिप्पणिरपि तत्राऽस्ते भट्टवर्याणम्।।१५९९।।

चन्द्रद्वयेन रचिता याऽस्ते टीकाऽथ तत्रत्या।
दुष्पाठपांसुनिकरैस्तिमिरावृतमेतया काव्यम्।।१६००।।

चषके तत्र परिष्कृतिरास्ते सैवाथ पाठानाम्।
नाना व्यङ्ग्यार्थानां प्रकाशनं दीप्तिमातनुते।।१६०१।।

व्याख्याकारो न स्याद् यदि पूर्णः सावधानोऽत्र।
दिव्यतमाऽपि तु रचनाऽन्यथैव सा प्रस्तुता भवति।।१६०२।।

तादृश-दोषोद्धारे कियती प्रतिभा श्रमश्चैव।
योज्या भवति नितान्तं विलोक्यतां चषकटिप्पणौ सर्वम्।।१६०३।

रसगङ्गाधरनामा पण्डितराजस्य सन्दर्भः।
काव्यालोचनविषये निकषोपलतामुपागतः सम्यक्।।१६०४।।

व्याकरणशास्त्रदिग्गजवरश्रीनागेशभट्टेन ।
रसगङ्गाधरटीका मर्मप्रकाशाख्यया रचिता।।१६०५।।

तत्संपादकार्ये संलग्नैर्भट्टवर्यैस्तु।
काव्यालोचनकार्ये नागेशस्य स्खलद्गतिर्दृष्टा।।१६०६।।

तत्रापि टिप्पणी सा रचिता श्रीमज्जुनाथैस्तु।
नागेशस्य विचाराः सम्यग्रूपे परीक्षिता यत्र।।१६०७।।

आसीदेतद्रचने विदुषां कोलाहलो भूयान्।
नागेशभट्टखण्डनमेतत्सह्यं कथं वा स्यात्।।१६०८।।

किन्तु विचारावसरे न कोऽपि "सिद्धो" भवत्यत्र।
सहृदयतासाम्राज्ये सहृदयहृदयं प्रमाणं स्यात्।।१६०९।।

टिप्पण्यादिविलेखनकर्मणि सा मार्मिकी भाषा।
लिखिता भट्टवरेण्यैः खेदं रोषं प्रकाशयति।।१६१०।।

एवं विधेषु विषयेष्वासीत्तेषां समाहिता दृष्टिः।
शतशस्तत्रोद्धरणान्यासादयितुं सुशक्यानि।।१६११।।

संस्कृतकथाविरचने निबन्धरचने च शोधकार्ये वा।
श्रीमद्भट्टवरेण्या नितरां दीप्ता विलोक्यन्ते।।१६१२।।

संस्कृतगीतविरचनं तादृक्प्रारब्धमासीत् तैः।
अद्य तु सर्वे कवयस्तस्मिन् मार्गे प्रयस्यन्ति।।१६१३।।

एवं श्रीमन्मथुरानाथबुधैः कापि तादृशी सरणिः।
प्रारब्धा याऽद्यत्वे सकलं लोकं वशीकुरुते।।१६१४।।

किन्त्वद्यापि समस्तास्तेषां रचना न संगृहीता वा।
पत्रेषु याः प्रकाशितपूर्वा अपि विस्मृता जाताः।।१६१५।।

सर्वासामपि तासां प्रकाशनेनैव सा तुष्टिः।
सम्यक् समीहिता स्यादकादमी तेन धन्यतां यातु।।१६१६।।

मान्यानामथ तेषां संस्कृतकाव्याब्जसूर्याणाम्।
श्रीमज्जुनाथशास्त्रिप्रवराणां संस्मृतौ प्रणताः।।१६१७।।

पञ्चमद्वीपः

६८.प्रतारकः

व्यथयति कथापि तेषां सत्कुलजानामनार्याणाम्।
निन्दितमप्याचरणं येषां श्रेष्ठत्वमायातम्।।१६१८।।

पुष्टाश्चैते श्वानः सर्वत्रैवाऽमिषं दृष्ट्वा।
मुद्राभिर्विविधाभिर्विलोपयन्ति क्षुधं स्वीयाम्।।१६१९।।

स्वयमेव ते नितान्तं स्वात्मन्येव प्रतारणे लग्नाः।
समुपदिशन्तो ह्यन्यान् स्वात्मानं विस्मरन्त्येव।।१६२०।।

अन्येषामाहरणे तर्काणां युक्तिसंघटना।
येषां सविधे राशिर्नेवाऽस्ते न्यायपरिदाने।।१६२१।।

लोके नानाऽभ्यासैर्भयरूपं स्वीयमुद्भाव्य।
निद्रामदप्रतारणलीलाऽभ्यासेषु संलग्नाः।।१६२२।।

नानाज्ञानोन्मादैर्मूर्च्छितवाक्कायसंकल्पाः ।
सच्चारित्र्यविगर्हणशीलाः स्वीयेषु चित्रेषु।।१६२३।।

वाणीनामुन्मादे वैभवमसमं समामनन्तो ये।
पर्यन्तेऽकिञ्चनतासम्बन्धेष्वेव सर्पन्ति।।१६२४।।

दुःखस्थितिरतिविषमा दुर्गतदुर्भावदूषणैर्निन्द्या।
सर्वाऽनर्थकरीयं दूरीभूयात् प्रयत्नशतैः।।१६२५।।

येयं तथा विधापि प्रापद्दीर्घं समष्टिगतरूपम्।
सामाजिकस्वरूपं द्विषन्ति तेषामियं वन्द्या।।१६२६।।

६९.लक्ष्मणरेखा

केयं सूक्ष्मे रूपे लक्ष्मणरेखा समारचिता।
बहिर्निविष्टो यस्या बहिरागमनं प्रतीक्षते तस्याः।।१६२७।।

यदि सा बहिरागच्छेद् रेखातो रावणो भूत्वा।
सोऽयं तस्याऽहरणं कुर्यादेषा तदीयचिन्ताऽस्ते।।१६२८।।

बलवानस्याः योऽयं परिणेता तद्विदूरणेऽनेन।
मारीचस्य निजस्य स्वर्णो वर्णः समारचितः।।१६२९।।

स्वर्णोत्कोचैर्दूरं नीतो रामो युवाऽनेन।
त्रैलोक्यसुन्दरीं तामनुजे संस्थापयाञ्चक्रे।।१६३०।।

तेनैवेयं रचिता काचिद्रेरवा चमत्कृता सेव्या।
नानाविधधिक्कारैर्नवरूपैस्तर्जयन्तीव ।।१६३१।।

किञ्चित् किञ्चित् स्वेङ्गितसंभारैरेव सर्वेयम्।
परिपाटी परिपाल्या संकल्पानां विकल्पनैः स्वीयैः।।१६३२।।

स्वीये परकीये वा व्यथाकथायाः प्रवाहेऽस्मिन्।
कोणे कोऽपि निविष्टः स्वीयं रूपं समाचिनुते।।१६३३।।

सर्वाऽपीयं गाथा रूपे नव्या समागता पुरतः।
सन्तिष्ठिते कथंचिद् भारं सोढुं दिशन्तीव।।१६३४।।

७०.वाक्

वाग्व्यवहाराणां का सा विद्या या प्रदायिनी शान्तेः।
शान्तेरुल्लासानामनुभवधारा समायाति।।१६३५।।

उत्तेजकता नित्यं दुरीकुरुते तथाऽत्मीयान्।
अभ्यासायाता चेत् कलहोऽयं कथ्यते लोके।।१६३६।।

नित्या काचन तृप्तिः सम्यक् संसाध्यतां चित्ते।
नित्यं कर्मणिरसमयबोधो कामं समास्थेयः।।१६३७।।

मान्यानामपि सैषा सरणिर्नित्यं तरङ्गिता जाता।
वाचां मृदुले रूपे काऽपि विचित्रैव जृम्भते यात्रा।।१६३८।।

यद्यन्मुखे समागतमेतत्किं तत्र वक्तव्यम्।
वक्तव्यतासमाप्तिः कथमपि संजायतां नाम।।१६३९।।

७१.संसद्

संसदि युवजनमाला विराजतेऽसौ समृद्धिमती।
ये निष्क्रिया समासंस्ते नूनं दूरतस्त्यक्ताः।।१६४०।।

सा भारतीयशासकसंसन्निर्वाचननेन संगठिता।
देशस्यायति सुषमां सुदृढां कामपि विलासयति।।१६४१।।

शक्त्युत्साहसहस्रैर्मण्डितवैभवभरैर्वलिते ।
राजीवे नेतृत्वैर्विभूषिते लसति नूतना संसत्।।१६४२।।

बहु बहु कार्यं तावत्संपाद्यं विद्यते पुरतः।
आशास्यते करिष्यति संसदियं सर्वसाधनैर्युक्ता।।१६४३।।

विघटितजनशक्तीनां संगठने जागरूकेयम्।
कामपि शोभनतन्त्रां परिस्थितिं सम्प्रकाशयति।।१६४४।।

नाना कलाविलासैर्मण्डितविभवात्मिका संसत्।
देशे नवजागरणे संकल्पं संप्रकाशयन्त्यास्ते।।१६४५।।

संरक्षतु राजीवश्चाणक्यीयां परम्परां दिव्याम्।
नीतीनां कौटिल्यं विलयं यातु प्रभेदमयम्।।१६४६।।

नाना यशोविशेषैर्मण्डितविभवान्विताश्चैते।
संसदि सदस्यधुर्या नानाकार्येषु कौशलं यान्तु।।१६४७।।

७२. आशा

काचित्कमनीयाऽकृतिरेषाऽऽस्ते मानसे स्फुरिता।
संध्यायमानवैभवमिलिता संवित्प्रकाशिता दृष्टा।।१६४८।।

अधुना सा काचिदियं दिव्यैर्विभवैर्विलोभयन्तीव।
सर्वाशासम्पूर्णा भव्यतमा भावयति चेतः।।१६४९।।

नोचेदीषन्मौलौ प्रकाशिता सा परा रेखा।
ज्योतिर्मयनवसीम्नां संस्कर्त्री भासमानाऽस्ते।।१६५०।।

अवलोकितसंकाया सन्देशितवाग्विलासमाधुर्या।
सीमाविलासिशौर्यौदार्याऽभासाऽखिलाऽनन्दा ।।१६५१।।

हृत्तन्त्रीमत्रत्यां झंकृतिसारां समादिशती।
संसारेषु समस्तं स्पन्दनमस्या विनिर्मलं जयति।।१६५२।।

भावोन्मादनकर्त्रीं कामपि राशिं सुसम्पदाभासाम्।
सर्वा भासति शुभ्रादर्शाणां तां परां काष्ठाम्।।१६५३।।

संसृतिशरण्यसुषमासौभाग्यं धारयन्तीनाम्।
गौरमणीनां नितरां प्रादुर्भावान् प्रकल्पयाञ्चके।।१६५४।।

७३. अभीष्टम्

यस्याऽगमनमभीष्टं तस्यागमने प्रसन्नता भवति।
अनभीष्टस्यागमने शिरसि महान् भार आयाति।।१६५५।।

प्रियमथ यस्याऽगमनं तस्य तु गमने व्यथा भवति।
अनभीष्टस्थितिमात्रे कण्ठगतप्राणता भवति।।१६५६।।

किमिदमभीष्टं वा स्यादनभीष्टं वा किमिति चैतत्।
पर्यालोचनविषये कालुष्यं मा प्रयान्तु विद्वांसः।।१६५७।।

मानसिकी सा धारा मन एव तु सर्वमेव तत्तत्त्वम्।
कथयतितरां पुरस्तात्सर्वं प्रियमप्रियं वाऽपि।।१६५८।।

यस्तावत्प्रिय आस्ते सर्वं तस्य प्रियं भवति।
यस्तावदप्रियः स्यात्स्वर्णाभाऽप्यप्रिया तस्य।।१६५९।।

भणितिरियं केषांचित् यदि सत्प्रीतिं मयि प्रकुरुषे चेत्।
एष श्वाऽपि मदीयो नूनं त्वत्प्रीतिपात्रतां यातु।।१६६०।।

यो वै यस्य प्रियतामुपागतस्तस्य सर्वमेव ननु।
प्रीतं भवति नितान्तं काम्यं सर्वं तदीयं स्यात्।।१६६१।।

७४.चायपेयम्

चायाऽख्यमुष्णपेयं नानाविधसौख्यसारसंभरितम्।
सत्यशिवसुन्दराभं को नामाद्यापि नो पिबति।।१६६२।।

चायस्य स्मृतिमात्राद् रेखा सा संस्फुरति चित्ते।
यत्र च मोदावहता निकामतृप्ता विराजते नित्यम्।।१६६३।।

येयं चुनावचर्चा चायाऽख्यां दीप्तिमालम्ब्य।
संपूर्णे निजरूपं रभसादाविष्करोति बन्धुत्वे।।१६६४।।

चायाख्यं तत्तत्त्वं जने जने लब्धसंचारम्।
आपणसच्चर्चायां सर्वैरवलम्बनीयतामाप्तम्।।१६६५।।

चायं हृदि प्रतिष्ठातरलं गरलं तथाचैके।
निगदन्तोऽपि प्रोच्चैः सत्सेवनसत्यसंकल्पाः।।१६६६।।

यदि नामैतद् गरलं शिवतामेवादिशति सर्वान्।
सोऽयं शिवस्वभावो गरलं येनाऽमृतं भूयात्।।१६६७।।

किन्तु तदेतन्नैवाद्यत्वे विषतुल्यगणनीयम्।
एतत्त्वमृततुल्यं प्रेरणभावेषु सर्वेषु।।१६६८।।

चायोत्सवाः समन्तान्मैत्रीभावस्य भूमिकारूपाः।
मैत्रीभावो नूनं प्रगाढ़तामागतश्चाये।।१६६९।।

स्वल्पद्रविणजना ये तेषामपि चायपानाख्यम्।
तदिदं प्रभाप्रदीप्तं नितरामपि मोहकं तत्त्वम्।।१६७०।।

उष्णोदकं च दुग्धं फल्गुसिता चापि परिगणिता।
चायस्य निर्मिताविति स्वल्पं साधनमिहानेयम्।।१६७१।।

७५.ज्योतिर्विद्या

ज्योतीरूपं तदिदं विश्वे सारं विराजते तत्वम्।
यज्ज्योतिषा विहीनं नरकोऽसौ वर्णितो लोके।।१६७२।।

भारतवर्षे तस्माद् ज्योतिषशास्त्रं प्रवर्तितं विज्ञैः।
भूतं भविष्यदपि वाऽन्धत्वं तेनाऽमृतं भूयात्।।१६७३।।

सम्यक्ख्यानं संख्या सैवाऽस्ते ज्योतिषस्य सर्वस्वम्।
संख्याया व्यवहारस्याऽभावेऽन्धत्वमायाति।।१६७४।।

एकादिका परार्धान्तेयं संख्या यदा लोके।
विततता विकासमाप्ता विज्ञानानां तदोन्मेषः।।१६७५।।

ऋषिभिर्देशेऽह्यस्मिंस्तपोधनैर्दूरिताऽखिलध्वान्तैः।
मानवता साम्राज्यं प्रवर्तितं वेदरूपेण।।१६७६।।

तदिदं शुभ्रं ज्योतिर्मानवतोन्मेषकालेषु।
मर्त्यस्यामरभावं प्रवर्तयद् दृष्टमेवाऽसीत्।।१६७७।।

वेदाङ्गत्वेनाऽपरमप्येतज्ज्योतिषां शास्त्रम्।
नाना ब्रह्माण्डानां रहस्यविस्फोरकं जातम्।।१६७८।।

भूतं भवद् भविष्यत्सर्वं तेनैव करगतं भवति।
ज्योतिर्विद्याविज्ञास्तदिदं सर्वं विजानन्ति।।१६७९।।

७६.आकुलता

आकुलता संसारे नानाभावेऽनुभावमायाता।
तस्यां ये संभारास्ते विक्षोभं वितन्वन्ति।।१६८०।।

आकुलतायां विभृतं यद् व्यक्तित्वं प्रकाशमुपयातम्।
लौहमयं व्यक्तित्वं तद्वै व्याख्यायते विद्भिः।।१६८१।।

क्षोभे संरम्भोऽयं कोऽपि विकासं विलासयति।
यद्वशतस्तु समस्ताः पद्धतयो वा विपरिवर्तन्ते।।१६८२।।

मानसिकोऽयं ग्रन्थिः शास्त्राणामपि निरोधिका भवति।
मतभेदप्रसराणां भवतितमां तत्र साम्राज्यम्।।१६८३।।

केचिच्छ्रमप्रवीणा द्वन्द्वे समुपस्थिते सद्यः।
दूरस्थिता भवन्तो न क्षोभं स्वात्मना दधते।।१६८४।।

किन्त्वपरे तु नितान्तं विक्षुब्धाः स्वल्पमात्रेऽपि।
विपरीतस्थितिमध्ये मथितस्वान्तास्तु दृष्टचराः।।१६८५।।

७७.समाजः

अयमद्भुतोऽस्ति कश्चित् समाज इति संज्ञको देवः।
यः पालयति नितान्तं पोषयते चापि मानवं नित्यम्।।१६८६।।

बाल्यावस्थातो वा समाजमध्ये सुशिक्षणं चलितम्।
सुन्दरतरपरिवेशे धूसरभावं गतो मनुजः।।१६८७।।

सामाजिकसंरचना सेयं संसेविताऽखिलैर्लोकैः।
सारल्यं काठिन्यं विलोक्यते वा समाजचित्रेषु।।१६८८।।

नानानवमाधुर्यैः पोषयते यश्चिरं भावान्।
सोऽयं समाजपुरुषः सर्वैः संसेवनीयोऽस्ति।।१६८९।।

संसेवितः समाजः प्रवर्तयति सेवकं निखिलम्।
सर्वं तस्मै यच्छत्यैहिकमामुष्मिकं तत्त्वम्।।१६९०।।

दीनानां दलितानामुन्नयने ये चिराल्लग्नाः।
ते वै समाजसेवां प्रकुर्वते नित्यनिष्ठाभिः।।१६९१।।

नानार्जितविज्ञानप्रवर्तने नित्यसंलग्ना।
ते समाजिकचर्यां संसाध्याल्हादयन्ति हृदयेशम्।।१६९२।।

सर्वोदयसौभाग्यं संगठने ये विलक्षणां शक्तिम्।
नित्यं विचारपटुतां धारितवन्तः समाजसेवायं।।१६९३।।

सर्वोन्नतिसरणीनां चित्राणीमानि सेवाभिः।
सन्दृश्यन्ते नित्यं समाजघटकैः प्रयुक्तानि।।१६९४।।

गाथाश्चैता नित्यं प्रेरणमसमं प्रयच्छन्ति।
यास्ताः समाजसेवाव्रतिनां नित्यं चरन्त्येव।।१६९५।।

नवनवसाधननिपुणैः समाजसेवास्थितैर्मनुजैः।
धन्यो भवति समाजो धन्यांश्चैतान् जनान् कुरुते।।१६९६।।

७८.युद्धक्षेत्रम्

आदर्शरक्षणार्थं स्वार्थान्धैः सह भवन्ति संग्रामाः।
धैर्यं शौर्यं शास्त्रं तत्राप्यसमं फलं दिशति।।१६९७।।

द्वन्द्वाख्या ये भावास्तेषां नित्यं प्रजायते युद्धम्।
यद्येतन्न भवेद्वा संसारो नो चलेत्तत्र।।१६९८।।

युद्धक्षेत्रं तदिदं विश्वं मनुजः समागत्य।
विजिगीषुवृत्तियुक्तो नित्यं संजायते कामम्।।१६९९।।

जेतव्यं संसारे सर्वत्रैवाऽस्ति काम्यतरम्।
मृत्युर्ननु संनिहितो विजिगीषुर्नास्ति चेल्लोकः।।१७००।।

असदा सह संग्रामे सद् विजयः सर्वकाम्यः स्यात्।
तदिदं सर्वं पूर्णं विजयाख्यं दर्शनं नाम।।१७०१।।

सदसद्युद्धं चेदं प्रवर्तितं वाऽदिमात् कालात्।
न कदाचिद् विरतं ननु दृष्टं संभावना नास्ति।।१७०२।।

अत्यन्तं दुर्लभमथ जीवनमेतत्समापयितुम्।
परितोऽपि शत्रुनिवहः सन्नद्धःखड्गहस्तःसन्।।१७०३।।

संग्रामविजयलाभे सैषा काचित् कला भवति।
विजयो यया सुनिश्चिततायां सर्वत्र परिणमते।।१७०४।।

आपाततः पराजयकालेऽप्युत्सवमयी भूमिः।
सन्दृश्यते कविवरैः पर्यन्ते या स्थिरी भवति।।१७०५।।

संसारे वैराग्यं त्यागे भोगः समापितो भवति।
ऐहिकमथ चामुष्मिकविजयावाप्तौ भवन्ति रूपाणि।।१७०६।

दुर्दान्तानां भर्त्सनमन्यायोन्मूलनादिकं कार्यम्।
विजिगीषुचित्तवद्भिः सततं सन्धार्यते सहजम्।।१७०७।।

७९.श्रीचन्द्रधरशर्मागुलेरिः

संस्कृतधुरन्धरत्वे हिन्दीसाहित्यनिष्णातान्।
श्रीचन्द्रधरगुलेरी-महोदयान् को न जानाति।।१७०८।।

एकैव कथा रचिता दिव्या 'उसने कहा थे' ति।
दिव्यरचनयाः नूनं निखिलो लोको वंशवदो जातः।।१७०९।।

हिन्दीज्ञाता मन्ये न कोऽपि मिलतीह तादृशो लोके।
श्रीमद्गुलेरिवर्या येन तु नूनं न संश्रुता वा स्युः।।१७१०।।

शतशो निबन्धरचनाकरणे शूराः समासंस्ते।
अल्पीयस्येव वयसि तेषां कालः समाप्तिमगात्।।१७११।।

चत्वारिंशद्वर्षे वयसि विरामो हि जीवनस्याऽभूत्।
देशे चाथ विदेशे पूर्णतमां ख्यातिमुपयाताः।।१७१२।।

अजमेरस्थितमेयोकोलेजेऽध्यापयामासुः ।
राजानोऽपि समस्तास्तेषां शिष्यत्वमापन्नाः।।१७१३।।

मेयोकोलेजोऽसौ केवलमेषां तु राजपुत्राणाम्।
शिक्षायै निर्मित इति नासीदन्यस्य संप्रवेशोऽपि।।१७१४।।

तत्राऽध्यापनकर्मणि ये चासन् संनियुक्ता वा।
राज्ञामेव गुरुत्वं तेषामासीत्सुसम्पन्नम्।।१७१५।।

नैके राजकुमारास्तेषां तत्रैव शिष्यतां याताः।
किञ्चित्कालानन्तरमासंस्ते वै महाराजाः।।१७१६।।

श्रीजामनगरराज्ञस्तत्रासीत्पूर्णभक्तिः सा।
यद्वशतस्ते काश्यां तद् हर्म्ये संस्थिताः आसन्।।१७१७।।

जन्माऽजायत तेषां हिमालयस्थे गुलेरसंस्थाने।
पर्वतभागः सोऽयं "कांगडा" नाम्ना प्रसिद्धोऽस्ति।।१७१८।।

ज्वालादेव्या दिव्यं स्थानं तत्राऽस्ति दीप्ततरम्।
सिद्धिप्रदं मनोज्ञं मातुः कृपया परिव्याप्तम्।।१७१९।।

श्रीचन्द्रधरैराप्ता जयपुरनगरे समीहिता शिक्षा।
राजस्थानशिरोमणिभूतं नगरं तथा चैतत्।।१७२०।।

महाराजाकोलेजेत्याख्यायामुच्च-संस्थायाम् ।
श्रीमद्गुलेरिवर्या एम.ए. पदवीविमण्डिता जाताः।।१७२१।।

श्रीमद्गिरिधरशर्माणोऽपि तदात्वे चतुर्वेदाः।
मत्पितृचरणवर्या जयनगरेऽध्येतुमालग्नाः।।१७२२।।

श्रीमज्जुनाथभट्टा अपि तत्कालेषु पठमानाः।
विद्योत्तुङ्गशृंगा इमे मिथो मित्रतां जग्मुः।।१७२३।।

पारम्परिकी प्रौढिः प्राप्ता सर्वैरेतैर्महापुरुषैः।
नव्याश्चाऽपि सरण्यो गुलेरिवर्यैर्निरूपिता निखिलाः।।१७२४।।

अध्यापयितुं त इमे गुलेरिवर्यास्त्वजयमेरुम्।
गतवन्तः श्रीगिरिधरशर्माणो ऋषिकुलं प्राप्ताः।।१७२५।।

काले चाऽध्ययनमये नानालेखैः समर्चिता नितराम्।
सा भारती मनोज्ञा समुन्नतिं या समादिशति।।१७२६।।

संस्कृतहिन्दी-मासिकपत्राण्यप्यारभन्तोऽमी ।
विद्वत्समाजमध्ये वैदुष्येणैव पूजिता जाताः।।१७२७।।

हिन्दीभाषायामथ नानाशैल्यो विकासमायाताः।
मासिकपत्रकृपया धारा सैषा प्रवाहिता जाता।।१७२८।।

जयपुरतस्तु 'समालोचक' नाम्ना पत्रमेकं हि।
हिन्दीभाषायामथ गुलेरिवर्य्यैः प्रकाशितं रुचिरम्।।१७२९।।

पत्रेणैवानेन च गुलेरिवर्यैर्निरूपितं निखिलम्।
वाङ्मयरहस्यमुद्रारूपं विस्तारितं चैतत्।।१७३०।।

एतत्पत्रं तस्मिन्नतिशयमुद्रणसुदुर्लभे काले।
नानाविषयान्दोलनरूपं निखिलं समालोक्यम्।।१७३१।।

हिन्दीपत्रेष्वासीत् 'सरस्वती' नामकस्य पत्रस्य।
गौरवपूर्णं स्थानं द्विवेदिवर्यैः समारचितम्।।१७३२।।

कालोऽयं साहित्येतिहासमध्ये द्विवेदियुगम्।
व्याख्यायते परस्तात्सर्वैरालोचकैर्नितराम्।।१७३३।।

जयपुरनगरात्प्रादुर्भूतस्यालोचकाख्यपत्रस्य ।
रम्यं रूपं दृष्ट्वाऽद्याप्यामोदः प्रजायते चित्ते।।१७३४।।

सा वीरता प्रशस्ता गुलेरिहृदये कृताऽस्पदा जाता।
लेखा नानारूपाः प्रकाशयन्त्येव पाण्डित्यम्।।१७३५।।

संस्कृतसाहित्ये वा दर्शनविषयेषु वा नूनम्।
प्राचीनपुरातत्त्वे गुलेरिवर्याः प्रकर्षमाजग्मुः।।१७३६।।

वात्स्यायनेन रचिते विख्याते कामसूत्रसद्ग्रन्थे।
जयमङ्गलाथ टीका तत्कर्तुः परिचयो दत्तः।।१७३७।।

वैदिकगभीरविषयाणामपि तद् विहितं विचारेषु।
सत्यसमालोचनमिति लेखास्तेऽस्माकमादर्शाः।।१७३८।।

श्रीकालिदासविषये भाषायां लेखरूपेण।
प्राथम्येन सुविहितं विवेचनं वा मनो हरति।।१७३९।।

ज्योतिषविषयेऽगाधं ज्ञानं चासीद् गुलेरिवर्याणाम्।
अष्टादशे तु वर्षे यन्त्रागारस्य पुस्तकं रचितम्।।१७४०।।

नाना भाषाश्चाप्यथ संस्कृतहिन्दी तथा चाङ्गला।
जर्मन-फ्रेंच-प्रमुखा प्राकृत-भाषास्तथा सिद्धाः।।१७४१।।

पञ्चनदीया भाषा तेषां वशवर्तिनी दृश्या।
भाषा तु महाराष्ट्रा गुर्जरभाषाऽथ बङ्गदेशस्था।।१७४२।।

पाली विख्याता या डिङ्गलभाषा समीहिता चासीद्।
नैपुण्यं भाषाणां लोकोत्तरतां प्रकाशयति।।१७४३।।

संस्कृतभाषायामथ हिन्द्यामथ चाङ्गलभाषायाम्।
पुस्तक-निबन्ध-कविता-कथा-विरचनेषु सिद्धास्ते।।१७४४।।

प्रौढोत्तुङ्गविचारानेतेषां सत्वरं ज्ञात्वा।
देशे चाथ विदेशे मूर्धन्यास्ते प्रभाविता आसन्।।१७४५।।

मेयो कालेजोऽयं भारतवर्षे तदानीं वै।
सर्वशिरोमणिभूता शिक्षाशाला विनिर्मिता विज्ञैः।।१७४६।।

तत्रैव संस्कृतस्याऽध्यक्षत्वं स्वीकृतं चासीत्।
तत्र च निवासकाले वाग्देवी पूजिता सम्यक्।।१७४७।।

सर्वैश्वर्यसुशोभितवाग्देवीपुत्रतां प्राप्ताः।
एते गुलेरिवर्याः समधिकतेजोमया जाताः।।१७४८।।

अजमेरनगरमेतद्यत्र तु विद्यालयो महानासीत्।
राजस्थानप्रान्ते सुमेरुभूतं स्मरन्ति तत्रत्याः।।१७४९।।

शतशो निबन्धरचनाचातुर्यं सम्प्रदर्शयन्तोऽमी।
नानासभासु मिलिता मोदितवन्तो विदां श्रेणीः।।१७५०।।

हिन्दीभाषायामथ कथाविरचने प्रवृत्तास्ते।
रमणीयभावनाभिः प्रोता गाथा व्यरीरचन्दिव्याः।।१७५१।।

जर्मनदेशे युद्धं प्रवृत्तमासीत् समस्तं च।
वातावरणं क्षुब्धं देशे सर्वत्र सैव गतिरासीत्।।१७५२।।

भारतवर्षीया अपि वीराः सेनाप्रविष्टास्ते।
दूरे युद्धक्षेत्रे गत्वा शौर्यं प्रकाशयामासुः।।१७५३।।

तत्सर्वं कथयन्तः कथाप्रवाहे निमग्नास्ते।
श्रीमद्गुलेरिवर्या रचयामासुः कथामेकाम्।।१७५४।।

सेयं कथा तदानीं प्रकाशिताऽसीत् सरस्वतीपत्रे।
सर्वेषां लोकानां मनांसि सद्यो विलोडयामास।।१७५५।।

मानसिकी रागात्मकवृत्तिर्योद्घाटिता जाता।
गाथायामेतस्यामग्रे वादः प्रवृत्तोऽसौ।।१७५६।।

नव्यमनोविज्ञानं निवेशितं कल्पनालोके।
अद्यापि साऽस्ति चर्चा मर्मोद्घाटनपरेषु विज्ञेषु।।१७५७।।

पञ्चनदभाषयाऽसौ विभूषिताऽसीत्कथा मधुरा।
स्थाने स्थाने, तेन च भिन्नो वादः प्रवर्तितः कश्चिद्।।१७५८।।

'आंचलिकवाद' इत्यपि संज्ञाऽस्ते तस्य वादस्य।
शतशो रचना तस्मिन्नपि मार्गे नूनमायाताः।।१७५९।।

'उसने कहा था' नाम्नी मनोरमा वाक्कथा सैषा।
सा मेघदूतसमतां प्रेरणामार्गे विधारयति।।१७६०।।

नूतनयुद्धविवरणं कूटादिकसंप्रयोगो वा।
लोकोत्तरनैपुण्येनास्यां सम्यङ् निरूपितं दिव्यम्।।१७६१।।

युद्धविवेचनदृश्यावल्यादिभिरेव सम्पूर्णम्।
यत्साहित्यं निर्मितमेषा मूले स्थिता तत्र।।१७६२।।

शतशश्चारुनिबन्धा अद्यावधि ये विरचिता विज्ञैः।
यत्र त्वेषा रचना विवेचिताऽलोचिता जाता।।१७६३।।

आचार्यमहावीर-प्रसादनामा द्विवेदिवर्योऽपि।
प्रोन्मुक्त-कण्ठविधया तामेतां शंसयामास।।१७६४।।

श्रीरामचन्द्रशुक्लो निरूपयामास तामेताम्।
हिन्दीश्रेष्ठकथावलिमध्ये वा सर्वमूर्धन्याम्।।१७६५।।

श्रीचन्द्रधरगुलेरीत्याख्या-हिन्दी-विचार-मञ्जेषु।
ध्वनिता पूर्णैरादरभावैर्नूनं समाराध्या।।१७६६।।

प्रेमस्वरूपममलं कथाप्रवाहे प्रदर्शितं रम्यम्।
किं मानवोऽभिकाङ्क्षति साधारं निश्छलं प्रेम।।१७६७।।

सोऽयं चरित्रगुम्फोत्कर्षो विहितो गुलेरिभिर्नूनम्।
कश्चित् समाजपुरुषो सद्यो रूपायितो जातः।।१७६८।।

एकैवेयं रचना ख्यातेः काष्ठामथारूढा।
लेखकवर्यस्यान्या रचना न स्मृतिपथं याता।।१७६९।।

तेनैवालोचकवरकथनं चैतद्विचारार्हम्।
अपकारोऽप्यं विहितः कथयाऽप्यनया गुलेरिवर्याणाम्।।१७७०।

इयमेव चर्च्यमाना लेखान् शुभ्रान् विलोपयामास।
दिव्यतराणां येषां गणना प्राथम्यमाप्ता स्यात्।।१७७१।।

यद्यप्येषां वार्ता जनसामान्यकृते सह्या।
किन्त्वालोचकवर्याः कथं सहन्ते दशामेताम्।।१७७२।।

एषा कथाऽस्ति धन्या गुलेरिरचनावलीमध्ये।
मालायां खलु तस्यां मध्ये मणिरिव सुशोभिता सैषा।।१७७३।।

पाठ्यग्रन्थेष्वपि ये निबन्धभागाः समाविष्टाः।
तेषामपि तु परिचयो कादाचित्कत्वमापन्नः।।१७७४।।

श्रीमद्गुलेरिणां या जन्मशती विद्यतेऽब्देऽस्मिन्।
श्रीविद्याधरशर्मभिरेतस्मिन् बहु-परिश्रान्तम्।।१७७५।।

तेषां श्रमप्रयत्नैः सर्वासामेव रचनानाम्।
प्रामाणिकसंकलनं संजातम् मुद्रिता सूचिः।।१७७६।।

शतशो नाना-ग्रन्थेष्वाऽस्ते चर्चा गुलेरिणामद्य।
स्वीयैर्यशोभिरमलैस्ते नूनं सर्वसामान्याः।।१७७७।।

नानागोष्ठीचर्चा जाता रचनं गुलेरिणां यत्र।
चर्चितमासीन्निखिलं लेखेष्वपि चात्र विविधेषु।।१७७८।।

नानालेखेषु च या छटाऽविरासीद् गुलेरिवर्याणाम्।
धूर्तेषु ये प्रहारास्तेषामानन्द एवाऽन्यः।।१७७९।।

साहित्यमिदं दृष्ट्वा मनसि विचारः समायाति।
देशोऽयमस्ति नितरां जडभावैरेव परिपूर्णः।।१७८०।।

नो चेदेवंविधवाग्विभवैः पूर्णस्य काव्यपुरुषस्य।
रचनानामद्यावधि किमिति न सम्यक् प्रकाशनं जातम्।।१७८१।।

एकैक-वाक्यसंग्रहलग्नो विद्याधरो धन्यः।
यत्कृपयाऽद्य शताब्दी-वर्षेऽस्मिंश्चर्चितं सर्वम्।।१७८२।।

सर्वेषामथ विदुषां संग्रहकार्ये समारूढा।
श्रीमालवीयचरणा गुलेरिवर्यं कथं त्यजेयुर्वा।।१७८३।।

सर्वविधैरप्याग्रहनिवहैस्ते चन्द्रधरमेनम्।
काश्यां संस्कृतविद्या-प्रबोधनायाथ योजयामासुः।।१७८४।।

त्यक्त्वाऽथाऽजयमेरुं काश्यामास्थाय चन्द्रधराः।
नाना लेखनकार्ये समधिकसंलग्नतां समारूढाः।।१७८५।।

यत्रैव ते प्रयातास्तत्रैवासीत्समादरस्तेषाम्।
तानादाय तु विदुषां संघः सेवापरो जातः।।१७८६।।

काश्यां सभा तथेयं विख्याता नागरीप्रचारिणी दिव्या।
श्रीमद्गुलेरिवर्यास्तस्यां प्रामुख्यमातिष्ठन्।।१७८७।।

तत्रत्या सा चैका 'प्रचारिणी' पत्रिका ख्याता।
श्रीचन्द्रधरास्तस्याः प्रमुखाः सम्पादका जाताः।।१७८८।।

त्रैमासिक्यां तस्यां प्रचारिणी-पत्रिकायां ते।
भूयो लेखैर्नितरां युगं नवीनं प्रकटयामासुः।।१७८९।।

भाषाविज्ञानस्य च विषये तेषां विरचिता लेखाः।
विज्ञानामपि हृदये नूत्नं संचारयामासुः।।१७९०।।

संस्कृतविद्वांसस्ते संस्कृतभाषारहस्यानाम्।
ऐतिह्यविधेः पुरतो सत्यं नूनं गवेषयामासुः।।१७९१।।

हिन्दीभाषाया अप्यैतिह्यो तैस्तथा लिखितम्।
आंग्लो ग्रियर्सनाख्यो विद्वान् भूयः प्रशंसयामास।।१७९२।।

संस्कृतभाषायामपि तेषां लेखाश्च काव्यानि।
सततं पत्रेषु तदा काले काले प्रकाशितानि जातानि।।१७९३।।

हिन्दी भाषायामथ संस्कृतछन्दस्सु रचनायाम्।
नैपुण्यं तैराप्तं पुस्तकमेकं प्रकाशितं तेषाम्।।१७९४।।

हरिऔधकाव्यधारा संस्कृतवृत्तेषु हिन्द्यां सा।
ख्याते 'प्रियप्रवासे' प्रकाशिता नूनमादृता विज्ञैः।।१७९५।।

श्रीचन्द्रधरगुलेरी कविरासीत्पूर्णरूपेण।
छन्दो रचनायामपि मनोविनोदं प्रवर्तयामास।।१७९६।।

भाषाया रचनाया मार्मिकता तादृशी मन्ये।
दूराद्दूरतरा सा संजाता नो विलोक्यतेऽद्यत्वे।।१७९७।।

सामाजिकरूढीनामुग्रं रूपं महारोगम्।
संलक्ष्यौषधरूपाः कृता प्रहाराः प्रकर्षेण।।१७९८।।

'कछुआ धर्म' निबन्धे 'मारेसि मोही' ति बन्धे च।
तत्प्रस्तुता विचारा नूनं दिग्दर्शका जाताः।।१७९९।।

हिमगिरिसुषमा काचिद् व्यक्तित्वे प्रस्फुटीभूता।
दृढ़तां कर्मसु निष्ठां प्रियतां सम्पोषयामास।।१८००।।

विद्वद्वरेण्यनम्यां प्रबन्धशक्तिं प्रकाशयन्तोऽमी।
का.हि.वि.वि. मध्ये संस्कृत-शिक्षां समुन्नयामासुः।।१८०१।।

विश्वस्मिन् विख्याता तेषां सा मित्रमण्डली दिव्या।
श्यामः सुन्दरदासः शुक्लः श्रीरामचन्द्रोऽपि।।१८०२।।

श्रीमालवीयनिकटे दैनिकमासीद्विचारसंचरणम्।
सम्मेलनानि सुबहून्यपि तैरायोजितानि तत्रैव।।१८०३।।

कार्यशताऽकुलभावः काश्यां शारीरसुखहारी।
संजातो वा नूनं जलवायुप्रातिकूल्यं च।।१८०७।।

स्वल्पतरेऽप्यायुषि ते रोगाऽक्रान्ता अहो जाताः।
साहित्यभाग्यदोषात्काश्यां ते पूर्णतां जग्मुः।।१८०५।।

अद्येयं तु शताब्दी तेषामेषां गुलेरिवर्याणाम्।
संस्मरणाय च महते कल्याणाय प्रवर्तिता जाता।।१८०६।

सर्वा अपि तद्रचना सुन्दरतामण्डिता नूनम्।
एकत्रैव गृहीता सद्यः सम्यक् प्रकाशमायान्तु।।१८०७।।

८०.सी. वी. रमणः

सी.वी. रमणं मन्ये भारतभाग्यस्य सत्कारम्।
शुभ्रैर्यशोवितानैर्भूषितकायं विगतमायम्।।१८०८।।

वैज्ञानिकसंसारे भारतवर्षस्य मस्तकं तेन।
सर्वोन्नतं विदधता किं किं नासादितं तत्त्वम्।।१८०९।।

नववैज्ञानिकविश्वे चूड़ामणितां दधानोऽसौ।
सी.वी. रमणो देशे देशे सर्वत्र वन्दनीयोऽभूत।।१८१०।।

श्रीचन्द्रशेखरोऽसौ वेंकटरमणः स्वजन्मसंसिद्धयै।
प्रकृतिपरीक्षणविद्यासमर्पितः समभवन्नूनम्।।१८११।।

ऋषिरेवाऽयं कश्चित् साक्षात्कृतवान्स्वयं धर्मम्।
रमणप्रभावसंज्ञा सञ्जाता तस्य धर्मस्य।।१८१२।।

धर्माणि यानि प्रथमान्यासन्मन्त्रेषु कथितानि।
यन्त्राधारेण पुनर्दर्शनमेषां हि विज्ञानम्।।१८१३।।

एवं साक्षात्कारे धर्माणां जायते काचित्।
नव्याविष्काराणां विभूतिदीप्तिः परा लोके।।१८१४।।

जनजनमध्ये तेषां लाभा ये वा वितीर्यन्ते।
जीवनमेतन्निखिलं प्रपूर्तयेऽग्रेसरी भवति।।१८१५।।

श्रीचन्द्रशेखरमहाशयेनाथ जीवने स्वीये।
क्षणशः क्षणशः कृत्वा नूनं तप्तं तपो घोरम्।।१८१६।।

इदमेव तद् ऋषित्वं यस्मिन् सन्तप्यते तपो नित्यम्।
तादृशतपसः फलमपि जनतासामर्थ्यवृद्धिर्हि।।१८१७।।

केवलमेका लक्ष्ये दृष्टिस्तेषां वरेण्यानाम्।
अन्यत्किञ्चित् सर्वं तेषां नास्त्येव नास्त्येव।।१८१८।।

सर्वे जनाः शयाना यस्यां तिष्ठन्ति सा रात्रिः।
तेन परीक्षणकार्ये क्षणशः क्षणशोऽथ जाग्रता नीता।।१८१९।।

यद्यपि भारतवर्षे विज्ञानानां विभूतिरूपाणाम्।
पूर्णः प्रकर्ष आसीज्जगद्गुरुत्वं तथाऽऽदिमे काले।।१८२०।।

योऽयं यज्ञः कश्चिज्जनकोऽभूत्सोऽथ विद्यानाम्।
नूतनगवेषणानां तत्राऽऽजायत परा दीप्तिः।।१८२१।।

सिद्धान्ताऽऽविष्कारे प्रयोगशाला च यज्ञशालाऽऽसीत्।
मन्त्राक्षरेषु सर्वा संगतिरासीत् प्रयोगाणाम्।।१८२२।।

विश्वामित्रमहर्षिर्नाना नव्य प्रयोगाणाम्।
संस्कर्ता समजायत चकितोऽभूद्यत्र संसारः।।१८२३।।

सर्वाऽप्येषा सृष्टिर्ब्रह्मादिस्तम्बपर्यन्ता।
विश्वामित्रेण पुनर्निर्मितिमार्गे समानीता।।१८२४।।

नो विश्वासं कुरुते लोकोऽद्यत्वे तु गाथासु।
घोरतपश्चर्यायाः फले कथं श्रद्दधेल्लोकः।।१८२५।।

यद्यद्वा फलमासीत्तस्मिन् काले तु विद्यानाम्।
जात्यादिभिर्विशिष्टैरधिकारस्तत्र तत्र कृतः।।१८२६।।

किन्त्वाश्चर्यमयाणां यन्त्राणामद्य सद्भावे।
सर्वाऽप्येषा जनता फलैस्तु लाभान्विता जाता।।१८२७।।

जगदीशचन्द्रवसुना संसारे नूतनोन्मेषः।
प्रादुर्भावित आसीद् वृक्षे चैतन्यसाधनारूपः।।१८२८।।

रामानुजमितिनाम्ना विख्यातेनाऽथ विद्वरेण्येन।
गणितीये विज्ञाने प्रकाशपातः कृतो नव्यः।।१८२९।।

सी. वी. रमणेन तथा चमत्कृतो निखिलसंसारः।
सूर्यकिरणविज्ञानं नूतनमाभाषता नूतनम्।।१८३०।।

नार्लीकरो नितान्तं निपुणः सापेक्षतावादे।
आईन्स्टीनमहाशयसिद्धान्तं विशदयति नित्यम्।।१८३१।।

भाभामहोदयानां विज्ञानानां परा सम्पत्।
पूर्णं जगन्नितान्तं विद्योतयते स्म नव्यया दीप्त्या।।१८३२।।

नव्याऽविष्काराणां विज्ञानेषु प्रदीप्तानाम्।
या शीघ्रताऽस्ति सम्प्रति विस्मरणं जायते तत्र।।१८३३।।

एकोऽस्त्याविष्कारो यः केनापि कृतोऽद्यत्वे।
अन्येन केनचित्त्वथ तत्खण्डनमपि कृतं तूर्णम्।।१८३४।।

इत्येवं नानाविधविज्ञानाविष्कृतीनां वा।
नित्यं ताण्डवलीला विलोक्यते ज्ञानसाम्राज्ये।।१८३५।।

प्राचीनाः सिद्धान्ता नव्यैर्नित्यं विलोप्यन्ते।
नव्यतमैरथ नित्यं ते नव्या अपि विलोप्यन्ते।।१८३६।।

किन्तुरमणसिद्धान्तस्तथाविधो ह्यचलएवाऽऽस्ते।
विज्ञानविश्वमध्ये सूर्याचन्द्रायितं तेन।।१८३७।।

प्रथमः प्रधानमन्त्री जवाहरो यः स्वदेशस्य।
वारं वारं गत्वा रमणं वर्धापयामास।।१८३८।।

आविष्कारः सोऽयं विज्ञाने स्थायितत्त्वं तत्।
संस्थापयिष्यति दृढ़ा रमणे बुद्धिः प्रतिष्ठिता ह्यासीत्।।१८३९।।

रमणाऽविष्कारस्य च तैस्तैरद्याऽस्ति घोषिता संज्ञा।
रमणप्रभाव इति या सर्वैर्वैज्ञानिकैर्नितराम्।।१८४०।।

निखिलेऽपि च भूवलये वैज्ञानिकमध्य एवेयम्।
रमणप्रभावभाषा नितरां सम्मानिता जाता।।१८४१।।

संसारस्य श्रेष्ठो योऽसौ नोबुलपुरस्कारः।
सोऽत्यादरान्निकामं प्राऽदीयत चन्द्रशेखरायाऽस्मै।।१८४२।।

शुभ्रपुरस्कारं तं सम्प्राप्याभाषमाणेन।
स्वीयेऽस्मिन् सिद्धान्ते विज्ञानस्यायतिर्दृष्टा।।१८४३।।

आरोपण-संरोपणविकीर्णनादिप्रकाशकिरणानाम्।
भूभौतिकं रसायनमित्येतत्सत्यमुपकुरुते।।१८४४।।

प्रायोगिकस्वरूपे सारल्यं चात्र सिद्धान्ते।
स्पैक्ट्रम तत्त्वाऽवाप्तौ सहजत्वं प्रेरणाभूमिः।।१८४५।।

यदवधि सिद्धान्तोऽयं परीक्षणान्निश्चितो जातः।
तस्मात्कालात् सर्वे सारल्येन स्थिताः सन्तः।।१८४६।।

आचामन्ति तमेतं सिद्धान्तं ते गवेषकाः सर्वे।
वैज्ञानिकाः प्रथमतस्तदुत्तरं वा गवेषणं तेषाम्।।१८४७।।

स्वीयोदात्तविचारप्रकटनवेलासु नित्यसंदीप्तः।
सी. वी. रमणो जनताकल्याणे चेतनो ह्यासीत्।।१८४८।।

विज्ञानाऽविष्कारे विनाशरूपं यदेतदप्यास्ते।
तत्प्रतिपक्षे स्वीयान्भावान्संयोजयामास।।१८४९।।

साधनगता सरलता सौकर्यं शक्तिशालित्वम्।
प्रददाति तेन कार्येषून्नतिरासाद्यते काचित्।।१८५०।।

एकस्मिन्नपि कार्ये संजाते साधनाऽभावे।
समयश्रमधननाशेनौदासीन्यं समायाति।।१८५१।।

यस्मिन् यस्मिन् काले साधनसम्पन्नता चाऽसीत्।
इतिहासपृष्ठानां विभूतिरूपः स एव कालेऽभूत।।१८५२।।

साधनसमर्पकाणामेतावान् विद्यते महिमा।
पुरुषार्थानां काचिद् विलासलीला विलोक्यते तत्र।।१८५३।।

क्षणवत्संपूर्णोऽयं कालो यात्येव कार्यशीलानाम्।
प्रकृतिपरीक्षणकार्ये लग्नानामात्मलीनानाम्।।१८५४।।

जीवनपद्धतिरेषामन्येषां प्रेरणाभूमिः।
एकोऽपि महापुरुषो वा कोटिसमुद्धारको भवति।।१८५५।।

आयतिदीप्तिकरोऽसौ लोके सर्वत्र नन्दितो भवति।
नैकानां च युगानामनन्तरं लभ्यते सुमहान्।।१८५६।।

श्रीचन्द्रशेखरोऽसौ वेंकटरमणस्तथाविधो जातः।
येनादृता निकामं काचिल्लोकोत्तरा सरणिः।।१८५७।।

तस्यैतस्याद्यत्वे शुभ्रयशोभिः प्रदीप्तस्य।
शतवार्षिकी नमस्या विधीयते काऽपि राष्ट्रेण।।१८५८।।

नेदं केवलमेकं पारम्परिकं कृतज्ञतामात्रम्।
संमानोऽयं स्वीयस्यैव चरित्रस्य विज्ञेयः।।१८५९।।

सी.वी. रमणो नैकः सा संस्था कार्यशीलानाम्।
काऽपि भविष्यत्सरणिर्देशे वैज्ञानिकानां सा।।१८६०।।

यद्यपि सर्वा शिक्षा बुद्ध्युत्कर्षप्रदायिका भवति।
जीवनमुन्नेतुं किल काम्या विज्ञानशिक्षैव।।१८६१।।

रमणप्रभावनाम्ना नैकं तत्त्वं समुल्लसति।
किन्त्वेकं परिशीलितमेतद्दर्शनमहो जातम्।।।१८६२।।

पश्यन्तः शृण्वन्तः प्रकोष्ठमध्येऽखिलं विश्वम्।
सर्वेऽपि जना धन्या जाता विज्ञानसामर्थ्यात्।।१८६३।।

लोकान्तरगतजीवनसंचाराणां गवेषणायां सा।
काचिद्दीप्तिर्लब्धा पुष्टो येनाद्य संसारः।।१८६४।।

जीवनमध्येऽद्यत्वे न विद्यते तादृशी धारा।
वैज्ञानिका वरेण्या यत्र गवेषणपराङ्मुखा वा स्युः।।१८६५।।

भारतवर्षे तावत्पुरातनादेव कालात्सा।
सुप्रचलिता समासीत्काचिद्वैज्ञानिकी धारा।।१८६६।।

संसारे प्राचीने सुवाङ्मये चाथ वेदानाम्।
सर्वपुरातनतेयं विख्याता सर्वसम्मता चाऽस्ते।।१८६७।।

वैदिकवाङ्मयमध्ये गवेषणायां प्रजातायाम्।
विज्ञानस्यात्युच्चास्तत्र मिलन्त्येव सिद्धान्ताः।।१८६८।।

ते चाऽपि तु सिद्धान्तास्तत्रैवाद्याथ दृष्टिपथगाः स्युः।
नो तादृशयन्त्राणां विवरणमत्रोपलब्धं स्यात्।।१८६९।।

तेष्वेतेषु परीक्षणपरीपाटी संस्थितेषु वेदेषु।
चकितचकितभावोऽसौ विलोक्यते निखिलसंसारः।।१८७०।।

ह्रासविकासविचारे पाश्चात्या ये तु विद्वांसः।
ते सर्वदा विकासे विश्वासं साधयाञ्चक्रुः।।१८७१।।

संसारोऽयं विकसति नानारूपेषु दिव्येषु।
पूर्वं यस्य तु नासीन्नामाप्यद्यैव तज्जातम्।।१८७२।।

पूर्वमभावो येषां ते नूनं भावतां याताः।
नाना नवाः पदार्थाः सैषा सरणिः प्रजायतेऽग्रेऽपि।।१८७३।।

ये तावत्तु विचाराः पूर्वं नो दृष्टिपथयाताः।
क्रमशस्तेऽथ विलासान् स्वीयान् सम्यक् प्रकाशयन्त्येव।।१८७४।।

इत्येतादृशधारा विकासवादाऽनुकारिणी भाषा।
प्रवहतितरां नितान्तं पाश्चात्यैः सम्प्रवर्तिता नूनम्।।१८७५।।

भारतवर्षे तावत्पुरातनादेव कालात्सा।
ह्रासाऽधारितधारा प्रवर्तिता वर्णिता चाऽस्ते।।१८७६।।

सत्ययुगे यद्विकसितरूपं दृष्टं चरित्राणाम्।
त्रेतायां तन्नासीद् द्वापरकाले ततोऽपि तत्क्षीणम्।।१८७७।।

कलियुगकालेऽद्यत्वे ह्रासस्यैवाऽस्ति साम्राज्यम्।
सर्वाऽप्युन्नतिधारा विलोपितैवाऽद्यकालेऽस्मिन्।।१८७८।।

योऽयं विकासवादस्तस्मिन्नूनं प्रवृत्तिमुपयाति।
कीदृश्यप्यभ्युन्नतिरेषा नो दर्शनाय प्राक्।।१८७९।।

या ह्रासवादधारा तस्यामङ्गीकृतायां तु।
सर्वाप्यत्युच्चोच्चा समुन्नतिस्सा पुरैवाऽसीत्।।१८८०।।

तेनैव प्राचीने वेदे सरणिर्विचारणाम्।
व्याख्यातृणां भेदो महानयं दृश्यते तत्र।।१८८१।।

पाश्चात्यानां विदुषां विचारमध्ये तु वेदानाम्।
केवलपुरातनत्वं महत्त्वमूलं न तत्र विज्ञानम्।।१८८२।।

ते द्रष्टुं प्रयतन्ते प्रदर्शिते खण्डयन्ति तत्सर्वम्।
मूले एव विरोधस्तस्मिन्काले विकासानाम् ।।१८८३।।

या भारतीयसरणिस्तस्यां ह्रासोऽथ सर्वस्मिन्।
आयतिकाले जातः सर्वादौ सा समुन्नतिः सर्वा।।१८८४।।

तेनैव वेदमध्ये सर्वं ज्ञानं तथा च विज्ञानम्।
क्रमशोऽथ सर्वशो वा विलोक्यते सूत्ररूपेण।।१८८५।।

न केवलं सिद्धान्ता अपितूदाहरणविपुलत्वम्।
नाना कथाप्रवाहे सहस्रशो वा निभाल्यते सर्वैः।।१८८६।।

सिद्धान्तोदाहरणे तत्त्वे द्वे सत्यतायां वा।
नूनं प्रमाणभूते लोपे कस्यापि जल्पनं तत्स्यात्।।१८८७।।

ये नूनं सिद्धान्ता कथिता वेदादिशास्त्रेषु।
प्रायोगिकं स्वरूपं कथासु तेषां समुल्लसति।।१८८८।।

जाता एव युगेऽस्मिन्नाचार्याश्चाथ विद्वांसः।
यैराविष्कृतमेतद्वेदेष्वेतेषु विज्ञानम् ।।१८८९।।

सायणसरणिर्याऽसौ व्याख्यायाश्चास्ति वेदानाम्।
यज्ञाधारितकाया सा सरणिर्विश्वरूपाऽस्ते।।१८९०।।

स्वामिदयानन्देन तु किमपि नवीनं पराक्रान्तम्।
श्रीविद्यावाचस्पतिमधुसूदनदर्शितं नव्यम्।।१८९१।।

श्रीभारतीयतीर्थैः श्रीमद्भिः शंकराचार्यैः।
गणिताख्यं विज्ञानं वेदे संसाधितं निखिलम्।।१८९२।।

स्वामिविशुद्धानन्दैः सन्दृष्टं सूर्यविज्ञानम्।
प्रत्यक्षं सन्दर्शितमासील्लोकस्य विस्मयस्तत्र।।१८९३।।

एवमियं या सरणिर्भारतगौरवमुखेन संजाता।
चकिता तयाऽथ नूनं वैज्ञानिकभूधराश्चाऽपि।।१८९४।।

सी.वी. रमणसदृशैर्गवेषकैरद्य तत्रापि।
नव्ये गवेषणाया मार्गे गौरवमथाऽऽज्ञप्तम्।।१८९५।।

यद्यपि निखिलेऽप्यस्मिन् संसारे लक्षशो लग्नाः।
वैज्ञानिका गवेषणमार्गे नव्याश्च विद्वांसः।।१८९६।।

सर्वेषामपि तेषां यन्त्राणां वा विशालानाम्।
योगो भवति नितान्तं मानवजीवनसमुन्नयने।।१८९७।।

सी.वी. रमणेन पुनर्ये सुविचाराः प्रकाशिता आसन्।
वैज्ञानिकसरणीनां मार्गे नूनं प्रवर्तमानेभ्यः।।१८९८।।

ते देशगौरवं वा नूनं संस्फोटयन्तोऽपि।
कार्ये तत्र विशालां शालामुद्घाटयन्त्येव।।१८९९।।

यदि नाम नाऽभविष्यद्विज्ञानानां विलासोऽयम्।
नूनं जाङ्गलिकत्वमास्थास्यन्मानवेषु सर्वेषु।।१९००।।

विज्ञानमेव सर्वे देशे काले कलाविलासेषु।
सर्वसमर्पकभावं स्वीकुरुते वा समुन्नतौ पूर्णम्।।१९०१।।

क्षुद्रात्क्षुद्रतरेऽप्यथ महतो वा महत्तरे क्षेत्रे।
विज्ञानेन नितान्तं प्रकाशपातः कृतो दृष्टः।।१९०२।।

विज्ञानविनाभावे विज्ञानामपि निरर्थकता।
संजाताऽसीत्काचिन्नैवाऽद्यत्वे तथा विद्या।।१९०३।।

अद्य तु तावत्सर्वा सुलभा पद्धतिरियं जाता।
नो कठिन्यं गमने कुत्राऽप्याऽस्ते च कस्यापि।।१९०४।।

दूरेऽन्तरिक्षगमने दूरे देशान्तरे गमने।
पुनरप्यथ चाऽगमने क्षणेषु यात्रा समाप्नोति।।१९०५।।

वाचां विलासकाले ध्वनियन्त्रेणाद्य यत्किञ्चित्।
साहाय्यं संस्क्रियते वक्तुश्चाऽस्ते महांल्लाभः।।१९०६।।

सी.वी. रमणायात्र च श्रद्धा विश्वासपूर्णोऽयम्।
काव्याञ्जलिः प्रदेयोऽस्माभिः सर्वात्मलाभार्थम्।।१९०७।।

८१. श्रीराजेन्द्रप्रसादः

प्रथमं राष्ट्रपतिं तं भारतराष्ट्रस्य दिव्यरूपस्य।
देशस्य रत्नरूपं श्रीराजेन्द्रं स्मरामोऽद्य।।१९०८।।

सर्वपुरातनसंस्कृतिसम्पत्तेः सर्वरक्षार्थम्।
आजीवनं य आसीत् नित्यं प्रहरीव जागरूकोऽसौ।।१९०९।।

श्रीराजेन्द्रप्रसादो महात्मना गान्धिना स्वयं क्लृप्तः।
सारल्यप्रतिमूर्तिर्महात्मनां वा स एवाऽसीत्।।१९१०।।

यस्य च दिव्या मूर्तिर्नृत्यन्ती हृदयरंगमंचेषु।
अद्याप्याकर्षयते देशप्रेमामृतैः सिक्तान्।।१९११।।

राष्ट्रीयप्रामुख्यं प्राप्तायाः कांग्रिसाख्यायाः।
संस्थाया अध्यक्षः संजातो नैकवारं यः।।१९१२।।

प्रथमः प्रधानमन्त्री श्रीमान् वीरो जवाहरः सत्यम्।
येनाऽभिन्ने रूपे संदृष्टो लोकसेवार्थम्।।१९१३।।

लौहमयोऽयं पुरुषो वल्लभभाईपटेलाख्यः।
यन्मित्रत्वं धृत्वा सर्वं कार्यं सुचालितवान्।।१९१४।।

देशस्य नेतृवर्गः सर्वो यं केन्द्रमास्थाय।
संस्फूर्तौ प्रावर्तत नवनिर्माणे परं लग्नः।।१९१५।।

आसेतुहिमाचलमथ कटकादटकप्रदेशपर्यन्तम्।
भूभागस्य विशालस्यासीत् प्रथमः सुराष्ट्रपतिः।।१९१६।।

श्रूयन्ते चाणक्यादिभिरतिपुष्टास्तु चन्द्रगुप्ताद्याः।
द्वित्राः सम्राजो वा यैः सद्-देशोऽयमेकतां नीतः।।१९१७।।

सा सर्वाऽपि नु वार्ता जाता तावत्सुपृष्ठेषु।
इतिहासानां लिखिता दूरतरः परिचयस्तैर्वा।।१९१८।।

श्रीराजेन्द्रस्तु पुनः प्रत्यक्षतयाऽस्य भूमिवलयस्य।
पुण्यश्लोको दृष्टः शासकचूडामणिर्नितराम्।।१९१९।।

श्रीमद्राजेन्द्राणां जीवनमासीत्तु कर्ममयम्।
गीताकथा तदीये चारित्र्ये गुम्फितेवासीत्।।१९२०।।

भारतमूर्तिरथासौ नम्रत्वे तादृशीं शक्तिम्।
स्वीकृतवान् सन्दीप्तो विश्वं निखिलं विमोहयामास।।१९२१।।

तत्तादृशस्वरूपं संप्राप्यासीत्पदं तु राष्ट्रपतेः।
सौभाग्याञ्चितविभवं वन्दितविद्यं यशोवलितम्।।१९२२।।

मातापितरौ धन्यौ धन्यो देष्टा च नामकरणस्य।
राजेन्द्रेऽस्मिन्नाम्न्येवागच्छति सर्वराष्ट्रसर्वस्वम्।।१९२३।।

आबाल्याद्राजेन्द्रः सद्गुणसंघातवन्दितो नितराम्।
भातिस्म कान्तमणिरिव धूलीपटलैः समाच्छन्नः।।१९२४।।

विधिशास्त्रीयपरीक्षाप्राथम्येनाऽथ संघुष्टः।
विद्योत्तमैर्विलसितो भातितरां वंगदेशेषु।।१९२५।।

छात्राऽवस्थायामथ पूर्णां संसिद्धिमाश्रित्य।
सुतरामेव विनम्रो जातः कार्येषु निपुणश्च।।१९२६।।

राष्ट्रस्य हृदयसम्राट् गांधी तावत् समादिदेश यं यद्यत्।
तत्तत्सर्वैः शिरसा विहितं प्राणान् पणीकृत्य।।१९२७।।

तेषु प्रथमं स्थानं यस्यासीत्कर्मपुरुषस्य।
तस्यैव नाम तदिदं 'श्रीराजेन्द्रप्रसाद' इति।।१९२८।।

सम्पूर्णोऽयं देशो यन्नाम्ना ध्वन्यते स्म कालेऽस्मिन्।
श्रीराजेन्द्रप्रसादस्तेष्वासीन्मूर्ध्नि संस्थितो नित्यम्।।१९२९।।

दिव्यतमाचरितानां गाथावलिरद्य तस्यैव।
सत्प्रेरणां प्रसूते सर्वं चौजः समाह्वयते।।१९३०।।

आंग्लैः पुरुषैः सार्धं विस्मापित-सर्वलोकसंग्रामे।
सत्याहिंसाशस्त्रे धारादानं कृतं तेन।।१९३१।।

कारावासतपस्या महीयसी दुर्बले देहे।
सोढा तेन नितान्तं लौहमयं रूपमास्थाय।।१९३२।।

सम्पूर्णोऽपि बिहारः कोटिजनैर्मण्डितो नूनम्।
स्वातन्त्र्ये संग्रामे राजेन्द्राज्ञां प्रतीक्षते नित्यम्।।१९३३।।

तदनु समस्तो देशो राजेन्द्रस्यानुचरभावमापन्नः।
धन्यं मनुते निखिलं शुभ्रतरं रूपमात्मीयम्।।१९३४।।

तेनैवात्मकथायां श्रीराजेन्द्रेण पुस्तिकायां स्वम्।
जीवनदर्शनमसमं घटनावल्यामुपन्यस्तम्।।१९३५।।

आत्मचरित्रविलेखनपरिपाटीयं तथाऽद्य विस्तीर्णा।
प्रेरयति सर्वहृदयान् सच्चारित्र्यस्य धारणां कर्तुम्।।१९३६।।

गान्धिमहात्मभिरपि सा स्वीयमहज्जीवनस्य संगाथा।
लोकस्य शिक्षणार्थं गौरवपूर्णा समारचिता।।१९३७।।

सोऽपि च महान् जवाहरलालो लिखति पुस्तकं तादृक्।
स्वात्मचरित्ररहस्यप्रकाशनं यत् समीरयते।।१९३८।।

शतशश्चान्यैरेषा स्वात्मकथा सत्यमालिखिता।
येन चरित्रोद्याने कुसुमानीमानि शोभन्ते।।१९३९।।

एतैरात्मवचोभिः काऽपि नवीना स्फुरति धारा।
या प्रेरणां प्रसूते तथाविधं जीवनं धर्तुम्।।१९४०।।

देशस्य कर्मरूपं यदा यदा नाशितं भवति।
दैन्यदरिद्रावास्थाऽऽगच्छति नामन्त्रिताऽपि सती।।१९४१।।

कर्मणि चरित्रधारा विच्छिन्नेवावलोक्यते यदा नूनम्।
गीतोपदेशवेला तदा तदैवाऽत्र जायते महती।।१९४२।।

आधुनिके कालेऽस्मिन् गीतामार्गे समुपलब्धाः।
आत्मचरित्रग्रन्थाः पठनीयाः स्युः प्रयत्नशतैः।।१९४३।।

तेषु श्रीराजेन्द्रप्रसादलिखितं तदात्ममयचरितम्।
सत्साहित्योल्लासे प्राथम्येनैव गणनीयम्।।१९४४।।

मौनप्रायः सर्वामपि कर्ममयीं कष्टसम्पूर्णाम्।
राष्ट्रोपकारधारां सम्यगसौ चालयामास।।१९४५।।

कृषिसिद्धोऽयं देशः कृषिकर्मणि जागरूकश्च।
कृषका एवाऽत्र सतां जीवनमात्रं सुरक्षितं कुर्युः।।१९४६।।

श्रीराजेन्द्रप्रसादः कृषकश्चासीत् परम्पराप्राप्तः।
तेनैव तस्य हृदये भूमिः सततं समुच्छलन्त्यासीत्।।१९४७।।

भूमेराकर्षणमिदमतिशयितां संस्कृतिं सूते।
भूमिष्ठानथ सर्वान् गुणांश्चरित्रे विकासयति।।१९४८।।

देशस्यास्य महीयो रूपं यद्वा जगद्विदितम्।
लोकोत्तरगुणलास्यम् तत्राऽस्ते चैकमेव सद्धेतुः।।१९४९।।

ऋषिशब्द आर्यशब्दस्तासां सद्गुणविलासभूमीनाम्।
संधारकेषु दृष्टः पूर्णं संश्लेषमापन्नः।।१९५०।।

नव्यतमा ये ऋषयस्ते नूनं स्वैर्गुणैर्नित्यम्।
जनतया हृन्मन्दिरमध्ये नीराजिताः सन्ति।।१९५१।।

चरमां चुम्बति काष्ठां संस्कृतसाहित्यसत्प्रेम।
श्रीराजेन्द्रप्रसादे तेन च तुष्टिस्तदीयाऽसीत्।।१९५२।।

देशेऽस्मिन्नेतारस्तदैव नूनं प्रतिष्ठिता जाताः।
संस्कृतश्रद्धाभरिता विज्ञा नूनं यदा जाताः।।१९५३।।

श्रीमाँस्तिलको गान्धी ब्रह्मर्षिर्मालवीयो वा।
श्रीराजेन्द्र-जवाहर-राधाकृष्णन्-प्रभृतयस्ते ।।१९५४।।

संस्कृतभाषैव सदा सच्चारित्र्यं निपाययति।
नेतृत्वस्याथ गुणान् दीप्ते कर्मणि विलासयति।।१९५५।।

संस्कृतविदुषां यदिदं केन्द्रारब्धं सुसम्मानम्।
श्रीराजेन्द्रप्रसादो राष्ट्रपतिस्तत्र कारणीभूतः।।१९५६।।

अम्भसि नलिनीपत्रं दिव्यं संशोभते यथा नित्यम्।
शासनकर्मणि लग्नो राजेन्द्रः शोभते स्म तथा।।१९५७।।

तज्जनकस्य चरित्रं मिथिलाधीशस्य विख्यातम्।
पुनरपि दर्शितविभवं श्रीराजेन्द्रे विलोकितं सर्वैः।।१९५८।।

अस्तिकतामर्मज्ञः सत्याहिंसापदेषु संलग्नः।
नित्यं पूज्यचरित्रः श्रीराजेन्द्रो विभाति स्म।।१९५९।।

श्रीराजेन्द्रस्येयं जन्मशती स्मर्यते विदां वर्यैः।
दिव्योत्तमस्य तस्य स्मरणं मंगलमयं भूयात्।।१९६०।।

८२.कार्लमार्क्सः

स जयति कार्लो मार्क्सः पीडितजनबन्धुतामाप्तः।
श्रमधनतत्त्वविवेचनपाण्डित्यं यज्जगद्विदितम्।।१९६१।।

विपुलतमाध्ययनानां संसारे सञ्चरन् योऽयम्।
वैचारिकविश्वस्मिन् नूत्नां धारां प्रवाहितवान्।।१९६२।।

शोषितजनताहृदयस्पन्दनमन्दाकिनीस्नातः ।
कार्लो मार्क्सः श्वासान् सर्वान् तस्यै समर्पयामास।।१९६३।।

दर्शनगतविषयाणां सर्वेषां मूलमन्विष्यन्।
प्रामाणिकसद्ग्रन्थान् सर्वान् सोऽयं विलोड़यामास।।१९६४।।

सामाजिकसंरचनाविभागमध्ये स्वयं पतितः।
निखिलोद्योतितविश्वः साम्यं वादं विवेचयामास।।१९६५।।

गरलाभैस्तैः श्वानैः कदर्थनायां प्रजातायाम्।
भीतामिव मानवतामभयाऽरण्ये निवेशयामास।।१९६६।।

गगने विहरणशीला दार्शनिकाः सुप्रसिद्धास्ते।
मार्क्सस्य दर्शनेनोन्मथितस्वान्तास्तथा जाताः।।१९६७।।

यन्त्राणामाधारे प्राभून्नवसभ्यतोन्मेषः।
तेनानेनैवैको शोषकवर्गः समुन्नीतः।।१९६८।।

कोटिप्रमितजनानां सुस्वास्थ्यं धूलिसात्कृत्वा।
तेषां श्रमेण सुखमयराज्यं भुङ्क्तेऽथ तादृशो वर्गः।।१९६९।।

कोट्यर्बुदेषु मुद्रा यत्पार्श्वे राजते सततम्।
तच्छक्त्या वर्गोऽयं निष्किञ्चिनरक्तशोषणे लग्नः।।१९७०।।

विपुला सेयं मुद्रा श्रमिकाणां सत्परिश्रमेणैव।
एकत्रिता निकामं ते तु पुनर्वञ्चिता एव।।१९७१।।

श्रमिकाणां पार्थक्ये विचारमात्राद्यभावे वा।
शोषकवर्गस्येयं माया सर्वा समुच्छलति।।१९७२।।

तेषां खलु सौभाग्याज्जर्मनदेशे समुद्भूतम्।
संसारे दलितानां जीवनसंदायकं ज्योतिः।।१९७३।।

वैचारिकसंघर्षोन्माथे देशस्य तस्यैव।
ये शासकाः समासंस्ते मार्क्सात् संप्रकम्पिता जाताः।।१९७४।।

निर्वासनमथ विहितं जर्मनदेशात्तु मार्क्सस्य।
लन्दनगरे स्थित्वा मार्क्सोऽध्ययनं प्रवर्तयामास।।१९७५।।

एंगेल्सं मित्रवरं भाग्यान्नूनं समालम्ब्य।
श्रमिकाणां जागरणे मार्क्सो धारां प्रवाहितवान्।।१९७६।।

सर्वस्मिन् संसारे भूकम्पं किमपि तादृशं तन्वन्।
संप्रस्तुतं स्वकीयं श्रमिकाणां किमपि घोषणापत्रम्।।१९७७।।

शतशः सहस्रशो वा लेखान् सम्यग् विचरयन् सोऽयम्।
संसारधारणायामुत्तेकजकतां समादध्यौ।।१९७८।।

संसारस्य समस्ताः श्रमिका एकीभवन्तु चाऽयान्तु।
एकीभावे भवतां श्रेयोलाभोऽस्ति सर्वेषाम्।।१९७९।।

श्रमिका एव नितान्तं सर्वोन्नततां भजन्तो वै।
स्वर्गस्थमपि समस्तमैश्वर्यं करगतं कुर्युः।।१९८०।।

अर्थाधारित-दर्शन-दान-प्रोन्नमित-संकायः ।
संसारं विस्रब्धं कृतवान् मार्क्सो निकामनम्रः सन्।।१९८१।।

नानाविध-कष्टानां स्वीकारेष्वस्ति यादृशी तृप्तिः।
सा सर्वाप्यनुभूता कार्लेन तु वैपरीत्येषु।।१९८२।।

यदि नाऽभवदेंगिल्सः मार्क्सोः मार्क्सः कथं भूयात्।
सन्मित्रलक्षणं यत्तत्तस्मिन्नस्ति चरितार्थम्।।१९८३।।

मार्क्से प्रविष्टमात्रे विचारधाराप्रवाहेषु।
भूकम्पः समजायत सर्वेष्वप्यसुरभावेषु।।१९८४।।

नाना नियन्त्रणानामासीत्सा काऽपि परिपाटी।
निगडितवाचो यस्यां सर्वामाशां समापयन्त्येव।।१९८५।।

किन्तु स कार्लो मार्क्सो विपरीतायां परिस्थितौ तादृक्।
वैचारिकमन्थनमथ सम्यक् कृतवान् सुबोधार्थम्।।१९८६।।

इतिहासानां मननं स्वीकृतवानात्मबोधार्थम्।
संसारदेशसंस्कृतिसमधिकसाहसभरैर्नितराम् ।।१९८७।।

सामाजिकार्थिकविपद्वैरूप्येषु प्रजागरूकेषु।
ये शान्तिं मन्वानास्तेषामालोचनां चक्रे।।१९८८।।

हीगलकाण्टप्रभृतिभिरत्यादिष्टे हि दर्शने सम्यक्।
मननं विधाय तेषां नितरां सम्पूर्तिमातेने।।१९८९।।

लन्दनगरे निवसन् पुस्तकमन्दिरमथापि सत्कुर्वन्।
नाना लेखान् विलिखन् विचारसारान् पुरश्चक्रे।।१९९०।।

सा च तदीया दयिता कष्टानां संघबद्धानाम्।
मध्येऽधिकं समृद्धा सेवां चक्रे सुनिपुणस्य।।१९९१।।

अर्थाभावस्यासीत्प्रत्यक्षाऽनुभव एतादृक्।
सम्यक् परिचरणनामभावभावे मृता हि तत्पुत्री।।१९९२।।

मूर्धन्या ये मान्या जगति विचरान्समर्पयन्तो वा।
स्वीये जीवनकाले सर्वं कष्टं सहन्ते नु।।१९९३।।

नाना सुखभोगानां शक्तिर्यापैति मानवस्येयम्।
वैचारिकवैषम्यं प्रतिकूलं यत्र चोल्लसति।।१९९४।।

संघर्षाणां गाथामभिनवभावप्रपूरितामेनाम्।
साक्षात् कृतवान् लन्दननगरे मार्क्सो विनीतभावेषु।।१९९५।।

कैपिटलाख्ये ग्रन्थे यद्यल्लिखितं पुनस्तेन।
सा ननु गीता जाता श्रमिकाणां स्वात्मलाभाय।।१९९६।।

नाना क्लेशान् सोढ्वा तादृशपुस्तकविलेखने सम्यक्।
जागरणेषु नितान्तं प्रसन्नतायाः परा काष्ठा।।१९९७।।

सपूर्णं जीवनमथ जागरणे संव्यतीतं यत्।
तेन च नवनीतं तत् प्रकटीभूतं किमपि तादृक्।।१९९८।।

संसारे ये विज्ञास्तैरेतत्सर्वमाकूतम्।
संधारितं नितान्तं नम्रतरैस्तैर्मनोभावैः।।१९९९।।

क्रान्तिं सूते यस्य च विचारधारा श्रमासारा।
कारायितभूभारा नाराधितवैभवाऽधारा।।२०००।।

मार्क्सो ननु जनतायां देवः सेवासमारम्भैः।
कार्ये क्रान्तिभरैर्ननु सम्पूज्यः कोऽपि संजातः।।२००१।।

मार्क्सः कालविशाले जाले सततं परिव्याप्तः।
निखिलमिदं जगतीतलमथ संक्षुब्धं परं कृतवान्।।२००२।।

परितोऽपि जागृताभिरेताभिर्ये समस्याभिः।
सततं पलायमानाः किं ते नूनं प्रकुर्वन्ति।।२००३।।

प्राचीनं सर्वमिदं समापनीयं पुनर्नूत्नम्।
सर्वं प्रगुणीकार्यं सर्वं तत्साम्यभावेन।।२००४।।

साम्यं सर्वं स्थाप्यं वैषम्यं दूरणीयं हि।
वैषम्ये नाशोऽयं साम्ये सा सर्वसम्पत्तिः।।२००५।।

उत्पादनवेलायां धनं श्रमश्चापि सम्भूय।
नाना नववस्तूनां वैपुल्यं सम्प्रकाशयति।।२००६।।

धनिनामधिपतिभावो दूरीकार्यः प्रयत्नेन।
सर्वेषामपि नूनं श्रमिकाणामर्थलाभोऽयम्।।२००७।।

श्रमिका एते नित्यं सर्वविधं दौस्थ्यमुपयाताः।
स्वामित्वेन कथं वा स्वयंवृताः स्युर्विशेषतो यत्नैः।।२००८।।

मानवमात्रस्य तथाऽलोक्यः कश्चिन्नवोन्मेषः।
यस्य च विकासधारा क्रोडीकुरुतेऽखिलं विश्वम्।।२००९।।

मार्क्सेन समुद्योगः कश्चन सोऽयं समारब्धः।
येनानेन नितान्तं युगसद्भावः समायातः।।२०१०।।

बहुमतमास्ते तदिदं श्रमिकाणां सर्वसंसारे।
अत्यन्ताल्पीयस्त्वे धनिका एते स्थिता नूनम्।।२०११।।

ते ननु धनमदगर्वे मानवमात्रस्य परिशोषे।
सर्वां स्वीयां बुद्धिं चालितवन्तो निकामसन्तुष्टाः।।२०१२।।

जीवनसरणिरियं सा तेषां कृपया च यैर्लब्धा।
तेऽपि नितान्तं दीप्ताः श्रमिकाणां शोषणे लग्नाः।।२०१३।।

कार्लो मार्क्सः सर्वां श्रमिकाणां तां विशृखलां शक्तिम्।
प्रगुणीकर्तुं नूनं दिवानिशं सत्परिश्रमं कृतवान्।।२०१४।।

लन्दननिवासकाले श्रमिकाणां दुर्दशां दृष्ट्वा।
तेषामुत्थानार्थं मार्क्सो जीवनसमर्पणं कृतवान्।।२०१५।।

तां दुर्दशां च दृष्ट्वा श्रमिकाणां विषमतामथ ताम्।
मार्क्सो दिवानिशं वा विचारमार्गे विबभ्राम।।२०१६।।

आलस्यमथ च दैन्यं विचारभेदो मिथो कलहः।
श्रमिकाणां सर्वेषां मारकतत्वानि तान्यासन्।।२०१७।।

केवलमथ चैतेषां श्रमिकाणां प्रावधानेषु।
सर्वा समुन्नतिः सा विहिता विश्वस्य तोषकरी।।२०१८।।

नानाविधरूढीनां नितरां दूरीकरणलग्नः।
मार्क्सः सर्वासामथ तासां रूपं प्रदर्शितवान्।।२०१९।।

जड़तायाः सम्प्राप्तौ रूढीनामस्ति साम्राज्यम्।
एताभिर्वा नित्यं शोषणलाभो भवत्येव।।२०२०।।

रूढ़ीनामुन्मादे श्रमिका एते नितान्तपरिहीनाः।
नो किञ्चिदपि विधातुं सामर्थ्यं धारयामासुः।।२०२१।।

सर्वासामथतासां रूढ़ीनां दूरकरणेषु।
मार्क्सेन नव्यमार्गानुमानकार्यं समारब्धम्।।२०२२।।

संगठनं श्रमिकाणां विश्वस्मिन् सावधानतया।
तेषां हितावहविचारान् सर्वान् संप्रकल्पयामास।।२०२३।।

एंगिल्सो ननु तेषां सर्वेषां सद् विचाराणाम्।
सम्यक् प्रकाशनार्थं प्रबन्धबन्धं प्रबोधितवान्।।२०२४।।

उभयोरपि तत्साम्यं सम्यग् विश्वं प्रकल्पितवान्।
संसारे नवदीप्तिर्येनानेनैव संजाता।।२०२५।।

अस्तंगता हि सर्वा श्रमिकाणां कार्यशक्तिश्च।
सा जागृता निकामं लेनिन सदृशो विनिर्गतो यस्याः।।२०२६।।

मार्क्सस्य विचाराणां या धारा संप्रवाहिता जाता।
तामथ सम्यगधीत्यैवासीवन्ननु लेनिनस्तु संतुष्टः।।२०२७।।

सोवियतनाम्नि देशे रक्तां सेनां विनिर्माय।
मार्क्सस्य तां व्यवस्थां मूर्तां कृतवान् स लेनिनः पूर्णाम्।।२०२८।।

काऽपि तदीया क्रान्तिर्विश्वस्मिन् ख्यातिमागता सेयम्।
रक्तप्रवाहपूर्णा जाता देशेऽथ सम्पूर्णे।।२०२९।।

जाराख्योऽपि स राजा युद्धे सम्यक् पराजितो जातः।
श्रमिकाणामथ राज्यं सर्वजनानां सुसंजातम्।।२०३०।।

शासनकार्ये लग्नास्ते चेमे लेनिनादयो भूयः।
पञ्चानामब्दानां योजनमथ संप्रकल्पयामासुः।।२०३१।।

एताभिश्च सुनिर्मलश्रमपरिपूर्णाभिरेव पद्धतिभिः।
सोवियतदेशमध्ये सर्वविधा सा समुन्नतिर्जाता।।२०३२।।

मार्क्सस्य च यत्स्वप्नं तद्वै नूनं सुचरितार्थम्।
अर्धञ्चैतद्विश्वं मार्क्सीयां पद्धतिं वृणुते।।२०३३।।

वैयक्तिकसम्पत्तेः शून्यत्वं यत्र संजातम्।
सर्वं कार्यवशादथ सर्वेषां वैभवं यत्र।।२०३४।।

यत्र पुरा मुष्टिमिता लोकाः सम्पत्तिशालिनश्चासन्।
तत्र समस्तं राष्ट्रं संपत्तिभिरद्य संपूर्णम्।।२०३५।।

सर्वापीयं घटना सर्वविचित्रान्विता जाता।
मार्क्सस्यैव विचारोत्तेजकता तत्र कारणीभूता।।२०३६।।

बह्व्यो विचारधारा विद्वद्भिः संप्रकाशिता एव।
किन्तु क्रोडीभूतं विश्वं मार्क्सस्य धाराभिः।।२०३७।।

वैज्ञानिकयन्त्राणामाविष्कारेण या नूनम्।
पद्धतिराविर्भूता पूर्णा सा मार्क्सधाराभिः।।२०३८।।

अद्यत्वे बत लोके वैज्ञानिकयन्त्रमयतायाम्।
पूर्णतमं साम्राज्यं सर्वत्रैवानिवारितप्रसरम्।।२०३९।।

यन्त्रोपलब्धिभागः सम्पूर्णः सर्वसाधनैर्युक्तः।
कस्याप्येकस्य पुनर्नैवास्ते तत्र स्वत्वं भोः।।२०४०।।

नैवालस्यं क्षम्यं नो वा विपरीतसंचारः।
राष्ट्रोन्नतिर्हि परमा साध्या सर्वस्य संतुष्ट्यै।।२०४१।।

मार्क्सोपदर्शिता ये पन्थानस्ते समासाद्याः।
जीवनमेव तदात्वे सम्पूर्णं सम्यगुन्नतं जातम्।।२०४२।।

सुस्वास्थ्यं कियदस्तीत्येतादृशप्रश्ननिर्णयायेदम्।
सोवियतनाम्नि देशे जनतास्वास्थ्यं निभाल्यतां सम्यक्।।२०४३।।

कीदृशशिक्षापद्धतिरुन्नतये संप्रकल्पते सैषा।
विचिकित्सा वा नूनं तत्रोत्तरभावमुपयाता।।२०४४।।

बालानां वा मध्ये संचितमास्ते परं राष्ट्रम्।
बालानां सर्वेषां सेवा वा तत्र दर्शनीयैव।।२०४५।।

महिलानामेतासां समानभावः समुन्नतये।
संबोभवीति विपुलो भावस्तत्रानुसन्धेयः।।२०४६।।

रूढीनामुन्मादैर्दूरीभूतं च तद्राष्ट्रम्।
बाधाभिर्विविधाभिर्दूरतरं सत्यमायातम्।।२०४७।।

सौन्दर्यस्य समग्रा संसृष्टिस्तत्र या जाता।
नाना कलाभिरामैर्मनोहरा साऽस्ति संदृश्या।।२०४८।।

धार्मिकविश्वासानां व्यक्तिगतं मूल्यमेवाऽस्ते।
राष्ट्रोन्नतये नतमां स्पृहणीयास्ते समाचाराः।।२०४९।।

धर्मोन्मादे येयं समुन्नतिः कापि सन्दृष्टा।
श्रमिकाणां वर्चस्वं भूतललुण्ठितमभूत्तत्र।।२०५०।।

अन्ये श्रमं प्रकुर्युश्चान्ये तल्लाभसन्तुष्टाः।
भूयासुश्चैवेयमासीत्सर्वा सुगुम्फिता सरणिः।।२०५१।।

नैव किमप्यायोजनमत्र कदाचित्सुसम्भवति।
यत्र परार्थं बुद्धिः श्रमश्च सर्वः समर्पितो भवति।।२०५२।।

आत्मार्थं राष्ट्रार्थं यत्र समेषां समुन्नतये।
संस्फूर्तिः सञ्जाता नूनं सन्मार्क्सवादोऽयम्।।२०५३।।

सर्वविधोन्नतिरेषा सम्यक् श्रमसत्यसम्भरिता।
आयत्यामतिदीर्घा संजाता विश्वबन्धुत्वे।।२०५४।।

दैत्यानां तु समेषां हानिः काचित्समस्तेयम्।
मार्क्सेन तत्र लिखिता मानवताशोषकाणां वा।।२०५५।।

सपूर्णा मानवता धन्या जाता यदा मार्क्सः।
स्वीयं जीवनमसमं मानवतायै समर्पितवान्।।२०५६।।

मार्क्सोऽद्यापि समीपे समास्थितः सम्यगातनुते।
मैत्रीभावं विपुलं विलोपिते साम्यता भावे।।२०५७।।

भारतवर्षे ननु तत्साम्यं मूले विनिश्चितं चाऽस्ते।
एकोऽहमेव भणितिः सैषा वेदे समादिष्टा।।२०५८।।

एको मार्क्सो वादो व्यवहारेषु स्वयं दीप्तः।
अर्थाधारितधर्मो यत्र प्रोच्चैः समुल्लसति।।२०५९।।

मार्क्सस्येयं धारा वैषम्याणां विलोपयित्री स्यात्।
मानवतापातकमथ सर्वञ्चैतत्सुदूरितं भूयात्।।२०६०।।

षष्ठद्वीपः

८३.नारी

वर्जनमथ परिहारः सभ्ये भावे प्रवेशको भवति।
प्राकृतिकश्च विवाहो वर्जनमभ्येत्य संमतो नूनम्।।२०६१।।

नैवं नैतत्कार्यं नो तत्कार्यं न चैवादः।
इति नो नोमय शिक्षा सभ्यत्वं सम्यगादिशति।।२०६२।।

खादनपानं यौनं गमनागमनं तथा सर्वम्।
प्राकृतिकं वर्जनतासंगतमाभाति कमनीयम्।।२०६३।।

सम्यग् संजनयन्तो भारोत्थापितपरीतापम्।
भ्रंशयति सर्वमाप्तं यद्यत्तप्तं तपो घोरम्।।२०६४।।

अपि संसारे मान्या सर्वैर्या वै वदान्येयम्।
स्पर्शविषमूर्च्छनायां सर्वं नाट्यं समापयति।।२०६५।।

आश्वस्तामपि धूर्तां सारामपि सारसंहर्त्रीम्।
दिव्यामपि नरकस्थां विरोधिभावैः समीकृतामेनाम्।।२०६६।।

नारीं कथमहि को वा वर्णयितुं प्रेरितो भूयात्।
सर्वत्रैवाऽत्र सखे खेलति विविधः समुद्योतः।।२०६७।।

अस्तव्यस्तसमस्ता सैषा सर्वा समञ्जसैव 'स्यात्।
निखिलं लोकं सैषा निमिषैः संभ्रान्ततां नयति।।२०६८।।

सर्वज्ञानामथवा सर्वा बुद्धिः समाहिता तिष्ठेत्।
किन्तु न ये वा तादृशभावे तेषां गतिः कियती।।२०६९।।

मानापमानवेला संवेगान्धारयन्तीयम्।
स्वर्गनिरयमध्ये वा सम्पत्तिं भोगमाप्नुते नित्यम्।।२०७०।।

८४.समस्या

एकस्तावत् शब्दो यो हि 'समस्ये' ति संप्रथितः।
नानाविधसंयोगे वियोगरूपेऽथ जागर्ति।।२०७१।।

यस्यां विचारसरणौ चिन्तनमथवाऽपि वा कष्टम्।
संमिश्रितमिव दृष्टं सैव समस्येह संकथ्या।।२०७२।।

आनन्दानामपि वा कापि समस्या विभासिता भवति।
किन्त्वानन्दाऽऽघाते समस्ययेयं जनिर्लब्धा।।२०७३।।

न भवति काऽपि समस्या यत्र तु चिन्ताचितिर्नास्ति।
यत्र तु जाता चिन्ता सैव समस्येह संकथिता।।२०७४।।

गङ्गाजलमिव नित्यं संसरतेऽग्रे समस्येयम्।
किन्तु सदैव समस्या गङ्गाजलवत्स्थिताऽऽभाति।।२०७५।।

अग्रेसरीभवति वा जीवनमेतत्समस्याभिः।
नित्यसमाधानानां काप्यवलिस्तत्र जागर्ति।।२०७६।।

यदि नैवं बोभूयात् नो भूयासुः समस्या वा।
तत्र समाधानं यदि नो बोभूयात्तदा प्रलयः।।२०७७।।

नित्याऽऽक्रमणाक्रान्तं जीवनमेतत्समस्याभिः।
सत्यसमाधानैस्ता दूरीकृतवैभवा दृष्टाः।।२०७८।।

८५.उत्सवः

उत्सवसुषमा निखिला मानसमुल्लासयन्तीयम्।
विद्योतयति हसन्तीं कामानां टीकितां शोभाम्।।२०७९।।

रम्यतरेयं शोभाभरिता विद्युद्विलासनिःश्रेणी।
ध्वनिविस्तारकयन्त्रैरान्दोलयते चिरं चेतः।।२०८०।।

भाषणमाला सेयं मनीषिमूर्धन्यवक्तृभिर्दत्ता।
संप्रेरयते ज्ञाने विज्ञाने क्षेत्रमन्वेष्टुम्।।२०८१।।

ये राज्यपालमन्त्रिप्रमृतय एते समागता नूनम्।
तेषामुपस्थितीनां संभारा दर्शनीयाः स्युः।।२०८२।।

मीलितकीलितजनतावाणीसन्देशितस्वार्थाः ।
नेतारोऽपि च ते ते समुत्सवे सर्व एव सम्मिलिताः।।२०८३।।

भव्यमहत्तरयानावलिरपि सैषा बहिः स्थिता भाति।
उत्सवसारां शोभां परिवर्धयितुं चिराल्लग्ना।।२०८४।।

शतशश्चैते युवका यौवनवत्यश्च सुन्दर्यः।
कार्येषु धावमाना नेत्रोत्सवमर्पयन्त्येव।।२०८५।।

८६.गणतन्त्रम्

निर्वाचनं चुनावो मतदानं पारिवारिकाः शब्दाः।
भारतभाग्यविधातुः कोशे दीप्तिं वितन्वतेऽद्यत्वे।।२०८६।।

स्वाराज्यं साम्राज्यं सर्वाधिकचक्रवर्तित्वम्।
निखिलं समुद्रपारे गतं हिमाद्रौ गतं किं वा।।२०८७।।

पारंपरिकी याऽसीद्राज्ञां सरणिस्तु भारते वर्षे।
वल्लभभाईपटेलस्तां सर्वां लोपयामास।।२०८८।।

आंग्लानां यच्छासनमासीद्विपुलं पृथिव्यां वा।
यत्र च सूर्याऽस्तोऽपि तु नैवाऽभवदिति सुविख्यातम्।।२०८९।।

जनतैतद्देशीया समापयामास भारताद्वर्षात्।
विरचितनव्यविधानं नव्यमिदं भारतं जातम्।।२०९०।।

राजा यथा भवेद्वा प्रजा तथैवेति या भणितिः।
सा प्रत्यक्षं सिद्धा विलोक्यते सर्वमूलं सा।।२०९१।।

गणतन्त्रात्मकशासनपद्धतिरङ्गीकृता स्वतन्त्रेण।
भारतवर्षेणेत्थं चुनावचक्रं समायातम्।।२०९२।।

बहुमतमाद्रियते यन्निर्वाचनसरणिदीक्षायाम्।
तन्नूनं संसारे प्रभावमयतां समादिशति।।२०९३।।

मतदात्री जनतेयं स्वयमेवेत्थं स्वशासनं रुचिरम्।
संस्थापयति समग्रं विलोपयत्येव विपरीतम्।।२०९४।।

संसारे सर्वाऽधिकजनगणनासिद्धगणतन्त्रम्।
भारतवर्षेऽद्यत्वे विलोक्यते पूर्णरूपेण।।२०९५।।

अद्यतनेऽस्मिन्देशे चुनावकार्ये गुणाश्च बहवस्ते।
अनुभवविभवसमेता आयान्त्येव प्रकामविस्तारम्।।२०९६।।

जनगणहृदयाऽकाशे भूयान् विश्वासलाभोऽयम्।
सत्तासाधनकारी विलोक्यते यो विलुप्त एवासीत्।।२०९७।।

नगराणां ग्रामाणामैतिह्ये चित्रितस्थलानां च।
शुभ्रविकासविलासो विलोक्यते यो मनो हरति।।२०९८।।

साक्षरताऽपि समृद्धा जनतायां निष्प्रभा याऽसीत्।
जन-जन नामोल्लेखनमपि जातम् मुद्रितं सर्वम्।।२०९९।।

भारतराष्ट्रपतीनां प्रवर्तिता सा परम्परा दिव्या।
श्रीराजेन्द्रप्रसादादारभ्यैषा विभासते सततम्।।२१००।।

वीरजवाहरलालादारभ्यैषा प्रधानमन्त्रित्वे।
पारंपरिकी गाथा निखिलं विश्वं विमोहयते।।२१०१।।

नाना नवराज्यानां सर्वोच्चा राज्यापालास्ते।
सर्वैर्विभवैर्युक्ता विभान्ति देशस्य नेतारः।।२१०२।।

राज्यविधानसभायां शासनकर्मणि सुदक्षाणम्।
मण्डलमेतदतीवोल्लसितं नूनं समाभाति।।२१०३।।

प्रतिराज्यं संगठितं नेतॄणां मन्त्रिमण्डलं निखिलम्।
भारतराष्ट्रस्य चिरात् कुरुते शिर उन्नतं सततम्।।२१०४।।

निखिलपदेष्वद्यत्वे भारतजनतानिवेशोऽसौ।
सन्दृश्यते पुरस्तात्सुदिनं चैतद्विलोक्यते पुरतः।।२१०५।।

प्राचीनोऽयं देशः संसारे सर्वमान्यश्च।
तत्राऽन्वेषणविधया विलोक्यते वाङ्मयं सर्वम्।।२१०६।।

नवरचनाबाहुल्यं सोत्साहं जायते तादृक्।
स्वातन्त्र्यस्य फलं तद् विलोक्यते पूर्णरूपेण।।२१०७।।

सामाजिकसंरचनामध्ये चैवाथ दोषराहित्यम्।
शासनसंचालितमथ विलोक्यते सर्वसमतायाम्।।२१०८।।

प्रतिपञ्चवर्षमवधीकृत्यैवाऽस्ते चुनावपरिपाटी।
तत्र च विजयमवाप्यैवाऽस्ते शासकविनिर्णयः सम्यक्।।२१०९।।

अनया विधया नूनं वारद्वयमत्र यज्जातम्।
परिवर्तनं सुविपुलं शासनकार्ये सुदक्षाणाम्।।२११०।।

गणतन्त्रात्मकपद्धतिरित्थं जागर्ति देशेऽस्मिन्।
जनमानसनवतायां विपुलान् भावान् विलासयति।।२१११।।

८७.दीपावलिः

दीपावलीति संज्ञा सर्वोत्तमराष्ट्रसंस्कृतौ जयति।
सा सर्वेषां मान्या लक्ष्मीपूजा कृता यस्याम्।।२११२।।

जीवननवसाफल्यानामपि सैषा प्रतीकभूताऽस्ते।
परितः प्रकाशमाला यस्यां सा दीपमालिका जयति।।२११३।।

अङ्गीकृतविभवानां वैभवमसमं प्रतीक्षमाणानाम्।
नानाभेदयुतानां सा सेयं भेदभञ्जिका शाला।।२११४।।

श्रममयसागरमथनोद्भूता सत्यं विभास्वरा लक्ष्मीः।
निबिड़ान्धकारमध्ये प्रकाशमालां विभासयते।।२११५।।

पूर्वैर्ऋषिभिस्सेयं लक्ष्मी माता च निर्ध्याता।
पिण्डीभूता सर्वा सर्वविधा वा समुन्नतिः सेयम्।।२११६।।

नानाविपत्तिजालैराबद्धे सर्वतः काले।
आर्षप्रज्ञा सैषा नवसंस्फूर्तिं समादिशति।।२११७।।

मलिनमुखप्रतिबिम्बं दीप्तं दीपावलीकाले।
संस्फूर्तं सर्वस्मात् निजमालिन्यं विदूरयतु।।२११८।।

या प्राचीननवीने विभाजिका कल्पिता रेखा।
लक्ष्मीविलासशोभा दूरीकृतविग्रहा सेयम्।।२११९।।

नानाचिन्ताक्रान्ता अद्यत्वे ते च ये केचित्।
कुण्ठाऽलिङ्गितकायाऽसूयन्त्येवेदृशीं सुषमाम्।।२१२०।।

स्वीयमसामर्थ्यं ये तर्कैरपि पोषयन्तोऽपि।
पूर्वजनिन्दां कृत्वा गहनां कृतकृत्यतां याताः।।२१२१।।

किन्तु समायातेऽस्मिन् ननु भवपरितोषिते काले।
व्यपगतसंज्वरकाया इव परितो दीपयन्ति दीपालिम्।।२१२२।।

दीपावलीयमाराज्जीवनवेलासु संज्वलिता।
नो केवलं समन्ताद् ध्वान्तमनाशां विदूरयति।।२१२३।।

आशानवसंचारे नृत्यन्ती दीपमालिका सेयम्।
रोमाञ्चयति नितान्तं हर्षमयीं वृष्टिमातनुते।।२१२४।।

क्षीरोदस्य च तनया नित्यं सा लोकमाता मा।
कमलालया भगवती प्रकाशिता सुप्रसन्ना स्यात्।।२१२५।।

मान्द्यं दूरीकुर्यात् सुप्तं चोत्थापयेत् सततम्।
वैषम्यं नैर्घृण्यं परितः परितापयेन्माता।।२१२६।।

८८.महाशिवरात्रिविभूतिः

शंभुं प्रणौमि नित्यं सर्वैश्वर्यान्वितं शिवदम्।
वेदानां प्रतिपाद्यं सर्वजगत्सारसर्वस्वम्।।२१२७।।

शंकर एव नितान्तं वशंकरो निखिलविश्वानाम्।
कोटिप्रमितानां यो ब्रह्माण्डानां नियामकोऽचिन्त्यः।।२१२८।।

सर्वे वेदा यस्य च सत्स्तोत्राणां प्रकाशने लग्नाः।
नैवाप्नुवन्ति पारं परं पदं स्तोतुमुपयाताः।।२१२९।।

यः कालकूटमादौ निपीतवान् हेलयैव सदयत्वात्।
दृष्ट्वा ज्वलितानमरान् क्षणमात्रेणाद्भुतं कृतवान्।।२१३०।।

यः कोऽपि नाम गायति हेशिव, हेशिव शिवेति माधुर्यैः।
रञ्जितमद्यापि तदा क्षणमात्रेणैव रक्षति तम्।।२१३१।।

सर्वेषां स्तोत्राणां परमं स्तोत्रं महेशस्य।
श्रीपुष्पदन्तरचितं स्तोत्रं कल्याणदं जयति।।२१३२।।

यच्चरणधूलिकणिकामपि शिरसा पूजयितॄणाम्।
सर्वे वशंवदाः स्युर्देवाः स्वर्गे नराश्च भूलोके।।२१३३।।

ये संस्मरन्ति नित्यं शंकरमाशुप्रदायकं भक्त्या।
तेषां करस्थमेतन्निखिलं भव्यं विभूषितं रूपम्।।२१३४।।

सोऽयमनादिरनन्तोऽनन्तैश्वर्यैः समीडितो नित्यम्।
भगवत्याः पार्वत्याः स्वीकृतकायो विगतमायः।।२१३५।।

श्रीनीलकण्ठमेवं नित्यं प्रणमामि भूतेशम्।
सर्वानन्दोमत्तं लक्षितलक्ष्यं जगत्पतिं दिव्यम्।।२१३६।।

हे देव, काशिकायां विहिताऽवासं विशेषरूपेण।
त्वामामनन्ति पुण्याः पुराणनवसंग्रहाः सर्वे।।२१३७।।

काशीयं सर्वेषां तीर्थानां राजधानी या।
विश्वेश्वरस्य यत्र स्थितिरश्रान्ता विभासते सततम्।।२१३८।।

अप्यत्राऽऽविर्भूता सर्वैश्वर्यैर्विराजिता माता।
लोकत्रयेण वन्द्याऽन्नपूर्णा चरणास्थिरा देवी।।२१३९।।

नानारसनिष्यन्दस्तवचरितामृतनिषेवणाल्लब्धः ।
त्वच्चरणे प्रणिपातः सर्वोन्नतिदायको जयति।।२१४०।।

हे नीललोहित, कथं निवेदनीयं किमपि तुभ्यम्।
सर्वं कथितं पुण्यैः प्राक्तनकविभिर्न किञ्चिदवशिष्टम्।।२१४१।।

किन्तु विभो, सैषा ते माया सर्वान् विमोहयते।
तां कृपया परिपलाय, मोचय तस्याः प्रदेहि ते करुणाम्।।२१४२।।

हे विश्वेश्वर, किञ्चित्कृपाकटाक्षं यदि क्षिपसि।
का ते हानिस्तस्मान्नैतच्चित्ते समायाति।।२१४३।।

मग्नं मां पापार्णवमध्ये समुपेक्षसे देव।
कुतुकिन्, किमिदं कौतुकमवेक्षेसे चेत् प्रसन्नोऽसि।।२१४४।।

यदि तव तोषः कश्चिन्मद् द्वारा जायते तदा धन्यः।
विनिपातोऽपि निकामं सोऽयमुपरि सर्वसिद्धीनाम्।।२१४५।।

८९.कविता

कविता स्वात्मतृप्तिः कविता निजदुःखदूरणायालम्।
निष्कण्टकसाम्राज्ये कविता चरमाभिषेकोऽयम्।।२१४६।।

हृदयस्पन्दनभावे मन्दीकृतनिखिलखेदानाम्।
कविताकल्पलतेयं कामानां वर्षणं कुरुते।।२१४७।।

९०.वार्ता

दिव्यो-त्तम-विभवाऽमृतसंचारा जीवनाऽधारा।
कामानां काचिदियं वार्ता जगदीश्वरी भवति।।२१४८।।

वार्तायां जातायां सन्तोषः कीदृशः प्राप्तः।
पूर्वं सर्वं लुप्तमेतन्नो मानसं ह्यासीत्।।२१४९।।

वार्तेयं ननु काचित् विज्ञाता वाऽप्यविज्ञाता।
हृदये स्पन्दनमभितः कुरुते रोमाञ्चसञ्चारैः।।२१५०।।

काचिद् वार्ता मुखतः प्रवर्तिता सच्चरित्रविभवाढ्यैः।
संमोहयति स्वान्तं नितान्तकान्तोल्लसच्छान्तम्।।२१५१।।

वार्ता नूतनरूपा पुरातनी चापि वार्तेयम्।
वार्ताऽनन्ता जाताऽनन्तसमाचारपत्रेषु।।२१५२।।

श्वासे श्वासे वार्ता जीवनकाले तु सर्वस्मिन्।
वार्तैवेयं निखिला जनजनहृदयेषु संचलिता।।२१५३।।

यदि नास्ति कापि वार्ता प्रयोजनं वा किमपि नास्ति।
वार्ताया अस्तित्वे जनुषः साफल्यमपि भवति।।२१५४।।

करणीयेयं वार्ता वरणीया चापि धरणीया।
मानसिकचिन्तनायामादरणीयैव वार्तेयम्।।२१५५।।

विषयविभेदविभिन्ना नाना चारित्र्यभिन्नाश्च।
भिन्ना मनोविनोदैर्भिन्ना भिन्ना विलोक्यतां वार्ता।।२१५६।।

दिव्यप्रभावपूर्णा ओजोवाग्गुम्फिता सेयम्।
मानसिकाऽन्दोलनकररूपैर्नीराजिता वार्ता।।२१५७।।

अहो अहो संपुटिता पुनः पुनः संश्रवणलोभा।
उद्दामभावनाभिः परिपूर्णा कापि वार्तेयम्।।२१६३।।

वार्ता नीला पीता रक्ता हरिता सुवर्णमयवर्णा।
सुश्वेता रंगमयी सौरभभरिता भवति वार्ता।।२१५८।।

वार्तायामपि वार्ता तस्यां पुनरागता वार्ता।
जातायां पूर्णायां पूर्णैवैषाऽवशिष्यते वार्ता।।२१५९।।

खण्डे खण्डे वार्ता ह्यखण्डरूपा तथा वार्ता।
मिश्रणरूपा वार्ता सर्वैष्वापेक्षिकी वार्ता।।२१६०।।

९१.आश्चर्यम्

वयमपि तत्रत्यानां पापानां क्षालने सिद्धाः।
कस्मात्सिद्धिर्दूरे, महत्तपस्तप्तमाश्चर्यम्।।२१६१।।

परमाल्हादनिमग्नं तदिदं चेतो विचारयति।
कथमेतत्सर्वमिदं सम्यक् संजातमाश्चर्यम्।।२१६२।।

भो भोः केऽत्र भवन्तः कस्मादेषाऽद्य घोषणा भवताम्।
अभिनववार्ताऽकस्मात् श्रुता वितनुते नवीनमाश्चर्यम्।।२१६३।।

यस्य मुखे न कदाचित् रेखा काचित् प्रसादमयी।
संदृष्टा सर्वाङ्गे तस्य तु हासोऽद्य नाश्चर्यम्?।।२१६४।।

एकैको मतदाता यस्मै स्वमतं निषेधितवान्।
विजयी स एव जातो मतगणनैषा न वाऽऽश्चर्यम्।।२१६५।।

९२.विद्यावैभवम्

विद्योपार्जनमखिलं जीवनयात्रासु सर्वस्वम्।
तेन विनैतज्जीवनमास्ते सर्वस्वशून्यतारूपम्।।२१६६।।

येयमविद्या सा वा विश्वस्यैवास्ति कारणीभूता।
अथ तद्विमुक्तियुद्धे विद्यैवास्ते परं शस्त्रम्।।२१६७।।

विद्याधिगमः सोऽयं यस्मात् संजायते नित्यम्।
गुरुरिति गिरां गरीयान् शब्दस्तत्रैव संप्रयोगार्हः।।२१६८।।

यस्माद्वा कस्माद्वा ज्ञानाधिगमः सुसंजातः।
सर्वो गुरुशब्दार्थस्तत्र तु सर्वत्र जागर्ति।।२१६९।।

धारा विद्याया या प्रारम्भादेव वहति मधुपूर्णा।
अक्षरजगतः परिचयमारभ्यास्ते प्रवृत्तिः सा।।२१७०।।

शास्त्राणामध्ययने प्रयोगकरणे विचारसंचारे।
नवनवरचनाकरणे विपुलं रूपं नु विद्यायाः।।२१७१।।

दुर्गोपमेषु पुस्तकगृहेषु दृष्ट्वा सरस्वत्याः।
आनन्त्यं रूपाणां धन्यत्वं मनसि जागर्ति।।२१७२।।

विद्यावितरणकर्मणि ये निष्णाताः कृपालवो धीराः।
प्रणिपातपरिप्रश्नैः सेवाभिस्ते तु संसेव्याः।।२१७३।।

प्रणिपातमुखैरथ तेषां सम्यक् संसेवितोपायैः।
ज्ञानस्य वितरणे ते समुन्मुखा एव जायन्ते।।२१७४।।

आलूक्षाऽनूचाना युक्ता धर्मेषु कामनापूर्णाः।
गुरवो विद्यावात्प्यै गन्तव्याः साधु नम्रतया।।२१७५।।

प्राणिपातसमारम्भैराचार्यास्तानि रूपाणि।
विद्याया संक्षेपैर्बृहद्भरैर्वाथ कथयन्ति।।२१७६।।

काले पुरायुगीने लेखनसम्भारकाठिन्ये।
कण्ठस्थीकरणेन तु विद्यावाप्तिः प्रवर्तिता देशे।।२१७७।।

'श्रुति'शब्दः 'स्मृति'शब्दः परम्परा सम्प्रदायशब्दाश्च।
कण्ठस्थीकरणे च स्मृतौ च परिभाषिताः सन्ति।।२१७८।।

शुश्रूषा तु गुरुणां विद्याधिगमाय संधार्या।
तदभावे पुष्कलधनव्ययकरणं चापि निर्दिष्टम्।।२१७९।।

सेवायाः परिपूर्तिर्धनदानेनापि संभाव्या।
तेन हि विद्याधिगमोऽद्यापि च संदृश्यते लोके।।२१८०।।

विद्यावाप्तिः स्वीयां विद्यां वा संप्रदाय तस्मात्तु।
तद्विद्या स्वीकरणेनापि च सम्यक् समादिष्टा।।२१८१।।

नलऋतुपर्णकथायां विद्याया विनिमयो दृष्टः।
शतशश्चोद्धरणानामीदृक्कथनीयता जाता।।२१८२।।

अद्य तु विद्याधिगमो नाना कक्षासमुत्तरणे।
नानाप्रमाणपत्रावाप्तौ रूढ़ो विभातितराम्।।२१८३।।

परमन्यापि च धारा विद्यावाप्तौ प्रचालिता विज्ञैः।
नास्ति लिपेः सम्बन्धस्तत्र तु पुस्तकनिभालना चापि।।२१८४।।

सैषा श्रवणे निरता धारा ज्ञानस्य विद्यते विपुला।
यत्राक्षरं विनैव तु विद्याया अधिगमः पुंसाम्।।२१८५।।

वक्ता-तथोपदेष्टा बहुसंश्रावयति विविधं यत्।
तत्तु पठनतः सुतरामधिकं ज्ञानं समातनुते।।२१८६।।

तदिदं बहुश्रुतत्त्वं विद्याधिगमे विनिर्मलं रुचिरम्।
कारणभूतं स्पष्टं कक्षाधिगमाद् गरीयश्च।।२१८७।।

सन्ति तु ते ते पुरुषा यैर्नैवासादितानि पत्राणि।
किन्तु प्रवचनकाले तेऽधः कुर्वन्ती दिग्गजान् पठितान्।।२१८८।।

गुरवोऽप्यत्र नितान्तं भिन्ना भिन्ना भवन्त्येव।
ज्ञानलवोऽपि च यस्मादासाद्यस्तं गुरुं स्मरन्ति ननु।।२१८९।।

के ननु तादृशगोष्ठीसंरम्भाद् वंचिता वा स्युः।
यत्र तु धारा नित्यं वहन्ति विद्यापरामृष्टाः।।२१९०।।

बाल्यादेव तु विद्या परिवारे शिक्षिता भवति।
भारतवर्षे सैषा विद्यायाः पाठशालैव।।२१९१।।

मानोन्नतेरधिगमे बहुश्रुतास्तेऽथ सम्मान्याः।
प्रवचनभाषणनिपुणा व्यासा वा दर्शनीयाः स्युः।।२१९२।।

यद्यप्येते नतरां निरक्षरा वक्तुमिष्यन्ते।
पुनरपि ग्रन्थानां वा कक्षानां नाधिगम एषाम्।।२१९३।।

श्रवणसहस्रैरधिगतनैपुण्यास्ते प्रयोगेषु।
अधरीकुर्वन्ति मुहुर्नानापरिपत्रधारिणो धीरान्।।२१९४।।

सन्ति च तेऽसंख्याता येऽक्षरमात्रात्तु शून्यतमाः।
पुनरपि कलासु निपुणाश्चकितीकुर्वन्ति दर्शकान् सर्वान्।।२१९५।।

तैरथ तादृशविद्याधिगमो दृष्ट्वैव श्रुत्वैव।
सम्पादित इति विपुलं क्षेत्रं तस्यापि मार्गस्य।।२१९६।।

ये वा भावविभावानुभावभाषामया विलोक्यन्ते।
तेषामेषासरणिर्विद्याधिगमाय विद्यते पुरतः।।२१९७।।

योऽयं तरतमभावः साक्षरता तत्र जागर्ति।
नानाग्रन्थानां वाऽध्ययने मनने विरचने च।।२१९८।।

परमत्राऽस्ते यदि कोऽप्येतादृशसिद्धिपरिपूर्णः।
साक्षात्कारयिता वा निरक्षरो माननीयतरः।।२१९९।।

राष्ट्रे सेनानिवहे सैनिकगतिविधिषु संलग्नाः।
मान्या जगतां धन्या निपुणाः संग्रामविद्यासु।।२२००।।

तेषां निरक्षरत्वं नो गण्यं गणनवेलायाम्।
मरणाख्या या विद्या सुदुष्करा तैः समधिगता।।२२०१।।

जिज्ञासापरिपूर्णं चेतोऽधिगमेऽथ विद्यायाः।
परमावश्यकमिति तद् यत्नै रक्ष्यं सदादिष्टम्।।२२०२।।

त्रैवर्णिकैर्हि नियतं गायत्रीमन्त्रजपसरणौ।
तादृशचेतोरक्षा नैर्मल्यं चापि संसाध्यम्।।२२०३।।

विद्या ददाति विनयं चेत्यादौ सुप्रसिद्धभणितानि।
श्रूयन्ते तेन महान् विनये महिमा विभावनीयोऽस्ति।।२२०४।।

नहि केवलमथ विद्या विनयं देयादिति समाप्तिः स्यात्।
विनयो विद्यां देयादित्यपि तत्पूरकं नियतम्।।२२०५।।

प्रणिपातप्रश्नानां सेवायाश्चापि हेतुता कथिता।
उपदेशामृतपाने विनस्यैवाऽथ रूपाणि।।२२०६।।

विद्या विनयं देयाद्देयाद्विनयोऽथ विद्यां वा।
अन्योन्याश्रयमेतन्नतमां बुद्धौ समुन्नेयम्।।२२०७।।

संस्कारे सम्मिलितो विनयः प्राग्जन्मसंसिद्धः।
तस्य विवृद्धिं सुतरां विद्या सम्पादयति नो दोषः।।२२०८।।

विनयप्रकटनचिन्हान् विद्याधिगमादनन्तरं सम्यक्।
सञ्जानाति विनेयश्चैतत्तत्रास्ति तात्पर्यम्।।२२०९।।

आश्चर्यकरस्तावद् द्रोणस्यार्जुनयशोवृद्ध्यै।
भिल्लैकलव्यशिष्येऽङ्गुष्ठच्छेदस्य याचनायासः।।२२१०।।

द्रोणस्य प्रतिमाया गुरुत्वमासाद्य चैकलव्येन।
शुभ्रधनुर्विद्यायामाश्चर्यकरः प्रयोग आरचितः।।२२११।।

लोकोत्तरविद्यैषा मा प्रसरेद् यत्प्रभावेण।
सर्वेऽप्यधःकृताः स्युर्धनुर्धराः शूद्रवंश्येन।।२२१२।।

एतादृशी मतिः सा नो मान्या वा समर्थनीया वा।
पुनरपि घटना सैषा यल्लिखिता तत्प्रशंसार्हम्।।२२१३।।

यात्रासु धूमयानेषु च जलपानापणेषु विचरन्ती।
वाग्धाराऽपि जानानां विद्याया वर्धनं कुरुते।।२२१४।।

नानाव्याख्यानेषु च नानाविधपत्रसार्थेषु।
विद्याविचित्रधारा तरङ्गपूर्णा समाभाति।।२२११।।

विद्यावाप्तौ काचिज्जिज्ञासा वा विनम्रता वापि।
यत्रैवास्ते नितरां तत्रैवास्तेऽथ पाठशालाऽपि।।२२१६।।

भिन्ना भिन्ना घटनास्तेषां तेषां प्रयोजिका जाताः।
संजायन्ते विपुला विद्यायाः साधिकाश्चापि।।२२१७।।

सैव च घटना नित्यं घटिता नतमां करोति वा किमपि।
सेयं सद्यस्तरता सर्वाऽपि च पात्रताधीना।।२२१८।।

सिद्धार्थः शवमेकं वृद्धं वैकं च दृष्ट्वैव।
निर्मथितः सन्नन्तः बुद्धत्वे प्रेरितो जातः।।२२१९।।

अन्यैरथ पुरुषैर्वा सहस्रशश्चापि शवयात्राः।
वृद्धतमाः पुरुषा वा लोक्यन्ते नो समुन्मेषः।।२२२०।।

साधनसौकर्यं यत् वैज्ञानिकविकासमयकाले।
सुलभं भवति नितान्तं तत्तु पुरा नैव संप्राप्तम्।।२२२१।।

पुनरप्यद्यत्वे यो विद्याया वा विलुप्यते महिमा।
तस्यापि कारणमिदं यंत्राणामेव महात्म्यम्।।२२२२।।

ज्ञानक्रिययोः साम्ये विद्याया भवति साफल्यम्।
तन्मध्यभित्तिभूताद्यत्वे सा यन्त्रमायैव।।२२२३।।

तेन तु विकला विद्या श्रमरहिता सर्वसौख्यमयरूपा।
चारित्र्यगुणविहीना शप्तैवासाद्यते छात्रैः।।२२२४।।

युक्ताश्चायुक्तास्तेऽनूचाना अद्य नो दृष्टाः।
काल्पनिके तु विचित्रे मानसचित्रेऽद्य दर्शनं तेषाम्।।२२२५।।

भृतकाऽध्यापकसंज्ञा स्मृतिकाले या पुरा दत्ता।
निन्दायान्तु गुरूणामद्यत्वे सा प्रशंसार्हा।।२२२६।।

ये वा चरित्रदोषाः संख्यायन्ते स्म भूत्ततरकाले।
ते वै चारित्र्यगुणा मन्यन्ते वर्तमानेऽस्मिन्।।२२२७।।

विद्यायां पाण्डित्यं यत्र पुराऽसीत्समादृतं सम्यक्।
तत्राद्यत्वे पल्लवपाण्डित्यं नूनमाद्रियते।।२२२८।।

ज्ञानं भृतिलाभायाद्यत्वे सम्प्राप्यते छात्रैः।
भृतिरपि सा नो लभ्या तेनाऽस्ते विप्लवःसततम्।।२२२९।।

गंभीरज्ञानार्थं समुद्रपारेऽथ गन्तव्यम्।
तत्र च बृहस्पतित्वं सम्प्राप्यं धारणा सैषा।।२२३०।।

नतरामालोच्यमिदं यज्जातं जायते यद्वा।
परिवेशेऽस्मिन्विद्याधिगमो नूनं विचारार्हः।।२२३१।।

अद्य तु विद्या निखिला पुस्तकमध्ये विराजिता जाता।
पुस्तकलेखनकर्ता नो वा जानाति किं लिखितम् ।।२२३२।।

लेखनकाले पुस्तकसार्थमसौ संमुखे कुरुते।
किञ्चित् किञ्चिन्नीत्वा नव्यग्रन्थस्य लेखको भवति।।२२३३।।

तत्र क्षोदक्षेमे यद्वा तद्वा समाधत्ते।
गंभीरे तु विचारे स्थानात्सद्यः पलायते दूरे।।२२३४।।

प्रचुरतरव्ययपूर्वं लोकानात्मश्लाघापरान् सुपरितोष्य।
संघटयन् तान् सर्वान् वादं कंचित् प्रवर्तयति।।२२३५।।

वादस्यैतस्यैवोल्लेखं लेखेषु भाषणेष्वऽथवा।
वारं वारं कुर्वन्नाचार्यत्वं स्वयं मनुते।।२२३६।।

विद्यायामतिचारो दर्शनयोग्यस्तथाऽद्यत्वे।
यो नहि किमपि विजानात्यद्यत्वेऽसौ महाचार्यः।।२२३७।।

रजस्तमोबाहुल्यं सत्त्वं लघु सर्वथा जातम्।
विद्याक्षेत्रे सेयं दुरवस्था शोचनीयास्ति।।२२३८।।

विनयस्य नाममात्रं श्रोतव्यं पाठशालासु।
सर्वात्वविनयगाथाऽध्यापकवर्गाद्विनिर्याति ।।२२३९।।

यदि शिक्षकोऽद्य किमपि स्वीयाचरणेन शिक्षयति।
अविनयमेव तदेतद्वक्तव्यं संप्रदायेषु।।२२४०।।

अविनयविद्याधिगमश्छात्राणामद्य जायते विपुलः।
प्रकटे तत्परिणामे निखिलो लोकस्तु भस्मसाद् भवति।।२२४१।।

दुष्परिणामारंभे चकिता लोकाश्च शासकाश्चैव।
वैकल्यमनुभवन्तो यद्वा तद्वाऽथ कुर्वन्ति।।२२४२।।

सर्वैरुपेक्षितोऽयं विद्यायाः पावनः प्रसरः।
स्वयमेवाभिहतः सन् हिनस्ति लोकस्य चारित्र्यम्।।२२४३।।

चारित्रहननरूपे तमसा व्याप्ते महागर्ते।
पतनोत्पतनमयीयं लीला सर्वत्र लोकनीयैव।।२२४४।।

पठितानां संघर्षः, हत्या, चौर्यं, मनुष्यतालोपः।
स्वार्थमयीलोकानां वृत्तिरविद्या प्रभावान्नु।।२२४५।।

सर्वे भवन्तु लोका विद्वांसो वाथ शिक्षिता वापि।
पात्रत्वं तेषामथ चास्ति नवेत्यादि को विद्यात्।।२२४६।।

पूर्वं विद्याधिगमो नासीत्सर्वस्य लोकस्य।
अधिकाराणां चर्चा तत्र तु विपुलास्ति शास्त्रेषु।।२२४७।।

तत्रापि चापवदा लभ्यन्ते वा पुराणेषु।
परमास्तेऽपि च तेषामपवादत्वं न नियमत्त्वम्।।२२४८।।

विद्यायाश्च कलायाः प्रस्थानौ द्वौ पुराकालात्।
प्रथितौ निखिलो लोकस्तत्र तु सम्यक् सुशिक्षितो भवति।।२२४९।।

वैचारिको विकासो यत्रैवास्ते तु विद्या सा।
यत्र क्रियानिपुणता शिक्षणयोग्या कला तु सर्वा सा।।२२५०।।

पूर्वं कलास्वरूपं विद्यायां वा विचारे वा।
प्रादुर्भवति परस्तात्क्रियासु घटते तदा कला सैषा।।२२५१।।

विद्याऽभ्यासी कलया यदि शून्यस्तत्र नो हानिः।
कलया कलिताकारो विद्याऽभ्यासी भवेन्नो वा।।२२५२।।

उभयोरंगीकारे नैपुण्यं यदि न जायते क्वापि।
जीवनवैलक्षण्यं तत्र तु नितरां नमस्कार्यम्।।२२५३।।

विद्या कला च सततं सम्बद्धैव प्रवर्तते नित्यम्।
प्राधान्याद् व्यपदेशः सोऽयं, विद्या' 'कला' चापि।।२२५४।।

भवतुतरामाचार्यो यः कोऽपि गभीरशास्त्रेषु।
लेखनभाषणकलया शून्यो यदि कुत्र किं कुर्यात्।।२२५५।।

एतादृशा जना अपि संसारे भूरिशो दृष्टाः।
विद्वांसोऽपि कलायां शून्यतरा नो समृद्धतराः।।२२५६।।

अपरे पुनः कलायां प्रावीण्यं प्राप्तवन्तोऽमी।
विद्याक्षेत्रे शून्याऽसंख्याता निर्वहन्ति संसारे।।२२५७।।

विद्यातस्तु कलाया विपुलतरं क्षेत्रमस्तीति।
विपुला संख्या लोके कलया कलितैव विज्ञाता।।२२५८।।

अद्य तु विद्याकरलरयोरैक्ये सम्मिश्रणे चैव।
द्वितयस्यैव तु रूपे ह्रासस्यैवास्ति साम्राज्यम्।।२२५९।।

विद्याया श्रेष्ठत्वं नाशितमेवास्ति यन्त्रैस्तु।
तत्तत्कलाप्रचुरताश्रेष्ठत्वस्यैव साम्राज्यम्।।२२६०।।

विद्यानामद्यत्वेऽध्ययनं प्रसृतं कला नाम्ना।
यन्त्रमयी सर्वेयं कलाऽथ विज्ञानमिति कथिता।।२२६१।।

किन्त्वाध्यात्मिकतायास्तिरोहितत्त्वे कलांमात्रे।
विक्षिप्तता समाजेऽनिर्बन्धं जागृता भवति।।२२६२।।

इत्थं विद्याधिगमोऽद्यत्वे नैवास्ति सत्समाधाने।
जीवननैरर्थक्ये तस्यैषा प्रेरणा सर्वा।।२२६३।।

शासनसंस्था नित्यं शिक्षाक्षेत्रे तथास्त्युदासीना।
मूलोपेक्षां कृत्वा शाखानां सेचने लग्ना।।२२६४।।

शासनसंस्थाया यो प्रभावपूर्णो भवति सञ्चारः।
सर्वो लोकस्तत्रैवास्थावान् जायते नियतम्।।२२६५।।

विद्याधिगमो मूलं सर्वस्यैवाथ राष्ट्रस्य।
तेन विना सर्वेयं समुन्नतिश्चैत्यशृंगारः।।२२६६।।

आशास्महे नितान्तं निर्द्वन्द्वा देशनेतारः।
विद्याधिगमे सर्वं ध्यानं स्वं केन्द्रितं कुर्युः।।२२६७।।

छन्दोबद्धा प्रस्तुतिरेवैषा विषयजातस्य।
छन्दस्सु विषयकथनं प्रवर्तितं प्राक्तनाचार्यैः।।२२६८।।

९३.यात्रा

यात्रा भवति नितान्तं दृष्टिसमुल्लासकं तत्त्वम्।
यात्रायां विहितायां विधीयते जन्मसाफल्यम्।।२२६९।।

पुरुषः प्राप्नोति परं पुरुषार्थं नव्ययात्रायाम्।
जीवनमेतन्निखिलं काऽपि नवीनाऽथ यात्रैव।।२२७०।।

उपनिषदुक्तं वचनं तद्धि चरैवेति यात्रायै।
दिव्यप्रकाशरूपं कथं न सन्धार्यते विद्धिः।।२२७१।।

सर्वेषामथ तावद् देवानां वा मनुष्याणाम्।
सारं यदि हि विलोक्यं सा सा सा सा भवेद्यात्रा।।२२७२।।

जीवनतत्त्वविवेचनसंलग्नैर्लेखकैर्नितराम् ।
कोऽपि नवीनोन्मेषो विलोक्यते नव्ययात्रासु।।२२७३।।

सर्वाऽपि सा विवेचनशक्तिः पूर्णत्वमायाति।
परिपूर्णाऽप्यवशिष्टा तिष्ठति दिव्यासु यात्रासु।।२२७४।।

तरतमभेदविभिन्ना नानाभावाभिरामरमणीयाः।
नानाऽलोकनशोभासम्भारा दिव्यायात्रासु।।२२७५।।

आखेटकयात्राणां वर्णनमेत् सुविद्यते विपुलम्।
नैकट्येन सुदृष्टं जन्तूनामान्तरं यत्र।।२२७६।।

नानादेशविलोकनसुषमासाम्राज्यपूर्णायाम् ।
यात्रायां जन्मेदं पूर्णतया सार्थकं भवति।।२२७७।।

प्राणस्पन्दनविह्वलभावो यात्रासु लभ्योऽस्ति।
स्पर्शमयी गन्धमयी रूपमयीयं भवति यात्रा।।२२७८।।

पादेन्द्रियस्य सर्वा सार्थकता भवति यात्रायाम्।
येन न विहिता यात्रा व्यर्थौ पादौ गतौ तस्य।।२२७९।।

सूक्ष्मा स्थूला नानारूपा सेयं भवति यात्रा।
सूक्ष्मविवेचनकरणेऽनन्ता सर्वा भवति यात्रा।।२२८०।।

राहुलसांकृत्यायनवर्यविरचितं घुमक्कडं शास्त्रम्।
नैका सिद्धाश्चान्या रचना यात्रासु सञ्जाताः।।२२८१।।

यात्रा चेश्वरसदृशी नैवादिर्नान्तभावोऽस्याः।
आलोक्यते नितान्तं सूक्ष्मेक्षिकयाऽपि संमृष्टः।।२२८२।।

आत्मसमैः सन्मित्रैः सह विज्ञानप्रवर्धिनी सेयम्।
नानाकथानकरसैरास्वाद्या भवति मोहिनी यात्रा।।२२८३।।

यद्यपि नानायानान्यद्यत्वे सन्ति सुलभानि।
पुनरप्यानन्दमयी विलोक्यतेऽद्याऽपि पदयात्रा।।२२८४।।

समयाल्पव्ययकरणे धनव्ययस्याथ बाहुल्ये।
नानाविधदेशानामाकाशे दृश्यते यात्रा।।२२८५।।

वाष्पविचालितगन्त्रीमारुह्याद्यास्ति या सुलभा।
शासनधृतसन्धाना सर्वा देशे भवति यात्रा।।२२८६।।

कार्यसहस्राऽकुलितैर्नानाकार्येषु संलग्नैः।
नानापुरुषधुरीणैर्महिलाभिश्चाऽद्य दृश्यते यात्रा।।२२८७।।

अध्ययनमननचिन्तनपरायणानां हि कालेऽस्मिन्।
विज्ञानं वर्धयितुं दृश्या वैदेशिकी यात्रा।।२२८८।।

स्वीये परिकरमध्ये प्रभावमसमं विवर्धयितुम्।
तुच्छानन्यान् धर्तुं दृष्टा वैदेशिकी यात्रा।।२२८९।।

कालेऽस्मिन् स्वामिवरैर्विवेकपरिपूरितस्वान्तैः।
पाश्चात्यान् शिक्षयितुं विहिता वैदेशिकी यात्रा।।२२९०।।

योगं संशिक्षयितुं दर्शनविद्याप्रचारार्थम्।
प्रचुरं धनमर्जयितुं दृष्टा वैदेशिकी यात्रा।।२२९१।।

शासनयन्त्राऽरूढैर्नानाकार्याऽनुरोधेन ।
सौहार्दं वर्धयितुं क्रियते वैदेशिकी यात्रा।।२२९२।।

नृत्यानां नूतनतां संचारयितुं च कालेऽस्मिन्।
नृत्यकलायां कुशलैर्विधीयते तादृशी यात्रा।।२२९३।।

यन्त्राणां विद्यायाः निपुणैर्वैज्ञानिकैर्नितराम्।
नानायन्त्राऽऽदाने क्रियते वैदेशिकी यात्रा।।२२९४।।

संस्कृतिमसमां स्वीयां देशे देशे प्रचारयितुम्।
संगीतज्ञैर्नूनं विहिता वैदेशिकी यात्रा।।२२९५।।

संगीतनैपुणीं तां देशे देशे विवर्धयितुम्।
संगीतज्ञैर्नूनं विहिता वैदेशिकी यात्रा।।२२९६।।

संसारे सामीप्यं यानानां सम्प्रसादेन।
यज्जातं सञ्जाता सुलभा वैदेशिकी यात्रा।।२२९७।।

वैवाहिकसन्दर्भे पुरातनादेव कालाद् वा।
संरम्भपूर्वकं सा प्रदर्श्यते काऽपि वरयात्रा।।२२९८।।

गार्हस्थ्यजीवने या प्रवेशदानाय कस्मैचिद्।
सम्बन्धसाक्षिरूपा विनिर्मिता काऽपि वरयात्रा।।२२९९।।

ऋणमपि भूयः कृत्वा शतशो मनुजान् समार्थकान्नीत्वा।
नानासम्भारैः सह विधीयतेऽद्यापि वरयात्रा।।२३००।।

ये धनहीनाः पुरुषास्तेषां कन्याविवाहवेलायाम्।
द्वारे दुःखनिधाना गच्छति मुग्धा तु वरयात्रा।।२३०१।।

पुरुषोत्तमैः समेता वृद्धैर्युवकैस्तथा च बालाद्यैः।
नानानव्यविभूषायुक्तैर्दृश्या तु वरयात्रा।।२३०२।।

नानावाद्यध्वनिभिर्विस्तारितवैभवा सेयम्।
नानायानारूढा यन्त्रमयी चैव वरयात्रा।।२३०३।।

मानसिकोल्लासमयी सर्वं विश्वं करे दधती।
विपुले गगने मंगलपर्यन्तं दृश्यते यात्रा।।२३०४।।

काले काले मित्रैः सम्बन्धिभिरद्य सद्भावे।
मुखदर्शनसम्भाषणसुभगा सा दृश्यते यात्रा।।२३०५।।

सुस्वास्थ्यं रक्षयितुं मानसिकोल्लासमाधातुम्।
प्रातः काले नित्यं कैश्चित् सम्पाद्यते यात्रा।।२३०६।।

भारतदेशसुतीर्थेष्वानन्दोल्लासमायाता ।
पार्यन्तिकमपि मार्गं द्रढयति तीर्थात्मिका यात्रा।।२३०७।।

आनन्दं चामन्दं वितरीतुं रसमयं कर्तुम्।
दिव्या काऽपि विधेया कविभिश्छन्दोमयी यात्रा।।२३०८।।

स्वीयै रसमयभावैरन्यान् सर्वान् वशीकर्तुम्।
कान्तासम्मितविभवा केषांचित् शाब्दिकी यात्रा।।२३०९।।

नानाभावविभावाऽनुभावसम्भाररमणीया ।
स्मर्तव्या कालेस्मिन् नाना चित्रान्विता यात्रा।।२३१०।।

विश्वस्मिन् लोकानामुपकारं कर्तुमीशिता तावत्।
कारागारेऽपि पुनस्तपस्विनां सा भवेद् यात्रा।।२३११।।

तेजस्विनां महिम्ना सर्वं लोकं वशीकर्तुम्।
विस्फोटकसम्भारैः सहिता सांग्रामिकी यात्रा।।२३१२।।

जनतासु नवविकासं सञ्चारयितुं प्रभावविस्तारे।
नेतृणां केषाञ्चिद् भवतितरां साऽथ पदयात्रा।।२३१३।।

क्रूरैः शूरतराग्रैरितिहासेषु प्रदृश्यते लिखिता।
देशान् विजेतुमेषा विहिता सांग्रामिकी यात्रा।।२३१४।।

न्यायं समुपासयितुं धूर्ततमान् वा विनाशयितुम्।
वीरवरैरपि विहिता काले सांग्रामिकी यात्रा।।२३१५।।

दिव्यं भावविभावानुभावसंभारमात्मसात्कतुम्।
नानालेखकवर्यैर्विहिता साहित्यिकी यात्रा।।२३१६।।

मार्गकुमार्गविचाराऽदभिज्ञतायां विमूर्च्छितैः पुरुषैः।
नानापीडासहितैर्विधीयते काऽपि दुःखिता यात्रा।।२३१७।।

दिव्याऽनुभवं स्वीयं विस्तारयितुं विपुलजनतासु।
धर्मं सन्देशयितुं विहिताऽऽसीद् धार्मिकी यात्रा।।२३१८।।

जलनिधिलङ्घनशीलैः सरितां वा लङ्घने निपुणैः।
नाना यानावलिभिर्विहिताऽसीत् साऽपि जलयात्रा।।२३१९।।

देशानां कालानां सार्थकतामादिशन्तीयम्।
विहिता विधीयते वाऽप्यहर्निशं मानवैर्यात्रा।।२३२०।।

आलोचनां समस्तां विस्तारयितुं प्रकामदीर्घेयम्।
शास्त्रार्थमहारथिभिर्विहिता शास्त्रार्थमययात्रा।।२३२१।।

नास्ते कस्यापीयं प्राथमिकी वा परम्परालभ्या।
शूरैः सेवानिपुणैः कर्मण्यैश्चापि सत्कृता यात्रा।।२३२२।।

दुर्लङ्घ्यपर्वतानां लङ्घनमपि शक्यते कर्तुम्।
संसाधितं तदेतद्विहिता यैः पर्वते यात्रा।।२३२३।।

काश्मीरेषु विलासः कामं दृश्यः प्रकृतिदेव्याः।
काश्मीरेषु निकामं यैर्वा विहितैकदा यात्रा।।२३२४।।

नानाऽऽश्चर्यमयाणां भवनानां ताजप्रभृतीनाम्।
आलोकनेन नित्यं प्रसाद्यते शोभना यात्रा।।२३२५।।

सप्तपुरीणामपि या विधीयते सा परिक्रमा कामम्।
प्राचीनाऽपि नितान्तं नवीनभावोत्थिता यात्रा।।२३२६।।

आसेतु चाहिमाचलमथाटकात् कटकपर्यन्तम्।
शङ्करभगवत्पादैर्विहिता लोकोपकारिणी यात्रा।।२३२७।।

दिक्षु चतुर्ष्वपि धाम्नां चतुष्टयं वा विनिर्माय।
तैर्विहिता स्वाभीष्टा धन्या सांसारिकी यात्रा।।२३२८।।

विद्वत्तायाः सौरभमथ दिव्यं स्वात्मनिष्ठं वा।
जनतायां वितरीतुं विद्वद्भिः स्वीकृता यात्रा।।२३२९।।

जनतेयमपि नितान्तं धन्या जाता यदीयवाग्विभवैः।
सर्वविधं सन्तोषं संयच्छति शोभना यात्रा।।२३३०।।

नानामनोऽभिलाषैर्भरिता परिपूर्तिमायाता।
वैपुल्येनानन्दान् वितरति दिव्योत्तमा यात्रा।।२३३१।।

विश्वस्मिन् संरचनाऽभिनवा नित्यं प्रजायते येयम्।
तत्प्रविलोकनविद्यावर्धनशीला भवति यात्रा।।२३३२।।

सत्त्वरजोमयविभवैस्तमोमयैश्चाथ सम्पूर्णा।
प्रतिपदनवसञ्चारा सर्वा सन्तोषदा यात्रा।।२३३३।।

कर्मठतायां प्रीतिं सञ्चारेष्वभिनवां नीतिम्।
सद्यो विभूषयन्ती नानाकामान्विता यात्रा।।२३३४।।

यानानां नवतायामाकर्षणमादिशन्तीयम्।
नूतनविभाविलसिता काचित् सा शोभना यात्रा।।२३३५।।

साक्षात्काराऽवसरे प्रत्याशिगणैर्निरन्तरं विहिता।
निर्वाचकैः सदस्यैरपि सा सद्यो विधीयते यात्रा।।२३३६।।

मृत्युमुखे गच्छन्तं पुरुषं तत्तत्सदुपचारैः।
जीवनमथ वितरन्ती तत्तत्स्थाने कृता यात्रा।।२३३७।।

नानाविधपापानां प्रक्षालनमादिशन्तीयम्।
धार्मिकतीर्थस्थाने दर्शनकाले कृता यात्रा।।२३३८।।

नानाभोजनवेलानिमन्त्रणेषु प्रकामसंरम्भा।
विविधव्यञ्जनसुलभा भोजनकाले भवति यात्रा।।२३३९।।

अधिकां श्रियमुद्वहती निकामतृप्तिं समादिशती।
मानवजीवनवृक्षे सुन्दरफलतामुपागता यात्रा।।२३४०।।

विस्तारितसौभाग्या सम्पूर्णं सौरभं दधती।
सर्वजगत्सुषमाणां सीमासारा स्वयं यात्रा।।२३४१।।

आदिशति या समस्तं सामाजिकसारसंभृतं तत्त्वम्।
जीवनकालेऽभिनवैः सम्भारैः पूजिता यात्रा।।२३४२।।

त्रस्तव्यस्ताऽऽकुलितैर्मनुजैर्नित्यं समाराध्या।
आश्वासनानि दधती नवदेशं प्रापयति यात्रा।।२३४३।।

साहसमभिवर्धयती जीवनयुद्धे जयं दात्री।
नित्यभवकामनाभिर्मिलिता सौख्यप्रदा यात्रा।।२३४४।।

सम्मोहनसंसारं प्रदर्शयन्तीयमाभाति।
कमनीयकाव्यभाषासौरभमयतामुपागता यात्रा।।२३४५।।

चित्रितचित्तानुभवा नवनवसञ्चारशीलेयम्।
कामदुघा सर्वाशासम्यक्सम्पूरिका यात्रा।।२३४६।।

नेत्रोन्मीलनकार्यं सम्पादयतीयमादिमात् कालात्।
नवसभ्यताविकासं कुर्वन्ती कैर्न काम्यते यात्रा।।२३४७।।

नानानदीनदशतैः पर्वतमालाभिराव्याप्ता।
सर्वसमुत्सुकजनतासंसेव्या मानिता यात्रा।।२३४८।।

आचन्द्रसूर्यतारकमाराद् ये तद्यशोविभवैः।
सन्दीप्यन्ते तैर्वा कामं विहिता यशोयात्रा।।२३४९।।

प्रक्पुरुषा ये जाता येषामद्यापि गीयते सुयशः।
ये प्रेरणाप्रसूतास्तैर्विहिता सा यशोयात्रा।।२३५०।।

सम्मानितसद्विभवैर्वारं वारं समीप्सिता याऽसौ।
वायौ तिष्ठति यानं येषां तेषां सुशोभना यात्रा।।२३५१।।

चायाख्यं सत्पानं पातुं केषाञ्चिदद्य न निवार्या।
नानाऽऽपणेषु नित्यं विपुलेयं दृश्यते यात्रा।।२३५२।।

शकटीद्वारा देशे भ्रमणे चाऽऽनन्दसन्तुष्टिः।
सञ्जायते निकामं तया सदाऽनन्ददा यात्रा।।२३५३।।

या प्रेमसारधारा प्रगुणितमहिमाऽन्विता सम्यक्।
सञ्जायते प्रचुरतापूर्णा सर्वा सुशोभना यात्रा।।२३५४।।

वैज्ञानिकसंसाधनसम्पन्नाऽथ प्रकामरमणीया।
देशे देशे काले काले सर्वा सुकोमला यात्रा।।२३५५।।

सर्वविधं सद्भावं संस्थापयते सुसेविता सेयम्।
नैकट्येन गुणान् या दर्शयते सा मनोयात्रा।।२३५६।

पूज्यान् संपूजयितुं तेषां वा दर्शनानि संप्राप्तुम्।
मान्यसभाजनशीलैर्विधीयते तादृशी यात्रा।।२३५७।।

छात्राणां प्रत्यक्षज्ञानं वर्धयितुमद्येष्टा।
शासनधनेन विहिता नानाविज्ञानवर्धिनी यात्रा।।२३५८।।

वैवश्यात्खलु येषां, स्थानान्तरणात् कृता काचित्।
कष्टायैव भवति सा, वेतनभाजां नृणां यात्रा।।२३५९।।

अपरेषां केषांचित् सैवाऽऽराध्यत्वमागता याऽसौ।
नानालाभविधात्री स्थानान्तरणे भवति यात्रा।।२३६०।।

प्राग्यात्राऽऽसीत् कठिना सञ्जाता तत्र सुखदेयम्।
यानप्रचुराऽपि तथा शोभनमार्गैर्विभूषिता यात्रा।।२३६१।।

स्वातन्त्र्यानन्तरमथ देशेऽस्मिन् पर्यटनपूर्णा।
नव्यवस्थालसिता सेयं सन्देहनाशिनी यात्रा।।२३६२।।

आबालवृद्धवनितासंसेवितसर्वसौभाग्या ।
प्रमुदितरचनापूर्णा भाग्यैः सा लभ्यते यात्रा।।२३६३।।

ग्रीष्मे शीतलदेशे सुखसञ्चारं करोति रोमाञ्चैः।
शीते ग्रीष्मप्रचुरं देशं प्रापयति सद्यात्रा।।२३६४।।

विलिखितवृत्तान्तेष्वथ विपुलो यस्या विलोक्यते महिमा।
हृदयविभासितसारा विपुलाधारा विलोक्यते यात्रा।।२३६५।।

सर्वा क्रिया न सुलभा भवतितरां सत्प्रयासैः स्वैः।
किन्तु समर्पितकाया सर्वा सुलभा भवति यात्रा।।२३६६।।

देशेऽस्माकमियं या चुनावचर्चा समुच्छलिता।
नानाविधवक्तव्ये नेतॄणां तत्र जायते यात्रा।।२३६७।।

९४.प्रियप्रयोजनम्

मानवनवव्यक्तित्वे नित्यनवं विद्यते हृदयम्।
हृदयेन च सहृदयतास तह्यै सा सुप्रिया कविता।।२३६८।।

कविताप्रयोजनायां विचारसरणौ प्रवृत्तायम्।
सहृदय संगोष्ठीनां निर्मथनेऽमृतमयी वाणी।।२३६९।।

आचार्याणां महती रचनानां शृङ्खला पुरतः।
दीप्तेयं तस्यामपि कविता पश्यति प्रयोजनं स्वीयाम्।।२३७०।।

अनुबन्धसच्चतुष्टयपरिगणनायां प्रयोजनं गणितम्।
स्वयमेवैषा चर्चा प्रयोजनस्य प्रयोजनं ब्रूते।।२३७१।।

यशसेऽर्थ कृते कविता कविता सेयं शिवेतरलक्षतये।
कविता परनिर्वृतये कान्तासम्मितयोपदेशयुजे।।२३७२।।

काव्यं यशसां प्राप्तिं, कारयतीत्यत्र नास्ति संशीतिः।
काव्यानां निर्माता सर्वत्रैवानिवारितप्रसरः।।२३७३।।

जीवनकाले सुयशस्तस्य विवृद्धिं परां भजते।
यत्र नवा गच्छत्यपि तन्नाम नु तत्र संयाति।।२३७४।।

नश्यच्छरीरमपरं विनिर्मितं पञ्चभिर्भूतैः।
तदिदं यशःशरीरं नास्ति जरामरणसंयुक्तम्।।२३७५।।

कविसूक्तिमणिप्रभया भासितमाभातिनिर्मलं विश्वम्।
सर्वेऽपि वर्णनपरा ननु कवयोऽनन्तभेदेषु।।२३७६।।

यत् सुन्दरमथ येन तु मानवता सार्थका भवति।
सर्वं तन्ननु काव्यं तस्यानन्दस्तु पात्रताऽधीनः।।२३७७।।

काव्यं यशसेत्येतत्कथनेनैतत्समायाति।
काव्यं विना न सुयशः कुत्राप्यासाद्यते जगति।।२३७८।।

येनैव यशः प्राप्तिः संजाता जायते नृणाम्।
सर्वं वै तत्काव्यं तेन विना नास्ति कीर्तिलेशोऽपि।।२३७९।।

कविरेव यशोभाजनमित्येतत्सिद्धमेवास्ति।
किन्तु न तावत्केवलमास्ते यशसां विरामोऽयम्।।२३८०।।

काव्ये येषां चर्चा तेषामपि यशोभागित्वम्।
येषां निन्दा काव्ये ते निन्द्या इति कविवरेणोक्तम्।।२३८१।।

एवं काव्ये येषां वर्णनमाभाति निर्मलं रुचिरम्।
तस्य यशोवर्धनमपि नूनं काव्येन संसिद्धम्।।२३८२।।

अत एव ननु कविवराः स्वाभीष्टस्यैव कीर्तिविस्तारे।
मौनं दूरीकुर्वन्त्यथ च यशः ख्यापयन्ति ननु तस्य।।२३८३।।

काव्यानां संस्मर्ताऽपि च यशसां भाजनं भवति।
सस्वरमुच्चारितमपि काव्यं यशसां समर्पकं नूनम्।।२३८४।।

नानाव्याख्यानेषु च काव्यानां यः समुल्लेखः।
वक्ता च तेन विपुलं लाभं यशसां समश्नुते सम्यक्।।२३८५।।

ये वा टीकाकारा गूढार्थान् स्फोरयन्ति काव्यानाम्।
तेऽपि यशो भाजनमिह जायन्ते मल्लिनाथाद्याः।।२३८६।।

एवं सुयशो लाभो न केवलं जायते कवीन्द्राणाम्।
काव्येन यशो लाभो व्यापक एवायमाभाति।।२३८७।।

यच्चाप्यर्थकृते चेत्येतत्काव्यप्रयोजनमनूक्तम्।
तत्सम्प्रति प्रत्यक्षं शुभ्रपुरस्काररूपेण।।२३८८।।

धावकधनसम्प्राप्तिर्नैवादर्शे क्वचिल्लभते।
कथमीदृगुदाहरणं मम्मटवक्त्राद्विनिर्यातम्।।२३८९।।

प्रत्यक्षरलक्षानां दाने गाथाः सुविख्याताः।
काव्ये यदि प्रसन्नास्तदेश्वराः किं न वा दद्युः।।२३९०।।

अधुनात्वस्मद्देशे धनसम्प्राप्तिस्तथा न परिदृष्टा।
वैदेशिकाः कविवरा विपुलं धनमर्जयन्ति काव्येन।।२३९१।।

काव्येनैव धनानां लाभात् सुतरां रवीन्द्रनाथः सः।
शान्तिनिकेतननाम्ना विश्वं विद्यालयं व्यतनोत्।।२३९२।।

हिन्दीभाषासुकविर्विहारिवर्यस्तु काव्येन।
श्रीजयसिंहान्नृमणेर्विपुलं धनसंग्रहं कृतवान्।।२३९३।।

भूषणनामा सुकविः शिववीरं वर्णयन्दिव्यम्।
सर्वविधमर्थलाभं स्वीकृतवान् वीररसकाव्यैः।।२३९४।।

चलचित्रात्मकरूपेणेदं दृश्यं तु यत्काव्यम्।
तन्निर्माताद्यत्वे विपुलाऽर्थोपार्जने निरतः।।२३९५।।

पूर्वं नासीन्मुद्रणकलाविलासो यथाऽद्यत्वे।
काचिद् धनसंप्राप्तिः प्रकाशकाद्यैरथापि संदृष्टा।।२३९६।।

यद्यपि सुवित्तलाभे भाग्यं सामान्यकारणीभूतम्।
तेन विना कणमात्रं न लभ्यते पुण्यशालिना चापि।।२३९७।।

पुनरपि काव्यानां या सम्पत्तेर्दातृता समुद्घुष्टा।
सापि समर्थनयोग्या सहस्रशो वा निदर्शनैः सम्यक्।।२३९८।।

रामचरितमानसमिदमाधारीकृत्य लाभेषु।
यतमानानामग्रे तुच्छान्यन्यानि कर्माणि।।२३९९।।

इत्थं तावत्सिद्धं वित्तं सम्प्राप्यते काव्यात्।
वित्तं मानवजीवनवृक्षे पुष्पं फलं वापि।।२४००।।

व्यवहारज्ञानाय च काव्याध्ययनं सदा कार्यम्।
काव्यं निर्मातव्यं यदा तदा व्यावहारिकं ज्ञानम्।।२४०१।।

परमावश्यकतरमिति कविरपि तत्राऽसमं यतते।
परमस्तेन स लाभः कवेरपि ज्ञानतादात्म्यात्।।२४०२।।

व्यवहारं नामेदं परमा काचित्कला पुंसाम्।
वश्यं भवति नितान्तं तत्कृपया वा जगत्सर्वम्।।२४०३।।

यदि नास्ति व्यवहारज्ञानं किं वा कदा कार्यम्।
नूनं तदा तु महतीमापत्तिं बुधवरोऽपि संयाति।।२४०४।।

पठितानामपि येषां मूर्खत्वं पञ्चतन्त्रादौ।
वर्णितमस्ति तदेतद् व्यवहारस्यैव वैकल्यात्।।२४०५।।

काव्याऽध्ययनेनैव च नानाव्यवहारनैपुण्यम्।
संजायते समासात् तस्मात् काव्यं सदाऽऽराध्यम्।।२४०६।।

भिन्नानां देशानां वर्णनसरणौ प्रवृत्तायाम्।
कविना ते व्यवहारास्तद्देशीया मनसि धार्याः।।२४०७।।

अद्यत्वे व्यवहारे प्रयुज्यते सभ्यता शब्दः।
का सभ्यता कदासीत्कुत्र च काव्याद्विनिर्णेयम्।।२४०८।।

औचित्यं कर्मसु यत् सा व्यवहारस्थितिः पुंसाम्।
देशे काले पात्रे विचारधारा परोपनिषत्।।२४०९।।

अद्यालौकिकताया आरोपः संस्कृते विदुषि।
व्यवहारज्ञानानामभाव एवास्ति कारणं तत्र।।२४१०।।

तद् व्यवहारज्ञानं काव्यानां शीलनेन विना।
नैव कदाचिल्लभ्यं तस्मादेतत् प्रयोजनं काव्ये।।२४११।।

अशिवक्षयस्तु नूनं काव्यात् संजायते नितराम्।
कविसहृदययोरेतत्समानमेव प्रयोजनं भवति।।२४१२।।

रोगैर्वा पापैर्वा नानासंस्कारजालैर्वा।
कल्याणेतरयोगो विषमवरो जायते पुंसाम्।।२४१३।।

सर्वविधकर्मसिद्धौ जीवनकाले सदा सुधियाम्।
अशिवः सोऽयं नितरां प्रतिबन्धक एव विद्यते विपुलः।।२४१४।।

प्रतिबन्धकसद्भावे कारणसामग्रयभावेऽपि।
कार्यं नोदयमासादयते तदा समभिशप्तम्।।२४१५।।

तस्मात् कार्यसमृद्ध्यै नितरां प्रतिबन्धकः सोऽयम्।
अशिवो दूरीकार्यः काव्यं तेनैव चाराध्यम्।।२४१६।।

सूर्यशतकनिर्माता बाणश्यालो मयूरकविः।
कुष्ठेनाशिवरोगेणाक्रान्तो मुक्तिमालेभे।।२४१७।।

जगदीश्वरभक्तौ यत् विपुलतरं स्तोत्रसाहित्यम्।
एतत्त्वशिवनिकुञ्जे कुठाररूपं समाभाति।।२४१८।।

पण्डितराजेन तु या गङ्गालहरी विनिर्मिता सद्यः।
भागीरथीप्रसादादशिवं सर्वं विलीनमथ तस्य।।२४१९।।

दिव्यस्तुलसीदासः काव्यैः स्वीयैरलं विमलैः।
राघवयशसां गानैर्नाशितवानशिवजालं स्वम्।।२४२०।।

काले काले कविभिस्तानि स्तोत्राणि रचितानि।
भक्तिभरैर्यत्पाठैरद्याप्यशिवं पलायते दूरात्।।२४२१।।

तस्मादशिवविनाशे काव्यानां जागरूकत्वम्।
अनुभवशतैः प्रसिद्धं सर्वैरेवोपकारकं स्मृयते।।२४२२।।

सद्यः परनिर्वृतता वेद्यान्तरशून्यताथवा सद्यः।
काव्यास्वादेन यथा न तथान्येनाथ केनापि।।२४२३।।

साधारणीकरणमथ व्यापारादि प्रवर्तते तत्र।
येन च परमानन्दः सद्यश्चेतसि समुद्भवति।।२४२४।।

आधुनिकैस्तु समालोचकमूर्धन्यैरादितः सेयम्।
पारम्परिकी धारा व्याख्याता नवनिबन्धेषु।।२४२५।।

मानसोऽध्ययनप्रक्रमसंलग्नाश्चाथ विद्वांसः।
नानाविधैर्विचित्रैश्चित्रैस्तद्विवरणे दक्षाः।।२४२६।।

आदिकविर्वाल्मीकिर्भासः श्रीकालिदासो वा।
शतशोऽथ कविवरेण्याः सद्यः परनिर्वृतिं दद्युः।।२४२७।।

काव्यानां तिर्माता रचनाकालेऽथ यां लभते।
तत्पाठकाः सहृदयाः दर्शनकाले च दर्शकाः सर्वे।।२४२८।।

इयमेव विस्मृतिः सा सर्वस्यैवार्थजातस्य।
नानादुःखमयस्य च निखिलस्यापि प्रपञ्चस्य।।२४२९।।

काव्याध्ययने योऽयं सद्यो लाभः समुद्भवति।
निखिलेऽस्मिन् संसारे नैवासौ प्राप्यतेऽन्येन।।२४३०।।

अन्यैरथाप्युपायैः सद्यश्चानन्दसंप्राप्ति-।
र्या वा समुपालब्धा क्लेशस्याप्यत्र संवेशः।।२४३१।।

आनन्दोऽप्यथ नितरां स्वल्पाकारे समुद्भूतः।
नैव मनोज्ञां काष्ठामारूढो वा समाभाति।।२४३२।।

काव्यद्वारा योऽसावानन्दोऽन्तः समुद्भवति।
तन्मात्रावैपुल्यं परशब्दः संप्रकाशयति।।२४३३।।

क्लेशावेशः सोऽयं यस्मात्संत्यज्यते दूरे।
परशब्दोऽयं तादृशमप्यर्थं संविभासयति।।२४३४।।

बीभत्से रौद्रे वा करुणे शान्ते रसानुभवे।
सद्यः परमानन्दः संविद्रूपश्च केवलस्तिष्ठेत्।।२४३५।।

लोकैर्यद्यपि दुखं दृष्ट्वा संजायते यैर्वा।
तैरेव काव्यबन्धव्यवस्थितैः परसुखानुभवः।।२४३६।।

तस्मात्सद्यः परमा निर्वृतिरेषा यया काव्यम्।
बुद्धौ मनसि विचारे लोकानावर्जयति नित्यम्।।२४३७।।

कान्तासम्मितताया उपदेशेष्वस्ति साम्राज्यम्।
तत्सर्वसुन्दरं वा प्रयोजनं काव्यजातस्य।।२४३८।।

अन्यविधा उपदेशा प्रभुसम्मिता मित्रसम्मिता वापि।
यत्र च गतप्रभावाः कविता तत्रापि जागर्ति।।२४३९।।

यत्र च गुरूपदेशाः कर्णे तप्ता विशन्ति नो रुचिराः।
मित्राणामुपदेशा गलहस्तितमुपागताः सन्ति।।२४४०।।

तादृशविनेयसंघेऽप्यासादितवैभवं काव्यम्।
मत्तेभेन्द्रं करिणी यथा वशे सर्वमानयति।।२४४१।।

कटुतिक्तौषधरूपं काव्यादतिरिक्तवाङ्मयं निखिलम्।
सितशर्करासदृशमथ काव्यं रोगं विदूरयति सद्यः।।२४४२।।

इदं प्रयोजनषट्कं प्रस्थापितमार्यमम्मटेनादौ।
काव्यप्रकाशबन्धे तस्याऽध्ययनं मया विहितम्।।२४४३।।

ऐक्यम् नाम रसायनमस्तीदं जीवने पुंसाम्।
तदिदं जडेऽपि चेतनपुञ्जेऽप्याभाति तत्त्वतो नूनम्।।२४४४।।

भेदेऽनन्ते जाग्रति तत्राऽभेदो विचारमायातः।
संदृश्यते तु नानादर्शनशास्त्रस्य तत्त्वरत्नेषु।।२४४५।।

नानाविधे समाजे नानापुरुषेषु देशेषु।
भावमये संसारे सर्वत्रैक्यं समुल्लसति।।२४४६।।

मानवमात्रे याऽसौ भावानां परिणतिर्दृष्टा।
तत्रैवैक्यास्वादं प्रवर्तयति काव्यधारेयम्।।२४४७।।

याऽद्यत्वे मम मानसपटले संजायते स्वतः स्फूर्तिः।
पश्चादध्ययने सा वाल्मीकेर्वाचि संदृष्टा।।२४४८।।

अन्योन्योऽपि विचारो यदा तदा मानसे स्वयं भातः।
कविकुलगुरुरपि काव्ये स्वीये प्राहेति नीयते पश्चात्।।२४४९।।

भावानां संवादः सोऽयं नितरां मनस्यैक्यम्।
संस्फोरयति नितान्तं तेन च सुषमा समुन्मेषः।।२४५०।।

युद्धोन्मेषे काव्यं सैनिकहृदयेषु यां परिस्फूर्तिम्।
सूते तेन च योद्धा करालकालः समाभाति।।२४५१।।

मानवमात्रे नूनं प्रसुप्तभावे स्थिता शक्तिः।
तज्जागरणायाऽपि च कव्यस्याराधना क्रियते।।२४५२।।

काव्यप्रयोजनानि तु साकल्येन क्व गण्यानि।
पण्डितराजोऽनेकप्रयोजनकमादिदेश तथा।।२४५३।।

शृंगग्राहिकयैव च वर्णनमास्तेऽथ मम्मटार्यस्य।
साकल्येन तु गणने का शक्तिर्वास्ति कस्यापि।।२४५४।।

अयमपि व्याख्यानेषु स्फुटं भ्रमे एव संचारः।
यत् काव्यमिदं केवलमास्ते सुकुमारमतियोग्यम्।।२४५५।।

प्रौढात्प्रौढमतीनां छात्रत्वं काव्यविषये स्यात्।
दुर्दान्तोऽपि च सिंहः सिंहीचाटुत्वमालभते।।२४५६।।

केवलवाच्यार्थे ये मनुजाः केचित्प्रगल्भन्ते।
ते व्याकरणपुराणादीनामधिकारिणो ज्ञेयाः।।२४५७।।

औदार्यपरिस्फुरणं मन्ये काव्यस्य सम्पदा प्राप्यम्।
माघसदृक्षाः कवयो वदान्यतायां न तुलनीयाः।।२४५८।।

श्रीमान् स सूर्यकान्तस्त्रिपाठिवर्यो निरालाख्यः।
स्वीयौदार्यस्य कृते नितरां विख्यात एवासीत्।।२४५९।।

काव्यानामध्ययनादवाप्यते कापि संस्फूर्तिः।
यस्याः प्रभया नूनं जीवनमेतत्समृद्धिमाप्नोति।।२४६०।।

यद्वा वर्ण्यं लोके स्तोके रूपे निभाल्यते लोकैः।
तदनल्पकल्पनायामानन्त्यं नीयते कविभिः।।२४६१।।

वर्ण्ये वैपुल्यत्वापादनमपि काव्यशीलनाल्लभ्यम्।
वाणीनां संसारः सारो वा जीवने विमलः।।२४६२।।

यो वा को वा लोके कविरूपं स्वात्मसंस्थितं द्रष्टुम्।
कामयते नु तदर्थं सद्यः काव्यं समाराध्यम्।।२४६३।।

जडचेतनसंसारे सत्यं शिवसुन्दरं द्रष्टुम्।
काव्यादन्यन्नैवावलोक्यते कारणीभूतम्।।२४६४।।

नानासिद्धान्तानां प्रचारकार्यं यथा काव्यात्।
संजायते समस्तं तेन च काव्यं समाराध्यम्।।२४६५।।

पार्यन्तिकं प्रयोजनमिदप्यास्ते यथाऽन्येषाम्।
पाठ्ये निर्धारणमपि कक्षासंघटनमेवापि।।२४६६।।

कविकुलगुरुरपि शास्त्रिस्तरतोऽग्रे नैव संयाति।
प्रत्यक्षरसंश्लिष्टान्याचार्यार्थे गवेष्यन्ते।।२४६७।।

सप्तमद्वीपः

९५.सम्मेलनम्

सम्मेलनमद्यत्वे संचितसंचालकं तत्वम्।
सम्मेलने समन्तात्साम्मुख्यं सत्यमुन्मिषति।।२४६८।।

एकैकस्मिन्नैवाऽऽयातितमां सा निगूहिता शक्तिः।
सम्मेलने प्रगुणिता प्रकटितविभवा विलोक्यते सैषा।।२४६९।।

असुरैर्युद्धे देवा यदा यदा दुर्गतिं याताः।
सम्मेलनेन तेषामापत्तिर्दूरिता सद्यः।।२४७०।।

महिषासुरवित्रस्तैर्देवैः सम्मेलनं कृत्वा।
जगदम्बाया रूपं स्वस्मात्सम्यक् प्रकटितं दृष्टम्।।२४७१।।

तारकदैत्यत्रस्तैरपि सम्मेलनमथारब्धम्।
शंभोः प्रसादनविधौ साफल्यं प्राप्तवन्तस्ते।।२४७२।।

किं बहुना सम्मेलनमेतत्तद्विद्यते पुराणानाम्।
निर्मितिरेषा जाता नाना जनताप्रसादार्थम्।।२४७३।।

कष्टेनाक्रान्तास्ते ऋषयो मुनयस्तथा देवाः।
मनुजा असुरा अपि वा सम्मेलनसंमुखा जाताः।।२४७४।।

कस्यापि किमपि चेतसि नूतनतत्त्वं समुन्मिषितम्।
तस्य प्रचारणार्थं सम्मेलनमेकमाहूतम्।।२४७५।।

बुद्धत्वे सम्प्राप्ते समाधिभावे स्थिरे जाते।
स्वात्मानुभवख्यापनसरणौ सम्मेलनानि जातानि।।२४७६।।

पूर्वं यज्ञानां यो भारतवर्षे प्रभावविस्तारः।
संजातस्तत्रेदं सम्मेलनतत्त्वमेव सन्दृष्टम्।।२४७७।।

नाना नवान् विचारानुत्थापयितुं समर्थनं प्राप्तुम्।
नानाविधैश्च तर्कैस्तान् पोषयितुं हि सा भूमिः।।२४७८।।

सम्मेलनेषु विविधेष्वाहूताः सर्व एवैते।
विविधा महानुभावाः स्वीयं कर्तव्यमावहन्त्येव।।२४७९।।

सिद्धान्तानां सम्यङ् निर्धारणमत्र यज्जातम्।
तस्य प्रपूरणार्थं जनता सर्वा सुसन्नद्धा।।२४८०।।

आसीदस्मद्देशो दीर्घात्कालात्तु परतन्त्रः।
तस्याप्युद्धारार्थं नाना सम्मेलनानि जातानि।।२४८१।।

कोटिप्रगुणितमानवमनोवचःकायसंसारे ।
सम्मेलनप्रभावैरैक्यं नूनं समायातम्।।२४८२।।

दौर्गत्यमपि च सर्वं दूरीभूतं तथा चैतत्।
सामर्थ्यं चोल्लसितं मनुजे मनुजे परं दीप्तम्।।२४८३।।

सम्मेलनस्य महिमा नूनं सर्वत्र सन्धार्यः।
येन भवति तत्सर्वं यदसंभवमेव पूर्वमाभाति।।२४८४।।

समाजिकसंरचना यदा यदा क्षोभमुपयाति।
तस्या विधारणायतु तदैव सम्मेलनं भवति।।२४८५।।

सर्वाऽप्युपायसरणिर्निभालिता सद्विचारसंपूर्णैः।
कालेऽस्मिन्वैज्ञानिकविलासभासां विधानसन्दीप्ते।।२४८६।।

नाना गणितकलायां सम्मेलनदीप्तिरायाति।
निष्कर्षाणामवलिस्तेषां मध्ये पदं लभते।।२४८७।।

विद्वत्सम्मेलनमिदमाविर्भावयति तद् दृश्यम्।
गगनस्थितं रहस्यं विज्ञातं मानवेनाद्य।।२४८८।।

एकैकस्या अस्या उपलब्धेरस्ति तन्मूलम्।
विद्वद्विचारधारासम्मेलनमेव कालेषु।।२४८९।।

मानवजीवनमेतत्स्वल्पं कियता च कालेन।
स्वर्णयुगे स्वनिवेशः संस्थापित एव मनुजेन।।२४९०।।

एकैकस्मिन् शक्तिर्नैवाऽस्ते येन सर्वमिदम्।
संजायेत नितान्तं सर्वाऽभीष्टप्रदं यत् स्यात्।।२४९१।।

नाना कष्टं सोढ्वा विपुलं द्रव्यं व्ययीकृत्य।
सम्मेलनं तथेदं विदुषामाहूयते सद्भिः।।२४९२।।

सम्मेलनशूराणां गाथा एता गृहे गृहे गीताः।
रचयन्ति नूनमसमं मानसमध्ये सुसाम्राज्यम्।।२४९३।।

सम्मेलनानि विविधान्यद्यत्वे यानि जायन्ते।
तेष्वाशापरिपूर्तिर्नैवाऽभीष्टा समूहस्य।।२४९४।।

कस्याप्येकस्य कृते द्वित्राणां पञ्चाषाणां वा।
स्वार्थाभीप्सितपूरणमात्रं वा दृश्यते साध्यम्।।२४९५।।

अन्येषामपि केषांचिद् या संजायते प्राप्तिः।
सा सर्वा त्वनुषङ्गे संजातेत्येव दृश्यते प्रायः।।२४९६।।

एकैकेनैकैकं दलं विनिर्माय वा सततम्।
सम्मेलनानि विविधान्याहूयन्ते तदा तदा लोके।।२४९७।।

तस्याऽऽक्षेपान् श्रोतुं सद्यश्चैकत्रिता जनता।
सर्वं चैतत्पत्रे चित्रैः सह मुद्रितं जातम्।।२४९८।।

अपरेषां केषाञ्चित् सदनुष्ठानं तथा चैतत्।
विपुलार्थागमरूपं पूर्णं सन्तोषदायकं जातम्।।२४९९।।

सम्मेलने विशिष्टा विद्वांसो ये समाहूताः।
आवागमनव्ययमिह संमिलिताः सम्यगीहन्ते।।२५००।।

एवंविधसन्दर्भे निर्धारितमाननीयविषयेषु।
संमिलितानां विदुषां विचारपूर्णाः सुभङ्गिमा भान्ति।।२५०१।।

सम्मेलनसंमिलिताः सर्वेऽप्येते तु विद्वांसः।
सद्भोजनसंतुष्टा नाना स्थानेषु विचरन्ति।।२५०२।।

मैत्रीभावं परमं परितोऽप्येते नु वर्धयन्तितराम्।
तेनान्यस्मिन् योगेऽप्येते स्मरणे सदा कुर्युः।।२५०३।।

सम्मेलनेषु सद्यो मैत्रीभावो विलोक्यते योऽसौ।
तेन तु सुमहत्कार्यं संजातं नात्र सन्देहः।।२५०४।।

लिखितानां पत्राणां या प्रस्तुतिरत्र जायते यत्नात्।
सा मुद्रिता च पश्चादपि विदुषां करगता भवति।।२५०५।।

तेनाऽत्र प्रतिभायाः सत्रेष्वाचार्यतां प्राप्ताः।
विद्वान्सोऽखिलजनतासमुन्नतौ दत्तचेतसो भान्ति।।२५०६।।

केवलशब्दविवादे फलशून्ये वा विवादसन्दर्भे।
नो विद्यते समेषामेषां रुचिरा मतिः क्वापि।।२५०७।।

सम्मेलनानि च तथा जनजागरणार्थमपि चाद्य।
जायन्ते नेतारो यत्र च मिलिता भवन्त्येव।।२५०८।।

एते जननेतारः शासनसंचालकानां ताम्।
परिपुष्टां परिपाटीमशिष्टताकोटिमाहरन्त्येव।।२५०९।।

जनकोपोत्तेजकता शासकवर्गे समारब्धा।
सम्मेलनेषु चैतेष्वद्यास्ते लोकनीयैव।।२५१०।।

शासनकर्तृणां वा परिवर्तनमपि तथादेष्टुम्।
सम्मेलनानि तैस्तैर्दलैः समायोजितान्येव।।२५११।।

शासनसंयोजितमथ सम्मेलनमद्भुतं भवति।
बहुसौख्यलाभपूर्णं बहुधनमानादिपूजितं चैतत्।।२५१२।।

कविसम्मेलनमपि चाद्यत्वे सौख्यं समावहति।
कवयोऽपि सन्ति चैते पूर्णचमत्कारसम्पन्नाः।।२५१३।।

संगोष्ठयोऽपि चैता आंग्लानां सेमिनारपदवाच्याः।
नाना निबन्धनिचिता नानाऽलोचनचमत्कृता जाताः।।२५१४।।

विद्वांसोऽपि मिलन्ति हि नाना भूभागसंस्थिता अत्र।
नाना सन्देहानां दूरीकरणं च जायते तत्र।।२५१५।।

किन्तु तथाविधधैर्यं पूर्वाग्रहयुक्तताऽभावः।
योऽसौ वरेण्यरूपोऽत्यल्पो वाऽथ दृश्यते तत्र।।२५१६।।

केचित्त्वत्र तथाविधगर्वोन्नतभावनाजुष्टाः।
विद्वांसो दृश्यन्ते सर्वं ज्ञानं निजं येषाम्।।२५१७।।

उद्घाटनाय तावत्सर्वोच्चपदस्थसत्पुरुषाः।
सर्वाग्रहैर्नितान्तं भक्तैरत्रैव सेव्यन्ते।।२५१८।।

अध्यक्षता च कस्मै देयेत्येवं सुनिश्चितं भवति।
निर्वाचनपरिपूर्तिः प्रभावमात्रेण संसाध्या।।२५१९।।

प्रायो ये श्रमपूर्णास्ते न स्थानं लभन्तेऽत्र।
ये तु प्रबुद्धचरितास्तेषामेवाऽत्र दृश्यते राज्यम्।।२५२०।।

येऽनुग्राह्या येषामाह्वानेनात्मनो ह्वानम्।
संभाव्यते भविष्ये ते संगोष्ठीषु प्रथमाः स्युः।।२५२१।।

एषैव राजनीतिर्जाताऽद्यत्वे गणनयोग्या।
शब्दस्तु 'राजनीति'स्तत्रापि स्वं पदं लभते।।२५२२।।

केचनदोषा एते दृश्यन्ते सर्वगोष्ठीषु।
सर्वमनोहरतायाः पूर्णोऽभावः सदैव जागर्ति।।२५२३।।

पुनरपि सम्मेलनमिदमात्मीयं रूपमद्भुतं दिव्यम्।
कालेऽस्मिन् लोकोत्तरनेपथ्ये संप्रकाशयति।।२५२४।।

उत्साहानां वृद्धिर्जायत एवाऽद्य विद्वत्सु।
सम्मेलनेषु सत्यं सत्यं सत्यं न सन्देहः।।२५२५।।

९६. वार्ता

या वार्ता भगवत्याः स्वरूपभूता समुद्घुष्टा।
महिषासुरवधहर्षोत्फुल्लमुखैरेकदा देवैः।।२५२६।।

वार्ता स्याद् भवदीया स्याद् वा वार्ता मदीयेयम्।
मनुजस्य जन्मपूर्तिर्वार्तामपहाय नैवाऽस्ते।।२५२७।।

वार्तामयसंसारे सर्वविधा विद्यते वार्ता।
रूपाण्यथ वार्तानां परिगणने सन्त्यनन्तानि।।२५२८।।

वार्तामयपत्राणां प्रकाशनं नित्यमेवाऽस्ते।
पत्राऽलोकनलोपे घोरः संजायते कालः।।२५२९।।

आकाशस्थितवाणी यन्त्राधारेण विद्यते याऽसौ।
तस्यामपि वार्तैवाऽसादयते स्थायिरूपत्वम्।।२५३०।।

या दूरदर्शनेऽस्मिन् शुभसंचारे सुकमनीये।
नित्यं विराजमाना सा सर्वा विद्यते वार्ता।।२५३१।।

गणतन्त्रात्मकशासनपद्धत्या यत् प्रचालितं सत्यम्।
चयनाख्यं सा चेयं चुनाववार्ता परा काचित्।।२५३२।।

सेयं चुनाववार्ता यदा यदा जायते देशे।
निद्राया अपि लोपे सा वार्ताऽऽराध्यते सर्वैः।।२५३३।।

युद्धोन्मादविरामे काचिद् वार्तैव शरणं नः।
मतभेदेऽप्यत्युग्रे वार्तेवाऽस्ते प्रशामकं शस्त्रम्।।२५३४।।

वार्ता पुरातनी वा मध्वयुगीनाऽथवा वार्ता।
वार्ता चाऽद्यतनीया सर्वे काले भवति वार्ता।।२५३५।।

वार्तायां व्यक्तित्वं नतमां केनापि संशक्यम्।
ईदृक्तयाऽथवा स्यादियत्तया वाऽपि संधातुम्।।२५३६।।

गृहे गृहे सा वार्ता कोणे कोणे प्रतिष्ठिता वार्ता।
जगति न साऽस्ते काचित् स्थली न यत्राऽस्ति वार्तेयम्।।२५३७।।

वार्ता विद्युत् सदृशी वार्तेयं जलदसदृशी वा।
सूर्याचन्द्रमसावपि वार्तौपम्यत्वयुक्तौ स्तः।।२५३८।।

नास्ति किमपि संसारे पदार्थसार्थं पुरोऽस्माकम्।
यस्य न काचिद् वार्ता संजाता नो भविष्यति वा।।२५३९।।

स्थूले सूक्ष्मेऽणुतमे बृहत्तमे वा विविधरूपे।
वार्तेयं सन्दृश्या लोकाऽलोचनविचक्षणा सततम्।।२५४०।।

निजमङ्गलमयरूपे लोके परमार्तिहन्त्रीयम्।
विपरीते निजरूपे विपरीतं दृश्यमातनुते।।२५४१।।

वार्तायामथवार्ता तस्यामपि विद्यते वार्ता।
तस्यामपि तस्यामपि तस्यामपि विद्यते वार्ता।।२५४२।।

उष्णोष्णा वा शीता शीततरा वा भवति वार्ता।
लावण्यैः संयुक्ता मधुरा मधुराऽपि विद्यते वार्ता।।२५४३।।

९७.बहुमतम्

सम्प्राप्ते स्वातन्त्र्ये सर्वमकाव्यायितं जातम्।
आसीद्यत्तु ससीमं सीमाभङ्गः कृतस्तत्र।।२५४४।।

निखिलमनर्थकमेतद्राजा राज्यं च वर्णाश्च।
अस्पृश्यता च धर्मः सर्वमसंबद्धमेवाद्य।।२५४५।।

एतेष्वर्थेष्वेकः शब्दो भूतपूर्व इति सिद्धः।
नाना नरेशनामग्रहणे पत्रेषु दर्शनं तस्य।।२५४६।।

स्वातन्त्र्ये सम्प्राप्ते बन्धनसामान्यसंन्यासः।
संजातो न यदि तदा स्वातन्त्र्यमनर्थकं जातम्।।२५४७।।

शारीरं मानसिकं बौद्धं चैवापि बन्धनं त्याज्यम्।
तद्विपरीतं बन्धनमुक्तत्वं सर्वथा ग्राह्यम्।।२५४८।।

आचारेऽनाचारो धर्मेऽधर्मः सदा ग्राह्यः।
काव्यं तथाप्यकाव्यं बन्धनमुक्तं समाद्रियते।।२५४९।।

यद्यप्येतन्निखिलं समर्थनीयं स्वतन्त्रताऽनुभवे।
परमाकाशे वाणी वयसामेवोपकारमातनुते।।२५५०।।

बन्धनभङ्ग कार्यो यदि किमिदं बन्धनं नाम।
देशः शासकपरिषद् न्यायालयसंविधानादि।।२५५१।।

प्रश्नेऽस्मिन्नुत्तरमथ बहुसंमतमत्र यद् दृष्टम्।
स्वातन्त्र्ये तच्छ्रेष्ठं दिल्लीतो यद्यदादिष्टम्।।२५५२।।

९८.गोधूली

अस्तं गच्छति सूर्यः प्रकाशमाला सुशीतलाऽऽयाति।
मानसमध्ये कोमलभावानामस्ति संचारः।।२५५३।।

नवतामयता काचिद् भातितरां हृत् प्रदेशेषु।
कस्य न कान्ताराणां सुषमासाम्राज्यमुल्लसितम्।।२५५४।।

धूलीपटलाच्छन्नं भवति गवां व्योम सत्वरं चैतत्।
गोधूलीवेलेयं पवित्रभावैः प्रपूरिता जयति।।२५५५।।

सायं वेला सेयं विभाति भावाभिरामरमणीया।
यस्याः पृष्ठे सेयं विभावरी संविभासते नित्यम्।।२५५६।।

सायंकालिकसमयः श्रान्ते पुरुषे सुशान्तिमातनुते।
निर्मलमाभाति नभः सुषमामसमां समातनुते।।२५५७।।

सायंसमयसमीरैरान्दोलितवाङ्मनःकायाः ।
जीवनसुषमाभाग्यं स्वीकुर्वन्त्येव नम्रतराः।।२५५८।।

स्वागतसम्भाराणां सायं समये समावेशः।
संशोभते नितान्तं नानाभावैः समुल्लसितः।।२५५९।।

काचित् समये तिष्ठति बाला सम्यक् प्रतीक्षमाणेयम्।
यस्या मनः प्रदेशे काल्पनिकं विद्यते राज्यम्।।२५६०।।

परिजनपरिचरवर्गः सत्वरमेव प्रधावमानेषु।
निकटं गच्छति कांक्षति कृपाकटाक्षं विचक्षणैर्युक्तः।।२५६१।।

९९.शास्त्रम्

हन्त किमिव कथनीयं सौन्दर्यस्यापि दृश्यते शास्त्रम्।
शास्त्रं यत्र तु जातं तदुपरि शस्त्रप्रहारोऽयम्।।२५६२।।

कस्यापि तु विषयस्य हि मृत्यून्मुखता भवति यदा।
भाग्यविहीनस्य तदा मन्ये निर्मीयते शास्त्रम्।।२५६३।।

शास्त्रे शस्त्रे च पुनः केवलमाकारतो भेदः।
कतमामुपासकानां भेदः सोऽयं निभालनीयः स्यात्।।२५६४।।

यो नाम शास्त्रवेत्ता निर्माता वाऽथ शास्त्रस्य।
नूनं प्रहारकर्ता कर्कश एवाऽस्ति दृश्यतां परितः।।२५६५।।

किं वा निर्मितमासीत्कविकुलगुरुणा स्वयं शास्त्रम्।
नूनं सोऽप्यद्यत्वे स्वयमिह शास्त्रत्वमापन्नः।।२५६६।।

तुलसीदासेन पुनः किं वा शास्त्रं विनिर्मितं दृष्टम्।
सर्वाण्यपि तेषां ननु चरणे लग्नानि दृश्यन्ते।।२५६७।।

शास्त्रमिति तु शब्दोऽयं नो वा भयदायकं वस्तु।
भयसंदायकमुखतो विनिर्गमाद् भीषणो जातः।।२५६८।।

प्रोद्घोषकदंभानां पूर्तिं कर्तुं सुजागरूकोऽयम्।
शास्त्रेत्येषः शब्दो निरूप्यते सर्वजनतासु।।२५६९।।

क्षुद्रस्वार्थानामथ परिपूर्तिर्जायतेऽनेन।
वक्तृमुखनिःस्पृहत्वं नो लक्ष्यं सर्वजनतासु।।२५७०।।

१००.वृषभः

अयमस्त्येको वृषभः पुरुषाकारो निमीलितशृंगः।
पुष्टिं परां दधानस्तृणवत्सर्वं जगन्मनुते।।२५७१।।

कस्यामपि वार्तायां चलितायां यो ब्रवीति तथा।
वृषभस्थ स्वरजातं स्मृतौ समायाति सद्योऽपि।।२५७२।।

गौराकारो वृषभः पादार्पणपूतपृष्ठो नो।
सर्वान्निपात्य सोऽयं स्वरवैषम्यं प्रकाशयति।।२५७३।।

सर्वे त्यजन्ति मार्गं चैनं दृष्ट्वा समायान्तम्।
भीता यस्माद् घाते पीड़ा काचित् समधिका स्यात्।।२५७४।।

एतेन मार्गदानेनैवाऽयं पूर्णसन्तुष्टः।
सर्वश्रेष्ठं मनुते चात्मानं वक्ति सर्वत्र।।२५७५।।

शुभ्रबलीवर्दोऽयं वार्तामेकाकिनीमेव।
दम्भरसैः परिपूर्णां सर्वत्रोपायनीकुरुते।।२५७६।।

नूनमनेनैकस्मिन्काले यावन्निगलितं वा।
चर्वितचर्वणविधया तस्यैवाद्यापि गूर्णनं कुरुते।।२५७७।।

नो कस्यापि तु शंसां कर्तुं सोऽयं समर्थः स्यात्।
सर्वेषामपि दूषणमालां कण्ठे विधारयति।।२५७८।।

या काचिदर्थसिद्धिर्यस्मात् कस्माद् विजायते रुचिरा।
तस्य स्तवने जिह्वां सहस्रधाऽयं विचालयते।।२५७९।।

एतादृशास्तु मनुजाकारा ये वा बलीवर्दाः।
भयतामुक्तेर्हेतोस्तवनं लोकेषु दृश्यते तेषाम्।।२५८०।।

सोऽयं यदा विमुक्तिं यास्यति कस्माच्चनाधिकाराद्वा।
न तदा कोऽपि मनुष्यस्तं द्रष्टुं व समीहेत।।२५८१।।

अयमस्त्यपरोवृषभो दुर्बलकायो महामायः।
वर्षीयानीतिकृत्वा दौर्गन्ध्यं सर्वमातनुते।।२५८२।।

चक्षुश्चालनवेलाचालितविश्वस्तथा मनुते।
यदि नाहं तु भवेयं सृष्टिः सर्वा विलोपमियात्।।२५८३।।

१०१.विजयः

जीवनसमरप्रांगणमध्ये विजयोऽयमाराध्यः।
विजयः सहस्रवारं वारं वारं पुनःपुनर्विजयः।।२५८४।।

सांग्रामाणां रूपाण्यनन्ततायां प्रदृश्यन्ते।
एकस्मिन् संग्रामे विजयावाप्तौ प्रभावितं सर्वम्।।२५८५।।

विजयः प्रतिक्षणं स्यात् क्षणमात्रे यदि विजयहानिः।
तत्र पराजयभूमिः सहजा सन्दृश्यते नियतम्।।२५८६।।

यदि शक्तिरर्जिता स्याद् विजये नूनं न सन्देहः।
शक्तौ भक्तिस्तस्माद् विजिगीषुभिराहृता सर्वैः।।२५८७।।

संग्रामाऽनन्तत्वे शक्तिरनन्ता भवत्येव।
शक्तिर्वा विजयो वा द्वैतं तन्नास्ति तत्त्वेकम्।।२५८८।।

श्रद्धाऽभ्यासान्दोलितभावैर्नित्यं नवोन्मेषैः।
विजयप्रदायिनी सा शक्तिर्नूनं कृपां कुरुते।।२५८९।।

तस्याः स्वरूपभूता शक्तिरियं महिषमर्दिनी ख्याता।
दुर्दान्तं वनराजं वाहनरूपेण योजयति।।२५९०।।

तस्यै नमः सदैवादृतभावानां सुधन्यतमजनुषाम्।
विजयाभिलाषिणां वा भवति हि भूयो नमस्तस्यै।।२५९१।।

१०२.देशभक्तिः

ज्ञानादृते न मुक्तिर्भक्तिर्नो विद्यते विना ज्ञानात्।
देशस्य भक्तिरित्थं देशज्ञानात् सुसाध्या स्यात्।।२५९२।।

देशज्ञानं तदिदं भौगोलिकमेव केवलं नास्ति।
देशस्य विपुलजनताज्ञानाद्देशस्य भक्तिः स्यात्।।२५९३।।

देशस्य यच्चरित्रं निखिलजनप्रेरकं स्फूर्तम्।
देशे भक्तिं द्रष्टुं ज्ञानं तस्यापि नोपेक्ष्यम्।।२५९४।।

या वा विचारधाराऽनन्ते रूपे समुच्छलिता।
काले काले सर्वा ज्ञेया सा देशभक्तेन।।२५९५।।

देशश्चेश्वरतुल्यो नास्त्येवाऽत्राथ संशीतिः।
तेनैव जीवनं ननु संस्थापितमस्ति देहेऽस्मिन्।।२५९६।।

देशोऽयं ननु मन्दिरमास्तेऽस्मत्प्राणनिष्ठायाः।
सर्वविधमिष्टमाप्तं देशे वर्णद्वयेनालम्।।२५९७।।

सर्वा वसुन्धरेयं देशे देशे विराजते महती।
यो यत्र जन्म लेभे तन्ममता सुस्थिरा तत्र।।२५९९।।

अयमस्मदीय इति या बुद्धिः समुदेति सच्चित्ते।
कोमलतन्तुरिवेयं सहते नो वाच्यतां क्वापि।।२५९९।।

भारतवर्षाऽख्योऽयं देशो धारयति शक्तिं ताम्।
सच्चिन्मयसम्पूर्णां वीरैर्भावैर्विशालतामाप्ताम्।।२६००।।

आद्या काचिच्छक्तिर्ब्रह्माद्या देवताः सर्वे।
ऋषयस्तथा च मुनयो वीरास्ते राजवंशीयाः।।२६०१।।

भारतवर्षे तावत्सोऽयं विभ्राजते कालः।
यो हि चिरन्तनमूलश्चकितेयं सृष्टिरालोक्य।।२६०२।।

१०३.समालोचना

ज्ञानाऽज्ञान-विवेचन-संचितसर्वस्वसंभारा ।
तितऊपमां दधाना कापि समालोचना नाम।।२६०३।।

सामान्यैका दृष्टिः सर्वेषामान्तरे सुलभा।
किन्तु विशिष्टा दृष्टिः काऽपि समालोचना नाम।।२६०४।।

सर्वेषां व्यवहारे या दृष्टिः पूर्वमायाता।
तस्याऽध्ययनं मननं कापि समालोचना नाम।।२६०५।।

या गुणदोषविचारोद्घाटननिपुणैर्विवेचकैर्नितराम्।
क्रियते शुभसंचारा कापि समालोचना नाम।।२६०६।।

प्रियताप्राया वृत्तिर्वाचि सदाऽराध्यते शिष्टैः।
दोषा नोद्घाट्यन्ते तैर्वा कुत्रापि कस्यापि।।२६०७।।

रामादिव्यवहारोऽङ्गीकार्यो रावणादीनाम्।
व्यवहारः सन्त्याज्यः काऽपि समालोचनैवेयम्।।२६०८।।

ताटस्थ्येन परीक्षा विधीयते या विशेषज्ञैः।
दोषगुणान् प्रस्तोतुं सैव समालोचनासरणिः।।२६०९।।

रचनाकारादन्ये ये ज्ञातारो विशेषज्ञाः।
तेषामवहितकथनं काऽपि समालोचना नाम।।२६१०।।

कान्तासम्मितमयता या काव्यानां प्रमाणभूताऽस्ते।
तत्र हि जीवनमूला कापि समालोचना सैषा।।२६११।।

पदवाक्यानां नहि नहि मात्राणामक्षराणां वा।
यत्र विचारः क्रियते या काव्यानां परा सम्पत्।।२६१२।।

नाना टीकाव्याख्याविरचनवेलासु विद्वांसः।
सूक्ष्मेक्षिकानिवेशैः सर्वामालोचनां चक्रुः।।२६१३।।

तर्काणां सौन्दर्यं सौभाग्यं शब्दयोगानाम्।
वैचारिकमुत्थानं यत्र समालोचना सैषा।।२६१४।।

दिव्योत्तमसन्मार्गेष्वन्धत्वं सम्प्रजायेत।
यदि सत्प्रकाशपूर्णा कापि समालोचना न स्यात्।।२६१५।।

लक्षणनिर्माणानां सर्वेऽप्येते समारंभाः।
नाना विधमालोचनमेव क्रोडे प्रकुर्वन्ति।।२६१६।।

येयं वाङ्मयमध्ये शास्त्रेत्याख्या प्रदृश्यते काचित्।
परिरक्षणपरिपाटी सैव समालोचना नाम।।२६१७।।

सम्यग्दर्शमननव्यपारानादिशन्तीयम् ।
प्रतिपदमुपकारपरा काऽपि समालोचना नाम।।२६१८।।

निजनिर्मितकाव्यानां कविरपि नो मर्मविज्ञाता।
तथाविधः सन्दृष्टो यथा समालोचका एते।।२६१९।।

तेनैवालोचकतामुपागतास्ते मनीषिमूर्धन्या।
आचार्या इति कथिता लोकोत्तरतां विधारन्त्येव।।२६२०।।

१०४.सेवा

सेवाधर्मस्तावत्परमो गहनः समाख्यातः।
सेवाधर्मे लग्नास्त्रैलोक्यं करगतं कुर्युः।।२६२१।।

निखिलेऽपि सम्प्रदाये सर्वे देशेऽथ काले वा।
सेवाधर्मः सततं नूनं संसेव्यतां याति।।२६२२।।

कठिनत्वमत्र तावद् गहनत्वं वा समादिष्टम्।
तद् वस्तुतः स्वरूपं सेवायाः सम्प्रकाशयति।।२६२३।।

नम्रत्वं सेवायां प्राथम्येन प्रतिष्ठितं ध्येयम्।
नो नम्रत्वं यत्र तु सेवा तस्मात् सुदूरमुपयाति।।२६२४।।

कुशलत्वं पुनरथवा समर्पकत्वं प्रसन्नता चैव।
सेवायां संलग्नैः पुरुषैः संसाधनीयाः स्यु।।२६२५।।

आपाततोऽतिमधुरा परिणामे क्लेशदायिनी याऽसौ।
क्रोधं मध्ये मध्ये समाह्वयति तामसी सेवा।।२६२६।।

द्रव्यव्ययसंसाध्या मध्यममार्गेण संयुक्ता।
तोषैरथवा रोषैः परिपूर्णा राजसी सेवा।।२६२७।।

आदौ मध्ये चान्ते सर्वविधाऽनन्ददायिनी नित्या।
सर्वत्र पूर्णपुरुषैः संसाध्या सात्त्विकी सेवा।।२६२८।।

सात्त्विकराजसतामसभेदा एते च सेवायाः।
समुपेक्ष्यन्ते वैकश्चित्तेषामेवैव सर्वदा सेवा।।२६२९।।

सेवाया या वृत्तिर्मानसिकी सूक्ष्मसंचारा।
सा सृष्टिमात्रसुलभा कुत्राऽभावो विलोक्यते तस्याः।।२६३०।।

सेवायाः परिभाषा सुविस्तृता तादृशी जयति।
जडजंगमजगतां या व्रतेषु कुरुते विभागसंक्षेपम्।।२६३१।।

प्रत्युपकारपदार्थं या नूनं नो विजानाति।
उपकारपरामर्शो यत्राऽस्ते प्रेरणाभूमिः।।२६३२।।

सेव्यानामाकारं मनुते सर्वेश्वरस्य सद्रूपम्।
सा स्वात्मलाभमुख्या परिपूर्णा विद्यते सेवा।।२६३३।।

अनया विना निमेषे प्रलीनता नूनमागच्छेत्।
सर्वा सृष्टिरियं भोः सेवारूपैव रमणीया।।२६३४।।

सेवाया एवैकं रूपं चाऽस्ते क्षमा नाम।
पृथिवीपर्यायाणां मध्ये सैषा क्षमापि कथितैव।।२६३५।।

सेवां कुरुते सर्वा पृथिवीयं धार्यते यया सर्वम्।
निखिले प्रपञ्चजातं क्षणमात्रं नो तया विना साध्यम्।।२६३६।।

प्रत्यर्पणं च किं वा वायौ गगने तथा मेघे।
सन्देयं वा मनुजैः किमुत्तरं दीयतां तत्र।।२६३७।।

दम्पत्योः प्रणयानां परिणामे सुन्दरा सेवा।
माता स्वीयं दुग्धं स्वात्मीये यत् प्रपाययति।।२६३८।।

सेवा दया कृपा वा क्षमा च शब्दावली सेयम्।
सर्वाभिरामसौरभसारं प्रददाति विश्वस्मिन्।।२६३८।।

रूपे रूपे नियता सेवा सर्वं विधारयति।
पुनरप्याऽस्ते गहना योगिजनैरप्यगम्यरूपैव।।२६४०।।

संकल्पपूर्वकं सा सेवा सन्धार्यते मनुजैः।
गहनं स्वरूपमस्याः संकल्पे दृष्टिमायातम्।।२६४१।।

स्वाभाविकी तु सेवा सर्वा सरला भवत्येव।
नतमां तत्र क्लेशः परिगणनीयत्वमायाति।।२६४२।।

किन्तु यदा संकल्पैः सेवा सन्धारिता भवति।
तत्राऽपाया बहवः सन्त्येवैते पदे पदे निखिलाः।।२६४३।।

तानथ सर्वान् सोढ्वा करणीयैवाद्य कापि सेवेयम्।
सर्वमिदं त्यजमानाः सेवातो दूरमुपयाताः।।२६४४।।

अद्यात्वे सेवायाः प्रयोग एतादृशो जातः।
यत्र हि वेतनलाभः सा सर्वा कथ्यते सेवा।।२६४५।।

१०५.सत्यम्

संसारे सत्यानां संव्याप्तिः सर्वतो दृश्या।
सत्यस्यैव समन्ताच्छुचिता संयुक्त आचारः।।२६४६।।

सत्यं किन्तु तदेतद् ब्रह्मण एवाऽस्ति विलसितं रूपम्।
सत्यात्मनि सर्वत्राऽनुस्यूतं राजते ब्रह्म।।२६४७।।

वाग् व्यवहारविचारे सत्यं सत्यं समायाति।
यद् यद वक्तव्यं स्यात् तत् संयुक्तं सदाचारे।।२६४८।।

वाग्व्यवहारेष्वथवा कीदृग्वाणी भवेत् सत्यम्।
सा कीदृशी तु वाणी या विपरीतास्त्यसत्यं वा।।२६४९।।

स्वीये स्वीये सत्ये सर्वेषां बद्धता दृष्टा।
सर्वे स्वीया सत्या एकस्मिन् वा बृहत्तमे सत्ये।।२६५०।।

सर्वव्यापकसत्यं सर्वेषां नानुभूतमिदम्।
यद्यपि तत् सर्वेषां प्रतिक्षणं हृत्स्थितं सत्यम्।।२६५१।।

बहुभिर्बहुधा गदितं सत्यमसत्यं स्वरूपतः कीदृक्।
सत्यस्वरूपसम्मुखकरणेष्वपि नो मतैक्यमत्राऽस्ते।।२६५२।।

एतन्मदीयसत्यं तव सत्यं तद् भवेन्नाम।
स्वीयं स्वीयं सत्यं सर्वेषां वै पृथग्भूतम्।।२६५३।।

चैतन्येन यदा वा समीकृतेऽस्मिन् नवे रूपे।
स्वीयाऽविर्भावस्य प्रकाशवेला समारचिता।।२६५४।।

तावत्प्रभृति विनैवाऽयासं सत्यं सुसंकुचितम्।
प्रस्तूयते पुरस्तात् दूरीभूतं बृहद्रूपम्।।२६५५।।

अतिसामीप्ये संस्थितमेतावद् विद्यते सत्यम्।
पार्थक्येन स्फूर्तिर्नोवा तस्य प्रजायते क्वापि।।२६५६।।

परसत्यस्यानुभवं सम्पादयितुं प्रवर्तमानानाम्।
लघुसत्यानां सीमा पूर्वं दूरीकृता यत्नैः।।२६५७।।

लघु सत्यानामवलिर्माया वेदान्तविद्यासु।
संकथ्यते प्रभूता तत्कथने काऽपि परिपाटी।।२६५८।।

सत्याऽनन्त्यविहारे या मिथ्यात्वानुभूतिरियम्।
माया वा भ्रान्तिर्वा तदपि तु सत्यं तदात्वे स्यात्।।२६५९।।

ऋतसत्यसन्निधाने मन्त्रेष्वास्ते चमत्कारः।
सत्यादप्यत्युच्चा ऋतशब्दे संचिता श्रद्धा।।२६६०।।

सत्यं तु तादृशं यत् प्रतिक्षणं व्यावहारिकं रूपम्।
संधारयते वाण्यामागच्छत्यतिपरिचयस्तेन।।२६६१।।

अतिपरिचयप्रसङ्गे वार्तेकाऽस्ते प्रसिद्धैव।
काचिदवज्ञा बुद्धिस्तत्रोन्मेषं क्रमाल्लभते।।२६६२।।

बहवश्शब्दास्तादृशविक्षोभैः संभृता जाताः।
सत्यस्याप्यद्यत्वे संजाता सा स्थितिः काचित्।।२६६३।।

एतादृशी ह्यवज्ञा यस्य तु शब्दस्य संजाता।
तत्र तदाऽपरशब्दस्तस्मिन्नर्थे विनिर्गतो दीप्त्या।।२६६४।।

सत्ये यो हि विरागो ऋतशब्दे नास्ति तादृशं किमपि।
अतिपरिचयप्रसङ्गो नैवाऽस्त्यद्यापि तेन शब्देन।।२६६५।।

सत्यं ऋतं च नैकं तत्राऽस्ते भिन्नता काचित्।
वैज्ञानिकं तदेतद्रहस्यभूतं विधार्यतां तत्त्वम्।।२६६६।।

ऋतसत्ययोर्विचारे नानानवशेमुषी - जुष्टाः।
नाना विधान् विचारान् प्रकाशयन्तः परामृष्टाः।।२६६७।।

मन्यामहेऽथ सर्वान् नूतनसाराभिरामरमणीयान्।
ऋतसत्यसूक्ष्मरूपे संचालितवैभवान् धीरान्।।२६६८।।

तदिदं निखिलं विश्वं सत्यात्मन्येव संस्थितं जातम्।
सत्ये संस्थिति भावे शिवता सौन्दर्यमायाति।।२६६९।।

सर्वमनुस्यूतं वा तिष्ठति साधारणत्वेन।
विपरीतो नियमानां सद्भावो वन्दनीयोऽस्ति।।२६७०।।

सत्यविधारकतायां देवानां स्वीकृतिर्जाता।
ये विपरीतविभावास्तेषामपि स्वीकृतिःसत्ये।।२६७१।।

यद्यपि सर्वेषामिह संसारे सत्यमेव शरणं स्यात्।
सत्यं किन्तु समेषामेषां सर्वं पृथक् पृथग् ज्ञेयम्।।२६७२।।

कालानामपि सत्यं पृथक् पृथग्वा समाम्नातम्।
देशानामपि सत्यं पृथक् पृथग्जायते तत्र।।२६७३।।

सर्वे नो चाल्यन्ते कथमप्येकेन सत्येन।
पुनरप्येकं सत्यं सर्वान् क्रोडीकरोत्येव।।२६७४।।

एकस्य कस्यचिद्वै यन्मिथ्या सत्यमपरस्य।
एवं मिथ्या सत्यं विपरीतेऽप्यनुगुणं दृष्टम्।।२६७५।।

एकस्मिन्वा काले मिथ्या तत्त्वं हि यज्जातम्।
भिन्ने कालेऽथ पुनस्तदेव संजायते सत्यम्।।२६७६।।

कस्मिंश्चिद् वा देशे मिथ्याभूतं हि यज्जातम्।
भिन्ने देशेऽथ पुनस्तदेव संजायते सत्यम्।।२६७७।।

ग्रीष्मे हिमालये यत् वस्त्रादिकमस्ति व्यवहार्यम्।
भिन्नतरेऽथो देशे व्यवहारात्तद् बहिर्भूतम्।।२६७८।।

एवंविधे विचारे तच्चैतन्नाम सुस्पष्टम्।
सत्ये जडता काचिन्नैवाऽत्राऽराधिता दृष्टा।।२६७९।।

सत्यं सदैकमेवेत्यादि विचारास्तु ये केचित्।
परमे सत्ये ते तेऽस्माभिः स्वीकर्तुमथ शक्याः।।२६८०।।

सत्याग्रहे विचारा ये सर्वत्र प्रकाशिता जाताः।
सत्यस्यातिशयोऽयं प्रयोगकालः परापतितः।।२६८१।।

यत्राऽग्रहः कथं वा तत्सत्यं वक्तुमपि शक्यम्।
आग्रहसत्यसमीकृतभावो नैवाऽवलोकितुं शक्यः।।२६८२।।

आग्रहभावो मिथ्या सत्ये सर्वाऽग्रहाऽभावः।
तेनैव भिन्नकाले सत्याऽग्रहदुःस्थितिः प्रथिता।।२६८३।।

किन्तु महात्मागान्धी सत्याग्रहचालने दक्षः।
व्याख्यां कामप्येकां परमनवीनां समर्पितवान्।।२६८४।।

सत्याग्रहे पुरस्तात् काचिद् व्याख्या परिष्कृता तेन।
येन समस्तो देशः सत्याग्रहसंगरे मग्नः।।२६८५।।

मिथ्यापाखण्डानां दूरीकरणाय संलग्नैः।
सत्याग्रहस्वरूपा घटना सैषा समाराध्या।।२६८६।।

तत्राऽहिंसारूपं सन्दिशता गान्धिवर्येण।
गौराङ्गाणां विमुखीकारे कश्चित् प्रवर्तितो मार्गः।।२६८७।।

सत्याग्रहः समस्तः पुञ्जीभूतः स्वराष्ट्रस्य।
स्वातन्त्र्यसमरमध्ये शस्त्रं संसाधित दिव्यम्।।२६८८।।

तेनाऽनेन विनम्रा दीप्ती राष्ट्रे समायाता।
आबालवृद्धजनता सर्वा सत्याग्रहे लग्ना।।२६८९।।

पुनरपि सत्यात्मकता विलोपितैषा स्वतन्त्रताऽवाप्तौ।
मिथ्याव्यवहाराणां प्रभुता काचिद् विराजिता जाता।।२६९०।।

सत्याऽनृतभावानां मिथुनीकृत्यैव व्यवहारः।
संसाधितो निकामं श्रीमच्छंकरमहर्षिणाऽद्वैते।।२६९१।।

स्नप्नो यद्यपि मिथ्या किन्तु न तत्स्वप्नदर्शने काले।
जागृतिकाले तस्य तु स्वप्नत्वं जायते नाम।।२६९२।।

काले काले तदिदं किं माधुर्यं परिस्फुरितम्।
कुत्र च निलीनमेतत्किं सत्यं ज्ञायतां नाम।।२६९३।।

यद्यत्किमपि निकामं मधुरं हृदये समुन्मिषत्तत्त्वम्।
सर्वविलक्षणदृश्यैरापूर्णं केवलं भाति।।२६९४।।

सत्यं मनसि भवेद्वा वाचि विचारे भवेत्सत्यम्।
कर्मणि सत्यमयीयं प्रवृत्तिवृत्तिर्भवेन्मनुजे।।२६९५।।

आल्हादयति नितान्तं सत्यस्यासीमिता दीप्तिः।
रक्षा सेयं जाता सत्येनैवाथ सर्वेषाम्।।२६९६।।

सर्वेषां यत्र स्यात्स्वीकृतिभावो विनाऽऽयासम्।
नो कस्यापि विरोधो यत्रास्ते सत्यसरणिः सा।।२६९७।।

सत्यस्याङ्के शयनं जागर्तिः शुभ्रसंचारः।
नानाविधश्च विजयः पराजयो वापि सत्याङ्के।।२६९८।।

सत्यस्याङ्के नो वा पराजयः कस्यचिद् भवति।
जातेऽपि सत्यतायाः पराजये विजय एव सर्वोऽयम्।।२६९९।।

मिथ्याभावैर्युद्धे सत्यस्यैवाथ विजयश्रीः।
मिथ्याभावाऽभावो संसारे नैव जायेत।।२७००।।

सत्यादप्यतिभीता नित्यं ते ते पलायन्ते।
पापाचरणपरायणलोकोऽयं तत्र भाषेयम्।।२७०१।।

अमृतादपि तु समस्तास्तेते भोता भवन्त्येव।
नो चेदमरास्ते ते भवन्तु लोके चिरंजीवाः।।२७०२।।

सत्यं केवलमेकं दिव्यतमाऽमृतमसन्दिग्धम्।
तस्माद् येयं भीतिः सुधया भीतिर्हि सा ज्ञेया।।२७०३।।

सत्यस्य रक्षिताऽसौ परमात्मा चिन्तना काऽत्र।
अस्मद्धस्तै रक्षति चेत्तेनात्रैव धन्या स्मः।।२७०४।।

कस्माद्वा संघर्षाद्रक्षा सत्यस्य करणीया।
मिथ्यातः खलु रक्षा करणीयेत्यादि ऋषिराह।।२७०५।।

आभासमानमात्रे सत्ताशून्ये तु मिथ्यात्वे।
भीतिः काचिदनन्ता सत्यस्यास्तेऽथ रक्षणीयं तत्।।२७०६।।

परमात्मापि तु रक्षत्यस्मद्द्वारैव तत्सत्यम्।
मिथ्यावेशविशेषाः संघर्षेषु प्रचण्डतां याताः।।२७०७।।

यस्मिन्समये यो वै सत्यं विरुणद्धि यद्देशे।
तस्य समस्ता ह्याशा जीवनमूला समाप्तिमाप्नोति।।२७०८।।

सामाजिकसंरचनासन्धारणमेव ऋतमितिस्तुत्यम्।
यन्नैवप्रकटीकृतमेतद्वै तदृतं ज्ञेयम्।।२७०९।।

प्रकटीकरणाऽभावेऽपितु सत्यत्वं निकामविख्यातम्।
किन्तु तदा तद्ऋतपदवाच्यं नूनं विधारितं ऋषिभिः।।२७१०।।

वाचा यत्प्रटीकृतमाभातं ग्रन्थसार्थेषु।
यद्यन्नूनं लिखितं तत्सत्यं मान्यता सैषा।।२७११।।

ऋतसत्ययोर्विभेदे नाना सरणिर्विलोक्यतां नाम।
सत्यादप्यत्यधिका ऋतस्य संव्याप्तिरायाता।।२७१२।।

सत्यं यदि प्रतिष्ठा जीवनकाले सुसंजातम्।
एकोऽपि कोऽपि तादृक् संतारयते जनान् सर्वान्।।२७१३।।

सत्यां सरणिं स्तोतुं यस्तावत्तादृशो भवति।
सत्याग्रहं निकामं कुरुते सर्वान् समानयति सत्ये।।२७१४।।

एतद्युग-संभूतो मोहनदासश्च कर्मचन्द्रोऽसौ।
गान्धी सत्यं तत्त्वं जनतायां ख्यापयामास।।२७१५।।

सम्यग् ज्ञातं सत्यं नो वा किञ्चित्करं भूयात्।
यावत् क्रियासु तस्य प्रयोगे योगो न बोभूयात्।।२७१६।।

सत्यमिदं स्वाधीने सुखं भवत्येव निर्बन्धम्।
किन्तु स्वाधीनत्वं कथं मिलेदिति परं सत्यम्।।२७१७।।

सत्याहिंसायोगो युद्धाय स्वात्मलाभाय।
विजयाऽराधनरूपः सन्धार्यः सर्वजनतायाः।।२७१८।।

सत्यमिदं सर्वेऽपि स्वाभाविकसौम्यतायुक्ताः।
किन्तु क्रूरत्वेऽपि दृष्टिर्देया विलोकनीयमिदम्।।२७१९।।

येऽप्येतेऽसत्यात्मकमार्गे गच्छन्ति मानवाऽभासाः।
तेषामसत्यनिष्ठां दूरयितुं किमपि करणीयम्।।२७२०।।

सत्यमिदं संसेव्यं सत्ये वृद्धिः समानेया।
सत्यानन्दावाप्तौ सत्यं त्वर्तेन परिषेच्यम्।।२७२१।।

नित्यमिदं सन्धार्यं सत्ये प्रियता भवत्येव।
सत्ये याऽप्यप्रियता कटुसत्यं तत्प्रकथ्यते कैश्चित्।।२७२२।।

कटुशब्दोऽप्रियतायां सत्यस्याऽस्तेऽथ तेन संयोगः।
एतेनैतत्सत्सिद्धं सत्यं क्वचिदप्रियं भवति।।२७२३।।

किन्तु तदेतत्कथनं सत्याऽभासे प्रयोक्तव्यम्।
प्रियताया आभासेप्येषा काचित् स्थितिर्दृष्टा।।२७२४।।

आभासा अपि ते ते आमूलाद् भेदमापन्नाः।
अद्यतने निजरूपे सत्यान्नो दूरतां याताः।।२७२५।।

परिणामे या प्रियता सैव प्रियता तथा सत्यम्।
केवलमापाते या प्रियता नैवाऽस्ति तत्सत्यम्।।२७२६।।

सत्याद्दूरस्था या प्रियता सा घोररूपैव।
पर्यन्ते विज्ञेया तया भवेत्सावधानत्वम्।।२७२७।।

सत्यस्यैकस्यादावपरेणात्रैव जायते युद्धम्।
उभयत्र न मिथ्यात्वं सत्यात्सत्येन वै युद्धम्।।२७२८।।

बलवत्खलु यत्सत्यं विजयस्तस्यैव सुलभः स्यात्।
यन्निर्बले तु सत्यं पराभवस्तस्य नियतोऽयम्।।२७२९।।

पुनरप्युदेति भाषा किं सत्यं निर्बलं भवति।
तस्यां निर्बलतायां कुतो न वा तस्य मिथ्यात्वम्।।२७३०।।

सत्ये च बलाऽभावः कथमपि न स्वीकृतः सर्वैः।
सत्यं सदा बलीयः सत्याधाराश्च बलवन्तः।।२७३१।।

अत्र च संस्मर्तव्यं सबलं सत्यं भवति सत्यम्।
यन्निर्बलतां यातं नतमां तद्वै भवति सत्यम्।।२७३२।।

सत्ये निर्बलताया यः सन्देहः समुद्भूतः।
क्षणिकं निम्नत्वं वा तत्राऽस्ते कारणीभूतम्।।२७३३।।

युद्धोन्मत्ते काले क्षणे क्षणे निम्नोच्चता दृष्टा।
उभयोः समानबलयोरेषा भाषा विभूषिता भवति।।२७३४।।

यत्र च शक्तिरखण्डा तत्सत्यं तस्य विजयोऽयम्।
यत्र सखण्डाशक्तिस्तदसत्यं वा पराजयस्तत्र।।२७३५।।

फलमेकमपरदर्शनकाले रूपं विपरिवर्तयते।
शक्तिं विलोक्य सत्यं रूपं स्वीयं नु गृह्णाति।।२७३६।।

सत्यावश्यकतायां या या सत्ये गतिर्भवति।
सा सा सर्वाऽपि पुनः सत्यस्यैवाथ रूपाणि।।२७३७।।

सत्याऽराधनकाले नो वा काचित् कठिनता दृष्टा।
यत्र भवेत्काठिन्यं नो सत्यं तद् विलोक्यतां नियतम्।।२७३८।।

सत्ये मार्गे चलिता ये ते सर्वे सदाऽनन्दे।
विनिमग्नालोक्यन्ते नतमां कष्टं विलोक्यते तेषाम्।।२७३९।।

इतरे ये द्रष्टारस्ते नूनं तान्विलोक्यैव।
कष्टान्वितं स्वरूपं ह्यनुमिन्वन्तीति सा भ्रान्तिः।।२७४०।।

अपरस्य दर्शने यत् कष्टं रूपं समायाति।
तस्मिन् किन्तु मनुष्ये साऽनन्दानां समुज्ज्वला भूमिः।।२७४१।।

एवमियं या भ्रान्तिः सा वै संचालयति विश्वम्।
ज्ञानिन एव भवेयुर्यदि सर्वे क्वाऽस्ति संसारः।।२७४२।।

परसत्या सा काचिन्मुक्ता स्थितिरपि समाम्नाता।
सत्यानन्तं रूपं विलयं संयाति चैकस्मिन्।।२७४३।।

त्रैकालिकमिथ्यात्वं यत्रैवाथोऽतिदूरितं भूयात्।
परसत्यस्याऽवाप्तौ सा स्थितिरत्रैव संदिष्टा।।२७४४।।

सत्याद्भिन्ने मार्गे नित्यं संचरणशीलानाम्।
या दुर्दशा भविष्यति तां स्मृत्वा वै दया जाता।।२७४५।।

दुर्दान्ता अपि चैते दयनीया एव सर्वेऽपि।
पर्यन्तगतिस्तेषां नाऽस्माकं दृष्टिमागच्छेत्।।२७४६।।

अद्यैषां सम्पत्तिः परमं तेषां समुज्ज्वलं रूपम्।
अतुला चैषां तृप्तिः श्व एव मिथ्यायिता भवति।।२७४७।।

सत्याऽराधनकल्पे ये वा मनुजाश्चिराल्लग्नाः।
नित्या तृप्तिस्तेषां मानसमध्ये तरंगिता भवति।।२७४८।।

तस्मादुच्छलितं वाऽतुलसम्पत्तौ प्रभुत्वं वा।
सत्यानां पुरुषाणां नाऽवर्जयते कदापि मनः।।२७४९।।

१०६.शिवम्

शिवतत्त्वे निजरूपे वयमेते नित्यसंम्पृक्ताः।
शिव शिव शिव शिव रटने सदाशिवत्त्वं विराजते हृदये।।२७५०।।

जगतां मातोमेयं पिता महादेव एवाऽऽद्यः।
जगतां मातापितरौ सदा सदा संस्थितौ पुरतः।।२७५१।।

शिवकल्याणविधायकशिवतत्त्वं सर्वसंपत्तिः।
शिवता काम्या जीवनकणकणमध्ये विराजिता शुभदा।।२७५२।।

चैतन्ये शिवरूपे सर्वाण्येव स्वरूपाणि।
निश्शेषाणीमानि स्थितानि वा सावकाशानि।।२७५३।।

शिव शिव शिव शिव रटने या चेयं संस्मृतिर्भवति।
सैव नितान्तं काम्या सैवाऽस्माकं परा सम्पत्।।२७५४।।

ब्रह्माण्डानामुद्भवसंस्थितिसंपालने लग्नः।
मृत्युञ्जयोऽत्र भगवान् निर्मलतासंस्थितो जयति।।२७५५।।

नित्यमुमासंसक्तः शिवः शिवोऽहं शिवोऽस्म्यहं नित्यम्।
कान्ततरं कमनीयं यद्यद्द्रव्यं तदर्धनारीति।।२७५६।।

भावानामपि यैषा विविधा धारा विशेषतो भाति।
हृदये हृदये सोऽसौ सर्वोऽमाशिवमिथोयोगः।।२७५७।।

उमया रहितो न कदाप्यासादयितव्य एवाऽयम्।
माताऽस्माकं तस्मिन्रूपे सर्वत्र संस्थितैवाऽस्ते।।२७५८।।

पितरि प्रकुपितभावो यदा तदा संप्रकाशितो भवति।
किन्तु निरुपमा माता करुणापूर्णैव केवलं दृष्टा।।२७५९।।

जगतां माता सैषा सर्वेषामादिजननीयम्।
नित्यं शिवस्वरूपा सर्वानन्दा निखिलशक्तिमयी।।२७६०।।

वेदे गीता सेयं पुराणमध्ये निकामसंगीता।
वाल्मीकिव्यासानां सैषा वरदा समाख्याता।।२७६१।।

साऽऽदिमनिजस्वरूपे सैषा माता मनोज्ञता दीप्ता।
अर्धे वा निजरूपं निखिलमिद संचितं कुरुते।।२७६२।।

श्रीकालिदासकवितामृताभिषिक्ता च पार्वती माता।
शिवतायामिह लीना संविद्रूपा विभासते हृदये।।२७६३।।

द्रुततरसारंगेणैवाऽऽकृष्टोऽसौ न दुष्यतः।
सारङ्गाक्षी निबिडं तत्राऽऽकर्षणमहो कुरुते।।२७६४।।

शिवयोः सर्वाऽपीयं रमणीया जायते रचना।
अर्धं चेदं निबिडं नारीरूपं स्वके देहे।।२७६५।।

एतद्वै शिवतत्त्वं क्रोडीकुरुते निजे रूपे।
सौन्दर्यं चार्धांशे शिवरूपं वाऽपि चार्धांशे।।२७६६।।

निखिलं चेदं सत्यं समाधिरूपेषु विश्रान्तम्।
निद्रा समाधिरूपस्यैका काचित्कला सरसा।।२७६७।।

या च तुरीयाऽवस्था सा वै शैवीह्यवस्थैव।
यस्यां नो विद्वेषो नो वा हर्षप्रकर्षसुभगत्वम्।।२७६८।।

सा वै साम्यावस्था सा सर्वं योगसात्कुरुते।
उच्चावचस्वभावैर्धाराणां पटलिकामेकाम्।।२७६९।।

शैवी धारा सेयं मंगलमालासमाह्वानैः।
संछादयते नित्यं विपक्वविपरीतविस्तारम्।।२७७०।।

इतिहासानां सरणिः शवसिद्धिः काऽपि जीवानाम्।
शवशिवमध्ये केवलमिकारमात्रात्मको भेदः।।२७७१।।

विगतप्राणे देहे शव-शब्दस्य प्रयोगतो योगः।
तस्मिन्नेव च देहे पुनरथ तन्त्रैः समीरसंचारः।।२७७२।।

विपरीते शवरूपे जपकाले कापि संसिद्धिः।
शवसिद्धिः संकथिता तन्त्राणां कापि सा भूमिः।।२७७३।।

सैवेतिहासदृष्टिप्रतीकभूताऽस्ति शोभना मुद्रा।
यं भूतमितिवयं वा प्रयोग-कालेषु कथयामः।।२७७४।।

तस्यैव वर्तमानत्वाख्याने जातमितिहासम्।
जगति जना जानन्तो नूनं धन्यत्वमायान्ति।।२७७५।।

सेयं शिवता कथिता पुरातनी दृष्टिरेव शिवदृष्टिः।
सैवाऽगामिनि काले सर्वाऽमरता प्रदायिका भवति।।२७७६।।

शिव एवैको देवः सर्वाण्यथ तस्य रूपाणि।
या च तदीया शक्तिर्माया सा कथ्यते लोकैः।।२७७७।।

तां पार्वतीति नाम्ना पौराणिकभावनोल्लसिताम्।
निखिलां बन्धुविभूतिं बन्धुजनो नूनमाह्वयते।।२७७८।।

सर्वाऽपीयं सृष्टिः शिवस्य सच्चिन्मयी पूर्णा।
आनन्त्यं शिवरूपे सृष्टावपि नूनमायातम्।।२७७९।।

शिव इत्यक्षर मैत्री रामपदे सैव दृश्यते मैत्री।
कोमलमैत्री काचिद् वर्णानामादिभूतानाम्।।२७८०।।

रुद्रे रूपे यदिदं विद्रावकमिव विजायते दृश्यम्।
सापि शिवस्य कदाचित् स्वरूपधारा परामृष्टा।।२७८१।।

वेदानामुद्घोषे रुद्राध्यायी प्रसिद्धैव।
शिवसंस्तुतिसंधारामेकामसमां प्रवाहयामास।।२७८२।।

आदिकविर्वाल्मीकिः शिवतत्त्वे नित्यदीक्षितो दृष्टः।
रामे शिवस्तदीये शिवे तथा रामता दृष्टा।।२७८३।।

भासस्तावद् हासः कविता-कामिनि-मुखस्यासीत्।
शिवतत्त्वं निजरूपे येनोल्लसितं सदा दृष्टम्।।२७८४।।

कविकुलगुरुर्वरेण्यो विख्यातः कालिदासोऽयम्।
दिव्ये शिवस्वरूपे स्वात्मानं प्रापयामास।।२७८५।।

तेनाऽष्टमूर्तिसेवासंभारैः पूजितं विश्वम्।
कमलाकरमिव कमलैरापूर्णं सौरभोल्लसितम्।।२७८६।।

लंकेश्वरेण रचिता शिवस्तुतिर्भास्वरा जयति।
लोकोत्तरमाह्लादं तनुते या पठनसमकालम्।।२७८७।।

गन्धर्वाणां राजा शशिमौलेर्दासतां यातः।
श्रीपुष्पदन्तनामा महिमानं गीतवान् शंभोः।।२७८८।।

सहृदयहृदयोल्लासे विविधोल्लासा शिखरिणीयम्।
हारावलिं प्रयच्छति हृदये हृदये सुभक्तानाम्।।२७८९।।

स्तुतिकुसुमाञ्जलिनामा शिवस्तुतीनां समुद्रोऽयम्।
कविं जगद्धरभट्टं शीर्षे संस्थापितं कुरुते।।२७९०।।

उपमन्युविरचितं वा स्तोत्रं दिव्योत्तमं जयति।
करुणासमुद्ररूपं शिवस्वरूपं विलोक्यतां तत्र।।२७९१।।

गोकुलनाथविरचितं शिवशतकं दिव्यसत्काव्यम्।
नानोपमानकल्पनसौशील्यं कल्पते पुरतः।।२७९२।।

तुलसीदासः श्लाघ्यो मानसमध्येऽयमेव देवर्षिः।
शंभोः स्वरूपचित्रं समद्भुतं चित्रितं कुरुते।।२७९३।।

नो वा तादृशमखिलं काव्यं वा शास्त्रमेव वा किञ्चित्।
शंभोः प्रसादमाला सोल्लासा यत्र न प्राप्ता।।२७९४।।

पाणिनि-मुनिना ढक्का-निनाद-मध्येऽथ सूत्राणि।
सम्प्राप्तानि निकामं व्याकरणं तद्विनिर्मितं रुचिरम्।।२७९५।।

सर्वासामथ दर्शनधाराणां तादृशी प्रौढिः।
शिवमयतायामेषा सम्प्राप्ता तेन चोल्लासः।।२७९६।।

सर्वेषां तत्त्वानां शिवमयता नूनमाख्याता।
जीवनसफलीकरणे यद्यत् पूर्णं शिवस्तत्र।।२७९७।।

कल्याणमेव जगतां संजातं जायते नाम।
आसंसृतेर्भविष्यति शिवमयता सर्वकालानाम्।।२७९८।।

शिवरूपमद्भुतमिदं निखिलविरोधैः समन्वितं सुखदम्।
नेत्रेऽग्निः प्रज्ज्वलितः शिरसि च गङ्गा समुत्तुङ्गा।।२७९९।।

क्षणमात्रेण विषं तत् सम्पूर्णं भस्मसात्कुर्यात्।
यदि साक्षाच्छम्भुरयं कण्ठे न स्थापितं कुर्यात्।।२८००।।

चन्द्रो ललाटभागेऽमृतमयकायः समुल्लसति।
कण्ठे गरलविभातो नीलो वर्णो विभासते रुचिरः।।२८०१।।

रुद्राऽवदानगीतिः कस्य न चेतो मधुरतायै।
विश्वस्मिन् विश्वासैः पर्याप्ता वा ऋतेऽधन्यात्।।२८०२।।

शुभ्रभुजङ्गैर्भीमैर्मण्डितसद्दीर्घसंकायः ।
तत्फणमणिदीप्तीभिर्विविधाभी रञ्जितः शंभुः।।२८०३।।

प्रलयंकरत्वमपि वा शिवे समस्तं समाम्नातम्।
नूतनरचनाभूमिस्तरंगिता तत्र जायते भव्या।।२८०४।।

तेनैव प्रलयंकरताऽप्येषा मङ्गले मूला।
प्राचीने प्रविलुप्ते नूतनमुद्भावितं भवति।।२८०५।।

प्रलयोदयसरणिरियं शिवस्य लीलैव विज्ञेया।
योऽसावनादिनिधनस्तस्य क्रीडां नु को विजानीयात्।।२८०६।।

हरचरिते हरिचरितं हरिचरितेऽस्मिन् जगच्चरितम्।
लीलामात्रविभेदे काचिल्लीलैव संस्फुरति।।२८०७।।

ताण्डवनृत्यं चेदं शिवस्य नटराजवेशेऽस्मिन्।
सम्पूर्णं ब्रह्माण्डं रंगस्थलतां समानयति।।२८०८।।

याऽप्युच्चावचधारा ब्रह्माण्डानां प्रदृश्यते लोके।
मन्दास्तथा दरिद्राः शिवस्वरूपेषु संदिग्धाः।।२८०९।।

तेषां दरिद्रतायां शिवस्य लीलैव हेतुभूताऽस्ते।
शिवे प्रणामे जाते ह्यनित्यता लोपिता भवति।।२८१०।।

शंभो महेश विश्वेश्वर तुम्यं नित्यमेव सन्नतयः।
विलसन्तु सर्वसौभाग्यैरेभिः सर्वसिद्धानाम्।।२८११।।

यन्त्राणामाधारैरुच्चोच्चतरप्रतिष्ठानाम् ।
त्वत्कारुण्यविनिर्झरशीकरकणिकासमिद्धानाम्।।२८१२।।

एतेषाञ्चैतेषां तेषामथवापि सर्वेषाम्।
सन्तु प्रणाममाला आचार्याणाञ्च विदुषाञ्च।।२८१३।।

शिवमस्तु सर्वजगतः शिवकृपया वै शिवं भूयात्।
शिवतत्त्वेऽखिलविश्वं तदिदमिहोतं च प्रोतं च।।२८१४।।

ज्ञानाकाशे विमलां दीप्तिं तन्वन् स शंकराचार्यः।
साक्षाच्छिवाऽवतारः संसाराणां धनं दिव्यम्।।२८१५।।

शक्तिसमाराधनतादीप्तिं तन्वन् स शिववीरः।
देशस्य शौर्यगाथानायकरूपेण विश्रुतो नितराम्।।२८१६।।

शिवतत्त्वमेव जगतां सर्वेषां धारकं तत्त्वम्।
शिवतत्त्वात्क्षणमात्रादपि च्युतिर्नाऽस्ति कस्यापि।।२८१७।।

परिणामानां भेदे रूपाणां वाऽपि संभेदे।
शिवतत्त्वे नो भेदः कश्चित् संजायते नाम।।२८१८।।

शिवरूपमिदं सर्वं यत् सर्वं तत्परं ब्रह्म।
शिवतत्त्वमेव तावत् विचारसारं परं ब्रह्म।।२८१९।।

ज्योतिरिदं शिवतत्त्वं सर्वेषां ज्योतिषामाद्यम्।
सर्वा विज्ञानानां धारा सेयं शिवस्य वै रूपम्।।२८२०।।

सर्वविधाऽपि च विद्या शिवतत्त्वे संस्थिता भाति।
तेनैवैषा काचित् कल्याणानां परम्परा चलिता।।२८२१।।

सर्वममरता रूपं शिवतत्त्वं वै प्रयोजयति।
सर्वाऽमरस्वभावः शिवस्य सेवासु संप्राप्यः।।२८२२।।

सर्वे देवा देव्यः शिवा शिवः संस्थितिः सैषा।
प्रत्येकस्मिन् पिण्डे सोऽयं नैसर्गिको योगः।।२८२३।।

नो काचिद् भाषा सा ययेदमाख्यायतेऽथ शिवतत्त्वम्।
ब्रह्मादीनामपि वा संस्तुतिरल्पीयसी भवति।।२८२४।।

यदनुभवे संयातं तच्छिवतत्त्वं विनिर्ध्याय।
जन्तुरयं संसारे सफलः संतोषमाप्नोति।।२८२५।।

यन्नाऽऽसादितमथवा यन्नकृतं तद् बृहत्तरं तस्मात्।
यद्यत् सम्पादितमिह यद् वा चाऽप्यायितं चैतत्।।२८२६।।

सत्वरमेव शिवोऽहं यथा भवामीति तत्तथा भूयात्।
स्वीयशिवत्वाऽऽवाप्तिर्जनुषः सफलत्वमविकलं नाम।।२८२७।।

शिवकिंकरतां प्राप्ता यदि कोटिषु जन्मनामपि वा।
सर्वं सफलं जातं केवलमेषैव भाग्यरेखा स्यात्।।२८२८।।

यद्यप्यनन्ततायां विराजितः सर्वदा शंभुः।
मम मातुः पार्वत्याश्चाटुकरत्वं तु मे शक्तिः।।२८२९।।

शिवतामयता नियता जगतामाश्रयमयी नित्या।
शिवताया आधारश्चैकोऽनन्तः समाम्नातः।।२८३०।।

भगवति शिवे समेषां विमला मतिरद्भुतैवाऽस्ते।
संचिन्तितमात्रायां सर्वं मङ्गलमिहाऽऽदिशति।।२८३१।।

सर्वेऽस्मत्तस्तावत्समुन्नता यावदेवेयम्।
शिवचरणकमलवृन्दे प्रणामभृङ्गान्विता माला।।२८३२।।

प्राक्पुण्योदयवशतः शिवे प्रणामे तु संजाते।
नैवाऽस्तेऽस्मत्सदृशः समुन्नतः कोऽपि संसारे।।२८३३।।

के वाग्गुम्फास्तावज्जगद्धरे सन्ति सिद्धास्ते।
शंकरभगवत्पादैः का परिपाटी समाराद्धा।।२८३४।।

शिवरूपं यैर्दृष्टं सर्वत्रैवाऽत्र संसारे।
ते धन्यधन्यकाया भूवलये वन्दनीयतमाः।।२८३५।।

कल्याणानां वर्षणमथ ते नित्यं प्रकुर्वन्तः।
शिवकैङ्कर्यमवाप्तास्ततोऽधिका चाऽस्ति कीदृशी पदवी।।२८३६।।

केदारेश्वरकाशीविश्वेश्वरदर्शनं कृत्वा।
सिद्धमहाकालेश्वरदर्शनकाले नरो धन्यः।।२८३७।।

श्रीरामेश्वरपशुपतिनाथेश्वरदर्शनं पुण्यम्।
श्रीवैद्यनाथदर्शनमेतन्मोक्षाय जायते नाम।।२८३८।।

श्रीताड़केश्वराणां श्रीराजेश्वरमयीं मूर्तिम्।
ओंकारेश्वरकायां शिवस्य दृष्ट्वाऽस्ति धन्यत्वम्।।२८३९।।

दिव्याऽमरनाथेश्वरयात्रा पुण्यप्रदा जयति।
गोकर्णेश्वरदर्शनमतीवसंतोषदायकं जातम्।।२८४०।।

श्रीदक्षिणेश्वरशिवे प्रणाममालाः समर्प्य धन्यत्वम्।
काञ्चीमध्ये च शिवं प्रणमामो भक्तिभावैः स्वैः।।२८४१।।

श्रीशैलस्थितशंभुं भिल्लेश्वरमथ महाकायम्।
प्रणमति जनता सेयं धन्या धन्या न सन्देहः।।२८४२।।

आशैशवाच्च भारतवर्षे बालस्य परिचयो येन।
श्वासावधिपर्यन्तं गाथाः शर्वस्य कर्णगा जाताः।।२८४३।।

अन्तिमकाले काश्यां स्वयं शिवस्तारकं मन्त्रम्।
मोक्षप्रदानरूपं वितरति कल्याणतमधारम्।।२८४४।।

काश्यां श्रीविश्वेश्वरवन्दनमयता सकृत्प्राप्ता।
यद्यद्विशृङ्खलं वा सर्वं तन्मङ्गलं कुरुते।।२८४५।।

गङ्गासदृशीमाता स्नानार्थं वा द्रवीभूता।
क्रोडीकुरुते निर्मलतृप्तिं सद्यो ददाति सन्मुक्त्यै।।२८४६।।

करुणावरुणालयवररूपं लसितं पितुः शंभोः।
एकेश्वरत्वमथवा तस्यैवाऽस्तेऽनिवारितप्रसरम्।।२८४७।।

सर्वसमर्थो भगवान् शिवः स्वयं सर्वकालेषु।
स्मर्तारं निध्यायति काऽपि विचित्रैव तस्य परिपाटी।।२८४८।।

निजतां सर्वाममलां क्षणमात्रेणैव यो यच्छेत्।
तस्य चरणयोः सर्वाऽराध्यत्वं वा कथं न स्यात्।।२८४९।।

तेनैवाहमहमिका शिवसेवायां समुज्ज्वला भाति।
सर्वे देवाः सुमहत्संघे सङ्घे समायान्ति।।२८५०।।

शिव धामनि ये च गणास्ते तेषां मुकुटपटलीना-
मुपरि च मुद्गरपातं विधाय बन्धं विरचयन्ति।।२८५१।।

तेनैवात्मानं ते धन्यतमं चापि मन्वानाः।
भगवति शिवे सपर्याफलममलं प्राप्नुवन्त्येव।।२८५२।।

काश्यां काशीनाथो विद्वत्पूज्यश्च शिवकुमाराख्यः।
विद्वन्मार्तण्डोऽभूदसमप्रज्ञो मनीषि मूर्धन्यः।।२८५३।।

संख्या का वा तेषां शिवभक्तानां विधीयतां नाम।
संख्यायास्तु समाप्तिः संजाताऽऽस्ते शिवस्य सन्निध्ये।।२८५४।।

किं वाऽन्यद् वक्तव्यम् किं वा नो वाऽत्र वक्तव्यम्।
सर्वं वदति स भगवान् शिव एव तु संशृणोति वा सर्वम्।।२८५५।।

१०७.सुन्दरम्

सत्यं शिवं च सुन्दरमेतत्त्रितयं हि सर्वत्र।
परमेश्वरस्य रूपं व्याप्तं सन्दृश्यते लोके।।२८५६।।

यद्यन्मोहनशीलं मनसः संश्लेषकं तत्त्वम्।
तद्वैसर्वं सुन्दरशब्देनाऽसादितं भवति।।२८५७।।

सौन्दर्यं चापेक्षिकरूपेणाद्यापि सन्दिग्धम्।
कथमेतत्तु समस्ते सृष्टिविधाने निभालनीयं स्यात्।।२८५८।।

एतत् प्रवाहरूपं सौन्दर्यं तत्त्वतो मृग्यम्।
सौन्दर्यानुभवस्याभावे मृत्युर्न सन्देहः।।२८५९।।

सौन्दर्योद्रेकाणां प्रवाहनित्यत्वमास्थेयम्।
कूटस्थनित्यभावे सौन्दर्योद्रेकताऽऽयोगात्।।२८६०।।

रमणीये रणरणकं नित्यं संजायते दृश्ये।
नवतावैभवलसिता सर्वा सृष्टिर्हि रमणीया।।२८६१।।

यद्यत्सुन्दरमास्ते तत्सर्वं सत्यशिवरूपम्।
यदि सुन्दरे न शिवता नो सत्यत्वं तदैव सा भ्रान्तिः।।२८६२।।

आदिक्षान्ते ह्यक्षरजगति विचित्रैव दृश्यते नवता।
एतावत्संख्याके समुदाये कीदृशी नवता?।।२८६३।।

अक्षररूपः सोऽयं समुदायश्चादिमात्काला।
दद्यावधायातो ह्यासृष्टेः संचलिष्यति वा।।२८६४।।

सर्वोऽक्षर संघातो नव नव शब्देषु परिणतो दृष्टः।
नवतायाः परिभाषाऽपीयं कठिनैव संजाता।।२८६५।।

हृद्यत्वं हि नवत्वं यद्यद् हृद्यं तदेव नवम्।
तत्सुन्दरं च सत्यं शिवता तस्याऽस्ति परिपूर्णा।।२८६६।।

क्षणे क्षणे यद् हृद्यं क्षणे क्षणे तत्तदेव नवम्।
तत्सुन्दरं च सत्यं शिवता तस्याऽस्ति परिपूर्णा।।२८६७।।

हृदयस्याऽस्तित्वे खलु हृद्यत्वं नूनमेव सुस्पष्टम्।
हृदि यस्य तु साधुत्वं तद्वै हृद्यं समाम्नातम्।।२८६८।।

हृदयस्यास्तित्वं खलु हृद्यत्वानुभववेलायाम्।
सुस्पष्टं सुमनोज्ञं सम्यग्ज्ञातं नितान्तरमणीयम्।।२८६९।।

यदि किमपि नाऽस्ति हृद्यं सा वै मृत्युस्थितिर्जाता।
हृदयस्यैवाऽस्तित्वं लुप्तं तस्मात्तु संकायात्।।२८७०।।

तरतमतासाम्राज्ये सर्वं संरक्षितं सुस्थम्।
नानाविधोन्नतीनां सौन्दर्ये जन्यते रूपम्।।२८७१।।

केशानामालोके सुषमा सौगन्धसारयुता।
गाढान्धकारपटलीपरिपूर्णा जायतां शुभदा।।२८७२।।

हारावलिरप्येषा सौन्दर्याञ्चितविभावनाभरिता।
कमनीयनवकलेवरकल्लौलैर्वन्दिता जाता।।२८७३।।

रूपमहोभावानामहमहमिकया सुसंवादः।
कोटिकोटिकल्पानामेका दीप्तिः समग्रेयम्।।२८७४।।

तव वा मम वा पार्श्वे धारा सौन्दर्यसंसारा।
संछादिताऽखिलवियत् प्राङ्गणसौगन्ध्यविश्वासा।।२८७५।।

तव मम वा सन्तोषश्चरमां काष्ठामहो प्राप्तः।
आस्तिकवानानन्दः कियती चैषा विचक्षणा नियतिः।।२८७६।।

आदिमकालादेषा सौन्दर्योन्मेषदायिनी धारा।
कमनीयं संसारं शश्वद्दीप्तं सदा कुरुते।।२८७७।।

अत्र यदैवाऽयाता सौन्दर्याऽनुभवलोपकता।
नूनं जडता मृत्युर्मृतकल्पत्वं तदाऽयातम्।।२८७८।।

सौन्दर्यं तु समग्रं जीवनचिन्हं समाम्नातम्।
सर्वाऽनुभवसमृद्धं व्यापकतत्त्वोन्मिषद्रूपम्।।२८७९।।

उन्दीक्लेदनरूपेऽर्थे संपठितोऽस्त्ययं धातुः।
क्लीमिति बीजे तावत् सौन्दर्यस्याऽस्ति कुञ्जिका काचित्।।२८८०।।

क्लींकारे क्रेंकारः कुर्वद्रूपान्वयो ज्ञेयः।
सौन्दर्ये सोदर्यं सर्वेषामेव संघटते।।२८८१।।

ऋतुवैभवविस्तारे यत् सौन्दर्यं समनुभूतम्।
ऋतुसंहारकथायां कविकुलगुरुणा स्वयं कथितम्।।२८८२।।

ज्ञाने या नवता वा विज्ञाने यन्नवीनत्वम्।
ज्ञाने वा विज्ञाने सौन्दर्योद्रेकता तत्र।।२८८३।।

सुन्दोपसुन्दभावे सौन्दर्याणां च मारकता।
सृष्टौ सर्वत्राऽस्ते सा सा संगुम्फिता सरणिः।।२८८४।।

व्योम्नि जडीभूतानां घनपटलीनां तडिन्माला।
आधाराधृतभावोन्मेषाणां कापि संवित्तिः।।२८८५।।

चिकुरान्धकारमोषकदन्तद्युतिदिव्यदीप्तीनाम् ।
दाहकता या दृष्टा दृष्टाप्येषा च नो दृश्या।।२८८६।।

यद्यत्पार्श्वे दृष्टं तत्क्षणमात्रेण दूरतां गमितम्।
क्लेदक्रोड़ीकरणे तत्सौन्दर्यं समुल्लसितम्।।२८८७।।

यत्र द्रढीकरणमपि संश्लेषे सार्थकं जातम्।
तन्मयता सम्बुद्धौ काचिदियं सुन्दरी सृष्टिः।।२८८८।।

यत्र मरणमप्येकं नूतनमास्ते समुज्ज्वलं जन्म।
सौन्दर्योन्मादकतासम्पूर्णा कापि सा सरणिः।।२८८९।।

कष्टं तदैव जातं सौन्दर्यं वा यदा यदाऽन्तरितम्।
सुन्दरसंमुखभावे युगगाथा क्षण इवाऽभाति।।२८९०।।

नवयुगसंभूतीनां सुन्दरभावेषु संचाराः।
सत्ये शिवे च धामनि संस्थितिमसमां विलासयत्येव।।२८९१।।

ननु सर्वासामासां विद्यानां कोऽपि परिपाकः।
सौन्दर्याणां योगे बाधा साधारणी नाऽस्ति।।२८९२।।

सौन्दर्यसमाचारा जीवनसर्वस्वसंसाराः।
हारा इवातिरम्याऽऽसारा मांगल्यदीप्तीनाम्।।२८९३।।

सर्वव्यापकमंगलमयसत्तासाध्यसम्पत्तिः ।
निखिला शक्तिसुपुंजैर्नीराजितवैभवैर्भरिता।।२८९४।।

सौन्दर्योन्मादमयी काचित् काराऽपि रमणीया।
देहस्थापितकुञ्जा जयतितरां रम्यतापुञ्जा।।२८९५।।

बधिरीकृतसत्काव्या स्वयमिहकवितैवकाचिदियम्।
बाधाऽराधितभाग्या निषेधतत्त्वस्य सौभाग्या।।२८९६।।

संसरणानां संगतिसंदात्री रंगरागरेखानाम्।
रम्याऽऽरामारमणे रेखाङ्कितरम्यसंसारे।।२८९७।।

आदर्शाणां प्रतिकृतिरेवाऽस्ते जीवनानां वा।
दृश्याणां संभूषा सैषा काचिल्लधीयसी नमिता।।२८९८।।

आम्रनिकुञ्जसमीरावलिसौगन्ध्याञ्चिता सेयम्।
सौन्दर्याणां सुषमा यदा कदा वन्दनीयैव।।२८९९।।

आस्वादना तु दूरे दर्शनमात्रेण मोहमुपयान्ती।
रङ्गे रङ्गे रिङ्गणशीला लीलेयमासेव्या।।२९००।।

सौन्दर्यकम्पनानां विनिरोधे यादृशोन्मेषः।
नो वा सन्तापकता विन्दुनिपातोऽस्त्यहो मधुरः।।२९०१।।

स्थिरतामायातानामवकाशानां समीरझंकारः।
प्रत्यग्रतरे बोधे शोधं किञ्चिद् विलासयति।।२९०२।।

अङ्गाऽङ्गे भङ्गीनामेषा घटना विलक्षणा काचित्।
सहृदयहृदयाऽकाशेऽवकाशभाषां समापयते।।२९०३।।

कवितायाः संहर्ता सोऽयं कश्चित् समायातः।
सुन्दरताया भक्षकमेनं दृष्ट्वा पलायिता कविता।।२९०४।।

सद्यः पलायितोऽयं विघ्नः कैश्चिन्मदीयसत्पुण्यैः।
आयाहि देवि तूर्णं पूर्णं कुरुमानसं दिव्यम्।।२९०५।।

नानैतादृशकण्टकभरितं सौन्दर्यसाम्राज्यम्।
प्रतिनायकवशकाराद्भुतशोभासंभृतं भाति।।२९०६।।

सौन्दर्यबोधनिर्झरमध्ये यद् दूषितं दृष्टम्।
सौन्दर्यसमाशंसा तेन सुपुष्टिं समायाता।।२९०७।।

कण्टकभावं गमिता एते प्राणा न दृष्टाश्चेत्।
तेषां दूरीकरणे यो वाऽनन्द कथं स लभ्यः स्यात्।।२९०८।।

कविकुलगुरुवाणीनां कुञ्जे सन्देहसर्पाणाम्।
बिलनिर्मितर्नवीना जघन्यधन्या समाभाति।।२९०९।।

घनमदवितरणकार्ये कालीदासः प्रयुक्तोऽसौ।
कविकुलगुरुस्वरूपे सन्देहारोहणं कुरुते।।२९१०।।

सौन्दर्यस्वीकारे सौन्दर्याराधने जाते।
सन्ततिमूला निखिला प्रकृतिरिहाऽश्वासिता जाता।।२९११।।

सौन्दर्याणां काचित्स्वीकृतिरप्येषणीया स्यात्।
नो चेद्दण्डविधीनामत्युग्रा परिणतिर्ग्राह्या।।२९१२।।

ये चापि रसाऽभासा कवितावल्यां प्रदीप्यन्ते।
मानसिकोत्तापानां मध्ये तेषां समुन्मेषः।।२९१३।।

सौन्दर्यबोधचर्याऽवतारवेला-समुल्लासे ।
आभाणकप्रतिष्ठा सर्वा संसाधिता सरणिः।।२९१४।।

कालकलाकलनायां कमलाकृपया कृता काचित्।
कमनीया काव्यावलिरेका चित्रैर्विचित्रैव।।२९१५।।

बद्धं चेत्सौन्दर्यं ह्रसते नित्यं परीणामे।
उन्मुक्तं सौन्दर्यं चुम्बति सीमासमुन्नतिं सततम्।।२९१६।।

उद्यानेषु वनेषु च भूयानाभासते भेदः।
एकत्राऽस्ति निबद्धं रूपं प्रोन्मुक्तमन्यत्र।।२९१७।।

बद्धेऽस्मिन्सौन्दर्ये सर्वेषामादरो नित्यम्।
संजायते निकासं संरक्षणभावमुपयातः।।२९१८।।

अन्ये पुनर्नमन्ते प्रोन्मुक्तं सुन्दरं दृष्ट्वा।
वैपुल्यं तत्रास्ते कोऽपि न भेदोऽपि तत्राऽस्ते।।२९१९।।

निकषे निकषे सर्वा निघर्षरेखासमुज्ज्वला येषाम्।
दिव्यं सुवर्णरूपं प्रकाशयत्येव निखिलानाम्।।२९२०।।

रेखाभिर्ननु ताभिः सौगन्धिकतासमन्वयो नैव।
समधिगमे केषाञ्चित् सत्यं नित्यं समायाति।।२९२१।।

तस्माद्विश्वासानामाधारे या प्रतिष्ठेयम्।
नो सा प्रमाणसाध्या तेषां परिमितिमथाऽत्र सद् हेतुः।।२९२२।।

क्वेदं विपुलमतीनां सत्काव्यालोचनं नाम।
क्व च सा रसमयधारा काव्यानां हृदि समाराध्या।।२९२३।।

शल्यीकरणं यदि वा सौन्दर्याणां सुखं देयात्।
सौन्दर्याणां वैभवसाम्राज्यं वै तदा विलुप्येत।।२९२४।।

सत्त्वमयी काचिदियं वर्षा याऽद्यैव संजाता।
तत्रोन्मादकतानां प्रमाणमत्रापि किं देयम्।।२९२५।।

हृदयमिदं जानीते सौन्दर्याणां निकामभव्यानाम्।
सुखसंवादे भाषां सर्वत्रोल्लासमायाताम्।।२९२६।।

ये वाऽभिमानवन्तः सौन्दर्याणां समीक्षासु।
निगड़ितसंचरणास्ते जड़भूता एव दृश्यन्ते।।२९२७।।

ये तु विनीतैर्वचनैरिङ्गितकरणेषु संलग्नाः।
निर्मितसत्प्रस्थानास्ते वन्द्या नूनमाचार्याः।।२९२८।।

सभ्यत्वे सौन्दर्यं सौशील्ये चाऽथसौन्दर्यम्।
लज्जायां सौन्दर्यं ललितकलायां च सौन्दर्यम्।।२९२९।।

वाचां मधुरविहारेष्वाऽस्तेऽनुपमं हि सौन्दर्यम्।
नित्यं हासविलासे किं किं वा नाऽस्ति सौन्दर्यम्।।२९३०।।

युगमितकालः क्षणमिव सौन्दर्येणान्वितो याति।
विपरीतोऽसौन्दर्योन्मेषे पर्वतसमो याति।।२९३१।।

मित्राणां गोष्ठीनां मध्ये यत् सुन्दरं समुन्मिषति।
झटिति प्रयाति कालः सुखपूर्णो नो विभासिताऽयासः।।२९३२।।

सन्तर्जन-विस्फूर्जन-विस्फोटकताविभाषायाम् ।
यत् सौन्दर्यं दृष्टं वीरो रस एष तत्रत्यः।।२९३३।।

योगाऽयोगवियोगे संयोगे वाथ चित्तानाम्।
रमणीयं यद्रूपं सर्वं काव्यं समाभाति।।२९३४।।

रात्रावनन्ततायामाकाशे पूर्णचन्द्रस्य।
कमनीयतमा मूर्तिः स्फूर्तिः सा चिन्मयानन्दे।।२९३५।।

प्राणाऽधारा सर्वा सृष्टिरियं तास्तृणीकृत्य।
येषां यत्र विवृत्तिः सर्वं तत्सुन्दरं तेषाम्।।२९३६।।

निर्मलतरजलधारा पर्वतमध्यात् प्रवहमाना।
घोषवती नानानवकल्लोलैः पुष्कला जयति।।२९३७।।

उत्तुङ्गशैलशृङ्गेष्वासीना मेघधारेयम्।
कियती सुन्दररचना नियतितले संचितैवाऽस्ते।।२९३८।।

श्रमिकाणां श्रमवेलासंजाता स्वेदनिर्झरिणी।
काव्यानां सा सरणिः स्वर्गं भूमौ समानयति।।२९३९।।

सागरवेला संस्थितिरेषाऽमन्दं समानन्दम्।
दिव्यमनिर्वचनीयं साञ्जलिबद्धं समर्पयति।।२९४०।।

मन्दिरपूजासमये घण्टानादोऽयमाभाति।
नानापुण्यविभावितप्राणस्पन्दनसरिद्रूपः ।।२९४१।।

यदि नाम विघटितेयं घटना नो वा प्रजायेत।
यदि सर्वं सरलं स्यात् जीवनमेतत्कुरूपं स्यात्।।२९४२।।

स्वीये नवनिर्माणे सौन्दर्यस्यानुभूतिः स्यात्।
यद्यत् स्वतः समुत्थं बोधे तस्यापि सुन्दरत्वं स्यात्।।२९४३।।

आसाद्यतां नवीना पुरातना वा प्रसाध्यतां दिव्या।
वर्षा कनकमयीयं रम्या संसेव्यतां धन्यैः।।२९४४।।

सद्विद्याप्राचुर्योत्तेजकतायां प्रजागरूकायाम्।
सन्देहैर्मन्देहान् विन्देमहि संमुखान्देहान्।।२९४५।।

कुत्रोच्छलिता तावत्तडिदिव गौराङ्गना रचना।
कस्मिन् वा परिवेशे प्रकटा शोभामुपागताऽद्यत्वे।।२९४६।।

ननु सर्वाऽभरणमयी मनोवशीकारपरिणामा।
केयं परतन्त्रतया मानसमाराधयति नित्यम्।।२९४७।।

सौन्दर्याणां लहरी विद्या काचित् सदोत्तुङ्गा।
गङ्गाऽचरिता स्नानोन्माथितदौर्भाग्यसंसारा।।२९४८।।

सत्यशिवसुन्दराणां मिलितं रूपं मिलत्यत्र।
योगाधारा सर्वा जन्मादीनां च परिपाटी।।२९४९।।

यस्याऽगाध समुद्रे तरङ्गमालाऽकुले सर्वा।
या चेतना प्रवाहे लीना मीनेव संजाता।।२९५०।।

शास्त्राणां ग्रन्थानां सौन्दर्योद्बोधने याऽसौ।
पाण्डित्यमयी धारा केनेयं नो समाराध्या।।२९५१।।

आचार्याणां तदिदं सौन्दर्याराधनं नाम।
परया दयया रचितं स्वान्तं संशान्तमातनुते।।२९५२।।

यद्यन्मया गृहीतं मनसा वाचाऽथ कायेन।
तत्सुन्दरमिति सत्यं शिवतामायाति सन्निकटे।।२९५३।।

सौन्दर्यसारधारा चमत्कृतिस्तत्र सर्वत्र।
प्राणोच्छ्वासपवित्रे वातावरणेऽनुभूयते सर्वैः।।२९५४।।

सौन्दर्याणां बोधे जाते विमले सदालम्बे।
चैतन्यानां सरणिर्दूराद् दूरं समानयति।।२९५५।।

सौख्यं शिवस्वरूपं मङ्गलकन्याणपदकदम्बाना-
मभिधेयार्थः परमो जीवनसंचालनं कुरुते।।२९५६।।

यत्रानन्दोल्लासे दिव्या स्वीया मतिर्भवति।
ममवेदं ममवेदं सर्वं तत्सुन्दरं भवति।।२९५७।।

प्रातर्भास्करकिरणप्रकाशितं सन्नभो यदा भवति।
तादृशसुन्दरताया द्रष्ट्रत्वे सुन्दरत्वं स्यात्।।२९५८।।

सौन्दर्यमिदं काम्यं सर्वस्याऽप्यायकं तत्त्वम्।
सौन्दर्यस्याऽभावे संसारोऽयं चिता महती।।२९५९।।

सौन्दर्यबोधरूपं चिन्तामणिमादरेण पश्यन्तः।
सन्तो नैव समस्ते संसारे संभ्रमासक्ताः।।२९६०।।

भ्रान्तिविरूपितसुषमा याऽपीयं संप्रवर्तमानाऽस्ते।
सौन्दर्याभासानां सा संसृष्टिः सुविज्ञेया।।२९६१।।

तत्राऽभासकतत्वे रूपं सौन्दर्यजातानाम्।
तेनोल्लासकदीप्तिर्भ्रममात्रेऽपि प्रजायते कामम्।।२९६२।।

दिव्यतपश्चर्यायां सौन्दर्याणां परा दीप्तिः।
प्रकटिसर्वविभावा सम्पूर्णा जायते नाम।।२९६३।।

नैवंविधघटनानां विस्फोरकतामुपागते काले।
रमणीयतया भणितिः शुष्का वा नीरसा भवति।।२९६४।।

रेखामात्रं तदिदं छन्दोभिर्मण्डितं कथनम्।
सौन्दर्यबोधविषये स्फूर्तिं कामपि निबध्नाति।।२९६५।।

अष्टमद्वीपः

१०८.संयोगः

संयोगनामकमिदं व्यक्तित्वोन्नायकं तत्त्वम्।
घटनावलिरप्येषा तत्र व्याख्यायिता जाता।।२९६६।।

संयोगो घटनानां मिश्रणवेला समाध्यातः।
सर्वविधसावधानैस्तदिदं सर्वं मनसि कार्यम्।।२९६७।।

विश्वस्मिन् ये चैते शिखरेषूच्चस्थिता भावाः।
संयोगस्तेषामपि सर्वेषां नायको ज्ञेयः।।२९६८।।

आकस्मिकता तत्र तु या सर्वैर्ध्यायते नाम।
न स पर्यायः कश्चित् संयोगस्यात्र विज्ञेयः।।२९६९।।

संयोगो दार्शनिकैर्दृढभावेनास्थितः कश्चित्।
एकाधिके विचारे संयोगो नित्यसंसिद्धः।।२९७०।।

कस्य च केन कदा वा कस्मिन् विषयेऽथ केन रूपेण।
सहभावः संभवितेत्येतत्सर्वं विमृग्यतां तत्र।।२९७१।।

केन कया संयोगे कीदृग्जन्मार्पणं जातम्।
कस्य च कदा कथं वा कस्मिन् रूपेऽथ संयोगः।।२९७२।।

यद्यन्नहि संजातं नासीत्तत्राऽस्य संयोगः।
संयोगो यत्राऽस्ते तत्सर्वं जायते नाम।।२९७३।।

संयोगस्य विरोधी वियोगभावो भवत्येव।
येषां नो संयोगस्तेषामेषां वियोग इति नास्ति।।२९७४।।

तत्रैवास्ति वियोगः संयोगो यत्र पूर्वमभूत्।
संयोगो यदि नाऽसीत् तेन वियोगो न शक्यते वक्तुम्।।२९७५।।

ज्ञानेन्द्रियकर्मेन्द्रियनैकट्ये भवति संयोगः।
बुद्धेर्व्यापाराणामपि सह भावेऽस्ति संयोगः।।२९७६।।

यदि संयोगो जातः प्रोन्नतपुरुषेण केनापि।
स्वीयापीयं विविधा समुन्नतिर्निश्चिता जाता।।२९७७।।

संसत्सदस्यतायां विधानसभया सभाजितानां वा।
मन्त्रित्वे प्रौढानां संयोगः प्रीतिमान् भवति।।२९७८।।

शासनसंस्थोच्चपदे ये सम्यक् सुप्रतिष्ठिताः पुरुषाः।
तैस्सह यदि संयोगस्तदा सुसौविध्यमायातम्।।२९७९।।

विविधाऽकल्पितघटनावलिरेषा संमुखे याति।
संयोगानां कृपया यद् दूरे तत्समीपमायातम्।।२९८०।।

संपादकेन सार्धं यदि संयोगः सुसंसिद्धः।
रचना तदा प्रकाशितरूपे संयाति जनतायाम्।।२९८१।।

गन्त्रीयाने यात्रामध्ये यदि पत्रवीक्षकेन संयोगः।
पत्राऽभावेऽपि तदा प्रथमश्रेण्यां भवति यात्रा।।२९८२।।

संयोग एव नासीदिति वक्तुं युज्यते तत्र।
यत्राऽनुकूलकार्यावलिरेषा नो प्रदृश्यते सफला।।२९८३।।

१०९.पुत्रस्य विमर्शः

लोके महतां पुत्रा हीना दीना विलोक्यन्ते।
अपवादा एवैते महतां जाता महान्तो ये।।२९८४।।

यदि कोऽपि महापुरुषः स्वीयतपःश्रमबलेन संदीप्तः।
यशसां पुञ्जैरावृतकायो धन्योऽभवल्लोके।।२९८५।।

तत्पुत्रस्तु नितान्तं दरिद्रतायां समस्तायाम्।
विभ्राजते पुरस्तात् पितुरेव च नाम गृह्णाति।।२९८६।।

या च तपस्या पित्रा विहिता तस्याः सुदूरतो यातः।
स्थितिरपि सा परिवर्तितरूपेऽद्यत्वे समस्तैव।।२९८७।।

आत्मसमं बहु बहु बहु परिश्रमं चापि संसाध्य।
नायं तथाविधोन्नतिशिखरे यातुं समर्थोऽभूत्।।२९८८।।

अभविष्यद्यदि सोऽयं मन्दस्यैकस्य पुत्रो नु।
लोकास्तदाऽकरिष्यन् शंसां सोऽयं समुज्ज्वलः पुत्रः।।२९८९।।

महतः पुत्रं कामं योग्यं चैवाऽपि संलोक्य।
कथयन्त्येते लोकाः 'सा वार्ता काचिदन्याऽसीत्'।।२९९०।।

कथितं केनापीत्थं पापान्महतो हि पुत्रत्वम्।
संसारे संप्राप्तं जन्मनि सैषा विडम्बना महती।।२९९१।।

एतस्मिन्संसारे चलेऽधिकारे निकामविस्तारे।
योग्याऽयोग्यविचारे न्याय्ये मार्गे न कोऽपि सन्दृष्टः।।२९९२।।

११०.वैषम्यम्

नो जानन्ति वराकाः सम्पन्ना वैभवैर्वलिताः।
त्यागतपस्याश्रममयजीवनसरणेः प्रकृष्टमानन्दम्।।२९९३।।

सम्पूर्णजीवनस्य च निश्चिन्तत्वं सुसंपाद्य।
निम्नानां परिपीडनपुरुषार्थेष्वेव ते लग्नाः।।२९९४।।

शिखरे शिखरे विचरणशीलास्त इमे भयावहाः सिंहाः।
हरिणानां मृगयायां स्वीयं चेतः समर्पयन्तितराम्।।२९९५।।

सामर्थ्योल्लासमये समये परपीडने लग्नाः।
मानसिकं दारिद्र्यं नियमेनैव प्रकाशयन्त्येते।।२९९६।।

स्वीये सुखसाम्राज्यैर्भरिते भवने सुखं सुप्ताः।
प्रतिवेशिनां निशायां जागरणं नैव जानन्ति।।२९९७।।

सैषा समाजसरणिः कथमिव सर्वैः समर्थनं लभताम्।
यत्रेदं वैषम्यं गृहे गृहे दृश्यते व्याप्तम्।।२९९८।।

तर्काश्चैते सर्वे वैषम्याणां समर्थने दत्ताः।
सर्वविधं सामर्थ्याभावं सम्प्रस्तुवन्त्येव।।२९९९।।

सम्पूर्णः संसारः सर्वेषां सेवनीयोऽयम्।
जीवननव्यस्पन्दनमपि सर्वेष्वेव जीवनं तनुताम्।।३०००।।

१११.वाचालता

वाचालतानितान्तं वरेण्यभावैः समुच्छलिता।
संमोहयति समन्तात् प्रगुणीकृतवैभवं चेतः।।३००१।।

ये वाऽद्यत्वे नूनं सद् गुणमालासमाक्रान्ताः।
ते यदि नो वाचालाः कोणे तिष्ठन्तु तेऽत्रैव।।३००२।।

माभूद् गुणलवलेशो वाचालत्वं गुणो ह्येकः।
निखिलेऽस्मिंस्तु समाजे मनुजं सम्यक् प्रतिष्ठितं कुरुते।।३००३।।

सर्वविधं भयजातं या सम्यग्दूरयति नित्यम्।
शब्दानां विस्फोटे काचिद् वाचालता नाम।।३००४।।

विषयाणां संस्पर्शो मा भून्नामास्ति किं तेन।
यदि वाचालत्वं वा तिष्ठेत् सर्वज्ञता लब्धा।।३००५।।

कस्मिंश्चिद् वाचाले पुरुषे यद्युच्चपदलाभः।
स्वर्णे सौरभभावस्तत्रैवोन्मेषमायातः।।३००६।।

यद् वा वाचालत्वं पदं समुन्नततमं वाऽपि।
सम्यक् समर्पयति वा सर्वं वा स्वे वशे नयति।।३००७।।

अद्यत्वे तु तदेतद्वाचालत्वं विलक्षणं जातम्।
सैषा चुनावभाषा वाचालत्वं स्वयं वृणुते।।३००८।।

यो नितरां वाचालः सर्वैर्मान्यो भवेन्नाम।
तस्यैव वशे सर्वं शासनमथ मन्त्रिणश्चापि।।३००९।।

ध्वनिविस्तारकयन्त्रे वाचालत्वं चमत्कृतं जातम्।
सर्वेषामप्येषां लोकानां वा वशीभावः।।३०१०।।

सामर्थ्यानां मध्ये परममिदं सत्समर्थत्वम्।
वाचालत्वं नत्वा सर्वविधा कार्यसिद्धिः स्यात्।।३०११।।

एकेषामेतेषां वाचालत्वेन युक्तानाम्।
यद् दृश्यते प्रभुत्वं तदुत्तरं नास्ति कुत्रापि।।३०१२।।

वाचालत्वं देव्याः सरस्वतीनामिकाया वा।
दिव्या काचिदियं सा प्रसादभाषा समुन्नेया।।३०१३।।

वाचालता वरेण्या व्याख्याने चैव शास्त्राणाम्।
दिव्यगुणेनानेनैवाऽग्रेडितवैभवं शास्त्रम्।।३०१४।।

वाचालत्वं शुभ्रं सर्वैः पापैर्विनिर्मुक्तम्।
यदि लभ्येत कथचिद् तदेतदाचार्यकं नाम।।३०१५।।

सर्वे लोका ज्ञातुं विस्तारेणैव तुष्यन्ति।
यदि मुखरत्वं न स्यात् विस्तरभावः कथं वा स्यात्।।३०१६।।

काऽप्यणुतमापि वार्ता वाचालत्वं समासाद्य।
विस्तारेषु नितान्तं सन्दीप्ता संविभात्येव।।३०१७।।

लोचनगोचरभूतं यदिदं दृश्यं समीपस्थम्।
वाचालतागुणेनोच्छालितमेतत्सुविशदं स्यात्।।३०१८।।

ये तु नितान्तं हीना वाचालत्वेन ते नाम।
केनापि न विज्ञाता प्रयान्ति नूनं यथाऽयाताः।।३०१९।।

११२.ग्रामाः

ग्रामा भारतवर्षे प्रकृतिविलासस्वरूपाणाम्।
भाण्डागारा एते मायाया संप्रदूषणैर्मुक्ताः।।३०२०।।

अत्राऽस्ते सा प्रेम्णां परमा काष्ठा विलोकितुं शक्या।
यत्राऽविर्भावानां नित्यं ह्यभिलाषिणो देवाः।।३०२१।।

असमा कृषिसम्पत्तिर्यत्रोन्मुक्ता समृद्धिपरिपूर्णा।
जीवनदानं कुरुते वर्धयते चाथ संसारम्।।३०२२।।

यत्रोन्मुक्तरजन्यो दिवसाश्चोन्मुक्तभावेषु।
शारीरिकसम्पुष्टिं वितरन्त्यश्रान्तभावेन।।३०२३।।

ग्रामा इमे नितान्तं मायासंग्रामदूरिताः सन्तः।
दिव्यं प्रेम दधाना स्वीये हृदये विलोक्यन्ते।।३०२४।।

ग्रामटिका दूर्वायामाच्छन्ना शोभना भाति।
निर्मलमरकतकिरणावलिवेष्टितहृदयरेखेव ।।३०२५।।

या भूमिर्ग्रामाणां सा वै नित्यं प्रणम्याऽस्ते।
साऽऽस्ते जीवनदात्री नूनं सा धन्यतायुक्ता।।३०२६।।

अङ्गाद्वङ्गं यावत्पुनरटकात्कटपर्यन्तम्।
भारतवर्षे भूमिर्ग्रामैः संभूषिता जयति।।३०२७।।

इतिहासेषु ग्रासा विद्यन्ते सर्वथा वन्द्याः।
श्रीकृष्णोऽपि स्वीयं बाल्यं ग्रामे प्रवर्धितवान्।।३०२८।।

ग्रामे ग्रामे गत्वा गान्धी स्वातन्त्र्यसंग्रामे।
सर्वं भारतदेशं तूर्णं संचालयामास।।३०२९।।

हरिता भरिता एते सन्दृश्याः सर्वतो ग्रामाः।
नगरे सीमाबन्धो निस्सीमत्वं विराजते ग्रामे।।३०३०।।

ग्रामाणां परिवेषे विशेषता या समाभाति।
तस्या वर्णनकाले वैपुल्यं लेखिनी धत्ते।।३०३१।।

वेदे वर्णितरूपाः पुराणनिवहे सुचर्चिता एते।
काव्ये नाटकबन्धे खण्डे काव्ये निरूपिता ग्रामाः।।३०३२।।

आरामाणां सुषमां न्यक्कुर्वन्तो विलोक्यन्ते।
लक्ष्मीराजितदेहा पूजितगेहा सदा ग्रामाः।।३०३३।।

नाना धर्माचार्या विद्वांसो राजनीतिधौरेयाः।
ग्रामे जन्म गृहीत्वा सम्पुष्टा धन्यतां याताः।।३०३४।।

ग्रामे सन्ति कृषकाः पुष्टाः पशवस्तथा ग्रामे।
ग्रामे नवा वधूट्यो ललिताः कन्या इमा ग्रामे।।३०३५।।

ग्रामे वृद्धाः पुरुषाः परिवाराणां प्रभापुञ्जाः।
सर्वस्नेहमयानां भावानां मूर्तयस्ते ते।।३०३६।।

दुग्धं दधि नवनीतं नव गुड़माधुर्यमास्वाद्यम्।
नाना वनस्पतीनां पुष्टाः सम्पत्तयो ग्रामे।।३०३७।।

जीवनखेला खेलति ग्रामे सैषा नितान्तरमणीया।
धूलीपटलैर्धन्या यत्राऽभान्त्येव सत्कायाः।।३०३८।।

ग्रामे नाना वेशाः नाना जलपूरिताः कूपाः।
नानावर्णविभासितकेदाराः सर्वतो दृश्याः।।३०३९।।

क्वचित्प्रदेशेऽत्युच्चाः क्वचित्समानाः क्वचिन्नीचाः।
भूभागा रमणीया रससारा रंगरागमयाः।।३०४०।।

विद्रुमवैदूर्याभा द्रूमावलिर्दूरतो दृश्या।
द्रुततरमाविष्कुरुते दारिद्र्योन्मूलनं दिव्यम्।।३०४१।।

निर्मलजलभृतसरसी मधुरिमभरिताश्च ते कूपाः।
उत्खाताः प्राकृतिका रमणीयाः सन्ति चैकान्ते।।३०४२।।

कस्मिंश्चित् सत्पद्ये स्वर्गः कथितस्तु ग्रामटिका।
तस्या विलुण्ठनायां लङ्कापतिरनुभवति संकोचम्।।३०४३।।

सत्यं ग्रामाः सर्वे स्वर्गेणैवात्र तुलनीयाः।
मनसां तृप्तिर्यत्र च परमं रूपं प्रकाशयति।।३०४४।।

यल्लभ्यं तद्विपुलं स्तोकत्वं नो विलोक्यते ग्रामे।
नगरेष्वेव नितान्तं संकुचितं रूपमाभाति।।३०४५।।

बालास्ते ते मुदितोच्छलिते रूपे विराजन्ते।
पर्वतनदीतडागे भ्रमणं तेषां प्रजायते रुचिरम्।।३०४६।।

गोमयलिप्तगृहाणां मध्ये धन्या विराजते लक्ष्मीः।
यत्राऽनुपमा देवा अपि तां द्रष्टुं समायान्ति।।३०४७।।

इक्षुक्षेत्रं तदिदं ग्रामे विस्तारमायातम्।
मधुररसानां वितरणकर्मणि निरतं समस्तसंसारे।।३०४८।।

नव नव धान्यसुगन्धिश्चेतोतोषणकरी नितराम्।
जगतामुदरज्वालाप्रशमनशीला विलासिता ग्रामे।।३०४९।।

नाना कलाकुशलता पारम्परिकी प्रदृश्यते ग्रामे।
सुखयति निखिलं लोकं लोभयते सज्जनान् सर्वान्।।३०५०।।

पर्वोत्सववेलायां समुच्छलन्नव्यतोल्लासः।
एकरसाऽनन्दानां सोन्मादं वितरणं कुरुते।।३०५१।।

ग्रामाणां सुषमाणां दृश्यावलिमादराद् दृष्ट्वा।
सर्वं जीवनमेतत्सफलं संजायते कामम्।।३०५२।।

ग्रामा इमे प्रकृतयो विकृतय एतानि नगराणि।
प्रकृतिविकृतिसंचारे जीवनमग्रेसरी भवति।।३०५३।।

११३.प्राचीनं नवीनं च

पुरातनाऽर्वाक्तनयोरन्तरमद्य तु महज्जातम्।
वृद्धतरा मनुजा ये हेयां दृष्टिं नवीनेषु।।३०५४।।

संधारयन्ति विविधां शिक्षां दीक्षां क्षिपन्त्येव।
संस्कारानपि विषमान् दृष्ट्वा सततं तुदन्त्येव।।३०५५।।

परमानुदाररूपां प्रवृत्तिमेषां समालोक्य।
नूत्ना ह्यपि ते ते ते सद्यः प्राचामुपेक्षणं घोरम्।।३०५६।।

कुर्वन्ति साऽपि विषमा परिस्थितिर्वातिगम्भीरा।
कोणे कोणे दृष्टा सर्वत्राऽयं विसंत्रासः।।३०५७।।

नूत्नेषु विद्यते चेत्प्रवाहरूपोऽयमुत्साहः।
नव नव संचरणेषु प्रवृत्तिरिति किं हि तत्र काठिन्यम्।।३०५८।।

११४.संस्कृतसेवा

संस्कृतसेवाकार्ये संस्कृतभाषाप्रचारकार्ये वा।
सानन्दं विचरन्तो जना इमे तुन्दिला जाताः।।३०५९।।

सेवाया आवरणं परिधार्यैते महोदयाः सततम्।
सर्वविधां परितृप्तिं समादधाना विलोक्यन्ते।।३०६०।।

संस्कृतमपि भुञ्जानाः सेवाभावेन चैवैते।
पारंपरिकस्वीयप्रभावपरिवर्धने दक्षाः।।३०६१।।

इतरे चैते संस्कृतसेवालग्नाः पुरुषशार्दूलाः।
कष्टानां पोटलिकां शिरसि दधाना विलोक्यन्ते।।३०६२।।

तत्तत्पाठनलग्नास्तत्तत्संमेलने लग्नाः।
शासनसंघर्षे वा पतिताः संस्कृतसमारम्भे।।३०६३।।

कष्टदशामापन्ना अपि ये स्वीयान्तरे हृष्टाः।
संस्कृतसत्सेवायां यद् वपुरेषां विनिर्मलं याति।।३०६४।।

संस्कृतविद्या सैषा सर्वेषां भारतीयानाम्।
स्वातन्त्र्यस्य विधात्री संम्पूर्णं वैभवं तनुते।।३०६५।।

एतस्याः संस्मरणे यद्वैमुख्यं प्रयुज्यते लोकैः।
तन्नूनं परिहार्यं मनसा वाचाऽथ कायेन।।३०६६।।

संस्कृतपरिचर्यायां संलग्ना ये तु विद्वांसः।
नाना रूपे दृष्टास्ते वै नम्याः समाजेऽस्मिन्।।३०६७।।

कठिना संस्कृतसेवा बहुकरणीयं हि विद्यते काले।
जीवनहोमविधात्रा पदमाधेयं स्थले तस्मिन्।।३०६८।।

११५.संघटनम्

संघटनं सा शक्तिर्यया समुत्सार्यते निखिला।
बाधानामपि धारा, समुन्नतिः शीघ्रमायाति।।३०६९।।

संघटनगुणगणावलिरेषा सर्वस्य ननु समाजस्य।
संपोषयते रूपं सौख्यमयं जीवनं कुरुते।।३०७०।।

संघटनाख्यं तत्त्वं समाजरूपं विधारयति।
संघटनं यदि न स्यात् कुतः समाजः प्रतिष्ठितो भूयात्।।३०७१।।

महतामपि कार्याणामुपलब्धीनाञ्च साफल्ये।
संघटनशक्तिरेषा सामान्या कारणीभूता।।३०७२।।

एकैकस्य समीपे न विद्यते तादृशी शक्तिः।
येन लघीयो रूपं विधारितं स्यान्मनुष्यस्य।।३०७३।।

एकैकस्मिन्देहे संकुचितो वाऽभवद् यदा मनुजः।
जाङ्गलिकं तद्रूपं नित्यं मृत्युप्रदं चाऽसीत्।।३०७४।।

संघटनशक्तिरसमा मृत्यौ पीयूषधारेव।
परिचयभावं प्राप्ता यदा तदा मानवः श्वसिति।।३०७५।।

सर्वविधशान्तिसौख्यैश्वर्याऽमृतसारसर्वस्वाम् ।
संघटनशक्तिमधुना भाग्यैः केचिल्लभन्ते वा।।३०७६।।

शत्रुभ्यः संत्रासे सैवैका संघटनशक्तिः।
विपदुन्मूलनकार्ये सम्पत्तीनां च साधने दृष्टा।।३०७७।।

जीवननवसौख्यकरं कोटिजनानामथापि यच्चैकम्।
लक्ष्यं संसाधयितुं नैकेष्वैक्यं समायाति।।३०७८।।

चेष्टायां च विचारे प्रचारकार्ये विपत्तिभिर्युद्धे।
समभावो लोकानां स्मृतैव सा संघटनशक्तिः।।३०७९।।

११६.संस्कृतशिक्षा

संस्कृतशिक्षाक्षेत्रे बालानां शिक्षणोपेक्षा।
संदृश्यते सुमहती हानिः संदृश्यते तेन।।३०८०।।

प्राप्ताचार्योपाधय अपि नो वक्तुं समीहन्ते।
संस्कृतपंक्तिविलेखनवैधुर्यं चापि तेषु जागर्ति।।३०८१।।

एषा या दुरवस्था विपुला संदृश्यते परितः।
बालानां शिक्षाया उपेक्षणं तत्र वै हेतुः।।३०८२।।

संस्कृतसद्गुणगानं कर्तुं यद्वै नितान्तमुखरत्वम्।
संदृश्यते हि विदुषां को लाभस्तेन जायेत।।३०८३।।

या वै भाषाऽद्यत्वे व्यवहारपथाऽतिदूरगा जाता।
कण्ठे करणाऽभ्यासः केवलमथ तां सुजीवयति।।३०८४।।

परमद्यत्वे कण्ठस्थीकरणाभ्यास एवाऽयम्।
शिक्षाक्षेत्रधुरीणैस्तिरस्कृतो निन्द्यतां गमितः।।३०८५।।

या भाषा ये शब्दा व्यवहारे नित्यमायान्ति।
तेषां विषये तदिदं कथनं साधीयसी वार्ता।।३०८६।।

नित्यव्यवहाराणां तादृशविद्यासमुन्मेषः।
हिन्दी चाथ वरेण्यास्तास्ता प्रान्तेषु संस्थिता भाषाः।।३०८७।।

नित्यव्यवहाराणां मध्ये दीप्ता विलोक्यन्ते।
अतिरिक्तयत्नरहिता अपि सर्वेषु प्रसीदन्ति।।३०८८।।

प्रारभे तु समस्ता अपि भाषा रटनसापेक्षाः।
किन्त्वल्पीयसि यत्ने व्यवहारैः संप्रपूर्यन्ते।।३०८९।।

व्यवहारेण विदूरे स्थिता इमाः संस्कृताद्यास्तु।
नैरन्तर्याभ्यासे किञ्चित्कालं समीहन्ते।।३०९०।।

तावद् धैर्यं धर्तुं कण्ठस्थीकरणवेलायाम्।
ये सन्नद्धा बालास्तेषां जातेयमायतिर्निखिला।।३०९१।।

भाषा काचिदपूर्वा शक्तिर्जीवनमये समये।
यामाराध्य जनोऽयं प्रजापतिर्वाऽपि जायेत।।३०९२।।

शब्दब्रह्मसदृक्षं सिद्धान्तं मन्यमानानाम्।
भाषाशक्तिविवेके किं वा कथनीयमवशिष्टम्।।३०९३।।

सर्वः शब्दो ब्रह्म हि नित्यं हृद्देशमारूढः।
संसारं स्वे रूपेऽनुस्यूतं संप्रकाशयति।।३०९४।।

अभिधेयमिदं सर्वं दृश्यं यद् यद् प्रमेयतां यातम्।
अभिधेयत्वाऽभावे प्रमेयतेयं विलुप्येत।।३०९५।।

११७.परिवारकल्याणम्

भारतदेशेऽद्यत्वे किमपि समुन्नायकं तत्त्वम्।
परिभाषापरिवेष्टितमेतत्परिवारकल्याणम् ।।३०९६।।

परिवाराऽऽख्या संस्था परमं वै विकसितं रूपम्।
सुदृढाऽऽधारशिलेयं समुन्नतीनां विशालभवनानाम्।।३०९७।।

संक्षिप्तः परिवारः शान्तीनां संप्रदायको भवति।
परिवारे वैपुल्यं परिवर्जनतामुपागतं सद्यः।।३०९८।।

अद्यत्वे संसारे जीवननिर्वाहसंभारे।
साधनहीनदशेयं वैपुल्येनैव लोकनीयाऽस्ते।।३०९९।।

जनसंख्याया वृद्धिर्नितान्तमसमञ्जसं कुरुते।
सर्वावश्यकतानां परिहारो दृश्यते तत्र।।३१००।।

आवासानामेषां परिस्थितिर्भोजने वस्त्रे।
शिक्षादीक्षाग्रहणे दुःखा स्थितिरेव जायते सर्वा।।३१०१।।

प्राक्कालवन्नितान्तं संकोचो नैव दृश्यतेऽद्यत्वे।
संपूर्णः संसारः समीपबद्धो विभाव्यते विद्भिः।।३१०२।।

सर्वविधाऽपि समृद्धिर्मानवमात्रस्य काम्यैव।
सुखशान्तिः सर्वैरपि वरणीयाऽदौ भवत्येव।।३१०३।।

परिवारे यदि वृद्धिर्जाता क्व नु वा सुखश्च शान्तिश्च।
साधनविहीनतायां सर्वा शान्तिः पलायिता दृष्टा।।३१०४।।

तस्मात् शासनसंस्थापीयं तत्रैव जागरूकाऽस्ते।
प्रत्येकस्मिन्नपि सा परिवारे शान्तिरायातु।।३१०५।।

११८.दूरदर्शनम्

एतद्युगसंभूतं सर्वेषां तुष्टिदं नित्यम्।
अधिदैवतमिव किञ्चिन्नगरे तद् दूरदर्शनं नाम।।३१०६।।

संजयसविधेऽप्यासीन्मन्ये तद् दूरदर्शनं किमपि।
हर्म्यस्थ एव योऽसौ युद्धं संश्रावयामास।।३१०७।।

सर्वेषां व्यक्तित्वे या बुद्धिर्यन्मनस्तत्त्वम्।
श्वासे श्वासे दृष्टं कुतो न तद् दूरदर्शनमुदारम्।।३१०८।।

आस्तां तावत्सैषा दार्शनिकी शुष्कसंभूतिः।
लोचनपर्णनिपेयं परममिदं दूरदर्शनं नाम।।३१०९।।

यत्स्वामित्वे स्थित्वा सर्वः किञ्चिद्विशिष्टमात्मानम्।
मनुते तदिदं यन्त्रं मानसिकीं पुष्टिमावहति।।३११०।।

विक्षिप्ताऽन्यमनस्कं व्यक्तित्वं यत् समं कुरुते।
उन्मादं व्यातनुते बालानां दूरदर्शनं तदिदम्।।३१११।।

सद्यः प्रभावपाते सिद्धं शासकवरेण्यानाम्।
नानाकलाप्रदर्शनयुक्तं तद् दूरदर्शनं नाम।।३११२।।

प्रतिदिनमेकंतावत्सर्वं च्चलचित्रदर्शनं तनुते।
नाना नाटकरम्यं वरणीयं दूरदर्शनं नाम।।३११३।।

सूक्ष्मा स्थूला बालावृद्धास्तरुणास्तरुण्यश्च।
रुग्णाः समशीर्षिकया सेवन्ते दूरदर्शनं तदिदम्।।३११४।।

स्वात्मवशं यद्दर्शनमसमं सौख्यं समातनुते।
अरुचिर्यदि बोभूयाद् तद् रोद्धुं दर्शकस्य सामर्थ्यम्।।३११५।।

क्रीड़ासंग्रामाणां देशे देशे प्रदर्शनं यदिदम्।
छात्रेष्वसमं श्लेषं दिवानिशं नूनमादिशति।।३११६।।

रविवारे च प्रातःकालादारभ्य शयनपर्यन्तम्।
नयनं नयनं बध्नात्येतद् वै दूरदर्शनं पुंसाम्।।३११७।।

येन स्वात्मवशाः स्युर्बाला वनितादयो गेहे।
तेषामुच्छृंखलतावृद्धिकरं दूरदर्शनं किञ्चित्।।३११८।।

अध्ययनाद् विनिवृत्ताश्छात्रास्तत्राऽवहितभावैः।
संलग्ना ये चैते दोषोऽयं दूरदर्शने कश्चित्।।३११९।।

एतादृशैश्च दोषैः संयुक्तं पुनरपि प्रशंसार्हम्।
नानाविधबाधानां नियामकं दूरदर्शनं तदिदम्।।३१२०।।

११९.भ्रमः

भ्रमवशतः संसारः प्रचलति नोऽसत्यमत्रकिञ्चिदपि।
अद्वैतवादिदार्शनिकानां घोषः प्रसिद्धोऽयम्।।३१२१।।

सोऽयमविद्याजन्यो रूपं विच्छेदयन् सर्वम्।
निखिलानन्दसमुद्रं निजरूपे कष्टमिश्रितं कुरुते।।३१२२।।

अन्यद् रूपं वस्तु प्रकल्पयत्यन्यथा प्राणी।
सत्यं सुदृढं स्वीयं ज्ञानं मनुते प्रवर्ततेऽपि तथा।।३१२३।।

कश्चनशुभ्रचरित्रस्तं भ्रान्त्या दुष्टमामनुते।
द्वेषं तत्र निबध्नात्युत्तरदानं तथा कुरुते।।३१२४।।

एवं दुष्टचरित्रे चेतसि सौजन्यसंचारे।
भ्रम एव भवति सर्वो नियामकः सर्वकार्याणाम्।।३१२५।।

१२०.व्यसनम्

व्यसनाख्यमिदं तत्त्वं नो वा तत्त्वेषु परिगणितम्।
किन्तु तदेतन्निखिले संसारे व्यापकं तत्त्वम्।।३१२६।।

संसारे नासाद्यस्तथाविधः प्राणवान् कोऽपि।
कीदृशमपि तु व्यसनं जन्मनि नाङ्गीकृतं येन।।३१२७।।

रूपाणामानन्त्यं व्यसनस्याथ प्रदृश्यते लोके।
रक्ते नवप्रवाहो व्यसनानां सेवनेन संप्राप्यः।।३१२८।।

दुर्व्यसनं सद्व्यसनं तदिदं भेदद्वयं व्यसने।
दुर्व्यसनेभ्यः पतनं सद् व्यसने प्राप्यते मुक्तिः।।३१२९।।

विद्यायां यद् व्यसनं परमार्थे चिन्तनस्य यद् व्यसनम्।
स्वार्थत्यागे व्यसनं सद् व्यसनान्यपि तु विविधानि।।३१३०।।

मनसा चालितकायोऽपीन्द्रियसंघैरभिव्याप्तः।
वारं वारं कुरुते यद्यत् तत्तद् व्यसनमुक्तम्।।३१३१।।

स्वाभाविकविधया यन्नूनं संजायते न तद्व्यसनम्।
किन्तु भृशं प्रवृत्तिस्तत्रैवालोच्यते व्यसनम्।।३१३२।।

अस्तव्यस्तविरूपे रूपे संलोक्यते व्यसनम्।
शुभ्रे तथा स्वरूपे केषांचित् तत् विलोक्यते व्यसनम्।।३१३३।।

आशीविषाऽन्धगर्ताद्युपमा तत्र प्रदीयते कविभिः।
तत्रैवाऽमृतसदृशी दृष्टिः सद्व्यसनपक्षनिक्षिप्ता।।३१३४।।

१२१.आतंकवादः

सर्वेषां भयदाता सर्वेषां प्राणघातको नितराम्।
सर्वैर्दूरीकार्यः सदा सदाऽतङ्कवादोऽयम्।।३१३५।।

आसीद् हिरण्यकशिपू रावण आसीत् पुनर्योऽसौ।
महिषस्तारक आसीत् कंसः शिशुपाल एव वा योऽसौ।।३१३६।।

एतादृशा हि सर्वे जनकाश्चातङ्कवादानाम्।
चारित्र्यसेतुभङ्गे येषां चासीन्मतिः पूर्णा।।३१३७।।

देवा ऋषयो मनुजास्तेनैवातङ्कवादेन।
संत्रासितास्तदात्वे व्यचरन् वा शान्तिलाभार्थम्।।३१३८।।

आतङ्कजननबुद्ध्या समेधितानां परां काष्ठाम्।
यावन्नाशो न स्यान्नो तावच्छान्तिरायाति।।३१३९।।

आतङ्कजननकार्यं येषामेकः परो धर्मः।
श्वासे श्वासे तेषामतङ्कस्यैव जायते चर्चा।।३१४०।।

यदि चेत्सत्यचरित्रं शान्तिः सर्वा सुशीलसद्भावः।
सर्वत्राभिव्याप्ता संजाताऽतङ्कवादहानिः सा।।३१४१।।

सच्चारित्र्यविलोपे जागर्त्यातङ्कवादोऽयम्।
दुर्गतिकरणं पूर्णं तस्याऽस्ते मूलतत्त्वं नु।।३१४२।।

आतङ्काद् धनसंग्रहनिरताः कोट्यर्बुदेषु धनम्।
संसाध्य तत्र तत्रोद्वेजकतां द्रष्टुमीहन्ते।।३१४३।।

यत्रैव शान्तिदर्शनमथोन्नतिर्वा चरित्राणाम्।
नैते तद्विषहन्ते लोपे तस्य प्रवर्तन्ते।।३१४४।।

गोपनलीला तेषां तथाविधा जायते सुदृढ़ा।
वैनाशिकदृश्यानामनुमानेनैव सोन्नेया।।३१४५।।

यद्यपि बलवन्तो ये नो तेषां गोपनेऽभिरुचिः।
किन्तु तदाऽतङ्कानामपि नैवास्ते स्वरूपतो लाभः।।३१४६।।

अधिकाराणामेषां स्वायत्तीकरण एवैकः।
आतङ्कानां प्रमुखोद्देश्यत्वेनाऽस्ति गणनीयः।।३१४७।।

पूर्णो नृशंसभावो हत्यादीनां जघन्यकृत्यानां।
नित्यं समनुष्ठानं समवेतं दृश्यते तत्र।।३१४८।।

अपराधो वा न स्यात् नो गणनीयो गुणेषु संचारः।
आतङ्कवादमध्ये सर्वे श्रेष्ठाः सुदुर्जना गण्याः।।३१४९।।

१२२.कथाः

श्रीमद्भागवताऽख्यं दिव्यं पीयूषमास्वाद्य।
जन्तूनां संसारे वैकुण्ठस्योपलब्धिः स्यात्।।३१५०।।

मानवजीवनमसमं सर्वैः शास्त्रैः समादिष्टम्।
देवानामपि चैतत्सुदुर्लभं सर्वतः काम्यम्।।३१५१।।

का वा कारणभूता चमत्कृतिस्तावदत्रत्या।
इत्यन्वेषणविधया 'कथा प्रवाह'-स्तदुत्तरं सुलभम्।।३१५२।।

भारतवर्षे देशे जीवनसाफल्यसद्योगे।
सत्यान्नारायण इव तस्य कथेयं प्रवृत्तैव।।३१५३।।

नानाशास्त्राणामथ ये च गभीराः सुसिद्धान्ताः।
दिव्ये कथाप्रवाहे ते वै सारल्यमायान्ति।।३१५४।।

धार्मिकरहस्यभूतं यच्चाप्याध्यात्मिकं तत्त्वम्।
दिव्यकथावलिमध्ये सम्यक् तद् गुम्फितं भाति।।३१५५।।

येयं सविधेऽस्माकं गाथामन्दाकिनी वहति।
वाङ्मयशिखरे वेदे विलोकनीयः समुद्गमस्तस्याः।।३१५६।।

देवानां यज्ञानां परमर्षीणां कथा दिव्याः।
राजर्षीणां च कथा वेदेष्वेवात्र संकथिताः।।३१५७।।

तासां सत्पल्लवनं ब्राह्मणभागे विलोकनीयं स्यात्।
आरण्यकेष्वपि तथा गाथानां निर्मला दीप्तिः।।३१५८।।

उपनिषदस्ता एताः कथाप्रवाहे तरंगिता जाताः।
चेतश्चमत्कृतिकरी प्रवर्तिता तत्र वा शैली।।३१५९।।

भूमण्डलवशकरणे श्रीवेदव्यासनिर्मिता काचित्।
पौराणिकसंघटना गाथा संसारमासूते।।३१६०।।

पौराणिकेन तावद् वाङ्मयसारेण तत्सर्वम्।
सम्प्रस्तुतं पुरस्तात् यद्यत् श्रेयस्करं सुखदम्।।३१६१।।

दिव्यकथावलिरेषा यैः शब्दैः सम्यगारचिता।
ते वै शब्दाः सत्यं मानवपुण्योदयैर्लभ्याः।।३१६२।।

मानसमोहनशीलं कर्त्तव्ये प्रेरकं तावत्।
पूर्णप्रभाप्रतिष्ठा तदिदं किञ्चित् कथातत्त्वम्।।३१६३।।

दिव्यचरित्रावलिभिश्चर्चितमाभाति काननं परितः।
नवनवतापरिपुष्टं तदिदं किञ्चित् कथातत्त्वम्।।३१६४।।

नानाविधाऽवतारावलिचर्चामण्डितं नूनम्।
जगतीतलेऽनुपमतासौभाग्याधायकं तत्त्वम्।।३१६५।।

श्रीबादरायणानामनुपममेतत्प्रसादमास्वाद्यम् ।
सर्वजनवन्दनीयं दिव्यं तदिदं कथातत्त्वम्।।३१६६।।

आदिकविवाक्यसागरसुषमासाम्राज्यपरिपूर्णम् ।
वेदव्यासोल्लासितविभवं किञ्चित् कथातत्त्वम्।।३१६७।।

सारस्वतैः स्वरूपैरनुपदमभिषिक्तमाभातम्।
सत्यशिवसुन्दरं तत्पूर्णं किञ्चित् कथातत्त्वम्।।३१६८।।

सर्गप्रतिसर्गाणां वंशानामाद्यराजचरितानाम्।
देवानां चर्षीणां वर्णनमेतत्कथातत्त्वम्।।३१६९।।

आदित्यवंशवैभवभरितंचैतत्सुविस्तारे-
ष्वारचितं श्रीव्यासैर्नूनं किञ्चित् कथातत्त्वम्।।३१७०।।

नानाविधलोकानां देशानां चाऽथ कालानाम्।
व्यवहाराणां धर्माणामथवा विद्योतकं तत्त्वम्।।३१७१।।

योऽयं कथाप्रवाहश्चासृष्टेर्याति जीवनैः पूर्णः।
आशैशवात्तदस्मिन् विन्दन्त्यानन्दमेव सर्वेऽपि।।३१७२।।

योऽसौ कथाप्रवाहः संसारेष्वद्य दृश्यते विपुलः।
मानवता तेनाद्योच्चे शिखरे वै समारूढा।।३१७३।।

बाल्यादेव नितान्तं कमनीयः कोऽपि संसारः।
मानवचरित्रनिर्मितिसंचारे जागरूक एवाऽस्ते।।३१७४।।

ननु कस्तादृशपुरुषः संसारे द्रष्टुमपि शक्यः।
यस्य स्मृतौ न खचितास्तास्ता एताः कथा मधुराः।।३१७५।।

तत्र कथावाचकतां बिभ्राणा ये च विद्वांसः।
राष्ट्रीये चारित्र्ये तेषां निर्मितिरनुपमैव।।३१७६।।

तेषां वाणी मधुरा तेषां चाऽस्ते गभीरपण्डित्यम्।
तेषामस्ति समस्तं जीवनमर्पितमहोभावे।।३१७७।।

दिव्यचरित्रावलिरपि सा सा नूनं विलासमायाति।
शुभ्रे कथाप्रवाहे संचारयतेऽथ रोमाञ्चान्।।३१७८।।

निश्चिनुते सा सर्वा श्रोतृणां मण्डली विपुला।
स्वीये जीवनकाले सच्चारित्र्यं स्वयं धर्तुम्।।३१७९।।

नाना गभीरतत्वं क्रोडीकुर्वन्त्य एवैताः।
नाना कौशलरचिता देशे सर्वत्र संगाथाः।।३१८०।।

दिव्यपुरातनविद्याप्रतीकसंभारसंरचिताः ।
आस्वाद्यतां प्रयाता एतास्तास्तास्तु संचिता गाथाः।।३१८१।।

दार्शनिकान् सुविचारान् प्रकाशयन्त्यथ च विविधास्ताः।
नवशेमुषीप्रदिष्टा प्राचीना नव्यसंगाथाः।।३१८२।।

प्राचीना अप्येता नित्यनवीना विलोकिता विद्भिः।
वारं वारं कथिता मथितस्वान्ताश्च संगाथाः।।३१८३।।

संसारे घटनानां क्षणिकं यद् विकसितं रूपम्।
तत्र स्थायित्वानां समर्पकं तत् कथातत्त्वम्।।३१८४।।

विद्याविलासलसितं विद्योतितवेदवेदाङ्गम्।
नवतासंगतमास्ते दिव्यं दिव्यं कथातत्त्वम्।।३१८५।।

पुनरुक्तिर्यत्र गुणः पूर्णत्वं तेन चायातम्।
पुनरुक्तीनां भूषणकरणं चैतत्कथातत्त्वम्।।३१८६।।

दिव्यसमर्पणजुष्टं पुष्टं चारित्र्यगाथाभिः।
संश्लेषितं तदेतच्चित्रं नूनं कथातत्त्वम्।।३१८७।।

नाना रूपैः समतासम्प्राप्तिः सम्प्रजातैव।
नवनवनवता योगो विपुलः संजायते कथातत्त्वे।।३१८८।।

संसारस्य तदेकं तत्त्वं यत् कृष्णरूपं वा।
तस्य सुपूजनभावोल्लसितं चाऽस्ते कथातत्त्वम्।।३१८९।।

अधुना मधुकरविलसितकुसुमावलिराजिते कथाकुञ्जे।
पुञ्जीभूतं तदिदं भाग्यं सर्वं वरेण्यानाम्।।३१९०।।

शिवसुन्दरसद्रूपैः प्रगुणितमास्ते निवेदितं सम्यक्।
नित्यनवपूजनानां समर्पकं तत्कथातत्त्वम्।।३१९१।।

रुद्राणामथ तावत् सत्त्वानामादितत्त्वानाम्।
विश्लेषकं पुरस्तादालोचकतामुपागतं तत्त्वम्।।३१९२।।

व्यासासने स्थितानां नित्यं संस्फूर्तिदायकं यद्वा।
तेषां वाणीमध्ये विराजितं चिन्मयं तत्वम्।।३१९३।।

गणनाऽतीता जनता यत्रैषा स्फूर्तिमायाता।
जनजनमानसमध्ये नित्यं संस्फूर्तिदायकं तत्त्वम्।।३१९४।।

आकाशे संस्थानां पातालेषु स्थितानां वा।
सांसारिककोणेषु प्रतिष्ठितानां प्रमापकं तत्वम्।।३१९५।।

एषा कथा यदैवाऽमृतमयधारामयी दिव्या।
प्रकटितवैभवपूर्णा परिपीता जन्म सफलं तत्।।३१९६।।

काशीप्रयागमथुराकाञ्ची चावन्तिका दिव्या।
सप्तपुरीणां गाथाः संमिलिताः सत्कथारूपे।।३१९७।।

महनीया चैवेयं कथा समस्ते प्रवाहेऽस्मिन्।
श्रीकृष्णचरितचर्चाऽमृतमवतीर्णं पुरस्तात् यत्।।३१९८।।

विद्युद्विलासपूर्णा पूर्णा चासौ विलक्षणैर्दृश्यैः।
पूर्णा रसैश्च सर्वैःकथा मुकुन्दस्य संपूर्णा।।३१९९।।

पूर्णात्पूर्णमुदीर्णं पुनरप्यवशिष्टमेव संपूर्णम्।
परिपूर्णा सृष्टिरियं कथा तदीया च पूर्णेयम्।।३२००।।

वर्णानामवलिरियं संपूर्णा सत्कथाऽलापैः।
नित्यनवभावनाभिर्भरिता सैषा कथा दिव्या।।३२०१।।

कथिता कथिता कथिता संस्कारे परिणता सैषा।
काचित्कथावलिर्वा दिव्याऽदर्शैर्विभूतिमातनुते।।३२०२।।

औदार्यैर्माधुर्यैरापूरितमथ च हृद्यतरम्।
निन्द्यनिषेधनियुक्तं कथितोन्मथितं कथातत्त्वम्।।३२०३।।

संपूजिते समस्ते भूवलयेऽनन्तरूपेषु।
जनजनमानसमध्ये तरङ्गितं सत्कथातत्त्वम्।।३२०४।।

निखिलाऽद्यन्तविहीनं नवनवनवतानिकामनीरूपम्।
सर्वविधालंकारैरलंकृतं तत्कथातत्त्वम्।।३२०५।।

अष्टादशसंख्याकैर्महापुराणैः समेधितं चैतत्।
श्रीबादरायणानां वाचां विभवैर्विलासितं तत्त्वम्।।३२०६।।

शृङ्गारवीरकरुणाद्भुतहास्यानां तथा च रौद्राणाम्।
वीभत्सवत्सलानां शान्तरसस्य च समर्पकं तत्त्वम्।।३२०७।।

नाना भयानकाद्यैरप्यापूरितकलेवरं चैतत्।
रसपरिपोषप्रवणं जन्मनि मिलितं कथातत्त्वम्।।३२०८।।

सृष्टेर्वर्णनशीलं मत्स्याद्यवतारवर्णने निपुणम्।
परपुरुषसंकथानां दिव्यं विस्तारकं तत्त्वम्।।३२०९।।

सर्वानुग्रहभरितं बालानां बोधकं रुचिरम्।
युवकानां वृद्धानां प्रेरकरूपं कथातत्त्वम्।।३२१०।।

यद्यद् भवति सुलिखितं तस्य तु संज्ञाऽस्ति 'साहित्यम्'।
यद्यदलिखिलं कथितं धन्या सैषा कथा सर्वा।।३२११।।

कालाऽन्तरे च सैषाकथैव लिखिता भवति साहित्यम्।
कालप्रवाहरूपे जाता काचित् परिष्कृतिस्तत्र।।३२१२।।

क्षणवर्धनसंशीला पुनरपि कथिता कथा सुविपुलैव।
यद्यत्प्रोक्तमलिखितं सा सा संजायते कथैव ननु।।३२१३।।

श्रुतिरपि पूर्वं कथने संश्रुतभावेषु संगता चासीत्।
सा वै यदैव लिखिता तज्जातं वैदिकं सुसाहित्यम्।।३२१४।।

एतत्तत्त्वविवेचनवेलायां जायते स्पष्टम्।
साहित्यादतिगुणिता लोके सेयं कथा प्रथिता।।३२१५।।

काचिद् घटना याऽसौ कथाप्रवाहे समाराध्या।
तत्प्रकथनवेलायां नाना तत्त्वानि मिलितानि।।३२१६।।

लोकाचार-विचार-व्यवहारणां सुगुम्फनं तत्र।
संचारिणाञ्च नानाविधविषयाणां समागमस्तत्र।।३२१७।।

रसपरिषोषकमानसवृत्तीनां संगतिस्तत्र।
सामाजिकपरिवर्तनजागर्तीनां विलोकनं तत्र।।३२१८।।

बाल्ये शिक्षैवेयं वृद्धसकाशात् श्रुता गाथा।
कथमपि शिक्षाऽभावे कथैव शिक्षात्मिका सरणिः।।३२१९।।

शिक्षाकथाप्रथानां नायं साधारणो महिमा।
प्रायः समीक्षकाः स्युश्चकिताः सर्वे कथासमीक्षायाम्।।३२२०।।

परमेश्वरेणमहितं यद्रूपं वा कथा ततोऽप्यधिका।
'अस्तीश्वर' इति तावत्कथया जानीमहे तत्त्वम्।।३२२१।।

परम्परायां प्रचलितवैभवपूर्णं कथा-तत्त्वम्।
नवनवबुद्धिविलासैरारचितं चित्रमिव भाति।।३२२२।।

आबालवृद्धमहिलानिरक्षरानपि सुबोधयते।
जीवननूतनतायां प्रेरकरूपं कथातत्त्वम्।।३२२३।।

सर्वापीयं सृष्टिर्नवैव विद्योतते कथाकाले।
सात्विकविलासयुक्ता श्रोतृणां सा चमत्कृतिर्जाता।।३२२४।।

वाचामधिदेवी सा वीणापाणिः सरस्वती माता।
सिद्धकथावाचकमुखमंचे नृत्यं समातनुते।।३२२५।।

चित्रलिखित इव दृष्टो विपुलो लोकः कथाकाले।
हर्षाणामपि वर्षा दृष्टा निखिलाः कथामध्ये।।३२२६।।

जन्मान्मरणं यावत् सोश्रूयन्ते कथा दिव्याः।
स्वयमपि निर्मीयन्ते नानारूपाश्च संगाथाः।।३२२७।।

कमनीये लोकेऽस्मिन् दिव्यकथानां परीवारः।
नानारूपे दृश्यो ग्राह्यः स्वीकार्य एव वा सर्वैः।।३२२८।।

दिव्ये कथास्वरूपे किं किं नो तत्त्वमायाति।
यच्चानिवार्यरूपं समुन्नतौ सर्वमत्रस्थम्।।३२२९।।

नव्ये पुरातने वा कस्मिन्नपि रूपसाम्राज्ये।
संप्रस्तुतास्तु गाथाः सम्यक् सम्प्रेरणां सुवते।।३२३०।।

अहमहमिकयाऽद्यत्वे श्रोतुं गाथां प्रवर्तते जनता।
जनतायाः सुस्वास्थ्यं विलोकनीयं कथाप्रवाहेऽस्मिन्।।३२३१।।

ये वा व्यासाऽसन्दीसंस्थितविभवैर्विभाविताऽकृतयः।
विद्वांसश्चाचार्याः स्वानुभवैर्भासिताऽत्मानः।।३२३२।।

कामं धनागमानां महती वाञ्छा भवेत्तेषाम्।
कथाप्रकथने तेन प्रवृत्तिमयता विलोक्यतां कामम्।।३२३३।।

दोषो नो गणनीयः सैष विषमतासमायुक्तः।
नारायणस्य कथया लक्ष्मीर्नो दूरतस्तिष्ठेत्।।३२३४।।

तस्मात् कथाकलायां निष्णातानां परा सम्पत्।
लक्ष्मीरूपेणैषा समुपातिष्ठति वरेण्यानाम्।।३२३५।।

यस्मिन् कस्मिन्नपि वा मनोनिवेशेन रुचिरेयम्।
परतत्त्वस्य विनिश्चयकथाप्रथा सिद्धिदात्री स्यात्।।३२३६।।

द्वीपाद्द्वीपं लोकाल्लोकान्तरमाभ्रमणशीला।
मायामिश्रितकाया जायेवेयं कथा रुचिरा।।३२३७।।

कठिना क्वचिन्नितान्तं कोमलतालास्यवैभवैर्लसिता।
क्रुद्धा क्वचिन्नितान्तं मैत्रीभावं गता कथा रुचिरा।।३२३८।।

प्रभुसम्मिताऽपि दृष्टा दृष्टैवैषा च मित्रसंमितगा।
रसवैभवैर्विलसिता कान्तारूपेषु संगता गाथा।।३२३९।।

नानापुराणमध्ये नानाभावैर्विचित्राभैः।
संचित्रिता कथेयं साक्षात्परदेवता दृश्या।।३२४०।।

श्रद्धावर्धनशीला श्रद्धासम्पोषणे दक्षा।
श्रद्धोत्पादनकार्येऽप्येषा नो दृश्यते विमुखा।।३२४१।।

प्रथमे पुरुषार्थे या धर्मे रुचिरा कथा चलिता।
तत्रोदाहरणानां जनुषो धन्यत्वमायातम्।।३२४२।।

अर्थमहत्वप्रकटनसमुपार्जनसेवनादिविषयाणाम् ।
सूक्ष्मनिरीक्षणविधया कथासु संदृश्यते शैली।।३२४३।।

मानसिकदिव्यकल्पनसाम्राज्यानां विलासिता दीप्तिः।
कामकलाकलनानां विस्फूर्तिः सत्कथासु विपुलासु।।३२४४।।

चरमे पुरुषार्थे वा मोक्षे या धीर्मनोहरा जाता।
सा वै कथासु कथिता बन्धोच्छेदाय सन्नद्धा।।३२४५।।

वर्णाश्रमे विभक्ता येयं सामाजिकी धारा।
निखिले कथाप्रवाहे सा सर्वत्राप्यनुस्यूता।।३२४६।।

नतमां घृणा पृथक्त्वं निम्नोन्नततासमाचाराः।
वर्णाश्रमव्यवस्थावशगाः कुत्रापि संदृश्याः।।३२४७।।

एते खलु ये दोषास्ते वै संसर्गजन्याः स्युः।
कालप्रवाहयाता नो तेषां संस्थितिर्मूले।।३२४८।।

अन्या अपि या नूनं सामाजिक्यो व्यवस्थाद्याः।
अद्यत्वे समतायां प्रोद्घुष्टाः किं न दूषणैर्युक्ताः?।।३२४९।।

विपुलो विराट् समाजो नैकार्बुदसंख्यया घटितः।
भूतभविष्यत्कालप्रवाहमालासमावृतो दृष्टः।।३२५०।।

तस्य नियमनं नो वा काचित् साधारणी प्रज्ञा।
कार्यं कुरुते सुदृढा चिन्तनशैली हि तत्राऽस्ते।।३२५१।।

तस्मात् कथाप्रसंगे वर्णाश्रमधर्ममर्यादा।
जातेयं मा भूयाद् केषांचिद् वेदना महती।।३२५२।।

इतरेऽनन्ता विषयाः कालेनालोचितास्ते ते।
प्राचीनकथामध्ये समागता नैव विक्षोभ्याः।।३२५३।।

१२३.काव्यकारणम्

शक्तिस्तथा निपुणता पुनरप्यभ्यास इत्येते।
एकीभूय नितान्तं काव्यानां कारणीभूताः।।३२५४।।

एतेषां कारणता तृणारणिमणिन्यायतो नैव।
सा दण्डचक्रचीवरन्यायेनैवेष्यते काव्ये।।३२५५।।

कार्यस्यैकस्य यदा बहुकारणता प्रजायते नूनम्।
तत्र द्वयी स्थितिर्वा भवति नितान्तं विचारार्हा।।३२५६।।

बहवश्चाथ मिलित्वा कार्यस्योत्पादनं कुर्युः।
घटरूपे कार्यैके दण्डो चक्रश्च चीवरो हेतुः।।३२५७।।

कारणताऽनेकत्र स्वातन्त्र्येण स्थिता यत्र।
एकैकमपि तु कारणमास्ते कार्याय पर्याप्तम्।।३२५८।।

कार्योऽग्निस्तस्य यदोत्पत्तिरभीष्टा तदा तृणं दग्ध्वा।
मणिमथवा तु गृहीत्वा काष्ठे मन्थनमथापि वा कृत्वा।।३२५९।।

काव्यं प्रति कारणता शक्तौ चाऽभ्यासनैपुण्ये।
एकीभूयैवेष्टा दण्डादीनां घटस्येव।।३२६०।।

शक्तिः सा या काव्ये प्रथमं कारणमिहाम्नातम्।
तां तु विना नहि काव्यं प्रसरेत्प्रसृतं तु समुपहसनीयम्।।३२६१।।

केयं शक्तिः कथिता तदुत्तरं स्यात्तु शिष्टानाम्।
काव्यानुकूलशब्दाऽर्थोपस्थितिरेव सा शक्तिः।।३२६२।।

काव्यं भावचरित्रं सौन्दर्यं यत्र संस्फुरति।
शब्दार्थमयी शय्या यस्येयं भावजातस्य।।३२६३।।

भावानां संसारे विमले शब्दा न सन्ति सुस्पष्टाः।
भावानां सा धारा सततं प्रवहतितरां विनायासम्।।३२६४।।

मध्यमपदाभिधेया पश्यन्ती वाऽथ तत्रेष्टा।
अन्ये ते स्युः शब्दा न स्यूता वैखरीरूपाः।।३२६५।।

सेयं धारा सततं सर्वत्रैवाथ चेतने जगति।
प्रवहति नित्यं नो वा तस्याः किञ्चिद् बहिर्भूतम्।।३२६६।।

स्थूले शब्दार्थमये संसारे ये प्रवीणाः स्युः।
भावमयस्य तु लोकस्यैते त्ववतारणे दक्षाः।।३२६७।।

कोशेष्वथ ये शब्दाः येष्वर्थेष्वत्र संदृष्टाः।
काव्ये त एव शब्दा विलक्षणेष्वर्थसार्थेषु।।३२६८।।

ते ननु लक्ष्यार्था वा व्यंग्यार्था वाऽनुमेया वा।
तेषां समर्पकत्वं शक्तिर्नामेष्यते वक्तुम्।।३२६९।।

वाच्यार्थस्य तु केवलमाचारे तत्पुराणं स्यात्।
बुद्धिगतं तत्सर्वं हृद्देशे संस्थितं काव्यम्।।३२७०।।

अभिधावृत्तिरपीयं शक्तिः कथिता प्रसंगेषु।
कारणपरिगणनायां सा शक्तिर्नात्र संग्राह्या।।३२७१।।

शब्दार्थयोरुपस्थितिरिहसंकथिता तु काव्येऽस्मिन्।
सूक्ष्मतमैरपि भेदैः शब्दार्था यत्र दृष्टाः स्युः।।३२७२।।

वाचकवाच्यविवेके यदि विकलः कोऽपि किं विरचयेत्सः।
रचनामात्रे विकलः काव्यं तस्मात्सुदूरतरम्।।३२७३।।

रचनान्तरेण भिन्नं काव्यं स्वीकार्यमेव स्यात्।
तत्र च नूनं शक्तिः काऽपि विचित्रैव वक्तव्या।।३२७४।।

शब्दार्थोपस्थितिरिति या शक्तिः कथ्यते हेतुः।
काव्यानुकूलतापि तु विशेषणीभूय जागर्ति।।३२७५।।

केयं स्थितिरिति सद्यो या जिज्ञासा प्रजागर्ति।
तत्प्रशमनाय मन्ये त्रिविधोऽप्यर्थस्य सङ्घातः।।३२७६।।

स्फुरतितरां चेतसि चेत् तद्बोधकशब्दसार्थोऽपि।
सा स्थितिरस्ति समस्ता काव्यानां कारणीभूता।।३२७७।।

केवलकोशज्ञानं व्याकरणज्ञानमेवापि।
वाचकवाच्ये निरतं नितरां काव्यस्य हेतुः स्यात्।।३२७८।।

येयं तथा निपुणता दिष्टा काव्यस्य कारणीभूता।
तस्यां बहु वक्तव्यं स्मर्तव्यं वाऽस्ति सन्धार्यम्।।३२७९।।

लोकावेक्षणतः सा शास्त्राणां चिन्तनेनापि।
काव्यानामास्वादैर्नूनं सम्प्राप्यते कविभिः।।३२८०।।

नैपुण्यं लोकानां जडचेतनतामयानां यत्।
वृत्तस्य चित्ररूपस्यालोकनपरिचयाज्जातम्।।३२८१।।

तद्वै निर्मलरूपं काव्योत्पत्तौ तु कारणीभूतम्।
लोकानां व्यवहारज्ञानाऽभावे कुतः काव्यम्।।३२८२।।

दर्पणमथ साहित्यं भवति समाजस्य या प्रसिद्धिः सा।
लोकानां व्यवहारे नैपुण्यत्वस्य कारणाधीना।।३२८३।।

लोकानां व्यवहारे जडचेतनता परिव्याप्ते।
यद्यद्वर्णनमुचितं सैषा काव्ये परोपनिषद्।।३२८४।।

लोकावेक्षणनिपुणः कविर्यदा वर्णनं तनुते।
लोकाय मानसेऽसौ तदा स्वयं चित्रितो भवति।।३२८५।।

अद्य तु केवलमिदमप्याधारीकृत्य रचनासु।
धारा कापि प्रवृत्ताऽन्दोलनरूपेण जागर्ति।।३२८६।।

कान्तासम्मितताया उपदेशे यत्प्रयोजनमनूक्तम्।
तत्तु सहैवालोचनमेतादृक् सम्प्रपूरयति।।३२८७।।

यदि कविरेव न लोके सूक्ष्मतरे दृश्यजाते वा।
प्रविशति तद्वै काव्यं नितरां संप्रेषकं भवति।।३२८८।।

लोकचरित्रावेक्षणमात्रं नहि काव्यकारणं भूयात्।
अपि तु स्वीयाऽनुभवे सर्वस्यैतस्य साफल्यम्।।३२८९।।

पूर्वं लोको नासीत्तथा विचित्रो यथाऽद्यत्वे।
विज्ञानस्य नितान्तं वैशिष्ट्यं तत्र जागर्ति।।३२९०।।

तत्रापि च मानसिकं विज्ञानं ख्यातिमापन्नम्।
रचनाकाले कविभिर्नूनं सर्वत्र चाद्रियते।।३२९१।।

लोकः पूर्वं घटितो वर्णाश्रमनामिकासु संस्थासु।
राजा चासीन्नियतो प्रतिराज्यं मन्त्रिणश्चैव।।३२९२।।

वैदेशिकयुद्धानामासीत्तत्रापि विप्लवो विपुलः।
रोमाञ्चकघटनानामियमासीत्प्रेरणाभूमिः ।।३२९३।।

भारतवर्षे निखिले तदनु समासीद् ब्रिटेनसाम्राज्यम्।
सर्वा समृद्धिरतुला पारं गमिता समुद्रस्य।।३२९४।।

देशोऽयं दारिद्र्ये निमज्जितो गौरदेशीयैः।
तैः सह संघर्षे वा स्वातन्त्र्यं चापि सम्प्राप्तम्।३२९५।।

कालेऽस्मिन् विज्ञानं यन्त्रमयं पश्चिमे समुत्पन्नम्।
निखिलं विश्वं स्वीयैरथ यानैर्यन्त्रसार्थैश्च।।३२९६।।

परमसमीपं कुरुते नो दूरे किञ्चिदत्रास्ति।
धनवैपुल्यं तस्य च वैकल्यं दूरतां कुरुते।।३२९७।।

ये वै धनिनो लोकास्तेषां वा करगतं सर्वम्।
ये लोका धनविकलास्तेऽद्य तु नहि लाभसंयुक्ताः।।३२९८।।

इयमार्थिकी विषमता व्याप्ता लोके यदाश्रयेणैव।
काव्यं प्रेरितमास्ते कतिपयदशकेभ्य एवेदम्।।३२९९।।

यत्र तदेतत्सर्वं लोके वृत्तं सुचर्चितं जातम्।
तद्वै जीवितकाव्यं भिन्नं निश्चेतनमकाव्यम्।।३३००।।

सामाजिकसम्बन्धा ये चाप्यादर्शसंस्थिता पूर्वम्।
तेऽद्य यथार्थे दृष्टा विपरीता एव सर्वेऽपि।।३३०१।।

ईदृशलोकाऽवेक्षणसंयुक्तं चैव वा काव्यम्।
संकल्पितं यदि तदा सद्यस्तत् सुप्रसिद्धं स्यात्।।३३०२।।

नैपुण्यं शास्त्राणामवेक्षणेनापि चासाद्यम्।
शास्त्राण्यपि चाद्यत्वे नूत्नान्येव प्रभावयुक्तानि।।३३०३।।

इतिहासोऽर्थे शास्त्रं विख्यातं राजनीतिमयशास्त्रम्।
सामाजिकमपि शास्त्रं पुरातनानां पुराशास्त्रम्।।३३०४।।

विज्ञानस्य तु नानाधाराणां वा पृथक्-पृथक् शास्त्रम्।
सर्वं चैतच्छास्त्रं काले काले समायोज्यम्।।३३०५।।

प्राचीनानि तु शास्त्राण्यद्याभ्यादेशभूतानि।
तान्याधारीकृत्य त्वेतान्यद्यैव लसितानि।।३३०६।।

काव्याद्यवेक्षणेष्वपि नैपुण्यं काव्यकारणीभूतम्।
तत्तु समन्ताल्लभ्यं विभिन्नपत्रेषु पुस्तकेष्वपि च।।३३०७।।

अभ्यासोऽपि च योऽयं प्रथितः काव्यज्ञशिक्षया कथितः।
तस्योपयोगितायां नास्ति विसंवादलेशोऽपि।।३३०८।।

रचनाकर्मारम्भे यद्वा तद्वा कविर्लिखति।
प्रौढानां च समीपे स्थित्वा तन्मार्जनं कुरुते।।३३०९।।

आलोचना च विविधा गोष्ठीरूपेऽद्य या भवति।
तत्राऽप्यभ्यासोऽयं दृढतां संयाति कविवरेण्यानाम् ।।३३१०।।

पूर्वं व्याख्यालेखनकर्मण्यभ्यास आसाद्यः।
अर्थानां शब्दानां वैपुल्यं तत्र करगतं जातम्।।३३११।।

आधुनिके काले सा पद्धतिरपि नूतने रूपे।
नानानिबन्धरचने विलोक्यते विपुलतां प्राप्ता।।३३१२।।

अद्य तु व्याख्यालेखनमास्ते वा द्वितीयकोटिगतम्।
काव्यानामध्ययनं स्वातन्त्र्येण प्रथमकोटौ स्यात्।।३३१३।।

अध्ययनलिखनमेतत् काव्यालंकारदृष्ट्या वा।
रसदृष्ट्या वा संस्कृतिगवेषणादृष्टिरथवा स्यात्।।३३१४।।

नानारूपाऽध्ययनं काव्यानां जायतेऽद्यत्वे।
ज्ञाने गाम्भीर्यं स्यादेतेनाध्ययनजातेन।।३३१५।।

काव्येभ्यः शिक्षासंप्राप्या तावदेतैर्हि।
रचयित्वा वा काव्यं काव्यज्ञानां पुरो निधेयं स्यात् ।।३३१६।।

नूतनकाव्यानां या कापि समालोचना क्रियते।
तेनाऽपि त्वभ्यासे सौकर्यं कविवरस्यैव।।३३१७।।

त्रितयं समुदितमेतत् कारणमास्तेऽथ काव्यरचनासु।
मम्मटमतेन तदिदं वर्णनमास्ते समारब्धम्।।३३१८।।

पण्डितराजस्त्वेकां प्रतिभां तत्कारणत्वेन।
कथयति तस्या कारणमास्तां व्युत्पत्तिरभ्यासः।।३३१९।।

नैपुण्यं व्युत्पत्तिः शक्तिः प्रतिभा तथा कथिता।
व्युत्पत्तिश्चाऽभ्यासप्रतिभायां कारणीभूतौ।।३३२०।।

काव्यं प्रति यत् साक्षात् कारणमास्तेऽथ सा प्रतिभा।
वक्तुमभीष्टस्योक्तौ शब्दार्थानामुपस्थितिः सा तु।।३३२१।।

तस्यावाप्तिर्दैवाराधनो-देवता तुष्टौ।
वरदानेनापि परा दृष्टा सर्वाऽनिवारितप्रसरा।।३३२२।।

तस्याः परमवरोधो विरोधयोगेन संदृष्टः।
अथ तद् विरोधनिगमे पुनरपि तस्याः समुन्मेषः।।३३२३।।

प्रतिबन्धकविरहोऽपि च सर्वत्रैवास्ति कारणीभूतः।
प्रतिबन्धकसद्भावे निखिलं कारणमकिञ्चित् स्यात्।।३३२४।।

प्रतिभा कारणभूतावास्तां व्युत्पत्तिरभ्यासः।
संस्कारोऽपि च नूनं जन्मनि-जन्मनि सुसंसिद्धः।।३३२५।।

१२४.सौन्दर्यविवरणम्

सौन्दर्यानुभवो ननु सुन्दरनियतेरनन्तरूपाणाम्।
अनुभवसुखस्य नूनं वितरणदीक्षासमुन्मेषः।।३३२६।।

सुखमानवसंसारे यथा सुखं लभ्यते यया नित्यम्।
तस्य सुखस्य विलासः सुतरामन्येष्वपि समन्तात् स्यात्।३३२७।।

सेयमभीप्सा सुकवेः काव्ये कारणमयीं भित्तिम्।
निर्माति नूनमसमा यत्रास्तेऽजस्रधाराऽपि।।३३२८।।

स्वीयेष्टदेवकरुणा सर्वेष्टान्येषु संप्रसरेत्।
सैषा काऽपि मनीषा स्तोत्रामृतनिझरे हेतुः।।३३२९।।

जीवनजटिलसमस्या स्वीयं चान्तं यथाऽत्र पश्येयुः।
ते ते नूनमुपायाः कान्तासम्मिततया देयाः।।३३३०।।

अनुभवसम्मर्दोऽयं कविहृदये यः प्रजागर्ति।
सोऽपि च कारणभूतो नानाकाव्यात्मनिर्माणे।।३३३१।।

अभिनवविचारसरणिर्यदा कवेर्मानसे स्फुरति।
लाभो भवतु नितान्तं तस्याः सर्वेऽभ्य एवाऽसौ।।३३३२।।

काव्यात्मिकां सरणिमथ क्रोडीकृत्यैव सा रचना।
निखिलं सहृदयवर्गं चमत्कृतं सद्य आतनुते।।३३३३।।

एतत्सर्वं प्रतिभा प्रभाप्रभावे सुसंनिहितम्।
तेन प्रतिभा काव्ये कारणमिति नास्ति सन्देहः।।३३३४।।

१२५.तन्त्रशास्त्रे प्रतिभादर्शनम्

प्रतिभापदार्थचित्रणवैशद्ये तन्त्रशास्त्रस्य।
विवरणमस्ति महीयो गुरुरूपं तत्र विन्दुनादाद्यम्।।३३३५।।

शक्तिर्निपुणताऽभ्यास-त्रितये कारणतयाऽख्याते।
नो वा कश्चन भेदः कथनीयो वाऽनुभवसिद्धः।।३३३६।।

शक्तिः प्रतिभारूपा तत्कारणता तथाऽग्रिमे द्वितये।
समुदितमेतत्तु सदा काव्ये कारणभीष्टं नः।।३३३७।।

नूनं तदा विरोधः सम्प्रसरेद् गणनवेलायाम्।
स्वातन्त्र्येणैवैते हेतव इति व्याकृता चेत्स्युः।।३३३८।।

काव्यस्य कारणं यद् वर्णितमस्त्यार्यवर्यैर्वा।
काव्यप्रवृत्तिभाजां शिक्षणमेतेन विज्ञेयम्।।३३३९।।

कार्यं सम्पादयितुं कारणमादेयमेव स्यात्।
वह्निं प्राप्तुं नियतं शलाकिका गृह्यते सद्यः।।३३४०।।

काव्यं यदि रचनीयं तस्मै प्रतिभा समादेया।
तां चादातुं नियतं नैपुण्यं चैव संग्राह्यम्।।३३४१।।

तत्राऽभ्यासः सुतरां स्वीकार्यः कार्यसिद्ध्यर्थम्।
सेयं सर्वोपनिषत् स्वीकार्या रम्यसंसारे।।३३४२।।

तेनैव काव्यधारा प्रवाहिता स्यादसंरुद्धा।
पुनः पुनर्या वृत्तिः सैवाऽभ्यासस्य रूपमास्थेयम्।।३३४३।।

लोकचरित्राऽध्ययने सेवायाः सावकाशत्वम्।
दूरीकर्तुमशक्यं प्रत्यक्षं तत्र निखिलं स्यात्।।३३४४।।

कारणसामग्रीयं विपुलतरा जायते यस्मात्।
तस्माद् भारः सुकवेः शिरसि महीयान् समायाति।।३३४५।।

कारणभेदयुगं यदुपादाननिमित्तभेदतो दृष्टम्।
त्रितयं तत्रैतद्वोपादानं कारणं भवति।।३३४६।।

दण्डादयो घटादौ नोपादाना निमित्तता तेषाम्।
यदुदाहरणमुपात्तं तन्मिलितत्त्वे तु केवलं ग्राह्यम्।।३३४७।।

लोकस्य तु रूपाणामानन्त्यं चास्ति प्रत्यक्षम्।
तत्र च परिवर्तनमपि प्रत्यक्षं दृश्यमेवैतत्।।३३४८।।

युगे युगे लोकोऽयं स्थावरजङ्गम-मयोऽन्य एव स्यात्।
तत्रेक्षणे निपुणता नो सामान्या विना क्लेशम्।।३३४९।।

तत्राप्यद्भुतरूपं समाजसार्थस्य दृश्यते परितः।
विविधास्तत्र समस्याः समये समये समुद्भूताः।।३३५०।।

तासां सूक्ष्मसमीक्षा समये समये विधेयैव।
नैपुण्यं लोकानामवेक्षणे वा तदैव स्यात्।।३३५१।।

एतन्नितरां सोऽयं समाजसूक्ष्मेक्षणे निपुणः।
कविरेव काव्यसृष्टौ निपुणः संजायते शश्वत्।।३३५२।।

लोको यद्यपि स्थावरजंगमरूपः समुद्घुष्टः।
प्रकृतेर्नवा विलासा, कविताया रम्यशृंगाराः।।३३५३।।

तेषां सर्वो भावः प्रभावशीलो मनोमये जगति।
अत एव लोकवीक्षणमेतन्मानवचरित्राणाम्।।३३५४।।

यदि केषामपि शक्तिर्नैवास्ते सुप्रसिद्धभाषासु।
वक्तुं वा लिखितुं वा, ते रचयन्ति स्वभाषायाम्।।३३५५।।

बह्व्यस्तादृशरचना, नो लिख्यन्ते तु कुत्रापि।
कण्ठस्थीकृतरूपा, विलासमायान्ति माधुर्ये।।३३५६।।

एतद् विपुलं रूपं, काव्यानां भवति विख्यातम्।
शक्तिं स्वीयां रमयत्यभ्यासे वा सदैव कविः।।३३५७।।

कवितां वनितां कोमलकलाकलापैः समुल्लसिताम्।
आराधयितुं साधनसम्पत्तिर्दर्शिता सेयम्।।३३५८।।

इदमतिशयरमणीयं, काव्यामृतमादरात् पिबतः।
पुरुषस्य तु सौभाग्यं, शक्रो वा किं विजानीयात् ।।३३५९।।

१२६.शोधः

परमनिगूढं तत्त्वं स्पष्टं कुरुते परैर्यत्नैः।
कालात् पुरातनादेवाऽचार्यैरादृतः शोधः।।३३६०।।

टीकाभाष्यविरचनेष्वाचार्यैर्यः समादृतः पूर्वम्।
शब्देष्वर्थेष्वपि वा सर्वैरावश्यकः शोधः।।३३६१।।

वाग्व्यवहारवशीकृत लोकत्रयसंविधानानाम्।
कविवर्याणां रचनावलिमध्ये दीप्यते शोधः।।३३६२।।

मलिनेऽस्मिन् परिवेशे निस्तेजं जायते ज्योतिः।
मालिन्यमपाकर्तुं विज्ञैराराध्यते शोधः।।३३६३।।

वैज्ञानिकविद्यानां यन्त्राधारे प्रवर्तमानानाम्।
नानापदार्थरचना रहस्यमुद्भावयति शोधः।।३३६४।।

अनुभवसंवलितानां शुभ्रसफलता विवरणानाम्।
मार्गोद्घाटननिपुणो विश्वस्मिम् राजते शोधः।।३३६५।।

विस्मारयति नितान्तं परिवेशं सेवमानोऽसौ।
जीवननवसाफल्यं करतलगतमादिशति शोधः।।३३६६।।

मानवसमाजमध्ये विद्यन्ते ये चमत्काराः।
सर्वेषामपि तेषां नूनं निष्पादकः शोधः।।३३६७।।

कालान्धकारपटलीतिरोहितं यद् विनिर्मलं सत्यम्।
तत्रापीङ्गितकरणे सामर्थ्यं धारयति शोधः।।३३६८।।

लघुतममपि वा विषयं क्रोडीकृत्य प्रवर्तमानोऽसौ।
सुरसामुखस्थमारुतिसादृश्यं धारयति शोधः।।३३६९।।

शल्यक्रियासु निपुणो द्राक्तर इव छेदयति सर्वम्।
सर्वं पृथक्-पृथक् संस्कुरुते सम्यक् प्रभावितः शोधः।।३३७०।।

कारणशून्यानां यो विश्वासानां विलोपको नितराम्।
आन्ध्यावृतं समाजं प्रकाशपुञ्जं निदेशयति शोधः।।३३७१।।

अद्यावधि यदकाट्यं प्रतिष्ठितं सिद्धवद् बुद्धौ।
छेदयते तत्सर्वं सन्देहोद्भावकः शोधः।।३३७२।।

यः स्वीकृतैः प्रमाणैः परतन्त्रश्चिरनवीनत्वम्।
प्राचामाचामयते कायाकल्पप्रवर्तकः शोधः।।३३७३।।

समुपेक्षिततागर्ते निपतितमपि यः पदार्थजातं तम्।
अहमहमिकया दृश्यं संग्राह्यं चादिशति शोधः।।३३७४।।

प्रतिभाप्रकर्षलसितो नानासंसाधनैर्दीप्तः।
विज्ञसमाजसमर्पितसञ्चारो दीप्यते शोधः।।३३७५।।

सम्पूर्णं जीवनमपि यो लघुतमतां समानयति।
शेषयति कर्मनिखिलं पर्यन्ते वीक्षितः शोधः।।३३७६।।

नैवादिर्नैवान्तो नो वा मध्योऽस्य निगदितुं शक्यः।
सर्वानपि सिद्धान्तान् पूर्वेपक्षे विधारयति शोधः।।३३७७।।

सर्वेषां विषयाणां सर्वेषां वा पदार्थानाम्।
क्रोडीकरणसमर्थः शोध्यं सर्वं समादिशति शोधः।।३३७८।।

ग्रन्थेषु बृहत्कायेष्वथ लघुकायेषु लेखेषु।
परिचर्चासु च पत्रेष्वलं विकासं गतः शोधः।।३३७९।।

स्नातकता सम्प्राप्तावप्यध्येतुं यदादरो जातः।
नूनं तदैव लभ्यः सर्वोच्चोपाधिसंगतः शोधः।।३३८०।।

पारे समुद्रमपि यः सम्प्रेषणदक्षतां भजते।
सर्वविधं व्ययदानं समादिशति सत्वरं शोधः।।३३८१।।

बह्वायासे जाते सर्वं व्यर्थं यदा भवति।
जलताडनवन्निखिलं श्रमं सुदूरं क्षिपति शोधः।।३३८२।।

चेतस्तोषकरीं यो विद्यां सर्वां समाह्वयते।
विदुषश्चान्यानखिलान् प्रसादयति सात्विकः शोधः।।३३८३।।

आयासेन सुबहुना स्तोकं फलमेव योऽर्पयते।
अंगुलिगणनीयानां मननीयो राजसः शोधः।।३३८४।।

वागाडम्बरपूर्णोऽत्यल्पो नैवाऽथ तोषितः स्वान्तः।
तुन्दिलतायां दृष्टः स्वीकार्यस्तामसः शोधः।।३३८५।।

विश्वस्मिन् शिक्षायै याः संस्थाः सन्ति सुप्रथिताः।
तासां शिरोमणित्वे लसतितमां दीपितः शोधः।।३३८६।।

ज्ञानप्रकाशपूर्णान् विदुषो धन्यांस्तु यः कुरुते।
सर्वसमीहितचरणान् वैदुष्यख्यापकः शोधः।।३३८७।।

पूर्वपुरुषभणितीनां सारं तत्त्वं विबोधयते।
पोषयति चान्यनिकषे निष्कर्षैर्भूषितः शोधः।।३३८८।।

प्राचीनाक्षरमाला जालावलिमध्यपतितोऽयम्।
निष्कर्षे लम्बायितविलम्बमुपयाति किं शोधः।।३३८९।।

एकाग्रामथ चेतो वृत्तिं योऽसौ समाधिपरिजुष्टाम्।
प्रददातीष्टफलाशा परिपूर्णे मानसे शोधः।।३३९०।।

यस्मिन् यस्मिंश्चेतसि स्वयं तु विषयं निभालयति।
तदलौकिकत्वभाने संप्रेषयते स्वयं शोधः।।३३९१।।

ग्रन्थिविभेदनकुतुकी तर्कान्वितसत्प्रमाणसंपुष्टः।
विपरीततर्कधर्षणपरिपुष्टो राजते शोधः।।३३९२।।

विदुषामप्येकेषां कूपे मण्डूकतामथ ताम्।
सद्यो दूरीकुरुते तान् सर्वत्र प्रचालयन् शोधः।।३३९३।।

अङ्गीकरोति किञ्चित् दूरीकुरुते तथा किञ्चित्।
किञ्चित् किञ्चिच्चिन्वन् संपूर्णो जायते शोधः।।३३९४।।

ये वा भावविचारा नव्या इति निश्चयो जातः।
ते तस्मादपि पूर्वं प्रकटा इति दर्शयति शोधः।।३३९५।।

नूतनतमकमनीये रूपेयस्तोषको भवति।
पुष्टनिदेशकदिष्टः स्वीयं लास्यं विलासयति शोधः।।३३९६।।

नानाकारविकारप्रकारसंचारमाधुरीरम्यः ।
अल्पज्ञानपि विदुषः पूर्णप्रज्ञान् सुघोषयति शोधः।।३३९७।।

यो विज्ञानां व्यूहे तडिदिव रोमांचमातनुते।
स्वल्पाक्षरैर्वचोभिस्तस्माद् रोमांचकः शोधः।।३३९८।।

भूगर्भेऽयं गच्छति भूतं कालं परामृशति।
भूतानामपि शुद्धिं करोति करुणामयः शोधः।।३३९९।।

कीलयति सर्ववाचं वाक्कीलेषु प्रचारामायातः।
विज्ञानपि मूर्छयते प्रत्यक्षैरागमैः शोधः।।३४००।।

राज्ञां पुरातनानां हर्म्याणां यः परीक्षणं कुरुते।
शस्त्राणां पात्राणां वस्त्राणां वीक्षकः शोधः।।३४०१।।

सर्वं यत्र स्पष्टं सुनिश्चतत्त्वं मतं यत्र।
सन्देहैर्मन्देहांस्तर्कांस्तत्र प्रवेशयति शोधः।।३४०२।।

सर्वविधश्रमविवशैर्व्यापारैर्यो वशीकृतो विषयः।
पौनः पुन्यभृशार्थं तत्राऽऽविर्भावयति शोधः।।३४०३।।

मस्तिष्कान्तर्गत-शिरावलीर्झंकृताः कुरुते।
शयनासनादिलोपं सन्तनुते चिन्तितः शोधः।।३४०४।।

शतशतपुस्तकमध्ये सततं दत्तावधानोऽयम्।
ज्ञाननदीनवधारा प्रवर्तने संगतः शोधः।।३४०५।।

नानाऽतानवितानैः समावृतो ज्ञानतन्तूनाम्।
दृष्टिं कामपि शिष्टां विशिष्टरूपां प्रवर्तयति शोधः।।३४०६।।

एकस्या अपि पंक्तेर्विवेचने सादरं लग्नः।
वर्षाण्यतिवाहयते काले कलनां करोत्यसौ शोधः।।३४०७।।

सर्वां किल व्यवस्थामामूलात् यः समापयते।
नव्यां निजां व्यवस्थां विदधात्यायातितः शोधः।।३४०८।।

सर्वं व्यवस्थितमिदं सर्वं सर्वत्र सम्पूर्णम्।
सर्वात्सर्वसमुदये सर्वां दृष्टिं समर्पयति शोधः।।३४०९।।

अपिनाम दूरदेशस्थितसामग्रीसमाकलने।
धावति सादृश्यकृते सम्मति मुद्रान्वितः शोधः।।३४१०।।

यद् यद् विशृंखलं तत् सर्वं सशृंखलं कुरुते।
एकस्मिन् सर्वेषां समन्वयं सन्दिशति शोधः।।३४११।।

सृष्टौ सर्वं भरितं नवता नास्तीह कुत्रापि।
ज्ञाने लाभस्तेषां तस्मिन्कार्ये रतः शोधः।।३४१२।।

वाक्यानां शब्दानां मात्राणां मातृकानां च।
वीथीषु विभ्रमेषु भ्रमणं कुरुते स्वयं शोधः।।३४१३।।

त्रैमासिकार्धवार्षिकवार्षिकपत्राणि चालयते।
अनियतकालानामपि पत्राणां सम्प्रवर्तकः शोधः।।३४१४।।

शोधार्थिछात्रनिवहेष्वासादितं वैभवः सोऽयम्।
तेषामथवा तासां वृत्तीनां वर्षकः शोधः।।३४१५।।

हर्षादुच्छालयते क्षणमात्रेणैव मोहितांश्छात्रान्।
पंजीयनविनिबद्धानद्यत्वे स्वीकृतः शोधः।।३४१६।।

विश्वविभिन्नविभागव्यक्तिव्यक्ति पृथग्भूतः।
ऐक्यं तेषां तनुते विस्तारितवैभवः शोधः।।३४१७।।

नमयति यो निजरूपे सर्वेषां मस्तकानि भूयांसि।
सर्वेषां सन्देशान् संश्रृणुतेऽयं समादृतः शोधः।।३४१८।।

आक्रामकरूपाणामपि नित्यं सर्जनं कुरुते।
सर्वस्वार्जनमथवा केषांचित् कल्पयति शोधः।।३४१९।।

सांसारिकभोगानामपि संयोगं समादिशति।
सर्वाश्चर्यमयीमथ मुद्रां तां तां दिशति शोधः।।३४२०।।

सर्वं निभाल्यमानं यत् कृपया भाति विनिगूढ़म्।
सर्वं रहस्यपूर्णं मत्त्वा संशोभते शोधः।।३४२१।।

कस्या अपि वार्तायाः समुद्भवः कुत्र संजातः।
सत्याऽस्ति काऽथ वार्ता सत्यं सर्वं विशोधयति शोधः।।३४२२।।

नवनिर्माणे किं किं पुरातनं सत्यमायातम्।
कस्मिन् रूपं प्रकटं तत्सर्वं शोधयति शोधः।।३४२३।।

प्रकटे विरूपभावे सौन्दर्यं यो विलोकयति।
सर्वं सुन्दररूपं नीरूपं वा समादिशति शोधः।।३४२४।।

रम्याञ्चितसत्पीठे निर्देशकवर्यसंगतः सोऽयम्।
विभुतामयतां स्वीयां वैभवयुक्तां विभावयति शोधः।।३४२५।।

परिपठन - मनन - चिन्तन-लेखनरूपेषु संलग्नः।
त्यक्तान्यसर्वविषयः परिपूर्णः शोभते शोधः।।३४२६।।

आदौ सूक्ष्मः क्रमशो विपुले रूपे प्रकाशमायातः।
पर्यन्ते पुनरपि तत् सूक्ष्मं रूपं प्रकाशयति शोधः।।३४२७।।

नानापाण्डुलिपीनां परिग्रहे जागरूकोऽयम्।
तासां छायाचित्राण्यद्यत्वे संश्रयति शोधः।।३४२८।।

भायाविनां समस्तां मायां सद्यः समापयति।
वागाडम्बरपूर्णां विज्ञैर्विज्ञापितः शोधः।।३४२९।।

अङ्गीकृतविषयाणां यद् दारिद्र्यम् समुल्लसति।
पूर्वोत्तरपक्षाभ्यां तद्वै सर्वं विलोपयति शोधः।।३४३०।।

पाण्डुलिपीनां प्रथने नानाविध पाठभेदे च।
पूर्णप्रज्ञपुरातनपुरुषाणां देशिकः शोधः।।३४३१।।

योऽसौ श्रुतिस्मृतीनां नानाविधसत्पुराणानाम्।
इतिहासानां निर्णयकरणेऽविचलो विलोक्यते शोधः।।३४३२।।

हर्षाणां यो वर्षा इव कुरुते विज्ञवर्याणाम्।
चेतस्सु सर्वसुषमा सौभाग्यैः संभृतः शोधः।।३४३३।।

सम्मतिविमतिविभागैर्निष्कर्षे भिन्नतां यातः।
परिषत्प्रगुणितरूपे निष्कर्षं संप्रतीक्षते शोधः।।३४३४।।

नानायन्त्रपरीक्षितवस्तूनां गुणगणनिकायाम्।
नव्यानां वस्तूनां निर्माणेऽवातरत् शोधः।।३४३५।।

सत्यान्वेषणकार्ये सर्वसमर्पितसुपरिवेशः।
सन्देहं भ्रान्तिं वा मिथ्यात्वं वा विदूरयति शोधः।।३४३६।।

सिद्धान्तव्याख्यानैरेवाऽयं नास्ति संतुष्टः।
पूर्णप्रमाणपुष्टैस्तैः संतुष्टो भवति शोधः।।३४३७।।

मूर्तीनां पात्राणां धातूनां च प्रणालीनाम्।
प्रोत्खनने मिलितानां सुस्वागतमादिशति शोधः।।३४३८।।

भित्तीनां कासांचित् केषांचिद् भित्तिचित्राणाम्।
शस्त्राणां मुद्राणां परीक्षणे प्रोद्यतः शोधः।।३४३९।।

व्यर्थं किमपि न मनुते बह्वल्पं सर्वमाद्रियते।
कोणे प्रतिष्ठितं यत् तत् संमुखमाधरति शोधः।।३४४०।।

अज्ञाताल्पज्ञातप्रथाप्रवाहे निपतितानाम्।
रचयितॄणां विषये पूर्णं श्रममादिशति शोधः।।३४४१।।

राज्ञां पुरातनानामितिवृत्तं यो निभालयते।
सामाजिकसंरचना विकासमालोचयति शोधः।।३४४२।।

आपाततः सुमधुराकृतिभिर्नीराजमानानाम्।
घटनानामपि मध्ये विषबीजं दर्शयति शोधः।।३४४३।।

शत - शत संस्थारूपे शुभोदये वीक्षितस्वान्तः।
नैकसहस्रजनानां वृत्तिं स्वेष्टां सुचालयति शोधः।।३४४४।।

नाना नवपत्राणां प्रकाशने शूरतां यातः।
सम्पादनचातुर्यं नूतनमुद्भावयति शोधः।।३४४५।।

नूतननियुक्तिकाले प्राध्यापकपदाभिलाषिवर्गस्य।
स्वीयोपाध्यनिवार्यग्रहणेच्छां दर्शयति शोधः।।३४४६।।

नानाऽनिवार्यनियमैर्नियमितसंयतशरीरोऽयम् ।
नानादोषच्छिद्रानप्यद्यत्वे विधारयति शोधः।।३४४७।।

नानाविधसंभावितवित्तग्रहणे सुजागरूकाणाम्।
शोधार्थिनां प्रतिष्ठामथ बुद्धिं लोपयति शोधः।।३४४८।।

निर्देशकवर्याणां मानविवृद्धिं परां तनुते।
केषांचित् पुनरेषामपमानान्यपि समीहते शोधः।।३४४९।।

शोधे सर्वं शुद्धं यद्यन्निर्देशकेन संदिष्टम्।
अस्वीकृते निबन्धे निर्देशकदैन्यमावहति शोधः।।३४५०।।

संगोष्ठीवेलायां शोधार्थिनमर्थसद्व्ययं कर्तुम्।
गोष्ठीनिविष्टसज्जनजलपानादिर्निदेशयति शोधः।।३४५१।।

अन्यैर्लिखितं तदिदं चान्यैः संशोधितं सम्यक्।
अतिरिक्तद्रव्यलाभे विदुषोऽपि प्रेरयति शोधः।।३४५२।।

अस्तव्यस्तदशायां कैश्चित्संप्राप्यमाणोऽपि।
केषांचित्तु परेषां परिनिष्ठितभक्तिमीक्षते शोधः।।३४५३।।

यैरध्यापकवर्यैः पाठनकार्ये परिश्रमो विहितः।
शोधेऽनादरयुक्तास्तदुन्नतिं रोधयति शोधः।।३४५४।।

रूपाणां बाहुल्ये पुरातनानां नवीनत्वम्।
स्फूर्तिप्रदत्वमेषां सम्पादयतीह सत्वरं शोधः।।३४५५।।

भूयो नवप्रबन्धैःशोधोत्तरशोधमाभरितः।
प्रतिशोधशोधपूर्णैर्निजसीमावर्धकः शोधः।।३४५६।।

सर्वासां भाषाणां साहित्ये भाषमाणानाम्।
नैकट्यं वर्धयितुं साहित्यं शोधयति शोधः।।३४५७।।

केन्द्रीयात्प्रान्तीयात् शासनचक्रात् सुपुष्टिमायातः।
पोषणमखिलं यच्छति शिष्येभ्यः स्वीकृतः शोधः।।३४५८।।

प्राचीनां परिपाटीं नवनवरचनासु जाग्रतां कुर्वन्।
सत्प्रेरणां प्रयच्छति निर्माणेऽङ्गीकृतः शोधः।।३४५९।।

नवमद्वीपः

१२७.मानसम्

मानसमराल, तुभ्यं काव्ये विनिवेदना काचित्।
सर्वं निर्मलमन्तःकरणं त्वद्दर्शनाज्जातम्।।३४६०।।

पुनरपि तिष्ठसि दूरे त्वमसि नितान्तं समीपे मे।
सैषा व्यथा समस्ता किं त्वां विनिवेदयामि हंसवर।।३४६१।।

त्वं मे मानस, शान्तिं गतो नितान्तं विनम्रताजुष्टः।
उत्थापय, विनिवेदय कान्ताभावेषु संगतो भूयाः।।३४६२।।

काले प्रयच्छ शुभ्रां धारां करुणामयीं तां ताम्।
परितृप्तस्यापि पुनर्यां पातुं नो विलीयते वाञ्छा।।३४६३।।

आशाशताकुलतया सैषा परितो दशा जाता।
पुनरप्येषैवाशा जीवनभाषां समालपति।।३४६४।।

विफला कदाचिदथवाऽशेयं सफला कदाचिद्वा।
आशा जीवनमध्ये सुखं व्यथां युगपदालपते।।३४६५।।

समयस्य यो निरर्थकविनिर्गमनचिन्तितो भागः।
सोऽसौ व्यथां वितनुते तद्विपरीतस्तु हर्षमयः।।३४६६।।

१२८.पत्रकारिता

इदमतिमहत्त्वपूर्णं जनजनजीवनसमुन्नयनम्।
तत्रैव जागरूका दृष्टेयं पत्रकारिता काचित्।।३४६७।।

शक्त्या प्रगुणीकृतया जीवनमुन्नततरं भवति।
शक्तिं प्रगुणीकुरुते सैवेयं पत्रकारिता काचित्।।३४६८।।

अज्ञानेन विनश्यति शक्तिर्ज्ञानेन वर्धते नित्यम्।
ज्ञानप्रकटनदक्षा दृष्टेयं पत्रकारिता काचित्।।३४६९।।

सिद्धान्तानां ज्ञानं प्रदीयते गुरुमुखैर्ग्रन्थैः।
व्यवहारज्ञानानां प्रदायिका पत्रकारिता काचित्।।३४७०।।

घटनासहस्रमध्ये सुविस्तृता प्रेरणाभूमिः।
तामेव दर्शयन्ती विलोक्यते पत्रकारिता काचित्।।३४७१।।

नानासिद्धान्तानां जनजनमध्ये प्रचारार्थम्।
विज्ञैराद्रियते वाऽद्यत्वे सा पत्रकारिता काचित्।।३४७२।।

सामाजिककल्याणे समुन्नतौ नीतिनिर्माणे।
सततसमुज्ज्वलपक्षे निक्षिप्ता पत्रकारिता काचित्।।३४७३।।

१२९.समयः

संसारे समलंकृतरूपास्ते सन्ति सत्पुरुषाः।
अङ्गीकुरुते येषां पोषकतां सत्कृतः समयः।।३४७४।।

सर्वमभीष्टं करतलगतमेषां जीवने जातम्।
येषामनुग्रहार्थं समुद्यतः प्रोन्नतः समयः।।३४७५।।

मानसमरालमसमं पन्थानं शुभ्रमादिशति।
कोमलकोषाऽगारेष्वसमञ्जसतामुपागतः समयः।।३४७६।।

चित्रानुभववशीकृतसाम्राज्यं साधु मन्वानः।
निखिलाञ्जलिनीराजितविभवो दोलायते समयः।।३४७७।।

नो निगदति न द्वेष्टि प्रकाममावेदयत्यपि नो।
नो वा संमुखभावे संस्थितिमिष्टां करोत्यसौ समयः।।३४७८।।

अघटितघटनपटीयान् संसारेषु प्रदीप्तोऽयम्।
निखिलाश्चर्यमयं वा वितानमातानयति समयः।।३४७९।।

गच्छत्यागच्छत्यपि निपतति पुनरुत्थितो भवति।
संश्लेषयते शेते सहभागित्वं गतः समयः।।३४८०।।

अर्धं स्वीये क्रोडे रक्षत्यर्धं प्रयच्छति वा।
अर्धं करोति निखिलं तस्मादर्धेश्वरः समयः।।३४८१।।

आनन्दिताऽखिलजनस्तोषोद्दीपितविभावोऽपि ।
मथयतितरां मनांसि नु नितरां प्रोत्साहकः समयः।।३४८२।।

नियमान्वितसंस्कारोल्लासितविश्वासभाग्यतासुभगः।
सर्वेषां सन्तोषं करोति सर्वोपकारकः समयः।।३४८३।।

१३०.यन्त्राणि

यन्त्राण्यनन्तरूपेष्वाभान्त्येतानि संसारे।
जीवनसौकर्याणां समर्पकाण्येव निखिलानि।।३४८४।।

संसारे भावानां सर्वेषां यन्त्रमयतैव।
लघुनि शरीरेऽप्यस्मिन् द्योतन्ते तानि तानि यन्त्राणि।।३४८५।।

तत्रैव बुद्धियन्त्रं तादृशमाभाति देहेऽस्मिन्।
यत् परिणतिभूतान्येवाभासन्तेऽथ यन्त्राणि।।३४८६।।

नव नव पारिगणनायां गणनातीतेषु रूपेषु।
गणिताधारेणैवोत्पन्नान्येतानि यन्त्राणि।।३४८७।।

ब्रह्माण्डे सामीप्यं सम्पादयितुं यतन्ते वा।
सर्वं रहस्यजातं प्रकटीकुर्वन्ति यन्त्राणि।।३४८८।।

भोजनवसनप्रचलनयानासनपठनमननादीन् ।
जीवनसर्वसमर्पणभावान् यच्छन्ति यन्त्राणि।।३४८९।।

साधनरूपाण्यपि तान्यथ साध्यत्वं प्रयातानि।
परस्परस्पर्धायाः साम्राज्योद्घाटकानि यन्त्राणि।।३४९०।।

१३१.षोडषो वर्षः

परिचयरहित इवाऽयं दूरस्थित एव निकटभावेऽपि।
सस्मितदर्शनविनिमयवलित इवाऽयाति षोडषो वर्षः।।३४९१।।

सांमुख्येन निकामं नैवाऽयातः शरीरे मे।
चौर इवाऽयातोऽयं पृष्ठत एवाऽथ षोडषो वर्षः।।३४९२।।

स्वप्ने क्वचित्कदाचित् शून्ये कक्षेऽथ काचबिम्बे वा।
रात्रावनावृतादथ द्वारादायाति षोडषो वर्षः।।३४९३।।

नव नव पुस्तकपठने शब्दानां मोहमयजाले।
नवरसझंकृतिसारोऽनुभूतिभावं गतो वर्षः।।३४९४।।

बाल्यावस्थासिद्धां समाधिमथ भञ्जयन् सोऽयम्।
नव्येन्द्रधनुविकासो विलासभाषां समालपति।।३४९५।।

स्वाभाविकसम्बन्धो नाऽनेनासीत्प्रकामचौरोऽयम्।
नितरामेकान्तानां प्रीतिं प्रथमां पुरस्करोति स्म।।३४९६।।

वर्जितदेशविशेषे संकेतानाञ्च कापि भाषेयम्।
कुरुते दीपनकार्यं वर्षेऽस्मिन् षोडशे प्राप्ते।।३४९७।।

यद् यद् घटितमथारात् व्याख्यां तस्यैव नूतनां प्रथयन्।
वर्षेऽस्मिन् सम्प्राप्ते निधिरिव कश्चित् समीपमायातः।।३४९८।।

तारुण्यभव्यभवनप्रवेशदानाय सुन्दरं द्वारम्।
किंस्विदनावृतमिव वा संजातं षोडषे वर्षे।।३४९९।।

संपूर्णजीवने यो निधिभूतः शैशवः समयः।
तस्य विलोपनलीलानिपुणोऽयं षोडषो वर्षः।।३५००।।

अत्यन्तमुर्वरां तां संस्कुर्वन्नथ मनोभूमिम्।
स्वप्नेष्वाविष्कुरुते भविष्यदत्युन्नतं वर्षः।।३५०१।।

आसीद् या घननिद्रा बाल्ये स्वप्नेषु परिणता जाता।
चैतन्ये रूपाणां रेखां रचयतितरां वर्षः।।३५०२।।

सघनस्तरुरिव सोऽयं गणनारहितैः समाऽवृतः पत्रैः।
दृष्टिविलोभनसुषमा साम्राज्यं दर्शयति वर्षः।।३५०३।।

अभिभावकचिन्तानां वृद्धिं वितनोति सत्यमेवाऽयम्।
नव्याऽवश्यकतानामुद्भावयिताऽथ षोड़षो वर्षः।।३५०४।।

१३२.आगमश्च निगमश्च

निगमो वेदो मूलं वेदाङ्गानां च वैभवं दिव्यम्।
आगमसरणिरियं सा ययैव विद्योतितं विश्वम्।।३५०५।।

धर्मार्थकाममोक्षाः पुरुषार्थास्ते जयन्ति सर्वस्याः।
जीवनसरणेरस्याः सफलीकरणेषु चारितार्थाः।।३५०६।।

जीवननवतत्त्वानां समीक्षणे जागरूकेयम्।
नूतनविज्ञानानां नवसरणिः संप्रवृत्तैव।।३५०७।।

यत्र च सिद्धान्तानां समुन्नतिः शिक्षिता भवति।
सर्वा सा मन्तव्या नूनं निगमागमश्रेणी।।३५०८।।

सिद्धान्तानां सैषा प्रकाशरेखा तथा स्फुरति।
जीवनमिदमत्रत्यं साफल्यारोहणं कुरुते।।३५०९।।

सिद्धान्ता अप्येते भूतं वा जायते यदिदम्।
यच्चाऽप्यग्रे दृश्यं सर्वं क्रोडे प्रकुर्वन्ति।।३५१०।।

निगमोऽयं सर्वेषां सिद्धान्तानां सुविस्तृतं रूपम्।
स्वात्मनि सन्धारयतेऽनादिः कथिततस्तथा चायम्।।३५११।।

कामं सन्तु विवादा निगमस्याऽनादितायां वा।
तस्याप्यपौरुषेये रूपे स्युर्वा विवादसंवादाः।।३५१२।।

किन्तु विचारेष्वेते ये सिद्धान्तास्तु सर्वोच्चाः।
निगमे प्रतिष्ठिता इति का विमतिस्तत्र संभूयात्।।३५१३।।

सिद्धान्तानां सैषा सिद्धा सरणिस्तु सर्वोच्चा।
संपूर्णं संसारं स्वीयप्रभया प्रभावितं कुरुते।।३५१४।।

आकस्मिकमिह दृश्यं यद्यल्लोकेन मान्यते तावत्।
सर्वत्र तत्र कारणमाला सन्दृश्यते बहुशः।।३५१५।।

यत्र तु कारणसत्ता नाकस्मिकतासु संगता जाता।
कारणभावः सोऽयं निगमेनावेदितो भवति।।३५१६।।

आगामिनि संकाये संकल्पे साधनैर्जुष्टे।
यत्स्वायत्तीकरणं तत्राऽगमशास्त्रमादिशति।।३५१७।।

भेदानामपि सत्ता संसारे स्वीकृतैवाऽस्ते।
भेदानां च विलोपे प्रलयः सर्वः प्रजायेत।।३५१८।।

यावान् भेद सर्वः संदृश्यः सा जगत्सत्ता।
तेनैवाऽगमनिगमे भेदस्तावत्समुल्लसति।।३५१९।।

निगमेऽधिकारिभेदः संपूर्णां दीप्तिमातनुते।
आस्ते वर्णविचारः संस्काराणां च तत्र साम्राज्यम्।।३५२०।।

निध्यायैतत्सर्वं परकरुणापूरितेन शर्वेण।
पार्वत्यै यत्प्रोक्तं तत्सर्वं जातमागमं शास्त्रम्।।३५२१।।

१३३.मैत्री

मैत्रीत्येतदनुपमं मूर्तं सांसारिकं तत्त्वम्।
मैत्री काऽपि सुशाश्वतसर्वाधारात्मिका सरणिः।।३५२२।।

मैत्रीमयता निखिले ब्रह्माण्डे विद्यते विमले।
यत्र न मैत्री सुलभा श्मशानरूपं विगर्हणीयं तत्।।३५२३।।

काचिन्मैत्रीधारा यया समापूर्यते विश्वम्।
सहसम्बन्धमधुरता सम्बन्धानां तु माधुर्यम्।।३५२४।।

अत्र न येषां मैत्री तेषामन्यत्र मैत्री स्यात्।
मैत्री वा शत्रुत्वं काम्यं सर्वत्र संसारे।।३५२५।।

मैत्रीमये विशाले विश्वेषां चित्रफलकेऽस्मिन्।
तेषामपि क्षणानां वैदुष्यं दर्शनीयं स्यात्।।३५२६।।

मैत्री नैकविधा वा कथमपि शक्या समास्थातुम्।
गणनातीते रूपे मैत्री प्रकटैव दृश्यते विज्ञैः।।३५२७।।

मैत्री स्थायीभावः सम्बन्धास्तावदन्ये ये।
संचारिणो विभावा अनुभावास्ते प्रकथनीयाः।।३५२८।।

व्यक्तित्वस्य विकासे मित्राणां यादृशं स्थानम्।
तन्नान्येन कदाचन केनापि प्राप्तुमपि शक्यम्।।३५२९।।

मातापितरौ यावन्मैत्रीभावं न सम्प्राप्तौ।
तावन्नो व्यक्तित्वं निर्मातुं तौ प्रगल्भेताम्।।३५३०।।

षोडशवर्षाऽनन्तरमथ पुत्रो वै भवेन्मित्रम्।
स्मृतिकारैरपि गदितं चैतद्वैज्ञानिकं तथ्यम्।।३५३१।।

मैत्री साप्तपदीना दर्शनमात्रऽपि मैत्रीयम्।
नैकेषामथ जनुषां मैत्री शुद्धः परीपाकः।।३५३२।।

मित्रं सुहृत् सखा वा शब्दाः कोशेषु दर्शनीया वा।
एतैरेव तु कोशाः कोशाश्चान्यैस्तु तुन्दिला एव।।३५३३।।

किञ्चित्काला मैत्री पुनरेषा दीर्घकालार्थम्।
अन्तं यावन्मैत्री लभ्याऽस्ते भूरिभाग्यानाम्।।३५३४।।

कार्याणां शैलीयं स्वरूपमथवाऽस्ति कार्याणाम्।
लघुरपि कार्यं भवति हि नैकैः पुरुषैस्तु संसाध्यम्।।३५३५।।

भोजननिर्माणादौ किं तावत्केन चैकेन।
गोधूमादीनां वा निर्माणं सर्वमेव कृतम्।।३५३६।।

कियती कियती संख्या भवति सदा कार्यशीलानाम्।
नूनं तदा समक्षं सिद्ध्यति लघुभूतमपि कार्यम्।।३५३७।।

कार्याणां संसिद्धौ योऽयं सहभाव अनुभूतः।
सेयं सर्वा मैत्री व्याप्तैवास्तेऽथ सर्वत्र।।३५३८।।

पूर्वमपरिचितकाया अपि ये पुरुषा विलोक्यन्ते।
आन्तरिकी वा काचित् प्रवहति तत्रापि मित्रताधारा।।३५३९।।

कः कुत्र कस्य कस्मिन्कार्ये नूनं नियुक्तोऽभूत्।
कालस्यानन्तत्वे तदिदं परिचेतुमप्यशक्यं स्यात्।।३५४०।।

केन विनिर्मितवस्त्रं मूल्यं दत्त्वा मया क्रीतम्।
धारितमेतच्छोभां कामपि विस्तारयद् दृष्टम्।।३५४१।।

मूल्यं मया प्रदत्तं नानाविधवस्तुजातस्य।
किन्त्वथ निर्मातारस्ते जाता बान्धवाः सर्वे।।३५४२।।

नाहं जाने तांस्तान्स्वरूपतो नामतो वाऽपि।
पुनरपि सूक्ष्मः कश्चित् तन्तुस्तत्रापि दृश्यते निखिले।।३५४३।।

ईश्वररूपा मैत्री सर्वं जडजंगमं जगद्वैतत्।
एके स्वीये नीडे सम्यक् संस्थापयत्येव।।३५४४।।

विश्वं यत्रैवास्तेऽभिन्ने नीडे समाश्वस्तम्।
एवं निगदति सैषा सर्वैर्नम्या श्रुतिर्देवी।।३५४५।।

'भीषास्मादि'त्यादि तु शत्रुत्वोद्घोषणा युक्तम्।
श्रुतिवाक्यं यत्राऽस्ते प्रकृतिर्मनसो विकल्पानाम्।।३५४६।।

भययुक्ताप्यथ नूनं सैषा सन्दृश्यते मैत्री।
यैरपि वयं बिभीमस्तैरपि मैत्रीं निबध्नीमः।।३५४७।।

विवशीभावेऽप्येषा मैत्री सञ्जायते नियता।
नैकेषां राष्ट्राणां का वा गाथाऽस्ति व्यक्तीनाम्।।३५४८।।

कस्मिन्नपि पुरुषे वा शत्रुत्वं नूनमनुभवन्तोऽपि।
तेनैव सार्धमस्मन्मैत्री स्यादिति विचारणा चलति।।३५४९।।

मैत्री सैषा देवी सर्वत्राऽप्रतिहता जयति।
नो कुत्रापि निरुद्धा गतिरेतस्याः समासतो व्यासैः।।३५५०।।

दूराद्दर्शनमात्रे काचित् सा मित्रताधारा।
प्रवहति दृक्कणमात्रं सूत्रं विपुलं कियत्सूते।।३५५१।।

हेयोपादेयाख्या बुद्धिर्दृष्टौ भवेत् सुलभा।
यद् यद् वै स्याद् हेयं शत्रुत्वं तत्र तत्रैव।।३५५२।।

शत्रुत्वमपि तु मैत्रीभावस्यैवैकतमरूपम्।
तेनाऽनन्ता मैत्री रहस्यभूताऽस्ति जीवने सैषा।।३५५३।।

केन कदा किं कार्यं सिद्धं स्यान्नो विजानीमः।
शत्रुत्वेन गृहीतः कदा नु मित्रत्वमागच्छेत्।।३५५४।।

गुरुरूपं यत्तत्त्वं मैत्रीभावो नु तत्रापि।
गुरुरपि तु शिष्यरूपं संधारयते नितान्तरमणीयम्।।३५५५।।

ये तावदत्र शिष्याः पुरःस्थिता एव कक्षासु।
तेऽपि गुरुत्वं स्वीयं तस्मिन्काले सुधारयन्त्येव।।३५५६।।

गुरुरयमहो स्वशिष्यं स्वीयां विद्यां कथं प्रयच्छेत्।
इत्येतद्वै सर्वं शिष्याः संबोधयन्त्येव।।३५५७।।

गुरुशिष्यबन्धनानामपि मैत्रीगर्भितत्वं वा।
व्यक्तं, परिगणनेयं नो कुत्राप्यवसिता भवति।।३५५८।।

मित्रं काले यच्छति मित्रं गृह्णाति वा काले।
मित्रं रक्षति काले मित्रं शत्रुत्वमपि याति।।३५५९।।

मित्रस्वरूपगणना नो वा कुत्रापि केनापि।
सम्यक् कर्तुं शक्या यत्र समस्तावसानं स्यात्।।३५६०।।

नवनवरूपे मैत्री प्रादुर्भूताऽनुभूयते सैषा।
जीवनमेतदनन्तं लघुरपि तेनैव कथ्यते निखिलम्।।३५६१।।

नाना जन्मसु कस्मात् केन कदा मित्रता जाता।
संप्रति कुत्र स तिष्ठति कस्मिन् रूपे, न जानीमः।।३५६२।।

किन्त्वज्ञानं चैतन्न लोपयति वस्तुतत्त्वं वा।
यत्तत्त्वं यत्राऽस्तेऽज्ञानेनैतन्न लुप्तं स्यात्।।३५६३।।

अज्ञाता खलु मैत्री विपुलैवाऽस्ते तु परिमाणे।
ज्ञाता तु सा नितान्तं स्वल्पे भावेऽनुभूयतेऽस्माभिः।।३५६४।।

यद्यपि मैत्री विषये कविभिर्बहु निगदितं तावत्।
चित्राणामेतेषां माधुर्यं नूनमुच्छलति।।३५६५।।

तेषामेवाध्ययनाज्जाता स्फूर्तिर्यथा बुद्धौ।
मैत्रीयं लेखिन्यां ममापि नूनं समवतीर्णा।।३५६६।।

कामपि कमनीयां तामेकां मैत्रीमुपास्महे दिव्याम्।
यस्याः कृपाप्रवाहे पतितः सुखितो भवेज्जन्तुः।।३५६७।।

१३४.नमस्काराः

श्रद्धानिवेदनोत्थाः स्नेहाभिज्ञापनाय संयुक्ताः।
विविधस्पन्दनभरिताः समर्पितास्ते नमस्काराः।।३५६८।।

नम्रत्वाभिज्ञापननैरन्तर्यप्रवाहसंभरिताः ।
नाना हृदयस्पन्दनसारूप्योद्बोधका नमस्काराः।।३५६९।।

संसारव्यवहारे येयं दृश्या विभेदिका बुद्धिः।
भेदेऽप्यभेदबोधोदयपरिपुष्टा नमस्काराः।।३५७०।।

स्वात्मन्यसमं तोषं वितरन्तो येऽनुभूयन्ते।
येभ्यो निवेदितास्तेष्वपि संमददा नमस्काराः।।३५७१।।

यस्मै निवेद्यमानास्तस्य श्रेष्ठत्त्वघोषकाः सन्तः।
तदपेक्षया तथाऽत्मनि नम्रत्त्वद्योतका नमस्काराः।।३५७२।।

मान्यानां सांमुख्ये प्रत्युत्थानाभिवादने लग्नैः।
संस्कारान्विपुरुषैर्विनिवेद्यन्ते नमस्काराः।।३५७३।।

नानारूपास्त इमे नानादेशेषु भेदमापन्नाः।
पुनरप्यान्तरजगतामेकत्वोद्बोधका नमस्काराः।।३५७४।।

नाना कार्यक्षेत्रे संलग्ना ये हि पुरुषधौरेयाः।
तेषामुत्साहानां वर्धनशीला नमस्काराः।।३५७५।।

ये वा प्रभावपूर्णा नाना क्षेत्रेषु राजन्ते।
तेषां तुष्टिं स्वेष्टां पुष्टिं वा कुर्वते नमस्काराः।।३५७६।।

कर्तव्योद्बोधकतामपि ये नूनं प्रयच्छन्ति।
पुनरप्यभाषमाणा केवलचेष्टान्विता नमस्काराः।।३५७७।।

मान्ये पुरुषे संमुखमायाते ये निवेदिता नो चेत्।
तस्मिन् क्रोधोद्दीपनकार्यं दधते नमस्काराः।।३५७८।।

आन्तरभावविबोधकतत्त्वानां ये प्रतीकतामाप्ताः।
स्वान्तस्थितस्य भासा विभासितास्ते नमस्काराः।।३५७९।।

नानाभाषाशब्दैर्नानाविधवाक्यविन्यासैः ।
नानाविधपर्यायैर्भूषितविभवा नमस्काराः।।३५८०।।

आस्वादितमाधुर्या माधुर्यं वा विलिम्पन्तः।
सर्वसमर्पणशीलाः केषांचित् ते नमस्काराः।।३५८१।।

१३५.धन्यवादः

धन्याऽख्योयं वादो नव्याऽऽचारे समुद्दीप्तः।
अद्य सभासम्मेलनकालेऽन्तिमतत्त्वतां यातः।।।३५८२।।

या धन्यवादभाषा तत्र तु नामानि सर्वाणि।
संस्मर्यन्ते नूनं कार्यक्रमयोजकानां वा।।३५८३।।

केषांचिदथ तु भाषणमेवान्तिमभावमायातम्।
तैर्लम्बभाषणमिह प्रदीयते धन्यवादार्थम्।।३५८४।।

निखिलैव योग्यता वा प्रदर्शिता भाषणे भवति।
कोऽपि तदुत्तरभाषणकर्ता नैवाऽवशिष्यते नु यतः।।३५८५।।

मन्ये सर्वेऽपि च ते कार्यप्रावीण्यमायाताः।
कार्यान्ते साफल्ये द्वित्रान् शब्दान् समीहन्ते।।३५८६।।

जगदीश्वरो नु धन्यो येन वयं जन्मदातृत्वे।
संस्कृतकाया अपि वा निकाममारोग्यमानीताः।।३५८७।।

का वा सा भाषा स्यात् या परिपूर्णाऽस्ति धन्यताधन्या।
धन्यत्त्वाधिगमानां काचिन्मन्दाकिनी जयति।।३५८८।।

यदि धन्यवादभाषणकर्ता कश्चिद् भवेन्मन्त्री।
तन्मुखकमलात्सर्वे स्वीयं नामाभिवाञ्छन्ति।।३५८९।।

सोऽपि तदात्वे नामान्यारटते चाऽथ सर्वेषाम्।
आयत्यां मतपत्रे दृष्टिस्तस्याऽपि संचिता भवति।।३५९०।।

यन्नाम विस्मृतं स्यादेतस्मिन्नन्तिमे कार्ये।
तस्योत्तमाङ्गभारः कश्चित्साधारणो न स्यात्।।३५९१।।

तस्मादस्मिन्कार्ये नियोजितो योऽस्ति सत्पुरुषः।
सर्वाणि तेन नामान्यथ सद्यत्नैर्विचेयानि।।३५९२।।

विन्दुः कश्चित्तादृशरूपोऽयं धन्यवादाऽख्यः।
यत्रोन्नतसुग्रीवाः सर्वे स्वात्मानमीहन्ते।।३५९३।।

एतस्मिन् विस्मरणे नो वा काचित्क्षमा देया।
विस्मृतनाम्नां हृदये ग्रन्थिः कश्चिद्विनिर्मितो भवति।।३५९४।।

कर्माञ्चितप्रशंसां कर्तुं ये वा न जानन्ति।
ते दुष्पातकपुञ्जाः स्मर्तव्याः कुत्सिते काले।।३५९५।।

ये धन्यवादकाले कार्पण्यं दर्शयन्त्येते।
ते वै मलीमसमुखाः कार्पण्येनैव लिप्यन्ते।।३५९६।।

यदि सत्कार्यं कर्तुं कोऽपि समर्थो भवेन्नो चेत्।
तेन तदेतत्कार्यं कर्तव्यं वा प्रशंसाख्यम्।।३५९७।।

अयमस्ति रक्तवर्धनरूपः कश्चित् सुसंस्कारः।
यो धन्यवादभाषणमध्ये संजायते नाम।।३५९८।।

सर्वोत्साहविवृद्धिः काचिदियं जायते नाम।
धन्याऽख्ये संवादे यत् संज्ञा संगृहीतेयम्।।३५९९।।

का वा वचनेष्वाऽस्ते दरिद्रता किन्तु तत्रापि।
नानाजन्मसमर्जितदारिद्र्यास्ते विमुह्यन्ति।।३६००।।

ये धन्यवादभाषाविमुखाः केचन शठा विलोक्यन्ते।
दीर्घे पदे स्थिता अपि ते पाश्चात्या भवन्त्येव।।३६०१।।

ये धन्यमयीं वाणीं मुखे स्वकीये न कुर्वन्ति।
प्रोज्ज्वलकाया अपि ते कुष्ठाऽगारत्वमायान्ति।।३६०२।।

विश्वस्मिन्नेतस्मिन् सर्वे रूपे विराजितः शंभुः।
नूनं स धन्यवादैः शब्दैर्नीराजितो भवति।।३६०३।।

१३६.विरोधः

कालः कथं व्यतीयादितिचिन्ता नो विधातव्या।
कालस्य यापनार्थं सन्त्येवैते विरोधिनो भावाः।।३६०४।।

यदि नहि गच्छति कालः कथमपि कस्यापि संसारे।
नूनं तेन विरोधः प्रबलैस्तैस्तैर्विधातव्यः।।३६०५।।

कस्मादपि कारणतामाप्ताद् वार्ताप्रवाहाद्वा।
घटनावलिमध्ये वा सुलभास्ते ते विरोधकणाः।।३६०६।।

यदि नैव दृष्टिपथमागच्छेयुश्चेद् विरोधसंभाराः।
कल्पनया तेषामथ कल्पयितव्या नवा स्फूर्तिः।।३६०७।।

लध्वपि विरोधभावे किञ्चिद्दोलामथारूढे।
कालस्तावदपर्याप्तो नूनं जायते निखिलः।।३६०८।।

निखिला अपि निःश्वासाः समर्पितास्तत्र जायन्ते।
सर्वा स्पन्दनलीला संलग्ना संप्रजायते तत्र।।३६०९।।

धार्मिकपुरुषाणामप्यधार्मिकैः सह विरोधोऽसौ।
यदि न स्यात् तेषामथ सत्ता सन्दिग्धतां गच्छेत्।।३६१०।।

विद्वन्मूर्खविरोधो नित्यः सततं प्रजागर्ति।
कर्मण्यानामपि वाऽकर्मण्यैः सह विरोधोऽस्ति।।३६११।।

अद्य श्वो वा पुनरथ सप्ताहे वाऽथ मासे वा।
वर्षाऽनन्तरमथवा विरोधफलमाप्नुयान्मनुजः।।३६१२।।

लीला काचित् सैषा विस्तारेषु प्रदृश्यते सततम्।
यैवेङ्गितेन सततं विरोधरूपं समादिशति।।३६१३।।

आघातैरपि नूनं प्रत्याघातैः परुषवाक्यैः।
सैषा विरोधरूपावलिरित्थं विस्तृता भवति।।३६१४।।

यदि नैषा भावानां विरोधमयता विलोकिता भूयात्।
न्यायालयस्य सत्ताशून्यत्वं सम्प्रजायेत्।।३६१५।।

किं बहुना च विरोधे लुप्ते प्रलयः प्रजायेत्।
साम्ये सर्वलयः स्यात् वैषम्ये विद्यते विश्वम्।।३६१६।।

एकत्वे न विरोधो नैकत्वे तावदस्य संभूतिः।
एकत्वे तु कदाचित् संसारो नैव तिष्ठेत।।३६१७।।

तस्मादयं विरोधः संसारं चालयति निखिलम्।
यत्र विरोधः सततं काचित्तत्रैव विस्फूर्तिः।।३६१८।।

ईर्ष्यास्पृहयोर्मध्ये विरोधभावः समुन्मिषति सत्यम्।
तत्रेर्ष्या पतनार्थं स्पृहा तु तावत्समुन्नतये।।३६१९।।

एष विरोधः सत्तामात्रे सर्वेषु कालेषु।
येन विना न समुन्नतिरेषा साम्मुख्यमायाति।।३६२०।।

कस्यामप्येकस्यां समुन्नतौ सम्प्रजातायाम्।
ज्ञाताज्ञातविरोधो पश्चात् संज्ञायते विपुलः।।३६२१।।

शाश्वतिकस्तु विरोधो निहितोऽस्मिन् प्राणिवर्गे वा।
विख्यातो विश्वस्मिन् का वा गणना प्रदीयतां तत्र।।३६२२।।

आकस्मिको विरोधो योऽसौ सांमुख्यमायाति।
अस्तव्यस्तदशायां स प्रापयते क्षणेनैव।।३६२३।।

मारणमोहनमथवा सर्वोच्चाटनमयं तन्त्रम्।
सर्वा विरोधमयता नूनं तत्राऽपि लोकनीयैव।।३६२४।।

यो वा वदति समक्षे विपरीतं सोऽत्र दण्डनीयः स्यात्।
दण्डोऽपि तादृशः स्यात् विलोपितं वैपरीत्यं स्यात्।।३६२५।।

अस्मिन्दण्डविधाने यदि मृत्युर्जायते विरुद्धस्य।
साऽपि स्वीकरणीया विरोधलीला विचित्रेयम्।।३६२६।।

एषा विरोधलीला कणे कणे वा क्षणे क्षणे चैव।
सन्दृश्यते समन्तात्तस्यैव तु नाम "संसारः"।।३६२७।।

युद्धानामुन्मादाङ्कितमेतद्विद्यते रूपम्।
सर्वो विरोधभावः पूर्णतया दर्शनीयोऽत्र।।३६२८।।

लघुतरलघुतमयुद्धं ततो बृहद्युद्धमद्भुतं युद्धम्।
अथ च महायुद्धानां विरोधरूपायितं युद्धम्।।३६२९।।

संसारस्यैतिह्ये युद्धानामस्ति साम्राज्यम्।
युद्धोन्मादे विश्वं समाधिकसभ्यं नु संजातम्।।३६३०।।

युद्धविरोधं कर्तुं सन्धिविधानं समादर्तुम्।
कृतसंनाहास्ते ते संसारे सन्ति सत्पुरुषाः।।३६३१।।

युद्धं विरोद्धुमेते प्राणानप्याहुतीकृत्य।
विश्वेषां रक्षायै प्राणानप्यर्पयन्तितराम्।।३६३२।।

इतिहासेषु समस्तेष्वेतास्ताः सन्ति गाथानाम्।
रचनावलयो यत्र तु विरोधरूपं स्फुटीभवति।।३६३३।।

शान्तौ सर्वं सुस्थं सा शान्तिः काम्यते सर्वैः।
यदि हि विरोधो न स्यात् कथमेषा संप्रकल्प्येत।।३६३४।।

शान्तौ श्मशानरूपं विरोधमात्रे तु चाञ्चल्यम्।
तत्र समीकरणानां जीवनयोगः समुन्नेयः।।३६३५।।

१३७.कालिदासः

अयि, कालिदास, तुभ्यं प्रणाममाला निवेदनीयेयम्।
त्वं सर्वकाव्यसुषमाप्रजापतिर्माननीयोऽसि।।३६३६।।

तव कालिदास नाम्नो कश्चिन्मधुरः समुद्योतः।
आबाल्यान्मोहयते सर्वेषामेव हृदयानि।।३६३७।।

रघुवंशपद्यमालाकथाप्रथाचालिता तव या।
बाल्यात्प्रभृति सुपठिता पाठितविभवा समाभाति।।३६३८।।

सा नन्दिनिपरिचर्या सम्राजो विश्वदीपस्य।
दिव्यदिलीपवरेण्यस्याऽस्ते मालैव काव्यानाम्।।३६३९।।

गङ्गा-प्रपात-सीमा-गौरीगुरुगह्वरोन्मेषे ।
सिंहेन सा परीक्षा विश्वं संस्तम्भयामास।।३६४०।।

त्वं कालिदास, काव्याऽमृतनिर्झरपर्वतो नूनम्।
तव कवितानिर्झरिणी रोमाञ्चालिं विलासयति।।३६४१।।

तव मेघदूतकल्पनमभिनवमेकं समुच्छलितम्।
शतशः सहस्रशो वा रचनास्तन्मार्गगामिन्यः।।३६४२।।

ऋतुसंहारं नित्यं निपीय सर्वा ऋतुव एतास्तु।
मनसि विलासितविभवा मानसमन्यं प्रकुर्वन्ति।।३६४३।।

तव संसारेऽप्रतिमं दिव्यकुमारादिसंभवं काव्यम्।
लेखनकमनीयत्वे सीमानं धारयत्येव।।३६४४।।

पर्वतराजो विलसति नानानववाक्यरत्नसंश्लिष्टः।
यत्रोन्माथितसीमासौभाग्यं दृश्यते कवीन्द्राणाम्।।३६४५।।

कामचरेणादिष्टं कृत्वा पर्वतसुपुत्री सा।
शंभोराराधनया कामान् सर्वान्समापयाञ्चक्रे।।३६४६।।

किन्तु, ततः किं जातं जाता सृष्टिर्विशृङ्खलिता।
कामे लुप्ते कथमिह प्रचलतु सृष्टिः क्षणायाऽपि।।३६४७।।

तदा प्रभृति कामोऽयं नीरूपः सन् मनोमयो जगति।
विचरति विभुतामेकां त्रयीमयीं साधु बिभ्राणः।।३६४८।।

शंभुस्तपस्विनामथ सर्वेषां शेखरीभूतः।
पर्वतराजसुपुत्री ततोऽधिकं तत्तपस्तेपे।।३६४९।।

चलिताऽसनश्च शंभुर्बटुरूपं स्वयमिहाऽस्थाय।
नाना नव सन्देहान्मन्देहानपि पुरः स्थितानकरोत्।।३६५०।।

सर्वानपि तानेतान्प्रश्नानुत्तरमुखानकरोत्।
कविकुलगुरुसंरचिता कविता सेयं जगद्वन्द्या।।३६५१।।

सूक्तिसहस्रद्योतितविश्वात्माऽसौ कविः साक्षात्।
भारत्या वीणामिव कवितायां धारयामाम।।३६५२।।

जगतां मातुर्देव्याः पार्वत्याः काव्यमयपूजाम्।
कृत्वा स्वीयं दास्यं भावं विस्तारयामास।।३६५३।।

जगतामाद्यं पितरं सर्वेषां संविधातारम्।
मूर्त्यष्टके नमस्यन् सर्वां शोभां वशीकृतवान्।।३६५४।।

शाकुन्तले तदीया दिव्यतमा कल्पनाशैली।
आकारयति समस्तं सौन्दर्यं काव्यवाणीनाम्।।३६५५।।

काव्येषु नाटकमिदं रमणीयं तत्र रमणीयम्।
शाकुन्तलमिदमेषा भणितिर्वा सुप्रसिद्धैव।।३६५६।।

शर्मण्यदेशनाटककारो गेटे समालोक्य।
प्रस्तावनां तदीयां मुग्धो नूनं बभूवाग्रे।।३६५७।।

काव्यालंकाराणां वशीकरणमन्त्र इव साक्षात्।
कुविकुलगुरुरयमाऽस्ते शब्दार्थानां परीपाके।।३६५८।।

रसनिष्यन्दे सिद्धिर्या लभ्या कलिदासकवितायाम्।
नाऽस्ति तदीया तुलना देशे काले च निखिलेऽस्मिन्।।३६५९।।

भुवनोदयसंस्थितिलयहेतुः शंभुः प्रसादितो येन।
गौरी प्रसादिताऽऽसीन्नित्यं सेयं जगन्माता।।३६६०।।

तस्य सुकवितासिद्धिः केन कथं वर्ण्यतां नाम।
मर्यादागुम्फानां सोऽयं कश्चिच्चमत्कारः।।३६६१।।

भारतवर्षस्याऽस्ते दिव्या सा काऽपि सम्पत्तिः।
या वर्णिता स्वकीयैरसधारावर्षिभिर्वृत्तैः।।३६६२।।

संस्कृतिरेषा नित्या नित्यं तद् वर्णनात्मकं शास्त्रम्।
नित्येयं तत्पूजनसमुद्यता काव्यमयवाणी।।३६६३।।

आस्तिकतायाः संस्थितिरेषा नित्यैव संस्कृतावस्याम्।
परमेश्वरसंस्मरणं नतमां दूरीभवत्यत्र।।३६६४।।

एकान्ते कमनीया-कविता श्रीकालिदासस्य।
कान्तेवाल्हादयते हृदयं सहृदयधुरीणानाम्।।३६६५।।

शृङ्गारसारधारा परमा कविभिः समाराध्या।
तत्र च ललितोद्गारे सिद्धो गुरुरेक एवाऽयम्।।३६६६।।

सर्वेषामन्येषां दिव्यरसानां परीपाकः।
शुभ्रकथाधारायां सहृदयहृदयान्विमोहयते।।३६६७।।

उक्तं तेनैवाऽसीद्रघुवंशस्यादिपद्येषु।
कवियशसां सम्प्रार्थी कश्चित् कविरस्मि तावदहम्।।३६६८।।

कस्याऽन्यस्याद्यावधि सुयशो लाभो नु संजातः।
नव्ये भव्योन्मेषे तथा यथा कालिदासस्य।।३६६९।।

मालविकासौन्दर्यं कमनीयं कवयता तेन।
नृत्यकलायामतिशयभावो व्याख्यात एवाऽस्ते।।३६७०।।

एषोऽग्निमित्रनामा नायकतामागतो राजा।
वीरः स्वभावचतुरो धीरो ललितः कलाप्रेमी।।३६७१।।

यत्र मनः संलग्नं यत्राऽस्ते वा मनो मुदितम्।
कमनीयमिदं काव्यं दासीकुरुतेऽखिलं लोकम्।।३६७२।।

जानाति कालिदासो वशीकरणमत्र सन्मनसाम्।
कमनीयतमं विश्वं रचयितुमसमं हि तस्य सामर्थ्यम्।।३६७३।।

कोटिजनैः सम्पठितं विद्वद्व्याख्यातमार्यपथजुष्टम्।
आचार्यकं सुनिपुणं दधानमेतस्य सच्छन्दः।।३६७४।।

संस्कृतभाषा सेयं व्यवहारे सम्प्रयुज्यमानाऽसीत्?।
प्रश्नस्यास्योत्तरमथ नाटकरचनासु कालिदासोक्तिः।।३६७५।।

पारस्परिके तावद् वार्तालापे मनोरमे रचिते।
नानाविधपात्राणां या भाषा संस्कृता सैव।।३६७६।।

यदि सर्वेऽपि पठेयुर्यदि वा सर्वे समीक्षेयुः।
नूनं कदर्थितं स्याद् रसपूर्णं चापि सत्काव्यम्।।३६७७।।

केवलसहृदयगम्यः सोऽयं मार्गः समाम्नातः।
कतिपयहृदयस्पन्दनमात्रेणालोडयति विश्वम्।।३६७८।।

श्रीकालिदासकवितासदृशी कविता न सुलभाऽऽस्ते।
द्वित्रा एव हि विश्वे तथा विधाः सन्ति सत्कवयः।।३६७९।।

हिन्दी भाषायामथ तुलसीदासस्य तादृशो महिमा।
आग्लायां व विलियमशैक्सपियरस्तां भजति काष्ठाम्।।३६८०।।

एषैव वा प्रकथिता रससंसिद्धिस्तु कवितायाः।
कालानन्त्ये यस्या दीप्तिर्नो म्लानिमायाति।।३६८१।।

केवलरसपरवशतामात्रं नो कालिदासकवितायाम्।
संस्कृतिरूपं दिव्यं मानविकं चैव तत्र निर्णीतम्।।३६८२।।

भूमेश्चित्राणामथ ममत्वयुक्ता विलक्षणा शैली।
रसधारां परिपुष्टां शिष्टैर्जुष्टां विलासयति।।३६८३।।

नेयं कविता काचित्कदापि वा प्राक्तनी जाता।
तस्याः प्रासङ्गिकतामद्याप्यावेदयन्ति विद्वांसः।।३६८४।।

भौगोलिकसौन्दर्यं काव्ये तस्मिंश्च मेघदूताऽख्ये।
मधुरादपि मधुरतरं क्वाऽन्यत्रान्यत्र संदृश्यम्।।३६८५।।

सर्वोपरि या सुषमा द्योतितविभवाऽस्ति कालिदासवाणीनाम्।
सा सुप्रसन्नशैली सद्योऽर्थं या पुरस्कुरुते।।३६८६।।

केचित्तथा विधा अपि विद्वांसः सन्ति भूमिवलयेऽस्मिन्।
सारल्यं कवितायां ये न कदाप्यादेरण पश्यन्ति।।३६८७।।

सर्वेऽपि यदि विजानन्त्यानन्दं काव्यवाणीनाम्।
नूनं तदिदं दैनिकपत्रं जातं न कविता सा।।३६८८।।

तत्रैवाऽन्ये कथयन्त्येतत्साधु प्रघुष्टं भोः।
या व्यंजनाऽथ काव्ये तां सर्वे नैव जानन्ति।।३६८९।।

शब्दानां मुख्योऽर्थो लभ्यो यदि जायते विनाऽयासम्।
सा सुप्रसन्नभाषा कवितायां योजनीया स्यात्।।३६९०।।

किन्तु तदा सारल्ये सुगभीरार्थस्य विज्ञाने।
व्यंजनया या काचिच्चमत्कृतिर्नैव सर्वगम्या सा।।३६९१।।

कठिनायां रचनायां वाक्यार्थ-ज्ञान-वेलायाम्।
टीकानां परिचर्या सर्वां बुद्धिं विशोषयति।।३६९२।।

तदुत्तरं व्यंग्योऽर्थो यदि लभ्यस्तत्र यः श्रमो बुद्धेः।
सौन्दर्यमयी सरणिस्तेन तु दूरात् पलायिता भवति।।३६९३।।

तस्मात्प्रसादयुक्ता या शैली सा प्रशस्यते सर्वैः।
द्राक्षापाकः सोऽयं कवितायां राजशेखरैः कथितः।।३६९४।।

कविताऽध्ययनविलासे सद्यश्चार्थे समागते बुद्धौ।
आधारभित्तिरूपो व्यंग्योऽप्यर्थो नु संस्फुरति।।३६९५।।

तस्यार्थस्य न सीमा नो वा देशोऽथवा कालः।
तस्य नियमनं तावत्कथमपि नो शक्यमास्थातुम्।।३६९६।।

आहार्यं सर्वं तत्तत्राऽविर्भूतिरर्थानाम्।
नाना नव नव सुषमा संयुक्तानां च चित्राणाम्।।३६९७।।

श्रीकालिदासकवितालहरीयं प्रेरणापुंजा।
नो केवलकाव्यानामपि तु विशेषेण नियमानाम्।।३६९८।।

श्रीकालिदासकवितामेवाऽधारां समाश्रित्य।
ध्वन्याऽलोकरचयिता नृत्यन्नानन्दवर्धनो जयति।।३६९९।।

क्षेमेन्द्रेण समस्ता कविताऽसौ कालिदासीया।
स्वीयौचित्यविचारैः सुचर्चिता नियममास्थाय।।३७००।।

मम्मटभट्टः काव्यप्रकाशसंरचनवेलायाम्।
पदे पदे संकेतैः प्रणमति कविकुलगुरुं स्वान्ते।।३७०१।।

कण्ठाभरणान्ताख्ये शृङ्गारस्य प्रकाशे च।
भोजः प्रणमति नितरामोजो भरितैरलंभावैः।।३७०२।।

श्रीराजशेखरोऽसौ स्वयमपि सिद्धः कविः कश्चित्।
कविकुलगुरुप्रणामानां परिपाटीं पुरस्कुरुते।।३७०३।।

शब्दार्थालङ्काराः करौ निजौ सम्पुटीकृत्य।
अहमहमिकामनुपमां माधुर्यैरञ्चितां याताः।।३७०४।।

कस्मिन्रसे न पाको लभ्यो वा कालिदासरचनासु।
कस्मिंश्चालंकारे नो प्रेमा प्रकटितं तेन।।३७०५।।

गुणरीतिवृत्तिरुचिरौचित्यैरत्यन्तमञ्चिता वाणी।
पदे पदे रमणीया कस्यान्यस्यास्ति सहृदया भणथ।।३७०६।।

आस्तिकतोतप्रोताः कथानकाः कालिदासेन।
शोधं विधाय काव्यामृतधारायां सुरूपितास्ते ते।।३७०७।।

लोकाराधनकर्मणि निरतो लोकस्य पूजार्थम्।
रचनानवपुष्पाणां मालां लोके समर्पितवान्।।३७०८।।

तेनैव लोकतन्त्रात्मकशासनवर्तने जाते।
कविकुलगुरुरद्यायं स्वीयं जयघोषमाशृणोत्येव।।३७०९।।

यत्रैव संस्कृतानां विद्यानामालया दृष्टाः।
श्रीकालिदासजन्मोत्सवदिवसस्तत्र मानितो दृष्टः।।३७१०।।

नानाशास्त्रपरिश्रममथितस्वान्ताश्च विद्वांसः।
श्रीकालिदासकाव्यान्यालोच्यालोच्य हर्षिता एव।।३७११।।

नाना नवीनरचनाः पुस्तकलेखेष्वनन्तेषु।
अनुदिनमनुपमदीप्त्या कविगुरुमेनं प्रपूजयन्त्येव।।३७१२।।

१३८.शङ्कराचार्याः

शङ्करभगवत्पादं शिवाऽवतारं समाश्रये सुखदम्।
कल्याणमालिकानां वितरणकर्तारमात्मसंतुष्टम्।।३७१३।।

मानवतेयं धन्या सञ्जाता यत्कृपालेशैः।
आविर्भूतः प्रथमः स श्रीमान् शंकराचार्यः।।३७१४।।

भूवलये धन्यतमः सर्वोऽयं कालटीभागः।
यत्रत्य धूलिकणिका संहर्ता शंकराचार्यः।।३७१५।।

सा माता धन्यतमा यस्याः कुक्षौ समवतीर्णम्।
निखिलागमस्वतन्त्रं सत्यं सच्चिन्मयं ज्योतिः।।३७१६।।

प्रणमामो गोविन्दं भगवन्तं सद्गुरुं नित्यम्।
यस्य च शिक्षा फलिता जगद्गुरुत्वे स्वयंवृता काचित्।।३७१७।।

वन्दितदिव्यचरित्रः परमपवित्रः सवित्रात्मा।
भूतभविष्यन्मध्ये विभूतिरिव वर्तमानोऽयम्।।३७१८।।

ज्योतिः किञ्चन साक्षाद् भासितमासीत्तु भूमिवलयेऽस्मिन्।
यच्चाऽनन्तं कालं सम्यक् संस्तम्भयामास।।३७१९।।

कालोऽयं कलिरूपः सत्ययुगादपि समुन्नतो जातः।
यस्मिन् शंकरभगवत्पादैरवतारः संगृहीतोऽयम्।।३७२०।।

धन्या मानवतेयं सञ्जाता शंकराचार्यः।
स्वयमवतीर्य समस्यां सर्वां संसाधयामास।।३७२१।।

वेदानामथ मननं विधाय तद्वै समुन्नतं तत्त्वम्।
व्याप्तं परमनिगूढं वैशद्येनाथ घोषयामास।।३७२२।।

उपनिषदां व्याख्यानं कृतवान् वेदात् पृथक् कृत्वा।
भाष्याणां सा सरणिः प्रणम्यभावं समानीता।।३७२३।।

तासामथ सर्वासामुपनिषदामुपरि भाष्यसंरचना।
शंकरभगवत्पादैर्या वै विहिता सुधा सैव।।३७२४।।

तदनन्तरमुपनिषदां महत्त्वमग्रे परिस्फुरितम्।
अद्वैततत्त्वमयता सर्वासां सुस्फुटा जाता।।३७२५।।

तदिदं किञ्चन तावद्विलक्षणं दिव्यताभरितम्।
विज्ञानं विद्योतितमभवच्छ्रीशंकराचार्यैः।।३७२६।।

व्याख्या तावदियं सा गरीयसी शंकराचार्यैः।
उपनिषदां या रचिता संसारे निधिरयं कश्चित्।।३७२७।।

पंचमवेदविवर्ते दिव्ये तस्मिन् महत्त्वसंपूर्णे।
गीता संग्रथिताऽसीन्महन्महाभारते ग्रन्थे।।३७२८।।

वेदव्यासविरचना सेयं क्रोडीचकार तत्सर्वम्।
मानवजीवनमध्ये समुन्नतं यत् प्रकाम्यं वा।।३७२९।।

तत्र च गीता दिव्या श्रीकृष्णेनार्जुनाय संदिष्टा।
शंकरभगवत्पादव्याख्यानं संप्रतीक्ष्यमाणाऽसीत्।।३७३०।।

तदुपरिभाष्यविरचना कृता समासीत्तु शंकराचार्यैः।
तदवधि गीता गीता जाता सर्वासु जनतासु।।३७३१।।

अद्वैतस्य समुद्रं तरङ्गितं वा न पश्यन्तः।
दिग्भ्रान्ता इव मूढा जन्मनि सुखदुःखमायान्ति।।३७३२।।

अद्वैताख्यं तत्त्वं गीतायां गीतमेव कृष्णेन।
तत्सन्देशं लब्ध्वा पार्थो विजयी बभूव संग्रामे।।३७३३।।

पार्थत्वं ननु जातिः काचन सर्वेषु देहेषु।
काले काले स्वीयं रूपं सम्यक् प्रकाशयत्येव।।३७३४।।

अद्यापि सैव गीता श्रीकृष्णस्यैव मुखकमलजाता।
सर्वविधं पार्थत्वं पदे पदे संदिशत्येव।।३७३५।।

सर्वमपीदं तत्त्वं गीताभाष्यस्य रचनायाम्।
शङ्करभगवत्पादैः प्रकाशितं सर्वदा जयति।।३७३६।।

यद्यप्यासीद् गीता महति महाभारते विमला।
किन्तु महत्वं तस्याः प्राथम्येन प्रकाशितं भाष्ये।।३७३७।।

तावत्प्रभृति समेषामाचार्याणां च विदुषां च।
दृष्टौ गीता काचित् विपुलज्ञाने नदीऽगाधा।।३७३८।।

यद्यपि शङ्करभगवत्पादैर्व्याख्यायिता गीता।
तत्रैव पूर्वभाष्याणामपि संकेत आदत्तः।।३७३९।।

किन्तु न मिलितान्येतान्यद्यावधि भाष्यरूपाणि।
शङ्करभगवत्पादैरारचितं भाष्यमेवाऽद्यम्।।३७४०।।

अग्रे तु प्रस्थानत्रयमध्ये सुप्रतिष्ठिता गीता।
नाना व्याख्यानानां केन्द्रीभूतैव संजाता।।३७४१।।

अद्वैतवादविमतैरप्याचार्यैर्मता गीता।
सर्वा सा परिपीता कर्ममये जीवने सर्वैः।।३७४२।।

गीताऽमृतमिदमतुलं संपश्यन् शङ्कराचार्यः।
नूनं निखिलं तेजो धारितवांस्तद्विचारेषु।।३७४३।।

येयं मर्यादाया गरिमा काचित् समुच्छलति।
सर्वोऽयं सन्देशः करुणापूर्णस्य शङ्करार्यस्य।।३७४४।।

श्रीव्यासेनविरचितं दिव्यतमं ब्रह्मसूत्रं तत्।
शारीरिकेणभाष्येणाऽसौ स्वच्छं प्रकल्पयामास।।३७४५।।

वेदान्तडिण्डिमानां घोषश्चासीत् समुच्छलितः।
वैचारिकसंघर्षाणामप्येषाऽसीद् विलक्षणा सरणिः।।३७४६।।

उपनिषदामतिगहने ज्ञानवने संचरन्नित्यम्।
दिव्यफलानामन्वेषणसेवामात्मसाच्चक्रे ।।३७४७।।

दर्शनसारैः सर्वैरोतप्रोतानि भिक्षुसूत्राणि।
श्रीबादरायणकृतान्याभाषितवान्सुनैर्मल्यैः ।।३७४८।।

सर्वेषामथ तेषां तेषां विख्यातदर्शनानां वा।
सुगभीराणि मतानि तु नूनं विक्षेपयाञ्चक्रे।।३७४९।।

ज्ञानस्याद्याकाशे सूर्याचन्द्रायितं येन।
प्रातः स्मरणीयोऽसौ पुण्यश्लोकोऽस्ति शङ्कराचार्यः।।३७५०।।

स्वयमेव श्रीव्यासश्छन्नतया यत्समीपमागत्य।
शास्त्रार्थं च वितन्वन् स्वात्मानं तोषयामास।।३७५१।।

विद्यारण्यविरचितं शङ्करदिग्विजयमालोच्य।
शङ्करभगवत्पादे जातं विनयोज्वलं चेतः।।३७५२।।

इतिहासानां मध्ये विभूतिसारैर्विभूषितविभावैः।
बुद्धादूर्ध्वं पुरुषो न दृष्टिपथगो विभात्यद्य।।३७५३।।

विमता येन ध्वस्ता वैदिकमार्गाः प्रकाशिताः सम्यक्।
सर्वो लोको नूनं नित्यं सच्छिष्यतां नीतः।।३७५४।।

दिव्यं जगद्गुरुपदं स्वयमेवोपायनीकृत्य।
भारतजनता तुष्टा मानवता चापि संतुष्टा।।३७५५।।

पोषितचरित्रचित्रैर्विभूषितं वा चराचरञ्चैतत्।
शङ्करभगवत्पादध्यानैरानन्दितं जातम्।।३७५६।।

सर्वेषामपि तावद्देवानां चाऽथ देवीनाम्।
दिव्याः स्तुतयो रचिता विनिर्मलैश्छन्दसां निचयैः।।३७५७।।

सर्वेषामथ तेषां स्तुतिरूपच्छन्दसां महिमा।
सत्यं सत्यमनन्तं सुखसंसारं समानयति।।३७५८।।

सौन्दर्यलहरिकायाः प्रवाहमालानिमग्नानाम्।
भक्तानां हृदयानां या भाषा सन्ति ते मन्त्राः।।३७५९।।

भजगोविन्दस्तोत्रे जनजनमानसविराजिते दिव्ये।
कल्याणानां करुणां धारां विस्तारयाञ्चक्रे।।३७६०।।

वाराणसीनिवासे लीलानां दिव्यचित्राणि।
संपश्यन् विचचार स्वच्छन्दं शङ्कराचार्यः।।३७६१।।

श्रीविश्वनाथपूजनजगदम्बार्चननिवेदनेन विश्वेशम्।
कोटीनपि तान्देवानावाहितवान् विभावनाभरितः।।३७६२।।

सर्वेषामथ तेषां देवानां तुष्टिमातन्वन्।
गाङ्गं पयः पिबन्नथ विरजोरूपे विराजितो जातः।।३७६३।।

नास्तिकतासिद्धान्तान् विवादमध्ये समाहूय।
ज्ञानाऽग्निकुण्डमध्ये यज्ञे स्वाहा चकार विक्षिप्तान्।।३७६४।।

बुद्धो योऽसौ जातोऽवताररूपस्तदुपदेशान्।
धूर्ता विपरीततया काले विस्तारयामासुः।।३७६५।।

आसीद् धूर्तैरेभिस्तादृशमाच्छादितं सर्वम्।
ज्ञानस्य गगनमेतत् कालाऽवरणैर्यथा मेघैः।।३७६६।।

वेदान्तपवनवेगैर्विच्छिन्ना बौद्धमेघास्ते।
भारतवर्षाऽऽकाशं विहाय दूरे गता एव।।३७६७।।

वाग्युद्धानि वितन्वन् बौद्धाचार्यैः सहैव सहसैव।
तेषां पराजयानामितिहासे लेखनं चक्रे।।३७६८।।

मीमांसकान् विवादे सम्यक् सच्छिष्यतां नीत्वा।
नाना शास्त्रार्थानां जनतायां सम्प्रवर्तनं चक्रे।।३७६९।।

आसेतुराहिमाचलमथाटकात् कटकपर्यन्तम्।
पद्भ्यां विचरन् नित्यं जनजनसन्दर्शनं चक्रे।।३७७०।।

दिव्यानथ तान्देवान्दिक्कोणेषु प्रतिष्ठितानपि वा।
संपूजयन्निकामं सन्तुष्टः शङ्करस्वामी।।३७७१।।

यत्र हि जगाम जनता कोटौ कोटौ प्रयान्तीयम्।
दर्शनवन्दनभाषणविनिमयरूपेण धन्यतां भेजे।।३७७२।।

राजानो येऽप्यासंस्तस्मिन् कालेऽथ संसारे।
वैभवमतुलं स्वीयं तच्चरणे प्रार्पयामासुः।।३७७३।।

स्तोत्राणां सा काचिद्दिव्या रचनावलिर्जयति।
तस्या उद्भवसंस्था आचार्यस्तोत्रमालेयम्।।३७७४।।

जीवेश्वरयोर्मिलने विन्दुत्वं सम्प्रयातानि।
स्तोत्राक्षराणि शाश्वतभावैर्नित्यं प्रपूर्णानि।।३७७५।।

यत्राऽस्माकं श्रद्धाधाराऽसौ संप्रवहमानाऽस्ते।
तत्रैव स्तुतिकाले चेतो नित्यं निबद्धतां याति।।३७७६।।

अद्वैतदर्शनस्याऽविर्भावे यन्मनो लग्नम्।
तेन कथं देवानां स्तोत्राणीमानि रचितानि।।३७७७।।

द्वैतत्वे तत्सर्वं स्तोत्रं प्रक्रम्यतां नाम।
कथमद्वैते स्तोत्रं, तत्र द्वैतत्वमायातम्।।३७७८।।

सन्देहोऽयं तावद् द्वैते ज्ञाने समुत्थितो भवति।
अज्ञाने तु द्वैताऽवस्थैवाऽत्राऽनुभूयमानाऽस्ते।।३७७९।।

अज्ञानावस्थातो ज्ञानावस्थं मनो यथा भूयात्।
तस्यार्थे सात्विकतासंगतिरावश्यकी कथिता।।३७८०।।

अज्ञानाऽवस्थायां द्वैते बुद्धौ प्रजातायाम्।
अद्वैतभावनार्थं स्तोत्राणीमानि धार्यन्ते।।३७८१।।

अद्वैते तु तदेकं दृश्यं द्रष्टा च नो किंचित्।
रूपं मृग्यं जातं केवलमेकं हि तत्त्वं तत्।।३७८२।।

नूनं तस्या एवोच्चाया भूमेरवाप्त्यर्थम्।
नाना जन्म गृहीतं नाना रूपाणि चाप्तानि।।३७८३।।

नानाभावविलोपो नानात्वेनैव सम्भाव्यः।
एतत्तत्वं मत्वा स्तोत्राणां पद्धतिः सेयम्।।३७८४।।

द्वैताऽवस्थास्थितिरप्येषा निर्मूलतां यायात्।
तस्मिन्नर्थे चैते देवा एवोपकुर्वन्ति।।३७८५।।

अद्वैताऽवस्थायां यदा स्थितिर्जायते नाम।
नूनं तदा न संस्तुतिरप्येषा वाऽदृता भवति।।३७८६।।

या साहित्ये सेवा विहिता श्रीशङ्कराचार्यैः।
नैकशताब्दीं यावत्साऽद्याप्यायात्यविच्छिन्ना।।३७८७।।

पुनः समाजे दृष्टिर्याता श्रीशङ्करार्याणाम्।
वैदिकमार्गविलोपस्तेषां दुःखाकरोति चेतः स्म।।३७८८।।

वैचारिकसंघर्षे बौद्धान् सम्यक् पराजित्य।
वैदिकविश्वासानां दीप्तिः काचन समाहूता।।३७८९।।

आस्तिकताया घोषो नूनं तैरेव तादृशो विहितः।
भूमण्डलमिदमखिलं दिव्यैर्भावैर्विमण्डितं जातम्।।३७९०।।

नानाऽवतारचर्चा परमेश्वररूपचित्रेषु।
जनताया हृन्मन्दिरमध्यस्थेयं पुनर्जाता।।३७९१।।

वर्णाश्रममर्यादा देशे संस्थापिता जाता।
शान्तिः काऽप्यवतीर्णा समृद्धिमयता समायाता।।३७९२।।

वैराग्याविष्कारे नूनं तैर्यन्मनो दत्तम्।
संन्यासाश्रमधारा काचित् नूत्नाऽत्र संजाता।।३७९३।।

दशनाम्नां संन्यासाश्रमनिष्ठानां विभूतिरूपाणाम्।
आविर्भावे जाते लोको वैराग्यमापेदे।।३७९४।।

वैराग्यमयी धारा नतमां साधारणी काचित्।
नैवेयं संघर्षात्पलायने कापि सरणिः स्यात्।।३७९५।।

जीवनसफलीकरणे वैराग्यस्यैव धारेयम्।
पूर्णतमं स्वाराज्यं जीवनमध्ये समादिशति।।३७९६।।

सर्वासां सिद्धीनां साम्राज्ये संस्थितो भूत्वा।
दूरे संस्थित आसीन्मुक्तो मुक्तिप्रदाताऽयम्।।३७९७।।

देशस्य चतुष्कोणे पीठानां स्थापनां कृत्वा।
सात्त्विकमर्यादानां परिपालनभावमातेने।।३७९८।।

अद्यापि तेषु पीठेष्वासीनाः शङ्कराचार्याः।
सात्त्विकसद्भावानां प्रचारकार्येषु लिप्यन्ते।।३७९९।।

शङ्करभगवत्पादैर्या या सरणिः प्रवर्तिता दिव्या।
सा सैवाऽद्य समस्ते देशे परिपाल्यते नाम।।३८००।।

सोऽयं भारतदेशोऽद्यत्वे तद्दिष्टमार्गाणा-
मवलम्बनमथ कृत्वा जगद्गुरुत्वं विधारयत्येव।।३८०१।।

इतिहासानां स्वर्णिमपृष्ठेषूत्तमविभाभरितम्।
नानाऽसंख्यैश्चरितैस्तदिदं विभ्राजते ज्योतिः।।३८०२।।

दर्शन-विचार-सरणौ शांकरसिद्धान्तमुज्झित्वा।
कोऽपि विचारः कर्तुं नतमामद्याऽस्ति शक्यसंपादः।।३८०३।।

स्तोत्राणां साहित्ये शङ्करवाक्यावलिः सेयम्।
सन्तर्पयति नितान्तं मानसमद्यापि सहृदयावल्याः।।३८०४।।

शङ्करचरितसमर्चनविधया नूनं महाकवयः।
छन्दोवितानमसमं नूनं विस्तारयन्त्यद्य।।३८०५।।

शास्त्रविचारावसरे शीर्षस्थः शङ्कराचार्यः।
सर्वैरेवोद्ध्रियते विक्षिप्तान् वा पृथक्कृत्वा।।३८०६।।

संन्यासिमण्डलानां सर्वस्वं शङ्कराचार्याः।
संन्यासिनां समाजे श्रेष्ठत्वं सर्वसम्मतं चाऽस्ते।।३८०७।।

ग्रन्थाऽगारे तावद् विलोक्यते ग्रन्थनिचयेषु।
शाङ्करसिद्धान्तानां ग्रन्थानां सा महीयसी संख्या।।३८०८।।

उत्तरदक्षिणभेदं विलोपयन्नूनमाचार्यः।
दक्षिणदेशोत्पन्नश्चोत्तरदेशेषु बभ्राम।।३८०९।।

जडजंगमजगतामथ सिद्धान्तेऽद्वैतमास्थाय।
ननु देशकाल भेदे का भाषा शङ्कराचार्ये।।३८१०।।

गङ्गारेवामज्जनमत्यंतेनादरेण संसाध्य।
नूनं पूतचरित्रो नेताऽसीच्छंकराचार्यः।।३८११।।

१३९.स्वातन्त्र्यवीरः

स्वातन्त्र्यवीरसावरकरवर्यं वीररसरूपम्।
निखिलजगत्संमान्यं मनसा ध्यायन्नरो धन्यः।।३८१२।।

परतन्त्रतानिगडितं देशं तस्या विमोचयितुम्।
स्वात्माहुतेः प्रदाता वीरः सावरकरो धन्यः।।३८१३।।

लन्दन-नगरे चरितं भारत-सम्मान-रक्षणं कर्तुम्।
स्मृतिमात्रेण सहर्षं सर्वेषां रोमहर्षणं कुरुते।।३८१४।।

निखिलजनान् बोधयितुं संचरिता लौहलेखनी तस्य।
वैदेशिकाऽनु दाहं कर्तुं प्रवृत्ताऽभूत्।।३८१५।।

सफलतमं विद्रोहं चर्चयितुं तेन विरचितो ग्रन्थः।
ख्यातो भारतशौर्ये नव्यां रूपावलिं तनुते।।३८१६।।

आग्लानां ग्रन्थेभ्यः पदे पदे वाक्यमुद्धृत्य।
निम्नत्वं तेषामथ समर्थितं वीरवर्येण।।३८१७।।

वैचारिक-संघर्षं सफलं सञ्चालयन् वीरः।
आग्नेयं स्वं रूपं स्वातन्त्र्ये दर्शयामास।।३८१८।।

सावरकर-कृतकार्यै-र्जनतायां तादृशी स्फूर्तिः।
संलक्षिता निकामं लेखैरथ भाषणैश्चापि।।३८१९।।

भयकंपिता तदानीं वैदेशिकशासका नितराम्।
नानाभियोगयोगं विधाय कारां समर्पयाञ्चक्रुः।।३८२०।।

यावज्जीवनकालं कारावासो वितीर्णोऽयम्।
केसरिणं विक्रान्तं पञ्जरबद्धं करोति स्म।।३८२१।।

सम्प्राप्ते स्वातन्त्र्ये छिन्नं तद् बन्धनं क्षिप्रम्।
कोटि-जनानां हृदयैः सुस्वागतमस्य तद् विहितम्।।३८२२।।

भारतराष्ट्रपतित्वे वरणीयो वा समर्चनीयोऽयम्।
सर्वपदेभ्यो दूरे तिष्ठन्नाऽसीन्नितान्तसन्तुष्टः।।३८२३।।

नाना भाषा-विरचित-सद्-ग्रन्थैर्ज्ञानसंसारे।
नव्यप्रकाशदानेनोपकृतं लोकमान्यमिव।।३८२४।।

हिन्दुत्वे मनुजत्वे जीवनमात्रस्य धन्यता तत्र।
संघोषिता नितान्तं निजलेखन्या प्रकाण्डसत्तर्कैः।।३८२५।।

काव्यकलामर्मज्ञो कथानकान् रोचकान् दिव्यान्।
साहित्यं वर्धयितुं विरचितवाननुभवैः स्वीयैः।।३८२६।।

भारतसंततिरित्थं तदीयचारित्र्यगङ्गायाम्।
संस्नान्ती स्वं रूपं परिचिनुयात्पूर्णरूपेण।।३८२७।।

१४०.जवाहरः

भारतधरणीभूषणभूतो भाग्यैर्विनिर्मितः कश्चित्।
दिव्यजवाहरलालेत्याख्यामण्डितमहापुरुषः ।।३८२८।।

मोतीलालसुपुत्रो जवाहरो निखिलविश्वविख्यातः।
सेवाव्रतिनां प्राज्ये साम्राज्ये राजमान एवासीत्।।३८२९।।

अयमेव लोकमहितो हीनं दीनं च भारतं वर्षम्।
पुनः सजीवं कृतवान् देशं नवचेतनाऽऽवेशम्।।३८३०।।

संसारमञ्चमध्ये ज्योतिः पुञ्जोऽयमाबभौ नितराम्।
सर्वेषां हृदयानां तादात्म्यं तत्र संजातम्।।३८३१।।

के वा भारतदेशं द्रष्टुं तावत्समुत्सुका नासन्।
यत्र जवाहरलालो जनता-हृदयाजिरे दृष्टः।।३८३२।।

साऽनेकलक्षजनतादृश्याली यन्मुखं द्रष्टुम्।
स्वरमाधुरीं च पातुं नेत्राग्रेऽद्यापि संस्फुरति।।३८३३।।

स्वीये जीवनकाले किं न कृतं वा जवाहरेणात्र।
स्पृहणीया त्रिदशैरपि सुषमा देशे समानीता।।३८३४।।

सत्याग्रहसंग्रामे साधारणसैनिको भूत्वा।
यूनामुत्साहोदधिमन्थेऽयं मन्दरो जातः।।३८३५।।

गान्धीहृदयेन्यवसज्जनता वा भारतीयेयम्।
तस्या हृदये नियतं जवाहरो राजते दीप्तः।।३८३६।।

भारतवर्षेऽस्मिन्नथ वयं स्वतन्त्राश्च विचरामः।
सर्वमभीष्टं कुर्मो जवाहरस्य प्रसादोऽयम्।।३८३७।।

क्षणमपि वृथैव नैकं संसारे यापितं तेन।
यत्नसहस्रैःपूरित आसीत् क्षणशो जवाहरः कश्चित्।।३८३८।।

यत्प्रावीण्यैर्देशे सर्वे देशाः स्वसौभाग्यम्।
मन्वानाः साहाय्यं सर्वविधं प्रेषयामासुः।।३८३९।।

लब्धा स्वतन्त्रताऽऽसीद्दुःखैर्दैन्यैरलं भरिता।
तामथ परिवर्त्तयितुं जवाहरोऽग्रे समायातः।।३८४०।।

अद्य तु सोऽयं देशः सर्वविधाभिः समुन्नतिभिः।
परिमेदुरितशरीरो विलोक्यते तन्मयो निखिलः।।३८४१।।

क्रूराणामाङ्ग्लानां देशान्निष्कासनायालम्।
युद्धेऽर्जुनोऽयमासीत्सारथिरासीत्तु मोहनोऽस्यापि।।३८४२।।

द्वापरकाले मन्ये न काप्यर्जुनेन निर्मितिः प्रथिता।
तेनैवात्र तु काले सोऽयं पुनरर्जुनः प्राप्तः।।३८४३।।

नरनारायणमध्ये नरावतारोऽर्जुनः ख्यातः।
अनुकूलैः किल तर्केरयमपि नरतां दधान एवासीत्।।३८४४।।

लोके प्रथितैवास्ते तस्योत्पत्तौ कथा दिव्या।
जन्मनि यद्दिव्यत्वं साऽप्यवतारत्त्वगाथैव।।३८४५।।

तेजोंऽशैः संभवनं गीतायां यत् समादिष्टम्।
गांधीजवाहरौ तन्नर-नारायण-रुचाऽलसताम्।।३८४६।।

राष्ट्रभुवः कमनीये कलेवरे राजमानोऽसौ।
साफल्यानां शीर्षे क्रीडति नित्यं प्रमोदमयमूर्तिः।।३८४७।।

बालेषु बाल आसीद् युवकानां कीर्तिरेवासीत्।
ज्ञानगरिम-भरितानां मध्ये ज्ञाननिधिरेवासीत्।।३८४८।।

दुःखविशोषितदेशे सद्यो नूनं निपातिता येन।
पुरुषार्थमयी गङ्गा प्रभातरङ्गैः परिव्याप्ता।।३८४९।।

सा साम्यवादसरणिः परीक्षिता तेन सा चापि।
सामाजिकवादानां सरणिरियं पूर्णमामृष्टा।।३८५०।।

अद्य जवाहरलालो नेहरूवर्यो न कैर्वन्द्यः।
जीवनमेतन्निखिलं शुष्यद् येनैव पल्लवितम्।।३८५१।।

१४१.राष्ट्रगुरुः

शक्तिसुपूजितकायं दूरितमायं सुपूजितं नित्यम्।
नवसुषमामयरायं हृदये चायं विधार्यतां सततम्।।३८५२।।

दिव्योत्तमसौभाग्यं वसुधाया धारितं येन।
राष्ट्रगुरुं गुरुवर्यं जगतां सततं समाश्रये धीरम्।।३८५३।।

नानासत्त्वसमर्पितसुषमासाम्राज्यसर्वस्वम ।
किमपि किमपि मधुराभिर्धाराभिर्भासितस्वान्तम्।।३८५४।।

को वा शक्तो वर्णनपरमां सौभाग्यपरिपाटीम्।
अङ्गीकर्तुं तस्य प्रभावितानैर्विमण्डितस्य द्राक्।।३८५५।।

नानाजन्मसमर्जितसर्वस्वैः संविधातारम्।
स्वामिवरेण्यं सततं समाश्रयामो विमुक्तिलाभाय।।३८५६।।

अथवा विमुक्तिरियमथ कियती मात्राऽस्ति तच्चरणे।
मानसमध्यविराजितरूपे सर्वस्य सौभाग्यम्।।३८५७।।

निर्दग्धसर्वपापं प्रशमिततापं प्रतीपानाम्।
सततं सुविहितजापं शुभसंलापं गुरुं वन्दे।।३८५८।।

जन्मसफलकर्तारं भर्तारं जीवनस्य सर्वस्य।
हर्तारं पापानां परिहर्तारं गुरुं वन्दे।।३८५९।।

अङ्गीकृतसर्वविधोदाराविर्भावभूषितं देवम्।
क्रमविक्रमसंक्रमणेष्वाशासंचारकं नौमि।।३८६०।।

कान्तिं कमनीयां तां सर्वविभाभासितां दिव्याम्।
दधतं भूषितकायं कमनीयाभं समाश्रये नित्यम्।।३८६१।।

प्राभातिकवेलावन्मनसा वाचाऽथ कायेन।
करुणामयतापूर्णं शुभभावैर्वन्दितं वन्दे।।३८६२।।

पीताम्बराभगवतीपीठस्य स्थापनेन रुचिराभम्।
कोटिजगद्वन्द्यतमं सद्गुरुवर्यं समाश्रये सुखदम्।।३८६३।।

स्वेच्छानिर्मितकायं स्वेच्छायां रमणकर्तारम्।
सर्वेशीध्यानपरं संततमाराधये देवम्।।३८६४।।

नानाजन्मसमर्जित-पुण्यानां पुञ्जितं रूपम्।
सर्वोद्धारकतत्त्वैरहमहमिकया परिव्याप्तम्।।३८६५।।

सर्वजगत्कमनीयं पूर्णं पुरुषोत्तमं दिव्यम्।
राष्ट्रगुरुं भक्तानामभयङ्करमाश्रये नित्यम्।।३८६६।।

सत्वरतापप्रशमनपूर्वं सुस्नेहमयधाराम्।
प्रावाहयत् स सहजो बन्धुर्वा जीवमात्रस्य।।३८६७।।

सर्वत्रेश्वरदर्शनमयी दृढ़ा दृष्टिरस्याऽसीत्।
सर्वसमयकरुणामयदृष्टिरसौ केन नहि वन्द्यः।।३८६८।।

त्रैकालिकशुद्धिं यो विधाय नितरां सुजागरितः।
संयमनियमसुबन्धुः कैवल्ये सुप्रतिष्ठितो दृष्टः।।३८६९।।

सर्वाबाधादूरीकरणे सम्यग् विवर्तमानोऽयम्।
ऋषिवर्यो जगतीतलभूषणभूतो नतः सर्वैः।।३८७०।।

समयस्य पालने यो नितरां संजागरूकः सन्।
जगदम्बापूजायाः प्रथमो दाताऽथ सर्वेषाम्।।३८७१।।

कस्यापि पूजनविधौ यस्याऽसीत्कोमला दृष्टिः।
राष्ट्रगुरुः सर्वेषामात्मा सर्वेषु कालेषु।।३८७२।।

आमूलाद्यो विद्यां नष्टां भ्रष्टां विजानानः।
स्वीकृतवानुद्धारं तन्त्रेषु प्रथमतामाप्तः।।३८७३।।

पीताम्बराभगवतीपूजानिरतस्तु संततं सोऽयम्।
जगतीतलमथ सर्वं जगदम्बाभक्तिसाच्चक्रे।।३८७४।।

याऽसौ मातुः सत्ता जगतामाधारभूताऽस्ते।
तस्या विधारणेषु प्रथमो यो माननीयोऽभूत्।।३८७५।।

कालेन कवलिता ये तेषां मार्गनिदेशयन् सोऽयम्।
स्वीकृतवानुद्धारं जीवानां सर्वभावेन।।३८७६।।

कृतवान् कृपया पूर्णो समस्तभावैः सुसेवितं मार्गम्।
भिन्दन् कलिमलकलिलं साधितवान् सर्वसंभारान्।।३८७७।।

सोऽयं सुधीसमाजं सम्यक् संशिक्षयन् सततम्।
भारतवर्षविलासं सम्यक् सम्बोधयामास।।३८७८।।

कायिकमलसंशोधकहठयोगेषु प्रदीप्तेषु।
पावनसंधारितनवसुषमासौभाग्यसंभृतं वन्दे।।३८७९।।

राष्ट्रस्य जागराख्ये ध्येये सर्वत्र जागरूकोऽयम्।
चीनाक्रमणविमर्दे विजयाकांक्षी प्रयोगमातेने।।३८८०।।

राष्ट्रस्य रक्षणार्थं देशे सर्वत्र सन्देशान्।
संप्रेषयन्तमारात् प्रदर्शकं सद्गुरुं नौमि।।३८८१।।

को वा तादृशपोषणसत्कार्ये लोकितो लोकैः।
राष्ट्रगुरौ सा पीड़ा दुर्गतिमालोक्य जायते तीव्रा।।३८८२।।

परिपूर्णे सर्वविधे सामर्थ्ये तन्त्रमार्गेण।
शक्तिप्रसाधनं यः कृतवान् राष्ट्रस्य जागरणे।।३८८३।।

सर्वं जीवनमथ यो नूनं सम्यक् समर्पयाञ्चके।
तं श्रीराष्ट्रगुरुं वा ऋषिवर्यं स्वामिनं वन्दे।।३८८४।।

सर्वेषां देवानां प्रत्यक्षीकारसंस्तुतं चेतः।
सम्यक् साधितवान् यो भारतराष्ट्रस्य रक्षार्थम्।।३८८५।।

आध्यात्मिकाधिदैविकभौतिकशक्तिप्रसाधनार्थं वा।
शतशो मनुजान् शुभ्रं चरित्रनिर्माणमादिदेश निजम्।।३८८६।।

विदलितसर्वविकारं निगमागमसारसंचितं पुण्यम्।
पूर्वपुरुषभणितीनां सर्वस्वं सद्गुरुं वन्दे।।३८८७।।

अणुतमदोषलवानां दूरीकरणेऽपि सावधानं तम्।
शिष्यजनकल्पवृक्षं सद्गुरुमीड़े प्रभादीप्तम्।।३८८८।।

धर्मसरणिमारूढं मनसा वाचाऽथ कायेन।
वितरन् दीक्षां विपुलां सद्गुरुमीडे विधातारम्।।३८८९।।

गणनातीतैर्मार्गैः संचरणेषु स्वतन्त्रतामाप्तम्।
योगविनिर्जितकायं श्रीगुरुवर्यं समाश्रये नित्यम्।।३८९०।।

अस्तव्यस्तदशायामाशाजागर्तिदातारम् ।
निजदारिद्र्यविनाशे स्मृतिमात्रौषधमयं वन्दे।।३८९१।।

पीताम्बराख्यपीठे दतियानगरे जगद्वन्द्यम्।
राष्ट्रगुरुं जगदम्बापूजानिरतं समाश्रये शक्तम्।।३८९२।।

१४२.पाणिनिः

सूक्ष्मातिसूक्ष्मकारणसम्यक्सम्बुद्धिप्रत्यभिज्ञायाम्।
सर्वस्वतन्त्रसिद्धः पाणिनिरासीन्महर्षिराचार्यः।।३८९३।।

कात्यायनसंसिद्ध्यै संपश्यन् भूरिसंभागान्।
पूर्वत्र सूत्रनिवहे वार्तिकभागान् प्रकल्पयामास।।३८९४।।

पतञ्जलिं संपश्यन शाब्दे शास्त्रेऽवतारमेकं तम्।
सूत्राशयप्रकाशनसुमहत्कार्ये सुनिश्चिन्तः।।३८९५।।

भाविनि काले चैवं दृष्टिं स्वीयां समर्पयन्नासीत्।
ऋषिवरपदाधिकारी पाणिनिरेको महान् धन्यः।।३८९६।।

पदशः पदशः श्रीविश्वेश्वरभूतिं समाहूय।
शब्द-ब्रह्मसपर्यां सर्वां सम्पादयामास।।३८९७।।

अयि दिव्य देव भगवन्! वाणीं वश्यां विधाय हृद्देशे।
तस्यानन्तवितानैरात्मानं छादयसि नितराम्।।३८९८।।

पतञ्जलिर्यत्परमः स्वीये ख्याते महाभाष्ये।
पाणिनिचित्राकर्षणशब्दानाविश्चकार सुस्थाने।।३८९९।।

प्रमाणभूत आचार्यो निजगादेवं परामृशन् भव्यम्।
सूत्रनिबद्धं शास्त्रं पतञ्जलिर्दिव्यसन्दर्भे।।३९००।।

पाणिनीरासीनः सन् शुचावकाशे नितान्तकमनीये।
शाब्दे ब्रह्माणि संस्थो निभालायामास शब्दसंसारम्।।३९०१।।

प्राङ्मुख एष तु भगवान् पाणिनिरासादितः पतञ्जलिना।
अन्यैव कापि दृष्टिर्यया समासाद्यते तत्त्वम्।।३९०२।।

सुमहानासीद्यत्नः सूत्रविनिर्माणवेलासु।
तत्राक्षरस्य चैकस्याधिक्यं नैव संभाव्यम्।।३९०३।।

निखिलं सूत्रमनर्थकमेतद्वे वा गदितवन्तः।
तन्मुखमुद्रणकर्मणि पतञ्जलिर्जागरूक एवासीत्।।३९०४।।

सर्वाश्चर्यमयी सा घटना सर्वत्र संश्रुतैवास्ते।
माहेश्वरसूत्राणां संजातो यो महान् लाभः।।३९०५।।

आदिनटराजराजो भव्ये नृत्तावसाने स्वे।
ढक्कां ननाद तावच्चतुर्दशाभ्याससंरम्भे ।।३९०६।।

तत्र चतुर्दशसूत्राणामवतरणं सुसंजातम्।
तानीमानि महेश्वरसूत्राण्यादौ विलसितानि।।३९०७।।

निखिलोऽयं स्वरव्यञ्जनवर्णाम्नायोऽत्र संकलितः।
क्रमविज्ञानसुघटना काऽप्येषात्रैव लोकनीयास्ते।।३९०८।।

प्रत्याहारप्रतीक्षासंतुष्टिर्याऽत्र संजाता।
सूत्राणां संरचना मूलं तत्रैव विन्यस्तम्।।३९०९।।

प्रत्याहारविनिर्मितिरत्यल्पैरक्षरैर्बृहद्बोधः ।
तेन सूत्रनिर्माणे सुमहत्साहाय्यमारचितम्।।३९१०।।

लक्षकोटिशब्दानां शुद्धतया प्रस्तुतीकरणे।
पाणिनिसूत्राणामयमुपकारः सर्वसंपूज्यः।।३९११।।

अजरीकरप्रयोगः पाणिनिना साधितः सोऽयम्।
येन च संस्कृतभाषाऽद्यापि न वार्धक्यमायाति।।३९१२।।

पाणिन्युक्तप्रत्ययसंयोगेषु प्रजागरूकेषु।
अभिनवपदसंसृष्टौ कमनीया सा छटा दृश्या।।३९१३।।

पाणिन्युक्तसमीकृतसमुदारायां समासानाम्।
शोभा कामपि दिव्यां छटां प्रसूते सुवर्णभाषायाम्।।३९१४।।

एकः समाससंज्ञाव्यवहारे स्वीयचित्राणि।
दर्शयति कापि परमा संभूतिस्तत्र जायते नाम।।३९१५।।

द्वन्द्वोऽहं द्विगुरपि चाहं, मद्गेहेऽस्त्यव्ययीभावः।
तत्पुरुषकर्मधारय येनाऽहं स्यां बहुव्रीहिः।।३९१६।।

कादम्बरी समासैराभासितदिङ्मुखा भाति।
संसारे सरम्भं सहृदय हृदये समर्पयत्यद्य।।३९१७।।

नास्ति कोऽपि संभागो भाषायाः संविभागेषु।
यस्मिन्नहि प्रयाता पाणिनिदृष्टिः सुवन्द्यतमा।।३९१८।।

परः संनिकर्षो वा वर्णानां संहिता प्रोक्ता।
सैव तु सन्धिः कथिता व्यवहारे पंचसन्धीनाम्।।३९१९।।

जीवनपरिसरकाले योऽस्त्युपयोगः सुसन्धीनाम्।
शब्दभवनसंरम्भे सन्धीनां तादृशोऽस्त्येव।।३९२०।।

सन्धिविषयमप्येवं शोधे विषयं समादाय।
स्वीये शोधनिबन्धे जीवनतुलनां विहितवन्तः।।३९२१।।

स्वरव्यंजनयोरज्झलसंज्ञायां जागरूकायाम्।
शुभ्राजन्तहलन्तानां तु सुबन्तप्रकामविस्तारः।।३९२२।।

पाणिनिसूत्राणामथ कोऽप्यस्त्येतादृशो महिमा।
शाब्दे ब्रह्मणि दृढ़ताऽनन्तत्वं दर्शने याति।।३९२३।।

यद्यप्यस्ति पुरातनशास्त्राणं सूत्रशैलीयम्।
सर्वाण्यप्यथ शास्त्राणीत्थं सूत्रेषु रचितानि।।३९२४।।

किन्तु पाणिनिर्भगवान्सूत्राणां विरचने तथा निपुणः।
शतसहस्रकण्ठेष्वथ यत्सूत्राण्ये तिष्ठन्ति।।३९२५।।

अतएव सर्वशास्त्रोपकारकत्वं समाम्नातम्।
काणादं च तथान्यत् यत् सिद्धं पाणिनीयं च।।३९२६।।

यत्र तु संस्कृतभाषा व्यवहारे नित्यमुपयुक्ता।
सुप्राचीने काले तत्रत्वनिवार्यता न नियमानाम्।।३९२७।।

व्यवहार एव तावत्सर्वान्शब्दान् विबोधयति।
तथा तदीयानर्थान्व्यवहारेषु प्रयुञ्जन्ति।।३९२८।।

पाणिनिकाले संस्कृतशब्दा नित्यं समस्तलोकानाम्।
व्यवहारेषु नितान्तं परिचितरूपा विभाविता आसन्।।३९२९।।

तस्मिन्नथ सत्काले निखिलव्याकरणनियमानाम्।
सूत्राणां निर्माणं सुकरं कर्तुं समासीद्वा।।३९३०।।

'अइउण्' इत्यारम्भे 'अअ' इत्यन्तिमे सूत्रे।
सर्वावाक् संयाता तेनाऽकारः सुवाङ् मूलम्।।३९३१।।

अन्या ग्रन्थविनिर्मितिरन्या शास्त्रस्य निर्मितिर्भव्या।
'अष्टाध्यायी' शास्त्रं पुस्तकमात्रेण न ध्येयम्।।३९३२।।

शास्त्रमपि तु शासन्नो सिद्धानां शासनं हि शक्यं स्यात्।
अपि तु शंसनाच्छास्त्रं विवृतं श्रीशंकराचार्यैः।।३९३३।।

शंसति शब्दान् भगवान्पाणिनिरथ प्राङ्मुखो भूत्वा।
सूत्रनिबद्धसुनियमैः शब्दान्यैः शंसयामास।।३९३४।।

शब्दास्तावदनन्ता अनादिभूताश्च विश्वतो व्याप्ताः।
तत्त्वविधारणनिपुणः पाणिनिरार्यः समाहितवान्।।३९३५।।

शब्दा ओतप्रोता व्यक्ताऽव्यक्तस्वरूपाभ्याम्।
या तु परा पश्यन्ती शब्दस्याऽव्यक्तरूपमिदम्।।३९३६।।

यातु मध्यमा वाणी या वैखरिनाममाधुर्या।
व्यक्ततरा व्यक्ततया ते शब्दाः सन्ति संसारे।।३९३७।।

एतत्सर्वं सम्यक् बुद्धौ संस्थाप्य माननीयोऽयम्।
आचार्यो दिव्याञ्जनभासा सूत्राणि निर्मितवान्।।३९३८।।

वेदेष्वासीद् वृत्तानां वा कश्चित्प्रकामविस्तारः।
तत्र स्वरसाम्राज्यं सुविस्तृतं व्याप्तमेवाऽस्ते।।३९३९।।

तत्रोदात्त-स्वरितानुदात्त-सत्प्रचय-संज्ञकास्ते ते।
मन्त्राक्षरेषु नियताः स्वरा नितान्तं प्रकाशन्ते।।३९४०।।

स्वरस्वैदिक-सूत्राणां रचनां कृत्वा महर्षिराचार्यः।
पाणिनिरतीन्द्रियाणामर्थानां परिचयं कृतवान्।।३९४१।।

प्रतिशाख्य-सद्ग्रन्थावलिरपि तत्रैव जागृता जाता।
अष्टाध्याय्यामपि वा सर्वे विषयाः समायाताः।।३९४२।।

पुनरथ लौकिक संस्कृत-शब्दानां परिचयाय सन्नद्धः।
भगवान् पाणिनिरार्योऽमरतां संसाधयामास।।३९४३।।

भाषाऽजराऽमरेयं संजाता पाणिनिं धृत्वा।
अष्टाऽध्यायीं ध्यात्वा निखिला वाणी समायाति।।३९४४।।

तादृशशास्त्राऽभावे संसारे प्राक्तना भाषाः।
व्यवहारपथातीताः केवलसंस्मरणसंचाराः।।३९४५।।

रोमनग्रीकादीनां लैटिनपाल्यादिभाषाणाम्।
व्यवहारोऽपि विलुप्तः नो वा रचनाश्च नूतनास्तासु।।३९४६।।

संस्कृतभाषापीयं लोके नो व्याहृता दृष्टा।
किन्तु पाणिनिकृपया निरवच्छिन्ना प्रशिक्षणे निखिले।।३९४७।।

पाणिनिनिर्मितनियमावलिमेकां बुद्धिसात्कृत्वा।
वैदिकलौकिकवाङ्मयमहार्णवेऽद्यापि शक्यते तरितुम्।।३९४८।।

लक्षकोटिविद्वज्जनसमुपकृतिः साधिता जाता।
तेषां तेषां रचनावलिरद्याप्यग्रतो वन्द्या।।३९४९।।

पाणिनिदत्तां दृष्टिं सततं संधार्यमाणानाम्।
अपरोक्ष्ये सद्रूपे ग्रन्थार्थाः संप्रकाशन्ते।।३९५०।।

अतिपरिचयादवज्ञा नियमोऽयं भारते वर्षे।
संस्कृतविषये नूनं विलोक्यते शिक्षितोन्मादे।।३९५१।।

पारतन्त्र्यरोगेणाक्रान्तमिदं भारतं वर्षम्।
वर्षसहस्रं यावन्निखिलां दीप्तिं विलोपयामास।।३९५२।।

ये यवनास्ते शत्रव एवाऽसन् सर्वविद्यानाम्।
हस्तलिखितसद्ग्रन्थज्वालाभिस्ते सुसंतुष्टाः।।३९५३।।

सहस्रशः सन्मन्दिरमूर्तीनां ध्वंसकास्ते ते।
पुस्तकदाहेऽप्यधिकां स्वरुचिं सन्दर्शमासुः।।३९५४।।

किन्तु यदा वा क्रमशः शासनसंचालका जाताः।
आंग्लदेशवास्तव्यास्तदा नु जाता चमत्कृतिः काचित्।।३९५५।।

स्वीयामांगलभाषां प्रशिक्षणेऽत्रापि चालयामासुः।
यन्त्राऽधारित-नाना-विज्ञानानि-प्रवर्तयामासुः ।।३९५६।।

वेदादिग्रन्थानामध्ययनेषु प्रकामदीप्तास्ते।
स्वीयायां भाषायां सर्वानवतारयामासुः।।३९५७।।

तेषामर्थज्ञाने पाणिनिना निर्मितं शास्त्रम्।
दिव्यं प्रकाशदानं कृतवान् नूनं पदे पदे भव्यम्।।३९५८।।

कथमाश्चर्य-समुद्रे पतनं न स्याद्विलोक्य तत्सर्वम्।
अत्रोपेक्षितविषयाः समुद्रपारे सुसन्दीप्ताः।।३९५९।।

पाणिनिशास्त्रविनिर्मितिचमत्कृतिं बुद्धिसात्कृत्वा।
भाषाविज्ञानं खलु नव्यं विषयं प्रवर्तयामासुः।।३९६०।।

महाभाष्यरचनायां पाणिनिवंशे समवतीर्णः।
पतञ्जलिर्नव्यानां स्फूर्तीनां द्योतको जातः।।३९६१।।

लोपाऽगमाश्च ते ते वर्ण-विकारास्तथाते ते।
स्पर्शोष्माणः सततं भाषाभेदान् प्रजनयन्ति।।३९६२।।

भाषा-शब्द-समुत्थिति-नियमानेतान् विवेचयित्वा वा।
ते मैक्समूलराद्या भाषाविज्ञानमात्मसाच्चक्रुः।।३९६३।।

यद्यपि पाणिनिरार्यः पतञ्जलिश्चाथ वेदशब्दानाम्।
लोके संस्कृतभाषाशब्दानां परिचये लग्नाः।।३९६४।।

किन्तु यदेतत् शिक्षा-शास्त्रं प्रथमं वेदाङ्गमेव परिगणितम्।
वर्णोच्चारण-शिक्षा प्रदीयते भास्वरा तत्र।।३९६५।।

आभ्यन्तरप्रयत्नैर्बाह्यैर्यत्नैः स्वरैस्तैस्तैः।
वर्णा उच्चार्यन्ते प्रयान्ति चैतेऽप्यशक्तितो विकृतिम्।।३९६६।।

एता एव विकृतयो नव्यान्शब्दान् प्रजनयन्ति।
तेषां प्रभूतसंख्या नव्यां भाषां विभासयन्त्यास्ते।।३९६७।।

यत्र क्रमेलकोऽयं कैमिल उच्चार्यते विनाऽयासम्।
शतशः शब्दास्ते ते गतास्तथा चाङ्गलभाषायाम्।।३९६८।।

भारतीय-सम्पत्त्या सुवर्ण-निवहैस्तथा रत्नैः।
नैकार्बुद-मुद्राणां संजातास्ते नवाधीशाः।।३९६९।।

सर्वविधां सुखसाधनसमृद्धिमयतां समादाय।
प्रकृतिप्रप्तैनीना संचारैस्ते प्रगल्भतां याताः।।३९७०।।

यवनप्रशासकानां विद्याशत्रुत्वमेवाऽसीत्।
आंग्लानां विपरीतं विद्याप्रेम्णा विपरिणमितम्।।३९७१।।

इतिहासविनिर्माणे तेषामेका नवा दृष्टिः।
नानाग्रन्थे लेखे सुव्यक्ता संविभाविता जाता।।३९७२।।

अत्रेतिहास-विषये नैव विचारः प्रवर्तितो देशे।
ज्ञाने विज्ञानेष्वथ विदुषामासीद् विचारचातुर्यम्।।३९७३।।

नानापुराणनिवहे नानाविधकिंवदन्तीषु।
नाना गल्पकथासु च इतिहासाः शिक्षिता जाताः।।३९७४।।

किन्त्वाङ्गला विद्वांसो यीशुं ख्रिष्टं धुरं धृत्वा।
पूर्वशती पश्चाद्वा शती विशेषं विबोधयामासुः।।३९७५।।

अन्तःसाक्ष्यं निपुणं निभाल्य दृष्ट्वा बहिःसाक्ष्यम्।
सुप्राचीना ग्रन्था कालविशेषेषु निक्षिप्ताः।।३९७६।।

नाना यन्त्राधारित-चमत्कृतीर्भूरिसंख्यायाम्।
सर्वस्मिन्संसारे पाश्चात्यैः पूरिता जाताः।।३९७७।।

अद्य च संगणकानां यन्त्राणां मालिका सेयम्।
गृहे गृहे सन्दृश्या मुष्टौ वा संस्थितं विश्वम्।।३९७८।।

संगणेषु नितान्तं पाणिनिसूत्राणि पूर्णानि।
वैज्ञानिकमूर्धन्यैरप्याश्चर्येण दृश्यन्ते।।३९७९।।

संक्षेपीकरणानामद्यत्वे या प्रवर्तिता शैली।
पाणिनिना सा शैली स्वीये सूत्रे समानीता।।३९८०।।

पाणिनि-निर्मितसूत्रेष्वथ तां संक्षेपमयशोभाम्।
मनने संपश्यन्तश्चकिता वैज्ञानिका स्ते ते।।३९८१।।

पाणिनीय-रचनेयं वार्तिकरचना तथा दिव्या।
महाभाष्यसंरचना सततं चाकर्षयति विश्वम्।।३९८२।।

कैयटनिर्मितटीका प्रदीपनाम्ना सुविख्याता।
भट्टोजिदीक्षितानां काचिद्रचना च शब्दरत्नमयी।।३९८३।।

नागेशभट्ट-रचनोद्योते जाता सुविस्तीर्णा।
भर्तृहरिदिव्यरचना वाक्यपदीयमिति नामिका जाता।।३९८४।।

भट्टोजिदीक्षीतानां सैषा सिद्धान्तकौमुदी भव्या।
नव्यव्याकरणस्य प्रवर्तिका सैव संजात।।३९८५।।

तत्रापि च संक्षेपो विहितस्तावद् वरदराजेन।
लघुसिद्धान्त-सुकौमुदिनाम्ना विख्यातिमायाता।।३९८६।।

हरदत्तकृतो न्यासः नन्दीश्वररचितकाशिकावृत्तिः।
माधवीयसंरचना धातूनां वृत्तिरेषा वा।।३९८७।।

पाणिन्युत्तर-संस्कृतवाङ्मयधारा यैताः प्रवृत्तास्ताः।
शब्दानां च पदानां वाक्यानां तत्र पाणिनिः शरणम्।।३९८८।।

अपाणिनीयमितिशब्दं पतञ्जलिर्घोषयामास।
अपाणिनीयाः शब्दा जिह्वायां नैव संयान्ति।।३९८९।।

यैः कैश्चिद् विद्वद्भिः कविवर्यैस्तावदाचार्यैः।
अपाणिनीयाः शब्दाः संप्रोक्तास्ते सुपरिगणिता।।३९९०।।

यद्यपि पाणिनिरार्यो नो शब्दोत्पादने सिद्धः।
सिद्धानां शब्दानामर्थानां बोधनाय तद्रचनम्।।३९९१।।

लघुना प्रयत्नजातेनायातु च पूर्णविज्ञानम्।
सूत्राणां निर्माणं तस्मिन्नेवाधृतं जातम्।।३९९२।।

शब्दानामर्थानां संचयने वा कियान् यत्नः।
संसाधितो मुनित्रयकाले तस्मिन्नितान्ते सन्दीप्ते।।३९९३।।

निखिलं दिव्यं जीवनमेवान्तिमसत्क्षणं यावत्।
शब्दविचयने दत्तं सूत्राणां विरचने चापि।।३९९४।।

महाभाष्य-निर्माणे पतञ्जलिश्चेन्न लब्धः स्यात्।
पाणिनिसूत्राणीमान्यथ कोणे संस्थितानि स्युः।।३९९५।।

अत एवैष च भगवान् पतञ्जलिः कश्चिदवतारः।
सर्वत्रैवोद्घुष्टः पाणिनिमित्थं समीडितवान्।।३९९६।।

कस्याप्यन्यस्य तु वा रचनाचातुर्यपूर्णस्य।
सा शैलीनैवाऽस्ते पतञ्जलिर्यां समर्पयति।।३९९७।।

संस्कृतभाषा सेयं व्यवहारेषु प्रवृताऽऽसीत्।
एतन्निदर्शनं खलु दिव्यमहाभाष्यवाणी सा।।३९९८।।

पाणिनिसूत्राणां या संकेतेषु स्थिता भाषा।
तद्व्याख्याने भाष्ये सरसा सरला च संभाषा।।३९९९।।

कात्यायनस्य तावत्काचिच्छन्दोमयी भाषा।
पाणिनिशास्त्रसुपूर्तिं कर्तुं जागर्ति रमणीया।।४०००।।

भाष्यग्रन्थे वार्तिकरचनावलिरित्थं चास्ति संश्लिष्टा।
वार्तिकरूपाणामथ पार्थक्यं वा सुदुष्करं जातम्।।४००१।।

पतञ्जलिः स्वमुखेन हि यं यं वार्तिकतया वक्ति।
नो वक्ति वा सदैव तु तद् वाण्यामेव लीयते तदपि।।४००२।।

शोधनिबन्धे चैके वार्तिकचयने कृतो यत्नः।
वार्तिकपाठोऽपीत्थं प्रकाशितः किन्तु सन्दिग्धः।।४००३।।

अन्येष्वथ शास्त्रेषु तु सूत्रोपरिभाष्यरचनैव।
तदनु च वार्तिकरचनाक्रमस्तु सोऽयं स्थितस्तत्र।।४००४।।

अत्र तु सूत्रोपरि सा प्रथमा वार्तिकविरचनैव।
संजाता तदनन्तरमारचितं तन्महाभाष्यम्।।४००५।।

क्रमे विवर्तनमेतद् वैज्ञानिकतां पुरस्कुरुते।
ये शब्दाः सूत्रेष्वथ नो दृष्टास्ते तु वार्तिके कथिताः।।४००६।।

तदनु महाभाष्ये सा परिष्कृतिः काऽपि संजाता।
प्रत्याख्यानं जातं केषांचिद् वार्तिकानां वा।।४००७।।

कथासरित्सागरगतकथावितानेषु वररुचिः सोऽयम्।
स्पष्टायां स्पर्धायां पाणिनिमेवं परामृशति।।४००८।।

ये तु शाब्दिकास्तावदद्याप्येतां मुनित्रयीं भव्याम्।
प्रणतिं विधाय नित्यं वर्तन्ते पाठशालासु।।४००९।।

तेषां कृते तु सत्यं मुनित्रयी सा प्रमाणमयी।
संजातास्ति नितान्तं यथोत्तरं तत्र धारेयम्।।४०१०।।

पाणिनिरेवाऽचार्यः सर्वोच्चो माननीयश्च।
तत्र यथोच्चतरं तत् प्रामाण्यं घोषयामासुः।।४०११।।

दशमद्वीपः

१४३. भारविः

भारविनाम्ना संस्कृतदिव्यमहाकाव्यधारायाम्।
रसनवधारावर्षकमहाकविर्धन्यतां यातः।।४०१२।।

युधिष्ठिरं भीमं वा तमर्जुनं वर्णयन् सोऽयम्।
महाकविः श्रीव्यासं शंकरभगवन्तमाह्वयते।।४०१३।।

भारविपदधारायामर्थानां गौरवं दृष्टम्।
सहृदय-हृदय-विराजित-रस-संचारं समातनुते।।४०१४।।

द्रुपदात्मजागिरस्ता-ओजोमयवृत्तिजागरे रुचिराः।
निर्णयसेवनवृत्तिविलोपयत्येव धर्मराजस्य।।४०१५।।

स्वीय-महाकाव्यस्याऽखिलां सुभूमिं समीकर्तुम्।
वर्णिलिङ्गिविन्यासै रम्यकथां भूषयन्नास्ते।।४०१६।।

दुर्योधनस्य नीतिं जनकथनेनात्र विज्ञाय-
सुप्रत्यक्षं कृत्वा वनेचरोऽयं परावृत्तः।।४०१७।।

स्वीयां गिरप्रवृत्तौ सारां कथयन् स वणिर्लिङ्गी वा।
महाकवेस्तां रुचिरां कल्पनशैलीं विलासयति।।४०१८।।

अर्थगौरवं तावद् भारविरेवाऽत्र धारयति।
अर्थगौरवं किं वा भारविवाणीं समेधयते।।४०१९।।

शब्दाऽधारा काचित् सर्वाऽर्थमयीभित्तिरारचिता।
अर्थे दृष्टिं दत्त्वा-शब्दा यत्रैव चीयन्ते।।४०२०।।

तत्र पुनश्चार्थानां रहस्यतत्त्वं विमलरूपे।
संप्रज्ञातसमाधौ संविद्रूपेण भासमानमभूत्।।४०२१।।

महाभारते ग्रन्थे इतिहासे वाऽथ सुविशाले।
ऋषिमहर्षिणां राज्ञां नाना गाथाः सुवर्णिता जाताः।।४०२२।।

तासु यथेच्छं कविभिः स्वीयामास्थाय रुचिराभाम्।
मतिं प्रवेश्य सुरचना काव्यमयी कापि संदिष्टा।।४०२३।।

दुर्योधनस्य चित्रं पाठक-हृदये खलत्वसंश्लिष्टम्।
नीति-नैपुणी तस्य प्रथमे सर्गे समानीता।।४०२४।।

किन्तु खलत्वं तस्य तु नीतिव्यवहारकालेऽपि।
भारविदृष्टौ सर्वां कुटिलविभाषां समानयति।।४०२५।।

कथाप्रसङ्गे जातां तस्य दशां तां प्रकृतिमेताम्।
तस्य व्यथां विवृण्वन् भारविभाषा समातनुते।४०२६।।

द्रुपदात्मजागिरस्ता मन्युव्यवसायदीपिन्यः।
भारविकाव्यस्था अपि सर्वत्रैव स्थिताः प्रजायन्ते।।४०२७।।

इदमतिशय-सुस्पष्टं द्रौपद्या वाक्यविन्यासम्।
कविनिबद्धवक्तृत्वस्योदाहरणेषु मूर्धन्यम्।।४०२८।।

द्रौपद्या वाणीयं वृकोदरं प्रेरयन्तीव।
तन्मुखवाग्धाराया प्रेरणः भावं प्रयातैव।।४०२९।।

महाकविर्भारविरयमत्र नितान्तं सुसावधानः सन्।
सहृदयमिलिन्दसंघं शंसायां वा विमूर्छयति।।४०३०।।

छन्दोमयप्रवाहे धारेयं सद्विचाराणाम्।
किमपि रहस्यं सद्यो निर्मितरूपं समानयति।।४०३१।।

राज्ञामप्येतेषां या दुरवस्था प्रदृश्यते काले।
कस्य हृदयसंलग्ना दुनोति नो वा विदां चेतः।।४०३२।।

भीमस्य वाक्यशैली क्लैव्यं विद्राव्य संयाता।
सर्वत्रैवाप्रतिहतरूपेषु भ्राजते सत्यम्।।४०३३।।

भारविवचसां सिद्धिः प्रसिद्धरूपाऽर्थगौरवे जाता।
इदमत्रैव ग्राह्यं पदे पदेऽप्यर्थगौरवं नाम।।४०३४।।

अत्र तु शब्दास्ते ते अर्था अपि वा निरन्तराऽश्लिष्टाः
गुञ्जन्ति हृदयदेशे सन्तोषेष्वावहन्त्यन्यान्।।४०३५।।

सहस्रशः शब्दानां व्यूहे कस्याथ शब्दस्य।
संचयनं सुविधेयं येनार्थश्चित्रितो भूयात्।।४०३६।।

इदमेव तत्कवित्वं शब्दानां वा तथार्थानाम्।
शोधनसंस्कारेषु प्रयोगयोग्यं समीकरणम्।।४०३७।।

शब्दार्थपरीपाके संसिद्धा एव कवयस्ते।
सहृदयवर्गविशेषाऽराधितभावैः सदैव सम्पूर्णाः।।४०३८।।

तानेतानपि नित्यं महाकवीन् वन्दनाऽभ्यासैः।
आत्मानमेव सर्वे सन्तोषाऽमृतमयांस्तनुमः।।४०३९।।

किं वा कथानकं स्यात् को वा वक्ता भवेत्काव्ये।
कस्य मुखन्निःसारितशब्दावलिरीदृशी भूयात्।।४०४०।।

महाकवेरिति बुद्धौ कियती भारान्विता भूतिः।
रसावहत्त्वं काव्ये सम्यग्दातुं कियत्कठिनम्।।४०४१।।

सत्यमिदं यद् विद्वानेव विजानात्यविश्रान्तम्।
विदुषां श्रमस्य मूल्यं किं स्यादन्यो न जानाति।।४०४२।।

योगाऽयोगवियोगैरथ संयोगैर्वियोगभाषायाम्।
प्राप्तं यत् प्राकाम्यं तस्य कियन्मूल्यमिह लब्धम्।।४०४३।।

मूल्यं तु तदेवेदं नैकशताब्द्यो ह्यतिक्रान्ताः।
अद्यापि तु वाणीयं भारविमाकारयति चित्ते।।४०४४।।

सेयममरता काचित् कामं या जीवने व्याप्ता।
सृष्टिप्रलयविशिष्टप्रतिरचनायां समादिष्टा।।४०४५।।

भारविरचनाकाव्ये भगवान् व्यासः समायातः।
प्रत्यक्षतयाऽन्यायं पाण्डवपक्षे विषोढुमसमर्थः।।४०४६।।

व्यासागमनसुचित्रं भारविशब्देषु यत्स्फुरितम्।
या च युधिष्ठिरभणितिर्भारविणाविष्कृता पूता।।४०४७।।

महर्षये सा तावत्कथनीयाऽदर्शशैलीयम्।
सत्यान्वितकथनाढ्या वेदव्यासस्य सा वाणी।।४०४८।।

व्यासागमेन तावदात्मानं साधु मन्वानाः।
धर्मराजगतशब्दास्तां मालां संप्रकाशन्ते।।४०४९।।

व्यासेन कुञ्जिका सा दिव्योत्तमसाधनाऽभ्यासे।
अर्जुनाय या दत्ता शत्रुप्रक्षेपणे दक्षा।।४०५०।।

तत्सर्वं वर्णितवान्महाकविर्भारविर्निरितराम्।
एतत्तस्य महत्त्वे-प्रकाशयत्यर्थगाम्भीर्यम्।।४०५१।।

द्रौपद्या संकथिता या सौप्रस्थानिकी वाणी।
अर्जुनस्य सा यात्रा तामादायैव संजाता।।४०५२।।

घोरतपस्यानिरतो किरातरूपं शिवं प्राप्य।
तेनायोधनमुग्रं विहितं कपिकेतनेन तत्सर्वम्।।४०५३।।

भारविशब्दैर्गुम्फितनानाछन्दस्सु सामरस्यमयम्।
पाशुपतास्त्रप्राप्तिःसर्वस्यैतस्य फलमाप्तम्।।४०५४।।

यद्यपि लघुत्रयीपरिगणितमिदं भारवेर्महाकाव्यम्।
बृहत्काव्यसंप्रेरकमेतत्त्वर्थस्य गौरवैर्जातम्।।४०५५।।

गाथा काचिद् भारविमाधारीकृत्य सुप्रसिद्धैव।
पितुराज्ञापरिपालनरूपा श्वसुरालये स्थितिस्तस्य।।४०५६।।

सहसा कार्ये वृत्तिर्नैवाऽचरणीयतां यायात्।
विमृश्य सर्वं कृत्वा सर्वसफलता समायाति।।४०५७।।

एतदर्थकं पद्यं जीवनरक्षाकरं जातम्।
श्वसुरालयीयनगरे महाधनिक पुत्ररक्षार्थम्।।४०५८।।

भारविकाव्यानुभवैर्यथा यथा जीवने चरितम्।
जीवनदिव्यत्वकरं काव्यं चैतत्सुसंजातम्।।४०५९।।

कथानकस्य संचयने येयं प्रतिभा प्रकाशिता कविना।
वीररसेनास्वादितसत्काव्योन्मादिता सरला।।४०६०।।

अर्थगौरवं चैतन्निर्वाहयितुं प्रगल्भन्ते।
अङ्गुलिगणनीयास्ते विश्वस्मिन् वा महाकवयः।।४०६१।।

कियदतिकठिनं जीवनसंघर्षं नित्यमास्थाय।
पुण्यानां परिपाकैर्लोकोत्तरकाव्यरचनास्ताः।।४०६२।।

संजायन्ते सर्वा सृष्टिरियं येन धन्यत्वम्।
आसादयति नितान्तं पुण्यैः स्वीयैरुपार्जितैरेव।।४०६३।।

महाकविर्भारविरयमस्माकं वन्दनीयोऽस्ति।
वीरा भावा येन तु हृदये हृदये समारचिताः।।४०६४।।

१४४.सूचना

यद्धि परोक्षं ज्ञानं सा सत्या सूचना ध्येया।
अणीयसी सा स्याद्वा-महीयसी साऽथवा भूयात्।।४०६५।।

अज्ञानं तु नितान्तं मनुजं सूचनवियोजितं कुरुते।
संज्ञानं सन्तनुते काचिदियं सूचना देवी।।४०६६।।

या सूचना गभीरा सा सा सर्वाऽपि विद्या स्यात्।
यास्तुस्युः सामान्यास्ता कथ्यन्ते समाचाराः।।४०६७।।

एतत्परोक्षरूपं सर्वं ज्ञानं हि शब्दमयम्।
किञ्चित् संस्मरणार्हं शेषं पठितं च विस्मृतं चैव।।४०६८।।

एते शेष-विशेषाः प्रत्यहमायान्ति यान्ति सातत्ये।
समाचारपत्राणामद्यत्वे पूर्णबाहुल्यम्।।४०६९।।

निर्विकल्पसंसिद्धावपरोक्षं यज्जगन्मूलम्।
तज्ज्ञानं सर्वमिदं तत्संसिद्धौ महान् यत्नः।।४०७०।।

निखिला परोक्षरूपा ज्ञाने संसूचना येयम्।
अपरोक्षज्ञाने किल नैनं रूपं विसर्जयति।।४०७१।।

अपरोक्षज्ञानानामपि महती सिद्धिरायाता।
सर्वं परोक्षरूपं विज्ञानं स्वात्मसात्कुरुते।।४०७२।।

महतामथ शास्त्राणामध्ययनेनार्जितं ज्ञानम्।
शब्दाग्रेडनविधया सिद्धमिदं सूचनामात्रम्।।४०७३।।

यत्प्रत्यक्षं ज्ञानं तदपि तु लौकिकमलौकिकं द्वेधा।
अलौकिकं तद् योगादिभिरेवं साध्यते नियतम्।।४०७४।।

लोके यत्प्रत्यक्षं संसारे सर्वसिद्धीनाम्।
सहभावानपि वितरति सुखसंयोगान्समानयति।।४०७५।।

नानाऽध्ययनविशेषैस्तेषां याः सूचनाः प्राप्ताः।
लोके साक्षात्कारैस्ता जाताः स्वर्णमय्यो वा।।४०७६।।

सुवर्णपुष्पां पृथिवीं चिन्वन्तः सत्यसंकल्पाः।
शूराः कृतविद्यास्ते नाना सेवासमालग्नाः।।४०७७।।

दृष्ट्वा विस्मृतिरूपे विनिमग्नाः सूचनास्तास्ताः।
परः सहस्रा नित्यं नाना विधमाध्यमैर्लब्धाः।।४०७८।।

माध्यम-संस्थाऽद्यत्वे-नित्यमियं शक्ति-सम्पूर्णा।
शासनदिशानिदेशं तत्परभावेन संस्कुरुते।।४०७९।।

आकाश-वाणि लहरी-व्याप्तं तद् दूरदर्शनं चापि।
लक्षकोटिसंख्यायां दैनिकपत्राणि नव्यानि।।४०८०।।

नव्यां नव्यतरां वा नव्यतमां सूचनादेवीम्।
ध्यायन्तश्चिन्वन्तः प्रसारयन्तश्च दृष्टानि।।४०८१।।

विज्ञाने महात्म्यं नित्यं सर्वं सुसाधयन्तोऽपि।
ये सूचनादरिद्रास्ते दारिद्र्यैः परामृष्टाः।।४०८२।।

समुपेक्ष्यापि नितान्तं मध्यमरूपेऽपि संस्थिता काचित्।
गम्भीराऽपि कदाचित् प्रजायते सूचना सेयम्।।४०८३।।

सूचकसूच्यसमासे नित्यसमाचारसंचयने।
जटिलाऽशेषविशेषैपरिपोशो साध्यते नित्यम्।।४०८४।।

नगरेषु याऽस्ति नित्यं-जीवन-लहरी-प्रवाहमयी।
न ग्रामेषु समाना विपरीता साऽस्ति दुःखमयी।।४०८५।।

किं किं बृहद् सुयोजनकार्यं ग्रामे समारब्धम्।
तत्र पुनर्व्ययकरणे पृथक् कृतो वा कियान् राशिः।।४०८६।।

यद्यपि पाठकचिन्तनसञ्चालनमात्रसन्ताने।
सा सूचनाऽस्ति निखिलाज्ञानं येनातिविस्तीर्णम्।।४०८७।।

पुनरपि सामान्यजनास्तादृशसंसूचनां निखिलाम्।
सर्वोपेक्षणभावेनैवालोक्यात्र सन्तुष्टाः।।४०८८।।

अद्य तु महानयं यो नाना नवकार्यसंसारः।
यस्मै विकास इति यन्नूतननामापि दत्तमेवेदम्।।४०८९।।

पुरातनस्य ध्वंसे-जीर्णस्यैवाथ शीर्णस्य।
तत्र नवतरा रचनाविकासभाषां समातनुते।।४०९०।।

एतत्सर्वं यन्त्रैर्लघुरूपैर्वा महत्तरैरथवा।
महत्तमैः संसाध्यं-सत्क्रियते लोक्यते सर्वैः।।४०९१।।

यन्त्राणामप्येषां-विनिर्मितौ ये समाचाराः।
येऽत्यन्तं तु निगूढाः-समुद्र-पारेषु शिक्ष्यन्ते।।४०९२।।

तच्छिक्षासम्पत्त्यै यैर्गन्तव्यं विदेशेषु।
तैः पूर्वं संग्राह्यास्तत्रत्याः सूचनाः सर्वाः।।४०९३।।

अद्य तु शासनचालनधुर्याणां मन्त्रिमण्डलेऽप्येकः।
पूर्णतमः संभागस्तस्याः सन्तुष्टिमावहति।।४०९४।।

संसूचनाप्रसारणमन्त्रालयनामकः सोऽयम्।
निखिलविश्वदेशानां सर्वविधां सूचनां धत्ते।।४०९५।।

अर्थाधिकारनीतेर्व्यापाराणां च मित्राणाम्।
शत्रूणामपि तेषां मित्राणां सूचना ज्ञेया।।४०९६।।

भूगोलीया विद्या निखिलाऽपि च राजनीतिमयविद्या।
संसूचना प्रतिष्ठितकायाः सर्वा विभासन्ते।।४०९७।।

ते हि महामान्यास्युर्यैरास्वाद्यास्ति सूचनासंपत्।
ये सूचनाविहीनास्ते समुपेक्ष्याः प्रजायन्ते।।४०९८।।

प्रकटाप्रकटा गुप्ता निभृता संकेतसंग्राह्या।
नो विज्ञेया यैर्वाजागृतविभवाऽस्ति सूचना सेयम्।।४०९९।।

नाना नव संघर्षे-मतदानादिषु चयनचर्यायाम्।
क्षणवैभवविस्तारैरथ प्रदेयाऽस्ति सूचना सेयम्।।४१००।।

सत्तापक्षादधिकं विपक्षभागेऽस्ति सूचनातन्त्रम्।
सबले विपक्षरूपे जनतन्त्रे प्रोन्नतिर्मान्या।।४१०१।।

सिद्धान्तवैपरीत्ये सत्तापक्षे विपक्षे च।
सूक्ष्मापि सूचनैका महत्त्वपूर्णा समाभाति।।४१०२।।

अद्य तु व्यक्तित्वानां संघर्षः केवलं ज्ञेयः।
सिद्धान्तानामथवा स्वार्थे परिवर्तनं जातम्।।४१०३।।

एवं विधसंचालकधुरीणवर्गप्रतिष्ठायाम्।
प्रोन्नतरूपं जातं सुविस्तृतं सूचनाजालम्।।४१०४।।

दूरध्वनियन्त्राणां वैपुल्येनाद्यविस्तारः।
एतानि मन्दिराण्यथ कर्णे दत्तानि सूचना देव्याः।।४१०५।।

यद्यप्यद्य नितान्तं सर्वविधं दूरदर्शने स्पष्टम्।
पुनरपि सर्वं चैतत्स्थूलं सूक्ष्मं तु सर्वथा गुप्तम्।।४१०६।।

गुप्तमिदं ननु तावद्यावन्नो याति सूचना तन्त्रे।
तत्राऽपि सूचनायां रहस्यमध्यासते नियतम्।।४१०७।।

उद्धतयुद्धविधीनामस्तव्यस्ते तु घोरतरदृश्ये।
कुत्र कुत्र किं केन तु कृतं कथं केन करणीयम्।।४१०८।।

कुत्र च देशविशेषे संगठितो नास्ति शत्रु पक्षोऽयम्।
कुत्राऽक्रमणे जाते सद्यो विजयस्य लाभः स्यात्।।४१०९।।

नव्यान्नव्यतरा वा तन्त्रे संस्थापिता निजापीयम्।
तत्र सूचना पुष्टा निःसन्देहा प्रजायेत।।४११०।।

अद्यत्वे तु नितान्तं कार्यालयसंस्थिते बहिः पट्टे।
अत्यावश्यकभाषास्वथ नित्यं सूचना दृश्या।।४१११।।

अद्य सूचनाकृपया किमपि परोक्षं न संजातम्।
सर्वं त्वद्य समक्षं प्रत्यक्षं वा वियति नयनाग्रे।।४११२।।

संक्षेपतया कथने सर्वमिदं सूचनाराज्यम्।
यत्र वयं तिष्ठामो गच्छामः प्रत्यहं काले।।४११३।।

१४५.संपादनम्

वैज्ञानिके युगेऽस्मिन् पत्राणां पत्रिकाणां च।
निरवधि-निरन्तरं यत् प्रकाशतं तेन काऽपि सन्दीप्तिः।।४११४।।

सम्पादनस्य तत्र तु चतुरा-मधुरा कला काचित्।
संभूषयति नितान्तं पाठकवर्गान्तरङ्गसद्भावान्।।४११५।।

हिन्दी-भाषायां या प्रथमा धारा प्रकाशनस्यासीत्।
भारतेन्दुरेवाऽसीत् तद्धारावर्षको हरिश्चन्द्रः।।४११६।।

भूयस्तु महावीरप्रसादनामा द्विवेदिवर्यो वा
संपादन-कलनायामवतारः कोऽपि चाययौ देशे।।४११७।।

बालमुकुन्दो गुप्तः विख्यातो मालवीयोऽपि।
संपादकत्वगरिमा-प्रवर्धकत्वेन गणनीयाः।।४११८।।

लोकमान्य-तिलकोऽयं मोहनदासस्तथा गान्धी।
सम्पादनसन्मन्दिरशिखरत्वेनैव राजन्ते।।४११९।।

तत्संपादनकलया शतशस्ते लेखकाः कवयः।
संसारेषु नितान्तं निजं यशः प्रेषयामासुः।।४१२०।।

सम्पादकस्य महती श्रमशक्तिस्तत्र निक्षेप्या।
जानात्वयं च नित्यं सदसद् रूपाणि निखिलानि।।४१२१।।

पत्रे प्रकाशनार्थं या सामग्री समायाति।
तामालोच्य-सुरुचिरा पाठक-दृष्ट्या प्रकाश्यते पत्रे।।४१२२।।

देशस्थितनिखिलास्वपि-प्रान्तीयास्वत्र भाषासु।
पत्रपत्रिकानां वा प्रकाशनं सततमारचितम्।।४१२३।।

सर्वत्र तत्र तावत् संपादकमण्डलं दृश्यम्।
निपुणास्तत्र नियुक्ताःसम्पादकतां वहन्ति सम्मान्याः।।४१२४।।

लेखाः कथाप्रवाहाःकविताः गीतानि नव्यानि।
मतवादानां सरणिःप्रकाशिता भूयसा दृश्या।।४१२५।।

ग्रन्थानामपि तेषां पुरातनानां च नूतनानां च।
सम्पादनकार्यमिदं प्रमुखतया जायतेऽद्यत्वे।।४१२६।।

सुप्राचीना ग्रन्था नाना प्राचीनलिपिलिखिताः।
तत्तद्राज्यसुरक्षितपुस्तकशालासु सन्ति सौन्दर्ये।।४१२७।।

तेषां तद् ग्रन्थानां पाण्डुलिपीनां च परिपठने।
सूक्ष्मनिरीक्षणविधिना धार्या धैर्यात्मिका शक्तिः।।४१२८।।

नानावीक्षणयन्त्राणां साहाय्येन परिपठनम्।
पाण्डुलिपीनां तासां नूतनलेखनसमीकरणम्।।४१२९।।

एकैकग्रन्थस्य तु नाना स्थानेषु पाण्डुलिपयोऽमी।
संसाधिता निकामं सन्तोषं संप्रयच्छन्ति।।४१३०।।

शुद्धो पाठस्तेषां स्वमूलरूपे समायातः।
पुरातनग्रन्थानामथ सम्यङ्मुद्रणं तनुते।।४१३१।।

अष्टादशशतके वा मुद्रणकार्यं समारब्धम्।
तत्पूर्वमक्षरैःकिल हस्तेनैवाघा ग्रन्थाः।।४१३२।।

मुम्बईमहानगरात् निर्णयसागरसुनामसंस्थायाम्।
श्रीक्षेमराजवर्यैर्मुद्रणकार्यं समारब्धम्।।४१३३।।

नाना ग्रन्थास्तावन्मुद्रितरूपेषु संयाताः।
गुच्छकेषु च ग्रन्थे ते जाताः काव्यमालायाम्।।४१३४।।

ये सम्पादकवर्यास्तत्राऽसन्साधुविख्याताः।
महामहोपाध्याया दुर्गापूर्वप्रसादान्ताः।।४१३५।।

अन्येऽपि च विद्वांसः पाण्डुलिपीनां विचारसंचारे।
सम्पादनकार्याणामाचरणं तत्र कृतवन्तः।।४१३६।।

त्रावन्कोरे तावत् त गणपतिशास्त्रिवर्याणाम्।
सम्पादन-कलयैषा विभूषिता भाससम्भूतिः।।४१३७।।

कोलकातायामपि वा सम्पादकतत्त्वसंचाराः।
संभूषितविभवाढ्या नानारूपेषु सन्दृश्याः।।४१३८।।

लेखकधुरीणलेखे सम्पादनकार्यकलने यत्।
शोभनतरे स्वरूपे-मुद्रापण-वैभवं तनुते।।४१३९।।

प्राक्तनपाण्डुग्रन्थप्रपठनकाठिन्यसंयोगे ।
ऽप्यविचलितबुद्धिविभवा दृष्टा संपादकास्तेते।।४१४०।।

कियदिदमतिशयकठिनं पाण्डुलिपीनां समीकरणम्।
क्वचिदित्थं संजाता दिवसे रजनीव सा काचित्।।४१४१।।

पुरालिखितवर्णानां अन्यादृशवर्तनीं दृष्ट्वा।
प्रारम्भे महिषीवत् त्ते ते कृष्णाक्षरा भान्ति।।४१४२।।

किन्तु पुरालिपिमालाभ्यस्तास्तेते तु तत्सर्वम्।
जानन्तः परिपठनं कुर्वन्तः सिद्धिमन्तः स्युः।।४१४३।।

कुत्र कुत्र किं कठिनं पाण्डुग्रन्थेषु संयातम्।
आनुमानिकीसरणिस्तैरत्रास्वाद्यते तूर्णम्।।४१४४।।

सम्पादकमूर्धन्यैस्तदिदं सर्वं तु भूमिकारूपे।
आत्मीयानुभवानां प्रकाशनेषु प्रकथ्यते रुचिरम्।।४१४५।।

रुचिरा कथा तथेयं सम्पादनविद्यया भरिता।
एकैकाक्षरपठने नैकदिवसयापिनी जाता।।४१४६।।

प्रथम-लेखने त्रुटयोऽपि तु जायन्ते क्वचित्कूचित्ता वा।
सम्पादकैस्तु शश्वत्ताः सर्वाः साधनीयाः स्युः।।४१४७।।

यदि लेखकःस्वयमपि स्वीयं लिखितं पठितुमसमर्थः।
अभ्यासवशात्तदपि तु संपादकतो न दूरतो याति।।४१४८।।

सम्पादकाधिकारे सम्यक् परिवर्तनं कर्तुम्।
लेखकसम्मत्या वा रुचिरे रूपे समायाति।।४१४९।।

किन्तु पुरातनरचना पाण्डुलिपीनां कथा नैषा।
यदि तत्रोत्तमपाठः प्रकल्पितो टिप्पणौ देयः।।४१५०।।

मूलस्य पूर्णपाठे परिरक्षणमेव करणीयम्।
संपादकस्वरूपे मूलं मूलस्य रक्षणं नाम।।४१५१।।

मूलस्य किं स्वरूपमितिजिज्ञासाप्रवृत्तिस्तु।
पाण्डुग्रन्थाऽश्लेषाऽधारेणैवाऽत्र कथनीया।।४१५२।।

पूना नगरे तावद् रामायण-भारतदीनाम्।
पाण्डुग्रन्था बहवः संकलिता स्तानथालोच्य।।४१५३।।

एकस्य मुख्यपाठस्याऽदर्शत्वं सुसंस्थाम्य।
उपलब्धास्ते तेऽन्ये टिप्पण्यां समुपलभ्यन्ते।।४१५४।।

अत एवऽखिलवर्षैर्विनिर्मिता काल कलनेयम्।
महाग्रन्थपरिशोधनमुद्रापणयातयामाऽभूत् ।।४१५५।।

उपलब्धसकलपाठाः संपठितास्तत्र जायन्ते।
वैज्ञानिकी सुधारा सेयं संसाधिता विज्ञैः।।४१५६।।

सन्देहानां शमनं नूनं संजायते तथैवेत्थम्।
जनतासु ये च पाठास्तेषां मूलं समास्वाद्यम्।।४१५७।।

सम्पादकमण्डलगतनिखिला या मधुरतर रीतिः।
तस्यां कियती नीतिः सर्वं संस्कारितं कुरुते।।४१५८।।

वेदानां परिपठतेऽप्यांग्लैर्विद्वद्भिरेषैव।
सरणिः काचिल्लब्धा मूलं तत्राऽस्ति सुस्पष्टम्।।४१५९।।

एवं विधे विशेषे पाठाक्षरशब्दसंसारे।
संचरणं संपादनकर्माऽन्तर्गततया गणितम्।।४१६०।।

संपादकास्तु ते ते यदि न स्वीयं श्रमं दद्युः।
पाठभ्रंशास्तावत्तत्र तु सर्वत्र पतिताः स्युः।।४१६१।।

अद्यापि तु दुरवस्था ग्रन्थे ग्रन्थे विलोक्यते सैषा।
धनलोभादथ केवलमुद्रापणमात्रसंतुष्टौ ।।४१६२।।

किन्तु योग्यसंपादकलाभे ते तेऽपि सद् ग्रन्थाः।
स्वीये भास्वररूपे प्रकाशितः संविभासन्ते।।४१६३।।

संपादकवर्याणां तां तामेतां कलां दिव्याम्।
प्रणमामो तेषामथ हृदेशे धारणां कुर्मः।।४१६४।।

१४६.अनुवादाः

कस्यामपि भाषायां ये तावत्सन्ति संरचिताः।
सद्ग्रन्थानां तेषामनुवादाः सन्ति भूयिष्ठाः।।४१६५।।

संस्कृतभाषायां ये वेदा नित्यं समादृता जाताः।
तेषां विज्ञानार्थं नाना भाष्यादिकं रचितम्।।४१६६।।

स्वामिदयानन्दैरथ वेदानां राष्ट्रभाषायाम्।
अनुवादा ये विहिता हिन्द्यां ते पूर्वमनुवादाः।।४१६७।।

वेदानामनुवादाश्चांग्लैर्विद्वद्भिरांग्लभाषायाम् ।
विहितास्तैर्वा वेदाः संसारे ख्यातिमायाताः।।४१६८।।

उपनिषदामनुवादा वाल्मीकेस्तावदनुवादाः।
अनुवादा अथ जाता महन्महाभारतस्याऽपि।।४१६९।।

अनुवादाः सर्वेषामप्यष्टादशपुराणानाम्।
आनुवादास्तावदिमे सन्ति च नैकासु भाषासु।।४१७०।।

आंग्लीया विद्वांसोऽनुवादकार्यं प्रकुर्वन्तः।
समुपोद्धातेऽध्ययनं सुविस्तृतं प्रस्तुवन्तितराम्।।४१७१।।

इत्थमियं सा सरणिस्तत्तद्ग्रन्थानुवादानाम्।
सुविस्तृतं चाध्ययनं प्रारंभे संप्रकाशयति।।४१७२।।

सर्वाधिकाऽनुवादा गीतायाः पञ्चतन्त्रस्य।
प्रमुखासु च संसारे संभाषासु प्रकाशिता जाताः।।४१७३।।

अद्य तु महत्त्वपूर्णो ग्रन्थो नैवाऽस्ति तादृश-कश्चित्।
यस्यानुवाद-विरहोऽद्यत्वे किल संप्रजायेत।।४१७४।।

अनुवादानां चैषामस्ति स्थानं महत्त्वसंपूर्णम्।
तैरेवाऽद्यत्वे किल जानन्ति जनाः सुगूढमपि तत्त्वम्।।४१७५।।

अनुवादेऽतुष्यन्तो मूलग्रन्थं च पश्यन्तः।
शोधार्थिनो निकामं नाना पाठान्प्रकल्पन्ते।।४१७६।।

न केवलं संस्कृतसद्ग्रन्थानामेव ते दृष्टाः।
आंग्लादिग्रन्थानामनुवादा भूरिशो जाताः।।४१७७।।

शासन-संस्थायामपि नाना भागेऽनुवादानाम्।
सततं रचना सैषाऽधिकारिविद्वद्भिरारचिता।।४१७८।।

मूलादप्यधिकेयं समादृताऽस्तेऽनुवादमयशैली।
तत्र भूमिकासु तु वा समयस्थानादि निर्धार्यम्।।४१७९।।

तस्या संरचनायाः समष्टिसारं च सौन्दर्यम्।
भूमिकया सत्क्रियते नाना तर्कानुपस्थाप्य।।४१८०।।

अद्य प्रकाशकाः किल शतशो नगरेषु शोभन्ते।
पाठ्यपुस्तकान्येते स्वीयान्येव प्रकाशयन्तःस्युः।।४१८१।।

तेषां विक्रयकर्मसु भूयांल्लाभोऽर्थजातस्य।
तेषां सविधे गच्छति तत्रास्त्यनुवादसहयोगः।।४१८२।।

यत्र यत्र चैवंविधभूयोभावोऽभिजायते कामम्।
गुणाऽवनतिरप्येषा शुभपरिपाकं विनाशयति।।४१८३।।

अनधिकारिणः पुरुषा अप्यर्थे लाभमालोक्य।
अनुवादे संलग्ना ग्रन्थरहस्यं विलोपयन्त्येव।।४१८४।।

अन्ततस्ते सर्वेऽप्यनुवादा एव सच्छास्त्रैः।
पठ्यन्तेऽथ परीक्षाप्रदानकार्येषु पूर्णतया।।४१८५।।

आस्तां सर्वापीयं दुरवस्था प्रकृतिसिद्धैव।
शासनगतनीतिविदां मतभेदैराहता जाता।।४१८६।।

अनुवादे परिवादः प्रारम्भादेव संजातः।
वेदानुवाद-विषये-मतवादास्तत्र कारणीभूताः।।४१८७।।

शब्दानामथ तेषां वैदिकानां च लौकिकानां च-
शब्दार्थानां सत्त्वे मूले सन्त्येव मतभेदाः।।४१८८।।

केचिद् रूढाः शब्दाः केचिद् योगे निरूप्यन्ते।
अन्ये योगनिरूढा तत्तत्स्थाने प्रयुज्यन्ते।।४१८९।।

येऽनुवादकाः केवलमेकां तां यौगिकीं दृष्टिम्।
प्रगुणीकृत्य यतन्ते सर्वेष्वेवानुवादेषु।।४१९०।।

यत्र च शब्दानामथ योग-निरूढत्वमुन्नेयम्।
तत्र योगमात्रेण तु निर्वाहः केवलं न स्यात्।।४१९१।।

अनुवादे शब्दानां भाषान्तरशब्दरचनायाम्।
अर्थावतारणार्थं प्रकरणभावः समुन्नेयः।।४१९२।।

ये केचित्तु कथंचित् मतमास्थाय स्वकीयं वा।
शब्दानुवादकर्मसु संलग्नास्ते विसंयुक्ताः।।४१९३।।

आंग्लैरपि च तदेतत्स्वीयेष्वनुवादकार्येषु।
शब्दानां योगेषु च भावानां व्यापृतिर्दृष्टा।।४१९४।।

मूले सैषा दृष्टिर्वेदेव्वपि तु सैव संजाता।
तेन पुरातनभाष्ये विरोधयोगः समायातः।।४१९५।।

योगनिरूढाः शब्दा अर्थविशेषान्पुरस्कृत्य।
प्रासाङ्गिकेन विधिना स्वं भावं व्यञ्जयन्तितराम्।।४१९६।।

अनादृत्य तत्सर्वं यौगिकरूपं तु केवलं मत्वा।
अनुवादाः संजाता गांभीर्यं लोपयन्त्येव।।४१९७।।

पूर्वं वेदास्ते ते लौकिक-संस्कृतसुभाषायाम्।
भाष्यरूपसंरचने पूर्वाचार्यैरनूदिता जाताः।।४१९८।।

अनुवादेषु तु महती दुरवस्थेयं चिराज्जाता।
भाषान्तरकरणानां यत्र समुन्मेष आयातः।।४१९९।।

कोशैर्व्याकरणैर्वा प्रकरणमूलं परित्यज्य।
अनुवादे साहार्य्यं नैवाचरितं प्रभावितं कुर्यात्।।४२००।।

मतभेदा यदि न स्युस्तर्हि कुतो भेदसंपत्तिः।
नाना भाष्यविलेखनकर्मणि संप्रेरणां देयात्।।४२०१।।

आचार्यणां तेषां यैर्नूनं ज्ञानपरिपाके।
प्रत्यक्षतया साक्ष्यं सधितमेते प्रमाणसद्रूपाः।।४२०२।।

तेषां या परिभाषा येऽप्यथ तेषां नवोद्बन्धाः।
अनुयायिमनोभूमौ ते सन्त्येव प्रचारमायाताः।।४२०३।।

नाना नीतिविवेचनगतपरिपाटी परिप्लवने।
द्वैभाषिकी प्रतीक्षा प्रावीण्येनाथ दीयतेऽद्यत्वे।।४२०४।।

रशियन फ्रेंच समीक्षा-जर्मन-इटली-प्रकाशिता भावाः।
तत्र योजितास्ते ते-विद्वांसः सन्ति निपुणतराः।।४२०५।।

अनुवादास्तत्रत्यां सर्वां वैचारिकीं सरणिम्।
संस्थापयितुं पुरतः प्रयतन्ते तन्महत्त्वमद्यत्वे।।४२०६।।

अष्मद्देशे चैताः प्रान्ते प्रान्ते प्रवाहिता भाषाः।
साहित्यसर्जनविधौ पुरा युगात् संप्रवर्तन्ते।।४२०७।।

कविवररवीन्द्रनाथो ख्यातशरच्चन्द्रवर्यो वा।
बंकिम इति विख्यातो बंगीयां ख्यापयामासुः।।४२०८।।

गुर्जर-भाषायामथमुन्शिकन्हैयाथलालाघाः ।
औपन्यासिक-विधया रचनाः संचारयन्ति स्म।।४२०९।।

महाराष्ट्रभाषायां गीतारहस्यमेव तत्पूर्णम्।
लोकमान्यतिलकस्य तु महोत्सवाख्यानसन्देशाः।।४२१०।।

तमिलायां तेलग्वां मलयालम्यां च कन्नडायां च।
साहित्यानां रचनाः संजाताः प्राणवाहिन्यः।।४२११।।

पञ्चनदीयाभाषा साहित्ये सा समृद्धिमती।
काश्मीरे डोगर्यां साहित्यस्यामिता रचनाः।।४२१२।।

अनुवादैः सम्प्राप्यास्तास्वथ-भाषासु विरचिता वाणी।
अरबीउर्दूभाषास्वथ सद्रचनाऽनुवादसम्प्राप्याः।।४२१३।।

नाना कारणमालाऽवलम्बनं प्राप्य ग्रन्थानाम्।
भूयांसोऽप्यनुवादा विद्वद्भिर्ये विरच्यन्ते।।४२१४।।

अद्यानुवाद-कार्वं भूयो विस्तारितं जातम्।
वैदेशिक-भाषाणामप्यनुवादा विधेयाः स्युः।।४२१५।।

न केवलं लेखेष्वथ भाषण-वार्तादिसंचयने।
अनुवादानां सरला संपूर्तिः कर्तुमायाता।।४२१६।।

राजनीतिरद्यत्वे क्रोडीकुरुतेऽखिलं विश्वम्।
एकैव नास्ति भाषाभिन्ने देशे विमिन्नास्ताः।।४२१७।।

तासां ज्ञानं तैर्वा देशैस्सह सौम्यता लाभे।
आवश्यकमथ जातं तदर्थमपि यत्र संतुष्टिः।।४२१८।।

नाना भाषाः शिक्षितुमद्य समस्तेऽपि संसारे।
शिक्षा संस्थास्वथ ते विभागयोगाः समारब्धाः।।४२१९।।

१४७.नारीदर्शनम्

भारतवर्षे नारी शिक्षाऽऽसीदादिमे काले।
मन्त्राणां द्रष्टृत्वं सुसिद्धमेवार्यललनानाम्।।४२२०।।

शास्त्रविचारसभायां राजर्षीणां पुरःस्थिता नारी।
शास्त्रार्थे प्रावर्तत शुचिभिर्ब्रह्मर्षिभिः सार्धम्।।४२२१।।

कल्पनमपि नो कर्तुं शक्यं नारीं विना स्वधर्माणाम्।
यज्ञादिसाधनविधौ नारी स्वार्धासनस्थैव।।४२२२।।

स्वातन्त्र्यं स्त्री नार्हति यदेतदुक्तं महाग्रन्थे।
रक्षाविधौ समीक्षा परिसीमा विद्यते तत्र।।४२२३।।

नारी पूज्या जगतां यदि स्वयं स्वीयरक्षायाम्।
समुपार्जनादिकर्मप्रवृत्तिमासेवते ननु धिक्।।४२२४।।

सेयं भावाऽधारा विचारसारा सुरम्यपरिपाटी।
स्त्रीसम्बद्धविचारान् संकुचितान् वा कथं कथयेत्।।४२२५।।

यद्यप्युग्रा दोषा दीर्घे परतन्त्रता काले।
देशेऽस्माभिर्दृष्टा नारी परतन्त्रताऽपि तत्राऽस्ते।।४२२६।।

परतन्त्रताप्रभावो विषवद् व्याप्नोति सर्वजनमध्ये।
सर्वे गुणास्तदात्वे दोषा एव प्रजायन्ते।।४२२७।।

अपयात्युज्ज्वलरूपं परितो व्याप्नोति तामसः पक्षः।
विज्ञा अपि धीरा अपि मोमुह्यन्ते तदा काले।।४२२८।।

परतन्त्रता-निगड़िते काले नारी गृहस्थैव।
भोग्या जनयित्री वा कार्याणां पालिका जाता।।४२२९।।

स्वातन्त्र्यार्थं युद्धे सन्नद्धे भारते देशे।
नारीजागरणानां प्रभापरीवाह आयातः।।४२३०।।

दुर्गालक्ष्मीबाईचरित्रचित्रावलिः काचित्।
रोमाञ्चितं प्रकुरुते निखिले जगतीतले मनुजान्।।४२३१।।

नारीजागरणार्थं नारीशिक्षा प्रदानार्थम्।
नानाविद्याशालाः प्रारब्धा देशनेतृभिः सद्यः।।४२३२।।

आचार्या अपि चैते परकरुणाऽऽपूरितस्वान्ताः।
नारी जागरणानामभियानेऽग्रेसरा आसन्।।४२३३।।

वैदेशिकविश्वस्मिन् या काचिद् वा समुन्नतेः परमा।
काष्ठा दृष्टा नारी केन्द्रस्था तत्र सर्वत्र।।४२३४।।

स्वातन्त्र्यस्य सफलता पूर्णेयं दृश्यमानाऽस्ते।
नो नारी क्रीडनकप्रख्याऽद्यत्वे विचार्यते लोके।।४२३५।।

स्वान्तन्त्र्यात्प्राङ्नारीविषये यद् ध्यातमपि नाऽसीत्।
अद्य समुज्ज्वलरूपं नारी तत्तद् विधारयति।।४२३६।।

नारी प्रधानमन्त्री नारीयं राज्यपालाऽपि।
शासनविविधविधानां नारी परिचालिका युगेऽद्यत्वे।।४२३७।।

सेनायाः संगठने सैनिकरूपेषु निखिलेषु।
वैमानिकसंसेवारूपे क्वाऽस्ते न नारीयम्।।४२३८।।

सर्वविधापि समुन्नतिरद्यत्वे स्वीकृता नार्या।
शिक्षायाः सर्वेषु क्षेत्रेष्वेषा प्रतिष्ठिता जाता।।४२३९।।

सर्वस्यामप्यस्यां समुन्नतौ सम्प्रजातायाम्।
अपलपितुं नो शक्या साऽदर्शाणां विकुण्ठिता धारा।।४२४०।।

भौतिकसमृद्धिमयतासम्भारोत्तेजिते काले।
भारतमूलधनं नो गच्छेद्दूरेति चिन्तयामि मुहुः।।४२४१।।

संस्कृतविद्यैवाऽस्ते सर्वेषां श्रेयसां मूलम्।
तस्यां सर्वे मंगलविषया नूनं समाऽरचिताः।।४२४२।।

सर्वोन्नतमेतद्वा संस्कृतमध्ये तु दर्शनं शास्त्रम्।
आचार्या अत्रत्या वैचारिकभूतिमातेनुः।।४२४३।।

सेयं संस्कृतविद्याऽद्यत्वे ह्रासस्वरूपेषु।
निपतन्ती सन्दृष्टा स्वातन्त्र्ये चापि संजाते।।४२४४।।

यदि चेन्नारीशिक्षा संस्कृतविद्यामयी भूयात्।
नूनं ह्रासे रूपं तदिदं परिवर्तितं भूयात्।।४२४५।।

यद्यपि भारतराष्ट्रं बहुभाषायुक्तमित्येतत्।
नूनं शूलायितमपि तोषकरं वा कुतो न स्यात्।।४२४६।।

संस्कृतविद्या सैषा भाषास्वेतास्वनुस्यूता।
ऐक्यं नाम रसायनमद्याप्यापादयति पूर्णम्।।४२४७।।

एतच्चैक्यविधानं यदि संस्कृतभाषया सुकरम्।
तत्रोपेक्षा चेयं केषां नोद्वेजयेच्चेतः।।४२४८।।

स्वाहा कृत्वा स्वीयं सर्वं यदि सर्वमपरेषाम्।
संग्राह्यतां प्रयातं नूनमियं साऽत्महत्यैव।।४२४९।।

स्थायित्वे त्वात्मीयं संचारित्वे परेषां चेत्।
संगृह्यते स्वरूपं पुष्टिस्तुष्टिस्तदा दृश्या।।४२५०।।

अद्यत्वे नेतारो वैदेशिकभ्रमणवेलासु।
तत्रत्यं ननु सर्वं स्वर्गीयं धारयन्त्याहो।।४२५१।।

तत्तुलनायां स्वीयं सर्वविधं वैभवं ध्यात्वा।
तस्याधःकारणेनैवात्मानं तोषयन्त्येते।।४२५२।।

नारीणामपि शिक्षा तथाविधैवेप्सिता तेषाम्।
यया समुत्तेजकता नारीरूपे प्रदृश्येत।।४२५३।।

किन्त्वस्माकं देशे नारी सर्वात्मिका ज्योतिः।
नारीमूला सर्वा सुषमाऽऽस्ते भारतीयानाम्।।४२५४।।

देवा अपि च रमन्ते नारी सम्पूज्यते यत्र।
सर्वविधश्रद्धानामाधारा विद्यते नारी।।४२५५।।

सोऽयं विभूतियोगो भारतदेशस्य सर्वस्वम्।
तेनैवात्र नितान्तं यतमाना नन्दिता नित्यम्।।४२५६।।

सौशील्यैः सौभाग्यैरावेदितसारसर्वस्वा।
निखिलमिदं संसारं समुद्धरेत् सत्वरं नारी।।४२५७।।

नारीशिक्षणकार्ये यतमाना ये च याश्च विद्यन्ते।
पुनरुत्थानं तैर्ननु संस्क्रियते सर्वदेशस्य।।४२५८।।

संस्कृतविद्याभिर्वा नूनं नवशिक्षिता नारी।
दिव्याऽऽदर्शैर्भरितं कुरुते जीवनमहो पूर्णम्।।४२५९।।

शिक्षाविचारमध्ये शिक्षा सर्वासु चेष्टासु।
शिक्षा श्वासे - श्वासे शिक्षैवेदं जगत्सर्वम्।।४२६०।।

सर्वविधव्यवहाराऽवलिमध्ये साऽथ शिक्षैव।
सर्वविधामपि शान्तिं समृद्धिमयतां समादिशति।।४२६१।।

भूलोके या स्वर्गं समाह्वयति सा तु शिक्षैव।
विनयैर्या परिपूर्णा कर्तव्योन्मेषदायिनी याऽसौ।।४२६२।।

सर्वाऽप्यभावपूर्तिः शिक्षाया एव जाग्रतो धर्मः।
मनुते मनुजोऽभावेष्वपि परिपूर्णं सदाऽत्मानम्।।४२६३।।

पुरुषाणां तु सदैवाऽयत्ता शिक्षा भवत्येव।
किन्तु स्त्रीणां शिक्षा पुरुषाऽधारा प्रवर्ततेऽद्यापि।।४२६४।।

पुरुषा एव तु नित्यं स्त्रीशिक्षादेशिका दृष्टाः।
सामाजिकमथ जीवनमुन्नेतुं ये दृढ़व्रता जाताः।।४२६५।।

१४८. यावत्-तावत्

मैत्री सत्याऽमन्दा व्यवहारे स्थितिमती यावत्।
रत्नं परमविचित्रं हृद्देशे धार्यतां तावत्।।४२६६।।

पाश्चात्या विद्वांसः संस्कृतसेवां प्रकुर्वते यावत्।
नवशोधानां सुषमा पुरातनं शोधयति तावत्।।४२६७।।

सन्देहानां सर्पा भयदास्ते प्रोद्यता यावत्।
मन्त्राक्षर-जपकालः समीपमुपतिष्ठते तावत्।।४२६८।।

अधिकारमदोन्मादो नेतॄणां वर्धते यावत्।
सुनियतचुनावसमयः समीपमायात्यहो तावत्।।४२६९।।

भारं मानसमाराद्दधती कन्या प्रवर्धिता यावत्।
सद्धृतिकार्ये लग्ना द्रव्योत्पादनकरी तावत्।।४२७०।।

रूढीनां साम्राज्यं श्वासानां रोधकं यावत्।
मिथ्याभ्रममालेयं खण्डनभावं गता तावत्।।४२७१।।

नानाविधकुण्ठानामस्वास्थ्यं दृश्यते यावत्।
कुण्ठाभञ्जनकार्ये समुत्सुकं नो मनो तावत्।।४२७२।।

रिक्तोदरे बुभुक्षा सततं संभुक्षिता यावत्।
क्रान्तिः काऽपि नितान्तोन्माथं गमिता चिरं तावत्।।४२७३।।

तत् प्रियतमामुखाब्जं क्लेषं नो शोषयति यावत्।
नानाकष्टाऽकुलितं चेतो व्यथयति चिरं तावत्।।४२७४।।

प्रचुरधनागमकालो न स्यात् समुपस्थितो यावत्।
सैषा कलत्रचिन्ता धत्ते चेतसि पदं तावत्।।४२७५।।

मतगणनानिर्घोषः संपूर्णो नो भवेत् यावत्।
प्रत्यर्थिनां चुनावे चिन्ता महती स्थिता तावत्।।४२७६।।

सर्वेषामपि यूनामुपद्रवो दृश्यते यावत्।
पथनिर्देष्टा तेषां सम्यङ् नो लभ्यते तावत्।।४२७७।।

अत्यादरमाधुर्यं विलोक्यते नूनमिह यावत्।
स्वार्थमयी परिचर्चा महती नैव कृताऽऽस्पदा तावद्।।४२७८।।

संश्लिष्टा परिचर्चा सेयं संक्षेपिता यावत्।
वैदेशिकमाह्वानं सद्यः समुपस्थितं तावत्।।४२७९।।

सामूहिकगोष्ठीनामाह्लादो मोदमावहेद् यावत्।
नवराजनीतिचर्चा स्वीयौ पादौ प्रसारयेत् तावत्।।४२८०।।

आयत्याः परिपाटी सैषाऽन्तिमरूपमागता यावत्।
रोगाक्रमणं विषमं निखिलां तां लोपयति तावत्।।४२८१।।

सोऽयं पुरन्ध्रिवर्गो रूढीनां भञ्जको यावत्।
व्यभिचारचौर्यलुण्ठनगाथेयं सम्प्रवर्धिता तावत्।।४२८२।।

दारिद्र्यं नाशयितुं विचेष्टते शासनं यावत्।
मध्यस्थानां नेत्रे दीप्तिः संदृश्यते तावत्।।४२८३।।

भवनानां निर्माणं गगनं परिचुम्बते यावत्।
खनने कर्मकराणां मृत्युः संजायते तावत्।।४२८४।।

सर्वोत्तमपरिणामः पत्रे सम्मुद्रितो यावत्।
दुर्घटनायां छात्रो मृत्युमुखं चुम्बते तावत्।।४२८५।।

आसादितवाग्विभवा जनताशिक्षणरता यावत्।
प्रतिपक्षे कोलाहलमयता सर्वं गिलति तावत्।।४२८६।।

सांगीतिकरसधारा हृदयं प्रोन्मादयति यावत्।
ध्वनिविस्तारकयन्त्रं विफलं संजायते तावत्।।४२८७।।

प्राभातिकवेलायां स्फूर्तिः संजायते यावत्।
पत्रे वृत्तं दृष्ट्वा सर्वा सेयं विलुप्यते तावत्।।४२८८।।

सौदामिनीव काचित् सहसा परिदश्यते यावत्।
परिवारजलदमध्ये दृष्टेर्दूरं गता तावत्।।४२८९।।

भक्तौ किञ्चित् किञ्चिन्मनोमिलिन्दं लगति यावत्।
तीव्राघातोन्मन्थनवैषम्यं जायते तावत्।।४२९०।।

एकस्मिन् करणीये समुद्यतं स्यान्मनो यावत्।
गुरुतरमेतस्मादपि मूर्छ्यते प्राक्तनं तावत्।।४२९१।।

लोकाराधनकार्ये प्रतिष्ठितं चेतसा यावत्।
उत्कोचेन धनाऽऽगमलोभो विक्षोभयति तावत्।।४२९२।।

कृतिरेषा कमनीया पूर्णा संजायते यावत्।
पत्रे प्रकाशनं वा तस्याः खेदावहं तावत्।।४२९३।।

वेतनवृद्धेर्घोषणमेतत्संजायते यावत्।
बहु-बहु-बहु-बहुगुणिता महार्घता वर्धते तावत्।।४२९४।।

सुस्वास्थ्यस्याशेयं काचित् संजायते यावत्।
सिद्धचिकित्सकमूल्यं पत्रस्थं दृश्यते तावत्।।४२९५।।

निद्रायाः प्राप्त्यर्थं नेत्रौ स्वीयौ निमीलितौ यावत्।
क्रिकेटचित्र संवीक्षणभीषणकोलाहलस्तावत्।।४२९६।।

अवरुद्धवित्तलाभस्याशा संजायते यावत्।
क्लर्कविलिखिताऽऽपत्या पुनरपि दूरंगता तावत्।।४२९७।।

कन्याविवाहचर्चाऽन्तिमरूपे संगता यावत्।
नव-नव-यौतकयाञ्चाविघ्नं संपद्यते तावत्।।४२९८।।

द्रुतगामिवाष्पयानं नव्यं परिचालितं यावत्।
नानालुण्ठनसरणिः सद्यः परिवर्धिता तावत्।।४२९९।।

कठिनपरिश्रमसरणिर्वित्तं प्रगुणं समानयति यावत्।
न्यायालयस्वराणां घोषः संश्रूयते तावत्।।४३००।।

एकस्मिन् संस्थाने प्रभावभावः स्थितो यावत्।
सेवासंस्थायाः खलु परिवर्तनसूचना तावत्।।४३०१।।

आन्दोलनविस्फोटे सर्वाघातः प्रतीक्षितो यावत्।
नेतृणां विक्रयणे शान्तिः काचित् प्रजायते तावत्।।४३०२।।

यात्रायां संस्फूर्तिः सकला समुपार्जिता यावत्।
सर्वोपकरणचौर्यं विषमं समुपस्थितं तावत्।।४३०३।।

स्वस्वामित्वे बहुमतमसमं संसाधितं यावत्।
केन्द्रादेशाद् भग्नं मन्त्रित्वं जायते तावत्।।४३०४।।

भव्योद्यानसमागमसमुत्सवः संगतो यावत्।
क्रूराशीविषदर्शनमुल्लासं लोपयति तावत्।।४३०५।।

अद्य श्वस्तनदाने चलितं चित्तं पुरो यावत्।
श्वासस्यान्तिमभागो देहं विक्षोभयति तावत्।।४३०६।।

शुद्धानां भावानामुन्मेषो जायते यावत्।
दैवं प्रतिकूलं सद् मार्गानवरोधयति तावत्।।४३०७।।

नानाक्लेशविपाके धैर्यं संजायते यावत्।
स्वीयाऽस्तित्वविलोपाऽऽशङ्का प्रोन्माथयति तावत्।।४३०८।।

सुन्दरभाषापठनं मानसमुन्मादयति यावत्।
भावानां काठिन्यं दूरीकुरुते मनस्तावत्।।४३०९।।

नवपत्रपत्रिकाणां प्रकाशनं जायते यावत्।
सामग्री-सौलभ्यं कठिनतरं जायते तावत्।।४३१०।।

नानाविशेषताभिर्मण्डितमेतद् गृहं यावत्।
चौराणां प्राचुर्यं विलोपयति साहसं तावत्।।४३११।।

अद्भुततरस्वरूपं नव्यं सन्दृश्यते यावत्।
सैषाऽऽकल्पितबाधा नैराश्यं सन्दिशति तावत्।।४३१२।।

नूतनकाव्योन्मेषो विमलीकुरुते मनो यावत्।
गालीप्रवाहपातः समलीकुरुते मनस्तावत्।।४३१३।।

प्रोत्साहनप्रचुरता परितः संप्राप्यते यावत्।
यानस्य प्रस्थानं नैराश्यं सन्दिशति तावत्।।४३१४।।

प्राचीना परिचर्चा मञ्चे सञ्चालिता यावत्।
नव्या विचारधारा सकलमिदं भञ्जयति तावत्।।४३१५।।

घोरा विद्रूपेयं मानसमुन्माथयति यावत्।
चन्दनसदृशी लीला हर्षं सञ्चारयति तावत्।।४३१६।।

वैषम्यस्य समुद्रस्तरंगमालाऽऽकुलो यावत्।
साम्यं सजीवतायां सारल्यं बोधयति तावत्।।४३१७।।

तीक्ष्णतरैर्वाग्बाणैर्विद्धं विद्धं मनो यावत्।
परिसान्त्वनाऽनुलेपनजीवनदानं भवति तावत्।।४३१८।।

कष्टानां स्मृतिपटली सर्वं संछादयति यावत्।
काचिदमृतरसधारा दूरीकुरुते व्यथां तावत्।।४३१९।।

मिथ्याव्यवहारोऽयं मानुषमुन्मादयति यावत्।
दुर्दान्तवज्रपातः पक्षाघाते प्रदृश्यते तावत्।।४३२०।।

कालान्धकारपटली श्वासानवरोधयति यावत्।
स्फूर्जन्नवप्रकाशः स्फूर्तिं विपुलां समर्पयति तावत्।।४३२१।।

नेत्रोन्मादकसुषमा चित्तं मोहयति नो यावत्।
चित्राणां संरचने तूलीयं नो चलति तावत्।।४३२२।।

कक्षे द्वारपिधानं सम्यक् संजायते यावत्।
कामकपाटोद्घाटनसमुत्सवो जायते तावत्।।४३२३।।

पाणिन्यादिविरचितं व्याकरणं घोटितं यावत्।
भाषायां निष्कण्टसाम्राज्यं वर्धितं तावत्।।४३२४।।

रात्रिप्रहरापगमः शनैः शनैर्जायते यावत्।
प्राच्यामरुणोदयमयवेला निकटस्थिता तावत्।।४३२५।।

भागीरथीप्रवाहो मन्दं मन्दं चलति यावत्।
ऋतुपरिवर्तनवेला प्रत्यक्षं दृश्यते तावत्।।४३२६।।

गोविन्ददर्शनानां वेला निकटस्थिता यावत्।
जयगोविन्देति ध्वनिरुल्लासं दर्शयति तावत्।।४३२७।।

विषमेषुबाणविद्धा पतन्ति विषमे चिरं यावत्।
हृत्परिवर्तनघटना काचित्संदृश्यते तावत्।।४३२८।।

नवचित्रपटं तदिदं नगरे सन्दर्शितं यावत्।
जनसम्मर्दो भूयान् द्रष्टुं तदिदं गतस्तावत्।।४३२९।।

चक्षुर्नवनैपुण्यं विपुलं विस्तार्यते यावत्।
नवविलसिततारुण्यं सकलान्यङ्गानि शोभयति तावत्।।४३३०।।

अज्ञातेयं शोभा मानसमुन्मादयति यावत्।
चक्षुषि विद्युन्नर्तनमसमं संशोभते तावत्।।४३३१।।

अहमहमिका च सैषा कार्यारम्भे स्थिता यावत्।
मुख्ये पुरुषे मौनं नूनं विस्मापकं तावत्।।४३३२।।

सर्वत्र घोषणायां चुनावचर्चा गता यावत्।
नानादलसंरम्भः सन्दृष्टः सत्वरं तावत्।।४३३३।।

शासननवपरिवर्तनसंघोषः संश्रुतो यावत्।
नानोपद्रवहिंसाऽऽकुलता संजायते तावत्।।४३३४।।

वृत्तानां बाहुल्यप्रकाशने नव्यता यावत्।
वृत्तेषु कल्पनानां योगः प्रोच्चैः स्थितस्तावत्।।४३३५।।

कटुता सैषा नव्या चरमं भावं गता यावत्।
नव्यैः पुरुषैर्मैत्री नूनं संवर्धते तावत्।।४३३६।।

भावानां परिपोषे प्राचुर्यं संगतं यावत्।
मानसिकं स्थूलत्वं दुःखं संचारयति तावत्।।४३३७।।

दिव्यचरित्रोद्याने नूत्नं पुष्पं प्रफुल्लितं यावत्।
सर्वाश्चर्यसमुद्रे लोकः सर्वो निमज्जितस्तावत्।।४३३८।।

बाधादूरीकरणे यत्नं संजायते यावत्।
बाधानामथ बाधा स्वतः समुत्पद्यते तावत्।।४३३९।।

दृष्टावसंगतं तत्कथनं संश्रूयते यावत्।
स्वमतविरोधः सततं स्पष्टतया कथ्यते तावत्।।४३४०।।

नानामतसंघातो बुद्धिं प्रोत्साहयति यावत्।
सा पक्षपातमयता कुण्ठां कामप्युदञ्चयति तावत्।।४३४१।।

प्रोद्यन्नवनिर्घोषो मेघानामुन्नतो यावत्।
प्रबलः पवनाऽऽवेगोऽस्तव्यस्तत्वं समादिशति तावत्।।४३४२।।

नव्योऽयं जलधारावेगः संप्लावयति यावत्।
अधिकारिवायुयानं नभःप्रदेशे प्रदृश्यते तावत्।।४३४३।।

रोमाञ्चोत्थानमिदं हर्षं सम्यक् प्रकाशयति यावत्।
प्रतिपक्षे शेषाणामावेशो दृश्यते तावत्।।४३४४।।

कष्टानामाक्रमणे जनताकष्टं प्रवर्धते यावत्।
शासनसहायतायां वृद्धिः संजायते तावत्।।४३४५।।

एकैकविम्नतायाः कपाटमुद्घाट्यते यावत्।
समधिकहर्षैः सोऽयं विशते तत्रैव सत्वरं तावत्।।४३४६।।

व्यवहारनिम्नतायां तीव्रैर्वैगैर्विशति यावत्।
अन्योलूकीकरणे प्रयासमासेवते तावत्।।४३४७।।

स्वीयं लाभं दृष्ट्वा भक्तं रूपं प्रदर्शयति यावत्।
सर्वाऽपि कपटमाला सत्वरमुद्घाटिता तावत्।।४३४८।।

भ्रातस्तव प्रतिज्ञापूरणकालः समागतो यावत्।
नानास्वार्थमयीयं तव हृदये भूमिका तावत्।।४३४९।।

वृद्धाऽवस्थावृद्धिः शनैःशनैर्जायते यावत्।
नवपापानां गणना नानारूपेषु वर्धते तावत्।।४३५०।।

वैषम्यं व्यवहारे तव सहसा वर्धितं यावत्।
नवविदितक्लेशानां परिपाटी वर्धते तावत्।।४३५१।।

एका ललाटरेखा शतधा संकुञ्चिता यावत्।
वाचि तथा चाङ्गानां संचालनवर्धनं तावत्।।४३५२।।

बुद्धिस्थं कौटिल्यं पुरतः सर्वं समागतं यावत्।
सर्वेषां निम्नत्वं तव मस्तिष्केन कल्पितं तावत्।।४३५३।।

अर्धा बुद्धिस्त्वयि वा नूनं मनसा विनिश्चितं यावत्।
अर्धे निखिलो लोकस्तव संस्कारे प्रतिष्ठितस्तावत्।।४३५४।।

पूर्वपुरुषपरिपाटीं वाचा संघोषयसि यावत्।
नवनाटकाश्रुपातस्तव सर्वैर्दृश्यते तावत्।।४३५५।।

सन्तोषिता भणितयः कालवशाद् विस्मृता यावत्।
नूतनकाव्यविपाको बुद्धौ सम्यग् विलासितस्तावत्।।४३५६।।

राष्ट्रपतिशासनमिदं प्रान्तविशेषे प्रघोषितं यावत्।
मन्त्रीणामुन्मादो सहसैवाऽस्तंगतस्तावत्।।४३५७।।

शिक्षासंस्थाऽऽन्दोलनदुःखस्थितिरुन्नता यावत्।
अभिभावकजनचिन्ता स्वसुतभविष्ये गता तावत्।।४३५८।।

नवभाषायां भावे व्यवहारेष्वपि नवीनता यावत्।
प्राचीनानां कुण्ठा पदे पदे प्रोद्धता तावत्।।४३५९।।

विश्वस्तधूर्तभावो बुद्धौ सम्यक् प्रतिष्ठितो यावत्।
हृद्रोगाऽऽक्रमणानां परम्परैषा समागता तावत्।।४३६०।।

जातिगतं वैषम्यं समाजमध्ये प्रतिष्ठितं यावत्।
दोषाणमपि पटली कृताऽऽस्पदा प्रोद्धता तावत्।।४३६१।।

सौन्दर्योन्मादकताऽन्तरमान्दोलितवती यावत्।
'नहि नहि नहि नहि' माधुर्यं वाणीनामविषयं तावत्।।४३६२।।

सर्वसमर्पणशोभासम्भारः प्रोद्यतो यावत्।
कृष्णा मिलिन्दलेखा गुञ्जति परितश्चिरं तावत्।।४३६३।।

परकीया सम्बुद्धिः सद्यः सन्दूरिता यावत्।
समधिकपैशून्यानां सर्पाः फूत्कारसंगतास्तावत्।।४३६४।।

निखिलब्रह्माण्डानामधीश्वरी सा कृपावती यावत्।
पापानां मलपटली लुप्ता नो दृश्यते तावत्।।४३६५।।

१४९. धर्ममर्म

यद्यपि तु धर्मशब्दो धारणमात्रे प्रयुक्तोऽस्ति।
किन्तु तदेतत् धारणमपि भेदैर्युक्तमेवाऽस्ते।।४३६६।।

नतमां सर्वेषामपि धारणमेकैव पद्धतिः कुर्यात्।
तेन च परम्परायां संसिद्धा बहुविधा धर्माः।।४३६७।।

प्राच्यौदीच्याः पश्चिमदेशीया दाक्षिणात्या ये।
भिन्नां परम्परां स्वामुपजीव्यन्तीति पश्यामः।।४३६८।।

भिन्नभिन्न जलवायुप्रभाववशतस्तु ते धर्माः।
भिन्नत्वं संयान्तो दृश्यन्ते सर्वदा लोके।।४३६९।।

यत्र तु यैर्यैः कार्यैः स्वरूपरक्षा भवत्येषा।
तत्र तत्र ते धर्माः स्वीकृति-भावे समारूढाः।।४३७०।।

एवमेव कालोऽयं धर्माणां नव्य-नव्यानाम्।
उद्भावकोऽस्ति काले काले धर्मा विभिद्यन्ते।।४३७१।।

मनुस्मृतौ ये धर्माः अग्रे तेऽप्यन्यथा जाताः।
कलौ युगेऽस्मिन्नायः पराशरीया स्मृतिर्मान्या।।४३७२।।

इत्थं परिवर्तनमिह जातं धर्मप्रकारेषु।
किन्तु भावनिष्ठेयं प्रधानतायां विराजते धर्मे।।४३७३।।

अस्त्येतस्मिन्कालेऽवधारणान्यैव धर्मविषयेषु।
संस्कृत-संस्कृतिवर्णाद्याश्रम-संस्थासु सर्वासु।।४३७४।।

नव्यायां धारायामेते सर्वे पुरातनाः कथिताः।
एते नतमां नव्ये जीवनमार्गे समुन्नतिं दद्युः।।४३७५।।

प्रत्युत सर्वेऽप्येते धर्माद्यऽन्धानुकरणेषु।
प्रतिबन्धका नवीने जीवनमार्गे समुद्घुष्टाः।।४३७६।।

एषोऽस्ति रूढिरूपो राहुर्यो वै समुन्नतेः सूर्यम्।
ग्रसतेऽमन्दं कूपे मण्डूकानां स्थितिं तनुते।।४३७७।।

वैज्ञानिके युगेऽस्मिन् यन्त्रैरामोदिता शैली।
जीवनेऽस्ति समभीष्टा धर्मादीनां गतिर्न यत्राऽस्ते।।४३७८।।

अर्थोपार्जनयुक्त्या धर्माऽधर्मौ समीकृत्य।
श्रेष्ठत्वं स्वीयं त्विह संस्थाप्यं स्यात् प्रयत्नशतैः।।४३७९।।

तेनैवार्थबलेन च कामानामथ मनोभिलषितानाम्।
सर्वेषां परिपूर्तिः संसाध्या जीवनोद्देश्या।।४३८०।।

धर्मो वा मोक्षो वा सुप्राचीनाऽस्ति गाथेयम्।
इतिहासेष्वेतस्या नाना रूपाणि दृश्यन्ताम्।।४३८१।।

एषाऽपि कापि नव्या नास्ति कथा तुलसिदासेन।
कलियुगगाथाविवरणकाले सर्वा समालिखिता।।४३८२।।

नेयं श्रद्धास्पदतामर्हति युगनामसङ्कलने।
सर्वत्रैव युगेषु श्रूयन्ते तादृशा घोषाः।।४३८३।।

हिरण्यकशिपुरितिनामा दैत्यः सत्ये युगे जातः।
तेन प्रथमं सर्वेषां धर्माणां व्यर्थताऽऽदिष्टा।।४३८४।।

त्रेतायामपि रामायणेषु ते रावणाद्याश्च।
धर्माणां व्यर्थत्वं स्वीयैश्चरितैः कथितवन्तः।।४३८५।।

द्वापरे च संग्रामो यो हि महाभारतेति विख्यातः।
धर्मभ्रंशस्तत्राप्यासीन्मुख्यं कारणतयोन्नीतम्।।४३८६।।

यन्त्राणां प्राबल्यादद्यत्वे या चमत्कृतिः प्रथिता।
सा धर्मस्य विरोधे सञ्जातेति भ्रमः साक्षात्।।४३८७।।

यन्त्राधाराऽधारितचमत्कृतीनां च यद्रूपम्।
धर्माधारितजीवनमग्रे कुरुते प्रमाणताऽतीते।।४३८८।।

अस्माभिर्यदवाप्तं शरीररूपं विशिष्टतमयन्त्रम्।
तद्रहस्यसञ्ज्ञाने जीवनमत्यन्तमुल्लसितम्।।४३८९।।

शारीरमिदं यन्त्रं निखिलब्रह्माण्डरूपाणाम्।
मानवीयसङ्काये सूक्ष्मां स्थितिमेव धारयति।।४३९०।।

योगागमधाराया शारीरस्यैव यन्त्रस्य।
स्वच्छतरां संस्फूर्तिं कर्तु मार्गाः समादिष्टाः।।४३९१।।

अष्टाङ्गयोगमार्गे सर्वविधानां तु सिद्धीनाम्।
द्वारोद्घाटनदृश्यान्यायान्त्येवात्र जीवने दिव्ये।।४३९२।।

यन्त्राधारा सर्वा या या चेयं समुपलब्धिः।
ततोप्यतितरामधिका संसिद्धिर्योगिभिर्लब्धा।।४३९३।।

धर्माधारा सर्वा सा संसिद्धिर्विभावनीया स्यात्।
अद्यापि यन्त्रकाले धर्माधारैव सा सिद्धिः।।४३९४।।

ये ये धर्मोपायास्ते सर्वे नीतिरिति कथिताः।
काले काले ते वा परिवर्तनशीलतां यान्ति।।४३९५।।

स्वरूपस्य संरक्षा धर्मो मुख्यः स्वयंसिद्धः।
अर्थकामतः पूर्वं स्वरूपरक्षैव समभीष्टा।।४३९६।।

स्वरूपरूपं द्विविधं बाह्यं चाभ्यन्तरं चैव।
बाह्ये तस्मिन्रूपे क्रमिकविकासः समाभाति।।४३९७।।

बहवो जनाः शरीरं केवलमात्रं स्वरूपं तु।
गणयन्तस्तन्मात्रे रक्षां सर्वां समीहन्ते।।४३९८।।

गृहवस्त्रभोजनादिव्यवस्थया ते शरीरं स्वम्।
रक्षयन्ति निजजीवनकाले नान्यत्प्रकुर्वन्तः।।४३९९।।

अपरे पुनः कुटुम्बस्वरूपरूपे विधारयन्तः स्युः।
तत्र रक्षणे तेषां बुद्धिविकासः समायाति।।४४००।।

ततोऽपि येऽधिकसारं समाजमथ राष्ट्रमेतद्वा।
निजस्वरूपे गणयन्त्येतेषां तत्स्वरूपं स्यात्।।४४०१।।

तस्य रक्षणार्थं ते ते सर्वं स्वीयं समर्पयन्तो वा।
न कदापि तु सङ्कोचं प्राप्तुं संयान्ति निजचित्ते।।४४०२।।

येषामथ सच्छ्रेणिस्थितात्मनां दिव्ययशोरूपम्।
निजस्वरूपं काम्यं तेषामन्यैव पद्धतिर्मान्या।।४४०३।।

रघुवंशे च दिलीपः कथयति सिंहं यशोरक्षाम्।
कर्तुं तस्याभीष्टं शरीरदानेन साधयति।।४४०४।।

इत्थं स्वरूपरक्षा यद् धर्मस्य स्वरूपरूपं तत्।
अधिकारिभेदभिन्नं विकासभाषां समातनुते।।४४०५।।

तदिदं बाह्ये रूपे रक्षणकार्यं मनुष्यस्य।
धर्मत्वेनाभिमतं तत्रैवादर्शगाथास्ताः।।४४०६।।

सत्याहिंसाऽस्तेयादयश्च धर्मस्य दशभेदाः।
बाह्यस्वरूपशिक्षारक्षार्थं साधु सम्मान्याः।।४४०७।।

एते दशभेदाः स्युः सामान्या धर्मसंभेदाः।
सर्वे देशे काले मनुजैरेते निरन्तरं धार्याः।।४४०८।।

एतैः सहैव ते ते विशेषभेदास्तु धर्माणाम्।
जातिकुटुम्बसमाजे वर्गे देशे तथा राष्ट्रे।।४४०९।।

यद्यत् श्रेष्ठं भूयात्स्वीयशरीरेण तत् सर्वम्।
धर्मस्य रूपमत्राऽस्थेयं निखिलं विदांवर्यैः।।४४१०।।

तत्र तत्र संङ्घर्षः स्थित आस्ते यो विलोक्यते सततम्।
साधारणे विशेषे धर्मस्योभयविधे रूपे।।४४११।।

दानदमदयाऽथ करुणादिषु वा धर्मस्वरूपेषु।
अपवादा अपि तावन्निर्ध्येया देशकालपात्राख्याः।।४४१२।।

एते सर्वत्र सदा नो वा धर्माः प्रकथ्यन्ते।
देशकालपात्राणामभावतायां त एव पापाः स्युः।।४४१३।।

केचित् कथयन्ति पुनः सत्याहिंसात्मको धर्मः।
सर्वापवादरहितः सततं सर्वत्र सन्धार्यः।।४४१४।।

किन्तु सदैव हि सत्यं धर्मे रूपे व्यवस्थितं न स्यात्।
सत्येन प्राणानां विगमोऽन्येषां तदा तु पापं तत्।।४४१५।।

मिथ्याभाषणमपि वा धर्मे रूपे सुपरिगणितम्।
यत्र सज्जने प्राणानां सा वै रक्षा विधेया स्यात्।।४४१६।।

यदिदमान्तरं तावन्मानवमात्रस्वरूपं स्यात्।
दर्शनविकासबुद्धिः सफला तत्रैव संयाति।।४४१७।।

बाह्यं कलेवरमिदं केवलमत्रास्ति स्वस्वरूपं वा।
तत्तु स्थूलशरीरं सूक्ष्मशरीरं च कारणं कायम्।।४४१८।।

परिचाययन्ति दर्शनसिद्धान्तानां समुन्मेषाः।
सर्वेषामेतेषां रक्षा धर्मः स्वरूपाणाम्।।४४१९।।

सामान्येऽथ विशेषे धर्मे संघर्ष आयाते।
तत्र निर्णयं कर्तुं मुग्धा मुनयोऽपि जायन्ते।।४४२०।।

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
इतीदं भगवद् वाक्यं गाम्भीर्यं सूचयत्यत्र।।४४२१।।

१५०.साहित्यम्

साहित्यं किमपीदं जीवन-संचालकं तत्त्वम्।
प्रोच्छलित-दिव्य-वैभव-विभा-विभावैरभिव्याप्तम्।।४४२२।।

साहित्यार्णव-मन्थन-समुद्भवान्येव रत्नानि।
कवितायाः संसारे नव-नव-नवतां समर्पयन्तितराम्।।४४२३।।

श्वासे श्वासे रक्ते नेत्रे श्रवणे सुखस्पर्शे।
जीवनमेतत्सर्वं परीक्ष्यमाणं हि साहित्यम्।।४४२४।।

चैतन्याञ्चित-कायं विमलतरैस्तैरहो भावैः।
ओतप्रोतमथेदं बुद्धि-मनः-प्राणसाहित्यम्।।४४२५।।

वेदे ऋचस्सु सामसु यजुष्षु चात्यन्तदीप्तानि।
काव्यान्यैदम्पर्ये विशिष्टदृष्टान्यपौरुषेयाणि।।४४२६।।

कथमपि ये न वदेयुर्मिथ्याभूतं किमपि वाक्यम्।
नूनं त एव ऋषयः साक्षात्कृतसत्यधर्माणः।।४४२७।।

आयत्यां निखिलायां प्रोज्ज्वलरूपाणि पश्यन्तः।
कवयस्तेते स्वीयां विमलां भाषां प्रसारयन्तितराम्।।४४२८।।

निखिले राष्ट्रे चैकां सुविस्तृतां तां मनोभूमिम्।
प्रत्यर्पयन्ति कवयः सर्वोपस्कारधारणाधीराः।।४४२९।।

साक्षात्कृतं यदेतैस्तदेव मन्त्रेषु सम्प्रोक्तम्।
सृष्टौ सर्वं मङ्गलमादिशतीवोन्नते रूपे।।४४३०।।

वेदामृतवाग्धारा वाल्मीकिं प्रत्युपस्थिता जाता।
येनामृत-मय-रामायण-निर्माणं समारचितम्।।४४३१।।

वेदोदित-सर्वेश्वर-चरित्र-गुम्फैरियं कविता।
वाल्मीकेर्मुखकमलाऽऽमोदं विस्तारयन्त्यास्ते।।४४३२।।

सन्ति सारसुषमायामोतप्रोता इमे सर्वे।
कविता किन्तु कदाचित्कञ्चित्सर्वार्पणं कुरुते।।४४३३।।

आदिकवेर्वाल्मीकेरनन्तरं चात्र कवितेयं।
स्वीयां पुष्टिमवाप्तुं कृष्णद्वैपायनं लेभे।।४४३४।।

वेदव्यासख्याता संसारे काऽपि संज्ञेयम्।
नानापुराणश्रीमद्भागवतादीन् प्रवाहयामास।।४४३५।।

यद्धि महाभारतमिति जगतीतलविश्रुता रचना।
श्रीकृष्णस्य चरित्रं विस्तारैः सम्प्रकाशयति।।४४३६।।

शतशः कथानकानामर्णव इव दृश्यमानोऽयम्।
मुग्धान् कुरुते सर्वान् कालान् सर्वान् पुरस्कुरुते।।४४३७।।

वयमद्यत्वे धन्या रामायणभारतादि कवितासु।
किमप्यलौकिकं विश्वं दैनिकचर्याविराजितं हृदये।।४४३८।।

लोकोत्तरसन्नाटककाव्यमहाकाव्यमूलघटनानाम् ।
वाल्मीकि-व्यासमुखा प्रामाणिकता समायाता।।४४३९।।

नानानूतनजलधरसदृशीभिर्वाक्यधाराभिः ।
संसारोऽयं सरसः सहस्रलक्षाब्दकालेऽपि।।४४४०।।

साहित्यमयी धारेयं कान्तासम्मिततयोपदेशानाम्।
वितरणभावे निपुणा मानवतामुन्नतां कुरुते।।४४४१।।

साहित्य-संज्ञयासार्धं काव्यान्यभितानि सन्ति शुभवन्ति।
दृश्यश्रव्यविभेदैश्चम्पूभेदैश्च विविधानि।।४४४२।।

कविताया अवबोधे रहस्य-तथ्याऽवगाहनं कर्त्तुम्।
काव्यालोचन-रचनाः संज्ञाताः काव्यशास्त्रमिति।।४४४३।।

भरतस्य नाट्यशास्त्रं वाक्यपदीयं स्मृतं कुरुते।
व्याकरणे यत्स्थानं तस्य तथाऽत्रास्ति नाट्यशास्त्रस्य।।४४४४।।

काव्य-शास्त्रमपि तावद् भरतादारभ्य विपुलेषु।
ग्रन्थेषु समाम्नातं स्मर्तव्यं चाद्यतनजातम्।।४४४५।।

आलङ्कारिक-संज्ञा विख्यातैवाऽस्ति साहित्ये।
काव्येऽलङ्काराणामसमां दीप्तिं विलासयति।।४४४६।।

वाचोभङ्गीभिर्या वक्तव्ये पुष्पिता शैली।
सैवालङ्कारेति प्रकथित-विभवा विराजते काव्ये।।४४४७।।

आभूषणपर्यायोऽलङ्कारोऽयं सुविख्यातः।
सौन्दर्यस्य समृद्धिं मानसिकीमात्मसात्कुरुते।।४४४८।।

सुन्दर्यस्ताः सर्वा आभूषण-भूषिताःसन्त्यः।
सर्वमिदं जगतीतलमाकाशेषु प्रकाशयन्तीव।।४४४९।।

कविताऽप्येषा नानाविध-संयोजन-चमत्कारैः।
शब्दानामर्थानां हृदयान्यालोडयन्तीव।।४४५०।।

सुन्दर्यस्त्वाभूषणधारणविन्याससंतता जाताः।
सर्वमोहिनीकविता भूषित-विभवैव सर्वदाऽऽयाति।।४४५१।।

कवितायाः संसारे सन्ति निरुपमानि तत्त्वानि।
येषामालोकानां सौन्दर्यं स्वानुभूतिमयम्।।४४५२।।

शिरसां कम्पनमानन्दोल्लासप्रकाशनं कुरुते।
पद-विन्यासैरेषा कविता दीपयति साम्राज्यम्।।४४५३।।

कवितायाः कथनीये कलेवरे ते गुणाः सर्वे।
रीतय एताः सर्वा-ध्वनिविस्तारः प्रकाम्योऽयम्।।४४५४।।

वक्रोक्तयः समस्ता अभिधा सा लक्षणा चापि।
सा व्यञ्जनाऽनुमानं पुनरस्त्यौचित्यसञ्चारः।।४४५५।।

सुप्रस्थानं तदिदं कविताया रम्यरम्यनवसरणिम्।
प्रादुर्भावैः पुनरथ विस्तीर्णं सद्य एव संस्कुरुते।।४४५६।।

भामह-दण्डी-रुद्रट-नामानस्ते विदांवर्याः।
काव्यालङ्काराणां तत्त्वानां प्रस्तुतिं चक्रुः।।४४५७।।

आचार्यानन्देन तु ध्वन्यालोकं विनिर्माय।
ध्वनिमार्गोऽयं कश्चित्संपूर्णत्वे समारचितः।।४४५८।।

काव्याऽकाशे सूर्यप्रकाश एवाविरास कश्चिदयम्।
ध्वन्यालोकाऽलोके कविता सेयं प्रसन्नमुखपद्मा।।४४५९।।

अभिनव-गुप्त-वरेण्यैः काश्मीरेषु प्रजातैर्या।
व्याख्या काचिद् रचिता ध्वन्यालोकस्य विस्तीर्णा।।४४६०।।

अभिनवगुप्तोद्धरणैर्लोल्लटभट्टं विजानीमः।
श्रीशंकुकं तथान्यं भट्टं तं नायकं च जानीमः।।४४६१।।

नाट्यशास्त्र-विस्तारेऽप्यभिनवगुप्तैः परिश्रान्तम्।
अभिनव-भारत्याख्या व्याख्या तत्रैव संस्थितिं कुरुते।।४४६२।।

एतस्यैव वरेण्यस्यायं कश्चन समुन्मेषः।
कविता-कमनीयत्वं सततं प्रोच्छालयतितराम्।।४४६३।।

आनन्द-वर्धनस्य च हृदयं तेनाऽभिनवगुप्तेन।
सम्यक् प्रकाशितं वा स्वीयैस्तैः शेमुषी-विभवैः।।४४६४।।

साहित्ये कवितायाः शास्त्रीये पक्ष एतस्मिन्।
काव्यप्रकाशनाम्नी काचिज्ज्योतिर्मयी रचना।।४४६५।।

वाग्देव्या अवतारो मम्मट-भट्टो यदाऽऽयातः।
संकलितं सम्पादनमेतेनैवाऽत्र संपठितम्।।४४६६।।

तदनु समायातोऽयं साहित्यं दर्पणं पुरस्कृत्य।
नाना काव्योन्मेषे विश्वे नाथो महापात्रः।।४४६७।।

नाट्यं विषयं स्वीये ग्रन्थे सम्यक् समावेश्य।
काव्यप्रकाशपूर्तिं कर्तुमयं यत्नवाञ्जातः।।४४६८।।

क्षेमेन्द्रेण कवीनां निखिलानौचित्यसंचारान्।
संसाध्यौचित्यानां विचारचर्चा सुविस्तीर्णा।।४४६९।।

कुन्तकनामाऽऽचार्यो वक्रोक्तिं स्थापयामास।
अनुमितिभावं महिमा कवितायां साधयामास।।४४७०।।

अप्पय्यदीक्षितोऽसौ प्रवर्तयति चित्रमीमांसाम्।
नवं कुवलयाऽऽनन्दं नन्दित-विभवं प्रकाशयति।।४४७१।।

भोजस्य नाम मधुरं सरस्वती-कण्ठ आभरणे।
शृङ्गारस्य प्रकाशे प्रकाशते काव्य-कान्तारे।।४४७२।।

पण्डितराजवरेण्यैर्जगतां नाथैर्जगन्नाथैः।
रसङ्गगाधरनामा दिव्यः सन्दर्भ आरचितः।।४४७३।।

जयदेवस्य च चन्द्रलोके स्फुरिता नवा दीप्तिः।
यत्राऽस्ते सर्वेभ्यः काव्यालङ्कार-माधुर्यम्।।४४७४।।

एतादृश-सन्नाम्नः परश्शताः सन्ति विरचनाशूराः।
येषां काव्य-विवेचनसरणिः सूक्ष्मां मतिं तनुते।।४४७५।।

एकैकेषां तावत्सद्ग्रन्थानां पुनष्टीकाः।
व्याख्याग्रन्थास्ते ते भाष्यग्रन्थाश्च विजयन्ते।।४४७६।।

स्वीयं विचार-वैभवमास्वादयितुं निवेदयितुम्।
मान्यास्ते ते व्याख्यां स्वाभिमतग्रन्थसाच्चक्रुः।।४४७७।।

अभिनवगुप्तश्च तथा नागेशक्कुरोऽथ गोविन्दः।
व्याख्याग्रन्थानां तां प्रौढां प्रीतिं सुपुष्णन्ति।।४४७८।।

श्रीराजशेखरस्य य विख्याता काव्यमीमांसा।
लक्षण-चित्रण-विश्वे नवां परिस्फूर्तिमातनुते।।४४७९।।

एतैस्सर्वैर्लक्षण-सद्-ग्रन्थैर्लक्षणीयं तत्।
कमनीयतमं काव्यं संसारे सार-सर्वस्वम्।।४४८०।।

सर्वेऽपि ते सुकवयः कविकुल-गुरवः शिरोमणयः।
स्वीयैर्गुम्फैर्नित्यं नन्दन-वन-मादिशन्ति हृदयेषु।।४४८१।।

तेषामेषां नाम्नां काचिदियत्तैव नास्ति कुत्रापि।
पृथ्वी-पृष्ठे येषां वाक्य-विलासाः समुल्लसिताः।।४४८२।।

साहित्य-संज्ञया यद् रूपं रूढिं गतं पुरतः।
तस्यैव कापि रचनाऽऽवेदित-संस्तुतविभावेयम्।।४४८३।।

साहित्यस्य समस्ते वाङ्मयमात्रे च यद् रूपम्।
तद् वस्तुतः समस्ते व्यस्ते वाऽस्तेऽथ साहित्यम्।।४४८४।।

वाणीनां शब्दानां वाक्यानां प्रस्तुतीकरणे।
निज-भावानां व्यक्तिं कर्तुं निखिलं हि साहित्यम्।।४४८५।।

जीवन-चिह्नं निखिले संसारे शब्द-संचारः।
तदेव तत्त्वे लिखितं जगती-जातं सुसाहित्यम्।।४४८६।।

सर्व-विधा हि समृद्धिः संजातैवाऽस्ति साहित्ये।
जीवनमिदमत्युन्नतशिखरे रूपाणि निर्माति।।४४८७।।

आशामसमां सूते क्षणशः क्षणशोऽथ साहित्यम्।
कार्ये जीवन-काले प्रेरण-भावेषु साहित्यम्।।४४८८।।

सारस्वत-निष्यन्दः पराऽथ पश्यन्ति-मध्यमा नाम्ना।
तुर्ये वैखरिरूपे प्रस्यन्दोऽयं वचो देव्याः।।४४८९।।

यत्तु तदेतत्सर्वं लिखितं पठितं सुमुद्रितं पुरतः।
कतमे भेदे वाण्या गणनीयं स्याद् विचारेऽस्मिन्।।४४९०।।

तेऽमी भाषितवन्तो वैखर्या रूपगणनीयम्।
लिखितं वाङ्मयरूपं का वा तत्राऽस्ति संशीतिः।।४४९१।।

सन्देहस्तावदयं वाणी कर्णेन संग्राह्या।
लिखितं नेत्र-ग्राह्यं स्वरूपमेतत्तथाऽन्यथा जातम्।।४४९२।।

नेयं लिपिस्तु वाणी शब्देनाख्यातुमत्र शक्या स्यात्।
नेत्र-ग्राह्यं रूपं प्रत्यक्षं जायते यस्मात्।।४४९३।।

वाणी श्रावण-साक्षात्कार-सुविषया भवतितराम्।
तस्याः स्मारकतायां नियोजितेयं लिपिः काचित्।।४४९४।।

वाणी-ग्रहणे साधन-भूता सर्वा लिपिः सत्यम्।
साधन-सम्पत्तिरियं साध्यादुत्कृष्टतां भजते।।४४९५।।

साक्षात्कृत-धर्माणो ऋषयस्तेषां स्वदर्शने वाणी।
वेदेष्वेवास्तीर्णा वेदाऽऽनन्त्यं विघोषयति।।४४९६।।

नादो वा विन्दुर्वा परमशिवो वाऽथ शक्तिर्वा।
रसो बलं वा निखिलं माया वा ब्रह्मरूपं वा।।४४९७।।

शब्देषु यदाऽऽयातं तदा प्रमेयं भवेत्सर्वम्।
तस्मादेवाऽकस्माज्जातं जगतां सुसाहित्यम्।।४४९८।।

साक्षात्कृत-धर्माणो ऋषयस्ते वन्दनीयसच्चरणाः।
मौनमास्थिता इतरे सर्वे मुनि-संज्ञया कथिताः।।४४९९।।

श्रवणानन्तरमथवा मननं मुनिभिर्विशेषितं चरिते।
मननोत्तरमेव भवेत् साक्षात्कारस्य संयोगः।।४५००।।

कविता सर्वा साक्षात्कारावसरेषु सर्वेषु।
लक्षण-निर्माणादपि पूर्वावस्थासु विस्तीर्णा।।४५०१।।

यास्काऽऽचार्यः प्रथमो लक्षण-निमार्तृ-रूप-गणनीयः।
येनाऽऽकार-विशेषे प्रकाशिता वैदिकी कविता।।४५०२।।

विज्ञानाविष्काराणां सुविधायां संप्रजातायाम्।
यन्त्राणां समवाये साहित्यस्यापि रूपाणि।।४५०३।।

नित्य-नवानि समन्तात्प्रकाशमानानि चैतानि।
विविधाकारां वृत्तिं निर्मातृषु संविभासयन्त्येव।।४५०४।।

विज्ञानेन समस्तं जनजीवनमस्ति भावितं क्षणशः।
सद्यो जाताश्चैते नानालाभाः समायान्ति।।४५०५।।

अद्य यथावद्यावद्विनिर्मितं जायते तु साहित्यम्।
निर्माणानां फलकं सुविस्तृतं जातमद्यत्वे।।४५०६।।

कविताया अपि काये नित्यनवीनोऽस्ति संचारः।
रूपे रसेऽथ नाना विभावसंभावसंसारे।।४५०७।।

नव्य-मनोविज्ञानोन्मेषे तैस्तैर्निरन्तरै रूपैः।
काव्ये वर्ण्ये विषये नूतनमानन्त्यमावेद्यम्।।४५०८।।

शब्दानामर्थानां विपुलत्वं चाऽथ भाषाणाम्।
भिन्नत्वे तत्रत्यं साहित्यं भिन्न-भिन्नं स्यात्।।४५०९।।

व्यवहारः संसारे सर्वानन्दं ददाति सद्रूपः।
तस्यैव ज्ञानार्थं काव्यं निर्मीयते नाम।।४५१०।।

व्यवहार-निपुणतानां कश्चन नियतश्चमत्कारः।
येन समस्तं विश्वं कर-तल-गतमिव विजायते सद्यः।।४५११।।

कवितेयं व्यवहारं तथाविधं साधयतितराम्।
नो जानन्तोऽपि वयं शिष्ट-शतै-र्युक्ततां यामः।।४५१२।।

भाषान्तर-साहित्ये व्यवहाराणां विभिन्न-रूपेषु।
सामाजिक-परिवेशे दीप्तिः सद्यः समायाति।।४५१३।।

औपन्यासिक-रचनास्ता एताः सन्ति लक्षशोऽद्यत्वे।
व्यवहाराणां विश्वं विलक्षणं रूपयन्तितराम्।।४५१४।।

सद्यः परमां निर्वृतिमित्थं कविता समातनुते।
शब्दे शब्दे वाक्ये प्रसंगयोगे मनोयोगः।।४५१५।।

परमानन्दोद्बोधो रचनानां तादृशो धर्मः।
यद्वशतः सोत्कण्ठाः सहृदय-वर्गा विजायन्ते।।४५१६।।

काव्यं द्विविधं दृश्यं श्रव्यं कथितं पुरातनैः प्रथितम्।
श्रव्यस्थाने पठ्यं कथनीयं तत्र-तत्र सोद्देश्यम्।।४५१७।।

कविता-गोष्ठी-काले कविता संश्राव्यते कविभिः।
लिखिता मुद्रित-रूपे सा पठनीया सदैव संजाता।।४५१८।।

नाटक-निर्मिति-रेवादृश्या कविता समाम्नाता।
किन्तु साऽपि पठनीया पाठ्यक्रमधारितोद्योगे।।४५१९।।

यन्त्रमये संसारे कविता सा दूरदर्शने याता।
नवां नवां संस्फूर्तिं सद्यो भावेषु योजयति।।४५२०।।

इत्थमिदं साहित्यं लोकोत्तरसिद्धरूपेषु।
प्रतिफलितं च नितान्तं समुन्नतं सन्मनः कुरुते।।४५२१।।

एकादशद्वीपः

१५१.टंडन-वन्दनम्

भारतरत्नं श्रीमत्पुरुषोत्तमदासटंडनं वन्दे।
भाषादेशविभावैर्नखशिखपर्यन्तमापूर्णम् ।।४५२२।।

सम्मेलनं प्रयागे हिन्दी-साहित्य इति नाम्ना।
संसारे विख्यातं तत्संस्थापनमिह कृतवान्।।४५२३।।

सम्मेलनाधिवेशनमहोत्सवस्तैर्निखिलदेशे ।
प्रतिवर्षं सम्पादित इति तेनासीदसीम सन्दीप्तिः।।४५२४।।

हिन्दीसाहित्याख्यं सम्मेलनमेकमिदमद्य।
श्रीमत् टंडनवर्यस्मारकरूपेण राजते दिव्यम्।।४५२५।।

स्वातन्त्र्यान्दोलनविशालभूमौ समवतीर्णः।
कारागार निवासं कालमयं यापयामासं।।४५२६।।

नेतारो ये त्वासन् देशस्वातन्त्र्यसंग्रामे।
कारागारनिवासस्तेषां प्रथमोत्सवो जातः।।४५२७।।

दिव्योत्तरप्रदेशे स्वातन्त्र्योल्लसिते जाते।
तत्र विधानसभायाः प्रथमाऽध्यक्षस्तु टंडनो जातः।।४५२८।।

कांग्रेसाऽध्यक्षत्वे नीतः श्रीटण्डनो भातः।
देशं भारतवर्षं संस्कृतिरूपे समन्वितं कर्तुम्।।४५२९।।

वल्लभभाइपटेलस्यासीत्तेनाऽसमा मैत्री।
पंडित-नेहरुवर्ये वाऽसीत्कश्चन विसंवादः।।४५३०।।

तनैवाऽध्यक्षत्वं त्यक्तं कांग्रेससंस्थायाः।
निर्माणकार्यमसमं नित्यं संसाधयामास।।४५३१।।

भारतीयसंस्कृतिनवसम्मेलनमेकमारब्धम् ।
यत्र धार्मिकाः सर्वे विद्वांसः संगता जाताः।।४५३२।।

हिन्दीसाहित्यस्य तु तत्सम्मेलननामकं स्थानम्।
पूर्णप्रतिष्ठरूपेष्वाभासितवैभवं भाति।।४५३३।।

श्रीपुरुषोत्तमदासस्टंडनवर्योऽपि लोकेस्मिन्।
जनजागरणोल्लासे प्रतीकरूपेण संप्राप्तः।।४५३४।।

शतशः किल विद्वांसो नेतारश्चाथ धनिकाश्च।
हिन्दी-भाषोन्नतये तेनाऽनीताः प्रयागेषु।।४५३५।।

अद्य तु सोऽयं सर्वो हिन्दीभाषाप्रतीकसंसारः।
टंड़न-चर्चित-रूपं निजस्वरूपे प्रकाशयति।।४५३६।।

देशे सर्वैर्मान्यप्रयागनगरस्थमालवीय इव।
पर्यटनेष्वश्रान्तो हिन्दीभाषाप्रचार-परिपूर्णः।।४५३७।।

राष्ट्रोन्नतये हिन्दीभाषेयं मातृरूपेण।
सर्वजनैः सम्मान्या तस्याऽसीद् घोषणा सैषा।।४५३८।।

एकस्मिन्नजभाषणकाले हिन्दीं सुपरिभाष्य।
'हिन्दे' सर्वा भाषा हिन्दीरूपेण तेन संगमिताः।।४५३९।।

हिन्ददेशसत्सौरभमाघ्रायाघ्राय सम्पुष्टाः।
व्यवहारेष्ववतीर्णा सर्वा हिन्दीति नामधेया स्युः।।४५४०।।

सेयं ''हिन्दी''नाम्ना समूहरूपे स्थिता संज्ञा।
'रूढ'-व्यवहारेष्वथ कथिता सेयं ''खडी बोली''।।४५४१।।

क्रान्तदर्शिविद्वानथ श्रीपुरुषोत्तमदासटण्डनः सोऽयम्।
हिन्दीरूपं निखिलं व्यापकतायां समादिशति।।४५४२।।

देशस्यैक्यं नित्यं सम्पादयितुं प्रयत्नशतैः।
टंडनवर्यो नितरामहर्निशं जागरूक एवाऽसीत्।।४५४३।।

हिन्दी भाषाऽस्माकं जननी सर्वस्य राष्ट्रस्य।
सम्पोषिका समन्तात्प्रसरति रक्तप्रवाहेषु।।४५४४।।

तामेकतोऽवमत्य च देशेऽस्मिन्नांग्लदेशीया।
भाषाऽऽरोपितविभवा शिरस्सु संस्थापिताऽग्लीयैः।।४५४५।।

रोमनलिपिसंरचिता सेयं पाश्चत्यभाषाऽऽस्ते।
अर्धं विश्वमथेत्थं क्रोडी कुरुते समाहारे।।४५४६।।

वैज्ञानिक-यन्त्राणामाविष्कारान्वितैः शब्दैः।
एषैवाऽङ्गलभाषा नूतनतरवेशपरिपूर्णा।।४५४७।।

किन्तु भारते देशे संस्कृत-हिन्द्यादयो भाषाः।
सर्वं किल विज्ञानं समाह्वयन्त्यश्चिराद् दृष्टाः।।४५४८।।

निखिलोन्नतिमूलमियं भाषा स्वीया भवत्येव।
भारतेन्दुना पूर्वं मूलो मन्त्रः प्रदत्त एवाऽऽसीत्।।४५४९।।

हिन्दी-भाषोन्नतये नव्यसमाचारपत्राणि।
मासिक-पाक्षिक-साप्ताहिक-पत्राणि प्रकाशितान्यासन्।।४५५०।

एतस्मिन्सर्वस्मिन्संरोहे वा समारोहे।
यावज्जीवनमासीत् टंडनवर्यः प्रधानतापूर्णः।।४५५१।।

हिन्दीटंडन इति तावेतौ शब्दौ सुपर्यायौ।
प्रयागकेन्द्रे हिन्दीसंस्थाया वैभवं तदिदम्।।४५५२।।

श्रीपुरुषोत्तमदासा इमे निजे जीवने सततम्।
नवलेखकान्धुरीणान् कवींश्च संकल्पयामासुः।।४५५३।।

श्रीटंडनैरथाऽयं कोऽप्युत्साहः समारचितः।
येन तु हिन्दीभाषा नाना-विषयैः सुपूरिता जाता।।४५५४।।

ग्रन्थलेखकानामथ काचित्पंक्तिः सुनिष्णाता।
श्रीटंडनसत्प्रेरणरूपा समुपस्थिता जाता।।४५५५।।

सरस्वतीत्याख्यं विदितं यन्मासिकं पत्रम्।
श्रीमान् द्विवेदिवर्यो टंडनसन्मित्रतां यातः।।४५५६।।

सर्वेषु विश्वविद्यालयभागेषु स्वभाषायाः।
पृथक्तया प्रविभागो हिन्दीनाम्ना समारचितः।।४५५७।।

भारतीयजनतायां पूर्णतमायां प्रतिष्ठायाम्।
गौरवपूर्णं जीवनमासीत् श्रीटंडनस्य संपूर्णम्।।४५५८।।

तत्संस्मरणविनिर्मितछन्दोमयमालिका सेयम्।
धन्यत्वं किल भजते सामीप्यं तस्य चाऽनयति।।४५५९।।

नैकवारमथ तेषां साम्मुख्यं चाथ सहवासः।
सत्प्रेरकः सुलब्धोऽस्माभिः किल दीपयत्यद्य।।४५६०।।

सरलतमा सा मूर्ति-र्विनिर्मला सा प्रिया दृष्टिः।
श्मश्रुमण्डितं तन्मुखमण्डलमद्यापि मानसे दृश्यम्।।४५६१।।

सरसा च सा पदावलिरथ तन्मुखकमलनिर्गता दिव्या।
नम्रत्वं प्रविधत्ते श्रोतुर्मनसि च विचारेषु।।४५६२।।

१५२.आरक्षणम्

आरक्षणमारक्षणमित्यद्यत्वे महान् घोषः।
संजायते समस्ते देशे प्रान्तेषु मुख्येषु।।४५६३।।

संविधाननिर्माणे निर्मातॄणां समा दृष्टिः।
पददलितेषु जनेष्वथ या पतिता तान्समाहर्तुम्।।४५६४।।

संविधानधाराया आरक्षणसाधनं विहितम्।
येन क्रमेण निम्ना जनाः समुन्नामिता स्युस्ते।।४५६५।।

जनतन्त्रशासनेऽस्मिन् सर्वा जनतैव सम्मान्या।
मतप्रदानवेलायां सर्वेषां वा समानता जाता।।४५६६।।

संसत्सदस्यतायै विधा-सभायाः सदस्यतायै वा।
मतसंग्रहे प्रदेयं मतं नु सर्वैः समानभावेन।।४५६७।।

मतदान समानत्वे संजाते सर्वजनतायाः।
शिक्षायामधिकारः सर्वेषां जायतां नाम।।४५६८।।

अनुसूचिताः समस्ता जनजातित्वेन वा कलिताः।
तासु तु शिक्षाया वा स्वप्नं नाऽसादितं किञ्चित्।।४५६९।।

कथमथ तासामुन्नतिरूपा सा प्रक्रिया धार्या।
येनैषामपि देशस्योन्नतिकाये प्रवेशः स्यात्।।४५७०।।

तासामेवोन्नत्यै तदेतदारक्षणं जातम्।
येन समुन्नतभावं गन्तुं ते शक्नुयुः सम्यक्।।४५७१।।

शतशतवर्षेभ्यो बत यैर्नहि शिक्षा समीहिता दृष्टा।
देशस्वतन्त्रतायां ते सर्वे नूनमाहार्याः।।४५७२।।

अद्य पुनस्ते तावज्जनतन्त्रस्य स्वभावमास्थाय।
बहवस्तेष्वद्यत्वे समुन्नताः सन्ति संजाताः।।४५७३।।

अद्यत्वर्धशतीतोऽप्यधिकः कालो व्यतीतोऽयम्।
संरक्षणाख्यविधिना जागर्तिः साधिता विदूरस्था।।४५७४।।

शतशः सहस्रशो वा युवकास्तेषां तु निम्नवर्गाणाम्।
मुख्या मन्त्रिण एते नाना नवराज्यपाला वा।।४५७५।।

राष्ट्रपतित्वेऽपि तथा महामहिममण्डिताः सन्तः।
संसारेषु नितान्तं देशोद्दीप्तिं समर्पयन्त्यद्य।।४५७६।।

राजतन्त्रमयकाले सर्वा जातिव्यवस्थेयम्।
निम्नगामिनी जाता फलतो देशः समाक्रान्तः।।४५७७।।

वर्णव्यवस्थितिर्या सुन्दररूपेषु कल्पनीयाऽसीत्।
पारतन्त्र्यवेलायामन्यैवेयं स्वयं जाता।।४५७८।।

ये शूद्रास्ते सर्वे सुतरां संस्थापनीयास्युः।
सेवासु समाकीर्णा स्तेनैवैते तु निम्नतां याताः।।४५७९।।

वर्णव्यवस्थितिं तामाधारीकृत्य भारते देशे।
शोषकशोषितभावे सामाजिकपरिणतिर्जाता।।४५८०।।

वर्षसहस्रं यावत्सर्वेयं दुर्व्यवस्थाऽसीत्।
स्पृश्याऽस्पृश्यविवेचनकुशलाः सर्वे विवेचका आसन्।।४५८१।।

तत्र प्रमाणभूतास्ते धर्मे विरचिता ग्रन्थाः।
धर्मशास्त्रविषयत्वेनैवैषां ख्यातिरत्राऽस्ते।।४५८२।।

श्रीपाण्डुरङ्गवामनकाणेत्याख्यो महाविद्वान्।
इतिहासं विरचितवान् तस्यैवैतस्य धर्मशास्त्रस्य।।४५८३।।

धर्माऽचरणविशेषोपदेशकार्यं प्रकुर्वाणाः।
पारम्परिकं भेदं मुख्यतया धारयन्त्येव।।४५८४।।

नैको मुनिरत्राऽस्ते यस्य मतं नो विभिन्नं स्यात्।
युधिष्ठिरस्याप्येतत्सदुत्तर भारते पठितम्।।४५८५।।

आरक्षणेन तावत्स्वातन्त्र्यस्यानुभूतिरायाता।
सर्वेष्वेव नितान्तं दलिततमेष्वद्य परिपाकः।।४५८६।।

आरक्षणसीमानं नितरां संवर्धयित्वा वा।
बाष्पचलित-यानेष्वप्यारक्षणदीर्घताऽऽयाता ।।४५८७।।

१५३. भाषण भव्यता

यद्यपि वाग्व्यवहारे सर्वेषां मानवानां या।
आबाल्यात् संजाता प्रवृत्तिरेषा प्रकर्षमातनुते।।४५८८।।

शिक्षावाप्ति-परिश्रम-संचरणानां प्राकाम-सन्तृप्तिः।
निजं जीवनं धन्यं कर्तुं मनुजे समायाता।।४५८९।।

आन्तरिके संसारे विचरणसंचरणसौभाग्यम्।
सन्दिशति विविधविद्याऽभ्यासः सोऽयं नितान्तरमणीयः।।४५९०।।

नाना शब्दावाप्तिर्भावोत्पत्तिर्नवा नित्यम्।
कार्य-सम्पदं यच्छति वंशं स्वीयं समुन्नेतुम्।।४५९१।।

उच्चतरशब्दसंचितमालासौगन्ध्यमाघ्राय ।
तद्विस्तार-सुयोगैर्नन्दितमास्ते जगत्सर्वम्।।४५९२।।

या भाषणेषु दीप्तिः संजाता मदनमोहनस्यासीत्।
काश्यां हिन्दू विश्वं विद्यालयमेव तत्फलं सकलम्।।४५९३।।

किं वा भाषण-शौर्य-प्रकाशनाय प्रकथनीयम्।
आंग्ला भाषण-शत्तया-पराजिताः सत्वरं याताः।।४५९४।।

अलौकिकायां दीप्तौ-सारस्वत-पूजया सततम्।
या भाषा परिपूता विज्ञैः सा भाषणे कथिता।।४५९५।।

अस्माभिर्निज-जीवन-वेलायां भाषणानि संश्रुत्य।
सन्दीप्तयो विपुलतर-मात्रायां संचितास्तास्ताः।।४५९६।।

अतिपुरातनात्कालात् भाषणकलया तु विश्वस्मिन्।
जीवननवीकरणगतसामर्थ्यं प्रेरितं जातम्।।४५९७।।

श्रीमद्भगवद् गीताविनिःसृता पद्मनाभस्य।
श्रीमुखपद्मान्निखिलाऽर्जुनमोहं दूरयन्त्यासीत्।।४५९८।।

श्रीकृष्णेन भगवता नारायणरूपमास्थाय।
यद्भाषणं प्रदत्तं सैषा संप्रेरणा निखिला।।४५९९।।

सत्प्रेरणासमुद्रस्तथाविधोऽयं समाम्नातः।
एकैकाक्षर-पाठे जीवनतत्त्वं समुपलब्धम्।।४६००।।

अर्जुनसत्प्रश्नानामुत्तरदानेषु दिव्येषु।
श्रीकृष्णोऽयं भगवानाम्रेडितवान्निखिलतत्त्वम्।।४६०१।।

अद्यापि तादृशीयं प्रश्नोत्तरमुद्रया युक्ता।
शैली विकसितरूपे भाषणकालेषु सन्दृश्या।।४६०२।।

गीता सदृशं भाषणमासीन्नो कृष्णसविधेऽपि।
अनुगीतायामर्जुनसमक्षमेव स्वयं कथितम्।।४६०३।।

एतेनैतत्सिद्धं लोकोत्तरभावनाभरितम्।
कस्यचिदेव कदाचिन्मुखात्तु वक्तव्यमायाति।।४६०४।।

यस्मिन् कस्मिन् कालेनैवाशा तादृशं श्रोतुम्।
परिपूर्तिं संगच्छति कृपया पूर्णं सरस्वत्याः।।४६०५।।

ये तु नितान्तं सिद्धस्वान्तास्ते ते महापुरुषाः।
निखिलं निजवक्तव्यं नित्यनवीनं वितन्वन्ति।।४६०६।।

बुद्धो भगवान् नित्यं शुभ्रतरैः स्वीयसन्देशैः।
नित्यं सच्छिष्याणां भ्रममालां शोधयन्नासीत्।।४६०७।।

तद् व्याख्यानानि त्रिपिटकसद्ग्रन्थेषु स्थितान्येवम्।
अद्यापि निखिलविश्वं-सन्देशैः प्लावयन्त्येव।।४६०८।।

यैर्वा ज्ञानमुपात्तं स्वीयाऽचरणेषु संस्थाप्य।
स्वीयं निखिलं जीवनमेवादर्शेषु संगठितम्।।४६०९।।

तेषां भाषणमाला युगे युगे नन्दयति लोकम्।
विभ्रष्टं तु समाजं पुनरादर्शे स्थितं कुरुते।।४६१०।।

भाषणमाला या सा स्वामिविवेकेन दत्ताऽसीत्।
अमेरिकायां सत्या विश्वगुरुत्वस्य मान्यता साऽसीत्।।४६११।।

ध्वनिविस्तारकयन्त्राण्यद्यत्वे भाषणं कर्तुम्।
सुलभानि तेन नाना नेतारो भाषणोद्युक्ताः।।४६१२।।

यन्त्राणीमानि पुरा नैवाऽसन् तत्र कालेऽपि
कण्ठरवेणैव तु सा वाग्धारा संप्रवाहिता जाता।।४६१३।।

भाषणकला तथेयं काचित्संजीविनी विद्या।
शब्देङ्गितेष्वनन्तोच्चावचसद्रूपभूयिष्ठा ।।४६१४।।

भाषाणां विविधानां-माध्यममादाय निःसृता वाणी।
तत्तद्भाषाऽभिज्ञानात्मोन्नत्यै विभूषयति।।४६१५।।

येयमुदात्तस्वरिताऽनुदात्तरूपा स्वरे मूर्तिः।
ह्रस्वदीर्घप्लुतधारा भाषणमालाविभूषणं सैषा।।४६१६।।

एतद् रहस्य संज्ञामास्वादयितुं महान् यत्नः।
संसाध्यते निकामं भाषणधारासमाश्वस्तैः।।४६१७।।

यद्यपि भाषणकाले नो गणनीयाऽस्ति कापि वा रीतिः।
यत् कथनीयं केवलमेकस्यैतस्य विस्तृतिर्जाता।।४६१८।।

शब्दानां संस्मरणं विषयममिध्याय भाषणं क्रियते।
उच्चावचस्वभावाः शब्दास्ते स्यु स्वतःस्फूर्ताः।।४६१९।।

भाषणं तु भूषणमिव तत्रैवालोकते लोकः।
सिद्धभाषणं श्रोतुं समूह-बद्धा जना यान्ति।।४६२०।।

वाणी सम्यक् परिचितरूपेणायाति सा यस्य।
वारं वारं तस्य श्रवणे नित्यं मतिर्भवति।।४६२१।।

भाषणपरिपाकानां प्रभाव-परिरम्भणौत्सुक्ये।
दूरादायान्ति जना मनोभिलाषान्वयं श्रोतुम्।।४६२२।।

अस्माभिरेव दृष्टं सन्दृश्यत एव दृश्याली।
व्याख्यानश्रवणार्थं कियान् समुत्साह आयाति।।४६२३।।

एषा भाषणशैली शतशोऽभ्यस्तैव जायते सुलभा।
नवतरभाषाभावाऽवतरणरूपेऽथ निर्माणे।।४६२४।।

भाषण-संसिद्धिरियमद्यत्वे-चयन-चर्यायाम् ।
मतदानसमारम्भे संसदि सम्प्रेषन्तीव।।४६२५।।

राजनैतिकी भाषणशैलीयं सर्वथाऽद्यत्वे।
ध्वनिविस्तारकयन्त्रैरास्वाद्या सर्वजनताभिः।।४६२६।।

नवजीवनसंलापास्तत्रामितभावगम्भीराः ।
नाना रहस्यपूर्णाःसंजायन्ते सुवक्तृभिर्नियतैः।।४६२७।।

स्वातन्त्र्याऽवाप्तौ याः-पुरातनैर्नेतृभिः कथिताः।
तत्तत्प्रान्तेष्वथ वा समुदाहृत-सारता तेषाम्।।४६२८।।

महाराष्ट्रसत्प्रान्ते भाषणवेलासु राजनेतृणाम्।
श्रीलोकमान्यतिलकः समुदाह्रयते निकामसंतुष्ट्यै।।४६२९।।

वंगीय-भाषणेष्वथ-सुभाषचन्द्रस्य वाक्याली।
संस्म्रियतेऽद्य निकामं सुजनमनोवाञ्छिता भूमिः।।४६३०।।

लाजपतोऽसौ रायः-संस्म्रियते पंचनदभूमौ।
तस्य तु शब्दकदम्बः-सम्परिपठ्योऽस्ति सर्वत्र।।४६३१।।

निखिलमिमं संसारमव्याजं मोहयत्यद्य।
मोहनदास-सुवाणी गान्धीनाम्ना प्रसिद्धस्य।।४६३२।।

या सा पटेलवाणी सर्वेषां सुप्रियैवासीत्।
येन स्वभाषणैरथ पुनरप्येकीकृतो देशः।।४६३३।।

नेहरूवाणी काचिन्नव्यविभावान्विता जाता।
यस्याः प्रभावरुपाण्यासन् सर्वत्र संसारे।।४६३४।।

राजनीतिरपि चेत्थं भाषणमूला समास्वाद्या।
स्वातन्त्र्यानन्तरमथ भाषणरूपाणि निखिलानि।।४६३५।।

नाना नवमतवादाः प्रवृत्तिमासाद्य देशेऽस्मिन्।
नेतृभाषणैर्नव्यैरतिशयविस्तारमायाताः ।।४६३६।।

लिखितं मुद्रितरूपे वितीर्णतायां समादिष्टम्।
विदुषां भाषणमेतत्सर्वाभीष्टप्रदं विद्यः।।४६३७।।

भाषण-कलया कलिता स्वीये विषये नितान्तनिश्चिन्ताः।
धाराप्रवाहरुपेणाभाषन्ते विकस्वरे रूपे।।४६३८।।

तेन ज्ञानमयी सा तृप्तिः श्रोतरि समायाता।
नानामुखी प्रशंसां विद्वांसस्ते लभन्ते वा।।४६३९।।

तेषां भाषणरूपे काचित्सा शृंखलाबद्धा।
रीतिः प्रसर्पतितरां पौर्वापर्यं समर्पयन्तीव।।४६४०।।

पूर्वपक्षमुत्थाप्य च श्रोतरि बुद्धिं समाश्वास्य।
सम्यगुत्तरे स्वीयं सिद्धान्तं स्थापयन्त्येते।।४६४१।।

नात्र तु भाषाभेदो वैरूप्यं किञ्चिदावहति।
स्वरमाधुर्यं तावन्नो केनाप्यस्ततां गच्छेत्।।४६४२।।

ज्ञानमेतदखिलं तद् -भाषण-लीलां विलासयति।
भाषणकला नितान्तं-स्फुरतितमामद्य जनतासु।।४६४३।।

शब्दानामर्थानां श्रोतॄणां दीप्तिरायाति।
ये वक्तुं जानीयुस्तेषामेषा कलाभिनन्द्याऽस्ते।।४६४४।।

१५४.कबीरः

दिव्यतमं गुरुरूपं मानसपटलेषु रचयन्ती।
श्रीकबीरवाणीयं शतशतवर्षेभ्य आयाति।।४६४५।।

श्रीगुरुवरप्रसादात् शुद्धतरं हृदयमन्दिरं कृत्वा।
मानवजीवनमेतन्नवतरसौरभसमन्वितं भाति।।४६४६।।

कथयति कबीरवाणी गुरुरयमास्ते परं ब्रह्म।
तस्माद् गुरुस्वरूपं सततं ध्येयं नरैः सर्वैः।।४६४७।।

गुरुरूपाण्यथ लोके नानारूपाणि कुर्वन्तः।
विचरन्ति गगनमध्ये भूमण्डलमात्रविस्तारे।।४६४८।।

सद्गुरुरीश्वररूपस्तस्मान्नास्तीश्वरः पृथक्कोऽपि।
ईश्वर एवायं किल गुरुस्वरूपे समायातः।।४६४९।।

कथयति कबीरवाणी गुरुस्वरूपं निजे हृदये।
सततं संधरणीयं निजभावस्तत्र संधार्यः।।४६५०।।

विचार्यतामस्माभिः कबीरदासस्य वाणीयम्।
न केवलं देशेऽस्मिन् व्याप्ता जाता विदेशेषु।।४६५१।।

देशविदेशविभाजनसंकोचैर्नो परामृष्टा।
कबीरवाणीयं किल मानवमात्रं विबोधयति।।४६५२।।

कीदृशमपि तु विभाजनमियं हि साक्षात्कबीरमुखवणी।
निम्नाभिमुखं दूरे संकुरुते शुभ्रताऽयासैः।।४६५३।।

वेदान्तग्रन्थानां नानावेदादिशास्त्राणाम्।
सारं यत् कथनीयं व्यवहारे तत्परामृशति।।४६५४।।

व्यावहारिकं सर्वं शब्दे त्वाराधितं ज्ञानम्।
व्यवहारे नो भेदः कथनं चैतत् कबीरदासानाम्।।४६५५।।

यस्यां जातौ काले यस्मिन् सोऽयं प्रकटितो जातः।
वैषम्यं तत्राऽस्मिन्मनुजे मनुजे विनिर्देश्यम्।।४६५६।।

सचरणशीलः सततं परया दृष्ट्या प्रसादितो नित्यम्।
श्रीमान् कबीरदासः किं किं नो वा प्रसादयति।।४६५७।।

कबीरमुखादायता दिव्यतरा छन्द सां धारा।
संगीतान् रचयन्ती मानवमात्रे विशालतां याता।।४६५८।।

यथा शरीरं धृत्त्वा परमात्माऽवातरति काले।
तथैव वाणी रूपेऽप्यवताराणि प्रजायन्ते।।४६५९।।

वाणीयं संकथिता साक्षात् ब्रह्मस्वरूपिणी नित्या।
अवतारेषु च सेयं सर्वं विश्वं विभासयति।।४६६०।।

वागवतारवरेयं कबीरवाणी प्रदीपिता जाता।
कोटि कोटि मनुजानां मनसि च वाण्यां विलासमायाति।।४६६१।।

अत एवेदृशवाणी परमात्मानं प्रदर्शयति।
आस्तिकतापरिपूर्णा कबीरवाणी परामृश्या।।४६६२।।

श्रीकबीरमुखकमलाधाराऽनुभवस्य साक्षिमयी।
'साखी' संज्ञाबोध्या साक्षित्वं वा पुरस्कुरुते।।४६६३।।

साक्षी नो नामायं कदाचिदपि विस्मरणयोग्यः।
सद्गुरुरेव तु साक्षी सर्वस्यैवाऽस्य जीवनस्य स्यात्।।४६६४।।

तत्सम्बद्धेयं सर्वा वाणी श्रीमत्कबीरदासानाम्।
भाषाऽभ्यासविभेदे'साखी' रूपे समायाता।।४६६५।।

साक्षी पुल्लिङ्गे स्यात् 'साखी'स्त्रीत्वे समायातः।
वाणी सेयं 'साखी' सम्यग्जाता कबीरदासानाम्।।४६६६।।

साक्षित्वं न विरुद्धं कस्मिन्नपि देशकाले वा।
कठिनतरं तद्रूपं लेपानां यत्र लोपः स्यात्।।४६६७।।

नाना देशाटनधनसमृद्धिसंरचितसंकाया।
नाना भाषाशब्दैर्गुम्फितहारावली 'साखी'।।४६६८।।

संस्कृतभाषाशब्दा उपनिषदादिप्रभूतसंयुक्ताः।
साखीषुस्वकी ते गुम्फितरूपे विभासन्ते।।४६६९।।

उत्तरपश्चिमपूर्वप्रभागभाषासमुन्मिषिता ।
शब्दावली प्रयुक्ता श्रोतुं सर्वान्समाह्वयति।।४६७०।।

अत्याधुनिकी येयं हिन्दी भाषा 'खडी बोली'।
'साखी' नद्यां तस्या प्रारम्भो लोकनीयः स्यात्।।४६७१।।

भाषाव्याहारावलिरेषा निखिला कबीरदासानाम्।
गहनानुभवोद्भासितहृद्देशे राजते नित्यम्।।४६७२।।

नाना कथानकानां विरचनगुम्फे महाकवयः।
रसमयभणिति विशेषानारचयन्तश्चिराद् दृष्टाः।।४६७३।।

मौलिकसंरचनानां विरचनचिन्तनरताश्चान्ये।
सिद्धाः कवयस्तावत्प्रबन्धमुक्तावलीषु विलसन्ति।।४६७४।।

विषयविशेषाभ्यासे काव्यानि स्वानि दीप्तानि।
सत्कुर्वन्तः केचन संजायन्ते महाकवयः।।४६७५।।

श्रीमान् कबीरदासोऽप्याध्यामिकता समाश्रितान् विषयान्।
स्वानुभवैरविरतमयमास्ते रचयन् स्वसाखीषु।।४६७६।।

दिव्यतमानुभवानां संसिद्धौ सत्प्रतिष्ठितं दिव्यम्।
श्रीमद्रामानन्दं जगद्गुरुं सस्वरं स्तौति।।४६७७।।

तदुपदेशसन्देशान्संरचनाचर्चितान् कुर्वन्।
संसारे मानवतासंचारं निर्मलं तनुते।।४६७८।।

जातिवर्णभेदानां समाजनिम्नत्वसंपत्तिः।
भेदानामेतेषां दूरीकरणेषु सफलोऽयम्।।४६७९।।

तर्ककर्कशास्तेते नाना सिद्धान्तसंवादाः।
वेदान्तानां वादाः कबीरवाणीषु भासन्ते।।४६८०।।

सामाजिकी विषमता हिन्दूमुस्लिमविवादाश्च।
तीक्ष्णप्रहारजर्जररूपे संचित्रिता जाताः।।४६८१।।

नानाविधसंज्ञानां परिभाषाणां च संचयने।
निखिला प्रवाहमाला नितरां विद्योतते सहजा।।४६८२।।

गीतानां संचाराः मंगलमयजीवनं धर्तुम्।
कबीरवाण्यां सततं खेलन्तो गोचराः सन्ति।।४६८३।।

स्वीयं निखिलं कालं क्रोडीकुरुते कबीरकविवाणी।
इतिहासानां काचिद्दीप्तिर्नवतामिहायाति।।४६८४।।

कविरयमत्यन्तं सद्रूपे रूपे प्रकाशयति।
स्वीयं यत् कथनीयं मनोज्ञरूपं समाभाति।।४६८५।।

ये केचिद विद्वांसः कवितां श्रीमत्कबीरदासानाम्।
आलंकारिकविधया पश्यन्तश्चाथ सन्दिग्धाः।।४६८६।।

भावप्रवणां दीप्तिं कवितोद्देश्यं च दूरतः कृत्वा।
कविताया रचनायां कबीर कविता न कर्मण्या।।४६८७।।

कबीरकविता काम्या जीवनसंघर्षविजयाय।
आमोन्नतये सततं निर्भीकावेशमानेतुम्।।४६८८।।

नो कर्मकाण्डगाथाः काश्चित् कविना परामृष्टाः।
पाखण्डपण्डितानां खण्डनमेवात्मसात्कुरुते।।४६८९।।

मुस्लिमरुढीनामपि तीक्ष्णसमालोचनां चक्रे।
सामाजिकी मधुरता कबीरमान्या सदाशयति।।४६९०।।

स्मरणं नित्यं कर्तुं तेषां श्रीमत्कबीरदासानाम्।
शतशःसंस्था देशे संस्थापितवैभवा जाताः।।४६९१।।

न केवलं वा तावन्निखिलेऽस्मिन् भारते वर्षे।
कबीरदासनामायं समुद्रपारेऽपि परिपूर्णः।।४६९२।।

घोरतरे कलिकाले कबीरदासस्य वाणीयम्।
सर्वजनानां सुलभा शुभ्रं मार्गं पुनः पुनः सूते।।४६९३।।

धन्या वयमद्यापि च कबीरशब्दावलीं रम्यां।
दिव्यमनोवाक्यायैराचामन्तश्चिराय धन्यतमाः।।४६९४।।

यः कबीर इति नाम्ना जने जनेष्वस्ति विख्यातः।
शतशो वर्षाणि पुनर्व्यतीतविभवानि जातानि।।४६९५।।

देशे नगरे ग्रामे यस्य सुवाणी परिस्फुरति।
सिन्धे पंचनदे वा काश्मीरेषु प्रकाम्येषु।।४६९६।।

हिन्दूमुस्लिमभेदांस्तिरोहयन्ती हि तद्वाणी।
प्रसरति नित्यं शुभताप्रवाहरूपेषु नव्येषु।।४६९७।।

अचन्द्रतारकं तद्विमलतरं वा यशो विपुलम्।
सबलं सरसं सरलं समाजमाजीवयत्यनिशम्।।४६९८।।

१५५.वेदाः

वेदा अपौरुषेया ईश्वर-निःश्वाससम्भूताः।
सर्वाद्याः सर्वेषां लोकानां वन्दनारूपाः।।४६९९।।

वेदा अनन्तरूपा गणना वेदात्समुद्भूता।
संसारे सत्सरणिः सर्वा वेदात्समुद्भूता।।४७००।।

वेदा ब्रह्माण्डानामाविर्भावेषु समवायाः।
पूर्वं शब्दाः सर्वे तदनु समस्ता इमे लोकाः।।४७०१।।

प्रलये जाते वेदा नैव विलीना भवन्त्येते।
पुनर्जगत्प्रारम्भे वेदाः समवायकारणीभूताः।।४७०२।।

नाम्नो यः सम्बन्धो व्याख्यातो नामिना सार्धम्।
तादात्म्याख्या संज्ञा प्रदीयते तत्र विद्वद्भिः।।४७०३।।

किन्तु पराऽख्ये शब्दे पश्यन्ती-नामकेऽथ शब्दे वा।
नामी नाऽस्ति विभिन्नो नाम्नैवाऽत्रैकरूपोऽयम्।।४७०४।।

सोऽयं पराऽख्यशब्दः पश्यन्त्याऽख्यश्च शब्दो वा।
कूटस्थनित्यरूपे संस्थितवेदस्वरूपाणि।।४७०५।।

तस्मात्प्रवाहनित्या शब्दानां चिन्मयी धारा।
उत्पादयते रक्षति जगतां प्रलयं तथा कुरुते।।४७०६।।

ऋग्वेदोऽयं तावात्काचिच्छन्दोमयी वाणी।
ऋग्वेदे सन्दृश्याः सर्वेषां छन्दसां निचयाः।।४७०७।।

गायत्र्युष्णिगनुष्टुब्बृहतीपंक्तिस्तथाच्छन्दः ।
शतशः सहस्रशो वाऽनन्ता वा छन्दसां धारा।।४७०८।।

छन्दोमात्रं तदिदं वेदादेवाऽस्ति सम्भूतम्।
तस्मात्प्रादुर्भूता निखिला छन्दोमयी सृष्टिः।।४७०९।।

संसारे यत्सुन्दरमास्ते तच्छन्दसां रूपम्।
छन्दोमयताहीनं सर्वमसुन्दरमिहाऽभाति।।४७१०।।

यद्यत्सीमाबद्धं सर्वं छन्दोमयं तत्तत्।
"ऋक्" तत्राऽनुस्यूता विभासते वेदरूपैव।।४७११।।

सीमाभावं त्यक्त्वा संसारे नो किमपि दृश्यम्।
वेदा जगदीशो वा सीमाहीना विभासन्ते।।४७१२।।

गद्यं यजुषां रूपं गद्येनैवाऽश्रिताः सर्वे।
प्रचरन्ति विना शङ्कां यजुषां कश्चित्प्रसादोऽयम्।।४७१३।।

यजुर्नामको वेदो गद्येनैव प्रकाशमायातः।
अणुतम-सीमाबद्धं रूपं विस्तारयामास।।४७१४।।

सोऽयमृग्विस्तारो यजुरूपं धारायित्वैव।
नित्यं विकसनशीलो व्यवहारं चालयन्नाऽऽस्ते।।४७१५।।

काचिद् विभन्नता वा यदि न स्याच्चेद् यजुर्वेदः।
ऋग्विस्तारं कुर्याद् सर्वं चैकस्वरूपं स्यात्।।४७१६।।

छन्दसि छन्दसि भेदं यजुरेवाऽयं प्रवर्तयति।
नो चेदणुतमरूपे ऋग्वेदस्याथ संस्थितिर्भूयात्।।४७१७।।

शुक्लो कृष्णश्चायं विख्यातो वा यजुर्वेदः।
विस्ताराणां गाथा सर्वापीयं द्विरूपैव।।४७१८।।

गेयं वा यद् रूपं शब्दानां सामवेदोऽयम्।
गीतिः सङ्गीतिर्वा सर्वा साम्नः स्वरूपाणि।।४७१९।।

संसारेऽपि च योऽसावानन्दः सामरूपं तत्।
आनन्दो यदि न स्यात्संसारो लुप्त एव स्यात्।।४७२०।।

साम्नैवाऽनन्दानां निखिला धारा समुच्छलिता।
जगदाऽप्लुतं प्रकुरुते नन्दनवनवन्दनं कुरुते।।४७२१।।

तुर्येऽथर्वे वेदे त्रीण्यप्येतानि रूपाणि।
छन्दो गद्यं गेयं सम्मिलितान्येव भासन्ते।।४७२२।।

अद्य वयं यान्वेदाँल्लभामहे ते त्वतिस्वल्पे।
निजस्वरूपे प्राप्ता बहु बहु बहु तद्विलोपितं जातम्।।४७२३।।

एते तावद् वेदा अपौरुषेया विना यत्नम्।
परमेश्वर-निःश्वासेष्वाविर्भूताः समीक्षिता जाताः।।४७२४।।

एतेषां वेदानां शतगुणितं वा सहस्रगुणितं वा।
रूपं तिरोहितं तज्जातं कालस्य कलनाभिः।।४७२५।।

कूटस्थनित्यरूपं तदिदं वेदस्य विद्यते पुरतः।
यत्तत्प्रवाहनित्यं रूपं वेदस्य तत्सर्वम्।।४७२६।।

विपुले वाग्विस्तारे विपुले कालप्रवाहवाचाले।
लक्षसहस्रव्यवहृत-भाषा-भेदेषु तद्रूपम्।।४७२७।।

वेदानां प्रविलोक्यं सर्वं वेदात्समुत्पन्नम्।
आद्यः शब्दो वेदः सर्वं वेदात्प्रसिद्ध्यति वा।।४७२८।।

या या तास्ता भाषा संसारेष्वत्र संभूताः।
ताः सर्वा अपि वैदिकशब्दैस्तावत्समुत्पन्नाः।।४७२९।।

वेदानां ये भागा अद्यत्वे नोपलभ्यन्ते।
ते ते सर्वे तत्तद भाषारूपेषु परिणता जाताः।।४७३०।।

संसारे सर्वास्वपि संव्यवह्रियमाणभाषासु।
सर्वे शब्दा वैदिकशब्दा एवाऽवकल्पन्ते।।४७३१।।

तत्रैवाऽनन्त्यं तद् वेदानां तर्कपथयातम्।
संसाधयितुं शक्यं नो चेत्कथमस्त्यनन्तता वेदे।।४७३२।।

ज्ञानस्य यत् प्रकटनं वेदोऽसौ काऽस्ति संशीतिः।
वेदं विना मनुष्यो जीवितुमपि नैव शक्तः स्यात्।।४७३३।।

केवलमेका वाणी वेदो वाऽयं मनुष्येषु।
पीयूषमयं रूपं सन्धर्याविर्बभूव भूवलये।।४७३४।।

दूरीकृताऽन्धतामिस्राश्चैते वैदिकाः शब्दाः।
संसारे भाषाणां भेदैर्भिन्ना विभासन्ते।।४७३५।।

वेदा एव मनुष्यत्वस्याविर्भावका एते।
मनुजे देवत्वस्याप्युद्दीपकतासमर्पका जाताः।।४७३६।।

यद् बन्धनराहित्यं यो वा मोक्षोऽत्र विख्यातः।
तस्मिन्नपि सन्मार्गे पूर्णप्रवीण्यदेशिका वेदाः।।४७३७।।

दर्शन-सर्वस्वानां तत्त्वमसीत्यादि वाक्यानाम्।
महतो महत्स्वरूपप्रकाशने सोत्सुका वेदाः।।४७३८।।

यद्विज्ञानं कथितं यद्वा ज्ञानं समाम्नातम्।
भूतं भवद् भविष्यत्सर्वस्यैव प्रकाशका वेदाः।।४७३९।।

प्रत्यक्षैरनुमानैर्यत्तत्त्वं नाऽस्ति संसिद्धम्।
स्वर्गादीनां तेषां लोकानां ख्यापका वेदाः।।४७४०।।

दिव्योदात्तैः स्वरितैरनुदात्तैः सुस्वरैः सम्यक्।
देवानामाह्वानेष्वासञ्जितवैभवा वेदाः।।४७४१।।

यज्ञस्वरूपममलं सम्यग् व्याख्यातवन्त इमे।
विज्ञानं विज्ञानेष्वासादित-वैभवा वेदाः।।४७४२।।

वेदे यज्ञं दृष्ट्वा देवाः सन्तर्पिता सर्वे।
भूलोकभावनायां प्रादुर्भवितुं प्रगल्भन्ते।।४७४३।।

ऋषयो वै देवानामप्याह्वानेषु संसिद्धाः।
साम्नां सङ्गीतेष्वेवारोहन्ते विधानपरिरम्भाः।।४७४४।।

वेदानां परिगणने योऽयं वा सामवेदोऽभूत्।
तं वै स्वीयं रूपं गीतायां व्याजहार गोविन्दः।।४७४५।।

ऋषिवर्याणां गायनमथ साम्नां तद् यदा जातम्।
चकिताः प्रीता देवाः प्रकटीभूताऽत्र वरदानैः।।४७४६।।

मानवदेहाऽवाप्तिः काचिद्दिव्यैव घटनेयम्।
संजाताऽस्ति नितान्तं सम्पूर्णाऽभा मिलन्त्यत्र।।४७४७।।

मन्त्राणां द्रष्टारः पूज्या ऋषयस्तपस्याभिः।
परमपवित्रविभावेष्वारोहन्ते परैर्यत्नैः।।४७४८।।

यत्नाश्चैते तावद्रहस्यसंज्ञामनुप्राप्ताः।
योगे तन्त्रे चाऽऽगमनिगमेष्वपि सूचिताः सर्वे।।४७४९।।

नो मनुषाद्धि किञ्चित् श्रेष्ठतरं घोषितं वेदे।
मानुषरूपे सर्वा प्रतिकृतिरास्ते समस्तलोकानाम्।।४७५०।।

अनुपमसामर्थ्ययुतां मानवदेहस्य निर्मितिं दृष्ट्वा।
तत्र निवासं कर्तुं देवा असुराश्च युध्यन्ते।।४७५१।।

मानवशरीरनिर्मितिसमकालं देवातास्तास्ताः।
असुराश्च नित्ययुद्धं प्रकल्प्य तज्जीवयन्त्येते।।४७५२।।

मानवशरीरमेतद्युद्धक्षेत्रं विजानीयात्।
यस्य यदा प्राबल्यं तद्विजयो वा पराजयोऽन्यस्य।।४७५३।।

एतद्युद्धवशीकृतदेहास्ते मानवाः सर्वे।
दिव्यं निजस्वरूपं वीक्षितुमपि न प्रगल्भन्ते।।४७५४।।

देवाऽसुरसंग्रामो मायाशब्देन संकथितः।
मलकञ्चुकादिशब्दैः सोऽयं तन्त्रेषु संकथितः।।४७५५।।

वैदिकसंस्तवकरणे गीतायां यद्यदादिष्टम्।
शब्दानां भेदेष्वपि घटनानां नाऽस्ति संभेदः।।४७५६।।

योगैर्यज्ञविधानैः स्वाध्याये सज्जनप्रश्नैः।
परितः पुष्टिं प्राप्तास्ते देवा एव विजयन्ते।।४७५७।।

देवानामेतेषां विजये जाते मनुष्याणाम्।
आन्तरिकं सज्ज्योतिः प्रकाशभावं समायाति।।४७५८।।

वेदे यज्ञानां यद् विवरणमत्रोपलब्धं तद्।
देवानां सम्पुष्टिं कर्तुं साक्षात् समवतीर्णम्।।४७५९।।

वेदैः सह देवानां कश्चिन्नित्योऽस्ति सम्बन्धः।
कस्माद्धेतोर्देवा एते वेदेष्वनुस्यूताः।।४७६०।।

एको देवो नान्यो द्वितीयतामागतः कोऽपि।
निखिलमिदं तस्यैवैकस्यैवाऽत्र संलोक्यम्।।४७६१।।

एकोऽयं गूढोऽयं नित्यमनन्तैः स्वयं रूपैः।
प्रकटितभावं गच्छति लीला तस्यैव सर्वेयम्।।४७६२।।

ननु लीलाऽस्ति द्वितीया कथं तदा चैक एवाऽयम्।
किं भोः स्वीया शक्तिः ऋ वा द्वितीयाऽत्र संगणिता।।४७६३।।

शक्तिरियं लीला वाऽनिर्वाच्या तस्य तत्त्वस्य।
सर्वं हि तद् रहस्यं प्रकाशितं मन्त्रभागेषु।।४७६४।।

तेनाऽनन्ते दृश्ये त्वेकं सत्तत्त्वमाम्नातम्।
भेदो वैरूप्यं वा लीला तस्यैव तत्त्वस्य।।४७६५।।

विज्ञानानामथवा यन्त्राधारेण दीप्तानाम्।
यत् फलभूतं रूपं तदपि समासाद्यते वेदे।।४७६६।।

या वा भाषा तेषां तेषां विज्ञानरूपाणाम्।
वेदप्रवाहरूपे नित्ये तस्याः समावेशः।।४७६७।।

भाषा वाङ्मयमात्रं संसारे वेदरूपं वा।
यौगिकसरणिरियं सा स्वीकार्या वेदशब्दस्य।।४७६८।।

या तु निरूढा सरणिर्मन्त्रेष्वेवाऽस्ति बद्धेयम्।
तत्रापि सर्वविद्याः संकेते स्वागतं याताः।।४७६९।।

संकेतानां तेषां प्रकाशनं यन्त्रमासाद्य।
संजायते कदाचित्केषांचित्पूर्णरूपेण।।४७७०।।

तेषां संकेतानां सम्यक् संस्फोरणायैव।
वेदाङ्गानि विरचितान्याभासान्ते विशालानि।।४७७१।।

मन्त्राक्षरप्रपठने स्वरसंयोगेषु या रीतिः।
क्षिप्रं प्रयाति सिद्धिं शिक्षाङ्गे सा समान्माता।।४७७२।।

वेदानामध्ययने को वा बाह्यः स्वरूपसंभारः।
'कल्पे' सोऽयं सर्वः संभारो मूलतः कथितः।।४७७३।।

वेदे ते ते शब्दाः स्वीयं ज्ञानं कथं प्रयच्छन्ति।
अङ्गे व्याकरणाख्ये तदिदं सर्वं समाम्नातम्।।४७७४।।

वैदिकभाषारूपाण्येतानि कथं कमप्यर्थम्।
विस्तारयन्ति बहुशः समुक्तमेतन्निरुक्ताङ्गे।।४७७५।।

वैदिकमन्त्रविभागे का वा गणनाऽस्ति शब्दमात्राणाम्।
छन्दोऽङ्गे तत्सर्वं प्रकटितमाऽस्ते समुन्नतं रूपम्।।४७७६।।

समयस्य च विज्ञानं संकेतेनात्र यद् वेदे।
तद्विशदयितुं ज्यौतिषशास्त्रं दिव्यं विनिर्मितं ऋषिभिः।।४७७७।।

मन्त्राक्षरसिद्धानां किञ्चिल्लोकोत्तरं रूपम्।
यत्कथितं तत्सत्यं ऋषयो ह्याद्यास्तथैवासन्।।४७७८।।

वेदाक्षरसन्दर्भा लोके मन्त्रेतिसंज्ञया ख्याता।
विधिवत्कण्ठे ज्ञानं तेषां मन्त्रत्वसाधकं कथितम्।।४७७९।।

मन्त्राक्षरपठनानां संस्कारेष्वस्ति विनियोगः।
मन्त्रश्रवणाद् हीनः कश्चित् त्रैवार्णिको न स्यात्।।४७८०।।

पुण्योत्पादनरकर्मण्यपि पाठानां फलं प्रकटम्।
पठनाच्छ्रवणान्मननात् पुण्योत्पत्तिर्मनुष्याणाम्।।४७८१।।

वैदिकमन्त्रज्ञानामर्थे बाधा यदा जाता।
वेदेषु भाष्यरचना प्रादुर्भूता तदैवाऽऽसीत्।।४७८२।।

यास्क-दुर्ग-श्रीसायण-उब्बट-श्रीमन्महीधराचार्यैः।
वेदार्थाऽऽविष्कारे विनिर्मितः शोभनो मार्गः।।४७८३।।

वेदव्याख्याकर्मणि वेदार्थस्यान्तगामित्वे।
मीमांसाऽख्यं शास्त्रं जैमिनिमुनिनिर्मितं जयति।।४७८४।।

याज्ञे कर्मणि मन्त्रा के कुत्र कथं वोपयुज्यन्ते।
सर्वमिदं सम्प्राप्तुं मीमांसाशास्त्रमध्येयम्।।४७८५।।

वेदोदितसिद्धान्तोदाहरणानां परां काष्ठाम्।
सन्दर्शयन्ति सद्यो लाभैस्तत्तत्पुराणानि।।४७८६।।

संस्कृतभाषालिखितो कोटिमितः संरचनराशिः।
वेदस्यैव नितान्तं नित्यं नीराजनां कुरुते।।४७८७।।

नव्ये तथा युगेऽस्मिन् विज्ञानैर्भासिते लोके।
वेदार्थभावनानां नवतायां तर्पणं जातम्।।४७८८।।

स्वामिप्रवरः श्रीमान्दिव्यदयानन्दमयदेहः।
वेदानां सद्भाष्यं विरचितवांल्लोकभाषायाम्।।४७८९।।

तद्दर्शिते च मार्गे सहस्रशः संचरणशीलाः।
नानाविधान् निबन्धान् रचयामासुः प्रकामरमणीयान्।।४७९०।।

वैदेशिकैश्च शतशो विद्वद्भिस्तत्पराक्रान्तम्।
सम्यङ्मुद्रणमांग्ले भाषाऽन्तरकरणमपि जातम्।।४७९१।।

श्रीकरपात्रस्वामी वेदार्थे पारिजातमारोप्य।
पुरातनं तत्सर्वं नव्ये रूपे प्रकाशयति।।४७९२।।

श्रीभारतीयतीर्थैरथर्ववेदाद्गणितमिदम् ।
संसाधितं समस्तं नव्यान्नव्यं पुरातनं चाति।।४७९३।।

श्रीविद्यावाचस्पतिमधुसूदनझामहाभागैः ।
वैदिकविज्ञानोपरि शतशो ग्रन्थाः समारचिताः।।४७९४।।

सातवलेकारवर्यैर्वेदानामेव सेवायाम्।
सम्पूर्णं जीवनमथ समर्पितं सुप्रसन्नाभैः।।४७९५।।

आंग्लायां हिन्द्यामथ तत्तत्प्रान्तीयभाषासु।
वेदानां सम्बन्धे विपुलं साहित्यमारचितम्।।४७९६।।

अद्यापि च ते वेदा विद्योतितवैभवाः सन्तः।
विश्वस्मिन् गुरुताया निधानभूता विराजन्ते।।४७९७।।

वेदाऽधारितजीवनमेतन्निखिलं सफलतमम्।
तेनैवाऽन्तरिकं तज्ज्योतिः किञ्चित्समुन्मिषितम्।।४७९८।।

१५६.इतिहासः

इतिहासेति विशुद्धा ज्ञानस्याऽऽद्या प्रकाशमयधारा।
यामवगाह्य सुसिद्धः सर्वः संजायते जन्तुः।।४७९९।।

'इति' 'ह' 'आसे' ति कृता शब्दस्यास्याथ व्युत्पत्तिः।
'आसे' ति भूतकालं परामृशति वैखरी सेयम्।।४८००।।

यद्यत् शुभ्रमशुभ्रं विगते काले ह्यतीताऽख्ये।
प्रेरकभावप्रवणं लिपीकृतं सर्वमितिहासः।।४८०१।।

निखिलोऽतीतः कालो वर्णयितुं वा न केनाऽपि।
शक्यस्तेनैवादौ प्रेरकता संपरामृष्टा।।४८०२।।

एवं व्यवहर्तव्यं नैवं वा वर्तितव्यमिति।
विधिविनिषेधविभावैर्विभिन्नतां यान्ति इतिहासाः।।४८०३।।

प्राक्तनपुण्यचरित्रावलिरेषा मानवस्य सर्वस्वम्।
मनुजे मनुजे भिन्ना इतिहासा व्यक्तिशोरूपाः।।४८०४।।

केवलमस्तित्वेषु स्थिताः पुनर्ये विभावाद्याः।
अस्तित्वमात्रकाया न ते जगति जागरूकाः स्युः।।४८०५।।

देहत्यागानन्तरमपि ये जागर्तिमुपयाताः।
जनहृदयेषु वसन्तो इतिहासास्ते सुविमलाभाः।।४८०।।

लिखितास्तु सन्ति शतशो वर्षेभ्यः पूर्वमितिहासाः।
अद्यापि ते हि सुलभा सौभाग्यं तावदस्मदीयमिदम्।।४८०७।।

लिखितेभ्योऽप्यत्यधिका वक्तृश्रोतृस्वरूपसंरचिताः।
परम्पराभिः प्राप्ता इतिहासाः किंवदन्तीति।।४८०८।।

गाथारूपास्तावत्तथेतिहासाः प्रवर्तन्ते।
इतिहासरूपभेदा नानात्वं यान्ति संसारे।।४८०९।।

मानवतासौभाग्याद् भारतवर्षस्य भूमिरियम्।
आसृष्टेरारम्भादितिहासं रक्षयति सर्वम्।।४८१०।।

ऋग्वेदः स्वर्णमयी रेखा ज्ञानस्य गगने या।
प्रथमोन्मेषविशेषाऽक्षराऽमरा सैव गायत्री।।४८११।।

संकेतैरत्रत्यैरितिहासा व्यक्तिमापन्नाः।
सुखयन्ति हि जिज्ञासुप्रवृत्तियुक्तान्महापुरुषान्।।४८१२।।

तेषां संकेतानां पल्लवनं वा पुराणेषु।
विस्तारे कृतमाऽस्ते वैपुल्यं तत्र लोकनीयमिदम्।।४८१३।।

इतिहासपुरुषनाम्ना हिन्दीभाषामये काव्ये।
श्रीदेवराजवर्यस्तत्त्वं किञ्चिन्निरूपितवात्।।४८१४।।

आचार्यश्च द्विवेदी ख्यातोहजारीप्रसादोऽपि।
शवसाधनया तुलनामितिहासस्य प्रकल्पयामास।।४८१५।।

विपरीते शवरूपे शवस्य संसाधना क्रियते।
इतिहासेऽपि मतिरियं विपरीतं कालमाशास्ति।।४८१६।।

इतिहासग्रन्थानां विपुलश्चाऽभाति संसारः।
ग्रन्थानामितिहासे संख्या नो गणयितुं शक्या।।४८१७।।

पाश्चात्यैर्विद्वद्भिः शोधः कश्चित्प्रवर्तितो नितराम्।
तेषामथ सा सारणिः सर्वं परिवर्तयति चक्रम्।।४८१८।।

भारतीयविदुषामथ ज्ञानं विज्ञानमीप्सितं कर्तुम्।
आंग्लैरेतैर्नितरां संकोचाः केचिदाज्ञप्ताः।।४८१९।।

येषां धर्मग्रन्थे सृष्टिरियं पञ्चसाहस्त्री।
वर्षाणां निर्णीता कथैव का सा पुराकल्पे।।४८२०।।

सहस्रलक्षवर्षाणामितिहासा यत्र भासन्ते।
तत्र प्रवेष्टुमेते शतकेष्वेव प्रसीदन्ति।।४८२१।।

खेदाऽस्पदं तथेदं भारतदेशेऽपि विद्वांसः।
इतिहासे धौरेयास्तेषामेवाऽनुकारसंलग्नाः।।४८२२।।

मोहम्मदीयदीर्घप्रशासने रक्षितं ज्ञानम्।
आंग्लैः कतिपयवर्षैर्मलिनीकृतमेव निखिलमिदम्।।४८२३।।

ऐते वदन्ति योरोपस्थस्थगिता गवेषकाभासाः।
भारतवर्षे लेखनमितिहासे नैव जातमिति।।४८२४।।

वाल्मीकीयं रामायणमितिहासे न गणयन्ति।
नाऽपि महाभारतमथ तेषामितिहासमयवाणी।।४८२५।।

सर्वत्र सत्यकथने तेऽतिशयोक्तिं नु पश्यन्ति।
काले देशेऽपि च सा तेषां दृष्टौ विराजते सर्वा।।४८२६।।

आश्चर्यकरं तावद्दुःखाकरमेतदेव ननु सर्वम्।
भारतवर्षे सर्वा शिक्षा चलिता तदाऽधारे।।४८२७।।

एतेऽस्मदीयबाला अर्थान् वैदेशिकान् ब्रुवते।
अद्य स्वातन्त्र्येऽपि तु सा सैवैतिहासिकी शिक्षा।।४८२८।।

क्वाऽयं भारतदेशः क्वाऽर्यास्ते ते तु देशिका नितराम्।
चतुर्युगी यैर्दृष्टा विकासह्रासौ समाश्लिष्टौ।।४८२९।।

लक्षलक्षवर्षाणामितिहासा नैव तिथिदानैः।
क्रोडीकर्तुं शक्तास्तेषामन्यैव गणना स्यात्।।४८३०।।

युगमन्वन्तरणना तत्र तु साहाय्यमातनुते।
सा स्वीकृतेतिहासे ऋषिभिर्लिखिते निभाल्यैव।।४८३१।।

वेदेष्वितिहासानां ये लेखाः सृष्टिमारभ्य।
लयपर्यन्तं नियता विज्ञानैः पोषिता भान्ति।।४८३२।।

तत्र यदि श्रद्दध्युः पाश्चात्याश्चाथ विद्वांसः।
बाला एव भवेयुस्तदा समस्तेऽपि विज्ञाने।।४८३३।।

देवानामितिहासाः सार्श्वयं भारते दृष्टाः।
त्रिविष्टपे वा तिब्बतदेशे तेषां स्थितिर्जाता।।४८३४।।

श्रीमधुसूदनविद्यावाचस्पतिभिः परामृष्टाः।
विषया एते नैकेषु ग्रन्थेषु प्रभावपूर्णेषु।।४८३५।।

तेषामितिहासानां वेदेष्वथवा पुराणेषु।
या वर्णना प्रवृत्ता सा प्रत्यक्षं तदा निखिला।।४८३६।।

काल्पनिकं नो किञ्चिदतिशयितं वा न वा किञ्चित्।
अस्माकमद्य हीनं रूपं तद् दूरयति निखिलम्।।४८३७।।

अद्याऽशक्त्या नूनं वयमेते सर्वमितिहासम्।
काल्पनिकं मान्वाना विश्वासान्दूरयिष्यामः।।४८३८।।

इतिहासा एवैते जन्माज्जाताऽस्मदीयसंसारे।
इतिहासानां नूनं नित्यं योगोऽथ जीवने दृष्टः।।४८३९।।

केवलमेव पुरात्वे यज्जातं तद्धि विश्वस्तम्।
अद्यापि हि यज्जातं सोऽपि भवेदेव इतिहासः।।४८४०।।

इतिहासप्रसराणां सीमानं कोऽपि नैव निर्दिशति।
कुत्रापि नाऽस्ति लेकेष्वितिहासाऽभावरूपत्वम्।।४८४१।।

इतिहासस्याऽभावे जाङ्गलरूपं समागच्छेत्।
वैचारिकसंचारस्त्वितिहासेष्वेव दर्शनीयः स्यात्।।४८४२।।

यद्यद् दृष्टं विश्वे तत्सर्वं सेतिहासं वा।
न किमपि तन्ननु मृग्यं यत्र भवेन्नैव चैतिह्यम्।।४८४३।।

यः प्रथमः सर्वेषां तस्य कृते माऽस्तु विषयोऽसौ।
अस्मत् कृते स एव तु इतिहासाऽरम्भ उन्नेयः।।४८४४।।

इतिहासाऽख्यः शब्दोऽद्यत्वे वा योगरूढ उन्नेयः।
यल्लिखितं विद्वद्भिस्तदेव तावत्तथा प्रकथनीयम्।।४८४५।।

यौगिकवाच्यार्थदृशा सर्वेषामेव भूतकालत्वे।
इतिहासा अपि सर्वे भवेयुरेवेति कोऽत्र सन्देहः।।४८४६।।

किन्तु समेषां तेषां नाऽस्ति व्यवहारवेलायाम्।
इतिहासत्वं केवललिखितानामेव सा सरणिः।।४८४७।।

तत्समकक्षतयैव तु प्रवर्तते किंवदन्तीयम्।
लोककथागाथानामपि तावत्सा स्थितिर्वन्द्या।।४८४८।।

एतत्सर्वसमीकृतभावस्तावत्स एव विषयोऽसौ।
निजता यत्र श्रान्ता परिश्रमश्चाऽथ तुष्टिदो निखिलः।।४८४९।।

मानवमात्रे सैषा प्रवृत्तिरास्ते महीयसी काचित्।
मरणादूर्ध्वमपि स्याच्चर्चा सर्वत्र मनुजस्य।।४८५०।।

एषैव काऽपि वृत्तिर्मूला सत्कर्मपरिधाने।
तेनैव त्वैतिह्यं पुष्टतरं मूलतो जातम्।।४८५१।।

इतिहासस्य तु शिक्षा बाल्ये गृह एव जायते नित्यम्।
श्रूयन्ते हि तदात्वे कथानकास्तोषितस्वान्ताः।।४८५२।।

संस्काराणां जनका एते पाठाः प्रजायन्ते।
गृह एव पाठशाला प्रजायते चादिमेऽध्ययने।।४८५३।।

स्वीकुर्वन्तु भवन्तो निखिलं विश्वं तदाऽत्मीयम्।
सर्वेषामितिहासाऽस्मदीयपक्षे विनिक्षिप्ताः।।४८५४।।

अस्माकमेव पूर्वं रूपं यद्यादृशं चासीत्।
इतिहासदृशा सर्वं विस्पष्टं जायतेऽस्माकम्।।४८५५।।

वयमेव पूर्वकाले नानारूपेषु संजाताः।
यद्यद्वा तत्र कृतं वयं पठामः स्वयं सर्वम्।।४८५६।।

विगते चाऽस्मत्काले नितान्तमैक्यं विजायते नूनम्।
इतिहासाऽख्यं तत्त्वं तद्रूपं नित्यमेव ननु धत्ते।।४८५७।।

इतिहासमञ्जुलानां युगनिर्मापकचरित्राणाम्।
श्रीरामसदृक्षाणां जीवनमस्मद् ऋणीभवति।।४८५८।।

यद्यद् वा कृतमथ तैः शान्तिसमृद्ध्यै प्रमाणं तत्।
तैरथवा यत्त्यक्तं विगर्हितं जीवने तत्तत्।।४८५९।।

जीवनस्य निर्माता जीवनसंचालकश्चापि।
जीवनविधारकोऽसावितिहासो नाऽपलपनीयः।।४८६०।।

इतिहासो बोधयते भविष्यदत्युन्नतं कथं वा स्यात्।
कथमथवा भूरिकथाघातकतत्त्वस्य लुप्तिः स्यात्।।४८६१।।

संसारेष्ववतीर्णाः श्रीमन्तो भूतिमन्तो वा।
ओजोवन्तो जीवा इतिहासे सन्निधीयन्ते।।४८६२।।

नूनमयं न विरामः केवलमितिहासभाषायाः।
अभिधेयः संलक्ष्यो ध्वनिरूपो वा विभुःसोऽयम्।।४८६३।।

काव्यमहाकाव्यानां नाटकरचनावलीनां च।
उपन्यासरचनानामितिहासे भङ्गिरन्यैव।।४८६४।।

वाल्मीकीया वाणी प्रमाणभूता न सन्देहः।
तुलसीदासविरचना प्रमाणभूता तथैवाऽस्ते।।४८६५।।

इतिहासनवनवानां रूपाणां गणनिका नो वा।
केनाऽपि कर्तुमथवा लोकेऽस्मिन् शक्यसंपादा।।४८६६।।

यानि चरित्राणि पुनः स्वल्पे भागे विकासमायान्ति।
तेषामपीतिहासास्तत्रत्यैरेव रक्ष्यन्ते।।४८६७।।

सम्भाराश्चारुसमावेशैरेभिः प्रदीप्यन्ते।
इतिहासे धौरेया नानाऽकाराः प्रजायन्ते।।४८६८।।

भाषाः सहस्रशो या दीप्यन्ते विश्वभागेषु।
सर्वास्वपि तासु नवा इतिहासा वा विलोक्यन्ते।।४८६९।।

यैका घटना जाता नानारूपेषु वर्णिता सैव।
नानानायकवर्यैर्नानाभाषाविभूषितस्वान्ता ।।४८७०।।

तत्राऽप्ययं विकासः परम्परायाः परं मृग्यः।
इतिहासानामेषा विकासभाषाऽपि लक्ष्यैव।।४८७१।।

सृष्टेस्तथेतिहासो विज्ञानानां च धर्माणाम्।
दर्शनदिग्दर्शनमथ वैयाकरणत्वसन्दीप्तम्।।४८७२।।

छन्दो वाकोवाक्यं पुराणसद्धर्मशास्त्रं वा।
इतिहासे सर्वेषामेतेषां श्रेष्ठता जाता।।४८७३।।

जातीनां वर्णानामाश्रमधर्मेषु संस्थितानां वा।
नानाविधदेशानां युद्धानां सन्धिभावानाम्।।४८७४।।

दीप्तीनां या धारा संरक्षिततामुपागताऽऽयाता।
जीवनधारणसार्धं सर्वाऽस्माभिर्विधार्यते प्रेम्णा।।४८७५।।

आदावितिहासस्य प्रथमा रेखा सदा दीप्ता।
भारतवर्षेऽप्यार्यावर्ते सा दिव्यधारेव।।४८७६।।

ब्रह्मर्षयो महर्षय ऋषयोऽस्मिन्भारते वर्षे।
सत्ययुगप्रारम्भे मानवतां दीपयामासुः।।४८७७।।

प्रथमो देवो ब्रह्मा चतुर्मुखो यः प्रजापतिः साक्षात्।
मनसा सनत्कुमारान्सकलान्संकल्पयामास।।४८७८।।

तदुत्तरं सप्तर्षीन्मनसा संसाध्य सर्वान्वा।
तेषां हृदयाऽकाशे वेदानवतारयामास।।४८७९।।

इत्थमिदं प्रारम्भादद्यावधि जीवनं दिव्यम्।
ऋषिविरचिताक्षरावलिपरिपूतं तावदितिहासः।।४८८०।।

धर्मार्थकाममोक्षे पुरुषार्थानां चतुष्टये धर्मः।
दिव्यः प्रकाशपुञ्जो मूलं निखिलेतिहासानाम्।।४८८१।।

धर्मः स एव रक्षां कुरुते यो नित्यसंलग्नः।
रक्षैवोन्नतिमूला तत्रैवार्थाश्च कामाश्च।।४८८२।।

धर्मस्य प्राधान्ये जीवनवेलासमाश्लिष्टे।
इतिहासा अप्येते बन्धान्मोचयितुमाज्ञप्ताः।।४८८३।।

अर्थानां कामानां प्राधान्ये धर्मगौणत्वे।
रावण-हिरण्य-कंस-प्रभृतीनां सन्ति इतिहासाः।।४८८४।।

श्रीरामचन्द्रसदृशं चरितं ध्येयं तु जीवमात्रेण।
रावणचरितस्पर्शादपि दूरे स्थेयमित्येवम्।।४८८५।।

सुहृत्संमिता भावा विनिवेश्यन्ते विनायासम्।
मनुजस्य तु संसारे सुहृत्तमास्तावदितिहासाः।।४८८६।।

प्रभुसम्मितमुपदेशं वेदादेव प्रयच्छन्तः।
सर्वेषां ज्ञानानां प्रभवश्चैते त इतिहासाः।।४८८७।।

मित्राणां मित्राण्यथ शत्रूणां शत्रवोऽस्माकम्।
गुरुरूपाणि गुरूणां राजन्ते तावदितिहासाः।।४८८८।।

इतिहासाऽख्यं तत्त्वं तदिदं प्रज्ञानब्रह्मणो रूपम्।
हृदयेषु तद्विराजितमास्तेऽतो वा वयं धन्याः।।४८८९।।

जड़चेतनादिभेदा इतिहासऽध्यायधारायाम्।
लोलुप्यन्ते सर्वे सर्वेषां सन्ति इतिहासाः।।४८९०।।

घटनारूपं त्वेकं निष्कर्षाः किन्तु बहवः स्युः।
निष्कर्षाणां निकषा विभिन्नतायां विलासमुपयाताः।।४८९१।।

संसारे देशानामादौ वसतिं प्रकुर्वाणाः।
के वा कथं कियन्तः कथमुपचाराः किमाचाराः।।४८९२।।

सा सभ्यता कथं वा प्रादुर्भूता नवीनयुगे।
कदा प्रवेशस्तेषां का वा क्रान्तिः कदा युद्धम्।।४८९३।।

कथमुन्नतिर्निकामं कथमथवा सर्वसौभाग्यम्।
तेषामाविर्भूतं तुलनायां सोऽयमितिहासः।।४८९४।।

पुरातनानां ध्वंसो बहुशो वा रूढिभूतानाम्।
नव्यानां भावानां ग्रहणं क्लेशः समृद्धिश्च।।४८९५।।

राजनीतिपरिवर्तनवेलायां तावदितिहासाः।
परिवर्तिता भवन्त्यथ सर्वोऽयं तावदिहासः।।४८९६।।

ये शासकाः शरण्यास्तेषामेवेतिहासेषु।
देशचरित्रं गुम्फितमास्ते दिव्याऽवदानेषु।।४८९७।।

आदर्शा अपि तावत्काले काले विवर्तमाना वा।
नवतां जीवनभावे प्रस्तुतिरूपां व्यतन्वन्त।।४८९८।।

मस्तिष्काः सिद्धान्ताः विचारधाराप्रवाह वा।
तां भूमिं निर्मान्तो दृष्टा यत्राऽवलम्बते देशः।।४८९९।।

सर्वस्वाऽर्पणरूपं बलिदानं जीवनाऽहुतयः।
निर्मार्तृणां व्यसनं सञ्जातं येन जीवामः।।४९००।।

परिवर्तनप्रवाहेऽपरिर्तितरूपमास्थाय ।
यद् यद् व्यवस्थितं तत् संरक्षितमेव निखिलेभ्यः।।४९०१।।

द्वादशद्वीपः

१५७.वाक्स्पर्शः

रूपवतीनां किञ्चिन्नेत्रोत्सव-संसरण-सर्गे।
वाणीयं प्रथमतयाऽऽतनुते संभूतिमात्मीयाम्।।४९०२।।

वागाराधित-विभवास्ता एताः सन्ति सुन्दर्यः।
नेत्र-नलिन-संपातैर्जीवनमुच्छालयन्त्येव ।।४९०३।।

वाणीनां सौन्दर्य-स्पर्शैः सर्वं सुखावहं जातम्।
वयमपि कथयामस्तास्तास्ता नूनं प्रकथयन्ति।।४९०४।।

संकोचानां लतिका मध्ये मध्ये स्वसंरोधैः।
विविधं वाक्संस्पर्शं यथा तथा वा विलासयति।।४९०५।।

कारणवादो दूरे क्रमोऽपि कश्चिन्नगणनीयः।
मन्दं यदपि तदपि वा किञ्चित्किञ्चित् प्रकथनीयम्।।४९०६।।

वाक्संस्पर्शो मधुरः नवीनतोल्लासिता युक्तिः।
दूरस्थामपि तां तामङ्गे स्वीये समानयति।।४९०७।।

१५८.मत्कुणाः

मत्कुणनाम्ना कश्चिदातङ्को मानसे जातः।
रात्रौ निद्राऽभावः प्रभवति मत्कुणपरीरम्भे।।४९०८।।

एकोऽप्यायातो यदि वस्त्रे कोणेऽपि संलग्नः।
शतसहस्रसंख्यायां सद्यो नूनं विपरिणमते।।४९०९।।

रक्तबीजरूपोऽसौ मत्कुणजीवो विभाति खट्वायाम्।
'खट्मल' इति विख्यातो जने जने परिचितः सोऽयम्।।४९१०।।

अतिथिः कोऽपि च रात्रौ जागरितः केवलं कार्यम्।
मत्कुणमारणविश्लेषणमात्मसात्कुरुते ।।४९११।।

यद्यपि मशकसमानो निभृते रूपे समाश्वस्तः।
अवसरसक्षण दक्षो रक्ते विन्दुं परामृशति।।४९१२।।

किन्तूड्डयनविशेषे मशकास्ते शक्तिमन्तः स्युः।
मत्कुणाऽक्रमणयोगः सम्प्राप्तो भूविसर्पणैरेव।।४९१३।।

कमले निवसति कमला शंकरभगवान् हिमालये वसति।
दुग्धसमुद्रे विष्णुः कारणमत्राऽस्ति मत्कुणातङ्कः।।४९१४।।

संघ एव संयाति हि विपुलायां वा गणनिकायाम्।
एकस्यैव तदित्थं संख्या सघो परःशतैवाऽभूत्।।४९१५।।

नाना नव नव सरसामृतसम-भोजन-विनिर्मितं रक्तम्।
सद्यो दन्तनिवेशेनास्वादयते सुनिमृतोऽयम्।।४९१६।।

नैव कोऽपि मनुजः स्यान्मन्येऽस्मिन् भूविभागे वा।
मत्कुण-कृपा-तरङ्गैरास्वादितरक्ततो रिक्तः।।४९१७।।

मत्कुण-चरण-निवेशैरसमा सदृशी प्रवृत्तिरियम्।
मानवेषु संक्रान्तास्ते निपुणा मत्कुणाचरणे।।४९१८।।

मत्कुणदर्शनमथवा तदिदं किञ्चित प्रकाशमातनुते।
निभृतं स्थित्वाऽवसरे लाभे लोभं प्रकाशयति।।४९१९।।

इत्थं मत्कुणवादाऽभ्यासैरेभिः सुपुष्टाङ्गाः।
प्रजातन्त्रदेशेऽस्मिन् शीर्षस्थाने विराजन्ते।।४९२०।।

१५९.उपदेशाः

उपदेशा अथ ते तै समवाप्ताश्च प्रदत्ताश्च।
संस्थापयन्ति नित्यमात्मनं प्रोच्चभागेषु।।४९२१।।

यत्रोपदेशदानावसरः कश्चित्समुपलब्धः।
'तत्राऽहमस्मि कश्चित् संसारे' सा मतिर्भवति।।४९२२।।

यत्रोपदेश-भाषां-श्रोतुं सम्प्राप्यतेऽवसरः।
'अहमप्यस्मि नु केवलमेको श्रोतृप्रवर्धकः कश्चित्''।।४९२३।।

'उप' इत्युपसर्गोऽयं सामीप्यं बोधयन्नास्ते।
देशनमिति कथनं यत् समवाये सोऽयमुपदेशः।।४९२४।।

सामीप्ये यत् कथनमुपदेशोऽयं समाम्नातः।
वक्ता यद् यद् कथयति तत् केवलमेव मत्कृते मन्ये।।४९२५।।

इदमेवाति विचित्रं सामीप्याऽख्यं विभूषितं रूपम्।
यत्रोपदेशका अपि समीप्यं लब्धुमायान्ति।।४९२६।।

ते सामीप्यं दातुं सामीप्यं चाथ सम्प्राप्तुम्।
कथनानां माध्यमतामादायैवाग्रिमा भान्ति।।४९२७।।

कथनं कथानकं वा कथा विनैकाग्रपृष्ठमयी।
रूचि-वैचित्र्य-समीक्षादक्षा सिद्धत्वमायाति।।४९२८।।

यद् यत् श्रुतमस्माभिर्ज्ञानोपार्जनमथापि यद् विहितम्।
तन्मनुष्यताप्राप्तेः फलमेवाऽत्रोपलब्धं स्यात्।।४९२९।।

वयं मनुष्या इति या साधारणधारणा जाता।
तत्र वयं जानीमः कथयामोपीत्थमेव परितृप्तिः।।४९३०।।

केवलमाकारस्याऽवाप्तिमितं नो मनुष्यत्वम्।
यद्यपि तस्यैवादौ परिगणना जायते नाम।।४९३१।।

आकारस्य विचारे विकासवादस्य सिद्धान्ताः।
नानाविध-चित्राणां प्रस्तोतारो भवन्ति संसारे।।४९३२।।

अद्य योऽयमाकारोऽस्माभिर्नित्यं स्वभावतां नीतः।
यत्संवेदन-शून्या क्षणमपि नो चेतना-सरणिः।।४९३३।।

स्वीयायां सम्बुद्धौ नेत्राग्रे न प्रपश्यामः।
पूर्णरूपमाकारं किन्तु सदा धारयामस्तम्।।४९३४।।

काल्पनिकं तु विचित्रं चित्रं स्वीयं नु पश्यामः।
धन्यत्वं धिक्कारं पर्यायेषु प्रयच्छामः।।४९३५।।

आत्माऽकारे केवलमे काबुद्धिर्न सर्वदा जाता।
क्षणे क्षणे परिवर्तन मेषा बुद्धिः समाकुरुते।।४९३६।।

उपदेशास्तु तदात्वे बुद्धौ चाञ्चल्यनिस्तारे।
विस्तारयन्ति निजतां स्थैर्यं संस्थापयन्त्येते।।४९३७।।

१६०.प्रश्नाः

प्रश्ना ये सिद्धान्त-श्रवणानन्तरसमुद्भूताः।
सिद्धान्तानां सम्यग् ज्ञाने संसाधनीभूताः।।४९३८।।

स्थूणानिखनन-विधया प्रश्नानामुत्थितिः सर्वा।
सम्यक् काम्या जाताऽभ्यासे याता समुत्तीर्णा।।४९३९।।

प्रश्ना एते केवलमुत्तेजकतां यदाऽग्रेऽग्रे।
कुर्वन्तो दृश्यन्ते न तदा तेषामभावः स्यात्।।४९४०।।

कुत्र कुतः किंवैतत्कथमथ के नाम ते सर्वे।
ननु नच शब्दैः सततं प्रश्नास्ते समवतार्यन्ते।।४९४१।।

जिज्ञासा विचिकित्साऽऽकांक्षासन्देहशंकाद्याः।
शब्दाः प्रश्नसपक्षाः ग्रन्थेष्वथ संप्रयुज्यन्ते।।४९४२।।

मनोग्रन्थिशैथिल्याऽविष्कारे प्रश्नतत्त्वमिदम्।
सर्वादिम-विज्ञाने सन्दृश्यं पूर्णतः स्पष्टम्।।४९४३।।

वेदे निगूढतत्त्वाऽलोके प्रश्नावलिः सेयम्।
'कोऽस्याध्यक्षे' त्यादि प्रवचन-रूपा विभासिता जाता।।४९४४।।

अद्य तु संसत्काले कश्चिदयं प्रश्नकालोऽपि।
निर्धारितः पुरस्तादालोच्यो वा विभाव्यते सर्वैः।।४९४५।।

वैचारिक-संसारे प्रश्नाः समुपस्थितास्ते ते।
लोक-व्यवहारेष्वपि प्रश्नास्ते सर्वथा युक्ता।।४९४६।।

विश्वासात्पूर्वं ते प्रश्नाः सर्वे विजायन्ते।
विश्वासादूर्ध्वं नो जायन्ते ते पुनः प्रश्नाः।।४९४७।।

प्रश्नानां द्वैविध्यं व्याख्यातं तद्विशेषेण।
स्वतः संभवाः प्रश्नाश्चोत्थापितरूपिता प्रश्नाः।।४९४८।।

बुद्धौ जागरणानां प्रमाणतां यान्ति ते प्रश्नाः।
मलिनायां बुद्धावथ प्रश्नप्रश्नो न समुदेति।।४९४९।।

स्वतः संभवाः प्रश्ना बाल्ये कालेऽपि जायन्ते।
उत्थापितास्तु प्रश्ना ज्ञानाह्वानेषु जायन्ते।।४९५०।।

ये केवलं प्रकृत्या प्रश्नाह्वानेषु सन्दीप्ताः।
तेषामथ विजयोऽयं येषां प्रश्नास्तु नोत्तरिताः।।४९५१।।

सिद्धान्तानां सम्यक् बुद्धौ संस्थापनाद्यर्थम्।
वादे वादे तत्त्वं विशदीभूतं समायाति।।४९५२।।

वादशब्द-सम्बोधित-भावेष्वायान्ति ते प्रश्नाः।
येऽनुकूलतां दध्युः सिद्धान्तानां समीकरणे।।४९५३।।

अद्यत्वे संगोष्ठ्यश्चर्चासत्राणि जायन्ते।
शोधलेखवाचनमथ विद्वद्भिः साध्यते सततम्।।४९५४।।

तत्र पुनः प्रश्नानामवकाशो दीयते पूर्णः।
प्रश्नेषु तेषु मुद्रा रहस्यपूर्णाः समायान्ति।।४९५५।।

शास्त्रार्थेष्वपि तावत्पूर्वाः पक्षाः समुल्लसिताः।
ते तु प्रश्नोत्थाने शोभनतायां प्रतिष्ठिता जाताः।।४९५६।।

पुरातन-ग्रन्थेष्वपि ननु नच विधया विनिर्दिष्टाः।
पूर्वपक्षविन्यासाः मतानि बुद्धौ निवेशयन्त्येव।।४९५७।।

१६१.बटुकनाथाः

वाराणस्यां गङ्गा-विश्वेशश्चान्नपूर्णा च।
ध्येया तथैव नम्या गुरवोऽस्माकं बटुकनाथाः।।४९५८।।

वाक्पीयूषैर्नित्यं शिष्याणां वर्धिताह्लादाः।
रससंसारविहारे संसिद्धा श्रीबटुकनाथाः।।४९५९।।

नानाविषयाऽध्यापनकौशलसिद्धा प्रभाविता वाणी।
श्रीगुरुवर्य-मुखाब्जाद्विनिर्गता सर्वमीहितं देयात्।।४९६०।।

'कल्लोलिनी' यदीयाऽमन्दा सत्काव्यनवधारा।
काव्याकाशविहारे सहृदयहृदयान्समाह्वयते।।४९६१।।

जगदम्बिकापदाब्जं नित्यं संसेवमानानाम्।
खिस्ते महोदयानामसमेयं छन्दसां सरणिः।।४९६२।।

यस्य प्रकर्षवर्णनकर्मणि निरता इमे कवयः।
चकिताश्चकिताः सन्तो गुणलवमात्रं विविच्य मोदन्ते।।४९६३।।

अन्वेषणशीलानां परिपक्वं ज्ञानमीहितं दातुम्।
यः सततं सन्नद्धस्तं गुरुवर्यं नमामि मुदितोऽहम्।।४९६४।।

यद्रसमवयवाग्धारा पुरातनस्पर्धिनी धन्या।
नव्यतरं परिवेशं विस्तारयति प्रकामरमणीयम्।।४९६५।।

परमहंसवर्यश्रीभास्करराय प्रणीतानाम् ।
ग्रन्थानां सरलतया विवरणमेभिः कृतं वन्द्यम्।।४९६६।।

सहस्रशः सच्छात्रा नानाविद्याप्रपूरितस्वान्ताः।
देशे तथा विदेशे यं नित्यं वन्दयन्तितराम्।।४९६७।।

देशस्य राष्ट्रपतिना यद्वैदुष्यं समाश्रित्य।
संमानना सुविहिता तं गुरुवर्यं नमामि नित्यमहम्।।४९६८।।

विद्वद्भूयिष्ठायां श्रीविश्वेश्वरनगर्यां यः।
नित्यं प्रणाममालाविभूषितो भाति नाथोऽयम्।।४९६९।।

नित्यं पूजानिरतो गुरुवर्यो भाति दैवतं कोऽपि।
यस्मै पूजा-दानायोद्यतविभवा भवन्ति ते ते ते।।४९७०।।

अद्य प्रतीकरूपः काश्यां प्राचीनविद्यानाम्।
स्फूर्जत्पाण्डित्यस्य प्रकामनिष्णातरम्यस्य।।४९७१।।

नित्याभिनन्दनानां समवाये श्रीगुरौ बटुकनाथे।
यातु मदीयाऽपीयं लघीयसी वा प्रणामसुममाला।।४९७२।।

१६२.बाधा

बाधा विड़म्बना वा वैषम्यं वाऽन्तरायो वा।
प्रतिबन्धकता वा व्यतिकरशब्दैरेकोऽर्थ उन्नेयः।।४९७३।।

सा यद्यपि नो काम्या कस्याप्यत्रास्ति विश्वस्मिन्।
किन्तु तयैव तु जीवनमग्रेऽग्रे धावमानमिदम्।।४९७४।।

सूक्ष्माऽध्ययने यद्वा निरीक्षणे साधु संजाते।
बाधास्तावत्साध्याः जीवनसंस्थां समुन्नतां नेतुम्।।४९७५।।

यशःशरीरे न स्याद्वार्धक्यं वाऽथ मृत्युर्वा।
बाधानां सद्भावैर्यशसां राशिः समुन्नीतः।।४९७६।।

विश्वामित्रमहर्षिर्यज्ञे कर्मणि समालग्नः।
राक्षस-बाधाऽऽक्रान्तो रामं नेतुं समायातः।।४९७७।।

युवकोऽयं श्रीरामः सलक्ष्मणो ऋषिवरेण्यं तम्।
बाधादूरीकरणाऽयासे निश्चिन्ततां नयति।।४९७८।।

सुप्रसन्नसद्भावे विश्वामित्रः स्वशस्त्रास्त्रम्।
श्रीरामाय रहस्यं समार्पिपद् मन्त्रधारायाम्।।४९७९।।

श्रीरामस्य चरित्रं चादिकविः ख्याययामास।
क्रौञ्चीबाधां दृष्ट्वा प्रथमं छन्दःसमुन्मिषितम्।।४९८०।।

येषां जीवन-काले बाधानां यावती धारा।
तावदेव ते निखिलाः स्वीयाऽमरतां प्रसाधयामासुः।।४९८१।।

प्रतिबन्धकस्य विरहःकारणसमवायगणनीयः।
प्रतिबन्धक-सद्भावे कार्यं नो सिद्धतां यायात्।।४९८२।।

बाधानां परिगणनां को निखिलां कर्तुमीशीत।
क्षणे क्षणे तासामथ रूपाण्यालोक्य चित्राणि।।४९८३।।

१६३.अवज्ञा

बाधाधारितजीवनसरणिं नित्यं विशोधयितुम्।
संरक्षां संप्राप्तुं सेयमवज्ञा विधारणीयास्ते।।४९८४।।

प्रभुसम्मित-स्वरूपे दृष्टं यन्मित्ररूपेषु।
कान्तासम्मितशब्दैर्विलसितमाभासते शास्त्रम्।।५००४।।

दिव्यतमाऽऽचरणानां वैभवमाभाणकैः प्रचुरैः।
नवरसरुचिरकथाभिर्नित्यं संवेदयति शास्त्रम्।।५००५।।

मनु-याज्ञवल्क्य-नारद-पराशरैर्यत्समादिष्टम् ।
गौतम-कपिल-कणादैर्विमलतमं बोधितं शास्त्रम्।।५००६।।

पाणिनि-वररुचि-दिष्टं दिव्यपतञ्जलिपरामृष्टम्।
वाङ्मल-दूरीकरणे गङ्गाजल-निर्मलं शास्त्रम्।।५००७।।

कोटिकोटिमित-वाक्यैः सुपूजितं चर्चितं दिव्यम्।
सहस्रशः सन्मतिभिः सततं नीराजितं शास्त्रम्।।५००८।।

नानाविषय-विशेषाऽधारैरास्वादितं सम्यक्।
नानाधिकारिभिन्नां सर्वेषां लोचनं शास्त्रम्।।५००९।।

यद्यपि सुप्राचीनं प्रवर्तितं चादिमात्कालात्।
नित्यनवीनविधाभिः संशोभितवैभवं शास्त्रम्।।५०१०।।

न केवलं भूभागे भारतवर्षे प्रकाशमायातम्।
यत्र तु जीवनसरणिस्तत्रैवालम्बितं शास्त्रम्।।५०११।।

नानाविधैः सुनामभि रूपैर्नाना विधानपरिपुष्टैः।
नाना नव शेवधिभिर्नित्यमथाऽप्रेडितं शास्त्रम्।।५०१२।।

चतुर्दशसु विद्यास्वथा परिगणितं सुकरपरिगणने।
किं चानन्तविधास्वथ परिणमतेऽद्यापि तच्छास्त्रम्।।५०१३।।

१६५.प्रतीकाः

प्रतीतयो या चैताः प्रतिभासन्ते प्रतिक्षणं परितः।
पुरतः प्रतीकरूपेणैताः कालेषु नीयन्ते।।५०१४।।

योऽसावीशो देहे गेहे गेहे नियन्त्रणं कुरुते।
मति-विशेषतोन्मेषैः पूजनमस्याऽत्र संरचितम्।।५०१५।।

मानवजीवनमेतत्प्रतीकपरिचालितं चलितम्।
किन्तु कियानथ कालःकलयति कामं प्रतीकनिर्माणे।।५०१६।।

कापि चमत्कृतिरेषा धन्यत्वं या प्रसादयति।
सा सम्प्रतीतिरूपा प्रति प्रतीकं पुरस्कुरुते।।५०१७।।

समधिकचित्त-समर्पित-विविधायामप्रकामभूयिष्ठाः।
जनताश्रद्धाकेन्द्रास्ते ते निखिलाः प्रतीकाः स्युः।।५०१८।।

सांघातिकीप्रतीतिर्मस्तकविवरेषु विचरन्ती।
सद्यो बहिरायाता प्रतीककायां परामृशति।।५०१९।।

मानुष-जीवन-चिन्हं यदि कुत्रापि प्रतीकितं न स्यात्।
सा व्यर्थता नितान्तं सुदुर्लभस्यास्य संजाता।।५०२०।।

कोऽप्यनुभवो मदीयः कोट्यर्बुदकलनया यातः।
एकत्वं नानात्वे प्रतीकविधया विनिर्मितं भाति।।५०२१।।

भोक्तव्यं तु मुखेनैवैषा नियतिः शरीरस्था।
देशकालसंभेदेभोज्यानां योजनावेशाः।।५०२२।।

शब्दा एते सर्वे प्रतीकतां यान्ति विज्ञाने।
बुद्धौ भावोत्पादः शाब्दे सम्यक् प्रतीकितो दृष्टः।।५०२३।।

शब्दब्रह्म-विचारे सर्वप्रथमा परा वाणी।
तस्या प्रतीकरूपा संजाता मध्यमा वाणी।।५०२४।।

स्वीयाऽभीष्ट-प्रतीके कामयमानास्तु सत्पुरुषाः।
सम्पूर्णता-प्रतीकं सम्पूजयितुं सदोद्युक्ताः।।५०२५।।

पूर्णः केवलमेको जगदीशः सर्वकारणं तावत्।
नास्त्यणुतमोऽपि कश्चिद् भेदस्तत्रास्ति संस्पृश्यः।।५०२६।।

वयमथ भेदविभेदैरनन्ततायां समाश्लिष्टाः।
तान्पूर्णताप्रतीकान्संपूजयितुं सयत्नाः स्मः।।५०२७।।

संपूर्णे संसारे मानवरूपाण्यनन्तानि।
तेषां प्रतीक-पूजा-रूपाण्येतान्यनन्तानि।।५०२८।।

सामूहिकी प्रतिष्ठा याऽत्रैवास्ते प्रतीकानाम्।
सा ग्रन्थे व्यवहारे दैनन्दिनतां समायाति।।५०२९।।

ये ये प्रतीकभावा आन्तरिका नो विमर्शार्हाः।
श्रद्धाऽधारित-वैभव-भूषितकाया विभासन्ते।।५०३०।।

सूक्ष्म-शरीरेण विना यद्वन्नो स्थूलतासिद्धिः।
तद्वत्प्रतीकरूपैर्विना जगन्नास्ति नैवाऽस्ति।।५०३१।।

शब्दा वा भिद्यन्तां रूपाण्यथवाऽपि भिद्यन्ताम्।
प्रतीकतायां सर्वे भेदा एते समाविष्टाः।।५०३२।।

परम्परायां प्राप्ता नवतायां जागृता नित्यम्।
सैषा प्रतीकधारा बुद्धौ हृदये परिस्फुरति।।५०३३।।

शतसहस्रवर्षेभ्यो नाना भूभागभिन्नाभा।
निखिल-संचरण-शीला प्रतीक-दृश्यावलिः सततम्।।५०३४।।

मूर्तौ मूर्तौ चित्रे चित्रे संस्पन्दसन्दोहे।
प्रतीककालावधिता-ऽवधारणे वयमिहाऽश्वस्ताः।।५०३५।।

प्रत्यग्रनिर्मितीनामुद्योगोद्यान-परिपाटी ।
नित्यं समेधमाना काम्यतरा काऽपि संतृप्तिः।।५०३६।।

गगनचुम्बिबसन्मन्दिर-निर्माणेषु प्रकाशिता जाता।
गृह-निर्माणायोगेऽपि न्यस्ता पूर्णतां याति।।५०३७।।

प्रतीक-विद्या सेयं कालाऽवधिमपि न जानाति।
नो वा गणयति देशे दूरत्वं वा समीपतामथवा।।५०३८।।

आदर्शानामुच्चैर्धारणतायाः समाश्वासे।
सत्यं प्रतीकपुरुषाः सततं तिष्ठन्ति संसारे।।५०३९।।

यानालोक्य नितान्तं मानुषनियमावली चलति।
नो चेऽज्जाङ्गलिकत्वं जने जने सम्प्रदृश्येत।।५०४०।।

१६६.जयपुरम्

रम्ये जयपुरनगरे निवासयोग्यत्वमाप्तवताम्।
पुरुषाणां रमणीनां बालानां स्वर्गतुल्यत्वम्।।५०४१।।

जयपुरनगरीरम्या पेरिसनगरीव शोभना कथिता।
पाटलनगरीत्यधुना ''गुलाबनगरी'' समाचारे।।५०४२।।

अत्रत्यं यत्किञ्चित् सर्वं तद्रामणीयरससारम्।
सागरमिव वा सदसद्वीथीवीथीसमाऽमिलितम्।।५०४३।।

जयपुरनगरी धन्या काचिदियं भाति सर्वथा सरसा।
कामानां या वर्षा हर्षाऽरम्भैः समातनुते।।५०४४।।

संस्कृतविज्ञसमाजस्याधारेयं परा नगरी।
काशीद्वितीयतायां परिगणनं कारयन्तीव।।५०४५।।

संस्कृतसच्छास्त्राणां प्रवीणतायां प्रखरतराः।
मधुसूदना बृहस्पतिसदृशा अत्र व्यराजन्त।।५०४६।।

दुर्गाप्रसादनाम्ना संसारेषु प्रसिद्धा ये।
तेषां गुरुत्वमद्याप्याकर्षति नूतनं चेतः।।५०४७।।

गुणगणलक्षाणां या लक्षेष्वपि लक्षलक्षरूपाणाम्।
नित्यं जन्मसवित्री सावित्रीव श्रियं लभते।।५०४८।।

अद्यत्वे पुनरेषा नगरी संस्कृतविलासमयकाले।
एकादेमी संस्थां सम्पूर्णां प्रस्तुतां कुरुते।।५०४९।।

अत्र कलानाथानं कलाविलासः स्वभावपरिपुष्टाः।
काले कलनां निखिलां कलयति काव्यप्रजागरे सुखदाम्।।५०५०।

पुर्य्यां प्रभाकराणां प्रभा विलासं प्रपश्यन्तो।
मोदामहे नितान्तं तद्धितहृदयारविन्दसन्दोहाः।।५०५१।।

नगरीसौभाग्यानां सा काचिद्वै पराकाष्ठा।
यत्र तु विद्वद्वर्गः ससुखं मार्गान्विचारयन्नाऽस्ते।।५०५२।।

भौतिकचित्रावलिशतसहस्रचित्राऽवृता सेयम्।
जयपुरनगरी सुखयति संसारे सर्वयात्रासु।।५०५३।।

राजस्थानप्रान्तस्याऽस्ते या राजधानी वा।
तत्र कियत् सौभाग्यं नागरिकं वा प्रकटनीयम्।।५०५४।।

जयनगरपञ्चरङ्गे काव्ये सेयं विराजिता नगरी।
स्वच्छसमाकर्षकतामुपागते चित्रफलके वा।।५०५५।।

लक्षलक्षनवयानैः शोभितकाया सदैव दीप्ताभा।
जयपुरनगरी सेयं रमणीव मनोहरा भाति।।५०५६।।

भव्यतमैः प्रासादैर्मन्दिरमन्दारमालाभिः।
सर्वसुपूजितकाया प्रारम्भादेव नगरीयम्।।५०५७।।

मैसूराख्यनगर्यां किञ्चित्साम्यं हि तावदत्रत्यम्।
ससुखविलोकनसौख्यं यच्छति सामान्यता सैषा।।५०५८।।

देहल्यां यद्रूपं यद्रूपं कालिकातायाम्।
बम्बय्यां वा यद्यत् जयपुरनगरे विलोक्यतां सर्वम्।।५०५९।।

चण्डीगढ़स्य सुषमा काचिद्वा सम्मिलत्यत्र।
किन्तु प्राचीनत्वं नो वा चण्डीगढ़े लभ्यम्।।५०६०।।

रामनिवासोद्याने संग्रह एवाऽस्ति विविधानाम्।
प्रकृतिरसिकरूपाणां सारसमाकर्षणं कुरुते।।५०६१।।

श्रीरामसिंहनामा नरपतिरत्रत्य एक आसीत् यः।
स्वीये शासनकाले जयपुरनगरीं समेधयामास।।५०६२।।

दूरस्था विद्वांसोऽनुनयेनात्रैव संस्थिता जाताः।
काशीनगरीतुल्या जयनगरीयं तदैव संजाता।।५०६३।।

नाना नवविद्यालयसंरचना तेन संरचिता।
विद्वांसो विविधाभा जयपुरनगरे व्यराजन्त।।५०६४।।

सैवाभाऽद्याप्यास्ते तेषामेवात्र सत्कृपामूला।
तेषां परम्परायां विलसन्त्यद्यात्र विद्वांसः।।५०६५।।

जयपुरनगरीयं सा विलसति कापि स्वमुग्धेव।
स्वीयं लीलालास्यं प्रतिक्षणं या विलासयति।।५०६६।।

दिव्यानां स्थानानां या शोभा लोभनीयाऽत्र।
नैवाऽन्यत्र प्राप्या सा शोभा विस्तृते विश्वे।।५०६७।।

राजानश्चात्रत्या विद्याप्रेमाभिवर्षन्तः।
निखिलकलाकलनायां कोषागाराणि ते जाताः।।५०६८।।

आसीत्स्वप्रारम्भे पण्डितराजो जगन्नाथः।
जयपुरनगरे स्वाश्रयसंग्रहणायोन्मुखः सिद्धः।।५०६९।।

तस्मिन्नेव नितान्तं कमनीयेऽलौकिके समये।
सर्वविश्वविख्यातो राजित आसीद् बिहारिकविः।।५०७०।।

यन्निर्मिता 'सतसई' श्रृंगारस्याथ वापिकाऽभिनवा।
ब्रजभाषायां गुम्फितवाग्धारा सर्वमान्याऽस्ते।।५०७१।।

'दोहा'च्छन्दसि लिखिता सेयं तस्यैव मुक्तसंरचना।
आचन्द्रतारकं तद्यशसां संचालने सिद्धा।।५०७२।।

जयपुर-वैभव-नामककाव्ये श्रीमञ्जुनाथेन।
जयपुरनगरस्यास्य तु शोभा रससारतां नीता।।५०७३।।

अत्रत्यस्थानानां संस्थानां चाऽथ विदुषां च।
संकेतेन सुगुम्फैः सुपरिचयो जायतेऽस्माकम्।।५०७४।।

चित्राणां विनिवेशो लोकोत्तरतामिवावहत्यत्र।
जयपुर-वैभवकाव्ये कमनीये शब्दसंसारे।।५०७५।।

आस्तिक्यं च स्वीयं संसारे घोषयन्तीव।
शत-सहस्र-मन्दिर-युत-वैभव-भरिता विभासते नगरी।।५०७६।

श्रीगोविन्दो यत्र च मध्ये स्थित्वा समस्ताभाम्।
जयपुरनगरीं क्षणशो विलोकयति सत्कृपापूरैः।।५०७७।।

विश्वेश्वरोऽयमारादमृतमयैः स्वैर्विनिष्यन्दैः।
यामद्यपि विलोक्योन्मिषितः स्थगयति गतिं क्वापि।।५०७८।।

देवी शिलामयीयं माता स्नेहाभिरामकमनीया।
पुत्रानिमान् समस्तान्विलोक्य तुष्टा च हृष्टा च।।५०७९।।

पश्चिमनिवेशमार्गे श्रीहनुमन्मन्दिरं जयति।
श्रीमानसिंहनरपतिसंस्थापितमेतदति दिव्यम्।।५०८०।।

श्रीरामकृष्णमन्दिरशतपूर्णेयं समृद्धिमती।
मथुरामथाऽप्ययोध्यां स्वीये क्रोडे निवेशयन्तीव।।५०८१।।

गणपतिमथ भगवन्तं शिलोच्चये दूरतो दृश्यम्।
प्रणतजनानामार्तिं हरन्तमन्तः स्थितं नमामोऽत्र।।५०८२।।

आमानवाश्रमाद्वा विद्यापीठात् शिलामयीं यावत्।
आगालवाश्रमाद्वा पश्चिमतो दूरपर्यन्तम्।।५०८३।।

संस्कृतसंस्कृतिसेवासद्वैभवभरितकोणमिदम् ।
नानानव्यविधानैः परिपुष्टं जयपुरं नगरम्।।५०८४।।

आयुर्वेदस्यास्ते वैशद्येन प्रकाशनं निखिलम्।
नव्यचिकित्सासौख्यैरापूर्णं जयपुरं नगरम्।।५०८५।।

हनुमन्मन्दिरगणपतिमन्दिरदर्शनसुखं निखिलम्।
सर्वैरपि वा देवैर्विराजितं जयपुरं नगरम्।।५०८६।।

अगणितवैभवसुषमासाम्राज्योन्मेषसौख्यसंपूर्णम्।
नवजीवनसंचारं रचयति तज्जयपुरं नगरम्।।५०८७।।

गोविन्ददर्शनानाममृतमयी तृप्तिरत्रत्या।
श्रीराधायाः करुणा पूर्णा निखिला विभासतेऽत्रैव।।५०८८।।

विश्वेश्वरः सदैवामृतधाराभिः समेधयते।
माता शिलामयीयं सुखयति सर्वान् प्रसन्नास्या।।५०८९।।

नगरस्य मध्यदेशे भव्यचतुष्पथसुषमया सैषा।
अमरावतीं नमयितुं सोत्कण्ठा दृश्यते नगरी।।५०९०।।

अनयैव भियाऽमरावत्यपि दासीभूतसर्वस्वा।
जयपुरनगरीं रम्यां सेवत एवाऽखिलैर्यत्नैः।।५०९१।।

नगरीणां सौभाग्यैर्विनिर्मितेयं समाभाति।
पुण्यप्रतापशालिभिरेभिर्नरपुङ्गवैः काचित्।।५०९२।।

नगरीणां यत्किञ्चित् प्रकल्पितं सुन्दरं रम्यम्।
दिव्यं भव्यं तदिदं सर्वं वै जयपुरे लभ्यम्।।५०९३।।

राजस्थानं तदिदं निखिलजगद्राजधानीव।
तस्यापि राजधानी जयपुरनगरी क तुल्या स्यात्।।५०९४।।

प्रारम्भादद्यावधि कविभिः सेयं समीडिता नगरी।
धन्याः शब्दा जाता धन्योऽयं लेखनीसार्थः।।५०९५।।

श्रीगालवाश्रमस्य च 'गलता' नाम्ना प्रसिद्धस्य।
शैलोच्चयस्य शिखरे सूर्यो भगवान् विराजते साक्षात्।।५०९६।।

नानाऽमरालिमन्दिरवैभवभरितेयमाभाति ।
नगरी जयपुरनाम्ना विख्याता भूविभागेऽस्मिन्।।५०९७।।

बिडलानाम्ना योऽयं विख्यातो वैश्यवर्योभूत्।
लक्ष्मीनारायण इति मन्दिरमेतद्विनिर्मितं तेन।।५०९८।।

आमेरे श्रीहर्षो नाथो भैरवविभूतिसर्वाङ्गः।
शान्तेः साम्राज्येषु प्रतिष्ठितः सेव्यतां याति।।५०९९।।

मोतीडूंगरिनाम्ना विश्वस्मिन्नपि सुविख्याते।
गणपतिमन्दिरसुषमा साम्राज्ये संनतिः सर्वा।।५१००।।

भैरवभगवन्मन्दिरमपि सर्वेषां मनःप्रीतिम्।
द्रढयति सर्वजनानां सन्तोषं सर्वदा गृह्णन्।।५१०१।।

रामनिवासोद्यानाद् बहिरेवाऽयं नमन्निलिम्पयुतः।
'कोडेश्वर' इति नाम्ना क्रोड़ीकुरुते जनान् सर्वान्।।५१०२।।

पुनरप्येकं नूत्नं कनकं वृन्दावनं नाम।
आमेरगमनमार्गे विनिर्मितिः काप्यनिन्द्यसौन्दर्या।।५१०३।।

यत्राऽमृतसन्दोहाः कथाप्रवाहा विलोक्यन्ते।
मन्दिरमन्दिरमध्ये श्रव्यामृत-सत्ययुगसाराः।।५१०४।।

यत्र च सौजन्यानां काचित् पीयूषधारेव।
प्रवहत्यद्यापि सतामावाहयते मनांसि मनाक्।।५१०५।।

नूत्ने जनतन्त्रेऽस्मिन् यदा तदा क्षुब्धता जाता।
नीतिरेव सा चैषा विक्षोभ्यं सर्वमेवास्याम्।।५१०६।।

यदि विक्षोभो न स्यान्नूनं जनतन्त्रता न स्यात्।
क्षोभो जनतन्त्रं वा तदिदं समशीर्षकं जातम्।।५१०७।।

देहल्याः सुसमीपस्थिताऽपि नो तामसोद्रिक्ता।
सत्त्वमयीयं सर्वा प्रजायते पुण्यमयनगरी।।५१०८।।

पुनरपि धन्या मान्या परमवदान्या च नगरीयम्।
सर्वविधं विक्षोभं निगिलति निजलीलयैव गरलाभम्।।५१०९।।

निखिलसुवैभवभरिता विनीतरूपा प्रकाशिता नित्यम्।
इतिहासानां पृष्ठेष्वासादितगौरवा नगरी।।५११०।।

परितः पर्वतमाला कामपि शोभां समर्पयति।
शिखरे शिखरे चैतिह्यानां विपुलाऽस्ति सामग्री।।५१११।।

अकुतोभयसंचारे निखिलजनानां वशीकारे।
वैदुष्यवाक्प्रसारे जयपुरनगरीयमनुपमैवाऽस्ते।।५११२।।

चातुर्मास्यनिवासे सर्वे ते ते तु शङ्कराचार्याः।
जैना मुनयस्ते ते जयपुरनगरे समायान्ति।।५११३।।

धार्मिक-जनताऽत्रत्या सर्वेषां स्वागतं कुरुते।
कथाप्रवाहः कश्चिन्नित्यनवीनः प्रवर्तते विपुलः।।५११४।।

पुरातनं वा नूतनमत्र तु सर्वं विशिष्टतां यातम्।
भूतपूर्व इति संज्ञा ह्यचिरनवीनाऽपि राजते सहजा।।५११५।।

आयत्या बीजानां प्रस्तुतिरप्यत्र सहजैव।
वैचारिक-प्रवाहो नित्यं जागर्ति भूमिभागेऽस्मिन्।।५११६।।

चरमोच्छृंखलतानां मर्यादावैभवानां वा।
सहजा मैत्री नगरे सुलभा काम्या वरेण्यानाम्।।५११७।।

प्रतिहट्टपथे सुदुर्लभवस्तूनां विक्रये क्रये लीनाः।
नागरिका व्यापारे कुशला नूनं विमोहयन्त्येव।।५११८।।

यत्र च पुरन्ध्रिवर्गः सौन्दर्यं वर्षयति नित्यम्।
काचित्परमा काष्ठा सौन्दर्याणां विभूषिता जयति।।५११९।।

रमणीनां काचिदियं शोभासाम्राज्यभूमिर्वा।
जयपुरनगरी नित्यं सुरम्यधन्या समाभाति।।५१२०।।

एकैकस्या गाथा कथिता येयं पुरा कविभिः।
कमनीयं संसार रचयति नवकेलिरससारम्।।५१२१।।

कोट्यर्बुदाधिपतयो धनिकाश्चाप्यत्र दृश्यन्ते।
रत्नानां विविधानां भाण्डागाराणि लोक्यन्ते।।५१२२।।

राज्ञामत्रत्यानां गुणाऽग्रहो विदित एवाऽस्ते।
यद्यपि तु भूतपूर्वास्ते किन्त्वद्यापि संस्मृतिस्तेषाम्।।५१२३।।

श्रीमानसिंह आसीन्नरपतिरत्रत्य एव विख्यातः।
यद्दर्शन-मस्मादृशवर्गेऽप्यासीत्कृतं सर्वैः।।५१२४।।

यद्वैभवं समासीत्तस्य श्रीमानसिंहस्य।
तत्तुलनायां नहि कोऽप्यद्यत्वे दृश्यते विश्वे।।५१२५।।

वैदेशिक-राजानस्तद्वैभवमादरात्प्रपश्यन्तः ।
स्वे स्वे देशे सर्वे स्नेहेनामन्त्रयाञ्चक्रुः।।५१२६।।

अश्वारूढ़ाक्रीडा 'पोलो' नाम्नी सुविख्याता।
श्रीमानसिंहतुल्यो नाऽभूत्कश्चिज्जगति तस्याम्।।५१२७।।

अस्मत् पितृवरेण्यैर्गिरिधरवर्यैश्चतुर्वेदैः।
जयपुरनगरी सैषा स्वप्राकट्येन धन्यतां नीता।।५१२८।।

यद्व्याख्यानैश्चकिता जनता तज्जन्मभूमिविषयेषु।
जिज्ञासां संतनुते तदिदं वै जयपुरं नगरम्।५१२९।।

जयपुरनगराऽकाशे जयजयशब्दः सुगुञ्जितो भवति।
जय एवाऽत्र जनानां वक्तव्यः परमपुरुषार्थः।।५१३०।।

वैदिकसिद्धान्तानां पुरातनानां सुविमलानाम्।
आदर्शानां नित्यं जय एवाऽत्राऽस्ति काम्यमानोऽयम्।।५१३१।।

तेनैवेदं जयपुरनगरं निखलेऽपि संसारे।
सर्वविधे वैशद्ये सर्वोत्कर्षं समश्नुते नित्यम्।।५१३२।।

राजस्थानप्रान्ते क्षत्रियवर्णः प्रकर्षमायातः।
युद्धे जयाभिलाषा स्वभावसिद्धैव तज्जातेः।।५१३३।।

जयशब्दादारम्भे जय एवाऽस्ते समस्तजनतायाः।
जीवनमेवाऽत्रत्यं जयरूपं सर्वभावेन।।५१३४।।

जयनगरशब्दगुम्फे यदा मतिर्जायते सुधियाम्।
तदा विपुलतावशतो मूकायन्तेऽथ सर्वेऽपि।।५१३५।।

ते ननु सिद्धाः केचित् कवयो यैर्वर्णितं तदिदम्।
जयपुरनगरं पूर्णे समाहिते सत्त्वसंचारे।।५१३६।।

शौर्यविलासतपस्याविद्वत्तावैभवस्थलीयं सा।
अल्पीयानपि वासो यस्यां पुण्येन लभ्यः स्यात्।।५१३७।।

येषामेषा पूर्णा विजायते भाग्यसम्पत्तिः।
ते चात्र जनिं लब्ध्वा सेवन्ते सर्व-पुरुषार्थान्।।५१३८।।

१६७.गुरुः

एषा काऽपि नवीना सुप्राचीना निरादिमा लहरी।
चैतन्योन्मेषानां जनयित्री जागरूकाऽस्ते।।५१३९।।

गुरुसंज्ञा सैवैषा ज्योतिः पुञ्जान्विलासयते।
नियतिकृतनियमरहितां शैलीमुल्लासयन्त्याऽस्ते।।५१४०।।

सर्वा शान्ता धारा प्रलयविलोमप्रतिष्ठिता जयति।
आकल्पान्तं यत्र प्राचीनं नूतनं जातम्।।५१४१।।

नव नव यामप्रसरे लहरीयं दिव्यरूपमयी।
गुरुसंज्ञामादायाऽपूर्वं सर्वं समातनुते।।५१४२।।

अभिनन्दकाननेऽस्मिन्साम्राज्यैरीडिताऽऽलोके ।
गुरुचर्चायां किञ्चिन्मानसमुल्लासमाधातुम्।।५१४३।।

आवाहनं मदीयं निभाल्य सन्तो नितान्तमेकान्ते।
विहरणशीला स्ते ते सद्गुरुसामीप्यमायान्तु।।५१४४।।

कैशोरे कैङ्कर्यं कर्तु काचित्कला कलापवती।
कामानां कलकौतुकमभितो भावेषु बध्नाति।।५१४५।।

वार्तामयीं प्रतिकृतिं सम्यग् विरचय्य चेतनापट्टे।
गुरुरयमाशारचनासंचारे सात्कृतिं तनुते।।५१४६।।

गुरुतत्त्वमेव निखिलं जीवनमास्वादयन्नाऽस्ते।
संसारेषु तदेतत् श्वासोल्लासान्समादिशति।।५१४७।।

प्रेमोत्तापोत्तपने मृत्युरपि स्वीयमुल्बणं रूपम्।
पारोक्ष्येण प्रकटनभाषामेवाऽनुगृण्हाति।।५१४८।।

गुरुपवनजागरुके संचारे सर्वभावानाम्।
संस्फूर्तै जातायां जीवनमायाति वा नित्यम्।।५१४९।।

यत्तद् रहस्यतत्त्वं तत्र समेषां मनो लग्नम्।
तद् गुरुरूपं नित्यं प्रकाशतां मानसे विमले।।५१५०।।

अत्र च परत्र तत्र प्रथितैवाऽस्ते गुरुत्वमयी।
शैली शीला शाला सत्तानन्दादिचेतना धारा।।५१५१।।

माधुर्यकिङ्कराणां कथासु वेपथुसमारम्भः।
प्राथमिकः किल सोऽयं पर्यन्तेऽर्पयति नैर्मल्यम्।।५१५२।।

केकाकलाश्रुतेयं काकलिगीता श्रुताऽमृताऽस्वादा।
वियति विलासं तनुते पक्षिस्वरसम्पदेषा वा।।५१५३।।

अस्यामेव विभूतौ रचनासंसारमादिशन्भव्यः।
श्रीमान्स कालिदासो विश्वेषां कविगुरुर्जातः।।५१५४।।

विक्रमविभाव-भाषाभरितस्वान्तो निरन्तरायोऽयम्।
कविकुलगुरुर्मनीषी गुरुतत्त्वं संविलासयाञ्चक्रे।।५१५५।।

भारतभाग्यविभूषाभूतं गुरुतत्त्वमुन्नीतम्।
जगद्गुरुत्वे परिणतमास्ते तस्मिन्नहोभावे।।५१५६।।

वाञ्छा सदा नवीना जीवनकाले विनिर्ध्याता।
सद्गुरुमन्वेष्टुं तं काले संप्रेरयन्तीव।।५१५७।।

सर्वोपमाननिचयो गुरुरूपे पूर्णतां यातः।
सौन्दर्योन्नायकतां कमनीयां कान्तिमासूते।।५१५८।।

पाषाणात्पीयूषं स्यन्दन्ती गुरुकृपारेखा।
निर्जरतां सन्दधती वितरति कारुण्यसञ्चारम्।।५१५९।।

ग्रामे ग्रामे नगरे नगरे सच्चिद्विलासान्या।
निर्जरतां सन्दधती कामपि सुषमां विलासयति।।५१६०।।

गुरुकृपाजलदानां पटलीयं नवनवां धाराम्।
वर्षन्ती चैतन्यान्सेयं सर्वान्विलासयति।।५१६१।।

ते तेऽपि सम्प्रदाया गुरुशीर्षा विद्यया दीप्ताः।
निखिलमिदं भूवलयं साध्ये सिद्धान्तमादिशन्त्येव।।५१६२।।

शिष्यमनोभूमीनां मार्दवकरणे पटीयांसः।
गुरुचरणकमलपांसुप्रकरास्ते ते जयन्तितमाम्।।५१६३।।

कालं विजेतुमेषा गुरुकृपा वर्धते सततम्।
सद्गुरुसत्कृपयाऽसौ कालः कलनां सुकोमलां कुरुते।।५१६४।।

शिष्यगतमन्तरायं पूर्णतया वा विलोपयितुम्।
गुरुरयमतुलां शक्तिं सञ्चितसारां विशेषयन्नाऽस्ते।।५१६५।।

छात्रमनोरूपान्तःकरणे नैजं समुज्वलं ज्योतिः।
विकिरति गुरुर्निकामं शिष्यमनोदक्षतां नेतुम्।।५१६६।।

अन्तःप्रवहितमन्त्राऽक्षरमाला ज्योतिरूपैव।
गुरुसन्दर्शनमात्रप्रतिबिम्बैरुन्मिषन्तीव ।।५१६७।।

संवेदनसंविद्यासंसाधनशोभितौदार्याः ।
गुरवः पूर्णनिकाये परिणतरूपाः प्रकाशन्ते।।५१६८।।

एषाऽनन्ता पृथिवी वियदप्येतन्नितान्तविस्तीर्णम्।
सर्वत्रैतद् गुरुवररूपे सान्तं सदा भाति।।५१६९।।

भाषा स्वीयैर्विभवैरलंकृतीनां मनोमयै रूपैः।
मन्त्रमयीं संसिद्धिं गुरुशब्देषु प्रकाशयति।।५१७०।।

इदमात्मशिक्षणं तत्तत्द्रूपे परिणतं दृष्टम्।
यद् गुरवः शिष्याणां मानसभूमौ निभालयामासुः।।५१७१।।

व्यष्टिसमष्टिविसंगतिलोपः सर्वत्रसंजातः।
व्यष्टौ समष्टिभाषा सद्गुरुकृपया समायाता।।५१७२।।

संस्कृतिसत्ता सर्वा गुरुरूपे सन्निधिं कुरुते।
साहित्यसुधा सर्वा स्वात्मनि मायां विमथ्नाति।।५१७३।।

विश्वेषां भावानामहमहमिकया समाहारः।
यत्र तत्र संजातस्तत्रेदं सद्गुरुत्वं नु।।५१७४।।

नो वा केवलमक्षरमालादानं गुरोः कर्म।
शुभ्राऽचरणमयी सा परम्परा तत्र सम्भूता।।५१७५।।

अक्षररहस्यमुद्रास्फोरणमपि यद् गुरोः कर्म।
शुभ्राऽचरणमयी सा परम्परा तत्र सम्भूता।।५१७६।।

शास्त्रं स्वपिति नितान्तं तत्रोल्लासाः सदुपदेशाः।
येषां स्वभावसंस्था प्रवहति गुरुरूपसंस्थाने।।५१७७।।

अस्तोभातुरमेदुररणरणकं संप्रयोजयन्तीयम्।
श्रीगुरुमुखसंशोभा हृद्देशं निर्मलं कुरुतात्।।५१७८।।

भाण्डागारादेव हि लेशाः सर्वे समायान्ति।
तस्यैव काऽपि संस्था गुरुस्वरूपे निविष्टाऽऽस्ते।।५१७९।।

कलितकलाकलितानां कोमलकोशेषु कीर्तितानां वा।
वन्दितविभावरेण्या धारा सेयं समुच्छलिता।।५१८०।।

वैचारिकप्रचारोन्मिषितैश्वर्याऽमृता लहरी।
जीवनमेतन्निखिलं सत्संस्कारैर्विशोधयति।।५१८१।।

दिव्यमहाकालेश्वरमन्दिरपरिसरविराजमानोऽयम् ।
साक्षाद् गुरुस्वरूपं प्रत्यक्षेण प्रगृण्हाति।।५१८२।।

चारित्र्यस्य वदान्या पद्धतिरसमा विभासिताऽस्ति यदा।
सा काचित्कमनीया कृपैव वन्द्याऽस्ति सर्वतोभावैः।।५१८३।।

एकैकाक्षररचना पर्वतसदृशी पुरा ह्यासीत्।
सेयं कृपैव काचिद्वर्णान्विन्यासयत्यद्य।।५१८४।।

युगे युगे संज्ञानां परिवर्तनमेदुरे रूपे।
सा सा रहस्यमुद्रा गूढं सर्वं समीकुरुते।।५१८५।।

कासाञ्चिदेव तासां विद्यानां शेमुषीप्रसरे।
भाष्याण्यारच्यन्ते, व्याख्यास्तास्ताः प्रकल्प्यन्ते।।५१८६।।

कुत्र कुत्र किं किं वा जपितं तप्तं तपो नित्यम्।
येन गुरुत्वं निखिलं समाहितं शेमुषी काये।।५१८७।।

कुत्र च किं किं दग्धं नूत्नं किं किं समारब्धम्।
शोधस्थविषयमाला सर्वा सेयं प्रजागर्ति।।५१८८।।

गुरुरित्येका घटना चैतन्यानां महाराज्ये।
घटते यदा तु दैवी भूरियमभ्युन्नता तदा भवति।।५१८९।।

गायत्रीमेवादौ कर्णे कथयन्नवं भव्यम्।
जीवनमात्मनि कुर्वन्गुरुरामत्मानं विकासयति।।५१९०।।

निखिलेऽपि जीवने सा गायत्री बुदिधदार्ढ्य-माधातुम्।
सततं कृताऽवधाना विश्वासानां परा सरणिः।।५१९१।।

पूजाविधयश्चैताःसमीक्षिताः कर्मकाण्डानाम्।
नैर्मल्यं निजदेहत्रितये नित्यं प्रयच्छन्ति।।५१९२।।

लोकानाराधयितुं विज्ञानञ्चात्मसात्कर्तुम्।
मन्त्रमयी सा सरणिः प्रकाममारधिता जयति।।५१९३।।

गुरुरेवाऽक्षरसागरदानेष्वभ्युन्नतो दृष्टः।
जीवनवरदानमिदं रूपं सर्वं परामृष्टम्।।५१९४।।

वेदा वेदाङ्गानि च निखिलागमसत्यसंसाराः।
यच्चरणामृतपानैरासाद्या लीलायैव निजगेहे।।५१९५।।

गुरुरूपे निजभिक्षां सञ्चारचितुं परैर्येत्नैः।
सर्वगुरुं प्रणमामो नित्यं नित्यं महाकालम्।।५१९६।।

अज्ञानध्वान्तानां पटली सर्वैव विद्यते बुद्धौ।
गुरुनवदयाप्रकाशैस्सद्यो दूरीकृता सर्वा।।५१९७।।

परमेश्वर एव गुरुश्चाऽद्यः पातञ्जले प्रोक्तः।
परम्परैषा तस्माद् विततता सैवेश्वरी लीला।।५१९८।।

दत्तात्रेयसुगुरवो व्याख्याता ये पुराणसंकाये।
तत्र तु गुरुरूपाणां नतमां कश्चन परिच्छेदः।।५१९९।।

सर्वचराचरकणकणधारायां शिक्षिका सरणिः।
संव्याप्ता दिव्याभा हृदये यद्यास्ति जिज्ञासा।।५२००।।

यद्यस्ति जीवनेऽस्मिन्सुशोभनत्वं विचारसंरम्भः।
तद् गुरुतत्त्वस्यैव स्फुरणं साम्ये विनिर्मले दृश्यम्।।५२०१।।

अस्मदीयगुरुवर्याः पितरः श्रीगिरिधराश्चतुर्वेदाः।
लोकेविख्यातास्ते वन्द्याः कालत्रयेऽपि संजाताः।।५२०२।।

निखिलं शास्त्राम्भोनिधिमिह चुलुकीकृत्य यैः सततम्।
मेघस्वनैर्नितान्तं वर्षणमिह विहितमाद्यन्तम्।।५२०३।।

क्षणमधुरिमसंचारे संभाषणमाधुरी स्नाताः।
सन्तः सदोज्जयिन्यां बच्चूलालाभिधं निषेवन्ते।।५२०४।।

सन्दीपन्यवतारा अद्यावधि वा विराजन्ते।
रूपे रूपे भिन्ना विज्ञानं रूपमास्थाय।।५२०५।।

विद्या दीपितकायाऽवास्थिन एते तु बच्चुलालाख्याः।
नखशिखपर्यन्तं वा गुरुरूपे संविभासन्ते।।५२०६।।

एतेषां ये शाब्दास्ते सर्वे सन्ति मन्त्रतां याताः।
इङ्गितचेष्टितमपि वा सर्वं गुरुरूपमेवाऽस्ते।।५२०७।।

नवतामयता सर्वा संजायेत प्रसन्नता सहजा।
माता सरस्वतीयं प्रसन्नतां तां परामृशति।।५२०८।।

निखिलाश्चर्याऽकाशे विचरणमेभिः कृतं नित्यम्।
का वा सा भाषाऽसीत्कुत्राऽसीत्प्रेरणाभूमिः।।५२०९।।

लक्षेषु मानवेषु त्वेकः कश्चन समीरयते।
विज्ञानं सम्प्राप्तुं सफलो वा स्यान्नवाऽसौ स्यात्।।५२१०।।

तेष्वपि सफलेष्वथवा कश्चन यतते सुसिद्धिलाभार्थम्।
सोऽयं वा गुरुशब्दस्तत्र तु चरितार्थतां याति।।५२११।।

श्रीमद्बच्चूलालाऽवस्थिसदृक्षास्तु विद्वांसः।
शाष्वतिके गुरुरूपे वन्द्यन्ते सर्वतोभावैः।।५२१२।।

व्याकरणे साहित्ये धर्मे शास्त्रेऽथ दर्शने निखिले।
निष्णातास्ते तावाद्विद्वन्मूर्धन्यतां याताः।।५२१३।।

नवविद्यासु नितान्तं प्रवीणतामागता एते।
वैदेशिकैरतितरां पूज्यन्ते च प्रणम्यन्ते।।५२१४।।

गोस्वामितुलसिदासं कोशे स्वीयेऽथ सम्पूज्य।
विद्वद्वन्दितचरणाः संजाताः पूर्णरूपेण।।५२१५।।

तेजोदीप्ता नितरां दर्शनमात्रेण तुष्ठिःदातारः।
स्वीयोपदेशवाक्यैर्मालिन्यं दूरयन्त्यद्य।।५२१६।।

समकालिकपरिवेशे नित्यमिमे वा जगद्वन्द्याः।
नाना विभावभाषासन्दीप्ताः सम्प्रकाशन्ते।।५२१७।।

का वा संस्था देशे तेषां मानेन पूजिता नाऽस्ते।
के वा ते विद्वांसो यैस्ते संपूजिता न स्युः।।५२१८।।

श्रीकालिदासंस्थाऽऽचार्यकुले देशिका एते।
विश्ववन्द्यसुषमानामेकस्थं दर्शनं ददति।।५२१९।।

श्रीमान् स रथमहोदय एभिर्वरदायिभिः पुण्यैः।
संपुष्टः सन्सततं संस्कृतसेवाप्रकर्षतां प्राप्तः।।५२२०।।

प्रतिदिनमसमं विद्यावितरणकार्यं वितन्वन्तः।
विदुषां वीक्षणदक्षा एते सर्वैः प्रणम्यतां याताः।।५२२१।।

नाना नवलेखानामाकलनं वा विरोधपरिहारः।
प्राचीनवाङ्मयानामेषा पूजा नितान्तरमणीया।।५२२२।।

वर्षणमथवाग्धाराऽकर्षणमानन्दविभवानाम् ।
दैनन्दिनमुद्दीपनमसमं विद्याऽवदानानाम्।।५२२३।।

संचालनं च देशे संस्कृतिसंस्कृतविलासानाम्।
तेषामेव सुसाध्यं विद्यत एवेक्षितं हृद्यम्।।५२२४।।

काव्यसुधासंभाषणसरणिः काचिद्विलक्षणैवैषाम्।
सहृदयहृदयमनोज्ञा छन्दोबद्धाऽस्ति परिपाटी।।५२२५।।

नाना भाषाऽभिज्ञाः नाना रससारनिर्मलस्वान्ताः।
बच्चूलालसुधीन्द्रा जयन्ति नितरां यशोनिकषे।।५२२६।।

छात्रवरेण्यास्तेषां कुलपतयोऽध्यक्षवर्याश्च।
स्वीयैर्यशोवितानैर्गुरुवर्यं वर्धयन्तितमान्।।५२२७।।

गुणगणगुरुगरिमाणं मनसा वाचाऽथ कायेन।
संधारयन्त एते बच्चूलालाः प्रणम्यन्ते।।५२२८।।

शिष्यैरथ प्रशिष्यैरभिनन्दनभूतिरेषा या।
संप्रथिताऽस्ति पुरस्तात्सा किञ्चित्तत्त्वमामृशति।।५२२९।।

पूर्णाकारविचारे गुणगरिमाणं प्रकटयन्ती।
या भाषाऽस्ति गुरूणां सा शिष्यस्वान्तवेद्यैव।।५२३०।।

विपुलैरपि वा तैस्तैः शब्दैः काव्यात्मकैर्वाऽपि।
सांकेतिकविधयैवाऽलोचनमिह कर्तुमपि शक्यम्।।५२३१।।

निखिलागमस्वतन्त्राः-सर्वैर्विद्यासमुद्योतैः ।
परिपूरिताऽनन्तरङ्गा-विजयन्ते बच्चुलालाऽख्याः।।५२३२।।

दर्शनमहामहोदधिमामथ्नन्तश्च तत्र शुभकोशम्।
निर्मितवन्तस्त इमे-विजयन्ते बच्चुलालाऽख्याः।।५२३३।।

श्रद्धापूरितकाया दूरीकृतसर्वविधमायाः।
वार्धक्येऽपि युवानो विजयन्ते बच्चुलालाऽख्याः।।५२३४।।

श्रीकालिदासवाणीवितानसेवासमुल्लासाः ।
अहर्निशं साहित्यं सेवन्ते बच्चुलालाऽख्याः।।५२३५।।

क्षिप्राम्नानसमासादितसौहित्याऽऽदृतप्रान्ताः ।
दिव्यमहाकालेश्वरसन्दर्शनसोत्सुका विदां वर्याः।।५२३६।।

निखिलप्रदेशभाषासाहित्ये मन्थनं कृत्वा।
संस्कृतसमाजरचनाप्रेष्ठाश्रेष्ठा विराजन्ते।।५२३७।।

पूर्णप्रभावसत्फलसम्प्राप्तानां समीहिताऽचरणे।
अस्मादृशामपि मुहुः संततामस्तु प्रणामपरिपाटी।।५२३८।।

१६८.ब्रह्मर्षिर्मालवीयः

ब्रह्मर्षिमालवीया दीप्तिः प्रीतिर्विधानानाम्।
कल्याणानामसमां शोभां तां तां समानयति।।५२३९।।

श्रीमालवीयकरुणा भारतवर्षस्य दारिद्र्ये।
सत्यं द्रुतिमापन्ना सर्वोच्चं कल्पनं चक्रे।।५२४०।।

ज्ञाने विज्ञाने वा दरिद्रताऽऽसीत्स्वदेशे या।
तां स्वायत्तां कर्तुं लन्दनमासीत्तु नन्दनं काम्यम्।।५२४१।।

वाराणस्यामस्यां तद्वैनन्दनमथाऽनीय।
प्रजापतिः संजातः श्रीमान् मदनमोहनो दिव्यः।।५२४२।।

शिक्षा याऽसीत्केवलमांग्लानां शासनोद्देश्यम्।
सम्पूरयितुं सर्वा साऽत्मोन्नत्यै समानीता।।५२४३।।

परतन्त्रतां समाप्तां कर्तुं कांग्रेससंस्थायाः।
संचालन-सत्कार्यं कृतं सदा मालवीयेन।।५२४४।।

लोकमान्यतिलकानां सन्निध्ये भारतं देशः।
जन्मसिद्धमधिकारं स्वतन्त्रतायाः सुघोषितवान्।।५२४५।।

तत्रैव मालवीयैः स्वीयं सर्वस्वमाहूय।
दिव्यमनोवाक्कायैरैकात्म्यं साधितं तूर्णम्।।५२४६।।

आग्लायां भाषायां भाषणमालासु दिव्यासु।
श्रीमालवीय-समतामांग्ला अपि नो विजानान्ति।।५२४७।।

हिन्दी-भाषोत्थाने सत्साहित्य-प्रवृद्धये नूनम्।
सा नागरी-प्रचारिणिसभैव काचित् समारब्धा।।५२४८।।

आसीत्सैषा संस्था हिन्दी-साहित्य-कल्प-वल्लीव।
श्रीमालवीय-संवर्धितकाया सेयं शिरोमणिप्राया।।५२४९।।

दिव्ये प्रयाग-नगरे हिन्दी-साहित्यसम्मिलनम्।
संस्थानं संस्थापितमद्यापितु तत् प्रजागर्ति।।५२५०।।

तस्मिन्काले निखिले भारतवर्षे च राजतन्त्रमेवाऽसीत्।
नैकशता राजानो निजनिजराज्येषु सर्वोच्चाः।।५२५१।।

राज्ञां सविधे गत्वा काश्यां सर्वोच्चशिक्षणे संस्थाम्।
शोभनरूपां धन्यां निर्मातुं याचनां कृतवान्।।५२५२।।

श्रीमालवीय-महिता या शैली याचनायां सा।
धन्यानां सौभाग्यैर्मण्डितविभवैव संजाता।।५२५३।।

गंगातटे विशालाभूमिर्विश्वं विभासायितुम्।
विद्योतितशालायै समर्पिता काशिराजेन।।५२५४।।

सर्वेऽप्यथ राजानो जानाना मालवीयं तम्।
धनवैपुल्यैर्भरितं कृतवन्तो धन्यतां याताः।।५२५५।।

आंग्ला ये देहल्यां सर्वोच्चाः शासका आसन्।
श्रीमालवीयनिकटे शिक्षा-मैत्रीमया जाताः।।५२५६।।

काश्यामसमं शिक्षणसंस्थानं वा समुद्घाट्य।
हार्डिञ्जोऽपि तु लार्डः स्वीयां तां धन्यतां लेभे।।५२५७।।

श्रीमालवीयवर्यप्रभाव आसीन्महत्त्वे यः।
तं श्रीमन्तं सदयं सहसा मूर्धन्यतां नयति।।५२५८।।

श्रीमालवीय-चरिताऽमृत-धारापायिनोऽथ वयम्।
तृषिता सदा स्थिताः स्मः समधिकभावेन संश्रोतुम्।।५२६०।।

गुण-गण-समुद्रमखिलं कीदृशमाभासितं भाति।
श्रीमालवीयगाथा विमला तत्रोत्तरं देयम्।।५२६१।।

सहस्रशः संगाथाः संगीता मालवीयानाम्।
तत्राऽस्तेऽनुभवोऽयं नतमामत्यल्पमपि कथितम्।।५२६२।।

देश-स्वतन्त्रतायै सत्याऽहिंसात्मिका सरणिः।
प्राक्तन-ऋषि-सन्दर्शित-मध्वानं दर्शयन्त्यासीत्।।५२६३।।

तिलक-गान्धि-नेतृणामग्रेगामित्वमास्थाय ।
कोटिमिताऽपि तु जनतेङ्गितेङ्गितेषूत्थिता जाता।।५२६४।।

लोकमान्य-तिलकं तं स्वीय-गुरुत्वेन मनुते स्म।
श्रीमोहनदासानामभिमतरूपेण ज्येष्ठ एवाऽसीत्।।५२६५।।

सर्वोच्चा या संसद् देहल्यां संगठितकाया।
तत्राऽपि मालवीयः सदस्यतायां मनोनीतः।।५२६६।।

भारतीय-जनतायाः पक्षं तत्राऽपि विस्तार्य।
स्वीया भाषण-सरणिः प्रसारिता मालवीयेन।।५२६७।।

श्रीकृष्णस्य भगवतश्चारित्रचर्चां सदा कृत्वा।
श्रीकृष्णस्य भगवतः स्वरूपमावेदयामास।।५२६८।।

निखिले देशे गत्वा ज्ञान-स्वातन्त्र्य-सद्वाणीम्।
विस्तारितमाधुर्यां जने जने संप्रवेशितवान्।।५२६९।।

विज्ञान-ज्ञानानां काशीं प्रभया पुनस्तन्वन्।
विस्मापयन्परिकरानसमां चक्रेऽथ लोकसंसेवाम्।।५२७०।।

काशी-हिन्दू-विश्वक-विद्यालय-दिव्य-संस्थाने।
सर्वस्मादपि देशाद् विज्ञा विद्वांस आहूताः।।५२७१।।

श्रीमालवीय-वचनाऽह्वानैस्तूर्णं सुदुर्लभास्ते ते।
विद्वांसः समवेतास्तांस्तान्विषयान्प्रशिक्षयितुम्।।५२७२।।

छात्राणामुत्साहोऽध्ययनार्थं यः प्रवृत्तोऽभूत।
अद्याऽप्यत्र स दृश्यो काले बहुशः प्रयातेऽपि।।५२७३।।

काश्यां सैषा काचित्तपोमयी भूमिरेवाऽस्ते।
प्रतिक्षणं यत्र पुनस्तपः सुतप्तं तु मालवीयेन।।५२७४।।

संसारे कस्तावद्देशः स्याद्यत्र विद्वांसः।
अस्माद् विद्यास्थानाद् विद्यावन्तो न संगता जाताः।।५२७५।।

श्रीमालवीय-विद्या-मन्दिर-वैभवमुपश्रुत्य ।
संसारे सर्वेषां मस्तकनम्रत्वामालोक्यम्।।५२७६।।

इयमेव कल्पनाऽसीत्काचित् श्रीमालवीयानाम्।
देशेऽस्मिन्नेवंविध नाना संस्थाः प्रवृत्ताः स्युः।।५२७७।।

श्रीमालवीय-जीवन-दर्शन-मासीत्सदोच्चतमम् ।
यद्विस्मरणैः सा वा दुर्घटना नो भवेन्नाम।।५२७८।।

अस्यां काशीहिन्दूसंसारोन्मेषिमालायाम्।
अद्यत्वे सा काचिच्चमत्कृतिर्नित्यमालोक्या।।५२७९।।

स्वातन्त्र्यात्प्रागासीत्संस्थेयं दिव्यताभरिता।
स्वातन्त्र्यानन्तरमथ केन्द्रक्रोडीकृता जाता।।५२८०।।

भारतराष्ट्रपतिर्यः सोऽत्राद्यत्वे प्रधानतां भजते।
शासनशुभसंचालनकार्ये साहाय्यमातनुते।।५२८१।।

श्रीमालवीय-पुण्य-स्मरण-सुतृप्ताः सदा सर्वे।
कालेष्वत्राऽऽयाताः स्वीयं धन्यत्वमातेनुः।।५२८२।।

भारत-राष्ट्रोत्थाने या सत्पुण्यार्जिता शैली।
शिक्षोत्थान-विशेषैरारचिता साऽत्र संग्राह्या।।५२८३।।

सदा च येयं निखिला प्रवाहरूपा पतति धारा।
तस्याः स्वयमारम्भः सत्कृतिपुञ्जैः समानीतः।।५२८४।।

विज्ञानामृतगङ्गा येयं सन्तोषसंभारम्।
संचारयति नितान्तं भगीरथस्तत्र मालवीयोऽयम्।।५२८५।।

भाषाणां काठिन्यं दूरयितुं मालवीयैः सा।
भारतीयभाषायां समुन्नतिः काऽपि सन्दिष्टा।।५२८६।।

आंग्लां भाषां तावद्विस्तारयितुं महान् यत्नः।
संसाधितः पुरस्तादासीदांग्लैस्तु विद्वद्भिः।।५२८७।।

मैकालेति तु नाम्ना समागतो यो धुरन्धरः कश्चित्।
तेनैवाङ्गलभाषानवशिक्षासन्नतिः सृष्टा।।५२८८।।

यन्त्रमयं यद्वैतद्विज्ञानं सर्वतो व्याप्तम्।
तेनाधारितकाया साऽङ्गलभाषा समायाता।।५२८९।।

भारतशिक्षावीरास्तस्यामप्यांग्लभाषायाम् ।
दर्शित-पूर्ण-परिश्रम-पराक्रमैश्चर्चिता जाताः।।५२९०।।

श्रीमालवीय-बुद्धौ सेयं भाषा सुसिद्धाऽसीत्।
आंगलशासक-धुर्यास्तत्राऽसन्साधु संन्तुष्टाः।।५२९१।।

किन्तु सदैवायं किल भारत-भाषासु निखिलासु।
संस्कृत - हिन्दी - प्रमुखास्वासीच्छिक्षाप्रवर्तनोद्युक्तः।।५२९२।।

स्वीया भाषा तावत्सरला सरसा च सम्पूर्णा।
तस्यां जातं ज्ञानं सुविस्तृतं पूर्णतां याति।।५२९३।।

श्रीमालवीय-रचना येयं शिक्षामयी भव्या।
अद्यापि सा स्वरूपं सत्यं नित्यं प्रकाशयन्त्यास्ते।।५२९४।।

शिक्षा-जगति मलिनताऽपि तु येयं संप्रविष्टाऽभूत्।
परतन्त्रता-विपरिणतिभूता स्वाभाविकी सैषा।।५२९५।।

श्रीमालवीय-चरित-स्मृति-संसारेषु विचरन्तः।
निर्मलतां स्वीकर्तुं मालिन्यं दूरयितुमलम्।।५२९६।।

अविभाजितेऽथ देशे सिन्धे पञ्चापसत्प्रान्ते।
भ्रामं भ्रामं निखिलं सन्देशं श्रावयामास।।५२९७।।

यावत्संस्मरणानां विपुला श्रीमालवीय-चरितानाम्।
संख्या वृद्धिं गच्छत्यधिकतरा सा पुनः समायाति।।५२९८।।

नासीत्तदा तु सर्वोच्चतमे भागे स्थितो नेता।
यो न मालवीयानां पादौ हस्तेन गृण्हीयात्।।५२९९।।

मोहनदासो गान्धी यो हि महात्मेति विश्वविख्यातः।
स्वीयं ज्येष्ठभ्रातरमेवाऽमनुते स्म मालवीयं तम्।।५३००।।

ते राजानः सर्वे देशे ये संप्रतिष्ठिता आसन्।
श्रीमालवीय-निकटे सर्वैर्दृष्टाः प्रणतभावे।।५३०१।।

येऽपि तु धर्माचार्यास्त्यागतपोमूर्तयश्चासन्।
ते मालवीय-निकटे स्वात्मानं मोदयामासुः।।५३०२।।

श्रीमालवीय-निकटे ये ये वा संस्थिता आसन्।
स्वातन्त्र्यानन्तरमथ जाता देशस्य कर्णधारास्ते।।५३०३।।

भारतीय-संस्कारैरोतप्रोतं च व्यक्तित्वम्।
बिभ्राणस्तु सदाऽसीन्मालव्यो मदनमोहनो दिव्यः।।५३०४।।

संसारे यात्रास्वथ दिव्यं गंगाजलं गृण्हन्।
तिलकाङ्कित-सद्भालः सर्वैर्देशैः प्रपूजितो दृष्टः।।५३०५।।

ईश्वर-विश्वासना-मसमां वृद्धिं समेधयन् सततम्।
सर्वत्रैवाऽस्तिकतां संचारितवान्स्वदिव्यसन्देशैः।।५३०६।।

एकादशीप्रवचनं भगवद्गीताप्रवचनं च।
विश्वविदितसंस्थायां स्वीयायां स स्वयं कृतवान्।।५३०७।।

लक्ष-कोटि-मित-छन्दोमालाभिर्वाऽपि सा गाथा।
नैवेदमित्थमतया वर्णयितुं शक्यतां यायात्।।५३०८।।

लालो बालो पालो गान्धी ये देशनेतारः।
सर्वेषां मान्या अपि विमता अपि यत्र तत्राऽसन्।।५३०९।।

किन्त्वेको ब्रह्मर्षिर्महामनो मालवीयोऽयम्।
निखिल-जनानां हृदये स्वीयं साम्राज्यमातेने।।५३१०।।

प्राचीनाक्षरमालापठनेष्वासक्तमानसानां वा।
नूतनभावाऽवलिमपि कालोल्लसितां समर्पितवान्।।५३११।।

अस्यां भारतभूमाववतारास्ते परस्य पूर्णस्य।
काले जातास्तावत्संजायन्ते च सर्वकालेषु।।५३१२।।

निखिलशक्तिसम्पन्नः-सर्वनियन्ता सदाशिवो भगवान्।
नाना विभूति रूपेष्वाविर्भावं प्रसादयति।।५३१३।।

श्रीविश्वनाथ एवाऽत्राध्यात्मे दिव्यतमरूपे।
श्रीमालवीयकाये प्रकटित आसीन्महादेवः।।५३१४।।

सर्वासां विद्यानां प्रवर्तिता राजधानीयम्।
काश्यामेव स्वीये निकटे स्थाने समानीता।।५३१५।।

त्रयोदशद्वीपः

१६९.व्यसनम्

व्यसनं तद्वच्चित्रं जीवनमेतद् महाव्यसनम्।
पूर्वं यच्चाऽभ्यस्तं सहस्रशस्तत्करणमेव तु व्यसनम्।।५३१६।।

व्यसनरूपतां यातः परिभाषाभूषितस्तावत्।
यत्र तु पौनः पुन्यं व्यसनं तत्रैव कथनीयम्।।५३१७।।

व्यसनं विद्यायामथ धर्मे नित्यं सदाचरणे।
धर्मक्रियाकलापे कर्तव्येष्वस्ति शोभनं व्यसनम्।।५३१८।।

व्यसने विकृतं रूपं यद्वा संजायते निभृतम्।
तन्निन्द्यतमे रूपे प्रकाशितं वा जुगुप्सितं चैतत्।।५३१९।।

तेष्वथ संचारेषु व्यवहार्यः प्रायशो व्यसनशब्दः।
कदर्थनां वा काञ्चिन्निजस्वरूपे प्रवेशितवान्।।५३२०।।

दिव्ये रूपे यदिदं व्यसनं व्यवहारसंसारे।
संजायते नहि पुनर्व्यसनं तत्कथ्यते लोके।।५३२१।।

व्यसनाख्येऽस्मिन् शब्दे यदिदं दौर्गन्ध्यमुपयातम्।
तद् कर्मणां विशुद्धं दीप्तं रूपं तिरस्कुरुते।।५३२२।।

अतएव तत्र तत्राऽभ्यासमतीनां तु शब्दानाम्।
संप्रयोग आयातो व्यसने योगं निवारयति।।५३२३।।

यदिदं दुःखप्रदतापरिपूर्णेष्वथ धर्मकार्येषु।
अभ्यासानां वृत्तिः सा व्यसनत्वेन कथनीया।।५३२४।।

एतादृशदुर्व्यसनाऽऽक्रान्ता ये सन्ति निन्द्यतायुक्ताः।
निजगेहं परिवारं समाजमात्रं प्रदूषयन्तः स्युः।।५३२५।।

व्यसनसहस्राक्रान्ता जनता सर्वाऽपि संजाता।
यद्यप्यल्पीस्यां संख्यायां ते व्यसनलिप्ताः।।५३२६।।

कर्तव्योद्बोधानां सरसा गङ्गा विनिर्मला पुरतः।
या वा प्रवहति नित्यं तस्यां स्यात् स्नानमयव्यसनम्।।५३२७।।

१७०.कान्तासम्मिता

वृद्धा क्रुद्धा सततं निध्यायन्ती बहूनर्थान्।
कुत्सिततरवाचामथ आचामयते नवनवां धाराम्।।५३२८।।

न किमप्युच्चावचमथ संद्रष्टुं सा समीहते किञ्चित्।
पूर्वतरा पुरुषाननि विश्वस्मिन्स समानयति।।५३२९।।

क्रोधोन्मादोन्मत्ते चित्ते सदैव युवतितमा।
वार्धक्यं कञ्चुकमिव तूर्णं विक्षेपयन्त्यास्ते।।५३३०।।

मूषकमपि दूरयितुं प्रोच्चैर्वादं विधत्ते सा।
सर्वं संस्कुर्वाणा संजाता सा सहस्रमुखी।।५३३१।।

नैक श्रोतृसमक्षं कार्ये गणनां स्वयं कथयति।
नो वा दोषं कञ्चित्तस्या वक्तुं समीहते कश्चित्।।५३३२।।

आतङ्कतापदष्टं सर्वं घोरं समाभाति।
पुनरप्याशङ्कायां सन्तिष्ठत्येव सुस्नाता।।५३३३।।

एकाकिनी तथेयं लघुकाले सर्वकर्ममयी।
शतसहस्रसंयोजनकार्ये व्याकुलतरा नित्यम्।।५३३४।।

सर्वतिरस्कृतिपूर्णे व्यवहारे साधु संतुष्टा।
आत्मकृते तु नितान्तं नो व्याहारं विषहतेऽन्यम्।।५३३५।।

मान्यं कमपि कदाचिन्नो सत्कुरुते स्वयं शब्दैः।
सर्वानाशीर्वादं दातुं नित्यं समीहते सेयम्।।५३३६।।

सप्तत्युत्तरवर्षात्मकसंभूभौ स्थितापीयम्।
कटुकटुतरकटुतमतायुक्ता संवित्समाभाति।।५३३७।।

देवीनामथतदिदं किञ्चिद् रूपं सदा पश्यन्।
विश्वेश्वरोऽपि किञ्चित् कुरुते रोमाञ्चसञ्चारम्।।५३३८।।

या तु महागौरी सा हिमालये शुभ्रसामाज्ये।
गौरं वर्णं विश्वे सञ्चारयितुं समवतीर्णा।।५३३९।।

या तु महाकालीयं जगतां संपालन कुरुते।
या च महालक्ष्मीयं परिणतसंसारसंभारा।।५३४०।।

एतेषां रूपाणां रूपणकार्ये प्रवीणास्ते।
कवयो रसस्वरूपं साक्षादवतारयामसुः।।५३४१।।

का वा तेषां कविवर्याणामनिर्वाच्या।
प्राणप्रियैव शैली कथनानां वर्णविन्यासैः।।५३४२।।

वयमत्र तत्र यान्तो नैव श्रान्ताश्च चकिताश्च।
किन्तु गृहिणी सैषा सहते सर्वं विकारमयम्।।५३४३।।

यत्र मिलति वा कश्चिन्मार्गस्तत्रैव धावमानेयम्।
नो जानाति नितान्तं गुप्तं जीवनरहस्यं तत्।।५३४४।।

आस्तां नाम गभीरा काचिद्वार्ता समागच्छेत।
कवितास्माकं सैषा दूरी भूयात् न नो वाञ्छा।।५३४५।।

अस्मद् सविधे तिष्ठेत् सदा सुकवितेयमस्मदीयेयम्।
वयमत्र नो भवामः कथमपि विश्वे विना कविताम्।।५३४६।।

पुरातनानपराधान्संस्मृत्यास्या विरोधिता चर्चा।
दुःखाकरोति नित्यं ध्रुवं तु तां चैव मां चैव।।५३४७।।

सैषा कृपा कृतवती मदुपरि नित्यं न सन्देहः।
मोहैराविष्टोऽहं तदा पुनास्तत्र तत्र संभ्रान्तः।।५३४८।।

सैषा ममैव विकृता संजाता मानसी धारा।
विक्षोभयति समस्तं जीवनमात्रं पुनः पुनर्नित्यम्।।५३४९।।

यद्यत्समाचरितमथ मयका पूर्वं विनन्द्यतायुक्तम्।
तदहं केवलमेको जाने नान्योऽथवा कश्चित्।।५३५०।।

अयं भ्रमो वा कश्चित् संसारेषु प्रदीप्तेषु।
कथासु यच्चैकान्ते कृतमथ तं वा कथं नु जानीमः।।५३५१।।

कोऽपि विलोकयते वा तत्रापीत्थं समस्तरूपाणि।
यानि निभृततमरूपे संगोपितवैभवानि मन्यन्ते।।५३५२।।

यद्वा प्रयत्नशतशतसंगोपिततद्विषयजातम्।
ग्रन्थाक्षरेषु लभ्यं प्रमाणकोटौ समाविष्टम्।।५३५३।।

शास्त्राणि तत्र रूपं प्रकटितरुपेषु नीयमानानि।
सोत्फुल्लैरथ गल्लैरालापयितुं प्रगण्यन्ते।।५३५४।।

स्मृतिधारायामस्यां यदा वयं मज्जनं कुर्मः।
विलक्षणा स्मृतिधारा कथिता सा प्रत्यभिज्ञेति।।५३५५।।

अभिज्ञानशाकुन्तलमितिनाम्ना नाटकं रम्यम्।
तत्पदमादौ नाम्नोऽवयवत्वेनैव धारयति।।५३५६।।

काश्मीरशैवदर्शनतन्त्रे सा प्रत्यभिज्ञैव।
मूलं केवलमेका साध्या सर्वैः प्रयत्नैः स्वैः।।५३५७।।

सा सा सा सेति यदाऽद्वैतो वादः समायातः।
कत्यमित्थमियं कथयति विलोपयन्ती परं भावम्।।५३५८।।

प्रत्यक्षमत्र भवतीं दृष्ट्वा स्पृष्ट्वा समालिङ्ग्य।
आत्मानं ननु निखिलं सम्प्राप्तुं सा समीहा मे।।५३५९।।

स्वस्माद् दूरीकरणायासे सर्वामथापि निजशक्तिम्।
त्वं किं व्ययं प्रकुरुषे तत्तत्त्वं नो विजानामि।।५३६०।।

त्वं तत्रैवेङ्गितमथ कुरुषे तव चेदृशं रूपम्।
कान्तासम्मितरूपं कथयति सततं विनाऽऽयसं।।५३६१।।

इयमेव काम्यताऽसीदत्रैवास्तेऽखिला तुष्टिः।
वचसामगोचरेयमात्मानं तोषयन्तीव।।५३६२।।

नानाविधरसदृश्यावलिरित्थं या प्रजागर्ति।
सैव तु कविता धारामृतमात्रेणाप्लुतं कुरुते।।५३६३।।

१७१.द्विर्नाभिभाषते

रामो नाम निरन्तरस्थूलसूक्ष्मकारणशरीररूपेषु।
यो नियतं संस्पन्दनमारभतेऽयं सदा नम्यः।।५३६४।।

श्रीरामोऽयं निखिलगु ग्रामाणां वा सुविस्तीर्णः।
नैकब्रह्माण्डानां सुविस्तृता सा स्थितिर्यत्र।।५३६५।।

श्रीरामस्य प्रभावस्तथा समासादितो लोकैः।
धर्मविरोधविचारे रामो द्विर्नाभिभाषते नाम।।५३६६।।

यत्कथितं तल्लौहैर्धातुप्रवरैर्विनिर्गताः शब्दाः।
भाषाणामपि काले परिवर्तोः नैव शक्यः स्यात्।।५३६७।।

द्वितीयवारं कथनं वमनाख्यो दोष आयातः।
विनिर्मलं सम्बुद्धिं मालिन्येनान्वितां कुरुते।।५३६८।।

अत एव श्रीरामो कथमपि द्विर्नैव भाषते किञ्चित्।
सुविचार्यैव समुक्तं यत तत् नियतं सुसत्यमिदम्।।५३६९।।

सत्यं रामे रूपं सत्यं सद्रूपता तत्र-
आनन्दोच्छलनानां प्राचुर्यं लोक्यतां तत्र।।५३७०।।

श्रीरामचन्द्रभगवानद्याप्यस्मान्विबोधयन् पुरतः।
सर्वत्र दर्शनीयः कार्यं विस्तारन्नास्ते।।५३७१।।

इदमेवादिमबीजं श्रीरामेत्यक्षराभ्यासः।
सर्वं सिद्धं कुरुते द्विर्भाषणमेव संरुद्धम्।।५३७२।।

श्रीरामे संन्दृष्टे शक्तिः सर्वापि नेत्रगता।
संजाता सम्प्रोक्ता सर्वा भाषागतास्तास्ताः।।५३७३।।

एक एव शब्दोऽयं श्रीरामः केवलं नित्यम्।
सत्यतया प्रत्यक्षं विज्ञातश्चेत् परा तृप्तिः।।५३७४।।

श्रीरामेत्यक्षरगतवारं वारं परामर्शे।
द्विर्नाभिभाषते वा कथनं कथमात्मसाज्जातम्।।५३७५।।

रामःस्वयं यदा वा यदि किञ्चित् सम्प्रभाषते भाग्यात्।
तदेकवारमेतावत्सकलं सिद्धं समश्नुते भक्तः।।५३७६।।

तत्र द्वितीयवारं कथने नो भङ्गिमा जाता।
संकथनादपि पूर्वं सर्वार्थः संप्रकाशितो जातः।।५३७७।।

१७२.राजनीतिः

नीतिः सा या जीवनमाशाभिः पूरयन्तीव।
गहनतरेऽप्यतिगहने शुभ्रान् मार्गान् विभासयति।।५३७८।।

धर्मस्तु राजमार्गः सर्वत्राऽस्याऽगतिर्नाऽस्ति।
तदभावे तत्कार्यं या कुरुते सैव खलु नीतिः।।५३७९।।

नीतिर्यद्यपि सर्वं क्रोडीकुरुते तथा यथा धर्मः।
तत्र किन्तु मुख्यत्वं बिभ्राणा राजनीतिः सा।।५३८०।।

'राजन्' शब्दश्चादौ व्यवहर्तव्यः समादिष्टः।
अद्यत्वे शब्दोऽयं नैजं भावं विलोपितवान्।।५३८१।।

राजाऽद्यत्वे देशे कुत्राऽप्याहो न दृश्यते साक्षात्।
तेषां वंशे ये वा संजाता भूतपूर्वास्ते।।५३८२।।

व्यतिरिक्ते संसारे राजानोऽद्यापि दृश्यन्ते।
इंग्लैण्डे नेपाले सन्त्येवाऽद्यापि राजानः।।५३८३।।

तेषां पूर्वं राज्ञां शासनसंचालने नियमाः।
ये व्यवहारेष्वासन् सैवाऽसीद्राजनीतिरथ तेषाम्।।५३८४।।

ते नियमाः प्रारम्भाद् वेदादेव प्रचालिताः सन्तः।
स्मृतिपुराणमालायां सम्यग् विस्तारिता जाताः।।५३८५।।

राज्ञां नीतीनामथ ये ह्याधाराः प्रवर्तिता सन्तः।
प्रजाजने परितोषं पूर्णतयैवानुतिष्ठन्ति।।५३८६।।

मनुप्रवर्तितनियमावलिरेकासीत्प्रकाशमयवाणी ।
यामाधारीकृत्य प्रावर्तन्ताथ राजानः।।५३८७।।

याज्ञवल्क्य-कामन्दक-शुक्रादीनां च नीतिमयरचनाः।
साराऽसारविवेके राज्ञां मार्गान्विवृण्वन्ति।।५३८८।।

वाल्मीकेरथ रचना रामायणमिति तु विख्याता।
सर्वजनप्रतिपालनरूपां नीतिं समीरयति।।५३८९।।

श्रीरामचन्द्रजनता यां नीतिं रामचन्द्रस्य।
प्रत्यहमनुभूतवती कथितं तद्रामराज्यमिति सर्वैः।।५३९०।।

नीतेस्तदेव तत्त्वं दिव्यमहाभारतग्रन्थे।
स्थाने स्थाने सर्वं विस्तारितमस्त्यहोभावे।।५३९१।।

शान्तिपर्वसंरम्भे-सर्वगुणग्रामभीष्ममुखात् ।
युधिष्ठिरेणाऽसादितमेतत्तद्राजनैतिकं तत्त्वम्।।५३९२।।

चाणक्यस्य यथावत्स्वीयाऽनुभवेन सम्पन्नम्।
परमनिगूढं तत्त्वं राज्ञां मार्गेषु दर्शयति।।५३९३।।

विश्वस्मिन् विख्यातं निखिलेऽप्यथ कौटिलीयं तत्।
आर्थं शास्त्रं लोके विख्यातिं कामपि स्पृशति।।५३९४।।

सर्वागमैर्गरिष्ठा परमपटिष्ठा पराकाष्ठा।
चणकापत्यसुवाणी सर्वेषां माननीयाऽऽस्ते।।५३९५।।

राज्ञां नीतीनामथ रूपे रूपे विराटता काचित्।
तस्या एवाऽङ्गीकृतिरासीत्साहित्यबन्धेषु।।५३९६।।

राजनीतिसंकाये या चैषा कूटनीतिराख्याता।
चाणक्यस्य निवेशस्तत्राऽप्याऽस्तेऽनिवारितप्रसरः।।५३९७।।

साध्यस्य निर्मलत्वं भूयो भूयो विचार्यतां सम्यक्।
तत्संसिद्धौ साधननैर्मल्यं वा न वा भूयात्।।५३९८।।

यदा तदा मलिनैरपि साधनरूपैः स्वसाध्यस्य।
सम्पादने न दोषः साध्यस्य तु निर्मलत्वं स्यात्।।५३९९।।

धूर्ताः पापीयांसो रिपवो ये संमुखस्थाः स्युः।
तैः सह या कार्याणां शैली सा कूटयुक्ता स्यात्।।५४००।।

नो चेत्सहनीया स्यात्परमा पीड़ा पवित्रताऽम्नाये।
तस्मात्साधनरूपे निर्णयभाषा भवेदन्या।।५४०१।।

साधनसाध्योभयसद्रूपे पावित्र्यमासाद्य।
साफल्यं यैर्लब्धं वन्द्यतमास्ते तु रामाद्याः।।५४०२।।

षोड़षकलावतंसो भगवान् श्रीकृष्णचन्द्रोऽयम्।
पालकनरपतिनीतीर्बहुधाऽप्यानन्दयामास ।।५४०३।।

इदमतितर्पकमास्ते हृत्तन्त्र्या झंकृतं तत्तत्।
हृदयेऽमृतनवधारावर्षणसौभाग्यमहोस्वित् ।।५४०४।।

श्रीकृष्णनीतितत्त्वान् विवरीतुं दिव्यघटनाभिः।
श्रीव्यासेन विरचितं भारतमेकं महन्महाकाव्यम्।।५४०५।।

काव्यं तथेतिहासः पुराणनिष्यन्दसारसद्रूपः।
सर्वाभिऽर्विद्याभिर्भूषितकायो महाग्रन्थः।।५४०६।।

श्रीकृष्ण एव भगवांस्तत्र तु सर्वत्र निःष्यन्दे।
सारः परमयथार्थः कुरुते सर्वत्र संचारम्।।५४०७।।

तज्जनपालननीतौ शासकसहभावनीतौ वा।
सा कूटनीतिरेषा पूर्णाऽधारा विराजते सहसा।।५४०८।।

छलमथ तत्र न दोषो मिथ्यावदनं च तत्र नो दोषः।
हत्याऽपि नैव दोषः साध्यं यदि दिव्यरूपं स्यात्।।५४०९।।

चाणक्येन तदेवाऽनुकृतं स्वीयेऽर्थशास्त्रसद्ग्रन्थे।
युगपरिवर्तनचिन्हं लक्ष्यीभूतं नु तत्रैव।।५४१०।।

प्रायः सहस्रवर्षेष्वासादितवैभवो देशः।
वैदिकमार्गे चलितः परमां तुष्टिं समाहितवान्।।५४११।।

मार्गभ्रंशो जातश्चाग्रे तत्तन्मदान्धनृपतीनाम्।
पीड़ितजनताहाहाकारैरेतत्पुनर्जगद् व्याप्तम्।।५४१२।।

यवनैराक्रान्तोऽयं देशस्तावत्समस्तमूर्धन्यः।
हीनां दीनाऽवस्थामवाप नीतीः परित्यज्य।।५४१३।।

सर्वं स्वाहाकार्यं ज्ञानं विज्ञानमास्तिक्यम्।
हिन्दूनां सर्वस्वं सैषाऽऽसीद्यावनी नीतिः।।५४१४।।

आसन् क्षेत्रे क्षेत्रे राजानः स्वप्रभावपरिपूर्णाः।
तेषां सप्तशती वा संख्याऽसीत्सर्वदेशस्था।।५४१५।।

मोहम्मदीयराज्ये जनताया शासने काले।
सर्वत्र युद्धमयता नित्याऽसीद्भारतीयानाम्।।५४१६।।

दलितानां दीनानां राज्ञां या नीतिराभाति।
सैवाऽऽसीन्नु तदात्त्वे हिन्दूनां भारतीयानाम्।।५४१७।।

प्रातिस्विकीं व्यवस्थां कर्तुं सर्वेऽपि राजानः।
पुरातनीमथ सर्वां नीतिं संशोधयामासुः।।५४१८।।

आंग्लानामथ शासननीतिस्तावत्प्रकामसन्दीप्ता।
सोढ़ा सर्वाऽस्माभिः खेदैर्निःश्वासभावेषु।।५४१९।।

भारत-दासत्वं तं दूरयितुं सर्वजनतासु।
काचिज्जागर्तिमयी शैली सफलैव संजाता।।५४२०।।

लब्धं स्वाधीनत्वं नानात्यागैः प्रखर्वतमकष्टैः।
प्राणाहुतिप्रदानैर्भारतमातुः सुपुत्रैस्तैः।।५४२१।।

आंग्लैर्नेतृणामथ संकल्पे शासनं दत्तम्।
नीतीनां निर्मात्री सभाऽपि केन्द्रे सुसंगठिता।।५४२२।।

नीतिग्रन्थः कश्चिद् विधानमिति संविधानमिति कथितः।
राज्ञां शासनलोपे सर्वजनानां स्वशासनं जातम्।।५४२३।।

केन्द्रीया संसदियं बहुमतरूपेण लब्धसद्भावा।
निर्वाचनमतगणनाऽऽधारेणाग्रेसरीभूता ।।५४२४।।

मन्त्रीणामथ परिषत् संसदि निर्वाचिता सम्यक्।
राष्ट्रपतिं विचिनोत्यथ संसन्नवविभ्रमोन्मेषे।।५४२५।।

तेनैव संविधानं नूत्नं तन्निर्मितं सभया।
सा राजनीतिरसमा जनतन्त्रेऽस्मिन् सदा जयति।।५४२६।।

नैतादृश्यपि नीतिः पूर्वमपरिचिताऽथ देशेऽस्मिन्।
पुरा युगे गणतन्त्रं प्रवृत्तमासीद् गणेषु राज्येषु।।५४२७।।

किन्त्वद्यत्वे विशदं रूपं जनतन्त्रनामकं दृष्टम्।
यत्र तु जनजनहृदये स्वीयत्वस्याऽस्ति संचारः।।५४२८।।

वयमेवाऽद्य स्वीयं मतं प्रदायाऽथ शासनं कर्तुम्।
कांश्चित्स्वीयभ्रातृन्केन्द्रे प्रान्तेषु योजितान्कुर्मः।।५४२९।।

अद्य वयं राजानः प्रजाजनाः सर्व एवैते।
अस्माकं या नीतिः सा नीतिः सर्वदेशस्य।।५४३०।।

सर्वेषामभ्युदयो भूयादित्येव नीतिसारांशः।
एतेऽस्माभिः क्लृप्तास्तां नीतिं योजयन्त्येव।।५४३१।।

नीतीनामद्यत्वे संख्येयं भूयसी जाता।
मतभेदा अद्यत्वे नानारूपे मिथो जाताः।।५४३२।।

तेनाऽस्ति वैपरीत्यं जनतायां शासने विपुले।
नीतीनामपि दोषः कश्चिदयं मूलतो दृष्टः।।५४३३।।

अस्मद्देशे नीतिः पुरातनी निखिलविश्वस्य।
मनुजं सुखयितुमाऽस्ते सुदृढा सर्वत्र संचारा।।५४३४।।

किन्तु नवीना नीतिः स्वीकृतिभावं गताऽद्यत्वे।
वैदेशिकं विधानं यत्र स्वीकृतमियत्तया यत्तत्।।५४३५।।

भारतवर्षीया सा नीतिः स्पष्टा सुविस्तृता विपुला।
यत्र तु सर्वे मनुजाः प्रसन्नतां स्वां समीहन्ते।।५४३६।।

किन्त्वस्माकं देशेऽद्यत्वे देशस्य जनतासु।
क्रोधाऽवेशो नितरां शासनसंस्थासु दृश्यते दीप्तः।।५४३७।।

जनतन्त्रात्मकशासननीतौ दलदस्युलीलाया।
बाहुल्ये संजाते मुख्या धारा विदूरिता जाता।।५४३८।।

विपरीते तु विचारे ये ये ते ते स्थिता एते।
नित्यं विरोधभाषां नियोजयन्तीह शासनस्थेभ्यः।।५४३९।।

स्वातन्त्र्योत्तरकाले सा संजातासमुन्नतिर्देशे।
सा राजनीतिरसमा वैदेशिकवित्तसंपूर्णा।।५४४०।।

परितो विकासकार्यं नगराणां भव्यतररूपम्।
भवनानां निर्माणं मार्गाणां सर्वगामित्वम्।।५४४१।।

बृहज्जलानां साधनमेतावद्विद्युतां लब्धिः।
संसाररम्यरचनादृश्यानां काऽपि विच्छित्तिः।।५४४२।।

बालानां सच्छिक्षा नारीशिक्षाविकासमयसरणिः।
नीतिः कापि समस्ता देशं सर्वं प्रतिष्ठितं कुरुते।।५४४३।।

अद्य प्रजैव राजा राज्ञो नीतिः प्रजानीतिः।
नूतनतासाम्राज्ये ध्रियतां काचिन्नवा नीतिः।।५४४४।।

भारतवर्षेऽद्यत्वे पञ्चाधिकविंशतिः संख्या।
राज्यानां संजाता शासकसत्ताविधानसभाः।।५४४५।।

तासां चयनं प्रचलति जनतानिर्वाचनेषु सर्वत्र।
बहुमतमाधारगतं मन्त्रित्वे तत्र परिणमते।।५४४६।।

केन्द्रीयं शासनमपि राज्याध्यक्षं नियोजयति।
केन्द्रप्रान्तसमीक्षां कुर्वन्त्येवाऽद्य राज्यपालास्ते।।५४४७।।

बहुमतशासननीतिर्मूलत एवाऽस्ति रामराज्यतो भिन्ना।
निखिलानामपि सौख्यं समन्वितं रामराज्येषु।।५४४८।।

एके न्यूने जाते एकाधिकताऽपरत्र संजाता।
बहुमतमिह संजातं शासनसत्ता समायाता।।५४४९।।

एकोनानां सैषा संजाता दुर्दशा महती।
ते संघर्षरतत्वे स्वीयं कालं निवेश्य मोदन्ते।।५४५०।।

सर्वे सन्नाहयुता बहुमतमात्मीयमाहर्तुम्।
साधनदूषणतायां न कापि हानिर्विचार्यतेऽद्यत्वे।।५४५१।।

शासनकर्मनिविष्टा स्वीयान्सहयोगिनो नित्यम्।
लाभान्वितान्समीक्षितुमीहन्ते संविधानेषु।।५४५२।।

यद्याऽक्रोशो जातो स्वीयोपायेन तस्य संयोगः।
स्वीये शासनतन्त्रे जनताऽन्यं कं समाक्रोशेत्।।५४५३।।

मतदाने मतदाता स्वीयं क्रोधं प्रकाशयत्येव।
परिवर्तनं च शासनतन्त्रे जातं पुनः क्रोशात्।।५४५४।।

केन्द्रे प्रान्तेष्वथवा शासकपरिवर्तनं कृत्वा।
जनता मतप्रदानैः शासननीतिं समादिशति।।५४५५।।

यद्यद्य राजनीतिं तत्त्वदृशाऽऽलोचयामो वा।
अर्थे कामे च भृशं सन्नाहो दृश्यते परितः।।५४५६।।

धर्मे निरपेक्षत्वं सापेक्षिकता तथाऽर्थेषु।
कामानां परिपूर्तौ सापेक्षत्वं परा नीतिः।।५४५७।।

अर्थाऽधारितनीतौ समाजवादश्च साम्यवादश्च।
धनिकानां धनवादो ''पूंजीवाद''स्तथा ख्यातः।।५४५८।।

नानाऽचारविचारप्रभेदभिन्ना जना यत्र।
मनुजत्वे निजधर्मे नो भिन्ना भारते देशे।।५४५९।।

यदि राजनीतिरेका कथनीया वर्णनीया वा।
दुष्टानां सन्त्रासो शिष्टानां रक्षणं सारः।।५४६०।।

शिष्टजना यदि काञ्चिद् व्यथां यथा वा तथा वाऽपि।
समनुभवन्ति न नीतिः सैषा साधीयसी जाता।।५४६१।।

साधूनां त्राणार्थं श्रीकृष्णः सर्वदैवाऽस्ते।
शासकदोषानथवा दूरीकर्तुं धृतव्रतो भगवान्।।५४६२।।

शिष्टा नश्येयुर्यदि पापीयांसः सुपीवरा यदि वा।
सर्वे ह्यवशिष्टा अपि पापीयांसः प्रजायेरन्।।५४६३।।

अद्याऽस्माकं परितो दृश्याली सैव दृश्यते निखिला।
अर्थागमे द्वितीये सर्वेषां लक्ष्यता जाता।।५४६४।।

तेन श्रीहीनत्वं स्नेहाऽभावो विदूरभावो वा।
सम्बन्धसूत्रभङ्गः पापाः सर्वे समाचाराः।।५४६५।।

सर्वस्मिन्नपि देशे नेतारो वा विधातारः।
त्रातारः संजाता जन-जन-तन्त्र स्वतन्त्रिताः सन्तः।।५४६६।।

स्वीयं सर्वं रक्षितुमाराज्जागर्ति जनतेयम्।
स्वल्पेऽप्यारावे खलु संघीभूता सदैव जनतेयम्।।५४६७।।

देशेऽस्माकं सर्वे निवासिनो भ्रातरः सहजाः।
जीवयितुं जीवन्तो जयन्ति गुरवो न किं ते ते।।५४६८।।

रजस्तमोबाहुल्ये काले कालेऽथ देशेऽस्मिन्।
सत्त्वं प्राबल्येन प्रतिष्ठितं नाऽस्ति सन्देहः।।५४६९।।

वेदानामथ घोषो कुरानशब्दो गुरुग्रन्थः।
वाईबिलस्य च पाठः सर्वजनोत्साहसंचारः।।५४७०।।

पूजाऽर्चा च समेष्वपि धर्मेष्वेतेषु वर्तते दिव्या।
सत्त्वगुणे चिद्रूपं क्षणे क्षणे संविलासयति।।५४७१।।

या राजनीतिराऽस्तेऽद्यत्वे देशेऽथ संविधानानाम्।
शिक्षयितुं संसारं सा वै पर्याप्ततां भजते।।५४७२।।

यद्यपि महार्घतेयं सुरसामुखवद् विजृम्भणं कुरुते।
किन्तु द्रव्याऽवाप्तिस्तथाविधैवाऽनुभूयतेऽनल्पा।।५४७३।।

जनतन्त्रपद्धतिरियं पूर्णा नव्याऽथ देशेऽस्मिन्।
पुरा यथा संजाता नव्यः सर्वोपकारसंसारः।।५४७४।।

सिद्धचरित्रोन्मेषा जनतोत्थितदेशनेतारः।
सर्वेषु प्रान्तेषु प्रतिष्ठिता रक्षका जाताः।।५४७५।।

१७३.वाहनानि

पुरातनादपि कालाद् यानं सौभाग्यवर्धकं किञ्चित्।
तादृशमनुपमरूपं यद्वशतः सिद्धिमावहन् सर्वे।।५४७६।।

यानानां महिमाऽयं येन तु देवाः समस्तसंचारम्।
क्षणमात्रेण विनैवाऽऽयासं परिकल्पयन्त्येव।।५४७७।।

विष्णोर्गरुड़ः ख्यातोः प्रयाणवेलासु यस्य गतिः।
मनसोऽप्यधिका कथिता विष्णुर्येनाऽस्ति सर्वमयः।।५४७८।।

गरुड़ाख्यं तद् यानं श्रीविष्णोः ख्यातमेवाऽस्ते।
निखिलखेचराधीशः क्षणमात्रेणाऽध्वसंहर्ता।।५४७९।।

यानत्वे वरदानं गरुड़ेनैवाऽथ याचितं रुचिरम्।
लोकातिगमहिमानं विधारयन् राजते गरुड़ः।।५४८०।।

जयति स भगवान्शंभुर्वृषवाहनतामुपागतोऽद्यापि।
वृष एवाऽयं साक्षाद्धिमगिरिधवलश्च शीघ्रतमयायी।।५४८१।।

सोऽयं वृषभः शंकरचरणावासेव्य संसारे।
सर्वोपरि विभ्रजितकायः सर्वैः प्रणम्यतां यातः।।५४८२।।

भगवत्या दुर्गाया यानं सिंहो विमुक्तसंचारः।
युद्धोन्मत्तदशायामसुराणां प्राणलालसा तस्य।।५४८३।।

श्रीदुर्गाया वाहं वनराजं वीक्ष्य कल्पनया।
तामसजड़तायुक्ता ह्यसुराः प्राणान्विमुञ्चन्ति।।५४८४।।

हिमगिरिसंग्रामेष्वथ सिंहे वाहे प्रतिष्ठिता देवी।
लीलायुद्धं कृत्त्वा महाऽसुरांस्तोषयामास।।५४८५।।

संख्याऽधिकाऽसुराणां संहारं तु क्षणेनैव।
कोपाविष्टेन कृतं देव्या यानेन सिंहेन।।५४८६।।

भक्तानां संरक्षणकर्मणि सिंहोऽयमद्यापि।
जगदम्बाप्रेरितमतिराऽस्ते नीराजितो भक्तैः।।५४८७।।

बलविषयेऽनुपलम्भादन्यस्य स्वीयतुलनायाम्।
करिकीटमेघशकलेष्वाऽस्तेऽनुत्साहसम्पन्नः ।।५४८८।।

गणपतियानं मूषकरूपं सर्वत्र विख्यातम्।
मूषकयानारूढो गणपतिरथ सर्ववन्द्योऽस्ति।।५४८९।।

कश्चन सोऽयमुलूको देव्या वाहनमिति प्रतीतं नः।
धूमावत्याः काको वाहनतां याति नित्यमयम्।।५४९०।।

त्रैलौक्यतारिणीयं गङ्गा मकरं तु वाहनं कृत्वा।
सर्वान्संतारयितुं धृतव्रता जागरूकैव।।५४९१।।

स्वामी तु कार्तिकेयो मयूरमासाद्य सर्वेषु।
स्वर्लोकेष्वथ विहरन् दैवीं सुषमां विलोकयन्नाऽस्ते।।५४९२।।

देवाऽधीशश्चेन्द्रोऽप्यैरावतयानमारुह्य ।
उच्चैःश्रश्वसो वाऽप्यथ यानेनाऽऽयाति याति सर्वत्र।।५४९३।।

एषोऽपि सारमेयः श्रीभैरवयानतां यातः।
रासभराजोऽभिनवो शीतलया वाहनः क्लृप्तः।।५४९४।।

स्वयमथ भगवान्हनुमायुङ्क्ते स्कन्धे निधाय श्रीरामम्।
जगतामथ वन्द्यत्वे प्रतिष्ठितो ब्रह्मरूपतां यातः।।५४९५।।

प्रत्यक्षोऽयं सविता सप्ताश्वान्वाहनीकृत्य।
त्रिभुवनविचरणशीलः प्राणो वा सर्वलोकानाम्।।५४९६।।

भगवत्या वाग्देव्या नीरे-क्षीरे विवेकसंस्कर्ता।
शुभ्रः पक्षी हंसो वाहनभावं गतः कश्चित्।।५४९७।।

चतुर्मुखोऽपि च देवो ब्रह्मा जगतां विनिर्माता।
हंसं कृत्वा वाहनमद्यापि जगत्समातनुते।।५४९८।।

देवा एते सर्वे सर्वजगच्चालका निगूढाश्च।
पौराणिकपद्धत्या यानान्येवं प्रकल्पयाञ्चक्रुः।।५४९९।।

कश्चन वाहनमहिमा सर्वे देशेऽथ काले वा।
नित्यं नव सौविध्यं कुरुते सर्वेषु कार्येषु।।५५००।।

मानुषसंसारेष्वथ पुरा युगे वाहना अश्वाः।
आर्याणामितिहासे हयवाहनताप्रसिद्धैव।।५५०१।।

अश्वानामथ यैषा गतिधारा सैव चाद्यत्वे।
वाष्पैश्चालितयाने गणनायां सर्वथा गणिता।।५५०२।।

''खच्चर''इति प्रसिद्धः पशुरपि पार्वत्यदेशेषु।
यानं भवति नितान्तं स्वीयैः श्वासैः श्रमं हरति।।५५०३।।

क्रमेलका अप्येते मृत्-सागरमार्गपोता वा।
सत्वरगतिसंयुक्ता गृहे गृहे तत्र राजन्ते।।५५०४।।

वृषयानं वा तदिदं 'सांड़नि' यानं तु गुर्जरे ख्यातम्।
प्रारम्भे यानानां द्वौ भेदो कल्पितुं शक्यौ।।५५०५।।

एकं तु हीनयानमथ द्वितीयं महायानम्।
हीनानां यानानां विद्यन्ते विपुलरूपाणि।।५५०६।।

सैव महायानानामपि स्थितिः कापि दृश्यते पुरतः।
यानानां सौभाग्यं सर्वं पुरतः समादिशति।।५५०७।।

हीनानां यानानां क्रयणे मुद्राऽल्पता न बाधा स्यात्।
श्रीसम्पन्नदशायामागच्छति वा महायानम्।।५५०८।।

पुरा रथानां रूपाण्यपि नानाऽऽकारदृश्यानि।
नगराणमिव रूपं विशालतायां रथस्थितं जातम्।।५५०९।।

रावणरामाऽन्तिमतामुपागते संगरे ख्याते।
रामः पदातिरासीत्किन्तु जयाऽख्ये रथे दृष्टः।।५५१०।।

जयवाहनमथ दिव्यं नो मर्त्यं यत्र यत्रैव।
सुनिश्चितः पन्थानं सर्वं शोभनतमं कुरुते।।५५११।।

सर्वं चैतत्तुलसीदासेन स्वीयमानसे रचितम्।
याने नव्यं रूपं सहसैवाविष्कृतं जातम्।।५५१२।।

बाष्पस्याविष्कारादनन्तरं यानरूपाणाम्।
या सृष्टिः संजाता माया काचित्समाभाति।।५५१३।।

गतौ गताऽवधिकारः सम्प्राप्तः शीघ्रगामित्वात्।
सर्वे क्षेत्रे यानं किञ्चिद् वैशिष्ट्यमावहति।।५५१४।।

स्थानानि यान्यगम्यान्यासन्वा साधनाऽभावात्।
यानान्येतानि पुनस्तदगम्यत्वं विलोपयन्तितराम्।।५५१५।।

स्थले जले चाऽकाशे यानानीमान्यनन्तानि।
विलसन्ति कालगणनां संक्षिप्तां वा प्रकुर्वन्ति।।५५१६।।

तदिदं नव विज्ञानं नव नव यन्त्राणि निर्माय।
नवतरयानसमर्पणसंसेवामातनोत्यारात् ।।५५१७।।

स्वाधीनं यदि यानं मनुजः श्रेष्टत्वमाघ्राय।
इतरेषामथ तेषां तेषां पुरतः प्रतिष्ठितो भवति।।५५१७।।

प्रारम्भे तु मरुत्तरयानं बाष्पेन चालितं शश्वत्।
संसारेषु नितान्तं चकितं भावं प्रवर्तयामास।।५५१९।।

तत्तु मरुत्तरयानं शतशो रूपेषु परिणतं जातम्।
''पैट्रोला''ख्ये तैले तत्र गतीनां तु जनकत्वम्।।५५२०।।

अद्य तु तत्र विशेषो 'डीजल' तैलेन विस्तीर्णः।
डीजलतैलाञ्जलिभिर्विशालयानानि चाल्यन्ते।।५५२१।।

दीर्घाश्चाथ शकट्यो ट्रेनाऽख्या डीजलेनैव।
संचाल्यन्ते नित्यं किंवेन्धनरूपमेतावत्।।५५२२।।

शकटीनामपि संख्या महीयसी दृश्यतेऽद्यत्वे।
पुनरपि संख्या न्यूना गन्तारो वृद्धिमापन्नाः।।५५२३।।

यावद्यानाधिक्यं प्रसूयते शासनेन तन्त्रेण।
यात्रासंलग्नानामपि तावद्वर्धते संख्या।।५५२४।।

मध्येऽप्येकं यानं द्विचक्रिका नामकं ख्यातम्।
यानेषु चमत्कारं किञ्चिन्नूनं विधारयति।।५५२५।।

याने नूतनरूपप्रकटीभावेऽपि पूर्वतनरूपम्।
नैव विलुप्तं पुरतः सर्वाणीमानि दृश्यन्ते।।५५२६।।

नगरे गृहस्थितं तत्स्कूटरयानं हि सर्वत्र।
स्वीयां सेवां यच्छति गतितत्वं वा समर्पयति।।५५२७।।

यानाऽभावे महती दुर्गतिरद्य प्रजायते नित्यम्।
दूरस्थितं तदात्वे निकटस्थं वाऽपि चाऽऽभाति।।५५२८।।

यानेन नैव दूरे यद् दूरे ह्यन्तिके तत्तत्।
नाऽस्ति हि दूरे किञ्चिन्नचैव पार्श्वेऽस्ति यानगतेः।।५५२९।।

दुष्यन्तेन यदुक्तं यनारूढेन यानगतिम्।
वर्णयता तदिदानीं मरुत्तरे वाऽनुभूयते सर्वैः।।५५३०।।

यानं चैतद्यत्र तु नैव स्वीयां स्थितिं लभते।
तानि गृहाण्यद्यत्वे नो शिक्षितभावमुपयान्ति।।५५३१।।

चतुष्पदं तु मरुत्तरयानं येषु गृहेष्वाऽऽस्ते।
तानि गृहाण्यद्यत्वे लोके ह्यादर्शभूतानि।।५५३२।।

नगरेष्वेतैर्यानैः सरम्भस्तादृशो रचितः।
पद्भ्यां गमानाऽगमनं काठिन्येनैव शक्यं स्यात्।।५५३३।।

स्कूटरयानावलिरियमद्यत्वे सर्वपथगन्त्री।
नव्ये दिव्यतरे वा नगरनिवासेऽनिवार्यतां भजते।।५५३४।।

वैकल्पिकरूपेण द्विचक्रिकायानमपि सुस्थम्।
पार्श्वे गमनाऽगमनं तेनैवाऽद्यापि जायते नित्यम्।।५५३५।।

यात्राकर्ता कश्चिद् गौरववेषं समीकर्तुम्।
चञ्चत्सुखदं यानं स्वात्मनिदेशेऽभिवाञ्छतीहैव।।५५३६।।

वैदेशिकपरिवेशे महत्तरान्न्यूनता याने।
नैव प्रभवति मार्गे चलितुं वा यत्र कुत्रापि।।५५३७।।

अस्मद्देशे याने मरुत्तरं यानमारुह्य।
ये के वा गच्छन्तो लोकान्वशयन्ति ग्रामीणान्।।५५३८।।

''जीप'' नामकं यानं संजातं सैनिकाऽभरणम्।
'ट्रक' यानं च महत्तररूपं सेनासमाविष्टम्।।५५३९।।

अद्यत्वे 'ट्रक' याने व्यापारः सम्प्रवर्तते नित्यम्।
नानाविधवस्तूनां वहनं क्रियते ट्रकैरेभिः।।५५४०।।

नव नवतररूपेषु दृश्यन्ते मरुत्तरादियानानि।
'स्कूटर' यानावलिरपि नित्यं नवतामुपागता दृष्टा।।५५४१।।

निर्मापकसंस्था अपि विपुलान्येवाऽथ निर्मान्ति।
निर्यातोऽपि च तेषां यानानां बोभवत्येव।।५५४२।।

मारुतिनामस्मरणं मारुतिकारात्प्रजायते नित्यम्।
प्रातः स्वच्छीकरणे पूजनमिव मारुतेर्जातम्।।५५४३।।

स्वतन्त्र्योत्तरकाले समुन्नती रेलयानस्य।
तूर्णं काचिज्जाता सुखयात्रायां न सन्देहः।।५५४४।।

द्रुततरसंगामिन्योऽल्पविरामाः संप्रपूरिता निखिलाः।
बाष्पशकट्यश्चैता नानानामे चलन्त्यद्य।।५५४५।।

नाना तीर्थेष्वटनं सुकरं वा रेलयानेन।
यज्जातं तन्मन्ये स्वातन्त्र्यस्याऽनुभवसरणिः।।५५४६।।

पारतन्त्र्वेलायां प्रथमा द्वैती तृतीयाच।
'इण्टर' नाम्ती श्रेणी रेले याने विलोकितैवाऽसीत्।।५५४७।।

ये शासकास्तदात्वे आंग्लाः प्रथमां सुपूजितां श्रेणीम्।
अधिकुर्वन्ति स्म तदा धनिनो वा ये स्वदेशीयाः।।५५४८।।

अफ्रीकायां गान्धी मोहनदासस्तु प्रथमायां।
यात्रां कर्तुं कष्टं गौराङ्गैर्नीत एवाऽसीत्।।५५४९।।

प्रथमा ततो द्वितीया श्रेणीद्वयमेव तावदवशिष्टम्।
यानाऽभ्यन्तररूपे परिवर्तनमपि सुखं प्रदं जातम्।।५५५०।।

वाताऽनुकूलिताऽपि तु यानेष्वायाति धन्यतरा।
यात्राश्रमो मनागपि नो संजायेत यात्रासु।।५५५१।।

स्थानाऽऽरक्षणसरणिः शोभनरूपा समीहितं कुरुते।
सामूहिकविनिपातः कष्टप्रद एव यात्रायाम्।।५५५२।।

विपुला भारतजनता सन्नद्धा नियमहेलनं कर्तुम्।
पुनरपि शासनसंस्था सेवितुमेनां विचेष्टते नित्यम्।।५५५३।।

भाटकयानान्यपि तान्यथ सुखयात्रां समर्पयन्त्येव।
अल्पव्ययेन गमनाऽऽगमनं तैर्वा भवत्येव।।५५५४।।

''टैम्पो'' यानं नगरे ''बस'' यानं चैव वा नगरे।
तत्राऽपि राजधान्यां प्रान्तानां केन्द्रसंस्थायाम्।।५५५५।।

सैषा सर्वा धारा यानानां विद्यते नगरे।
दूरस्थं स्वीयजनं सन्द्रष्टुं प्रेरयत्याहो।।५५५६।।

ग्रामेष्वद्यापि पुनर्यानाऽभावेऽथ यात्रायाः।
सा दुर्दशा पुराणी कथयति देशे विसंवादम्।।५५५७।।

शनैःशनैर्ग्रामेष्वपि यानानीमानि संयान्ति।
मार्गाणां निर्माणं तत्राऽप्यामोदमातनुते।।५५५७।।

पुष्पकयानाऽधाराण्यप्यद्यत्वेऽथ वायुयानानि।
नवयुगमिव यात्रायामुद्घाटितवन्ति चित्रमिव।।५५५९।।

प्रातर्जलपानादिकमथ विहितं कालिकातायाम्।
सायं 'चायं' पेयं गृण्हन्त्येतेऽथ बम्बईनगरे।।५५६०।।

होरामात्रैर्यात्रा विदेशदेशेष्वियं जाता।
यानान्याकाशे वा मार्गं निखिलं पिबन्तीव।।५५६१।।

राजनयिकगतिविधयस्तूर्णं निखिलाः प्रजायन्ते।
आकाशगतैर्यानैर्विश्वं संजातमेकनीडस्थम्।।५५६२।।

सर्वेष्वपि देशेष्वथ यात्रां सम्पाद्य नेतारः।
स्वीयं सम्बन्धं वा द्रढयितुमेते प्रयत्यन्ते।।५५६३।।

देशानामुन्मादे युद्धान्यप्यद्य सुलभानि।
एतानि वायुयानान्यपि युद्धाग्नौ घृताहुतिं ददते।।५५६४।।

वैमानिकी तु सेना सेनायामग्रिमां पंक्तिम्।
संशोभयति नितान्तं संभारैःसर्वभिर्युक्ता।।५५६५।।

भारतपाकसमीक्षितयुद्धोन्मादेषु वायुयानानाम्।
या भूमिका समाऽसीत्तत्र वयं साक्षिणः सर्वे।।५५६६।।

अचिरेणैव विजाते सद्दामैराकयुद्धेऽपि।
निखिलैव भूमिकाऽसीदेतेषां वायुयानानाम्।।५५६७।।

साधनमात्रे सेयं सदसग्द्भाऽन्विता गतिर्दृष्टा।
सौख्यं संकटमथवा यच्छन्त्येतानि साधनानि पुरः।।५५६८।।

जलयानानां महती संस्थितिरासीद्विदेशयात्रायाम्।
यन्त्रयुगप्रारम्भे जलयानान्येव मुख्यानि।।५५६९।।

पारेसमुद्रमासीत्सुलभा यात्राऽथ जलयानैः।
तैरेवाङ्लैः स्थापितमर्धं विश्वं स्वकीयसाम्राज्ये।।५५७०।।

जलयानान्येतानि तु लघुरूपाण्यद्य नगराणि।
याने सर्वं सुलभं नगरोद्देशेषु यत्प्राप्यम्।।५५७१।।

देशाऽभ्यन्तरभागे नौकायानानि सुलभानि।
गंगायमुनादीनां विहारभावाञ्जलिं दत्त्वा।।५५७२।।

किं बहुना यानाऽख्यं तत्त्वमिदन्त्वादिमात्कालात्।
अद्यावधिसम्पूर्णां स्वीयां यात्रां विकासयन्नाऽऽस्ते।।५५७३।।

१७४.शैली

नानाभावविभावैर्भाषाभिश्चित्तविस्तारैः ।
मन्त्राणां सिद्धानां फलमाप्तं किमपि सा शैली।।५५७४।।

इयमस्ति काऽपि शैली या व्यक्तित्वस्य सूक्ष्मतमतन्तून्,
व्यञ्जयितुं प्रोद्युक्ता संयोजयति प्रकाममास्वाद्या।।५५७५।।

एको मनुजो भिन्नः सर्वस्माद्वाऽथ संसारे।
सर्वे भिन्ना भिन्नाः समवेताश्चापि भासन्ते।।५५७६।।

किं बहुना संसारे ते ते देशाश्च राष्ट्राणि।
स्वीयां शैलीं नीत्वा भिन्ना भिन्ना विभासन्ते।।५५७७।।

देशाद्देशो भिन्नः स्वीयां शैलीं पुरस्कृत्य।
सर्वस्मादप्यपरान्मानवमात्रात्समागते काले।।५५७८।।

एको रामो जातो वाल्मीकिर्यं हि वर्णितवान्।
रामायणी कथा सा लोके प्रथमैव छन्दसां धारा।।५५७९।।

विपुलं तत्र सुलिखितं पुनरप्यन्यैस्तदेव किल चरितम्।
वारं वारं लिखितं किमर्थम्? एतस्य प्रश्नस्य।।५५८०।।

निश्चितमुत्तरमेतच्छैलीभेदेन दातव्यम्।
अन्या चाऽन्या शैली वर्णनभेदे स्वरूपसंपुष्टा।।५५८१।।

भासस्य नाटकीया शैली रामस्य चित्रणं कुरुते।
श्रीकालिदासशैली रघुवंशे दीप्तिमायाता।।५५८२।।

शैलीभेदविभिन्नान्येतान्यपि सन्ति काव्यानि।
रामकथापरिपूर्णान्यद्यत्वे यानि जायन्ते।।५५८३।।

सैवाऽथ वाक्यरचना व्याकरणं वा तदेव स्यात्।
तान्यक्षराणि सततं नित्यं प्रोच्चारितानि जायन्ते।।५५८४।।

नो नव्यं व्याकरणं कविना निर्मीयते स्वीयम्।
नो चैवाक्षरमाला काऽपि नवीना विनिर्मिता कविना।।५५८५।।

कोऽयं भेदः पुनरथ शैली भेदं विना वक्तुम्।
शक्यः स्यात्पुनरेषा शैली सर्वत्र मूर्धन्या।।५५८६।।

शैली वार्तालापे शैली कार्येषु सैव गमनेऽपि।
सैव सैव निखिलेऽपि श्वासे श्वासे विलोक्यते सततम्।।५५८७।।

शैलीनां विस्तारो गणितुं शक्यो न बाभाति।
यावन्तः किल लोका दृश्यन्ते तावती शैली।।५५८८।।

उत्पत्तावपि लालनपालनतारूपमापन्ना।
शैलीयं किल माता सर्वेषां वा स्वरूपाणाम्।।५५८९।।

मातुः पितुस्तथाऽग्रे गृहस्थितानाञ्च सर्वेषाम्।
शिशवः सर्वा शैलीमनुकुर्वन्तोऽथ वर्धन्ते।।५५९०।।

शैली सैषा काचिद् यद् द्वारा दूरतो दृष्ट्वा।
कोऽयं सोऽयं मत्त्वा निश्चयभावो निबध्यते चित्ते।।५५९१।।

तस्य प्रचलनशैली नेत्राऽभ्यासैः सुदूरतो दृष्ट्वा।
सोऽयं सेयं बुद्धिः प्रत्यग्रा सत्यतामाप्ता।।५५९२।।

प्रत्येकस्मिन्काये स्वीया शैली प्रवर्तते सततम्।
नोचेत्तस्य पृथक्त्वे गणनायां किं प्रमाणं स्यात्।।५५९३।।

शैलीसत्तामयता सा शैली स्मारयति नित्यम्।
शैली देवी सततं कणे कणे सम्प्रविष्टाऽस्ते।।५५९४।।

सा सर्वदैव शैली जने जने या प्रतिष्ठिता नित्यम्।
संचालयति नितान्तं नूतनतां जीवनेऽस्माकम्।।५५९५।।

शैली स्वतन्त्रतन्त्रा सर्वैरुद्धाविता विनाऽयासम्।
इङ्गितचेष्टितकथितस्थितिमात्रेणाऽगता शैली।।५५९६।।

शैलीशब्दः सोऽयं महन्महाभाष्यकारेण।
सम्प्रोक्तः स्वे भाष्ये पाणिनिसूत्राण्यनुध्याय।।५५९७।।

आचार्यस्यैवैषा शैली संलक्ष्यते तावत्।
बहुशस्तथा ब्रुवाणः पतञ्जलिः सर्वथा नम्यः।।५५९८।।

भूयो भूयः करणे भूयो भूयोऽथ संकथने।
भूयो भावे शैली स्वीयं रूपं प्रकाशयति।।५५९९।।

प्रतिभा च याऽस्मदीया सा त्वाधाराऽस्ति सर्वसंचारे।
शैली त्वेषा प्रतिभामेकां रूपायितां कुरुते।।५६००।।

शैलीरूपाणामथ गणना नो शक्यसंपादा।
येषां गणना जाता तेषां सञ्चालिका शैली।।५६०१।।

आक्रामिकाऽपि शैली मैत्रीरूपाऽपि शैलीयम्।
शिक्षणकार्ये सिद्धा गुरुशिष्यत्वेन शैलीयम्।।५६०२।।

प्रभुतायुक्ता शैली बन्धुत्वे सङ्गता शैली।
अनुमानात्मकविधिना सम्यक् सम्पोषिता शैली।।५६०३।।

वातावारणविभूषासंशोभाराजिता शैली।
नगराजधवलधाराप्रपातरववन्दिता शैली।।५६०४।।

शतशः सहस्रशो वा वक्तारः कार्यकर्तारः।
लेखनकर्मणि कुशलास्तेषामनुवर्तिनी शैली।।५६०५।।

प्रकृतिरियं विक्षोभे शैलीरूपं समास्थाय।
रूपैरनन्तभेदैर्भिन्ना जगदेतदाह्वयते।।५६०६।।

वेदान्तिनोऽथ मायां ब्रुवते तामेव वा शैलीम्।
प्रकृतिरितीत्थं सांख्यास्तां शैलीं सङ्गिरन्ते वा।।५६०७।।

शैलीयं प्रत्यक्षा सर्वेषां मानवानां स्यात्।
श्वासे श्वासे स्पन्दनसञ्चारे या समाह्वयते।।५६०८।।

सहस्रशः कविवर्याः सञ्जाता वर्तमानाश्च।
ये चैवायास्यन्तस्तेषामेषां पृथक्करा शैली।।५६०९।।

संवादः शैलीनां काममसौ मृग्यतां नाम।
किन्तु स्वतन्त्रतायां शैलीनां नैव बाधा स्यात्।।५६१०।।

अनुकरणरूपिणी वा शैली तत्राऽपि विद्यते रुचिरा।
रुचिराऽनुकरणरूपा शैली वन्द्यैव बाभाति।।५६११।।

शैली देवी सेयं स्वात्मानं वा विभावयति।
तदनन्तरं तथाऽन्यैः सार्धं संयुज्यते सैषा।।५६१२।।

शैली व्यापकताया न स्पृष्टः कोऽपि नैव संदृष्टः।
दृष्टिरियं यन्मनुते तत्रोन्मुक्ता स्थिता शैली।।५६१३।।

सहस्रशो ये भाषणकर्तारोऽद्यापि दृश्यन्ते।
शैली भेदस्तेषां प्रमुखः प्रत्यक्षतां यातः।।५६१४।।

अणुतोऽप्यणुकार्याणां महतोऽप्यथवा महत्तरे कार्ये।
कर्तृणामथ शैली तेषां तेषां विराजते दृश्या।।५६१५।।

ये चाऽनन्ता जीवास्तेषां किं भेदकं तत्त्वम्।
शैल्यैव सा मनोज्ञा तेषां रूपं विधारयति।।५६१६।।

तुल्याऽऽकारा मनुजाः कामं स्युः किन्तु तत्राऽपि।
यो भेदः सा शैली तेष्वपि नित्यं प्रजागर्ति।।५६१७।।

मानाऽपमानविध्वंसननिर्माणादिकं दिशती।
शैलीयं प्रत्यक्षा सर्वानानन्दयत्येव।।५६१८।।

दुःखसमुद्रनिमग्नानपि शैलीयं विधारयति।
जीवनसञ्चरणानां शैल्येवाऽचार्यतां याति।।५६१९।।

विश्वस्मिन्या चेयं विभिन्नता दृष्टिगोचरीभूता।
सा सर्वाऽपि तु शैली विकासिता दृश्यते सहजा।।५६२०।।

सर्वत्र काचिदसमा दिव्या सङ्गीतलहरीयम्।
पवनप्रवाहझंकृतिसारा सर्वान्समाह्वयते।।५६२१।।

शीते सूर्योष्माणं वितरन्ती मधुरमधुराभम्।
शैत्यानामुपकारे संलग्ना या विशेषविस्तारैः।।५६२२।।

कुसुमे कुसुमे वासन्तिकनिःश्वासान्प्रगुणयन्ती।
चित्तसमीहितदात्री परितोऽप्याऽस्ते विकीर्णैव।।५६२३।।

ग्रीष्मे ललाटतपने शीतं सम्यक् प्रयच्छन्ती।
भाषां कामपि सूते शंसायुक्तां मनीषिभिर्मान्याम्।।५६२४।।

वर्षासु या मनोज्ञाऽह्लादैरापूरयन्तीव।
सर्वं संसारं वा मनोज्ञरूपा सदा शैली।।५६२५।।

साङ्गीतिकस्वराणां मनोज्ञमयतामये दीर्घे।
संलापाऽलापानामुच्चावचतासमारम्भे ।।५६२६।।

नृत्ये नाना नवविधभावप्राधान्ययोजनामयता।
संचारेष्वायाता शैलीयं नम्यते निखिलैः।।५६२७।।

शैली तद्वै तत्त्वं येनाऽभिन्नो विभाति मनुजोऽयम्।
आंग्ला सूक्तिः कथयति शैली स्वयमस्ति मनुजो वा।।५६२८।।

शैली स्वीकरणीया वदान्यतायाः पराकाष्ठा।
कार्पण्यानामप्यथ दूषणयुक्ता प्रवर्तते शैली।।५६२९।।

सात्त्विकराजसतामसगतभेदैर्भिद्यमानेयम् ।
शैली स्वयंवरेव प्रमदा संयाति मानवं नियता।।५६३०।।

शैली सूते सर्वं भूतं भव्यं मनोहरं मृग्यम्।
सर्वं सुषुप्तरूपे संस्थं शैली प्रबोधयति।।५६३१।।

शैल्या रूपाणि सदा कुर्वन्त्येवाऽत्र रोमाञ्चान्।
नन्वेतयैव सततं श्वासा श्वासा निभाल्यन्ते।।५६३२।।

पाश्चात्यानां शैली सौविध्यं सर्वमादिशती।
भवति नितान्तं काम्या सर्वेषां मानवानां वा।।५६३३।।

शैलीद्वयसंघर्षे कुत्र कया विजितमित्येद्।
नो निर्णेतुं शवयं सन्धौ काले स्थिता वयं यावत्।।५६३४।।

श्रीमालवीयशैली देशे काचित्समुद्दीप्ता।
प्राच्यप्रतीच्ययोगः शिक्षायां यत्र सम्मतो जातः।।५६३५।।

तामेव दिव्यदिव्यां शैलीमादाय वर्तितं सर्वैः।
सर्वत्र विश्वविद्यालयसंस्था दीपिता एताः।।५६३६।।

शिक्षाशैली सैषा सर्वां सरणिं वितानयति।
सर्वेषामप्यायतिमुच्चोच्चां संविकल्पयति।।५६३७।।

पारतन्त्र्यसंरम्भे शैलीनां या दशा जाता।
स्वातन्त्र्याऽनन्तरमिदमायातं सुप्रभातं वा।।५६३८।।

नेहरूपटेल - निर्धारितशैली सावधानतया।
देशस्य सुखविकासे शैली नव्या समाऽयाता।।५६३९।।

उपनिषदामथ काले बुद्धादीनामथाऽपि वा काले।
एतद्देशस्याऽसीद्विश्वगुरुत्वं तथैतिह्ये।।५६४०।।

अद्य तु विश्वगुरुत्वे समास आस्ते बहुव्रीहिः।
शिक्षासंग्रहकार्ये विश्वे गच्छन्ति चाऽत्रत्याः।।५६४१।।

अद्यत्वे या शैली सर्वेषां स्फोटयति कर्णौ।
आयातितशैलीयं देशे सर्वैः समीहिता जाता।।५६४२।।

खत्रीत्युपनामाऽसौ शैलीमेकां पुरस्कृत्य।
लोकप्रियोऽस्ति नितरामेकोऽयं दूरदर्शनेऽद्यत्वे।।५६४३।।

सैषा चर्चा तावद्रचना निर्मितिमयीं शैलीम्।
पुरस्कृत्य संजाता प्रथिता निखिलं पुरस्कुरुते।।५६४४।।

सङ्गीतानां शैली प्रथिता सेयं 'घरानेति।'
चित्रकलायां शैली तत्तद्देशप्रसिद्धैव।।५६४५।।

स्थापत्यानां विविधाश्चैताः शैल्यः प्रसिद्धा वा।
भवनानां निर्माणे दर्शितविभवा विभासन्ते।।५६४६।।

मन्दिरमस्जिदगिरजा-गुरुद्वारा-निर्मितौ शैल्यः।
शतशतवर्षेष्वेता विकासरूपे समायाताः।।५६४७।।

किं बहुना संसारे जीवनसंचारसंरम्भे।
शैलीनां जालावलिरपि सर्वव्यापिकैवाऽस्ते।।५६४८।।

शैलीदेव्या वशगा भवन्ति सर्वेऽपि कोऽपि नोन्मुक्तः।
सर्वेषां जीवानां जीवनभूता सदा शैली।।५६४९।।

सांख्यदर्शने तावत्प्रकृतिर्या कथ्यते विज्ञैः।
शैली सैव प्रकृतिर्माया वा सर्वसंसारे।।५६५०।।

शैली समुदयभावं गच्छति यत्रैव सा दिव्या।
भूमिस्तदा वदान्या सत्यं शिवरूपतामाप्ता।।५६५१।।

अभ्यासानां परमां काष्ठामायातिता शैली।
संस्कुरुते सत्प्रकरण-सौभाग्योल्लासिनी नित्यम्।।५६५२।।

मानोन्नतिकरणानां भूमिरियं शील-संचारा।
विनियत-सर्व-निकाया सात्त्विक-संभार-संरब्धा।।५६५३।।

पर्वतराज-सुपुत्री शैवी शैली जगन्माता।
सर्वेषां मूकानां वाचां विस्तार-माधेयात्।।५६५४।।

गर्वोन्नतिमुपयाता एते ते सन्तु धिक्कृतिभिः
दूषितसर्व-निकाया विपरीता सर्वलोकानाम्।।५६५५।।

धिक्कारमयी शैली येषां भाग्ये समालिखिता।
सर्वं प्रकुर्वतामपि तेषां नैवोदयो दृष्टः।।५६५६।।

संस्कार-सभ्यतायामासीना ये तु मूर्धन्याः।
शैली तेषां प्रियतां लोके सर्वत्र संसूते।।५६५७।।

शैली सैषा देवी माता सैषा सुकवितायाः।
सालंकारा सरसा, सगुणा शैली प्रणम्यते कविभिः।।५६५८।।

इत्थं शैली स्तुतिरियमत्यन्तं नम्रताजुष्टा।
सर्वेषां पठितानां मनः समाधीन-मादध्यात्।।५६५९।।

१७५.काशी

श्रीविश्वनाथनगरी काशीयं धन्य धन्याऽस्ते।
संसारे सर्वासां नगरीणां मौलिभूतैव।।५६६०।।

देवेभ्यो निखिलेभ्यः प्रदाय सर्वं निजैश्वर्यम्।
स्वीयाऽवासविशेषा सेयं नगरी विनिर्मितेशेन।।५६६१।।

शिवत्रिशूलोपरि वा विराजिता दिव्यनगरीयम्।
काशी सदैव विश्वे स्वर्गादप्युपरि सेव्यते सर्वैः।।५६६२।।

अत्रोपेन्द्रमहेन्द्रा देवानां कोटयः सर्वाः।
देवीनां चर्षीणां सिद्धानां संस्थितिर्जाता।।५६६३।।

ज्ञानप्रदायकत्वं मरणादूर्ध्वं च विश्वनाथस्य।
शास्त्रैरुपदिष्टं यज्ज्ञानाऽम्भोधिस्तरङ्गितोऽत्रैव।।५६६४।।

ज्ञानप्रदः स भगवान्शम्भुर्नित्यं विराजते काश्याम्।
माताऽपि साऽन्नपूर्णा शिवस्य हृदयं विराजते काश्याम्।।५६६५।।

काश्यां विलसति गङ्गा सर्वासां देवतानां वा।
शुभ्रसमूहप्रतिमा धारारूपेषु परिणता जाता।।५६६६।।

यत्र तु दृश्यादृश्या योगिजना राजमाना वा।
येषां प्रभावभावो निखिलं भुवनं विधारयति।।५६६७।।

काशीनगरी सेयं प्राणा वा निखिलविश्वस्य।
मानवसंस्कृतिरूपं विपुलं नित्यं विलोक्यतां सकलम्।।५६६८।।

निखिलः संसारोऽयं सूत्रे रूपेऽत्र दृश्यते नित्यम्।
केन्द्रीभूता काशी ब्रह्माण्डस्यैव निखिलस्य।।५६६९।।

अत्र च तत्तत्स्थाने ते ते लोकाश्च सम्बद्धाः।
ये जानन्ति वरेण्यास्तेषां सिद्धिः करस्थैव।।५६७०।।

अत्र च यानि पुराणप्रोक्तानि प्रोन्नमद्रूपे।
संस्थानानि समस्तान्यालोक्यान्येव भक्तिभावेन।।५६७१।।

काश्यां मरणान्मुक्तिः शास्त्रे शास्त्रे समाख्याता।
तेनैव चाऽत्र चरमावस्थायां स्थीयते सर्वैः।।५६७२।।

अत्र च विनायकानां वैपुल्यं भैरवाणां च।
दिग्विभागरक्षायां श्रुतिशीलत्वं विभाव्यतां विभवैः।।५६७३।।

यत्र प्रदोषकाले विश्वेश्वरमन्दिरे दिव्ये।
पूजाप्रवृत्तिवेला देवानां मेलनं कुरुते।।५६७४।।

सर्वे देवास्तावत्सदैव संघर्षणैः स्वीयैः।
अहमहमिकामनोज्ञा लोक्यन्ते वन्दनायैव।।५६७५।।

संसारेष्वपि जाता ये देवास्तेऽपि काश्यां वा।
संगत्य चात्मरूपं ज्ञातुं सन्त्येव सन्नद्धाः।।५६७६।।

वाराणस्यामस्यां निवासमासेदुषां तावत्।
जन्मसफलता दृष्टा नतमां तेषां पुनर्जन्म।।५६७७।।

काशी चर्चितविभवा वेदेष्वथ चोपनिषदां वा।
वर्णननववैपुल्ये विस्तृतरूपेषु चरितार्था।।५६७८।।

आध्यात्मिकस्वरूपे काशीयं चर्चितार्षेये।
वाङ्मयभव्ये रूपे मन्त्रमये दिव्यतासरणौ।।५६७९।।

नानापुराणनिवहे सर्वत्रेयं निरूपिता काशी।
पद्मपुराणे सोऽयं काशीखण्डो विराजते विपुलः।।५६८०।।

आरभ्य दिवोदासाद्राज्ञो वर्णनमिहाध्यातम्।
काशीश्वरदर्शनतो योऽसौ सायुज्यमुपयातः।।५६८१।।

काशिराजमालायामन्तिममणिरूपतामाप्तः ।
विश्वेश्वरावतारो विभूतिनारायणः साक्षात्।।५६८२।।

संस्कृतसच्छास्त्राणां विविधानां जन्मदात्रीयम्।
मातृचरणशुश्रूषासंलग्ना मोक्षदात्रीव।।५६८३।।

सेयं विशिष्टविभवा काशीनगरी तु धन्यतमा।
यस्यां निवासकर्ता धन्यो धन्यो न सन्देहः।।५६८४।।

नित्यवन्दिता नगरी सप्तपुरीषु प्रधानेयम्।
संसारस्य प्रकृतिः सततं क्रोडीकृता काश्याम्।।५६८५।।

काश्याः सेयं भूमिर्निखिलब्रह्माण्डमानचित्रमयी।
ब्रह्माण्डे किं कुत्रेत्येतत्सर्वं विचार्यतेऽत्रैव।।५६८६।।

ज्ञानानां निखिलानामत्रैवाऽस्तेऽथ सम्भूतिः।
नाना ज्ञानाऽधारा धारा प्रसरन्ति चाऽत्रैव।।५६८७।।

धार्मिकसम्राङ् यतिवरकरपात्रस्वामिवर्योऽयम्।
काशीपुरीं तु शतशो रूपैः संवर्णयामास।।५६८८।।

कविराड् गोपीनाथः काशीं संवर्णयामास।
आध्यात्मिकचर्चानामाऽस्ते तत्रैव साम्राज्यम्।।५६८९।।

अनुभवपरिणतिरूपा काशीयं सर्वतोभावैः।
अनुभवरूपापि सदा काशीयं नूनमाध्यता।।५६९०।।

श्रीतैलंगस्वामी श्रीलाहिड़िवर्य एव वा नित्यम्।
स्वामिविशुद्धानन्दः कीनारामोऽत्र दिव्यातासरणौ।।५६९१।।

आनन्दमयी माता गोपीनाथस्तु कविराजः।
काशीं सेवितवन्तः पूर्णैः पुरुषोत्तमैर्यत्नैः।।५६९२।।

गोस्वामिप्रवरेण तु श्रीतुलसीदासवर्येण।
रामचरितमानमिदमालिखितं सर्वथा काश्याम्।।५६९३।।

विश्वासमयी काशी सेवितसंसारसर्वस्वा।
काशीयं धन्यतमा सप्तसु लोकेषु माननीया वा।।५६९४।।

अत्र तु दुर्गतभावे संस्थितिरपि सर्वसौभाग्यम्।
अन्यत्रत्यं नयते दुःस्थितिरूपेषु सर्वेषु।।५६९५।।

ते ते मनुजाः सर्वे ये संसारे स्थिताः सन्तः।
काश्यामागमनेन स्वां स्वां सेवां समीहन्ते।।५६९६।।

महामहोपाध्यायैः श्रीगिरिधरशर्मभिश्चतुर्वेदैः।
अस्मातपितृवरेण्यैरप्यन्ते सेविता काशी।।५६९७।।

तेषोमेवाऽदेशान्मयकाऽपीयं निषेविता काशी।
सर्वविधं यत्सौख्यं तल्लब्धं काशिसंदत्तम्।।५६९८।।

सर्वासां विद्यानां सौभाग्याऽवेदिता सेयम्।
मण्डितनिखिलाऽभोगा विश्वेषां राजधानीव।।५६९९।।

अत्र तु सर्वं दृष्टं श्रीमन्तो मालवीया ये।
ब्रह्मर्षितामवाप्तास्तेषां चरणौ हि वन्दितौ मयका।।५७००।।

काशी च मालवीयाः पर्ययत्वेन संसिद्धौ।
संसारे सर्वाग्र्यो विद्यालय एष निर्मितो यैर्वा।।५७०१।।

हिन्दूविश्वविद्यालयनाम्ना सर्वसंसारे।
योऽयं प्रसिद्धिमाप्तो महामनः कीर्तिरेषैव।।५७०२।।

काशीपुरी प्रणम्या ध्येयेयं सर्वभावेन।
सेयं भाग्यविधात्री सर्वस्याऽपि प्रपंचस्य।।५७०३।।

परमाऽऽराध्या काशी श्रीविश्वेश्वरसमर्थिता नित्यम्।
संसारस्य च निखिलस्येयं सर्वस्वभूतैव।।५७०४।।

काशीपुरी विधात्री भाग्यानां सर्वसंसारे।
अत्र लिखितभाग्यानां परिणतिरेवाऽत्र जायते निखिले।।५७०५।।

सर्वसमीहितसारा काशीयं पुण्यमयनगरी।
सौभाग्यानां गङ्गा यत्र प्रवहति सदैव वेगवती।।५७०६।।

काशीश्वरी भगवती माता सर्वत्र साऽन्नपूर्णैव।
सततं प्रणम्यविभवा सेव्येयं सर्वतोभावैः।।५७०७।।

सैव भगवती माता दिव्याऽन्नैः पूरणं कुर्यात्।
यत्फलभूतं तत्वं मोक्षत्वेन प्रकथ्यते शास्त्रैः।।५७०८।।

तत्राऽद्यापि समन्तात्क्रोडीकृतमेव सर्वदा देव्या।
दिव्यं निजस्वरूपं संप्राप्यैव प्रमुक्तोऽहम्।।५७०९।।

ज्योतिर्मयविश्वेश्वरमूर्तिरियं भासते पुरतः।
स्वीये दर्शनदाने या सर्वां सिद्धिमाधाति।।५७१०।।

अविरलनवसौभाग्यं विवर्धययन्भैरवो भाति।
पुण्यानां पापानां शोधनकर्ता सदैव सत्कायः।।५७११।।

श्रीढुण्ढिराजभगवान्वाराणस्यां विराजते विपुलः।
सर्वेषां विघ्नानां क्षणमात्रेणैव दारणे दक्षः।।५७१२।।

साक्षिविनायकभगवद्विशालमूर्तिर्विलोक्यते काश्याम्।
सर्वेषां कामानां पूरयिता न यो सन्देहः।।५७१३।।

जगतां कल्याणानां नित्यं सम्पादयित्रीयम्।
धनधान्यैः परिपूर्णा सदाऽन्नपूर्णा प्रणम्यते काश्याम्।।५७१४।।

केदारेश्वरभगवान् गङ्गातटसीम्नि राजते काश्याम्।
रिङ्गत्तरङ्गमालासेवितचरणारविन्दोऽयम् ।।५७१५।।

चिन्तामणिर्गणपतिर्विराजमानो विलोक्यते देवः।
संकष्टमोचनोऽयं भगवान्हनुमान्प्रणम्यते सर्वैः।।५७१६।।

दुर्गतिहरिणी दुर्गा माता सर्वान्विलोकयते।
सेनापतिर्हनूमान्जयति नितान्तं ज्वलज्योतिः।।५७१७।।

नानानव्यसुमन्दिरशतशतभावैः सुविस्तीर्णा।
परितः प्रदीतिताङ्गी ह्यद्यत्वे भुवनमोहिनी काशी।।५७१८।।

नानादिगन्तविश्रुतसौजन्यैः सत्परामर्शैः।
आरचिताङ्गी सततं विद्योतैर्दीपिता काशी।।५७१९।।

दिव्यातिदिव्यभावोद्भावनवैभवतरङ्गिता सततम्।
सेवानम्रैः सेव्याऽद्यत्वे सैषा सुविस्तीर्णा।।५७२०।।

श्रीगङ्गाधरलक्ष्मणश्रीरामैस्तात्यशास्त्रैर्या ।
सीतारामवरेण्यै राजेश्वशास्त्रिसेविता काशी।।५७२१।।

अस्मद्गुरुप्रवीरेर्वन्द्यैः श्रीमद्वटुकनाथैः ।
पूज्यैर्वा रतिनाथैः पूरितविभवा प्रदृश्यते काशी।।५७२२।।

अद्यत्वे कविवीराः काश्यां ये ये विराजन्ते।
तेषां वाक्यकदम्बैः सततं नीराजिता काशी।।५७२३।।

हिन्दीभाषाकविभिर्दीपितसौभाग्यमाधुर्या ।
प्रारम्भादद्यावधि वर्धितविभवा प्रदृश्यते काशी।।५७२४।।

भारतेन्दुना देवकिनन्दनखत्रीमहाशयेनेयम्।
श्रीरामचन्द्रशुक्लैः सेवितसारस्वता काशी।।५७२५।।

आद्येयं सर्वासां विद्यानां राजधानी वा।
श्रीविश्वेश्वरमन्दिरनर्तननीराजिता काशी।।५७२६।।

नित्योत्सवैः प्रपूर्णा नानादिग्देशवन्दितविभावा।
सत्यं त्रिलोकविभवैरान्दोलितवैभवा काशी।।५७२७।।

नवरात्रे विजयोत्सवदृश्यावलिमोहिनी नगरी।
भरतमिलापप्रगुणितभावाऽधारा स्वयं काशी।।५७२८।।

वैदेशिकैरपि मुहुर्मुहुरासेवितसुदृश्यमयी।
गङ्गातरङ्गमालावैभवभरिता स्वयं काशी।।५७२९।।

प्रातः काले शीते मध्यान्हे ग्रीष्मकालेषु।
सायाहनि रात्रौ वा नियतं विद्योतते काशी।।५७३०।।

एतैरेतैः सर्वैर्नानासंसारसंचरणशीलैः।
विश्रामस्थलतायामाधारा धीयते काशी।।५७३१।।

मानोन्नता च सेयं मानविधात्री वरेण्यानाम्।
मानोपमानतायां मानायितरूपिता काशी।।५७३२।।

काशीस्थोऽयं जल्पति यत्किञ्चित्तत्प्रमाणभूतत्वात्।
सर्वैरादरणीयत्वं वा गच्छति सदा काशी।।५७३३।।

काशीयं माता मे पिताऽपि काशी वरेण्येयम्।
काशी सर्वस्वानामपि सर्वस्वा विलोक्यते नित्यम्।।५७३४।।

नव्यान्नव्यतरेयं पुरातनादतिपुरातना काशी।
मन्त्राणां तन्त्राणां सर्वस्वं काशिविस्तारे।।५७३५।।

काश्यां सैव मनोज्ञा सरणिः काचिद्विलोक्यते सरला।
यस्यां मज्जनभजने परमानन्दस्य लब्धिःस्यात्।।५७३६।।

नानासभासमितयो विचारधाराः समाश्वस्ताः।
रचनासंसाराणामधीश्वरी चाऽद्य विद्यते काशी।।५७३७।।

कमनीयाः कृतयोऽमी काश्यामेवाऽरचितकायाः।
यासां प्रकाशभाषा प्रकाममाचम्यते विज्ञैः।।५७३८।।

काश्यां शिवस्वरूपाण्यनन्ततायां विभासन्ते।
सर्वा प्रणाममाला चरणेऽर्पितसारसर्वस्वा।।५७३९।।

हे देवि, काशि, मातस्त्वं मामाश्वासनं देहि।
यत्वं मामिह तूर्णं सन्तारयितुं समुद्यता भवसि।।५७४०।।

हे काशि नगरि भूमाववतीर्णा त्वं समीहितात्स्वर्गात्।
लोकान्संन्तारयितुं संसारात्पारमानेतुम्।।५७४१।।

यानेतान्वा कृपयाऽऽवासं प्रददासि हे मातः।
ते जगतीतलसुलभं स्वर्गं सेवितुमिहाऽज्ञप्ताः।।५७४२।।

प्रेममयि त्वं काशि, प्रेमाणं सम्प्रकटयन्ती।
नानारूपविभावैः प्रेरितनानास्वरूपाऽसि।।५७४३।।

मातः काशि, त्वं मयि तां सरणिं शीघ्रमादिश हे।
येन त्वदीयसेवासंसारे संप्रवेशः स्यात्।।५७४४।।

मातः काशि शरण्ये मयि तां वर्षय कृपाधाराम्।
यया समाप्लुतचेताः प्रविस्मरेयं निखिलविश्वम्।।५७४५।।

हे काशि, मां प्रदेहि प्रभूतरूपां सुसम्पत्तिम्।
ययाऽहमात्मीयान्वा प्रपूर्णरूपन्प्रकुर्यासम्।।५७४६।।

काशी सदैव देयात्सर्वानपि सौख्यनवधाराम्।
सर्वे यत्र सुखान्वितकायाः सैवाऽत्र विद्यते काशी।।५७४७।।

या काशते तु काशी सैव व्युत्पत्तिरीदृशी सेयम्।
सर्वं प्रकाशमानं तत्वं तत्रैव निक्षिपति।।५७४८।।

नेयं केवलमेका नगरीमात्रं विनिर्ध्येया।
शिवसान्निध्यमवाप्ता सच्चिच्चानन्दरूपिणी काशी।।५७४९।।

अस्या एवाऽस्तित्वे संसारेषु स्थितिः सुदृढ़ा।
ज्ञानस्वरूपिणीयं निखिलानन्दान्विलासयति।।५७५०।।

श्रीमन्महामहिमता संयुक्तानान्तु मालवीयानाम्।
प्रेरकभूता काशी संसारे माननीयाऽभूत्।।५७५१।।

भारतस्वतन्त्रतायाः संग्रामेषु प्रवृत्तेषु।
स्फीतैः स्फारै रूपैः काशी विस्फोटिका जाता।।५७५२।।

तिलको गान्धिर्नेहरूः सुभाषआजत्पटेलाद्याः।
प्रावीण्यशिक्षणार्थं काश्यां श्रीमालवीयमुपजग्मुः।।५७५३।।

आंग्लैरपि विद्यानां शिक्षा संवर्धनायैव।
सुविशालो विद्यालय एकश्चात्रैव संरचितः।।५७५४।।

दृक्संपुटैर्निपेयः सत्यं सम्पूर्ण आनन्दः।
काश्यामस्यां नित्यं सशरीरो दीप्तिमायातः।।५७५५।।

तन्नाम्नैवाद्यते विश्वकविद्यालयः सोऽयम्।
संस्कृतविद्योन्नतये कृताऽभिषेको विभासते काश्याम्।।५७५६।।

बिड़लागोयनकाद्यैर्धनाढ्यभावे प्रतिष्ठितैः पुरुषैः।
संस्कृतविद्याशिक्षणशालाः संस्थापिताः काश्याम्।।५७५७।।

साङ्गवेदविद्यालय एकोऽयं राजते दीप्तः।
श्रीराजेश्वराशास्त्रिभिरावेदितशास्त्रमर्मस्थः ।।५७५८।।

स्वामिचरणकरपात्रप्रवरैराब्ध एवाऽयम्।
धर्मसङ्घविद्यालयनामा विभ्राजते काश्याम्।।५७५९।।

श्रीमण्डलेश्वरैपि संस्कृतविद्यालयः काश्याम्।
संन्यासिसंस्कृतमहाविद्यालय एष भादीप्तः।।५७६०।।

शतशो विद्याशालाः प्रवर्तमानाः प्रदृश्यन्ते।
प्रत्येकं गृहमत्र तु विश्वो विद्यालयः काश्याम्।।५७६१।।

आंग्लानां शास्त्राणां प्रशिक्षणायाऽपि विद्वांसः।
संसारे विख्याताः काश्यां ते ते विराजन्ते।।५७६२।।

अत्रत्या ये छात्रास्ते वै राष्ट्रे प्रतिष्ठिताः सन्तः।
सर्वोच्चेषु पदेषु प्रकाशदानाय सन्नद्धाः।।५७६३।।

सर्वसमीहितसारा काशीयं विश्वनाथसंभूतिः।
संसेवितपादाब्जा सर्वं भक्ते समीहितं कुरुते।।५७६४।।

चतुर्दशद्वीपः

१७६.अवतारोत्तारौ

उच्चस्थानान्नीचैर्गतिर्यथा भाषिताऽवतार इति।
नीचस्थानादुच्चैर्गमनं चोत्तारूपं स्यात्।।५७६५।।

अवतारेत्यक्षरगतमाला सैषा तु सुप्रसिद्धैव।
उत्तारस्य स्थाने चोत्तीर्णेति प्रयोगबाहुल्यम्।।५७६६।।

गङ्गाया अवतरणं सर्वत्रैवास्ति संसिद्धम्।
वामननरसिंहानां रामकृष्णादिकानां च।।५७६७।।

परमेश्वरस्वरूपादवताराः एव संजाताः।
किन्तूत्तरणानन्तरमेते ह्यवतारतां याताः।।५७६८।।

एतैर्नैकेऽत्रैव तु भवसागरतः समुत्तीर्णा।
अत एव तेऽवतारा सर्वैः संभाषिता जाताः।।५७६९।।

एतत्सर्वं तावदुत्तारणकार्यमथ यदा दृष्टम्।
ऋषिभिर्मुनिभिर्लौकैस्तदैव कथितावतारास्ते।।५७७०।।

उत्तारणकार्याणामनन्तरं तेऽवताररूपेषु।
सत्यं नित्यं नवनवतायां वा प्रत्यभिज्ञाताः।।५७७१।।

संसारेऽपि तु तावदलौकिकं कर्म साधनाभ्यासाः।
येषां प्रकृतौ यातास्ते सर्वेऽप्यथ तथोतीर्णाः।।५७७२।।

उत्तीर्णत्वे रूपे संसारे ख्यापिते जाते।
अवतारत्वं तेषां केषां चिद् बुद्धिगामि संजातम्।।५७७३।।

भारतवर्षे काचित् नित्यैवास्तिकमयी धारा।
एकमेव परमेश्वररूपं मूलं निधाय संयाता।।५७७४।।

अवतारगाथयेत्थं सर्वा पुष्टिस्तथास्यैव।
वैचारिकसंरम्भस्य तु संजाताभूरिभाषाभिः।।५७७५।।

गीतायामथ चैतद्यद्यद्विभूत्यादिपद्यसन्दर्भे।
आमूलचूलभाषाव्याख्यातं वैदिकं तत्त्वम्।।५७७६।।

श्रीकृष्णस्तु स भगवान् षोडशकलया विभूषितः परमः।
अवताराणां प्रथिताऽवदातरूपैः परामृष्टः।।५७७७।।

अवताराणां गाथाध्ययनं कृत्वा तथा श्रुत्वा।
भूमौ मानवजीवनधन्यत्वं नूनमायातम्।।५७७८।।

शास्त्राणीमानि पुनः प्रथमानानि प्रकथयन्ति।
अवतारोत्तरणं गाथश्चित्राश्च दिव्याश्च।।५७७९।।

लक्षकोटिसंख्यायां ऋषयो मुनयस्तपस्विनोऽध्यथवा।
राजानो नेतारोऽवताररूपैः परामृष्टाः।।५७८०।।

१७७.भवभूतिः

महाकविर्भवभूतिरुत्तरे रामचरिते तु।
श्रीरामचन्द्रमुखतः सुमानुषस्यार्थनां तनुते।।५७८१।।

सुकविरेष भवभूतिर्विचार-संसारमाचरन्निखिलम्।
संप्रेषयति नितान्तं-भास्वद्रूपे मनोराज्ये।।५७८२।।

स्वीयमेव यन्नित्यं-संसक्तं स्वं हि व्यक्तित्वम्।
स्वयं न द्रष्टुं शक्यं-भवभूतिस्तत्प्रदर्शयति।।५७८३।।

स्वीयं मुखं च नेत्रं स्वयं न संशक्यते द्रष्टुम्।
निर्मलकाचच्छविमयप्रतिरूपं दृश्यते नूनम्।।५७८४।।

आदर्श एव ताव-न्मानसरूपप्रकाशने सुकविः।
काये न मनोरूपं द्रष्टुं केनापि शक्यं स्यात्।।५७८५।।

अनिर्वाच्यकविवाणी-निर्मलदिग्दर्शकाऽदर्शे ।
स्वीयं मनो मदीयं स्वयमेवात्मानमामृशति।।५७८६।।

जीवननव-संचारे-पदे पदे बाह्यविस्रम्भे।
मानसगतनवतरसच्चर्चाऽन्तःस्थं विलासयति।।५७८७।।

को हि नाम संसारे संस्थितिमान् पुरुषशार्दूलः।
यः श्रीरामसमक्षं निजक्षणं सक्षणं कुर्यात्।।५७८८।।

रामस्य दासतामपि संप्राप्तुं ते हि निर्जरा निखिलाः।
अहमहमिकया तावत् प्रयतन्ते भूरिसौभाग्यैः।।५७८९।।

श्रीरामचरितचर्चा रहस्यभूतं परं प्रेम।
सीता-रूपं निखिलं तद्रूपे संनिविष्टमध्यास्ते।।५७९०।।

श्रीरामनामपूतान्तकरणं वा समीहितं कर्तुम्।
सीताराम-सुनाम्ना-संकीर्तनमादिशन्ति गुरवोऽमी।।५७९१।।

रामस्य यद् रहस्यं सा सीता तेन तस्या वा।
पूर्वं नामग्रहणे शाश्वतता मानसे याति।।५७९२।।

नित्योत्सवप्रसारणभावानां या महाराज्ये।
रासे वा निखिलतरे प्रियैव पत्नी समाह्वयति।५७९३।।

सुमानुषं वा चैतत्कियतीं कियतीं मनोभूमिम्।
श्रवणक्षणप्रसारे सर्वां कुण्ठां विदूरयति।।५७९४।।

कुण्ठैवाऽस्ति नितान्तं रहस्यतो दूरितं कर्तुम्।
व्यक्तित्वं सन्तनुते संकोचान्वा विकासयति।।५७९५।।

अकुण्ठितं तु रहस्यं सर्वस्यापि स्वभावपरिपुष्टम्।
निखिलं जीवनमसमं रसधारायां निमज्जयति।।५७९६।।

क्षणे क्षणे सार्थकता यदा सदैवोपलब्धिरियम्।
ते प्रत्यहं नवीनोन्मादास्तान्येव मधुराणि।।५७९७।।

व्यवहारास्तु नितान्तं विक्षुब्धं जीवनं तटे नेतुम्।
क्षणे क्षणे प्रयतन्ते हे मानस, त्वं पलायनं मा कुरु।।५७९८।।

अत्र समर्पणशीलस्त्वं भूयास्सत्यसाहित्यैः।
ओतप्रोतं कुर्वन् आत्मीयां सुस्थितिं तन्वन्।।५७९९।।

भवभूतिरेष सुकविः करुणसुरचनां वितन्वानः।
पाठकदर्शकमनसां मन्थनमेवादिशति निखिलम्।।५८००।।

सिद्धसुकविसत्कवितावाणी सारस्वतं तेजः।
सञ्चालयति सहृदयं हृदयं सच्चिन्मनोराज्ये।।५८०१।।

महाकवेर्भवभूतेरेकैकं शब्दमास्वाद्य।
नैर्मल्यं हृद्देशे सञ्जातं चिन्मये तन्त्रे।।५८०२।।

भवभूतेः सहृदयता तत्रैवाऽनुभवचित्राणि।
श्रीरामं चात्मीयं कृत्वा शब्देऽवतीर्णानि।।५८०३।।

केवलं तु तटदेशे स्थित्वा धारां समालोक्य।
धाराशैत्यानुभवः पवित्रता वा न चायाति।।५८०४।।

धारासु मज्जनं ये पूर्णतया संविहितवन्तः।
ते एव शैत्यमयतां पवित्रतां वक्तुमीहेयुः।।५८०५।।

ईहन्ते यद् वक्तु-मीहन्तां तत्र किं छिन्नम्।
केवलमीहा सैषा-नानुभवं वक्तुमीशीत।।५८०६।।

अनुभवगाथागाने शब्दानां संचये लग्नाः
भवभूतेः सदृशा वा कवयः कथयन्ति तत्सत्यम्।।५८०७।।

तेषां ये ये शब्दा यानि च्छन्दांसि संप्रयुक्तानि।
यच्चित्रं पुरतो वा समुपस्थापितमितीति तत्सर्वम्।।५८०८।।

प्रपाणकं रसं वा सिद्धं चैतन्मनोचषके।
संधाय चैव पेयं मानुषभावस्य संपूर्त्यै।।५८०९।।

कविस्तु साक्षादीश्वररूपे सत्यं विराजमानोऽयम्।
श्रुतिस्तमीश्वररूपं कविरूपे संप्रदर्शन्त्यास्ते।।५८१०।।

विश्वस्मिन्नप्येते द्वित्राः पञ्च दश वा महाकवयः।
येषां सिद्धा वाणी-मन्त्रेभ्योऽपीडिता भाति।।५८११।।

किं कर्म वा त्वकर्म तु किं वाऽत्रत्या विमोहिता कवयः।
भगवान् श्रीकृष्णोऽपि तु कवि शब्दं सादरं वक्ति।।५८१२।।

स्वयमपि कविरूपोऽयं भगवानस्यैव वाणीयम्।
गीता काचिद्दिव्या दिव्यं लोकं विलासत्येव।।५८१३।।

श्रीकृष्णचन्द्रवाणी लहरी पीयूषसिन्धोर्वा।
निखिलं किल संसारं प्रकाशरेखाभिराप्लुतं कुरुते।।५८१४।।

यद्यपि महन्महाभारतसद्ग्रन्थस्थिता गीता।
किन्त्वितिहासपुराणे शैलीतोऽप्यूर्ध्वगा जाता।।५८१५।।

गीतेति नाम तस्याःसच्चिच्चानन्द-विस्तारान्।
सन्दिशति नित्यनूतनसंसारानात्मसात्कर्तुम्।।५८१६।।

इदमेव वा कवित्वं कृष्णे रूपे यदायातम्।
नाना ह्यनन्तविभवानुभावसंचारिभिर्जुष्टम्।।५८१७।।

कवितायास्तद् वन्दितसाम्राज्यं भाति गीतायाम्।
नो चेच्छुष्कं कथनं कं वादेशं विभूषितं कुर्यात्।।५८१८।।

भवभूति काव्य-सरणौ यद्वा कथितं सुमानुषं तत्त्वम्।
तत्संसारवरेण्यं भर्गोदेवस्य संचितं रूपम्।।५८१९।।

दाम्पत्यमिदं नित्यं जीवनसफलत्वसंचयने।
मार्गमादिशन्नाऽस्ते गर्ते पतन्नान्निवारयन्नास्ते।।५८२०।।

मानुषरूपे नित्यं कोटिमिताः सन्ति विचरन्तः।
किन्तु सुमानुषरूपेऽङ्गुलिगणनीयाः प्रगल्भन्ते।।५८२१।।

रावणरूपास्ते ते सुमानुषं हर्तुमभ्यस्ताः।
तान्विद्राव्य सुबाणैः कर्तव्या सा सुमानुषी यात्रा।।५८२२।।

निन्दित-गाथा-स्पर्शो न स्यादीशत् सुमानुषे रूपे।
आत्मानमपि तदर्थं व्याहतवान् रामचन्द्रोऽसौ।।५८२३।।

वज्रादपि निष्ठुरता मृदुताकुसुमादपि श्लाध्या।
को विज्ञातुं गच्छेल्लोकोत्तरतेजसां पारम्।।५८२४।।

गोस्वामितुलसीदासोऽहिवातशब्देन यत्स्तौति।
भवभूतिस्तु तदर्थं सुमानुषं शब्दमाहरति।।५८२५।।

सीतां तां वनदेवीं वने पुनः प्रेषितां कृत्वा।
श्रीरामो निजजीवनभाषामात्रं विबोधयन्नासीत्।।५८२६।।

अश्वमेधसंरम्भे स्वर्णमयीं जानकीमूर्ति-
मानीय-वामभागे साधितवान् यज्ञियं कृत्यम्।।५८२७।।

भवभूति-वाग्विलासे-नाना-विधवृत्तचित्राणि ।
चित्रवीथिविवरणमपि भावमयं तद् विभासते दिव्यम्।।५८२८।।

भवभूतिभावभूमिं सहृदयहृदया विजानन्तः।
नाना शास्त्ररहस्यं सद्यो निखिलं विधारयन्तितराम्।।५८२९।।

पर्वतीयवनभूमिं विभूषन्तीव वाङ्माला।
अत्याश्चर्यनिमग्नान् विदुषः सर्वांश्चिराय सन्तनुते।।५८३०।।

श्रीरामचन्द्रचरितं लवकुशचरितं तथा वन्द्यम्।
सीतादेव्याश्चरितं शब्दैः कथयन् विभासितः सुकविः।।५८३१।।

भवभूतिरित्युपाधिं संधार्य श्रीकण्ठनामाऽसौ।
महाकविः सकलेष्वपि कवितारसिकेषु वन्दनीयतमः।।५८३२।।

१७८.धर्मपरिपाटी

रहसि सुलभकमनीया माला हृदये कृता सेयम्।
सन्दर्शनेन सुधियां मानसमुल्लासयितुमलम्।।५८३३।।

स्मृतिरससाराऽऽकाराऽभयभावानां तरङ्गिणी रङ्गे।
निभृत-निगूढ-विवेचन-दूरीकरणाय सम्मुखे जाता।।५८३४।।

मानसमान्दोलयितुं संशयनिःश्वासमात्च्छेत्तुम्।
धारा संस्थानानां समुल्लसन्ती समायाति।।५८३५।।

शशिकलशैरभिषेको नीराजनपदपठितयोगः।
कायिकवाचिकसौभगशालित्वं, सर्वमादिशति।।५८३६।।

नवनवसुषमासौरभसाम्राज्यानां प्रभावपरिपाटी।
तव संमुखेऽति दीना करौ प्रसार्याथ याचनां कुरुते।।५८३७।।

आसीनोऽपि समन्तादुच्छलितोऽपि प्रियां मैत्रीम्।
सम्प्राप्तोऽपि निमज्जति जातुचिदेषा गतिः समाधेया।।५८३८।।

तव भूषणभाराणां सुषमा-साम्राज्य-संयोगः।
विगुणो गुणसंमोहः कारामेकां पुरस्कुरुते।।५८३९।।

आराधितचित्तानामेका साप्यस्ति परिपाटी।
यत्र ध्यानपराङ्मुखसेवैका गोचरीभवति।।५८४०।।

मान्यानामपि मान्याः प्रादुर्भावे तिरोभावे।
संतत-धिक्कृतजाला मायामेकां समीचक्रुः।।५८४१।।

असमा साहससुषमा मैत्री मात्रान्विताऽभीष्टा।
करुणमुदितरूपाऽपि च सहयोगं नो परामृशति।।५८४२।।

कलकलनादसमाहितपवनोद्वेगः परामृशति।
कविताकलां कलयितुं योजयितुं वाऽक्षतां पंक्तिम्।।५८४३।।

मानोन्मादसमीपे लोचनलोकेषु विख्यातिम्।
गतया तयाऽनया वा कूपेषूत्क्षेपिता भङ्गा।।५८४४।।

विपरीताऽभिनिवेशे सोत्साहाः स्युस्तथापि नेतारः।
नतरां योगाऽयोगे फलोन्मुखीभावमायान्ति।।५८४५।।

अस्तङ्गमिते सारे भावानामप्यभावसंभारे।
नवनिर्मिति-संसारे धिक्काराणां सदैव संचारः।।५८४६।।

अतिमात्रलोहितानां नयनानां सप्तरंगसंयोगः।
मदघटरिक्तपिपासा प्राचुर्येषूच्छलन्त्याऽस्ते।।५८४७।।

पश्यामो द्रक्ष्यामः द्रक्ष्यामो रे वयं हि पश्यामः।
समितिरियं संगठिता प्रतिवेदनमत्र द्रक्ष्यामः।।५८४८।।

काया माया छाया जायाया रम्यरम्येयम्।
परिणतिवेला खेला नहि संचारं समीरयति।।५८४९।।

आलोचयन्तु तावत्तत्र भवन्तो भवन्तोऽपि।
वयमपि तत्रोच्छलने भवतामग्रे स्थिता एव।।५८५०।।

यदि भवतां वाञ्छायाः संकेतः स्यान् निकाममल्पोऽपि।
किञ्चित्कर्तुं कलनां संचालयितुं प्रगल्भताऽऽयाति।।५८५१।।

संचारिणी मनोज्ञा कलयाऽऽकलिता कदापि किल काम्या।
काचित्सेयं मत्ता विपोथयति सर्वमाकलनम्।।५८५२।।

नतमां वा विशकलिता दृश्यावलिरेकतासारा।
नाराधितभूभाराऽऽधारा सत्यं तरंगिता जाता।।५८५३।।

आसादितसम्बन्धास्ते ते भावाः समासाद्याः।
येषामभीष्टदोहननिपुणत्वं साधितं बहुधा।।५८५४।।

किं किं कृष्णः कथयति गीतायां सर्वसारसाम्राज्ये।
प्रत्यक्षरं तदेत्सत्यं संसारसारोऽयम्।।५८५५।।

जीवनविहरणशीलैः कदाचिदपि यत्र नोपेक्षा।
संधार्या तावदियं समप्रकृष्टास्ति परिपाटी।।५८५६।।

सत्योद्योगविधूननसंसारे कामसंचारे।
कामानां संवादे संसिद्धः कामसंवेगः।।५८५७।।

पुरातना अपि भव्याः शिलाशलाकाऽथ शालाद्याः।
भूगर्भेऽवस्थानस्थितिरेषां साधनीयाऽद्य।।५८५८।।

भित्वा भूमिं खननात्पुरातनं यत् समुपलब्धम्।
शतसहस्रवर्षेभ्यः प्राक्सा व्यवहारसभ्यताऽऽसीद्वा।।५८५९।।

यातानामत्युच्चैरपि नीचैरापतितभावे।
सुलभानां लोकेषु प्रतिदाता कोऽप्यसौ विद्वान्।।५८६०।।

सर्वं समीहितत्वं कालानामेव माधुर्ये।
समभीष्टं सन्दृश्यं समसामयिकी विभैव कमनीया।।५८६१।।

गीतोन्मेषे भैरविरागे नित्यं समालापाः।
प्राचुर्येण हृदन्तर्निविश्य कां किं वितन्वते रीतिम्।।५८६२।।

निशाऽति गहना पुनरपि नवविद्युति जीवने संस्था।
नव्यः पवनविवाहः ध्वनौ ध्वनौ शब्दसंचारः।।५८६३।।

लुप्तं सर्वमपीदं क्षणमात्रेणैव साक्षात्स्यात्।
जानीमः पुनरपि वा चेतोविकृतिं न जानीमः।।५८६४।।

रामायणे महाभारतसद्ग्रन्थे समुल्लसिते।
सर्वविधः संयोगो योगाऽयोगो वियोगोऽपि।।५८६५।।

गीतायामादिष्टं लोकोत्तरजीवनं दातुम्।
यत् यत् सत्यं सर्वं क्षणे क्षणे पालनीयं तत्।।५८६६।।

एतावताऽतिमहता ज्योतिर्युक्तेन सत्येन।
नो यदि दीप्तिर्जाता जीवनमेतन्निरर्थकं यातम्।।५८६७।।

कुरआनवाक्य-निवहे संसारेषु प्रकर्षमायाते।
यद्यल्लिखितं सर्वं जीवनदर्शनमिहोज्ज्वलं तेन।।५८६८।।

बाइबिले धर्मस्य प्राचुर्येण प्रभावसंभारे।
कथमिह विभाप्रवाहो दयासमुद्रस्य नाऽलोक्यः।।५८६९।।

त्रिपिटकचित्राणामथ शब्देष्वागतविचाराणाम्।
माननीयसंख्यायां विपुलोत्तमता समालोच्या।।५८७०।।

आंग्लदेश-योद्धारो व्यापारेष्वेव संगता जाताः।
मुद्रणविस्रम्भानां गङ्गा तैरेव साधिता विद्भिः।।५८७१।।

लिखितं त्वया सुचिन्तितसंचारं मुद्रिते जाते।
पठितं यस्तैरेतैर्नीतं निखिलेऽपि भूवलये।।५८७२।।

लब्धपुरस्काराणामेतेषां भूयसी संख्या।
देशस्वतन्त्रतायाः संज्ञानं संविलासयति।।५८७३।।

संसारसंकथायां पदे पदे यः स्खलनयोगः।
तेन कदा वा मुक्तिर्नो जानीमो विषीदामः।।५८७४।।

उपनिषदां सिद्धान्ताः प्रकल्पयन्त्येव वैभवं सर्वम्।
विभुता लवकुशगाथा कथिता कियती च सम्पत्तिः।।५८७५।।

गीतायामुपदिष्टं नाऽसतो विद्यते भावः।
यन्त्राणामपि भावः सदेव का विस्मृतिस्तत्र।।५८७६।।

असतः कदापि सत्ता नाङ्गीक्रियते कदाचिदियम्।
भ्रान्तान्मनुजान्कुरुते भ्रान्तिरियं सत्त्वशीला स्यात्।।५८७७।।

अद्यावकाशदाने त्वरमाणांस्तान्समालोक्य।
कार्यावलिरपि पुरतो रसस्वरूपं पुरस्कृरुते।।५८७८।।

मौक्तिकमुक्तामाला मन्त्रे माहात्म्यमायाता।
भर्तृहरेर्गुम्फानां विलासभासां प्रसादमयी।।५८७९।।

मुक्तं करोति मुक्तकमथ केनाऽसौ करोति तन्मन्ये।
यादृच्छिक-प्रकरणैरेवैषामुक्तिरास्थेया ।।५८८०।।

ध्याता ध्यानं ध्येयस्त्रिपुटीयं सर्वतः सिद्धा।
तौर्यत्रिकं तदेतत्स्वरसंसारं विलासयति।।५८८१।।

के वाऽऽचार-विचाराः कुतोऽपि ते ते समाचाराः।
सन्ति स्फोटकतायां नाना संयन्त्र-संयोगाः।।५८८२।।

१७९.अभिनवदेवः

अभिनवदेवं वन्देतन्त्रालोकप्रदं सूर्यम्।
तन्त्रागमसद्ग्रन्थप्रणयनविद्यास्वरूपसन्मान्यम् ।।५८८३।।

अत्याश्चर्य-करं वा ता दृष्ट्वा सत्कृतीर्नितराम्।
उद्योतयन्ति विपुलं ज्ञानाकाशं विभासयन्त्येताः।।५८८४।।

भरतमुनेर्या रचना विख्याता नाट्यशास्त्रमयी।
तत्राऽप्यभिनवपूर्वं भारतिभाष्यं विभाति तस्यैव।।५८८५।।

आनन्दवर्धनार्यो ध्वन्यालोकं विनिर्मितवान्।
तत्रापि लोचनं सत् कृतवानेवाऽभिनवगुप्तः।।५८८६।।

संस्कृतभाषायां यत् साहित्यं शास्त्रमद्यत्वे।
परिपठितं शतकैर्वा प्रचरति विद्वत्समाम्नाये।।५८८७।।

तत्र ध्वन्यालोकग्रन्थः शीर्षस्थितः सर्वान्।
अतिशेते केन्द्रस्थां विचारसरणिं समादिशति।।५८८८।।

भरतेन नाट्यशास्त्रे रसस्वरूपस्य सद्रूपम्।
रसनिष्पत्तिनिरूपकसूत्रं प्रथमं समादिष्टम्।।५८८९।।

अभिनव-भारत्यं तद् विशकलनं यद् समारचितम्।
तत्र मतानि विभिन्नानि प्रकटानि स्वयं तेन।।५८९०।।

यदि नैवाऽलिखितं स्यादभिनवगुप्तेन सुगभीरम्।
लोल्लट-शङ्कुक-नायक-नामन्यथ को विजानीयात्।।५८९१।।

अभिनवगुप्तानन्तरमीदृशपरिवर्तनं जातम्।
कवितावनिता सरसासरला सा संमुखे भाति।।५८९२।।

येयं कवितालंकृतिभारैः खिन्नेव भाति स्म।
तस्याः खलु सेवायामायाता व्यंजनासरणिः।।५८९३।।

आनन्द-वर्धनायैर्ध्वन्यालोके यदाम्नातम्।
अभिनवगुप्तार्याणां लोचनकरणे सुविस्तृतं जातम्।।५८९४।।

आदौ भरताचर्यैर्नाट्ये शास्त्रे सुविस्तीर्णम्।
यत् विस्थापितरूपं व्याख्यातं चाभिनवगुप्तेन।।५८९५।।

संगृह्यैतत्सर्वं संक्षेपक्षेपणैर्नूनम्।
मम्मटभट्टः स्वीये काव्यग्रन्थे समर्पितवान्।।५८९६।।

काव्यप्रकाशशैली सारं सगृह्यसंकलिता।
वाग्देवतावतारं मम्मटभट्टं विशेषयाञ्चक्रे।।५८९७।।

काव्यप्रकाशवेषं सम्यक् विख्यातुमारचिताः।
शताधिकाष्टीकास्ता रम्यतरं भावमाह्वयन्त्येव।।५८९८।।

श्रीविश्वनाथनामा स्वीये साहित्य-दर्पण-ग्रन्थे।
वाक्यं रसात्मकं तत् काव्यं संघोषयमास।।५८९९।।

प्रस्थानव्यतिरेके व्यक्तिविवेके तु महिमभट्टेन।
मूलाधारं खण्डितमेवैतद्व्यंजनारूपम्।।५९००।।

अनुमानेऽन्तर्भावं ध्वनेस्तु सम्यक् प्रकाशयितुम्।
व्यक्तिविवेकविवेचनसरणिः काचित्समारब्धा।।५९०१।।

श्रीशंकुकोऽपि पूर्वं रसप्रतीतौ तदनुमानम्।
संसाधितवानासीदभिनवगुप्तस्य लेखनाज्ज्ञातम्।।५९०२।।

सर्वस्याप्यथ तस्य तु पूर्वं पक्षत्वमास्थाप्य।
मम्मटभट्टः स्वीये काव्यग्रन्थे समाहितवान्।।५९०३।।

लक्षणविदां तु केवलगमोचरोऽयं ध्वनेर्मार्गः।
रामायणादि लक्ष्येष्वेतस्यैवाऽस्ति साम्राज्यम्।।५९०४।।

अभिनवगुप्ताचार्यैरानन्दस्य प्रतिष्ठायाम्।
तत्सर्वं संकथितं रहस्यभूतं यदत्राऽसीत्।।५९०५।।

विद्वन्मन्यास्ते ते कथयन्तस्तं तु साहित्ये।
टीकामात्रकलेवरकर्तारं चाभिनवगुप्तम्।।५९०६।।

मम्मटोऽतोऽप्यत्यधिकं स्वीयं पाण्डित्य-मास्वाद्य।
यत्किंचिज्जल्पन्तो नग्नन्त्वं ख्यापयन्ति तमाम्।।५९०७।।

आत्माहुतिप्रदानोद्घोषणकर्माभिधां नीत्वा।
मिथ्यादंभध्वान्तैर्मोहयितुं वाऽरभन्त्येते।।५९०८।।

एषैव कथा ध्येया तस्यापि च नाट्यशास्त्रस्य।
अभिनव-भारत्या वा विरहे सर्वं रहस्यं स्यात्।।५९०९।।

आगमशास्त्रे च तथा स्वसंविदः प्रत्यभिज्ञायाम्।
अभिनव-गुप्ताचार्यैर्द्वाराण्युद्घाटितानि निखिलानि।।५९१०।।

तन्त्रालोकसमुद्रे सर्वा संविन्मयी सरणिः।
सम्पूर्णं निजरूपं प्रकाशयन्ती चिराद् दृष्टा।।५९११।।

नवतरयुगेऽस्मदीये दीप्तिमती नूतना धारा।
शोधस्वरूपमिलिता सर्वत्रोल्लासिता जाता।।५९१२।।

अभिनवगुप्ताचार्यं केन्द्रीकृत्याथ शोधधारेयम्।
विद्वद्वरेण्यनिवहानाह्वयते तन्त्रसंसारे।।५९१३।।

भारतीयवाङ्मयगतनिखिलपुरातनविभूतिचित्राणाम्।
चित्रावली नवीना शोधविशुद्धा लसति नित्यम्।।५९१४।।

नैकशतीभ्यः पूर्वं ये संजाता निकाम-निष्णाताः।
यैर्यद् यद् वै लिखितं तेनामरताऽस्ति निखिलदेशस्य।।५९१५।।

अद्य पुनः किल तेषां पुरातनानां हि विषयाणाम्।
नवे प्रकारविचारे प्रासङ्गिकभाव आयाति।।५९१६।।

तत्र प्रभूतलेखनमयविज्ञानप्रभावेण।
कापि समाजविरचना यैराचार्यैः समारब्धा।।५९१७।।

अभिनवगुप्ताचार्यो मध्यमणिस्तत्र मालायाम्।
सर्वस्मिन्नपि देशे यत् सन्दर्भे प्रजायते शोधः।।५९१८।।

आगमशास्त्रविभागास्तद्विज्ञानप्रपठनार्थम् ।
प्रासङ्गिकतासम्पत् प्रतिपत्त्यर्थं नितान्तसंलग्नाः।।५९१९।।

तन्त्रालोकग्रन्थस्याद्यास्त्यनुवादभूयिष्ठा ।
वैभवमयी विरचना प्रकाशनेषु प्रसरिताऽलोक्या।।५९२०।।

काश्मीरेषु च काश्यां देहल्यामुज्जयिन्यां च।
जयपुर-पूना-नगरे-संगोष्ठ्यस्तावदाहूताः ।।५९२१।।

अभिनवगुप्तचार्यावदानचर्चागभीरासु ।
सूक्ष्मतरं संसूचनवैभवमत्र प्रकाशमायाति।।५९२२।।

तन्त्रविशेषविचारे केचित् सङ्गीतशास्त्राणाम्।
आगमनवधारासु च विचारसरणिं विचिन्वन्ति।।५९२३।।

मन्त्रयन्त्रसन्दीपनसाध्यानां साधनापक्षम्।
अभिनवगुप्ताचार्यप्रकारमाचामयन्ति ते केचित्।।५९२४।।

जन्मादिकालकलने भौगोलिकभाग्यभागस्य।
रचनाविलासभूमिं संचिन्वन्तो विभासन्ते।।५९२५।।

सर्वेषामप्येषां समवायः शोधपत्राणाम्।
सुन्दरतरविन्यासैर्विमुद्रितो वा प्रसारमायातः।।५९२६।।

काव्यविवेचनविषये रसस्वरूपस्य सर्वमान्यं तत्।
सौन्दर्यं ख्यापयितुं गुप्तोप्येवं प्रकाशितो जातः।।५९२७।।

काव्यं दृश्यं श्रव्यं गद्यं पद्यं क्वचित् किञ्चित्।
महीयसीमप्येकां संस्मृतिमात्रां प्रबोधयति।।५९२८।।

सा प्रत्यभिज्ञरूपा नियता वा प्रत्यभिज्ञैव।
लोचनटीकाऽरम्भे श्लोके सर्वाऽपि संकथिता।।५९२९।।

अभिनवगुप्ताचार्यस्मरणं सादरमथाम्नाय।
आत्मीयं बहुमानमुपार्जितं तावदाचार्यैः।।५९३०।।

१८०.सङ्गोपनम्

गोपनतत्वमतीव प्रसारमाप्तं तु चेतनाराज्ये।
संचेतना-स्वरूपं सर्वं श्रीकृष्ण एवाऽस्ते।।५९३१।।

गोपनमायां नीत्वा प्रादुर्भूतः स्वयं भगवान्।
पितरौ केवलमेकं तं भगवन्तं विजानीतः।।५९३२।।

केनापि तु न ज्ञातं भगवानेवाऽवतीर्णोऽयम्।
श्रीकृष्णरूपधारी परिवर्तितसर्वसंकायः।।५९३३।।

सेयं गोपनलीला नवीनलीलां समास्थाय।
संकरणीयैवासीद् गोपकुले स्थेयमेवाऽस्मीत्।।५९३४।।

यद् यद् कृतमथतत्त्वं तदनन्तरं तत्प्रकथनं स्यात्।
पूर्वं तस्मिन्काले नो विज्ञातं तु केनापि।।५९३५।।

तस्यैवाभयरूपं वेदव्यासो यदा भणति।
श्रीमद्भागवतादौ तदैव सर्वे विजानन्ति।।५९३६।।

अद्य तु सर्वे सर्वं जानन्त्येव प्रकथयन्तः।
नाना कथासु दिव्याऽचरितेष्वथ केवलं लीनाः।।५९३७।।

काल्पनिकं तत्सर्वं गोपनरूपेषु निक्षिप्तम्।
गोपनरूपं तदिदं लोके निखिलं समालोक्यम्।।५९३८।।

आत्मस्वरूपमिदमखिलं सततं गुप्तं सदैव संकथितम्।
मनुजः सर्वं ज्ञात्वाऽपि स्वात्मानं न जानाति।।५९३९।।

अविज्ञाय निजरूपं बाह्यं सर्वं विजानानाः।
काल्पानिकं मिथ्या वा पश्यन्तस्ते न विरमन्ति।।५९४०।।

एवं मूले गोपनमेवाऽस्ते सर्वजन्तूनाम्।
अतएव जीवनेष्वपि गोपनतत्वस्य साम्राज्यम्।।५९४१।।

गोपनीयताशपथं पत्रे प्रपठन्ति मन्त्रिणः सर्वे।
सा स्वीकृतिः समस्ता गुप्तं निजरूपमाहर्तुम्।।५९४२।।

बद्धा सेयं मुष्टिर्लक्षात्मकराशिसम्पूर्णा।
भातितरां या स्फुटिता सा धूलीभिर्वृता जाता।।५९४३।।

निखिल-पुरातन-रूपं नाना वस्तूनि चित्राणि।
शतसहस्रवर्षाणां गोपनकारीणि नम्यन्ते।।५९४४।।

अद्य शोधपत्राणां महती संख्याऽथ गुप्तानाम्।
तत्त्वानां व्याख्याने श्रमं च समयं च गृह्णाति।।५९४५।।

शोधप्रबन्धसंस्तुतिकरणे शोधार्थिनां काचित्।
शोधोपाधिप्रप्तिर्गुप्तं विभवं प्रकाशयति।।५९४६।।

यदाऽर्जुनः प्रार्थितवान् विराट्स्वरूपं तदा दृष्टम्।
परिमिततमे शरीरे गुप्तं तस्माद्विनिर्यातम्।।५९४७।।

सर्वतोऽधिकं गुप्तं सुप्रत्यक्षं शरीरमिदम्।
अप्येकस्मिन्नस्मिंस्त्रीणि शरीराणि तिष्ठन्ति।।५९४८।।

शारीकभाष्यस्य च निर्माणे शंकराचार्याः।
कथयाञ्चक्रुर्ब्रह्म तु नैवाऽस्ते गुप्तलोकेषु।।५९४९।।

एतच्छरीरमास्ते गुप्तैस्तत्त्वैरभिव्याप्तम्।
तद्विज्ञाने ब्रह्मण विज्ञानं तु स्वयं भवति।।५९५०।।

एवंविध व्यतिकरे गोपनतत्त्वस्य व्याप्तिरियम्।
निखिलप्रपञ्चमाला कणे कणे नित्यमुल्लसिता।।५९५१।।

इदमेव कारणं यज्जीवनकालेऽथ गोपनं तत्त्वम्।
सर्वत्रैवाधारं निजं सुसंस्थापयत्येव।।५९५२।।

अत्रेदमपि रहस्यं सम्यक्रूपेण निर्धार्यम्।
गुप्तागुप्तं रूपं किञ्चित् प्रकटं च गुप्तं च।।५९५३।।

अज्ञानेन ज्ञानं समावृतं तेन मोहोऽयम्।
जन्तूनावृणुते किल गीतायामपि समादिष्टम्।।५९५४।।

जीवनमृत्युमयेऽस्मिन्संसारे संसरणशीलाः।
नित्यनवीनविभावेनासक्ताः संततं भान्ति।।५९५५।।

स्वीयां गोपनमुद्रां निबिड़तमां धारयन्तस्ते।
नाना यानारूढाः प्रयान्ति सर्वत्र कालसंकलिताः।।५९५६।।

गोपनरूपां तृप्तिं क्षणे क्षणे साधयन्त इमे।
पार्यन्तिकीं व्यवस्थां सुदृढां संसाधयन्त्यद्य।।५९५७।।

अर्जुनस्य सारथ्ये संस्थितवान्स स्वयं भगवान्।
जगदीश्वरस्वरूपं स्वीयं संगोपितं कृतवान्।।५९५८।।

यदा यदा संग्रामे गोपनरूपस्य समयो वा।
तदा तदा तत्प्रकटीकृतमासीत्कृष्णचन्द्रेण।।५९५९।।

यस्य समक्षं सर्वं गुप्ततमं सुप्रकटतमम्।
तस्य समक्षे सर्वा महती सेनाऽपि निश्चला भवति।।५९६०।।

गुप्तचराणां संस्था काचित् सर्वोत्तमा यस्य।
राजनीतिविज्ञाने तदिदं सर्वोत्तमं राज्यम्।।५९६१।।

गुप्तचरास्ते सर्वे स्वात्मानं गोपयन्तोऽपि।
गुप्ततमेऽपि विभागे प्रत्यक्षं साधयन्तितराम्।।५९६२।।

अणुरपि गुप्तं रूपं शत्रोर्विज्ञाय साक्षित्वे।
निखिलमिदं परिवर्तनमपि संसाध्यं भवेन्नाम।।५९६३।।

कथयन्तः किल सर्वं सर्वं गुप्तं प्रकटयन्तः।
नवसंगोपन-शैलीं प्रसादयन्तो विलोक्यन्ते।।५९६४।।

आत्माऽवलोकनेषु च या विकटा संस्थितिर्ज्ञाता।
तत्संगोपनशीला नेतारे लोकनीयाःस्युः।।५९६५।।

गोपनरहस्यजातं तदिदं नाना विधाऽयोगे।
संसद-व्यवहारेष्वथ दृष्टं स्पष्टं समनुभूतम्।।५९६६।।

ये वा रहस्यविद्यां गोपनरूपां विजानीयुः।
संसारे साफल्यं समवाप्तुं ते प्रगल्भन्ते।।५९६७।।

किं विस्तरेण तावत्कथनीयं गुप्तलीलेयम्।
प्रतिक्षणं प्रतिविषयं स्वव्यापारं प्रसारन्त्यास्ते।।५९६८।।

गोपनतत्त्वं तदिदं सर्वं विश्वं प्रवर्तयन्नास्ते।
गोपानविद्या-सागर-मुत्तीर्यैवाऽखिला भूतिः।।५९६९।।

१८१.श्रीपरमेश्वरानन्दाः

महामहोपाध्यायं श्रीमत्मत्परमेश्वरानन्दम्।
प्रणमति शिवदत्तोऽयं मनसा वाचाऽथ कर्मणा वापि।।५९७०।।

अस्मदीयपितरं यो गुरुस्वरूपे प्रपूजितवात्।
स्वीयैः शास्त्राऽभ्यासैस्तं श्रीपरमेश्वरं वन्दे।।५९७१।।

महामहोपाध्याया पदवी संस्कृतसुविद्वद्भ्यः।
सन्दातुं प्रतिवर्षं विनिश्चिताऽङ्गूलीयशासनाऽध्यक्षैः।।५९७२।।

श्रीमान् पण्डितवर्यो गिरिधरशर्माचतुर्वेदः।
महामहोपाध्यायेन तु पदप्रदानेन पूजितो जातः।।५९७३।।

तच्छिष्यस्तु विशिष्टः श्रीमान् परमेश्वरानन्दः।
महामहोपाध्यायेन तु पदप्रदानेन भूषितो जातः।।५९७४।।

स्वीयशासने जाते स्वातन्त्र्यानन्तरं तदिदम्।
संस्कृत-विद्वन्मानं भारत शासन-समारब्धम्।।५९७५।।

राष्ट्रपतिप्रतिविहितं तदिदं संस्कृतसुसम्मानम्।
श्रीगिरिधरशर्भभ्यः प्रथमतयाऽसीत्समर्पितं जातम् ।।५९७६।।

प्रतिवर्षं देशेऽस्मिन् संस्कृत-विद्वात्सु सम्मानम्।
भारतराष्ट्रपतिः स्वे वितरति भव्ये समारोहे।।५९७७।।

आगामिनि सद्वर्षे तदिदं राष्ट्रपतिसम्मानम्।
संघोषितं समाऽसात्छ्रीमत्परमेश्वरानन्दे।।५९७८।।

स्वीयगुरोस्तुतिकरणैः सर्वान्सन्तोषदन्सुधियः।
परम्परां दिव्यतमां स्त्रीयाऽचरणै प्रदर्शितवान्।।५९७९।।

हिमालयीय-भूमागे गढवाले लब्धजन्माऽयम्।
ऋषिकुलसत्संस्थायां शिक्षां सम्प्राप्तवान् हरिद्वारे।।५९८०।।

विद्याऽभ्याससुसमये स्वीयवचोभिः सदाचारणैः।
ऋषिकुलस्थगुरुवर्गं मित्राणि च तोषयन्नासीत्।।५९८१।।

लाहौर-नाम्नि-नगरे प्रोन्नतशिक्षणसुखस्थाने।
अध्यक्षपदे तिष्ठन्नध्यापनकार्य-संलग्नः।।५९८२।।

लाहौरनामनगरं लवपुरमिति वा प्रकथयन्ति।
तत्राऽध्यापनकार्ये विकस्वरं कौशलं प्राप्तः।।५९८३।।

तद्गुरुरपि तत्राऽसीदध्यक्षः श्रीचतुर्वेदः।
जयपुर-संस्कृत-कालेजाध्यक्षत्वेऽसौ यदाऽऽहूतः।।५९८४।।

तदा तत्पदे स्थित्वा पूर्णतयैवात्रसंतन्वन्।
शिष्यवर्गसम्पन्नः पञ्चनदे सुप्रतिष्ठितो जातः।।५९८५।।

'रावी' नद्या निकटे सौन्दर्यैः सर्वथा लसितम्।
लाहौराऽख्यं नगरं भारतदेशस्य पेरिसं कथितम्।।५९८६।।

व्यापारिकी समृद्धिर्नगरे तस्मिन्विलक्षणैवासीत्।
सर्वस्मिन् संसारे जनेषु तत्काम्यमेवाऽसीत्।।५९८७।।

पुस्तकीय-व्यवसाये प्रवीणतायां प्रतिष्ठितैःपुरुषैः।
संस्कृत-सद्ग्रन्थानां प्रकाशनं नूनमारब्धम्।।५९८८।।

श्रीगिरिधरशर्माणः परमेश्वरशास्त्रिणश्चाथ।
पुरातनग्रन्थानां शोधनमुद्रणमथाऽकार्षुः।।५९८९।।

शतशो नानाग्रन्थाष्टीकाटिप्पणिसुमन्विताऽकारे।
हिन्द्यनुवाद-समेता अपि तैः क्रमशः प्रकाशिता जाताः।।५९९०।।

महाकाव्य-संग्रह इति सा वै सिद्धान्तकौमुदीत्यादि।
शताधिकाः सद्ग्रन्था विद्वद्वर्यैः प्रकाशनं नीताः।।५९९१।।

महामहोपाध्याया श्रीमत्परमेश्वरानन्दाः।
देशविभाजनकालेऽपि च लाहौरे स्थिता आसन्।।५९९२।।

आत्यन्तिक-कठिनेयं लाहौरात्सा विर्निगमनगाथा।
पदे पदे यत्राऽसीन्मृत्युः साक्षादुपस्थितः पुरतः।।५९९३।।

चण्डीगढे पुनरिमे विश्वे विद्यालये नीताः।
प्राधान्ये तत्रेमे संस्कृतभागे समासीनाः।।५९९४।।

भाषणमेतेषामथ विनिर्मलं प्रेरकं नित्यम्।
संस्कृत-हिन्दी-बांग्ला भाषाऽभ्यासे समाचरितम्।।५९९५।।

एतेषां विद्वत्ताऽभ्यासे ये संस्थिताश्छात्राः।
ते कुलपतयो जाताः संजाता राज्यपालाश्च।।५९९६।।

नित्यं विनम्रभावैरोतप्रोता सदैव सहयोगे।
राष्ट्राऽध्यक्ष-समादर-सत्पात्राणि च ततो जाताः।।५९९७।।

शासकीय-सेवातो विनिवृत्तास्ते तु देहल्याम्।
संस्कृत-विद्यापीठे मानस्थाने समानीताः।।५९९८।।

देहल्यामथ निजनव-भवनं निर्माय निवसन्तः।
संस्कृत-सद्ग्रन्थानामनुवादे चाथ संलग्नाः।।५९९९।।

वेदानामप्येतेऽनुवादकार्ये समालग्नाः।
एकस्तावद् वेदः प्रकाशितः सानुवादोऽपि।।६०००।।

साहित्यदर्पणग्रन्थस्याप्यनुवादं सुसाधु कृतवन्तः।
नूतन-रहस्य-विकिरण-परिपाटी तत्र महनीया।।६००१।।

संस्कृत-सत्पत्रस्य च संस्कृतरत्नाकरस्य पुनः।
संपादकास्तदात्वे विद्यापीठे इमे जाताः।।६००२।।

जालन्धराऽख्यनगरे स्थित्वा किञ्चित्समयमथ ते।
भारतीयसंस्कृति सत्सम्मेलनमायोजयन्ति स्म।।६००३।।

नानाविधनवनवतरकार्याणीं साधने दक्षाः।
नानानवान्विचारान्संचिन्वन्तोऽथ शास्त्रिणो दृष्टाः।।६००४।।

शतसहस्रसच्छात्रैर्नम्याः परमेश्वरानन्दाः।
निखिले भारत-वर्षे संस्कृत-नेतृत्वमुपयाताः।।६००५।।

लेखन-भाषण-रचना-प्रवाह-वीचीभिरापूर्णाः ।
महासागर-प्रतिमाः श्रीमत्परमेश्वरानन्दाः।।६००६।।

परस्पर-व्यवहारे मधुरां शैलीं वितन्वन्तः।
आचरणशुद्धमनसः श्रीमत्परमेश्वरानन्दाः।।६००७।।

लक्ष-लक्ष-जनतायामसमां दीप्तिं वितन्वन्तः।
प्राणाधिक-प्रियतरा आसन् परमेश्वरानन्दाः।।६००८।।

गुरुगणसेवा-निरताः मित्रेषु च मित्रतासाराः।
सर्वस्वास्तु विनेयेष्वासन्परमेश्वरानन्दाः।।६००९।।

अन्यायेषु क्रोधः सहजस्तेषां मनस्यासीत्।
क्रोधनियन्तारस्ते जाताः परमेश्वरानन्दाः।।६०१०।।

विद्वत्संधेष्वसमामभिरुचिमवधारयन्तस्ते ।
निरभिमानता-भूषित-कायाः परमेश्वरानन्दाः।।६०११।।

मार्ग-प्रचलनवेलाऽध्यापितसद्ग्रन्थमालास्ते ।
शिष्य-समूहे दृष्टा नित्यं परमेश्वरानन्दाः।।६०१२।।

कठिन-तरेऽपि च विषये विनोदमयचित्रणैः सततम्।
शिष्यांस्तुष्टान्कर्तुं याताः परमेश्वरानन्दाः।।६०१३।।

सदुपस्थितिर्हि येषां सहस्रवद्दीपितोद्योता।
संजाताऽसीत्ते वा जाताः परमेश्वरानन्दाः।।६०१४।।

येषां सद्गुणमाला विचरन्ती शुभ्रतामूर्तौ।
धन्य लोचन मासीत्ते मन्ये दिव्य-संचारा।।६०१५।।

अद्यापि वाक्यधारा येषां संतृप्तिदायिका नितराम्।
विद्वज्जनमोदावहपरमाः परमेश्वरानन्दाः।।६०१६।।

देशे देशे ये वा पूजितविभवान्विता जाताः।
विद्वज्जन-प्रणम्या आसन्परमेश्वरानन्दाः।।६०१७।।

आर्याच्छन्दस्वेषा त्वणीयसी काऽपि गुणधारा।
वर्णयितुर्धन्यत्वं वितरति तेभ्यो नमः सततम्।।६०१८।।

मदीयमेतज्जीवनमास्ते यैः पोषितं सम्यक्।
मयका प्रणाम-मालर्पिता पवित्रं च मां कुर्यात्।।६०१९।।

१८२.शक्तिः

शक्तिर्गताऽस्ति निखिला पुनरथ सर्वा समागता शक्तिः।
गमनागनविलोभन-लीलाभिर्भाव्यते शक्तिः।।६०२०।।

क्वचिदुच्छलिता शक्तिर्मध्यमरूपेषु संस्थिता शक्तिः।
सुप्तविलुप्तोन्मुक्तप्रकाररूपेश्वरी शक्तिः।।६०२१।।

गर्जति तर्जति वर्षति छादयते सुप्रभावैः स्वैः।
नित्यचिकुरसंचयन-व्यग्राध्येयास्ति सा शक्तिः।।६०२२।।

आयातैवायाता सम्मुख-रूपेषु नित्यमियम्।
मनो बुद्धिसंकायं प्रविश्य संचालयति शक्तिः।।६०२३।।

अन्तःशक्तिः सेयं विपुलं विश्वं विलासयति।
अस्या जागरणानां सर्वत्रैवास्ति सत्प्रतीक्षैव।।६०२४।।

हृदयपिण्डसंचालनरूपेणेयं सदा शक्तिः।
जीवन-रंग-विधाने मोहक-रूपाणि लासयति।।६०२५।।

शक्तिरियं सुप्रकटा सर्वेषां सम्मुखस्थापि।
कदापि नो संसारे नेत्राभ्यां केनचिद् दृष्टा।।६०२६।।

एकाऽपि सा च शक्ती रूपाऽनन्त्ये प्रकाम-विस्तारैः।
विभ्रामयति मनोज्ञान् विज्ञानपि सर्वमूर्धन्यान्।।६०२७।।

नानाविधशक्तीनां विस्तारेषु प्रजागरूकेषु।
नित्यैकास्ति समस्ता व्यस्ता वेयं परिष्ठिता शक्तिः।।६०२८।।

यः शक्तिमान् प्रकथितस्तस्य तु काचित्कथैव नात्र स्यात्।
कोणे स्थितः स आत्मा ब्रह्म तु साक्षान्महेश्वरोऽप्यथवा।।६०२९।।

अल्लाह गाड़ रब वा शब्दा एते तथैवाऽन्ये।
शमीधरस्तै कथितः विवेकबोद्धव्यतां यातः।।६०३०।।

शब्दानन्त्यं कामं प्रभवतु वा शक्तिमद्रूपे।
रूपाणामानन्त्यं सैषा शक्तिः प्रकाशयति।।६०३१।।

जड़चेतनसंभेदं नो गणयति सर्वसंस्थिता शक्तिः।
जड़े जगति सौन्दर्यैः सर्वैरापूरिता शक्तिः।।६०३२।।

चेतनमेतन्निखिलं यत्राऽकृष्टं समायाति।
सा काचिज्जड़शक्तिः प्रकृतिर्या कथ्यते सर्वैः।।६०३३।।

प्रकृतिर्जड़ाऽपि निखिलाऽनुक्षणमाकर्षयति चेतः।
चेतन-शक्तिः केवल दर्शनवेलायां तन्मयीभावः।।६०३४।।

शक्तिमतोऽभिन्नत्वं तथा समासादितं शक्त्या।
अद्वयरूपेणेयं तत्रैवात्रापि संस्थिता ज्ञाता।।६०३५।।

अहं मदीया शक्तिश्चेत्थं द्वित्वं न जानाति।
अहमित्यत्राऽद्वयता विभावितैवाऽस्ति सर्वदा शक्तिः।।६०३६।।

पूर्वकथा स्मरणीया ह्येकैव तु सा महाशक्तिः।
आधारभेदभिन्ना निजेच्छयाऽनन्त्यमुपयाति।।६०३७।।

यदा निशुम्भः कथयत्यन्यासां त्वं बलं समाश्रयसे।
संहरते च तदात्वे निखिलं रूपं विलोक्यते चैका।।६०३८।।

निश्किञ्चने पदार्थे सर्वत्रोपेक्षितेऽपि सा शक्तिः।
सर्वाश्चर्यसमुद्रे निपातयन्ती समुद्भूता।।६०३९।।

सर्वोपेक्षित-काये यत्राऽसीन्नैव काप्याशा।
तत्र सन्तमसरूपं विदार्य पर्यागता शक्तिः।।६०४०।।

कामं दर्शनदृष्ट्या विवादतर्के समासीनाः।
ऋषयस्ते दार्शनिकाः कौशलरूपाणि धारयन्तुतमाम्।।६०४१।।

शक्तिरूपसंचारेष्वेते सर्वत्र चात्मीयाम्।
शक्तिमेव कथयन्तो विवदन्तो वा प्रकाममाधुर्यैः।।६०४२।।

तर्कशक्तिसंवलितास्तेते सिद्धा महात्मानः।
शक्तिस्वरूपकथने नितरां मौनं विलासयन्तःस्युः।।६०४३।।

शक्ति-विवेचन-कार्ये सर्वं शक्तिव्ययं कृत्वा।
अणुमात्रमपि तु नैव प्रकटितमेतावता मौनम्।।६०४४।।

तत्राऽगाधसमुद्रे केवलमेकामपि तु लहरीम्।
यदि सम्प्राप्तुं यत्नः संसिद्धो जन्मफलमाप्तम्।।६०४५।।

एकैव सैव लहरी स्वीयं तं सागरं रूपम्।
सद्यो विलासयति सा महतोऽप्यास्ते महीयसी भव्या।।६०४६।।

अणोरणीयसी सा का वा तस्याः संकथा कथ्या।
अणुस्वरूपे चैषा परममहत्त्वं विलासयति।।६०४७।।

परमस्य महद्रूपस्याणुत्वे वा विपरिवर्ते।
वामहस्तसंक्रीडा सर्वेषां शक्तिरूपायाः।।६०४८।।

अत्यन्तदिव्यरूपे सर्वेषां लोभनीयेऽपि।
मिथ्याभिमानगर्वं संचूर्णयितुं स्थिता शक्तिः।।६०४९।।

शाक्तं दर्शनमेकं दिव्यं विद्योतते शास्त्रम्।
यत्र च शक्तिविवेचनविचारधाराः प्रवाहिता जाताः।।६०५०।।

पञ्चदेवपूजायां प्रथमेयं शक्तिरेव सम्पूज्या।
पूजाकर्मणि शक्तिर्निर्मल-साहित्यसद्रूपा।।६०५१।।

नम्रत्वं पूजायां कियदित्थं स्वात्मना धार्यम्।
आह जगद्धरभट्टः शिवस्तुतिं साधु कुर्वाणः।।६०५२।।

वेंकटकविर्यथायं शक्तिं तामादिमे रूपे।
लक्ष्मीसहस्रमिति तत्प्रसिद्धकाव्ये सुवर्णयाञ्चक्रे।।६०५३।।

वेदाक्षरमन्त्रेष्वथ शक्तिर्व्याप्ताऽस्ति सर्वत्र।
निखिलवाङ्मये वर्णितविभवान्वय-भूषिता शक्तिः।।६०५४।।

मार्कण्डेयपुराणान्तर्गतसप्तशतीनाम्नि पूज्यसन्दर्भे।
अवतारेषु च मूले तत्त्वे सा धारिता शक्तिः।।६०५५।।

यच्चात्र किञ्चिदपि वा क्वचिदपि वा वस्तु सदसद् वा।
सर्वत्र तत्र सेयं शक्तिर्देवी सदैवाऽस्ते।।६०५६।।

कियती कियती गाथा तस्याः संकथ्यतां नाम।
जन्मसहस्राकथनेऽप्यणुरपि नो वा प्रकथितं स्यात्।।६०५७।।

प्रथम-चरित्रे ब्रह्माश्रीविष्णोर्नाभिकमलस्थः।
स्तुतिरूपेणैवाद्यां शक्तिं प्रणमति नम्रो भयाक्रान्तः।।६०५८।।

सप्तशतीसद्ग्रन्थे शक्त्यवतारेषु दिव्यगाथानाम्।
पाठे पाठे नियतं भाग्योद्योतः समायाति।।६०५९।।

शतशस्तादृशरूपाण्युन्नतिसन्तानबीजानि ।
पुरतः स्थितानि जातान्यद्यत्वेऽपि प्रकामरम्याणि।।६०६०।।

एवमेव सा गीता-श्रीकृष्णस्याऽमृतमयी वाणी।
साऽपि तु सप्तशतीव प्रथिताऽन्वर्था च संख्यायाम्।।६०६१।।

श्लोकानां गीतायां सप्तशती संख्यया जाता।
गीतायामपि शक्तिर्माया शब्देन विख्याता।।६०६२।।

दैवी ह्येषा माया सत्त्वरजस्तमसमायुक्ता।
दुरत्ययेयं माया श्रीकृष्णाज्ञां विजानाति।।६०६३।।

कृष्णप्रपन्नतायां ये सम्प्राप्ताः प्रयत्नै स्वैः।
तैर्मायाशक्तिरियं सन्तरणीया विनाऽयासम्।।६०६४।।

गीतायां या वाणी श्रीकृष्णस्यास्ति दिव्यदिव्याभा।
तां शक्तिफुल्लमालां संधार्याद्याऽस्ति सन्तुष्टिः।।६०६५।।

रम्या रम्यतरा सा रम्यतमाऽप्यस्ति गीतैव।
छन्दोमयवाणीयं तत्त्वसहस्रैरभिव्याप्ता।।६०६६।।

प्रस्थानत्रितयेऽपि तु शक्तिं तां प्रस्तुतीकृत्य।
तत्त्वसमीक्षणबुद्धिः प्रवर्तिता तावदाचार्यैः।।६०६७।।

संक्षेपैर्विस्तारैर्नानोदाहरणदर्शनैः सम्यक्।
शक्तिस्वरूपममलं व्यापकरूपेण सर्वतो दृश्यम्।।६०६८।।

शक्तिविहीनो जन्तुर्निजरूपेऽदर्शनं यातः।
अन्यद्रूपां शक्तिं सम्प्राप्तुं शीघ्रमायतते।।६०६९।।

शक्तिरेव सा नित्यं जीवनचिन्हं प्रवाहमयी।
संधारयति नितान्तं कमनीयं माननीयं च।।६०७०।।

अतुलितवैभवभरितानखिलानेतान् पुरःस्थितान् पुरुषान्।
संसारेषु निकामं संयोजयते परा शक्तिः।।६०७१।।

भावाभ्यासवशीकृतसाधारणरागरञ्जितस्वान्तैः ।
संसाधिताऽपि नित्यं परिचयलेशं न जानाति।।६०७२।।

अस्याः शक्तेस्तावत्सन्त्येते नित्यसन्दर्भाः।
कणे कणे संव्याप्ताः क्षणे क्षणे पोषणं याताः।।६०७३।।

अजराऽमरताऽवाप्तिः शक्त्या शक्तिकृपारूपा।
शक्तिरेव सर्वासां सिद्धीनां सम्प्रदात्रीयम्।।६०७४।।

प्राक्तनभाषा सर्वा कलौ युगे शक्ति-सन्दर्भान्।
वर्णितवती हि यस्यां संघे शक्तिः समाम्नाता।।६०७५।।

पुरायुगेषु तु संघे शक्तीनां ह्रास एवाऽसीत्।
व्यक्तिनिष्ठशक्तीनामुल्लासास्तत्र वर्णिता जाताः।।६०७६।।

ऋषिमहर्षिसद्भावे शक्तिसमुद्रास्तरङ्गितास्तेषु।
निभृताऽएवाऽतिष्ठन् नतमां सन्दर्शनेषु ते याताः।।६०७७।।

अतएव शक्तिसिद्धिः संरक्षणभूषिता जाता।
पर-परिपीड़न कार्ये खल-शक्तिः केवलं गणिता।।६०७८।।

यदा दिलीपो राजा निःसन्तानत्वदोषेण।
दुःखित-हृदयो यातो वशिष्ठ-निकटे तदा ज्ञातम्।।६०७९।।

समाधिशक्तिमास्थाय ज्ञातं तत्कारणं सद्यः।
कामधेनुशापेन तु सेयं सर्वाऽपि दुःस्थितिर्जाता।।६०८०।।

पुनरस्य समाधानं नन्दिनि-सेवासमासीनः।
साधितवांस्तु दिलीपः स्वीयां शक्तिं समादाय।।६०८१।।

सा वरदानाऽवाप्तिः पुत्रं रघुमेव नीतवती।
रघुवंशेति सुनाम्ना संप्रख्यातस्तथा वंशः।।६०८२।।

चित्राणीति विलोक्याध्येतव्यं तावदायातम्।
ऋषिमहर्षिसंकाये शक्तिसमुद्राः समाविशन् निखिलाः।।६०८३।।

किन्तु कलियुगे सेयं शक्तिः संघे समायाता।
व्यक्तिनिष्ठशक्तीनां लोपोऽद्यत्वे नु संजातः।।६०८४।।

शब्दानां ग्रन्थानां साहित्यानां विनिर्माणे।
शक्तेरस्ति समस्ता विभासिता सा शिरोमणिता।।६०८५।।

अर्थप्रबोधरूपा शक्तिः शब्देषु यदि न स्यात्।
अर्थहीनकोलाहलरूपं भूयान्निखिलविश्वम्।।६०८६।।

शब्दे शब्दे शक्तिः शब्दः सर्वत्र संसारे।
मनुजशरीरविरचना-व्याप्तो नैवात्र सन्देहः।।६०८७।।

वयमत्र तां तु शक्तिं शब्दे शब्दे विराजितां नाम्ना।
अभिधा शक्तिं ब्रूमः सेयं निर्धारिता प्रकृत्यैव।।६०८८।।

अस्मात्पदात्तु सोऽयं बोद्धव्योऽर्थः समाभणितम्।
ईश्वरसंकेतोऽयं सोऽयमनादिर्विनिर्धार्यः।।६०८९।।

अभिधां शक्तिं रुद्धां दृष्ट्वा सा लक्षणा शक्तिः।
समुदेत्यर्थाऽवगमो येनाऽयातः सुरम्यतरः।।६०९०।।

अर्थद्वय्यपि सेयं नो सन्तोषं हृदयकोशे।
वितरति तत्राऽयाति च सौन्दर्ये व्यञ्जना नाम।।६०९१।।

अनया व्यंञ्जनया ननु कविता कलनासु सन्दीप्तिः।
प्रकटीकृता नितान्तं पल्लवितो येन संसारः।।६०९२।।

कविताशक्त्या जीवनमुल्लासैः पूजितं रम्यम्।
संजायते निकामं सैवाऽस्ते व्यंजनाशक्तिः।।६०९३।।

कविताकारणरूपा परिगणना या समाहृता जाता।
शक्तेः प्राथम्यं किल परतोऽभ्यासो निपुणता च।।६०९४।।

वैचारिकसन्दर्भेष्वेवं शक्तेः सुविस्तारः।
सहस्रशो विद्वद्भिः कृत एवाऽद्यापि च क्रियते।।६०९५।।

शक्तेः साम्राज्यानां सीमा नैवाऽस्ति निर्धार्या।
वाक्शक्तिः सा कथिता यावद् ब्रह्माऽस्ति विष्ठितं जातम्।।६०९६।।

शक्तिः शक्तिः शक्तिश्चेत्थं सम्प्रार्थ्यमानाऽपि।
नो वा कस्याप्येषा लोचनपथगामिनी जाता।।६०९७।।

केवलमनुभव-सरणिं याता सेयं क्षणे क्षणे दिव्या।
दृष्ट्वा स्पृष्ट्वा-श्रुत्वा-भुक्त्वा ज्ञानं न तस्याः स्यात्।।६०९८।।

मानोन्नताऽपि शक्तिः समन्विता साऽपमानैर्वा।
लक्ष्मीरपि सा नित्यं सैवाऽलक्ष्मीरपि स्थितैवाऽस्ते।।६०९९।।

शक्तिः सौम्याऽत्युग्रा मृदुस्वभावान्विता रौद्री।
निखिलौदार्यसमुद्रा कार्पण्याम्भोनिधिं तनुते।।६१००।।

सर्वोच्चोच्चपदस्था निम्नपदस्थाऽपि शक्तिरियम्।
लोकान्विधारयन्ती रूपे रूपे स्थिता शक्तिः।।६१०१।।

यत्र यत्र पश्यामस्तत्र समस्तेऽपि दिग्भागे।
कालेऽपि च सर्वस्मिन् नाना रूपे स्थिता शक्तिः।।६१०२।।

अद्य तु ये ये पुरुषाः प्रतिष्ठिताः सन्ति संसारे।
शक्त्यपगमे पुनस्ते जायन्ते सर्वनिन्दिता नित्यम्।।६१०३।।

शक्तिः सर्वस्वतन्त्रा यं यं वाऽपि स्वयं कृपया।
समन्वितं सत्कुरुते तत्रोद्बुद्धं तु भाग्यं स्यात्।।६१०४।।

केवलमेतत्कृपया सिद्धिः साऽवाप्यते विपुला।
नाना कर्मारम्भैः सम्पूज्यैषा सदा शक्तिः।।६१०५।।

निखिलैरपि स्वभावैः शक्तिः सेयं समाराध्या।
ते सन्त्यद्यत्वे किल वन्द्याः येषु कृपा तस्याः।।६१०६।।

वंशानुगता सेयं यस्मिन्रूपे समास्थिता जाता।
ते वै तस्मिन्रूपे तामाराध्यैव वन्दिता जाताः।।६१०७।।

एकस्मिन्नथ काले सर्वाण्यपि शक्तिरूपाणि।
प्रत्यक्षतां प्रयातान्यथवा संभाव्यते कैश्चित्।।६१०८।।

अथान्यकाले सर्वं रूपं परिवर्तितं जातम्।
पुनरन्यान्यप्यपराण्यायोजितवैभवानि जायन्ते।।६१०९।।

१८३.गङ्गा

गङ्गां स्तोतुं नमितुं वाग्भिर्वा संस्तवं कर्तुम्।
वाराणस्यामस्यां स्थित्वा धन्यत्वमायातम्।।६११०।।

गङ्गा वाराणस्यां प्रवहन्ती शिवजटाजाले।
विलसन्ती कमनीयां कायां स्वीयां विलासयति।।६१११।।

काश्यां गङ्गाया सद्रूपं दृष्ट्वा प्रमोदोऽयम्।
लोकानां सर्वेषां प्रपूज्यतां नूनमायाति।।६११२।।

सर्वेषु तु लोकेष्वपि नैषा दृश्यवालर्दीप्ता।
लभ्या वा दृश्या वा भोक्तव्या वा परैर्यत्नैः।।६११३।।

अत्रत्यदेवतानां देवीनां वाऽथ विज्ञानाम्।
गङ्गाप्रवाहभाषाभाष्याणां सरणिरन्यथा भाति।।६११४।।

काश्यां ते विश्वासा येषां विस्ताररूपाणाम्।
गाथाभिः संरचना विधीयते पुण्यमार्गाणाम्।।६११५।।

गङ्गा माता काश्यां प्रसन्नभावेन सर्वदा दृश्या।
कुतो नवैतद्भूयाच्छम्भोः सेयं समीपस्था।।६११६।।

सर्वत्रैव जगत्यां शंभुर्मगवान्सुसंगतो दृष्टः।
गङ्गाऽपि सा हि देवी सर्वत्रैवाऽनिवारितप्रसरा।।६११७।।

गङ्गास्नानं कृत्वा तटे तदीये समुपविश्य।
तस्याः कलेवराणां दर्शनमास्ते धरास्वर्गः।।६११८।।

कीदृक्सुखं तदेतद्वर्णयितुं नाऽस्ति मे शक्तिः।
आस्वादोऽयं नितरां वाणीष्ववतारणां नवां कुरुते।।६११९।।

गङ्गावर्णनपरमान्यालोक्यन्तेऽथ काव्यानि।
सिद्धमन्त्रमयशब्दावल्यां कविभिर्विरचितानि।।६१२०।।

गङ्गासंस्तुतिधारा विनिपीतास्यात्सुकविवर्यैः।
या निर्मिता समीहां सर्वविधां सम्प्रपूरयति।।६१२१।।

वेदेषु गाङ्गमम्भो विराजितं दृश्यते तावत्।
गङ्गा वैदिकविश्वे प्रतिष्ठिताऽस्ते सुशोभिते रूपे।।६१२२।।

वाल्मीकिकाव्याधाराविवरणसीमा न दृश्यते येयम्।
गंगावर्णनकाले कविनाऽदौ याऽथ संरचिता।।६१२३।।

श्रीव्यासस्तु नितान्तं गङ्गायां जात एवाऽसीत्।
गङ्गा तेन स्वीये संसारे संप्रवाहिता सततम्।।६१२४।।

शङ्करभगवत्पादैः स्वीयस्तोत्रावलीकाले।
गङ्गामाता सेयं निरूपिता ब्रह्मरूपैव।।६१२५।।

सर्वेष्वपि काव्येषु तु नाटकरचनासु सर्वासु।
गङ्गा माता सेयं नानारूपेषु चित्रिता कविभिः।।६१२६।।

गङ्गा मातैवेयं लवं कुशं धारयामास।
गङ्गामातुर्गाथाः सर्वे लोके प्रगीयन्ते।।६१२७।।

गङ्गाया गाथानां महिमा नो वर्णितुं शक्यः।
साकल्येन कथञ्चित् कणशः कणशोऽथ वर्णनीयः स्यात्।६१२८।

कणशो वर्णनमेव च कृतं तथा चादितः सर्वैः।
सम्पूर्णतया कथंचिद् ज्ञातुं नैवाऽत्र शक्यते गङ्गा।।६१२९।।

ज्ञाने यदा स्थितिरियं वर्णनरूपे कथैव सा नाऽस्ति।
सम्पूर्णं वर्णनमथ गङ्गाया नैव सम्भवति।।६१३०।।

गङ्गालहरी काव्ये पण्डितराजो जगन्नाथः।
शिखरिण्यां स्तुतिपाठं गङ्गायाः संप्रकल्पयामास।।६१३१।।

व्रजभाषासन्दर्भे गङ्गाऽवतरणाख्यसत्काव्ये।
रत्नाकरोपनामा दासः कश्चिज्जगन्नाथः।।६१३२।।

संस्तुतवानथ गङ्गां काऽपि च विच्छित्तिरदसीया।
लोकोत्तराणि रूपाण्यादायैषा प्रवृत्ताऽभूत्।।६१३३।।

नम्रतरे परिवेशे गङ्गावेशे च या दृष्टिः।
निर्मलतायां स्नाता वाचिकमान्दोलनं कुरुते।।६१३४।।

एवमनन्तैः कविभी ऋषिभिर्मुनिभिश्च सेविता गङ्गा।
नित्यं निर्मलतायां शब्दानेतान्निमज्जयति।।६१३५।।

नैव तादृशं किञ्चित् काव्यं नो यत्र गङ्गेयम्।
छन्दोभिर्नहि गीता वरेण्यभावैः समाश्वस्ता।।६१३६।।

धन्यानां केषाञ्चित्परिचयभावे समागता गङ्गा।
स्वीयोदरेनिमज्जनसौभाग्यं सन्ददाति सत्कृपया।।६१३७।।

गङ्गास्नानेनानेन तु यः सततं प्रभूत आनन्दः।
दर्शनेन लभ्यस्तं को वर्णयितुमथ शक्तः।।६१३८।।

बाल्यावस्थातो वा मयका सेयं समाश्रिता गङ्गा।
पूर्वं मायापुर्यां हिमालयोपत्यकास्थाने।।६१३९।।

दिव्ये नगरे प्रियतरनाम्ना ख्याते हरद्वारे।
तदनु हृषीकेशेऽपि च पूर्वं मयका निमज्जिता गङ्गा।।६१४०।।

तदनन्तरं कर्णपुरे प्रयागनगरे पुनः काश्याम्।
पाटलिपुत्रे च पुनः कलिकातायं सुसेविता गङ्गा।।६१४१।।

ब्रह्मद्रवः पृथिव्यां विचरणशीलोऽयमाभाति।
साक्षाच्छ्रीकृष्णस्य तु तदेतदमृतं परं द्रवं रूपम्।।६१४२।।

पानीयं कमनीयं गङ्गाया शुद्धमेतद्वा।
वैज्ञानिकमूर्धन्यानपि वा चकितान्समातनुते।।६१४३।।

गङ्गाद्वारे येषां भाग्यं तेषां सुसुन्दरं भूयात्।
गङ्गा यदन्तिके स्यात् तदन्तिके सर्वसौभाग्यम्।।६१४४।।

गङ्गावाणीभूषा येषां तेषां समीपगा गङ्गा।
गङ्गा मनसि न येषां गङ्गा मज्जनमथापि तत्रार्थम् ।।६१४५।।

गङ्गा स्वर्गनदीयं भूमौ स्वर्गं समातनुते।
पापपटलिकां सर्वां क्षणमात्रेणैव नाशयति।।६१४६।।

दूरीकरोति दुरितं गङ्गायाः संस्मरणरेखा।
दर्शनमज्जनविधिना जलपात्रे राज्यमेव ननु लब्धम् ।।६१४७।।

गङ्गाजले तु निखिला देवाः सम्यक् प्रतिष्ठिताः सन्तः।
मर्त्यानां दुरितक्षयकार्ये लग्नाः प्रदृश्यन्ते।।६१४८।।

ये दुरितास्तु मदीयास्ते नूनं स्वर्गमार्गस्थाः।
सञ्जाता दृश्यन्ते गङ्गा स्नाने तु सञ्जाते।।६१४९।।

तस्य प्रमाणपूर्णोऽनुभवः साक्षान्मया लब्धः।
येऽत्रैवासन्विघ्नास्ते सद्यो दूरिता जाताः।।६१५०।।

सर्वेषां विघ्नानामाकस्मिादूरतायां तद्।
गङ्गास्नानमिदं वा कारणतां यातमेवाऽस्ते।।६१५१।।

गङ्गाजलमतिशुभ्रं रमणीयं स्पर्शसाम्राज्यम्।
विदधाति पूर्णतायां प्रतिष्ठितं सर्वरूपं वा।।६१५२।

गङ्गाजलस्य विन्दुः सर्वं संशोधनं कुरुते।
घनपटलीव हि तमसां विशुद्धभावे प्रकाशरेखेव।।६१५३।।

आह्वयते सा गङ्गा पापं कर्तुं प्रवृत्तानाम्।
संशोधनानि कर्तुं प्रेम्णा परिपूर्णसत्कायान्।।६१५४।।

इतरयोनिषूत्पन्नास्ते ते भावा नु गङ्गायाम्।
मज्जनमाकुर्वन्तः स्वर्गे लोके महीयन्ते।।६१५५।।

किन्तु त एते मनुजा दौर्भाग्यैर्वा परामृष्टाः।
गङ्गाकृपाविहीना द्विषन्ति संस्नानशीलान्हि।।६१५६।।

अस्मदीयगुरुचरणैः श्रीमत्खिस्तेमहौदयैरेषा।
नूतनदृश्यावल्यां नाना छन्दस्सु चर्चिता गङ्गा।।६१५७।।

सर्वोपमानतायां गङ्गामाता प्रतिष्ठितैवाऽस्ते।
वग्गङ्गा च विचारे गङ्गा गङ्गाऽथचारित्रे।।६१५८।।

मन्दाकिनीतिनाम्ना काव्यन्त्वेकं विनिर्मितं कविना।
दक्षिणकविरथ सोऽयं प्रयागनगरेऽथ संश्रुतः प्रथमम्।।६१५९।।

काश्यामथवा गङ्गा श्रीमज्जगदीशचन्द्रमिश्रेण।
हिन्दीभाषाकविता प्रवाहविषयत्वमानीता।।६१६०।।

गङ्गा काव्याऽमृतमिदमासेव्यासेव्यमानवाः सर्वे।
गङ्गाप्रवाहभाषापतिता मुक्तिं समायाताः।।६१६१।।

तरलतरङ्गा गङ्गा जीवनतरलाऽथ मरणेऽपि।
भवति नितान्तं तरला सरलात्सरला निरूपणीयैव।।६१६२।।

गङ्गायाः पानीयं निपीय या तृप्तिरास्वाद्या।
लोकत्रयेऽपि सेयं दुर्लभतायां समासीना।।६१६३।।

हे मम मातर्गङ्गे त्वदीयसौभाग्यमाध्याय।
कवयस्ते ते सर्वे स्वीयं सौभाग्यमाह्वयाञ्चक्रुः।।६१६४।।

अमराः सर्वे जाता गङ्गायाः संस्तवं कृत्वा।
आचन्द्रतारकं वा यश एतेषां सुविस्तीर्णम्।।६१६५।।

ये त्वद्यत्वे केचित्कश्मलभावैः प्रदूषितां गङ्गाम्।
माया मोहितकाया एते जल्पन्तु यत्किञ्चित्।।६१६६।।

प्रदूषणानां पटली सा कथमपि नैव संभवति।
यया प्रदूषिता स्याद्गङ्गेयं सर्वसंजननी।।६१६७।।

पर्वतमाला सदृशी प्रदूषणानां पटलिकेयम्।
गङ्गाजलप्रवाहैस्तरङ्गिता लोपिताङ्गीव।।६१६८।।

निखिलानां पापानां पर्वतसदृशी सुविस्तीर्णा।
गगनस्पर्शपटलिका गङ्गास्नानेन लोपिता मयका।।६१६९।।

गङ्गास्नानबलेन तु सर्वान्पापान्प्रकुर्वाणाः।
निचिन्ता इव सन्तो मुच्यन्ते सर्वथा क्लेशैः।।६१७०।।

पापानां संस्मरणादतिदूरे ते स्थिताः सन्तः।
गङ्गाबलमासाद्य तु परमे लोके महीयन्ते।।६१७१।।

पद्माकरेण कविना व्रजभाषा छन्दसां लेखे।
यमराजस्य कथा सा कार्यालयगा समीपतो लिखिता।।६१७२।।

पद्मकरस्य सुकवेर्गङ्गावर्णनमिहाऽधीत्य।
गङ्गारूपमनन्तं श्रद्धाभारैर्विनम्रमाकुरुते।।६१७३।।

पण्डितराजसुमित्रं धन्यः पद्माकरः सोऽयम्।
हिन्दीव्रजभाषायां गाङ्गं वारि प्रवाहयामास।।६१७४।।

गङ्गावतरणकाव्यं निर्मायाऽयं जगन्नाथः।
भूयोऽप्यवातरद्वा गङ्गाया वर्णनं कर्तुम्।।६१७५।।

यथा कंथंचिद्वैकं छन्दो द्वित्राणि वा गङ्गा।
विषये रचितानि स्युस्तेषां संख्या सहस्रेषु।।६१७६।।

शतशः सहस्रशो वा येयं सा छन्दसां रचना।
अष्टकशतकादीनां या रचना सात्वनुध्येया।।६१७७।।

गद्ये काव्ये गङ्गा सर्वत्रैवाऽथ चर्चिता कविभिः।
उपमनीभूतेयं सर्वाधारा तु विदितैव।।६१७८।।

रघुवंशे गङ्गाया यानि च्छन्दांसि रचितानि।
कविकुलगुरुणा नित्यं तानि शृङ्गाररूपाणि।।६१७९।।

भासेन नाटकावलिरचनाकालेऽथ गङ्गेयम्।
वर्णितविभावविभवा नैकत्राऽलोकनीयैव।।६१८०।।

भवभूतिमहाकविना गङ्गाया मानुषं रूपम्।
प्रकटीकृतं समन्तात्सा परिपाटी तु धन्यैव।।६१८१।।

अद्यत्वेऽपि तु सेयं गङ्गा संसारसारसर्वस्वम्।
वैदेशिकमूर्धन्या आयान्त्यापि गङ्गायाम्।।६१८२।।

दिव्यतरे परिवेशे विख्याते वा हरिद्वारे।
वैदेशिकायायावरपूर्णस्थानानि भासन्ते।।६१८३।।

किं वा प्रयागनगरे संसारस्थाऽन्यदेशीयाः।
सर्वं त्यक्त्वा गङ्गां सेवन्ते शोभनैर्भावैः।।६१८४।।

वाराणस्यामस्यां वैदेशिकसार्थमालेयम्।
घट्टे घट्टे दृश्या गङ्गामासेवमानैव।।६१८५।।

काश्यां गङ्गा माता शिवत्रिशूले विराजमानेव।
दक्षिणदिशा विशेषादुत्तरदिग्वाहिनी जयति।।६१८६।।

गङ्गाया दृश्यावलिरेषा काश्यां विराजते दिव्या।
निखिलेऽस्मिन्संसारे नान्यत्र क्वापि सा लभ्या।।६१८७।।

रामनगरदुर्गादथ जातेयं वा प्रवाहपरिवर्तैः।
उत्तरदिक्प्रविभागं विवेचयन्ती विराजते काश्याम्।।६१८८।।

ब्रह्मकुण्डसंस्थाने दिव्ये नगरे हरिद्वारे।
गङ्गामन्दिरपूजा संरम्भो दृश्यतेऽथ सायान्हे।।६१८९।।

सर्वेषां देवानामुपस्थितौ यत्र गङ्गायाः।
आरार्तिकमिह विश्वं विकल्पयति मांङ्गलिकनिवहे।।६१९०।।

येयं शरीररचना सर्वेषां कोटि-कोटि-संख्यायाम्।
सन्दृश्यते समन्तात्सा सर्वा योनिशब्देन।।६१९१।।

संकथिता परिणामे पुराणभाषा प्रवाहसंकलिता।
गङ्गाधारास्पर्शं किञ्चिद्वाऽसाद्य मुक्तिमायाता।।६१९२।।

गङ्गा माता सेयं समुद्धरति सत्वरं तनयान्।
तेषां दुःखार्तानां रूपं तत्कष्टदं भवति।।६१९३।।

दूरयति दुरितदाहं गङ्गामाता ह्यनुध्याता।
गङ्गागङ्गारटने पूर्णं पावित्र्यमायाति।।६१९४।।

गङ्गाजलमिदममृतं दुरितज्वालाप्रदग्धानाम्।
गङ्गाजलसंस्पर्शे सर्वं श्लोकं समश्नुते मनुजः।।६१९५।।

गङ्गा ददाति नित्यं परमं सौभाग्यमारोग्यम्।
सर्वविधां सम्पत्तिं वितरति गङ्गा स्वभक्तेभ्यः।।६१९६।।

गङ्गादर्शनवन्दनसम्यक्संस्नावेलासु ।
यद् यद् घटतेऽन्तरतमभागे तत्को विजानीयात्।।६१९७।।

सद्यः सौख्यविहारान्संयच्छति सेविता गङ्गा।
सर्वं समीहितं वा क्षणसंचारे समादिशति।।६१९८।।

भक्तानां निःश्रेयसमपि प्रयच्छति परं गङ्गा।
नो कश्चिज्जनीयादिति प्रसङ्गे समारचितम्।।६१९९।।

गङ्गेयमालपन्ती सर्वं ज्ञानं ददाति तनयेभ्यः।
सकलज्ञानपरिप्लुतसन्दोहैः संप्रपूरितो मनुजः।।६२००।।

कीदृग्विधमज्ञानं दूरीभूतं न गङ्गायाम्।
स्नात्वा जलमथ पीत्वा संप्रार्थनयाऽथ सेव्यमानायाम्।।६२०१।।

प्राभातिसुषमेयं गङ्गायास्तादृशी जयति।
या न कुत्रचिल्लभ्या प्रातःकालेषु संसारे।।६२०२।।

आकूतमिदं सर्वं गङ्गाया यो हि जानीयात्।
सकलं रहस्यजातं जानीयादेव नास्ति सन्देहः।।६२०३।।

विश्वगुरुत्वं लभ्यं गङ्गामातुः प्रसादेन।
सर्वेऽपि ते हि गुरवो गङ्गायाः सत्प्रसादसंभूताः।।६२०४।।

माता गङ्गा साक्षाज्जननी सेयं तरङ्गाणाम्।
संसारस्थितनिखिलैः प्रपूजिता दिव्यदेवीयम्।।६२०५।।

१८४.अलङ्काराः

कवितायां कमनीयत्वं ह्राऽस्तेऽप्यथवा यदैवेदम्।
ज्ञातं भूयान्नु तदा काव्याऽस्वादः प्रजायेत।।६२०६।।

ये चैते विद्वांसो मननं नूनं विधाय निखिलानाम्।
काव्यानां सौन्दर्याऽऽस्वादनिमग्नाः स्थिताः सन्तः।।६२०७।।

अन्यान्सधर्मयुक्तान्स्वीयानुभवेन संयुक्तान्।
कर्तुं विवृण्वते तत्सर्वं ते वन्दनीयाः स्युः।।६२०८।।

सर्वेषामथ तेषां सादृश्येतरसमूलानाम्।
काव्यालङ्काराणां साहित्ये दीपिता सरणिः।।६२०९।।

काव्ये तथैव न स्युस्तेऽलङ्कारा यथा रमणी-
वपुषि नितान्तं कान्तेऽलङ्काराः सन्निवेश्यन्ते।।६२१०।।

काव्यशरीरे चैतेऽलङ्काराः पूर्वमेव संधिस्थाः।
कविवाणीनामेषाऽलङ्कारैः संस्कृता सरणिः।।६२११।।

एते चालङ्कारा यया दिशा संविभासन्ते।
सा दृष्टिः संकथिता शास्त्रग्रन्थेष्वपोद्धृता दृष्टिः।।६२१२।।

यस्मिन्वा सत्काव्ये या वाणी तावदभिनवया।
भङ्ग्योद्भूभता जाता जातो नव्योह्यलङ्कारः।।६२१३।।

भङ्गीनामानन्त्याद्वर्गाश्चैते प्रकल्प्यन्ते।
वाचां तरङ्गभावा कुत्राप्येतेषु सम्मिलिताः।।६२१४।।

एतेषामध्ययने यद्येते परिचिताः सन्तः।
स्वाध्याये सम्मिलितास्तदा विदां कोऽपि सन्तोषः।।६२१५।।

प्रादुर्भावं यातः सशिरःकम्पं तमानन्दम्।
कविप्रस्तुतं नित्यं परिचिन्वन्त्येव विद्वांसः।।६२१६।।

यद्येता वा वाचां वीचय एवं विधा न स्युः।
धर्मशास्त्रसदृशानि तु रचितानि स्युः सुकाव्यानि।।६२१७।।

पर्यन्ते रससागरमज्जनवेला यदाऽऽयाति।
तावत्पर्यन्तमिमेऽलङ्कारा दीपिताः सन्तः।।६२१८।।

कुर्वन्ति मार्गमखिलं प्रोज्ज्वलताभिः समायुक्तम्।
यस्मिन्नग्रे चाग्रे गन्तुं सर्वाः प्रवृत्तयो भान्ति।।६२१९।।

का वा सा भाषा स्यात्तेषामेषां स्वरूपसंकलने।
सा निर्विवादरूपा कदापि भवितुं समर्था नो।।६२२०।।

कविताकामिन्यास्तत्सौन्दर्यं वर्धते नूनम्।
क्षणशः क्षणशो नित्यं किं वा तत्रापि विवरणं भूयात्।।६२२१।।

किन्तु तथापि तु सद्यो रूपेणैवात्मसात्कर्तुम्।
नाना व्याहृतयो वा रचितविभावाः समाश्वस्ताः।।६२२२।।

नानाऽऽचार्यविरचिताऽलङ्कार-ग्रन्थदीप्तीनाम् ।
शुभ्रतरो ह्यकाशो निर्मलभावान्समर्पयति।।६२२३।।

कविभणितीनां साऽदिमशक्तिर्वा शब्दमयरचना।
आसृष्टेरारम्भादद्यावधि या सुशोभयति निखिलम्।।६२२४।।

शब्दार्थालङ्काराः कवितायां ते विभासन्ते।
तेषामेषा सरणिर्विमोहयत्येव संसारम्।।६२२५।।

शब्दालङ्काराणां या विच्छित्तिर्वा समीक्ष्यैनाम्।
शब्दमित्रतां याताः कवयः सर्वे प्रसीदन्ति।।६२२६।।

कर्णे स्वर्णिमशोभां निवेशयन्ती मनोरुचिरा।
स्वरझंकृतिरियमसमा कवितायाः शोभिता धारा।।६२२७।।

श्रीराजशेखरोऽयं शब्दे पाकं समाख्याय।
अनुरणनरूपतायां संहतिरेषाऽत्र सत्काव्यम्।।६२२८।।

शब्दानामर्थानां संहतिरेषाऽत्र सत्काव्यम्।
सूते जगदाधारं परमेश्वरसृष्टिसन्मित्रम्।।६२२९।।

काव्यमयी संरचनाऽलङ्कारेषु प्रजागर्ति।
नाना रङ्गमयी वा चित्राणं सृष्टिरिव सेयम्।।६२३०।।

शब्दानामथगुम्फे या मैत्री जायते सततम्।
धाराप्रवाहपतिता कविता सौन्दर्यमत्रैव।।६२३१।।

अर्थानां यः कश्चिद् विकासमयतासमाचारः।
शब्दानामाधारे प्रतिष्ठितोऽसौ समाम्नातः।।६२३२।।

तेनासौ जयदेवः पण्डितराजो जगन्नाथः।
शब्दस्य प्राधान्यं काव्ये संसाधयाञ्चक्रुः।।६२३३।।

यदि शब्दाः संस्फुरिता वाणीयं सुप्रसन्नैव।
तेनालङ्काराणां गुम्फे कौतुकसमावेशः।।६२३४।।

शब्दार्थकौतुकमयी कान्तामितदेशनाजुष्टा।
कवितायाः सृष्टिरियं किञ्चित्कमनीयमासूते।।६२३५।।

कविता शोभितकाया वनितेवाऽल्हादयति कामम्।
ते ते तेऽलङ्काराः शोभित संसारसर्वस्वाः।।६२३६।।

सर्वशोभना धाराऽनुप्रसानां तु संरचना।
कर्णेऽर्पितमाधुर्या नवां नवां स्फूर्तिमातनुते।।६२३७।।

यमकानां रचनायां कविवर्यास्ते च निष्णाताः।
झणितरणितमाधुर्यं यमकेषु स्फोरयन्ति तड़िदाभम्।।६२३८।।

वार्तालापेष्वथवाऽनुप्रसानां च माधुर्यम्।
अलिखितसत्कवितायाः संसृष्टिं नूनमातनूते।।६२३९।।

आरभ्य तु वाल्मीकिं कालीदासः कुमारदासाद्याः।
साऽनुप्रासपदावलियमकादीनां सुगुम्फने सिद्धा।।६२४०।।

माघेन महाकाविना भारविणा वाऽथ काव्येषु।
सर्वविधाऽनुप्रासा यमका नूनं समाऽरचिताः।।६२४१।।

संस्कृतभाषारचिता कविता नूनं प्रकृष्टतरा।
ब्रजभाषासंरचितं काव्यमनुप्राससुस्वाद्यम्।।६२४२।।

अन्त्यानुप्रासानां सर्वास्वपि काव्यरचनासु।
अनिवार्यत्वं जातं संस्कृतकवितास्थितिर्नैषा।।६२४३।।

श्लेषाऽलङ्कारोऽयं विभूतिरूपः सदा काव्ये।
एकः प्रोक्तः शब्दो यत्रोऽनेकार्थमभिधत्ते।।६२४४।।

अर्थालङ्काराणां श्लेषोऽयं विद्यते शरणम्।
सारूप्ये साधर्म्ये शब्दादर्थद्वयोपलब्धौ यत्।।६२४५।।

उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान्।
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः।।६२४६।।

सैषोपमा नितान्तमर्थान्सर्वांश्चमत्कुरुते।
सारूप्यं साधर्म्यं तत्रास्ते प्राणदायकं तत्त्वम्।।६२४७।।

यदा यदैवोच्छलितं मनो मदीयं तदैव सारूप्यम्।
यत्किञ्चिदपि कुतश्चिद्वक्तुं सोल्लासमायातम्।।६२४८।।

उत्प्रेक्षाऽलङ्कारः कश्चिदयं सर्वशीर्षस्थः।
यत्र मनोमयराज्ये द्वाराण्युद्घाटितानि स्युः।।६२४९।।

उन्प्रेक्षावल्लभ इत्युपाधिना कोऽपि संयुक्तः।
कवितावनिताकान्तः प्रसादभाषां प्रसादयन्नास्ते।।६२५०।।

रूपकनामाऽन्योऽयं सर्वालङ्कारऋतुराजः।
आरोपणा नितान्तं यत्र प्रोल्लासमुपयाति।।६२५१।।

सुन्दरतरमिदमारादाभातं रूपकेणेदम्।
कवितानवशृंङ्गारं रचयति वा रूपकः कश्चित्।।६२५२।।

अतिशयोक्तिरिति नाम्ना संसिद्धोस्त्ययमलङ्कारः।
यत्रोपमानतायामुपमेयोऽयं निगीर्णः स्यात्।।६२५३।।

मुखमद्भुतमिति वक्तुं मुखस्य नामापि न ग्रह्यम्।
चन्द्रोऽयमिति समर्पणरूपं तत्र प्रकाशनीयं स्यात्।।६२५४।।

सौन्दर्योन्मेषाणां समर्पणे निखिलमैश्वर्यम्।
औपम्ये परिपीता चैषा नानाविधा भणितिः।।६२५५।।

नाना भणितिविशेषानासूते काव्यसंसारः।
तेषां ये वा भेदास्ते नूनं नामतः ख्याताः।।६२५६।।

पारस्परिकविरोधे लोके लोके विलोक्यते योऽयम्।
कवितायाः संसारे सादरमेषोऽस्त्यलङ्कारः।।६२५७।।

पारस्परिकविरोधे भणितिविशेषे समाश्रिते दान्ते।
मानसिके संसारे सहृदयसंवादमासूते।।६२५८।।

भिन्नाऽऽधारविशेषाहृतमनसां कविवरेण्यानाम्।
चित्राः सूक्तय एताः शोभन्ते वा मनोमये गगने।।६२५९।।

ये चैतेषां रूपं लक्षणनिर्माणकुशलत्वात्।
सोदाहरणं लक्षितवन्तस्ते नूनमाचार्याः।।६२६०।।

काव्यानां निर्माणे ये सिद्धाः सन्ति ते कवयः।
ये लक्षणसंकीर्तनदक्षास्ते सन्ति चाचार्याः।।६२६१।।

नानाविधलक्षणसंकीर्तनमेतद्यदा यदा जातम्।
स्वीयेष्वथ शब्देषु प्रकाशितान्येव लक्षणानि निखिलानि।।६२६२।।

संसारेषु यथा वा सादृश्याणां विलोक्यते महिमा।
नूनं तथा महत्त्वं विरोधिनां संप्रदृश्यतां नाम।।६२६३।।

नास्ति कोऽपि संसारे तादृशभावस्थितो जन्तुः।
यस्य तु विरोधतायां कश्चिद्वा संस्थितो न स्यात् ।।६२६४।।

प्रबलानामपि तेषामल्पबलैः सह विरोधेऽपि।
अल्पबलानां शरणं भगवानेवाऽत्र संजातः।।६२६५।।

तेषां कथैव चान्यान्या सा कथितुं पुनर्युक्ता।
येषां विरोधभाषा समानरूपे समाश्वस्ता।।६२६६।।

किन्तु स एष विरोधो कवितायां वर्णितो यदा भाति।
पर्यन्ते साकल्यं तत्रानुस्यूतमेवाऽस्ते।।६२६७।।

अत एव चाऽस्य संज्ञा चास्ते विरोधाऽभास इति।
कथिता पुनरथ सोऽयं श्लेषं सम्यक् परामृशति।।६२६८।।

बहवस्तु तत्र भेदा दृश्यन्तेऽस्मिन्नलङ्कारे।
ते सर्व एव कविना नवशृंगारे नियोज्यन्ते।।६२६९।।

आश्रमसंस्कृतिरासीदस्मद्देशे तथाऽदर्शा।
सिंहो मृगश्च यत्रैकस्थौ सन्मित्रतां यातौ।।६२७०।।

एवं चाऽत्र जगत्यां ये ये सन्त्येव सद्भावाः।
मैत्री तत्र विरोधः क्षणशः क्षणशः स्थितो दृष्टः।।६२७१।।

काव्यानुभूतिरूपा यैषा नवरसमयी सृष्टिः।
तत्राऽपि सन्ति ते ते विरोधमूलाः स्वभावसंरम्भाः।।६२७२।।

परिहारोऽपि च नूनं कर्तव्यस्तत्र सर्वत्र।
येनाऽस्यां कवितायां कमनीयत्वं न भज्येत।।६२७३।।

उपमायां सम्राडपि सोऽयं कविकुलगुरुः कश्चित्।
दिव्यानि तानि चित्राण्यवतारयते विरोधानाम्।।६२७४।।

एके सन्ति विरोधाः कमनीया येषु दृष्टेषु।
कमनीयसमाचाराः शोभन्ते चिद्विलासेषु।।६२७५।।

अथ हेतुतासमर्पित आस्तेऽसौ काव्यलिङ्गो वा।
यस्य प्रदुर्भावश्चार्थानां वर्धको जातः।।६२७६।।

अनुमानालङ्गारे स्थितिरेषाऽन्यादृशी जाता।
यत्राऽस्ते हेतूनामुक्तिविशेषेषु सर्जना विपुला।।६२७७।।

संख्यानां सत्कारेऽसौ प्रथमानो यथासंख्यः।
किमपि चमत्कारं वा विलक्षणं स्वात्मसात्कुरुते।।६२७८।।

सर्वाऽप्येषा सरणिः प्रियप्रिया चाऽस्ति कवितायाः।
यस्या विमोहने सा तृप्तिः काचित्समायाति।।६२७९।।

कवितासौन्दर्याणां नामेदं वाऽस्त्यलङ्कारः।
सौन्दर्य पर्यायास्तावदिमे सन्त्यलङ्काराः।।६२८०।।

रस एवैकः प्राप्यः सर्वस्यैवाऽथ काव्यवर्गस्य।
सैषा रसानुभूती हृदये हृदये प्रतिष्ठिता जयति।।६२८१।।

एवमलङ्काराणां प्रकथनतासाधुरीतीनाम्।
कवितासौन्दर्याणां वृद्धिकरत्वं सुविस्पष्टम्।।६२८२।।

यत्राऽलङ्काराणां कुत्राऽपि स्पर्शमात्रं वा।
न स्यात्तत्राऽनुभवो ज्ञाप्यो रसवत्त्वलङ्कारः।।६२८३।।

रसगङ्गाधरनामा ग्रन्थो लिखितुं समारब्धः।
किन्तु त एते सर्वेऽलङ्कारा एव तत्र राजन्ते।।६२८४।।

काव्यालङ्काराणां सञ्जातःकोऽपि तादृशो महिमा।
काव्यस्य शास्त्रमखिलं कथितमलङ्कारशास्त्रं वा।।६२८५।।

कवयस्तथा च सर्वेऽलंकारिकसंज्ञया कथिताः।
संजाता सैषाऽस्तेऽलङ्काराणां निवेशसंसिद्धिः।।६२८६।।

ये वा धनिकप्रवरा संसारे भूरि राजन्ते।
ते स्वर्णालङ्कारान्क्रीणन्त्येवाऽसमान्नित्यम्।।६२८७।।

तेषां किल सुन्दर्योऽलङ्कारैस्तैरलङ्कृता नित्यम्।
विहरन्ति जगति सत्यं विभावभावैः समुद्दीप्ताः।।६२८८।।

काव्ये तथैव चैतेऽलङ्कारैर्दीक्षितस्वान्ताः।
कविवार्यास्ते धनिकाः स्वीयां कवितां प्रसाधयन्त्येव।।६२८९।।

धन्या तेषां कविता नानाऽलङ्कारमण्डिताङ्गी सा।
यस्याः सविधे निखिलो जन्तुः केवलसुखाऽनुभवमग्नः।।६२९०।।

विगलितवेद्याऽन्तरता याऽनन्देष्वेवमुच्छलति।
तस्यामिमे निकामं प्रसादमायान्त्यलङ्काराः।।६२९१।।

पर्यायोक्ताऽऽस्वादः कथयितुमपि नैव शक्यो वा।
यत्र व्यंग्यविशेषो वाच्ये पर्यायतां यातः।।६२९२।।

सर्वाऽलङ्कृतिराजोऽप्रस्तुतशंसाऽस्त्यलङ्कारः ।
नव्ये हिन्दीकाव्ये छायावादोऽयमाभातः।।६२९३।।

अर्थान्तरसन्न्यसने प्रियः प्रियोऽर्थान्तरन्यासः।
हृदयं मोहयतीयं वाणी कविपुरुषसंचारा।।६२९४।।

सर्वा सूक्तिमयीयं विलासयति झंकृतिं रुचिराम्।
सूते हृदयाऽलिन्दे रसनवधाराऽवृताऽभरणाम्।।६२९५।।

पञ्चदशद्वीपः

१८५.वैतण्डिकः

यो हि तितण्डावादी वैतण्डिक एव स ज्ञेयः।
परोक्तिमत्र श्रोतुं नो वायं स्वं मनःकुरुते।।६२९६।।

परेण यत्संप्रोक्तं तत्सर्वं दूषणग्रस्तम्।
तस्य कथनमात्रं दोषैर्युक्तं समाभाष्यम्।।६२९७।।

कथं नाम ते दोषा स्तस्योक्तौ वा समायाताः।
इतिहासं च तमेतं ते ते ते साधु कथयन्ति।।६२९८।।

किन्तु स्वीयं किञ्चित् मतवादं तत्र विषये वा।
सम्प्रोक्तुं नैवास्ते विचारसारस्थितं भाति।।६२९९।।

यो हि वितण्डावादी वादकथां नो विजानाति।
अन्येन केनचिद्वा यत्प्रोक्तं खण्डनीयं तत्।।६३००।।

अस्मन्मतमेतद्वा सर्वमतोपरि सुविज्ञेयम्।
अन्ये ये मतवादास्ते कोणेषु स्थिता एव।।६३०१।।

संसदि सर्वदलानां ये प्रतिनिधयो वितिष्ठन्ते।
ते नित्यं हि वितण्डामेवाश्रित्यैव कथयन्ति।।६३०२।।

सत्तापक्षविखण्डनमेव विपक्षस्थितानां वा।
कर्तव्यत्वेन समन्तात् गृहीतमेवास्ति धर्मोऽयम्।।६३०३।।

शासनपक्षेऽभिमता नेतारस्ते विमतपक्षम्।
सर्वत्र दूषयन्ते जनतां सम्बोद्यन्ति ते नित्यम्।।६३०४।।

वैतण्डिकस्तु सोयं नेतृजने कलहमातनुते।
अधिकारारोहणमथ कर्तुं सर्वेऽभिवाञ्छन्ति।।६३०५।।

तस्मिन् वा शुभकार्ये वैफल्यं जायते यत्र।
तत्रोन्मादाः विविधाः राज्यसभा संसदि च दृश्याः।।६३०६।।

१८६.विश्वासाः

विश्वमासते यस्मिन्सोऽयं कथितोऽस्ति विश्वासः।
देवे गुरौ च पूज्ये पुरुषे विश्वं समासते निखिलम्।।६३०७।।

श्रीकृष्णेन भगवता स्वीये मुख एव निखिलविश्वम्।
सन्दर्शितामभिवर्णितमास्ते शब्देषु प्रत्यक्षम्।।६३०८।।

अर्जुनाय वा भगवान् श्रीकृष्णो विश्वरूपमिदम्।
कुरुक्षेत्रभूमावथ काले सन्दर्शयामास।।६३०९।।

यत्र यत्र वा यस्य तु विश्वं स्वीयं विराजमानं स्यात्।
तस्य तत्र विश्वासः नो वा वारयितुमथ शक्यः।।६३१०।।

विश्वासोऽयं द्विविधोन्धो वा विश्वास इत्येकः।
कारणपरम्परायामोतप्रोतो द्वितीयः स्यात्।।६३११।।

अद्य यत्तु सकारणमासादितमन्धरूपतापत्तौ।
तस्य कियानपि कालः समपेक्ष्यो जायते नाम।।६३१२।।

कारणगततर्कावलिरेषा लुप्ता यदा जाता।
क्रियारूपमवशिष्टं त्वन्धो विश्वासएवायम्।।६३१३।।

सर्वे ये विश्वासान्निरिवलान्संधरयन्तितराम्।
नहि ते सर्वां कारणमालामथ तत्रत्यां विजानन्ति।।६३१४।।

एतद्वै करणीयं पूर्वैःकृतमेतदेवमेवैतद्।
प्रश्नमनुत्थायेत्थं करणीयं स्यात्समीहितं सर्वम्।।६३१५।।

एष एव विश्वासोऽन्धोऽवा प्रकटित विभावो वा।
सर्वत्रैव निकामं पूर्णे रूपे समालोक्यः।।६३१६।।

पूज्योऽस्माभिः कृष्णो बुद्धो वा रामचन्द्रो वा।
कालीमाता यद्वाऽल्लाहो वा ख्रीष्ट इत्यपि वा।।६३१७।।

कदाचिदपि कैरपि वा दृष्टाः स्पृष्टाः निकामसन्तुष्टाः।
कश्चनैकविश्वासः सर्वां परिपूर्तिमानयति।।६३१८।।

विश्वासादपि पूर्वं श्रद्धा संतानमनिवार्यम्।
दोषदर्शनं न स्याद्यत्र तु सा सा भवति श्रद्धा।।६३१९।।

दोषाणां श्रद्धायाः सहभावोनोदयो भूयात्।
दोषदर्शनाऽभावः श्रद्धाया मूलमास्थेयः।।६३२०।।

दोषा भवन्तु नाम नाऽस्माकं तेन कापि हानिः स्यात्।
वयं न तत्पश्यामस्तावद्वा श्रद्धयोपेताः।।६३२१।।

यत्र श्रद्धा जाता विश्वासस्तत्र संप्राप्तः।
अस्माकं विश्वं किल तत्रैव स्वां स्थितिं लभते।।६३२२।।

तुलसीदासः प्रणमति श्रद्धारूपां भवानीं ताम्।
शंकरश्च भगवानथ विश्वासेनैकरूपोऽयम्।।६३२३।।

एताभ्यां तु विना नो स्वावस्थोऽपीश्वरो नित्यः।
नो वा द्रष्टुं शक्यः भ्रमिः श्रमो वाऽस्ति केवलं निखिलः।।६३२४।

विशेषेण श्वासानां सञ्चारयिताऽथ विश्वासः।
विश्वासे संजाते श्वासास्तावत्सुनिश्चिता जाताः।।६३२५।।

श्रद्धा सर्वत्र स्यात् जगति च विश्वासधारेयम्।
संसारे निखिलेऽपि स्वीयां व्याप्तिं समश्नुते नित्यम्।।६३२६।।

सर्वे वयं स्वकीये विश्वासे एव जीवामः।
विश्वासाऽभावे वा दर्शणमात्रेण जीवनं नश्येत्।।६३२७।।

१८७.श्रीहर्षवन्दना

महाकविर्नमनीयः सिद्धो चिन्तामणेर्मन्ये।
कवितर्कोभयसंगतवैशिष्ट्यैर्युगपदामृष्टः ।।६३२८।।

दिव्यं च नैषधीयं चरितं तं कंचिदाश्रित्य।
छन्दोमालाकवितास्वर्णमयीयं समर्पिता वाचि।।६३२९।।

खण्डनखण्डं खाद्यं विख्यातग्रन्थमेकमेवैतत्।
निर्माय च वेदान्तस्यादिमपदमात्मसात्कुरुते।।६३३०।।

राज्ञो नलस्य तावल्लोकोत्तरतां समालोक्य।
दमयन्तीं लोकोत्तररूपामाकारयामास।।६३३१।।

महाभारते तावद्वनपर्वणि संचिता गाथा।
शाकुन्तलावरसमीलितविभवा समानीता।।६३३२।।

विवरणवर्णन विपुला शाब्दीधारा प्रवर्तिता हर्षे।
हंसनिनादसुरमिता शुभ्रा सौवर्णगाथेयम्।।६३३३।।

मनसि स्थितं तमेतं दिव्यतरं मेघदूताख्यम्।
छायाग्रहसम्पुष्टं हंसं दूतं समर्पितवान्।।६३३४।।

छन्दोमयी च तावत्संपुष्टिः साथ कवितायाः।
बृहत्त्रयी स्थितनैषधमहाकवित्वे सुपरिणमिता।।६३३५।।

मम्मटभट्टविवेचित संवादे श्रीहर्ष किंवदन्तीयम्।
काव्येऽस्मिन्दोषाणां संचारं नूनमामृषति।।६३३६।।

किन्तु किंवदन्तीयं मम्मटमुखतो विनिर्गतां शंसाम्।
कथयन्तीव निवेदितविभवासौ नैषधीयसच्चरिते।।६३३७।।

गौडीडम्बरबद्धा रीतिः काचिन्मसृणिता कविना।
मुखरोहणनैपुण्यं सहृदयहृदयेषु संधत्ते।।६३३८।।

तं च स्वर्गमयं वा विश्वं भूमौ समवतार्य।
इन्द्रादिदेवसार्धं नलं तु संयोजयामास।।६३३९।।

दिव्ये स्वयंवरे वा सरास्वती सा स्वयं देवी।
कविनिबद्धवाणीनामुच्चारणवैभवैर्मान्या ।।६३४०।।

श्रीहीरस्तु वरेण्यो माता मामल्लदेवी सा।
श्रीहर्षं सुतमेकं समर्प्य निश्रेयसे याताः।।६३४१।।

सुगभीराऽपि नितान्तं तृप्ता श्रीहर्षवाग्धारा।
स्वीयं प्रसादममलं पदे पदे वा विलासयति।।६३४२।।

नैषधकाव्याध्ययनं पाठः सोऽयं प्रसन्नवाणीनाम्।
शुष्कहृदयमपि सरसं सद्यः कुरुते विनाऽयासम्।।६३४३।।

शवसाधना च सिद्धिस्तस्मिंश्चिन्तामणेर्मन्त्रे।
श्रीहर्षभुवनगाथां विदां मुखे धारयामास।।६३४४।।

एतस्य तस्य सुकवेः श्रीहर्षस्याथ लोकेस्मिन्।
ज्ञातारोल्पीयांसः नाम तु सर्वत्र संव्याप्तम्।।६३४५।।

१८८.चैत्रचरित्रम्

वसन्तिकावसाने चैत्रे चित्रं चरित्रमिदम्।
पुरतो निभाल्यमानं सर्वं पुलकान्वितं कुरुते।।६३४६।।

नाना नवीनशोभा संभारैर्भ्राजितं विश्वम्।
नेत्रसम्पुटैः पेयां शोभां तां तां विलासयन्नास्ते।।६३४७।।

जगदीश्वरी प्रसन्ना चैत्रे शुक्ले सुपूजिता माता।
संसारप्रसवित्री व्रतोपवासैः समर्पिता मान्या।।६३४८।।

श्रीरामजन्मतिथिरथ रामनवम्यां सुविख्याता।
संसारतारणार्थं पूर्णोऽयं मानवः प्रथितः।।६३४९।।

नरसिंहवामनाख्याऽववतारौ पूर्णमानवे रूपे।
पूर्वं सजातावपि मनुजे रूपे कलामात्रौ।।६३५०।।

किञ्चित्पूर्वं भगवान् परशुं स्वीये करे कृत्वा।
धार्मिकसमाजमखिलं सम्यक् सन्तोषयन्नासीत्।।६३५१।।

श्रीरामचन्द्रभगवान् मर्यादानां समुद्रोऽपि।
पुरुषोत्तमत्वमखिलं संसारे दर्शयामास।।६३५२।।

चैत्रे शुक्लनवम्यां तस्यैवैतस्य रामचन्द्रस्य।
जन्मोत्सवोऽपि निखिले संसारे साध्यते सर्वैः।।६३५३।।

चैत्रचरित्रविवेचनवेलायामेतदाश्चर्यम् ।
मासस्य मध्यकाले संजातो वत्सरारम्भः।।६३५४।।

मासारम्भे नैव प्रजायते वत्सरारम्भः।
पूर्वो भागः कृष्णः व्यतीत्य शुक्लो यदायातः।।६३५५।।

प्रतिपदि नवसंवत्सरवर्तनमिदमति कुतुकमूलम्।
किमत्र कारणं-मृग्यं ज्योतिषशास्त्रं विजानीयात्।।६३५६।।

अस्मत्कृते तु चैत्रे वैचित्र्येणान्वितं चित्रम्।
एकां वृद्धिं कुरुते चैत्रे चित्रं चमत्कुरुते।।६३५७।।

शासनसंगतमखिलं देशेऽस्मिन्नर्थसागरं रम्यम्।
मासेऽस्मिन्नखिलचरां परिपूर्तिं कर्तुमायतते।।६३५८।।

मार्चमासपर्यन्तं यद् यद् व्ययमभिमतं कर्तुम्।
तत् सर्वं परिपूर्तिं गच्छति ते नैव संचारः।।६३५९।।

अर्थिकवर्षस्यायं प्रारम्भोऽथ च परिपूर्तिः।
ईशवीयसंवत्सरद्वयमेकत्वेनैव धारयति।।६३६०।।

अर्थवर्षपरिगणने प्रचलितवर्षस्य गणनैका।
या हि जनवरी मासादारभतेऽथो दिसम्बरं यावत्।।६३६१।।

ततो पुनर्नववत्सरपरिगणना जायते नाम।
अतोऽर्थात्मके वर्षे वर्षद्वयमात्मसात्कुरुते।।६३६२।।

आंग्लशासकैः पूर्वं सैषा परिचालिताऽस्ति परिपाटी।
स्वातन्त्र्ये खलुजाते शिरसा संवाह्यतेऽत्रत्यैः।।६३६३।।

प्रकृतिश्चित्रे चित्रं सद्यः परिवर्तयति चैत्रे।
शीतो दूरे यातो घर्मो विशतीति चित्रपरिवर्तः।।६३६४।।

१८९.पुस्तकानि

अक्षरमाला सेयं पुस्तकरूपे समाभाति।
पुस्तकालयेऽमृतमयकलशान्येतानि शोभन्ते।।६३६५।।

बहवो जीवितपुरुषाः मृताश्च बहवो महापुरुषाः।
पुस्तकालये नितरां सहस्थितास्ते सुशोभन्ते।।६३६६।।

पुस्तकरूपं तदिदं वाण्या लिपिरूपतां यातम्।
वैखर्या वाचो वा प्रतिरूपेण प्रकटितं जातम्।।६३६७।।

वाण्यामाभ्यन्तर इव बाह्यं निखिलं प्रयत्न जातं वा।
उच्चनीचरवयोगः श्रोतुः कर्णे समाविशति।।६३६८।।

वैखर्या वाचो यद् रूपं तद् वै द्वितीयमपि कश्चित्।
संबोध्यं संवाञ्छति नोचेन्निखिला विड़म्बनेयं स्यात्।।६३६९।।

अर्जुनमेकं नाना प्रश्नान् कर्तुं समीपस्थम्।
सम्बोध्यैव भगवता गीता प्रोक्ता सुवर्णवाणी सा।।६३७०।।

उच्चरितप्रध्वस्तयस्वरूपा त वैखरी वाणी।
लिपिस्वरूपनिविष्टा नित्याक्षररूपिणी जाता।।६३७१।।

पुस्तकरूपप्राप्तौ वैखर्या सा परमकान्तिः।
समीहिता संलब्धा यस्याः संग्राहकाः सर्वे।।६३७२।।

विस्तारः क्षेत्रं वा मध्यमवाचोऽति विस्तीर्णम्।
यत्रार्थाः शब्दा अपि रूपे रंगे समायान्ति।।६३७३।।

अद्य तु हस्तलिपीनां स्थाने सन्मुद्रितं रूपं।
सर्वत्रैव सुदृश्यं हस्तलिपीनां न दर्शनं लभ्यम्।।६३७४।।

कालिदासवाणीनां हस्तलिपिः कुत्र लभ्यतां नाम।
लेखकलिखितललाटा लिपयो लोपं गता लीनाः।।६३७५।।

सरस्वती देवीयं नवनवरूपाणि धारयति।
पुस्तकालयास्ते ते देव्या सन्मन्दिराणि दीप्यन्ते।।६३७६।।

चूडान्तपण्डितानां गेहे सत्पुस्तकानि निखिलानि।
यत्र तत्र सर्वत्रैवोल्लसितायारात्समाभन्ति।।६३७७।।

पुस्तकपुस्तकचयने मनने संशोधने रचने।
आकारे संस्कारे परिकर एको विनिर्मितो जातः।।६३७८।।

वैभवैस्तु संयोगे व्यापारास्ते प्रचालिताः सन्तः।
पुस्तकविलेखनानां प्राचुर्यं वा समादिशान्त्यद्य।।६३७९।।

आनन्दस्य तु काचिद् धारा सा वै समुच्छलति।
एकं नवीनपुस्तकमासिदितमेव यच्छ्रीघ्रम्।।६३८०।।

मुद्रणजगदिदमखिलं लेखनसत्प्रेरणं कुरुते।
विक्रम-भोजसुकालादधिकाः सन्त्येव लेखकाऽद्यत्वे।।६३८१।।

प्राचां वाचीं मूलं विधाय वहवः प्रवर्तन्ते।
प्राचीनानां वाणी नव्यानर्थान्विधारयति।।६३८२।।

निगूहिताः स्वयमपि सत्कविना ते ते रहस्यार्थाः।
समीक्षकैः सम्प्राप्ताः हृदये हृदये विराजन्ते।।६३८३।।

नव्यपुस्तकप्रकटनशीला सेयं सुरम्यनवलीला।
वाग्देव्याश्चिद्रूपावतारतां सूचयन्त्यास्ते।।६३८४।।

कलौ किलेयं कलना काल्याः संकीलिता कणिका।
कमनीयकामकार्यक्रमणे कां कां व्यथितवती।।६३८५।।

सर्वे सम्भूयाद्य तु पुस्तकमध्ये प्रतिष्ठिता सन्तः।
सुन्दररमणीरूपं पुस्तकरूपे प्रपश्यन्ति।।६३८६।।

अत एव सर्वमेतत्कान्तासम्मितमयं भाति।
पुस्तकसंसारोऽयं जीयाद् वाचां सुविस्तारे।।६३८७।।

१९०.छिद्राणि

कार्याणां सम्पादनसिद्धा या कारणावलिस्तस्याम्।
प्रतिबन्धकसामान्याऽभावः सर्वत्र कारणीभूतः।।६३८८।।

केनापि विघ्नरूपप्रतिबन्धेनात्र नाशितं कार्यम्।
कारण-सम्यद्योजनकाले यज्ज्ञानमपि नासीत्।।६३८९।।

कार्याणां जटिलानां संसाधनकारणान्वेषे।
सर्वाप्युपायचिन्ताऽपाये चिन्ताऽपि संन्ध्येया।।६३९०।।

प्रतिबन्धकाः सदा ते छिद्रं रूपं विनिर्माय।
शोभनतममपि कार्यं नाशयितुं संप्रगल्भन्ते।।६३९१।।

जीवनमेतत्सर्वं कार्याणामेव संसारः।
तत्र प्रतिबन्धानामपि जागर्तिः समाराध्या।।६३९२।।

अत एव गणपतिर्भगवान् सम्पूज्योऽस्त्येव सर्वादौ।
विघ्ना ये स्युस्तेषां दूरीकरणोन्मुखः सदा जातः।।६३९३।।

छिद्राणीमानि यदा पूर्णां वृद्धिं स्वरूपाणाम्।
क्रमशो विधारयन्तः शोभनरूपं विनाशयन्त्येव।।६३९४।।

स्वतन्त्रता या लब्धा लोके तन्त्रं समानीतम्।
शासनसंस्थानिर्मितिरेषा मतदानतो जाता।।६३९५।।

प्रथमं देशे जातं नव्यं तत्संविधानं वा।
देशे श्रेष्ठैः सिद्धैर्विनिर्मितं तद्धि संजातम्।।६३९६।।

तद् धाराऽधारेणैवाद्यत्वे शासनं सम्यक्।
प्रचलत्यर्बुदजनता तोषकरं यत्प्रजागर्ति।।६३९७।।

किन्तु च्छिद्राणामपि बाहुल्यं जातमेवाऽस्ते।
तैरेत्सुखदाने शासनकुण्ठाऽपि जागर्ति।।६३९८।।

येऽल्पमतेष्वायाता शासनतो दूरिताः जाताः।
किं वा तेऽस्मिन् काले कार्यं कुर्युः समीहितं प्राप्तुम्।।६३९९।।

अन्तरायतां यान्तस्तेऽग्रेऽग्रे वैपरीत्यभावेषु।
विनियोजयन्ति जनतासंसक्ताः शासनं हर्तुम्।।६४००।।

आगामिनि मतदाने तेषां वैभवमिहागच्छेत्।
सम्मुखस्थशासनगततन्त्रं सन्दूरितं भूयात्।।६४०१।।

इत्थं केवलमेकां वार्तामेनां सुसंकल्प्य।
जनतां तथा समाजं विप्लावयितुं प्रगल्भन्ते।।६४०२।।

एतस्मिन्ननु कार्ये विपुलधनं संबलं भवति।
तस्माद् विविधोपायैर्धनसंग्रहमपि विधीयते तैस्तैः।।६४०३।।

एतच्छिद्रं शासनगतसौन्दर्यं विनाशयितुम्।
संप्रक्रमते नित्यं जनतायां सौख्यहानिकरम्।।६४०४।।

उत्कोचानामसमा वृद्धिः काऽपीदृशी जाता।
एतत्सुमहच्छिद्रं शासनसौन्दर्यनाशनायालम्।।६४०५।।

यथा तथा वा कालः कथमपि नेयः प्रयत्नेन।
नेयं तावज्जीवनसौन्दर्यं सुस्फुटं कुरुते।।६४०६।।

शासनसंगतछिद्राणीमान्येवात्र कारणताम्।
संयातानि नितान्तं सुजनमनोदुःखदायकानि जायन्ते।।६४०७।।

सर्वं करोतु तावत्शासनमेवात्र नो किञ्चित्।
तत्तोऽतिरिक्तकार्यं वयमिहकर्तुं प्रगल्भामः।।६४०८।।

धारणाऽपि सैषा जनहृदये न प्रतोषकरी।
आत्मोन्नतिछिद्राणामत्राप्यास्ते समाहारः।।६४०९।।

आत्मनि यद्यच्छिद्रं संवृद्धं विल्वफलरूपम्।
न वमं तत्र स्वीयां दृष्टिं संपातयितुमीहामः।।६४१०।।

सर्षपमात्रं छिद्रं परकीयं यन्निभृततरम्।
तस्य दर्शने कथनेऽस्माकं दृष्टिः सुनिर्मला भाति।।६४११।।

छिद्रेष्वपि सत्ता सा छिद्रान्तरिता प्रजागर्ति।
संसारोऽयं निखिलश्छिद्राक्रान्तः प्रजागर्ति।।६४१२।।

विघ्नाश्छिद्रं दोषोऽपायः पर्यायमालेयम्।
कीलितकायकलापे कल्पनकार्यं कदर्थयति।।६४१३।।

जीवनमेतत्सर्वं मृत्युच्छिद्रान्वितं सततम्।
संसरणक्षणमात्रे छिद्राणीमानि जायन्ते।।६४१४।।

स्मृतौ विस्मरणछिद्रं स्वास्थ्ये रोगात्मकं छिद्रम।
सुखैदुःखमयछिद्रं सर्वं छिद्रैः समन्वित दृश्यम्।।६४१५।।

भव्येत्वभव्यभावावलिदौर्गन्ध्यैरभिव्याप्तम् ।
छिद्रं विभाति दूरादपि निर्बन्धैः समाक्रान्तम्।।६४१६।।

१९१.संगीतम्

श्रुतिरियमभिनवकायां क्षणे क्षणे यत्र कुसुमनदीम्।
आकारयति समासैर्व्यासैर्मिलितामनुस्यूताम्।।६४१७।।

नोपरि नो वाऽधस्तान्मध्ये नैवेयमामृष्टा।
संगीताभा लहरी कणकणशः कीर्णसंसारा।।६४१८।।

नाना विधनवसूर्याश्चन्द्रा नित्या नवा रात्रीः।
दिनमिदमभिनवरूपं सर्वा संगीतसुषमेयम्।।६४१९।।

गंगाप्रवाहभाषा हिमालयात्कापि विस्तीर्णा।
सागरहृदये मिलिता काचित्संगीतसरणिरियम्।।६४२०।।

सर्वेश्वरस्वरूपं सङ्गीतेनैव सर्वमुपमेयम्।
यदि संगीतं झंकृतिमसमां तां नो विलासयति।।६४२१।।

आकारिता नितान्तं देवाश्चैवाऽथ देव्यश्च।
सर्वैश्वर्यसमेता काचित्संगीतभाषेयम्।।६४२२।।

नव्योन्मेषविशेषप्रसराणां या समनुभूतिः।
दास्यत्यमन्दमुन्मदमुन्मादं साऽपि गीतरेखैव।।६४२३।।

जीवननवतरचिन्हा ददाति संगीतलहरीयम्।
यदि संगीतं न स्याज्जीवनमेतद्विशीर्णं स्यात्।।६४२४।।

संगीतात्मकजीवनपद्धतिरास्ते ह्यसीमविश्वासैः।
पोषितसंस्कृतनवतरसंभाषा भूषिता देवी।।६४२५।।

संगीते सुषमायाः सागर एवाऽत्र सन्हष्टः।
स्वरलहरीणां संगमसंस्कारैः संस्कृता सरणिः।।६४२६।।

मन्त्रे मन्त्रे वैदिकसाहित्ये चित्तवृत्तीनाम्।
गायनसंसारेषु प्रसार आसीत्स सामवेदोऽयम्।।६४२७।।

आत्रेयी साऽपाला छन्दोमयवाग्विधानविन्यासैः।
इन्द्रं जुहाव कुष्ठं स्वीयं संदूरयामास।।६४२८।।

तुम्बुरुगायनलहरी सर्वान्देवान्विमोहयते।
तीव्रात्तीव्रतरा सा मन्दान्मदाऽपि जायते सद्यः।।६४२९।।

गन्धर्वाणां गायनपरिपाटीनां विबोधकास्ते ते।
वेदे वेविद्यन्ते नानाभावैः सुसंस्काराः।।६४३०।।

गायनविद्या सेयं स्वयं शिवेनैव निर्मिता जयति।
देवी सरस्वती निजवीणावाद्यैस्तरङ्गितां कुरुते।।६४३१।।

गोलोकस्य कथायां राधाकृष्णाऽन्तिके देवी।
गायनविद्यायां वा लीना दृष्टैव मूर्तिमती।।६४३२।।

तदनन्तरं च निखिलैः सम्प्रार्थितसिद्धिदो देवः।
शंकर भगवान्दिव्यं गीतं सङ्गीतयामास।।६४३३।।

गीतेन तेन सर्वे विस्मृतिभावं समाजग्मुः।
पुनरथ सर्वैर्दृष्टं राधाकृष्णौ न तत्रस्थौ।।६४३४।।

व्याकुलतायां मूर्च्छा सर्वेषां य समायाता।
आकाशवाङ्निनादैरेषा दूरीकृतैवाऽसीत्।।६४३५।।

तत्रैव कुण्ड एको जलेन सम्पूरितो दृष्टः।
राधाकृष्णौ तत्र तु नीराकारौ विलोक्येते।।६४३६।।

राधाकृष्णौ भवतः स्वावस्थौ वा निराकारौ।
भक्तानुग्रहकाले तौ वा स्यातां नराकारौ।।६४३७।।

शिवसंगीतश्रवणानन्तरभावे तु तौ जातौ।
विद्युतिभावोन्मेषे नीराऽकारौ विलोक्येते।।६४३८।।

तस्मिन्नेव तु समये सृष्टिरचयिता स्वयं ब्रह्मा।
स्वीये कमण्ड़लौ तत्कुण्डजलं सम्प्रपूरयामास।।६४३९।।

भगीरथीतपस्याफलकाले भूय एवाऽयम्।
करकमलस्थकमण्डलुजलधारां मोचयामास।।६४४०।।

पूर्वं त्वेषा धारा राधाकृष्णाङ्गभूतैव।
भूयो कमण्डलुस्था सम्प्रति गगने विवर्धमानाऽऽस्ते।।६४४१।।

आकाशे विहरन्ती गङ्गा सेयं शिवस्य शिवसंस्था।
तस्य जटानां गहने वने विलीनैव सञ्जाता।।६४४२।।

शिवकण्ठादुद्गमने सङ्गीतं यां रुचिं धत्ते।
राधाकृष्णावपि तां श्रुत्वा जलतां समुपयातौ।।६४४३।।

शिव एव तु धरतितमां वियद्विहारां तु गङ्गां वा।
सङ्गीतस्य मधुरिमा केनेयं वर्णनीया स्यात्।।६४४४।।

नारदमहर्षिवीणानिनादनारायणध्वनिर्नित्यम् ।
स्वर्गे देवान्सर्वान्वैशद्येनैव भक्तिसात्कुरुते।।६४४५।।

शिशुपालवधे माघो नारदवीणामुपस्तौति।
या हि समीरसुगन्धैश्चालितवरसंगमस्वरा रम्या।।६४४६।।

श्रीकालिदासकविता संगीताल्हादमादधती।
मालविकासंगीते मुखरितभावं विलासयति।।६४४७।।

श्रीकृष्णस्वरमाला या गीता पार्थपाथेया।
निखिले कालविलासेऽमृतधारां सा निपाययति।।६४४८।।

नाट्यशास्त्रविश्लेषणपरायणोऽसौ भरतमुनिः।
नानाऽध्यायैर्गीतं विपुलं विस्तारयाञ्चक्रे।।६४४९।।

नृत्यगीतवादित्रत्रितयं संगीतकं गातुम्।
शैलूषाः शिक्ष्यन्ते प्रावीण्यं ते भजन्तेऽत्र।।६४५०।।

शाकुन्तलेऽपि तु नटीसङ्गीतं तं पुरस्कृत्य।
सर्वान्विस्मृतिसागरनिमाज्जितान्दर्शयति साध्वी।।६४५१।।

सङ्गीतं यदि संचितमाध्यातं मानसे वाऽपि।
श्वासाः सर्वे सफलाः जीवनकाले य उपलब्धाः।।६४५२।।

सर्वप्रसन्नतायां सङ्गीतस्यैव रूपाणि।
निखिलानि विकीर्यन्ते नानाभावेषु दृश्यन्ते।।६४५३।।

योषित्कण्ठानुगतं संगीतं किञ्चिदन्यत्स्यात्।
स्वर्गे मर्त्ये वाप्यथ सर्वे सन्त्यत्र सम्मुग्धाः।।६४५४।।

स्वर्गेष्वप्सरसां तद्गीतान्याकर्ण्य ते देवाः।
परमां मुदमायाता दैवीं शक्तिं वितन्वन्ति।।६४५५।।

रम्भोर्वशीघृताचीतिलोत्तमामेनकाद्यास्ताः ।
अप्सरसो देवेन्द्रं गानैः सन्तोषयन्त्येव।।६४५६।।

भूलोकेऽपि नितान्तं वेशे वनिताः सरागसंगीताः।
राज्ञां मनोविनोदैर्गीतानाराधयन्त्येव।।६४५७।।

संगीतमधुरिमाणं सर्वत्रैव प्रसारयन्त्यो वा।
महिलामूर्धन्यास्ताः ख्यातिं परमां समाजम्मुः।।६४५८।।

सम्राड़कबरसविधे स्थितिरासीत्तानसेनस्य।
सांगीतिकसुषमाया येनाऽसीद्दीपिता दीप्तिः।।६४५९।।

इतिहासेषु च गाथास्ता एतास्तानसेनस्य।
विचरन्त्यो विश्वमिदं भूषयितुं सन्ति सन्नद्धाः।।६४६०।।

सङ्गीतेश्वररूपं प्रकटयितुं यत्तपो घोरम्।
तप्तं तैस्तैर्विज्ञैस्ते धन्याः सन्ति संसारे।।६४६१।।

एकत्र शास्त्रसंस्था आचार्या नियमसंलग्नाः।
विस्तारयन्ति गीतं रूपान्रूपेषु कल्पयन्तोऽपि।।६४६२।।

अपरत्र प्रायोगिकपरिश्रमैस्तर्पणं परेशस्य।
शास्त्राणामवतरणं प्रयोगयोगेषु कुर्वन्ति।।६४६३।।

मीरा देवी कृष्णं गीतैराराधयाञ्चक्रे।
मीरादेवीगीता भक्तानां कण्ठहाराऽस्ते।।६४६४।।

श्रीसूरदासवाणी सङ्गीतानां प्रवाहधारायाम्।
आमिलिता नवरसमयसंसारं शोभयामास।।६४६५।।

श्रीजयदेवविनिर्मितगीतालिर्गीतगोविन्दे ।
निखिलं विश्वं नैजे रागे संरञ्जयामास।।६४६६।।

विद्यापतिगीतावलिरेकैवेयं समस्तरागानाम्।
पारावारः कश्चित्तरङ्गितो भाग्यविभवाढ्यः।।६४६७।।

शास्त्राणामपि तावत्सङ्गीतस्यैव रचनानाम्।
विपुलास्ते संरम्भा विचारमार्गे प्रचारमायाताः।।६४६८।।

राणाकुम्भाग्रन्थः संगीते रत्नदीप्तीनाम्।
आकर एव विनिर्मित आसीत्सङ्गीतसन्दोहैः।।६४६९।।

नानापुराणनिवहे सङ्गीतं सर्वथा प्रोतम्।
शास्त्राणां नियमानां चर्चा सर्वत्र दृश्यते विपुला।।६४७०।।

नियामकानामेषां सङ्गीते जागरूकत्वम्।
सन्दर्शयति समस्तं तत्रत्यं विकसितं रूपम्।।६४७१।।

विद्यानां तु विकासे शास्त्राणां निर्मितिर्जाता।
यत्र तु शास्त्राणां सन्दर्शनमास्ते विकासः सः।।६४७२।।

प्राचुर्ये सञ्जाते नियमनमास्ते समारब्धम्।
प्राचुर्ये तु विकासः प्रभवति नाना स्वरूपेषु।।६४७३।।

सङ्गीते नियमानां सैवाऽस्ते ग्रन्थपरिपाटी।
नव्यतरे परिवेशे प्रकटा निखिला तु सङ्गीतिः।।६४७४।।

श्रीमान् विष्णुदिगम्बरमहानुभावः समवतीर्णः।
साङ्गीतिकसरिदासीन्मार्गं परिवर्तयन्तीव।।६४७५।।

ओमित्येषा वाणी मूलं सङ्गीततत्त्वानाम्।
रागाणां सर्वेणां तालानां वा लयानां वा।।६४७६।।

ओंकाराऽनुस्यूता निखिला वर्णावलिर्जयति।
स्वरसन्धानं सर्वं निहितं चैतत्तथोंङ्कारे।।६४७७।।

विष्णुदिगम्बरगीतं विख्यातं जातमोङ्कारे।
सर्वेषु रागदेशेष्वासीद् गीतं समुद्गीतम्।।६४७८।।

विष्णुदिगम्बरशिष्या नैके विख्यातिमायाताः।
ओङ्कारनाथठाकुरवर्यः संसारविख्यातः।।६४७९।।

राष्ट्राऽध्यक्षः कश्चिन्मासेभ्यो वा विनिद्रः सन्।
ओङ्कारनाथठाकुरसङ्गीतेन प्रसुष्वाप।।६४८०।।

काश्यां वीणावादिनिविद्यालयमेकमारभ्य।
तस्य समुन्नमिमसमां कृतवानोङ्कारनाथोऽयम्।।६४८१।।

शतशः सहस्रशो वा सङ्गीतज्ञा विनिर्मिताश्छात्राः।
सङ्गीते नवधारा काचित्काश्यां प्रवृत्तैव।।६४८२।।

देशस्य विश्वविद्यालयेषु सङ्गीतशिक्षार्थम्।
सङ्कायाः सञ्जाता विभागभागाः समारब्धाः।।६४८३।।

लक्ष्मणपुरे च विद्यालययेकं गीतसङ्गीते।
भातखण्डेति प्रसिद्धं विपुला यत्र प्रदीयते शिक्षा।।६४८४।।

नवसाङ्गीतिकशिक्षासंङ्कमणेष्वस्ति विस्तारः।
नाना विभागपूर्णाः सभागाश्चाऽत्र विकसिता जाताः।।६४८५।।

स्वातन्त्र्यस्यार्थोऽयं सत्कारः सर्वविद्यानाम्।
पूर्णं विकसितरूपं निजनिजरूपेषु संयातम्।।६४८६।।

खैरागढ इति नाम्ना विख्याते मध्यदेशस्थे।
विद्यानगरे कश्चित् ख्यातो विश्वाख्यगीतविद्याढ्यः।।६४८७।।

नव्यान्वेषणविधया नवजागर्तिं वितन्वन्तः।
शोधग्रन्थमयीं तां नवधारां बाह्यमन्तश्च।।६४८८।।

विद्यार्थिन एवैते गुरुभावेषु स्थिताः सर्वे।
साम्प्रतिकोऽयं कालस्तेषामेवाऽद्य संजातः।।६४८९।।

ह्यश्चासन् ये बाला विद्यार्थिन एव तेऽद्यत्वे।
कुलपतयः संभागाऽध्यक्षाः व्याख्यानदातारः।।६४९०।।

पटवर्धन-बोरसवर-जोशी-जसराज-कुमारगन्धर्वाः।
राजनसाजनमिश्रा गिरिजादेवी च सुब्बुलक्ष्मी च।।६४९१।।

श्रीतेजपालसिंहः सुरेन्द्रसिंहश्च ते एते।
विख्याताः संगीते तेषां निखिलं जगज्जातम्।।६४९२।।

ये विख्यातिं यातास्तेषामपि नाम गणनायाम्।
नो पर्याप्ता बुद्धिः प्रसरति किं वा तु वर्णनं तेषाम् ।।६४९३।।

शासनसंस्थाचालितशिक्षासंगीतशास्त्राणाम् ।
नूनं ततोऽप्यधिकतरा शिक्षा वैयक्तिकी जयति।।६४९४।।

संगीताचार्यैर्यैः शिक्षा संगीतविद्यायाः।
शिष्येभ्यः शिष्याभ्यः प्रदीयते शिष्टनगरेषु।।६४९५।।

आचार्यगृहेष्वपि वा भासन्ते गीतविद्यायाः।
शिक्षणशाला एताः सर्वा अपि सर्वविख्याताः।।६४९६।।

उर्दूशब्दावल्यामेते कथिता 'घराना' वा।
संजाता इति का वा तेषां संस्तुतिरिह क्रियताम्।।६४९७।।

वैदिककालेऽप्यासन्नाश्रमसंस्थास्तु संगीते।
ताः सामगायनानां भिन्नाः शाखा विलोक्यन्ते।।६४९८।।

शिवताण्डवप्रवाहे लक्ष्मीदेवी स्वयं जाता।
गेयप्रयोगविद्याप्रवाहधारापरिव्याप्ता ।।६४९९।।

रागावली च सैषा संगीते जागृता जयति।
ऋतुकालादि विभेदे जायन्ते रागनामानि।।६५००।।

भैरविरागस्तावन्मल्हारो राग आख्यातः।
मालकोश इति नाम्ना रागः कश्चिद्विनिर्गतो नूनम्।।६५०१।।

चलचित्रात्मकविश्वे मङ्गेशाख्या लता ख्याता।
रफीमुहम्मदनामा विख्यातो गायको यातः।।६५०२।।

आसीद् गीतजगत्यां मुकेश एकः स्वरकलासु।
रामचरितमानसमपि गीतं निखिलं समुपलब्धम्।।६५०३।।

ध्वनिसंस्थापकयन्त्रैरद्यत्वे रक्षिता वाणी।
देहान्तानन्तरमपि संश्रोतुं शक्यतां याता।।६५०४।।

विज्ञानोन्नतिवेलाप्रवाहसंसाधनोत्सिक्ता ।
नव्याऽनुभावरसिका जाता संगीतसंसृष्टिः।।६५०५।।

पुरातनादद्यावधि चिन्ताक्लेशादि दुःखदैन्यानाम्।
दूरीकरणे दक्षा काचित्सङ्गीतलहरीयम्।।६५०६।।

भारतदेशे ख्याता नाना संस्थास्तु नगरेषु।
सङ्गीताऽऽयोजनमथ नियमेनैव प्रकुर्वन्त्यः।।६५०७।।

ग्वालियरोदयजयपुरकाश्युज्जयिनी च बम्बईनगरी।
कलकत्ता पटना वा सर्वत्रैवोल्लसन्ति संस्थास्ताः।।६५०८।।

नैवाऽस्ति जातिभेदो न वर्णभेदोऽथ सम्प्रदाये वा।
भेदो गणयितुमपि वा संश्लिष्टो भाति सङ्गीते।।६५०९।।

केवलमानन्दानां यत्र तु साम्राज्यमाभाति।
सर्वसमीहितसारा काचित्सङ्गीतसरणिरियम्।।६५१०।।

सर्वे क्षेत्रे देशे काले समुदायसाम्यसंसिद्धौ।
सङ्गीतानां सुषमा नेयं नो धन्यतां याता।।६५११।।

संसार एष विपुले विस्तारे विद्यते पुरतः।
सर्वत्राऽनुस्यूता सैषा संगीतसंगीतिः।।६५१२।।

उन्नततमविभवानां जीवनमेतत्तु सङ्गीतम्।
तेषामाचामयते सङ्गीतं सात्विकं तत्त्वम्।।६५१३।।

दुरिता दूरीभावे स्थितिमन्तो ये प्रदृश्यन्ते।
प्रेमोन्मत्ता सेयं संभोगानन्दभाषा वा।।६५१४।।

सङ्गीतैः सङ्गीता योषित्सुषमासमाऽस्वादा।
माता निखिलाधारा सङ्गीतानां विकस्वरा दीप्तिः।।६५१५।।

नवरसनिकामवर्षासन्तृप्तिः सर्वसंकाये।
येनैकेयं नियतिं स्पष्टीकुरुतेऽथ सैव सङ्गीतिः।।६५१६।।

१९२.रणरणकम्

रणरणकं हि यदृच्छा-गुम्फित-सम्मोद-भावनामयता।
निखिलं किल व्यक्तित्वं सोल्लासं वा समादिशति।।६५१७।।

प्रक्रान्तं रणरणकं नूतननूत्नैः समादेशैः।
आनन्दयति विलासैर्व्यापारैः काव्यमयतायाम्।।६५१८।।

प्रारब्धं रणरणकं सर्वमिदं संविलासयति।
नन्दयति मनोभावैरापूर्णं सत्यसंसारम्।।६५१९।।

मानाऽऽक्रान्ति-परिष्कृत-संशोधन-चारु-संचरण-शीलैः।
नाना-नव-सन्धानैरारचितं नूनमेव रणरणकम्।।६५२०।।

प्रभुसम्मितसंस्थाने स्थितमेतच्चापि रणरणकम्।
अथवा संशय-रीति-प्रकृष्ट-रूपेषु सञ्जातम्।।६५२१।।

अग्रे गतं तदेतद्रण-रणकं सत्यसन्धाने।
प्रगुणीकृत-प्रभावं व्यामोहयतीव दिव्यतायुक्तम्।।६५२२।।

किञ्चिद् विदितमविदितं किञ्चित् किञ्चित् समाचरितम्।
रण-रणकं पुनरेतत् प्राकाम्यं दीर्घमादिशति।।६५२३।।

संशोधन-प्रयोगैराक्रान्तेषु प्रदीप्तेषु।
व्यापारेष्वपि चैतद् रण-रणकं सर्वमादिशति।।६५२४।।

सद्यो मुक्ति-विधायक-मन्त्राणां दीक्षणे दक्षाः।
ते ते समाचरन्तो रणरणकोद्दीपकाः काम्याः।।६५२५।।

अकारणं रणरणकं परिसरणे यत् समादिष्टम्।
तन्नूनं रणरणकं मिथ्यागर्भेण सम्भूतम्।।६५२६।।

सन्तापित-सर्वस्वा गतिरन्येषां प्रजागर्ति।
तत्रास्ते रणरणकं मूले तूलं विनिक्षिप्तम्।।६५२७।।

सन्त्येते संयुक्तास्तेष्वेतेषु प्रकीर्णेषु।
कार्याकार्यविवेकेष्वारूढाः केवलं ध्याताः।।६५२८।।

मानापमानवेगैरुत्पादितवाक्प्रवाहेषु ।
श्रोतारोऽपि हि सर्वे रणरणकैस्तावदाक्रान्ताः।।६५२९।।

दुर्घटना सञ्जाता पुरुषोऽयं मृत्युमुखयातः।
तस्य समाचाराणां रणरणको भाति पत्रेषु।।६५३०।।

एकः सोऽयं शूरो यो ह्यभिसहते तु सर्वमाघातम्।
किन्तु तदेतत्सर्वं रणरणकं वापि जानाति।।६५३१।।

अद्यत्वे भाषायां 'मुद्दा' शब्देन यत्प्रोक्तम्।
तत्स्यात् संस्कृतकाले रणरणकं वा परिक्षिप्तम्।।६५३२।।

आकर्षणैः सुयोगे सञ्जाते वा मतिर्भवति।
तद्वा स्याद्रणरणकं केवलमेकान्ततः कान्तम्।।६५३३।।

विरह-विनोदन-वेला-वंशी-नादेषु संलग्नम्।
तद्वा स्याद्रणरणकं पयोधराधारतां यातम्।।६५३४।।

आकाशे मेघानां मण्डलमेतत् समुल्लसितम्।
सूर्यस्यादर्शनमपि सञ्जातं तेन रणरणकम्।।६५३५।।

एतेन शैत्यबाधा सञ्जाता वा चतुर्गुणिता।
किन्तु सुशोभनमेतन्मुखं तनोत्येव रणरणकम्।।६५३६।।

गाढाश्लेषाशोषितशीतैरानन्दनिःश्वासैः ।
प्रचलति निखिलं विश्वं प्रकामसङ्कीर्णयोगेषु।।६५३७।।

रणरणकगीतागायनगणनायां सुप्रचलितायाम्।
कणशः कणशोऽमृतमिदमाज्ञप्तं हृदयमध्येतुम्।।६५३८।।

काव्यामृतधारायां यन्मज्जनमद्य सञ्जातम्।
गुरुताया राहित्यैरयमात्मा ब्रह्म एवाभूत्।।६५३९।।

तत्राप्येकत्रत्वे विराजमानास्तु ये सन्तः।
तेषु प्रणामभाषासंलापेष्वस्ति रणरणकम्।।६५४०।।

तत्रैते सर्वस्वं स्वीयं निक्षिप्तवन्तोऽपि।
सम्मानं न लभन्ते तदेतदस्त्येव रणरणकम्।।६५४१।।

वैदेशिकविश्वासैरेतैर्यद्यत्समाचरितम् ।
तेन ध्वंसविशेषैराक्रान्तं स्याच्च रणरणकम्।।६५४२।।

यत्रापमानसंस्थाख्यापितमेतज्जगज्जातम् ।
तत्राप्यहोविभावैरास्ते नित्यं हि रणरणकम्।।६५४३।।

मन्त्राणामधिकारे संस्थापितमेतदेव किल सर्वम्।
मन्त्रेऽस्मिन्विपरीते सञ्जातेऽस्मासु रणरणकम्।।६५४४।।

के वा ते वा नैके लोकानां शिक्षणे दक्षाः।
अध्यक्षाणां तेषां दुर्गतिरूपेऽस्ति रणरणकम्।।६५४५।।

कामं सन्तु कठोरा आकृतयोऽप्येवमायाताः।
सर्वासामपि तासामेकीकारणेषु रणरणकम्।।६५४६।।

केवलमेतावत्यपि संस्कारैः स्थापितं चैतत्।
नानाविकीर्णरूपे सञ्जातं तत्र रणरणकम्।।६५४७।।

विद्युद्विरामवेलासंप्राप्तौ भासितं ज्योतिः।
प्रस्फुरितं ननु सहसा तत्राहोस्विद्धि रणरणकम्।।६५४८।।

तच्चेन्द्रजालरूपे सर्वविधं व्यापकं विश्वम्।
एकत्रीकृतमास्ते कुतो न वा तत्र रणरणकम्।।६५४९।।

शासनमेतत्तु यदा दूराद् दूरे गतं भूयात्।
एतत्करणानन्तरमेतेषां स्यात्तु रणरणकम्।।६५५०।।

धर्मगुरुः कश्चिदयं धर्मविरुद्धं सदाऽचरन्नास्ते।
तत्रापि जागरूकः सोऽयं चैतच्च रणरणकम्।।६५५१।।

ममतामयवैखर्या यद्यत्तत्तत्समालपितम्।
अधुना कुरुते तत्तद्रणरणकं भूय एव वा श्रोतुम्।।६५५२।।

सेवानां सम्भारेष्वेषा सञ्जातमाधुर्या।
वेला समुपायाता कुरुते सद्यस्तु रणरणकम्।।६५५३।।

अर्धं चैतत्तस्या उपभोगे योग्यतां यातम्।
अर्धाधिके विभागे कुतः प्रदीप्तं तु रणरणकम्।।६५५४।।

सत्यानां सन्धानेष्वेषा सा सा गतिर्जाता।
पुनरपि तस्मिन् काले जातं त्वद्यापि रणरणकम्।।६५५५।।

निन्दानिन्दितनन्दितसेवासञ्जातसंस्कारैः ।
आन्दोलितमथ सर्वं कुतो न वाद्यापि रणरणकम्।।६५५६।।

विद्वांसः सेवायां संस्थितिमेनां प्रकीर्तयन्तोऽपि।
विद्वन्मयतां यातास्तेषां भाष्येषु रणरणकम्।।६५५७।।

प्रान्तस्य मुख्यमन्त्री यस्मान्नगरात्समायाति।
तस्य सुन्दरीकरणे संदृश्यं सर्वरणरणकम्।।६५५८।।

कालेऽस्मिन्नपि कामं भवान्ममोपर्यथो व्यंग्यम्।
कथयतु किन्तु तदुत्तरकाले युष्मासु रणरणकम्।।६५५९।।

सार्वजनिंकसंस्थानस्थितिरेषा भूयसी दृष्टा।
तत्रोन्नततररूपे चायाते शोभते तु रणरणकम्।।६५६०।।

आसादितवाग्वैभवामासादितसारसर्वस्वम् ।
तद्रूपस्य समक्षं विकस्वरं स्यात्तु रणरणकम्।।६५६१।।

हृदयाह्लादविमुग्धं शोषितपापं सुमुक्ताहारम्।
भावितभाविकवृत्तं पुनः पुनर्जातमद्य रणरणकम्।।६५६२।।

सर्वापीयं सर्वोत्कण्ठैवास्ते हि रणरणकम्।
किन्तु तत्र काचित्सा चमत्कृतिस्तत्र रणरणकम्।।६५६३।।

भूषितहृदयोल्लासितविद्युन्मयतासमारचिता ।
उच्छ्वासितसद्वलये झणझणशब्देषु रणरणकम्।।६५६४।।

मोहकसुस्मितनवरतरमाधुर्यैरार्द्रितस्नेहम् ।
यत्तावदाद्यविभवैर्भूषितमास्ते तु रणरणकम्।।६५६५।।

साम्राज्योन्मादानां परिवर्धनवैद्युते दृश्ये।
सङ्गीतेष्वपि धारासम्पातैर्भाति रणरणकम्।।६५६६।।

नवविश्वासपराजितसम्बोधनमात्रसन्तुष्टा ।
सेयं बाला नित्यं कुरुते मत्तं हि रणरणकम्।।६५६७।।

स्मितशोभाविस्तारितमूकीकृतमाधुरी सेयम्।
मनसि नितान्तमनन्तं कुरुते सद्यस्तु रणरणकम्।।६५६८।।

आभाति नागराणां सैषा दीप्तिर्विराजिता विभवैः।
येषां दुकूलकोषे विभासमानं हि रणरणकम्।।६५६९।।

अद्याऽपि तत्र सत्यं शिवमद्वैतं विभासते शान्तम्।
तत्रैव भाति नृत्ये किङ्किणिमञ्जीररणरणकम्।।६५७०।।

गाङ्गे तटे प्रतिष्ठितसत्यान्वेषणसमायुक्तम्।
वैदेशिकनवयुवतीसत्कारैर्भाति रणरणकम्।।६५७१।।

कथाप्रवाहनिपातितनायकमेकं पुरस्कुरुते।
अन्तः कथानकेषु च दूरस्थं भाति रणरणकम्।।६५७२।।

विद्वत्तायाः सेयं परमा काष्ठैव सञ्जाता।
यत्रैव पाठभेदास्तत्रैव स्यात्तु रणरणकम्।।६५७३।।

पापानि यानि जातान्येवं तत्फलसमापत्तौ।
कीदृग्विधं च किञ्चिद्रूपं जायेत रणरणकम्।।६५७४।।

प्रातर्नवतरलीलां तमालनीलां परिश्रान्ताम्।
रतिमप्यथवा सम्यङ् निन्दन्तीं तां प्रपश्यामि।।६५७५।।

आराध्य सेवया वा नियतं पश्यामि भगवत्याः।
नीराजनाविधिं तामसमविभक्तेषु संक्रान्ताम्।।६५७६।।

भावविशेषविशेषितशोभितहृदयारविन्दकमनीयाम्।
तां तां धारापातैर्विमोहयन्तीं मतिं धन्याम्।।६५७७।।

वैद्युतीयचुम्बकतामाराध्याभिश्चिरन्तनध्यानैः ।
अधुनाऽनुस्यूतचरैर्मिलिन्दवृन्दैरुपास्यामानां वा।।६५७८।।

सायं वेलायामपि प्रातर्वेलावदाक्षिप्तम्।
रात्रिष्वपि सौशील्यैरन्वितमाभाति रणरणकम्।।६५७९।।

नानाप्रदेशभाषाभेदैरत्यन्तभिन्नमपि ।
रसरूपेणैकत्वे परिणतमाभाति रणरणकम्।।६५८०।।

वटुरवटुश्च सनातनरूपेणैवाद्य संयातौ।
पुनरपि निगूहनोत्थं भणतितरामेव रणरणकम्।।६५८१।।

अयमात्मा ब्रह्मेति श्रुतिप्रयत्नोत्थमद्यापि।
सन्देहे दोलानामारूढं भाति रणरणकम्।।६५८२।।

विश्वेश्वरेण नित्यं क्षणशो रक्षाविनिश्चये जाते।
तस्मिन्नप्यैश्वर्ये सञ्जातं तद्धि रणरणकम्।।६५८३।।

निःसीमापि कथा सा सीमितरूपेण संकथिता।
प्रत्येकस्मिन्नपि वा निःश्वासे भाति रणरणकम्।।६५८४।।

आस्तां तावत्प्रकृतिः परमा काष्ठैव सा जयति।
किन्तु व्यक्तित्वे सा पराजितेत्येव रणरणकम्।।६५८५।।

अस्तङ्गमिते काले किं सर्जनचिह्नमवशिष्टम्।
किं वा प्रदेयमास्तेऽद्याप्येवं वास्ति रणरणकम्।।६५८६।।

आशाशतविस्तारोन्माथितसर्वान्तरमणीये ।
सङ्काये सर्वक्षणसंव्याप्तं वास्ति रणरणकम्।।६५८७।।

भृत्यमुखोद्गतभाषा विवादमयता समाकुलिता।
कस्मिंश्चित्सद्रूपे जातं चाद्यापि रणरणकम्।।६५८८।।

सर्वात्मभावनाया विश्वासै रञ्जितं चैतत्।
निखिलव्यापाराणां विभावनायां हि रणरणकम्।।६५८९।।

एकत्वं नानात्वं तत्रत्ये वा कलेवरे दृष्टम्।
तत्रैक्ये सञ्जाते विभूषितं भाति रणरणकम्।।६५९०।।

आनन्दतुन्दिलानामित्थं भावे विजायमानेऽपि।
दुर्गतिदुरवस्थायां जातं त्वद्यापि रणरणकम्।।६५९१।।

वेदोपनिषन्मुख्यैरद्यापि तु जन्यते दिव्यम्।
दिव्यादपि दिव्यतरे दृश्ये संभाति रणरणकम्।।६५९२।।

जयति जगत्यां काचित्सैषा दीप्तिर्विलासिता दृष्टा।
यस्यां निखिले विश्वे नित्यमिदं भाति रणरणकम्।।६५९३।।

का स्यात्सा परिभाषा कीदृग्विधतामुपागता सा स्यात्।
यस्यां नो संयुक्तं भूयादेतद्धि रणरणकम्।।६५९४।।

अन्वेषणशीलानामेषा काचित्परस्परा दृष्टा।
ते तु विनैवोद्योगं धिक्कुर्वन्त्येव रणरणकम्।।६५९५।।

कथमेतेषु समस्तेष्वपि विपरीतेषु जागरूकेषु।
मध्ये मध्ये दीप्तं विभासतेऽद्यापि रणरणकम्।।६५९६।।

सर्वैर्विभासितैषा दृष्टिर्नित्यैव नूतना जाता।
शतसहस्रवर्षेभ्यो नूतनविषये हि रणरणकम्।।६५९७।।

कश्चित् पुराणसंज्ञां वितरति पश्चिमसमाम्नाये।
कुतो न तस्यापीदं मनसि विजायेत रणरणकम्।।६५९८।।

अहो अहोभिर्महिमा वर्धित एषोऽद्य भासते पुरतः।
निखिलपुरातनकोषागारेष्वास्तेऽद्य रणरणकम्।।६५९९।।

मिथ्याध्यानविनोदैः परितः पेपीयमानानाम्।
उष्णोष्णैर्निःश्वासैरनुमितमेवाद्य रणरणकम्।।६६००।।

जागर्ति समविकासे कोषे संक्षोभमायाते।
प्रहरी कोऽपि कठोरे स्वरं प्रकुरुतेऽद्य रणरणकम्।।६६०१।।

अयमथ दर्शनभव्याकृतिमात्रेणैव शोभामानोऽपि।
द्वारस्थेऽपि निमग्नैर्मोदैः कुरुते हि रणरणकम्।।६६०२।।

गङ्गा माता सेयं दर्शनदानेन पापानाम्।
संशोधनेषु सिद्धा तेन तु पापेषु रणरणकम्।।६६०३।।

किं स्वीकृतमस्वीकृतमाहोस्विदुपेक्षितं तैर्वा।
निश्चयविनिमययोगे सञ्जायेतैव रणरणकम्।।६६०४।।

संस्थापितं मतं तद्दूरीकर्तुं समुत्सुका अपि ते।
श्रोतृणामथ चेतःस्थगनेष्वेवास्ति रणरणकम्।।६६०५।।

काचिन्नवीनता वा मिथ्यैवास्तां पुनः पुनः कथ्या।
वारं वारं कथनेष्वप्यायात्येव रणरणकम्।।६६०६।।

सङ्गीतमाधुरीणामेषा काचित्कला प्रकटा।
आम्रेड़नेषु सद्यो विद्योतैर्भाति रणरणकम्।।६६०७।।

भाषाविभवं लब्ध्वा सुखितः सर्वोऽपि संसारः।
तत्रापि रङ्गमयता सञ्चारेऽस्त्येव रणरणकम्।।६६०८।।

दिव्यातिदिव्यसंस्कृतसाहित्ये सन्तरणशीलाः।
समनुभवन्त्यतिशयितं जीवनमासाद्य रणरणकम्।।६६०९।।

आसाद्य वाक्यरचनावैभवमतुलं प्रतिष्ठितस्वान्ताः।
एते ते च तथा ते रणरणकानां समर्पका जाताः।।६६१०।।

भाग्यधीनमिवैतत्सर्वं सञ्जायते मनुष्याणाम्।
भाग्यैः किं रचितञ्चात्रैवास्तेऽथ रणरणकम्।।६६११।।

वैभवविस्तारदृशां सेवायां सस्वराः सन्तः।
सन्तो नूनमनन्तां परिपाटीं कल्पयन्ति कमनीयाम्।।६६१२।।

सत्यैरसत्यतायां गमनागमनं प्रकुर्वद्भिः।
किं नास्ति विमुग्धोत्साहैरद्याप्येतत्तु रणरणकम्।।६६१३।।

विद्वन्मिलिन्दवृन्दैरान्दोलितकुञ्जमध्यास्ते ।
कविरयमथापि सूते वाग्विभवेष्वद्य रणरणकम्।।६६१४।।

तिष्ठन्तु तत्र ते ते एते चात्रैव तिष्ठन्तु।
क्रोडे तिष्ठतु भवती तत्रैवास्मासु रणरणकम्।।६६१५।।

आन्दोलितसेवासंशोधनमाधुरीजुषामेषाम् ।
केषामपि वाग्बिम्बे भूयो भूयोऽस्ति रणरणकम्।।६६१६।।

अस्तं गमिते भानौ शीते वायौ प्रधाविते वियति।
शीतेन कम्पितानामेषां तेषां च रणरणकम्।।६६१७।।

१९३.तन्त्रम्

तन्त्रं नाम निरुपितसौभाग्याधायकं तत्त्वम्।
संसारेऽस्मिन्सर्वं समीहितं सत्वरं सूते।।६६१८।।

तन्त्रस्य यन्त्रतायां निखिलं शारीरसंस्थानम्।
यद्यर्पितं तदेदं तन्त्रं सर्वं करे कुर्यात्।।६६१९।।

तन्त्रेति नामधेये याऽर्थानां प्रस्तुतिर्जाता।
नानार्थैरप्येभिर्युता मता प्रोन्नता सैव।।६६२०।।

शासनमपि तन्त्रं स्यात्कथितं तद्राजतन्त्रं वा।
गणतन्त्रं वाऽद्यत्वे भारतवर्षे समाश्वस्तम्।।६६२१।।

सामान्यतया शास्त्रं तदिदं निखिलं हि तन्त्रपर्यायः।
सर्वत्र च ये मान्यास्ते कथिताः सर्वतन्त्रसिद्धान्ताः।।६६२२।।

सर्वस्वतन्त्रतन्त्रेति च शंसायामुपाधिरयम्।
विद्वत्प्रकाण्ड़तायामाविष्कृतवैभवो जयति।।६६२३।।

आगमनिगमादीनामपि शब्दानां स्थितिः सैषा।
सामान्यार्थाः शब्दाः परिभाषावेष्टिता भान्ति।।६६२४।।

तथैव शब्दः सोऽयं 'तन्त्रः' कथितो विशिष्टाऽर्थे।
सामान्ये निर्बाधं तथैव शब्दोऽयमाभाति।।६६२५।।

यो हि विशेषेणार्थस्तन्त्रस्याऽत्रैव सुप्रसिद्धोऽस्ति।
तत्र भूयसी संख्या ग्रन्थानां जागृता जयति।।६६२६।।

शैवे तन्त्रे ग्रन्था काश्मीरेषु प्रसिद्धिमायाताः।
श्रीमानभिनवगुप्तो भगवानेवात्र संजातः।।६६२७।।

तन्त्राऽलोकं ग्रन्थं विस्तरशो वा विनिर्माय।
काचिद्दर्शनसरणिः सम्पूर्णाऽऽविष्कृता तेन।।६६२८।।

तदुत्तरं शैवागमतन्त्रेऽभिनवैर्विनिर्दिष्टे।
वैपुल्यं शैवाऽगमतन्त्राणां जातमेवाऽऽस्ते।।६६२९।।

सैषा काप्यार्षेयी पद्धतिरासीद्विकस्वराऽभासा।
तन्त्रालोकोद्योते प्रकाशधारा समायाता।।६६३०।।

शिवशक्तिमूलकोऽयं सिद्धान्तः कश्चिदुद्दीप्तः।
त्रिकमूलेयं सर्वा सृष्टिरिदं साधितं तत्र।।६६३१।।

वैष्णवतन्त्रं पुनरथ विख्यातिं यातमन्येषाम्।
नारदर्षिसंभूतं सिद्धमिदं पाञ्चरात्राऽख्यम्।।६६३२।।

चत्वारो वा व्यूहास्तन्त्रेऽस्मिन्संनिरूपिताः सन्तः।
नारायणस्य परमं तत्त्वाऽख्यं रूपमाह्वयन्त्येव।।६६३३।।

वैष्णवतन्त्राणामपि सहस्रशो ग्रन्थरत्नानाम्।
सिद्धान्ताऽभिप्रेताः संस्कुर्वन्त्येव संसारम्।।६६३४।।

रामानुजीयतन्त्रं माध्वीयं तत्र तन्त्रमिदम्।
वाल्लभतन्त्रं जयते निम्बार्कीयं तथा तन्त्रम्।।६६३५।।

गौडीयमपि च तन्त्रं वैष्णवतन्त्रेषु संसिद्धम्।
सर्वेऽप्येते वैष्णवतन्त्राणां भावनादीप्ताः।।६६३६।।

गणपतितन्त्रमथैवं संसिद्धं मुक्तिदं नित्यम्।
यत्र गणानामधिपः सर्वैश्वर्यैर्विराजितो दृष्टः।।६६३७।।

गणपतिरेष तु भगवान् सर्वासां सत्यसिद्धीनाम्।
तन्त्रनिरूपितसेवाप्रपूजितः सिद्धिदः साक्षात्।।६६३८।।

गणपतितन्त्रे सम्यङ्निरूपितं यद्धि देवेशः।
त्रुटिदूरणेऽपि दक्षो भक्तानामिष्टदाता स्यात्।।६६३९।।

भेदाभेदविभेदा गणपतिरूपेषु संदृष्टाः।
गणपतितन्त्रे सर्वे ते पूजायां समुद्यता जाताः।।६६४०।।

एवमेव श्रीहनुमत्तन्त्रे श्रीवानरेन्द्रस्य।
पूजाविधानममलं संज्ञापितमेवमास्ते तत्।।६६४१।।

भैरवतन्त्रे भैरवपूजानां संविधानं वा।
आदेशयति मनोज्ञं गुणगरिमाणं प्रवेशयति।।६६४२।।

आगमतन्त्रमयीयं सरणिः काचिन्मनुष्याणाम्।
दैवीकरणमहौषधिरूपेणैवाऽवतीर्णा वा।।६६४३।।

आगमविभेदविश्लेषणविधया जागरूकाणाम्।
नैव परोक्षं तदिदं तत्त्वं संजायते नाम।।६६४४।।

औत्पत्तिकसंवादैः सर्जनमाख्यान्ति यानि दिव्यानि।
तान्यागमानि कथितानीति वदन्त्येव विद्वांसः।।६६४५।।

एकैकस्य तु रूपस्याथ चरित्राणि चित्राणि।
परमेश्वरस्य पूजां रचयितुमेतानि दीप्यन्ते।।६६४६।।

तस्यैव मूलरूपे सृष्टिः सृष्टा भवत्येव।
भिन्नः क्रमस्तु सृष्टौ तन्मूलत्वे समाख्यातः।।६६४७।।

अद्वैते वेदान्ते ब्रह्म यदेवाऽस्ति संकथितम्।
शैवाऽगमे स एव व्याख्यातः स्यात् परमशिवः।।६६४८।।

विष्णुर्यस्मिन्मूलं स एव कथितोऽस्ति वैष्णवागम इति।
पाञ्चरात्र इति संज्ञा तत्रैवेयं प्रसिद्धिमायाता।।६६४९।।

विष्णुं प्रमुखं मत्त्वा बहवो जाताः सदाऽगमे रुचिराः।
प्रचुरप्रचारभाषाविन्यस्ता कामधेनुतुल्याभाः।।६६५०।।

श्रीविष्णुरेव रामः श्रीकृष्णो व्यासदेवो वा।
श्रीभागवतं च तदिदं तत्रैवाऽराध्यतां यातम्।।६६५१।।

आगमभेदे मूले तत्त्वेऽथो प्रक्रियायां वा।
दर्शनदृष्ट्या कश्चिद् विचारभेदः समुद्दीप्तः।।६६५२।।

तेनैवाऽगमभेदे नाना व्याख्यानसंकुले निखिले।
वैविध्यं लोकानां विचारभेदे समाम्नातम्।।६६५३।।

आगमभेदे जाते स्वेष्टं देवं प्रसादयितुम्।
पूजापद्धतिभेदाः प्रचालिताः पूजितैरार्यैः।।६६५४।।

स एव तन्त्रः कथितः पूजापद्धतिरियं तन्त्रम्।
पद्धतिभेदे जाते तन्त्राणां भेद आयातः।।६६५५।।

नानाभिलाषपूर्तावाचार्यैरादृतः पन्थाः।
आदिष्टस्तेनैव च पूर्तिर्जाता सदैवेयम्।।६६५६।।

श्रीमद्गुरोस्तु तन्त्रे प्रथमं स्थानं समाम्नातम्।
गुरवो वै जानीयुः कदाऽथ कं किं प्रदेयं स्यात्।।६६५७।।

पञ्चाङ्गं वै तन्त्रं विस्तीर्णं पूजनादीनाम्।
विस्तारस्तत्रत्यो गुरूपदिष्टः प्रयुक्तः स्यात्।।६६५८।।

भगवत्या आराधनतन्त्रं तावत्सुविस्तीर्णम्।
भगवत्या अवतारा दशधा तन्त्रे समाख्याताः।।६६५९।।

देवी परमाऽराध्या हरिहरविधिभिः प्रपूजिता नित्यम्।
देवानां दुरवस्थां दूरियतुं सा हि दुर्गैव।।६६६०।।

भगवत्याः पूजायां नानातन्त्रात्मकं ज्योतिः।
नानारहस्यपूर्णं नानाविधभावनाऽऽस्वाद्यम्।।६६६१।।

निगमो वेदः प्रोक्तो निखिलं वाङ्मयमिदं तदाधारम्।
आगमतन्त्रे सर्वं स्वयं शिवेनैव सम्प्रोक्तम्।।६६६२।।

भगवत्याः पार्वत्याः श्रुतं तथा चैव तत्सर्वम्।
अत एवाऽगमभाषाविभूषितं भासते तन्त्रम्।।६६६३।।

एकैकस्याथ पुनर्देवीरूपस्य सम्प्रोक्तम्।
दशविधरूपविलसितं सकलमिदं भासते तन्त्रम्।।६६६४।।

तन्त्राणां चैतेषां सद्गुरुणैवोपलब्धानाम्।
गुरुरेव तत्र निखिलं सम्यङ्मार्गं निदेशयन्नास्ते।।६६६५।।

अणुतमत्रुटिसद्भावे नैव फलं स्यात्समुपलब्धम्।
गुरुरेव तत्र निखिलं सम्यङ्मार्गं निदेशयन्नाऽस्ते।।६६६६।।

सर्वा सिद्धिस्तन्त्रे सम्यक् सम्पूरिता जाता।
सिद्धीनामेतासामष्टविधत्वं समाम्नातम्।।६६६७।।

वैज्ञानिके युगेऽस्मिन्नाना सिद्धिप्रदे काले।
तन्त्राणां रूपाणां प्रत्यक्षं भाविता सिद्धिः।।६६६८।।

वैज्ञानिकयन्त्राणां संस्थानेषु त्रुटिः काचित्।
यद्यणुतमाऽऽपि जाता तदा फलं नास्ति यन्त्राणाम् ।।६६६९।।

वैज्ञानिकास्तथैते साधकतायां समायाताः।
यन्त्राणां विविधानां सेवायां साधु संलग्नाः।।६६७०।।

तन्त्रे यन्त्राणीमान्याधृतभावानि शारीरे।
संस्थाने द्योतन्ते तानीमान्येव साधकैः सर्वैः।।६६७१।।

संसाध्यानि भवन्तीत्यादौ बाह्यानि यन्त्राणि।
तदनुकरणरूपाण्यथ संपूज्यन्ते प्रयत्नशतैः।।६६७२।।

वैज्ञानिकी च तुलना तन्त्रैः सह कर्तुमुचिता न।
मन्त्राधारिततन्त्रं यन्त्रे विज्ञानमायत्तम्।।६६७३।।

किन्तु फलप्रदतायां सामान्यं यत्तयोर्दृष्टम्।
विज्ञानेऽथ च तन्त्रे सिद्धीनां तत्फलं लभ्यम्।।६६७४।।

यन्त्राऽधारितगमनं दूरस्थैर्वार्तयाऽऽलापः।
दूरस्थं वा दृश्यं सिद्धय एताश्च विज्ञानात्।।६६७५।।

गगने विचरणशीलं विज्ञानं सर्वसिद्धीनाम्।
प्रत्यक्षीकरणेष्वथ सततं संजागृतं दृष्टम्।।६६७६।।

तन्त्राणामादेशे सर्वास्ताः सिद्धयो विपुलाः।
साधकयन्त्राधारा निखिलैर्नो झंकृता जाताः।।६६७७।।

तन्त्रेष्वाध्यात्मिकता विज्ञानात्तं पृथक्कुरुते।
आध्यात्मिकसंसारे जागरणं तन्त्रसरणिरियम्।।६६७८।।

सिद्धय एतास्तुच्छास्सर्वास्तन्त्रे समाम्नाताः।
अद्वैते संसारे संचारस्तन्त्रसिद्धान्तः।।६६७९।।

अल्पैरहोभिरेतज्जीवनसम्पूर्णता जाता।
तेनैव मोक्षलाभस्सम्पाद्योऽस्त्येव मनुजेन।।६६८०।।

मानवशरीनिर्मितिरेषाऽत्यन्तं रहस्यपरिपूर्णा।
एकैकस्मिंस्तत्त्वे गणितेऽत्रत्ये त्वनन्ततैव स्यात्।।६६८१।।

तेनैव तत्र जटिला परिणतिरपि जायते सैषा।
विस्मृतिपटली लक्ष्यं दूराद्दूरे विनिक्षिपति।।६६८२।।

इन्द्रियविषयसुयोगे संसारोऽयं नवैः कर्षैः।
आबद्धं यत्कुरुते लक्ष्याद् दूरे प्रयातोऽयम्।।६६८३।।

अद्वैताऽनुभवाय च द्वैतत्वज्वालनाय जनिरेषा।
तन्त्रात्मकं तु सत्यं ज्योतिस्तत्राऽत्मदर्शनं सूते।।६६८४।।

आत्मानुभूतिरित्थं स्वे रूपे प्रत्यभिज्ञेयम्।
विन्दौ वा नादे वा नानाविधभोगसंस्थाने।।६६८५।।

लोकालोकविलोकनविश्लेषितचाकचक्यानाम् ।
तन्त्रे फलमादिष्टं लोकसफलता परामृष्टा।।६६८६।।

तन्त्राणां मूर्धन्यं स्थानं तत्रैव सञ्जातम्।
एकोऽहं तु बहुस्यामित्येषा घोषणा यत्र।।६६८७।।

वैदिकमर्माणामपि यज्ञे प्रत्यक्षतायां सा।
तन्त्रात्मिकैव सरणिः सत्यं सत्यं सुविस्तीर्णा।।६६८८।।

तन्त्रे मन्त्राणामथ गोपनमास्ते रहस्यमयम्।
सा मन्त्रसिद्धिरेवाऽद्वयतायां सम्प्रेवशयति।।६६८९।।

इष्टं देवं ध्यात्वा या स्फूर्तिर्मन्त्रमात्रासु।
सर्वा संजायेत प्रवर्तितव्यं तथा तन्त्रे।।६६९०।।

नानाविधसिद्धीनां गुडजिह्विकरूपताऽपत्तौ।
साऽपि च मानवजीवनसंसिद्धौ भास्वरा दीप्तिः।।६६९१।।

येयं समाजसंस्था तस्योपकृतौ परैवाशीः।
संप्राप्या निर्मथिता सर्वा सा तन्त्रसंसिद्धिः।।६६९२।।

स्वत एव सिद्धसिद्धैर्गुरुवर्यैः सिद्धमार्गाणाम्।
उपदेशा दीयन्ते भाव्यन्ते चाऽथ यत्नेषु।।६६९३।।

परितः प्रयोगशाला तन्त्राणां विस्तृतैवाऽस्ते।
नवतन्त्रे संज्योतिस्तदिदं सर्वं विशदयति।।६६९४।।

भागानामपि भागा मार्गाणां चाऽधिका मार्गाः।
तीर्थानामपि तीर्थास्तन्त्रे तन्त्रे समाविष्टाः।।६६९५।।

गुरुरेवाऽत्र गरीयानीश्वरभावे स्थितो नित्यम्।
दीक्षितशिष्ये दृष्टिं क्षणे क्षणे सन्निवेशयति।।६६९६।।

अत्र गुरुत्वस्याप्ययमाविर्भावः प्रजागर्ति।
मन्त्रप्रदानकाले गुरुत्वमाविर्भवत्येव।।६६९७।।

सामान्योऽयं मनुजः कथं गुरुत्वे प्रतिष्ठाप्यः।
यस्य स्वरूपमुच्चं सर्वोच्चं भासते तन्त्रे।।६६९८।।

तत्रोत्तरे तु तन्त्रे गुरुत्वमाविर्भवत्येव।
गुरुरूपे परमशिवःस्वयमाविर्भूत इह नित्यम्।।६६९९।।

तस्यैव चाऽमला सा दृष्टिः शिष्यं निबध्नाति।
सर्वोच्चे संस्थाने गन्तुं वा प्रेरयति नित्यम्।।६७००।।

तन्त्रे शिवेन सार्धं सान्निध्ये नूनमायाते।
जनुषो ननु साफल्यं संजातं सर्वमाम्नातम्।।६७०१।।

तन्त्रिकदीप्तिः प्राप्ता कुण्डलिनी जागृता जाता।
ब्रह्माण्डदानिनां सा करतलगतता समाऽयाता।।६७०२।।

तन्त्रे निवेशदेशप्रवेशसंस्पर्शसंमर्दे।
विक्षोभणमपि सद्यो रजस्तमोभ्यां समायाति।।६७०३।।

श्रद्धा वा निष्ठा वा ज्ञानानुगतैव चरितार्था।
ज्ञानाभावे निष्ठा रूपे विपरीततां भजते।।६७०४।।

ज्ञानमिदं चैतन्यं भक्तिश्रद्धे च तद्धर्मौ।
शक्तिरहंताऽश्रयता शैवागमसंमता तत्र।।६७०५।।

एकाऽहन्तेदन्ताविन्दौ स्फुरिता प्रकाशमायाता।
अन्यत्रेच्छाशक्तिः क्रियात्मिका चाऽथ शक्तिरिति।।६७०६।।

परमशिवस्थाज्ज्ञानात्ते शक्ती युगपदुद्भूते।
शिवशक्त्यैक्यभावे ह्यद्वैतं सुस्थिरं जातम्।।६७०७।।

शिव एव शक्तिरूपः शक्तिः सा चैव शिवरूपा।
नतमामणुतोऽप्यथवा भेदस्तत्राऽविरासीत।।६७०८।।

संकुचितेऽर्थे तन्त्रे पद्धति संसाधनेषु विस्तारः।
संसाधनपद्धत्यां प्रचारसंचार आयातः।।६७०९।।

वास्तविके किल रूपे सात्त्विकतायां प्रतिष्ठिता ये स्युः।
अधिकारिणश्च तेषां करणीयेष्वेव तन्त्राऽख्या।।६७१०।।

ये राजसैस्तु भावैरोतप्रोताऽधिकारिणः सन्ति।
तेषां कृते प्रदिष्टा सरणिर्वा यामलाः कथिताः।।६७११।।

ये तु तमोगुणबहुलाः पुनरप्यधिकारिणो जाताः।
तेषां क्रियामयी सा पद्धतिरपि डामरेति संप्रोक्ता।।६७१२।।

आनन्दोऽथो ज्ञानं चैतन्येच्छा क्रिया चैव।
परमशिवस्य समेताः शक्तय एतास्तु पञ्चैव।।६७१३।।

शक्तय एव तथैताः पञ्च मुखानि प्रजातानि।
परमशिवस्य तथात्वे पञ्चमुखत्वं प्रसिद्धं नः।।६७१४।।

ईशानस्तत्पुरुषः सद्योजातश्च वामदेवश्च।
पर्यन्तेऽघोरो वा तेषां नामानि कथितानि।।६७१५।।

सात्त्विकरौद्रविभेदैर्भैरवभेदैरथागमा भिन्नाः।
प्रत्येकस्यापि पुनर्बहवो भेदाः समाम्नाताः।।६७१६।।

सम्मोहनतन्त्रे यो कुञ्चिकमततन्त्रनामको ग्रन्थः।
गुप्तयुगस्य लिपिःसा तस्मिन्काले प्रचारमाब्रूते।।६७१७।।

शैवाऽगमे च लाकुलभैरवकाश्मीरसम्प्रदायेषु।
तन्त्राणां सुविकासो बहुधा शास्त्रे समाम्नातः।।६७१८।।

कौलाः काश्मीरास्ते गौडीया वा विलासाख्याः।
शाक्तागमे प्रविततते सन्त्येते सम्प्रदाया वा।।६७१९।।

१९४.शीतम्

शीतर्तोः प्रारंभे संजाते कार्तिके मासि।
शीतस्य प्रारंभे धनिनां लोकः सुखी भवति।।६७२०।।

वर्षर्तौः संसक्तः शीतो नूनं समायातः।
जलभरितेयं पृथिवो शैत्यं नूनं वमतितराम्।।६७२१।।

शीतर्तोः साम्राज्योन्मेषे सर्वत्र संव्याप्ते।
केषामप्येकेषां संतोषो नैव संजातः।।६७२२।।

योऽयं ग्रीष्मे काले सूर्यो नैवाऽकरोति सुखमारात्।
सोऽयं सूर्यः संप्रति संतोषं सन्ददाति संन्यासैः।।६७२३।।

उष्णस्पर्शोद्वेजकताया नूनं निरास एवाऽयम्।
सर्वविधोष्णस्पर्शे सुखभाषां वा समालपति।।६७२४।।

नारी-देह-लतेयं शीतर्तौ सम्यगुच्छलिता।
आकारयति समन्तादुष्णस्पर्शावलीं नेतुम्।।६७२५।।

सौन्दर्यं नामेदं देहस्याऽस्ते विशेषतो धर्मः।
धर्मे शीतं यच्छति सेयं लतिकैव देहस्य।।६७२६।।

शैत्यात्सम्यक् त्रातुं ज्वलदंगारप्रतिमसैका या।
नारीदेहलतेयं सुखसाम्राज्ये समाह्वयते।।६७२७।।

शीते नीरदलीला काचिद् व्योमानमाविशन्तीयम्।
मनसि मनसि कमनीयं संसारं संविलासयति।।६७२८।।

शीते संसाराणां सर्वा भाषाऽपि विस्मयं तनुते।
अर्धाक्षराऽर्धमात्रालाघवमाद्रीयतां यथा सूत्रे।।६७२९।।

परितः परितापजुषां शीते वातेऽपि धर्मशीलानाम्।
षड्यन्त्रपरिगतानां बाधा साधारणी नास्ति।।६७३०।।

अस्मिन् पर्वतनगरे श्रीनगरे शीतसंसारे।
नीहारसागरोऽयं पर्वतराजानमाविशति।।६७३१।।

हिमवानयमत्यन्तं हिमवानिति संज्ञयाऽख्यातः।
शीतेऽस्मिन् हिमरूपं स्वीयं सर्वत्र दर्शयते।।६७३२।।

देहस्थं नवरक्त-प्रवाहमपि संनिरोधयति।
शीतः किं वा कर्तुं वाञ्छति को वा विजानीयात्।।६७३३।।

मध्याह्ने गंभीरा निशेव परितः समाभाति।
सूर्यस्य विलोपोऽयं पर्वतनगरेष्वरुन्तुदो जातः।।६७३४।।

शीतोचितवस्त्राणामेते पर्वतीयक्रेतारः।
विक्रेतारश्चेमे शोभां विस्तारयन्ति नगरस्य।।६७३५।।

शीते नवशोभानां विस्तारेषु प्रकर्षता दृष्टा।
जनजनमोहनशीला कापि विचित्रैव लहरीयम्।।६७३६।।

यदि शीतर्तुर्न स्याद् वृथा भवेदुष्णवस्त्रसंभारः।
सा व्यर्थतां समेषामेषां स्यात् शीतचरितानाम्।।६७३७।।

भोजनसद्व्यंजनता शीते वा लब्धसंचारा।
कामपि रसनासत्तामनुमापयतीह दिव्यतायुक्ताम्।।६७३८।।

भोजनभट्टत्वमियत् शीतर्तौ विस्तृतं जयति।
पाचनशक्तिः काचित् प्रवर्धते शीतकालेऽस्मिन्।।६७३९।।

उष्णोदकेन सर्वाङ्गस्नानं प्रीतिमावहति।
स्फूर्तिरुदेति च काचित्स्नाने ह्युष्णोदकेन संजाते।।६७४०।।

संगीतात्मकसुविदितशैलीशैथिल्यमाप्तानाम् ।
परमोदारसमीक्षा विज्ञाप्या भूतिसन्तुष्टिः।।६७४१।।

असमद्वारोन्मेषैरेषा वेशाञ्चिता भूतिः।
कुरुते किमपि किमपि तत्कमनीयं काव्यकाननं कुतुकात्।।६७४२।

शिशिरसमीरणकम्पितसत्सीत्काराञ्चिते कर्णे।
मधुराऽप्यन्या काचिन्नैवाऽस्ते तु माधुरीधारा।।६७४३।।

औष्ण्याहरणायार्तास्तप्यन्ते ये विरुद्धसद्भावैः।
तेऽपि प्रगुणितकाया आयान्त्यत्रैव शीतसाम्राज्ये।।६७४४।।

भाषासमष्टिरूपा या सा सीत्कारसंभाषा।
शीतर्तोः साम्राज्ये सैषा कवितावली काचित्।।६७४५।।

वार्धक्यं विधमन्तः शीते सीसीं प्रकुर्वन्तः।
तत्वमसीत्यस्यैवान्तिममक्षरमेकं समासतो ब्रुवते।।६७४६।।

सीधोरक्षरमाद्यं नवयौवनवरसुसंचरणशीलाः।
नूतनमेकं राज्यं स्वीयेऽनुभवे समानयन्त्येव।।६७४७।।

विलक्षणेऽस्मिन् शीते काले सर्वत्र संजाते।
नवतामयता नियतं नित्यैवासाद्यतां काचित्।।६७४८।।

चित्रान्तरङ्गभरिता चित्रमयीयं नटी प्रकृतिः।
शीततौ निजरूपैराभरिता चर्चितैवाऽस्ते।।६७४९।।

गार्हस्थ्ये चित्राणां शीते परिवर्तनं जातम्।
कार्पासकवस्त्राणां सर्वत्राच्छादनं जातम्।।६७५०।।

ऋतुरिति कश्चन शब्दो नूनं सन्मित्रतां यातः।
प्रकृतिसुपर्यायत्वेनैवाऽप्रेडितविभावनाऽभरितः ।।६७५१।।

ऋतुराडस्ति वसंतः सर्वर्तूनां निकामरमणीयः।
तद्भूमिकास्वरूपः शीतो ननु भो न कैर्वन्द्यः।।६७५२।।

शीतेऽन्तरङ्गसङ्गे सङ्गमनं सत्वरं सर्वम्।
सम्यक् काम्यं जातं कुतो न तत्सौरभं देयात्।।६७५३।।

अघटितघटनपटीयानयं महान् शीत एव ननु।
सर्वेषां चित्तानां सामान्यां संस्थितिं कुरुते।।६७५४।।

केचित् कला-प्रवीणाः शीततुं चित्रयन्तोऽपि।
धन्यत्वं स्वीयस्योद्घोषितवन्तो न सन्देहः।।६७५५।।

श्रीकालिदासकविकुलगुरुगौरवतायां समाश्लिष्टाः।
शीततुवर्णनपराः सर्वनिवाऽजगुः प्रकृतीन्।।६७५६।।

देवा अपि चित्तानां भूमावायान्ति शीतकालेऽस्मिन्।
तेनैव ध्यानानां साधनतायाः परो लाभः।।६७५७।।

गंगास्नानादीनां जीवनसौभाग्यदीप्तीनाम्।
शीते सौभाग्यानां शतगुणितो जायते महिमा।।६७५८।।

शीते गंगास्नानं निर्मलतायाः समुद्रमर्पयते।
गंगास्नानसमृद्धः शीते सुखमेधते जन्तुः।।६७५९।।

काले सर्वसमृद्धिं स्ववशे नित्यं तरङ्गयन्तो ये।
ते नूनं धन्यतमा काम्यतमा वाऽथ संसारे।।६७६०।।

युद्धानामपि मध्ये शीतं युद्धं सदा प्रशंसार्हम्।
रक्तानां धाराणां पतनात्पूर्वं हि शीतयुद्धं स्यात्।।६७६१।।

जडतायाः सौन्दर्योन्मादकता दृष्टमात्रैव।
चेतस्यन्यमनस्कं भावं संछादयत्यारात्।।६७६२।।

सर्वं शीते विश्वं चैकीभूतं तुषारसंपातैः।
छादितसर्वशरीरं मुखेऽपि धूमं समानयति।।६७६३।।

किञ्चितकालायैवाऽयं सूर्योऽपि दृश्यतां यातः।
प्राणप्रदायकानामाशानां सत्समर्पको जातः।।६७६४।।

अतिपरिचयादवज्ञा संजाता सूर्यदेवस्य।
तेनैवायं रुष्टो दर्शनदानाय नो यातः।।६७६५।।

शीतेषु वारिधाराप्रवाहमालानिपतितानाम्।
प्रेमप्रवाहपूर्णः समुन्मिषत्यान्तरोन्मेषः।।६७६६।।

शीततौ यात्रायामपि संभारा विशेषाः स्युः।
शीतादन्यर्तूनां यात्रा साधारणी भवति।।६७६७।।

शकटीयानं महता महता वेगेन संचलितम्।
शयनस्थानाऽवाप्त्यै स्वतन्त्र कोष्ठे प्रदृश्यते यत्नः।।६७६८।।

सोत्कोचद्रव्याणां हस्ताद् हस्ते समावेशः।
यः शायिकाप्रदाता पञ्चाऽङ्गुलयो घृते तस्य।।६७६९।।

यात्रायां या भाषा विहृतिं याता वरेण्यानाम्।
सा नो क्वान्यत्रापि प्रकटितभावा विलोक्येत।।६७७०।।

पूर्वं शीतः शिरसि स्थितः स्थितः पुनरियं यात्रा।
याने शायिकसंग्रहणेऽभावमुद्रेयम्।।६७७१।।

धन्योऽयं ननु शीतो येनेयं यात्रिशीलता काचित्।
व्यापारिता मदीयेऽप्येतावत्पाञ्चभौतिके कोशे।।६७७२।।

यात्राकाले काव्यं काव्येऽपि च यात्रिणां गाथा।
संगीतैव कदाचित् सहृदयसत्पात्रतां यायात्।।६७७३।।

शीते यात्राकरणं सुखप्रदं ज्ञानदं चापि।
मोक्षप्रदं तथेदं नानाविधकामदायकं जातम्।।६७७४।।

एकस्मिन्निजताया जडतायां व्यापिते स्थाने।
नित्यं संस्थितिकरणं जडतामसमां विलासयति।।६७७५।।

पूर्वं जडता पश्चात् शीताऽक्रमणं भवेद्धि जडतायाः।
साम्राज्यं दूरयितुं यात्रैवैषा हि शरणं स्यात्।।६७७६।।

मेघभयंकररूपं शीते हिमखंडपातनं नाम।
पृथ्वीयं हि तदात्वे श्वेततरा लोकनीयैव।।६७७७।।

महामहाकाष्ठानां सम्यक् प्रज्वालने जाते।
योऽग्निः समुदयमासादयते शीते सुरक्षैषा।।६७७८।।

भूतिविलेपनकार्येऽपि च शीतादेव रक्षेयम्।
संदृष्टा मुनिभिरथो मिथ्याचारेण दूरमुपयातैः।।६७७९।।

शीतमनन्तोच्छलितं कुर्वन्नायं समीरणः पवते।
पविरिव सोऽयं शीतो वायुर्वा मान्यतां याति।।६७८०।।

शीते तावच्चैते नियता विभवाऽनुभावसंचाराः।
कुतस्तदा नो शीते रसरूपत्वं विजायतां नाम।।६७८१।।

शृंगारसारसौरभसाम्राज्यानां विकासताऽऽयाता।
शीते सर्वे शब्दाः शृंगारस्यैव भाषा स्यात्।।६७८२।।

या कामिनीति या वा सुन्दरतासंश्रिता या वा।
वामा वा मुग्धा वा प्रगल्भतामागतैवासौ।।६७८३।।

सर्वे नायकभेदास्ते भेदा नायिकानां वा।
शीते द्विगुणितरूपाः संजायन्ते स्वसौन्दर्यैः।।६७८४।।

मोहनशीला सर्वा प्रकृतिरियं संविभासतेऽद्यत्वे।
शीतानां साम्राज्ये योऽनुभवः सो वरेण्योऽभूत्।।६७८५।।

परिमितवाक्यानामपि विस्तारो जायतेऽर्थानाम्।
वैभवलसितविभावाश्चानन्दाः सर्वतो वन्द्याः।।६७८६।।

दुर्बलतरतमकाया अपि शीते पुष्टिमार्गीयाम्।
पदवीं निजे शरीरे विधारन्त्येव वस्त्रमहिमाऽसौ।।६७८७।।

निर्वस्त्रतादशायां तुलनीया दण्डमात्रेण।
शोभनवस्त्राऽरोपैर्नितरां पुष्टा विलोक्यन्ते।।६७८८।।

शिरसि बधानाश्चोर्णानिर्मितवस्त्रं पुनर्वृद्धाः।
युवका इव लोक्यन्ते शीतार्पिततीव्रतायुक्ताः।।६७८९।।

अण्डं मांसं मद्यं निषेवमाणाश्च ते ते ते।
आन्तरिकीमुल्वणतां कामप्याच्छादयन्त्येव।।६७९०।।

शीतर्तावायाते मूंगफलीनां चमत्काराः।
विश्वस्तानथ सर्वान् शीतजयार्थं प्रकुर्वन्ति।।६७९१।।

चायाख्यमुष्णपेयं भगवानिव सर्वतो लसति।
हृदये हृदये गच्छति नितरामुष्णं विनिर्गमं पश्यन्।।६७९२।।

भगवानपि प्रवेशात्पूर्वं मन्ये विनिर्गमं ध्यायति।
नो चेद् भक्तवरेण्यैर्निगडितभावे निबद्धः स्यात्।।६७९३।।

शीते काले मिलितं मनसो मोदावहं स्थानम्।
कालो नैव तदात्वे भारं कंचिन्निवेशयते।।६७९४।।

शैत्योग्रतादशायां वार्तानामस्तु बाहुल्यम्।
शिखराच्छिखरविचारावलिरेषा सर्वथा वन्द्या।।६७९५।।

काष्ठानां ज्वलितानां सामीप्येनास्थितिर्नितराम्।
सौख्यं तनुते शीते घर्मे वा सूर्यदत्तेऽस्मिन्।।६७९६।।

संरक्षयितव्यानां शीते कश्चिद्विचारसंचारः।
यस्य न रक्षा कार्या नूनं तद् भस्मसात्कार्यम्।।६७९७।।

संरक्षणीयमेतच्छशरीरमाद्यं नु धर्मसाधनताम्।
बिभ्राणं सर्वविधैः संभारैः सेवितं सम्यक्।।६७९८।।

ऊर्णावस्त्रनिगडितं शैत्यात्संरक्षितं चैतत्।
नानाशरीरमारात्संपुष्टंसर्वशोभाढ्यम् ।।६७९९।।

उष्णोदकस्नानैराभासितवन्द्यता युक्तम्।
तदिदं दिव्यशरीरं रूपे रूपे विलासमायातम्।।६८००।।

अन्येषामप्येतच्छरीरसम्बद्धरूपाणाम् ।
रक्षा शीते कार्या पुत्रकलत्रप्रधावितानां वा।।६८०१।।

संरक्षणयोग्यानां रक्षासंस्कारसंभारैः।
वर्धित-कार्य-कलापं शीतं सर्वत्र संदृश्यम्।।६८०२।।

हंहो, शीत, भ्रातस्त्वमसि वरेण्यो धनाढ्यानाम्।
किन्त्वन्येषां तेषां संहारे कारणं भवसि।।६८०३।।

ये ये वित्तविहीनास्ते सर्वे त्वत्स्मरणकाले।
कम्पन्तः स्वात्मीयां निर्धनतां गर्हयन्त्येव।।६८०४।।

कथमपि गच्छेत् शीतं पुनरपि ताटस्थ्यमागच्छेत्।
शकटी चलेत्कथंचित् जीवनधारावलीमध्ये।।६८०५।।

सैषा काऽपि समीहा भवति नितान्तं विहीनानाम्।
हे शीत, कथं तेषामुपरि न दृष्टिं निपातयसि।।६८०६।।

कम्पनशीला एते संजायन्ते तवागमने।
जानुद्वयसन्धाने रात्रिं व्यतियापयन्त्येते।।६८०७।।

दिवसे त्वेते सूर्यातपसंसेवनसमीहमानाः स्युः।
शेषे काले वह्निं गत्वा कालं समापयन्त्येव।।६८०८।।

एतादृशजनकोटिप्रविभागे शीतलहरीयम्।
मृत्युमुखं दर्शयते वित्रस्ता जीवने रेखा।।६८०९।।

शीतर्तुमेव नित्यं तावत्संसेवमाना ये।
पुष्टास्तुष्टा नितरां सन्तुष्टा वा प्रणम्याः स्युः।।६८१०।।

केचिन्नितान्तमारात्प्रविभक्ता भान्ति शीतेऽस्मिन्।
तेषामियं समीपे नव्या रेखा समागतैवाऽस्ते।।६८११।।

कान्ततरेयं रेखा शीते शीते नितान्तनवकम्पा।
व्योमानमास्पृशन्ती व्यापारयते प्रभावपटलीं स्वाम्।।६८१२।।

यत् करणीयं शीते, ग्रीष्मे वर्षासु वा समग्रासु।
तत्तु नितान्तं काम्यं विनिश्चितं सर्वसंचारैः।।६८१३।।

किन्तु विकल्पे या सा काचित् सृष्टिर्हि कार्याणाम्।
शीते सा परिहार्या ऋत्वन्तरकार्यता तस्याः।।६८१४।।

नूतनमरेजलीलाङ्कुरितविभावाऽनुभावसंचाराः ।
सौष्ठवसम्पन्ना ये सौन्दर्यं ते निषेवन्ते।।६८१५।।

ताडिदिव गौरी वामा सेयं यस्यास्ति धन्यस्य।
तस्य तु शीतं सर्व सुखमयसाम्राज्यमातनुते।।६८१६।।

सेयं समुज्वलाभा वन्हिकणालीव विस्फुरन्ती वा।
यस्याधोङ्गे राजति तस्योत्संगसंगतं शीतम्।।६८१७।।

आराधितनारायणसौभाग्यैरेधमानानाम् ।
पूजागुम्फनसारा शीते धारा समायाता।।६८१८।।

भारतवर्षे तीर्थानामपि शीते विशेषसौन्दर्यम्।
संदृष्टं धार्मिकजनयात्राणां कोऽपि विद्यते महिमा।।६८१९।।

नानाऽनन्तविभावप्रभावभाभिः परिव्याप्तम्।
शीतं तदेतदखिलब्रह्माण्डानां नियामकं तत्त्वम्।।६८२०।।

षोड़शद्वीपः

१९५.सन्देशाः

लोकान्तरेऽन्तरतमे दीप्तिस्तम्भायमाना ये।
क्रान्तदर्शिभिः कान्तासम्मितशब्दैः प्रदत्तसन्देशाः।।६८२०।।

मान्यानामपि मान्यास्ते वै निखिलाः सुभूषाभिः।
भूषितवैभवभरिता नैर्मल्यैरञ्चिता भान्ति।।६८२१।।

सहस्रलक्षवर्षाणां यात्रां संसाधयन्तो ये।
अद्याप्यस्माकं ननु निकटे रूपे विभानि सन्देशाः।।६८२२।।

सूक्ष्मस्वरूपगेहे निभृतं निश्चिन्तभावैः स्वैः।
संस्थितिभावं स्वीयं कुर्वाणा भान्ति सन्देशाः।।६८२३।।

क्षणमात्रेण विलीनं कुर्वन्तोऽप्यन्धकारसाम्राज्यम्।
विज्ञानामृतधाराभरिताः परितो विभान्ति सन्देशाः।।६८२४।।

संसारे सर्वैरप्यनुभूतिं स्वां प्रकाशतां यातैः।
पुरातनाक्षरपाठे प्रगुणितरूपा विभान्ति सन्देशाः।।६८२५।।

अद्यापि नैककोटिस्थितमनुजानां निदर्शकास्ते ते।
मानसगतविमलाभा विभान्ति पुरतोऽपि सन्देशाः।।६८२६।।

उपदेशास्ते कथिताः नानाभाषासु संपठिताः।
नानासद्गुरुवर्यैराम्रेडनभावतां नीताः।।६८२७।।

प्रत्यक्षीकरणानामथ वैभवमात्मसात्कर्तुम्।
योगाद्यभ्यासानां कोटौ याता विभान्ति सन्देशाः।।६८२८।।

उपहासास्पदतामपि तैस्तैर्नीता विरोधिपक्षस्थैः।
पुनरप्यास्वादितनवस्वमभावभावा विभान्ति सन्देशाः।।६८२९।।

वेदे पुराणनिवहे गीतायां निखिलशास्त्रेषु।
धन्यं जीवनमिहसत्कर्तु ते ते विभान्ति सन्देशाः।।६८३०।।

निखिलं जीवनमेतत्कर्मभरैः परिसमापयन्तस्ते।
निजसम्पादितकृत्यैः सन्देशान्संस्तुवन्तितराम्।।६८३१।।

केचिद् वाचां विभवैरन्ये ते ते विशालनिजकार्यैः।
जीवननवतरपद्धतिविन्यासैः किमपि कथयन्ति।।६८३२।।

ते एव काव्यभाषा समुपनिबद्धा विभान्ति सन्देशाः।
कामाकाल्पितकाया अपि ते नित्यं प्रतिष्ठिता मान्याः।।६८३३।।

ऋषिभिर्महर्षिर्वा बोधितकायाः सदैव सन्देशाः।
त्रैकालिकीं सुदृढ़तामद्यापि तु तां सुसाधयन्येव।।६८३४।।

यदि सन्देशा न स्युर्जीवनमेतद् रहस्यान्धम्।
आदर्शभावशून्यं निखिलं सद्यः प्रजायेत्।।६८३५।।

पूर्वपूर्वतरपुरुषैस्तपस्यया जीवनं हुत्त्वा।
आदर्शाणां लब्धिर्नूनं संसाधिता जाता।।६८३६।।

जीवनमार्गे ते ते आदर्शा राजमार्गाणि।
येषामाधारेण तु यात्रा सेयं प्रपूरिता ससुखम्।।६८३७।।

१९६. संवादाः

ऐकमत्यसंस्थितताऽनूकूलमात्रान्वितैः पुरुषैः।
स्वमतसंगतीकरणे संवादाः प्रायशो भान्ति।।६८३८।।

ये भवन्ति सन्देहाः स्थूलाः सूक्ष्माः कदाचिदथ तत्र।
तेषां विलोपनार्थं संवादाः सम्यगाभान्ति।।६८३९।।

सन्देहोन्मूलनसद् व्यापारेषु प्रदीप्तेषु।
प्रतिबन्धकविध्वंसैः सिद्धान्ताः स्पष्टतां यान्ति।।६८४०।।

निभृताः सन्तिष्ठन्त्यो आशङ्काश्चापि विविधास्ताः।
संवादामृतपानैर्निर्मूला निर्मला जाताः।।६८४१।।

प्राचीनै ऋषिभिर्ये कथिताः सर्वेऽपि सिद्धान्ताः।
दुर्दैवे निजरूपे शब्दैर्गूढा हि संजाताः।।६८४२।।

केवलमेते तावत् सिद्धान्तास्तैः कथितपूर्वाः।
श्रद्धाभरैर्नितान्तं स्मृतिस्वरूपेषु संस्थाप्याः।।६८४३।।

ते सिद्धान्ता सन्ति च नो बाध्या वा त्रिकालेऽपि।
शाश्वततायां संस्थितरूपाः सर्वे विराजन्ते।।६८४४।।

किन्तु पराभवदोषैः काले काले विकृतयस्तत्र।
या संप्रविष्टतायां पूरितविभवान्विता जाताः।।६८४५।।

मूलं ज्ञानं तेषां विलुप्तमेवाथ संजातम्-
पारतन्त्र्यदोषोऽयं विक्षोभो विज्ञजनतायाम्।।६८४६।।

ज्ञानस्य शोधनानामभ्यासेष्वद्य दीप्तेषु-
उभयविज्ञविद्वद्भिः संवादाः साधिताः सम्यक्।।६८४७।।

मालिन्यैराक्रान्तं दिव्यं विज्ञानसाम्राज्यम्।
तेनैव विश्वगुरुता दूरीभूता हि देशस्य।।६८४८।।

अद्य पुनर्यन्त्राणां सूक्ष्मज्ञानाभिबोधिनी शक्तिः।
या प्रस्फुटिता तस्याः प्राचीनं मलिनतां यातम्।।६८४९।।

आध्यात्मिकैस्तु यन्त्रैर्नूनं नित्यं समर्जितं ज्ञानम्।
भौतिकयन्त्रधुराभिः कथमिह संसाध्यतां यायात्।।६८५०।।

तत्र पुनः कालकृता कालुष्यानां मलिनताऽपि।
सत्याद् दूरीकुरुते लाभं निखिलं समापयति।।६८५१।।

संवादाश्च तथात्वे विनिगमनाविरहभावेषु।
संकल्पिताः प्रकटिताः पुरातनं निर्मलं कर्तुम्।।६८५२।।

यन्त्राविष्कृतनव्यैः सिद्धान्तैः शुभ्रलाभाऽढ्यैः
जगदिदमुपकारेषु प्रदीप्तभावे परामृष्टम्।।६८५३।।

क्षारं जलं पिबामस्तातेनावेदितात्कूपात्-
सन्तुष्टाश्च भवामः परम्परा रक्षिताऽस्माभिः।।६८५४।।

किन्तु समस्ते विश्वे तुलनायां सा स्थितिर्मान्या-
प्रत्यक्षलाभदाने ते नो वा सन्ति पर्याप्ताः।।६८५५।।

नवयान्त्रिकविद्वद्भिः सह संवादेषु भूरिभाग्यैर्वा।
बहवो पुरातना अपि सिद्धान्ताः साधिता जाताः।।६८५६।।

हर्षोत्फुल्ला स्फूर्तिस्तेनाऽयाता निकामरमणीया-
जितमत्राऽस्माकं ननु ऋषिभिस्तेषां विशदतायाम्।।६८५७।।

१९७.एकः शब्दः

प्राञ्जलमानसभूमावारुह्याथाऽत्र तेन धन्येन।
महर्षितेजोमयताविभासमनेन सम्प्रोक्तम्।।६८५८।।

एकः शब्दः सम्यग्ज्ञातोऽथो सुप्रयुक्तश्च।
स्वर्गे लोके नीत्त्वा कामगवीरूपतां याति।।६८५९।।

कोऽयं रहस्यपूर्णो नाना वादैरभिव्याप्तः।
शब्दो योऽयं मुग्धं कुरुते तं दीप्ततमपुरुषम्।।६८६०।।

ज्ञाते शब्दे सम्यग् श्रेष्ठत्वं तस्य साधितं जातम्।
तदनन्तरं च सुष्ठु प्रयोगकालः समायाति।।६८६१।।

शब्दस्त्वथ सोऽथो कः यज्ज्ञाने सुप्रयोगे च।
महाभाष्य-संभाषा सौन्दर्यैरिङ्गितं कुरुते।।६८६२।।

शब्दत्वजतिरेवाऽसाधारण भङ्गिमायुक्ता।
संकथितेत्येवादौ बुद्धिः संजायते नम्रा।।६८६३।।

एकैवेयं जातिः शब्दत्वेनाऽवृता काचित्।
अत्यन्तं कमनीये कलेवरे कीलिताकारा।।६८६४।।

अनन्तजातिसंकायेऽस्मिन् सकले दिव्यसंसारे।
एका शब्दमयीयं सर्वेषां पोषिका जातिः।।६८६५।।

कथिताश्च सुप्रयुक्ताच सुज्ञाता वा नितान्तरमणीयाः।
प्राप्ते स्वर्गे लोके कामगवीरूपमावहन्त्येव।।६८६६।।

पूर्वं निश्चिततादृशविशिष्टरूपान्वितः कश्चित्।
शब्दः कुत्रचिदास्ते यदिङ्गितं भासमानमिह।।६८६७।।

अथ कोऽयं शब्दःस्यात् यज्ज्ञाने सुप्रयोगे च।
तस्य कामधुग्भावं विभावितं भाष्यकारेण।।६८६८।।

ओमित्येकाक्षरनवसारैः सर्वैरूपास्यमानोऽयम्।
शब्दो वेदपुराणे गीतायामथ समादिष्टः।।६८६९।।

एवं कृते प्रतीकव्याख्याने सन्दिहानमिदम्।
मनः पुनः प्रश्नस्थं भावं कथितुं समायातम्।।६८७०।।

किमिदं केवलमोमित्यक्षर संसाधानाय सन्दिष्टम्।
अष्टाध्यायीप्रोक्तं सर्वैः संस्वीकृतं शास्त्रम्।।६८७१।।

अथवा कस्यचिदेकस्यैवाकारादिशब्दस्य।
संसाधनसंसिध्यै प्रणीतमखिलं महाशास्त्रम्।।६८७२।।

एतत्तावत्कथमिह संभावनभावमारोहेत्।
तस्मादेकः शब्दोः जातित्वे नित्यमाविशाति।।६८७३।।

वाणीसंस्थो जातो यो यः शब्दस्तदर्थसंज्ञाने।
प्रश्नाः समुदीयन्ते तदान्तिमो भाव आयाति।।६८७४।।

एवं विधास्तथान्येऽपि च सन्त्येव पूर्वपक्षास्ते।
येषां पूर्वज्ञाने तदुतरे चाथ नव्यग्रन्थः स्यात।।६८७५।।

तत्राप्यस्त्यन्तरतरसंगर्भितशब्द एक इति।
एकस्य तस्य शब्दस्य तु काचित् श्रेष्ठता भाति।।६८७६।।

एकरूपणोच्चारणसंव्याप्तं शब्दरूपमिदं।
सर्वश्रेष्ठं मत्वोदाहरणं तस्य संदत्तम्।।६८७७।।

यदि नाम जातिमात्रं शब्दत्वेनान्वितं भाति।
सन्ति तदा वै प्रश्नाः सुसमाधेया भवेयुर्वा।।६८७८।।

शब्दा नितरां निम्नानप्यर्थान् स्वीयवाच्यार्थे।
प्रकटीकृतान् प्रकुर्वन्त्येते शब्दा न कामधुग्जाताः।।६८७९।।

सुप्रयुक्त इति तावद्विशेषणं तत्र देयं स्यात्।
यत्रार्थानां ज्ञाने निम्नत्वं नो समायति।।६८८०।।

सम्यग्ज्ञानेऽपि तथाभावो नूनं सुसन्धार्यः।
मलीमसार्थप्रकटनशब्दालिर्नास्ति सुज्ञाता।।६८८१।।

दुर्ज्ञाता दुष्प्रकटनभावं कञ्चित् समारूढा।
नो वा स्वर्गे लोके कामगवी सा विजायते काचित्।।६८८२।।

याज्ञे कर्मणि देवानामाह्वाने प्रयोजिता शब्दाः।
मन्त्रत्वेनाम्नाता तेषाः मेतत्समुज्ज्वलं रूपम्।।६८८३।।

सम्यग्ज्ञाने तत्र तु स्वरमात्राणां परिज्ञानम्।
दिव्योदात्तादीनां तत्रालोकः प्रसन्नतां याति।।६८८४।।

इन्द्रशत्रुर्वर्धस्वेत्यादिस्वरविपर्यये जाते।
मन्त्रमयी सा देवी वृत्रासुरमाह्वयामास।।६८८५।।

इन्द्रः शातयिताऽसौ संजातः स्वरविषमतायाम्।
सम्यग् प्रयोगभावे क्वेन्द्रस्तिष्ठेद् वराकतां यायात्।।६८८६।।

एकः शब्दस्तादृश एवायं जातिरूपेण।
श्रेष्ठार्थप्रकटनतावैभवमुच्चारणं च सन्धत्ते।।६८८७।।

अन्योऽर्थस्तावदयं यत्रापीत्यध्यहारलभ्यं स्यात्।
एकोऽपि शब्द एवं सुज्ञातः सुप्रयुक्तश्च।।६८८८।।

परोक्षलोकेष्वपि वा नाना फललाभवर्षणं कर्तुम्।
सन्नद्धःसन्तिष्ठति सर्वेषां वा समनुभूतिः।।६८८९।।

कैमुतिकन्यायस्यात्राश्रयणेन च विपुललाभः स्यात्।
एकस्यैव यदेयं स्थितिरिह किमुताऽखिलाः शब्दाः।।६८९०।।

सम्यग्ज्ञाताः स्युर्वा सुन्दरयोगेषु विचरन्तः।
मृहे चत्वरे गोष्ठ्यां कामदुघाः संप्रजायन्ते।।६८९१।।

भाष्यकारवचनानामर्थः सोऽयं परिज्ञातः।
आभ्यन्तरं च बाह्यं विमलीकरणं सुसाधयन्नास्ते।।६८९२।।

१९८.वाग्विलासः वाक्कलहः

एषा याऽस्मद्वाणी सा सर्वं कनकसंसारम्-
सद्यस्तरां प्रसूते लोके लोके विलासिता याता।।६८९३।।

नाना नव नव वर्णोच्चारणवेलालया सरसा-
वाणी विलासलास्यं नैर्मल्येषु प्रदीपयन्त्यास्ते।।६८९४।।

अभिनवतासंचारः कमनीयः कोऽपि कान्ततमः।
वार्ताविलासमूर्तिप्रतिष्ठितो दूरतो दृश्यः।।६८९५।।

सर्वस्मिन्नपि लोके सन्दृश्या मिष्टभाषिणो वन्द्याः।
ये निजवाणीं नित्यं विलासभूमौ निभालयन्त्येव।।६८९६।।

श्रीमद्भगवत्कृपया वागियममृतात्मिका सृष्टिः।
संसारे निजनवता नैर्मल्यं लोकयन्त्यास्ते।।६८९७।।

स्वयं स्वयंभूभूताऽमृतात्मिका दिव्यतमलहरी-
वाणी साक्षात्परमा दिव्या देवी समायाता।।६८९८।।

नो कुरुतेऽत्र विलम्बं क्षणमात्रास्यापि गणनायाम्।
कालकलाकलनायामकलितविभवेषु कीलिताऽकारा।।६८९९।।

कुतः किमिति कस्मादिति कोऽयं किमसौ करोति कुत्रत्यः
प्रश्नावली विलसिता नर्तनमिव तन्मनोमञ्चे।।६९००।।

यद् यद् कथनीयमिदं कथितं पुनरपि तथापि संकथितम्।
वारं वारं कथितं पुनरपि नैवाऽथ संकथितम्।।६९०१।।

अग्रिमदिने तु सर्वं कथनीयं समयमातृकां ध्यात्वा।
वाणी नो विश्राम्यत्यनन्ततायां सुविस्तीर्णा।।६९०२।।

अथ कोऽयमित्ययघनु नित्यो नूत्नः प्रवाह आयातः।
मानवमात्रं नहि नहि प्राणिजगन्मात्रमोहनं कुरुते।।६९०३।।

एकोऽद्वितीयकायः पूर्णः पुरुषस्तपोभिः स्वैः।
सर्वविदितवाग्विभवः करणीयं नूनमामृषति।।६९०४।।

यद् यद् तेन कृतं वा यद् कुरुते वा करिष्यति वा।
तत्वमृतं संजातं जायत इति वा जनिष्यति वा।।६९०५।।

वागियमथ शब्दमयी वर्णोच्चारणमयी सुगन्धमयी।
दूरस्थितान् सुपुरुषानप्याह्वयते विनायासम्।।६९०६।।

यथा मन्दिराणीमान्यनन्ततायां प्रजातानि-
सर्वेश्वररूपाणामाधाराणि प्रकल्पन्ते।।६९०७।।

तथैव किल वाणीयं स्वीयविलासेषु भूयिष्ठाम्।
लिपिमयभूमिं कामप्यवतरणाय प्रकल्पयन्त्यास्ते।।६९०८।।

लिपिभूमाववतीर्णा वाणी तादृशविलासेषु।
विलसितकाया जाता शतशो वर्षेऽपि युवतीयम्।।६९०९।।

अजरावाणी विलसितसंसिद्धिर्मानुषे जगति।
सर्वस्मिन्नपि खेलनसंकूर्दैरुल्लसितविभवा।।६९१०।।

वाग्विलासरूपाणाममृतमयीं दोलिकां ध्यायन्।
मनुजो निजसंसारं सम्यग्भावेषु सारयन्नास्ते।।६९११।।

वाणीविलसितमेतज्जगतीकोणेऽष्ववस्थितं भाति।
नोचेन्निखिलं विश्वं विनाशगर्ते निपातितं भूयात्।।६९१२।।

केवलमेकैवैषा वाणी युवतीव संसारम्।
मोहननवरूपेष्वथ सर्वानन्द प्रदायिनी जाता।।६९१३।।

संसारेष्ववतरणक्षणवेलायां रुदनवाणी।
कीदृशममृतं परिजनहृदये सञ्चारन्त्यास्ते।।६९१४।।

जीवनमात्रे प्रथमा संजाता या रुदनवाणी-
तच्छ्रवणायोत्सुकता हिमालयं वा विलंघयन्त्यास्ते।।६९१५।।

शिशुलीयायां प्रथमा परिगणनीया रुदनवाणी।
अन्ये हसन्ति सर्वे हर्षोत्फुल्लैर्मनोमयैर्विभवैः।।६९१६।।

जीवनमखिलं चैतत्सफलं तस्यैव संजातम्।
आयाते संसारे केवलमेकः स एव रुदितोऽयम्।।६९१७।।

अन्ये हसन्ति सर्वे हर्षोत्फुल्लेषु विभवेषु।
आधारो वा मिलितश्चाकारे संस्थितः सोऽयम्।।६९१८।।

संसारं सन्त्यज्य च यस्मिन् प्रतियात्ययं कश्चित्।
रोदिति संसारोऽयं विहसन्सोऽयं प्रयाति संसारात्।।६९१९।।

वाचां विभवाऽनन्त्ये का परिगणना भवेन्नाम-
अद्याप्यभिन्नमुद्रो विभाति वाचां परिस्पन्दः।।६९२०।।

दैनन्दिनमथवाऽत्र तु क्षणे क्षणे वाग्विलसितानाम्।
संस्पर्शैर्नवविभवैर्नीयन्ते वासराः सर्वे।।६९२१।।

अथ पुनरत्रोल्लिखिता विपरीता कापि चित्राली।
वाक्कलहरूपिणीयं नरके घोरे निपातयन्त्यास्ते।।६९२२।।

वाचां नित्यं युद्धं कलहो वा कथ्यते सोऽयम्।
संसारे नाय किल नूलः कश्चित समायाति।।६९२३।।

वाक्कलहं कुर्वाणाः स्वात्मानं तोषयन्तोऽपि।
हालाहलं पुरस्तात्कुर्वन्त्येवाऽथ निःशंकम्।।६९२४।।

वाक्कलहे या तृप्तिः कलहाक्रान्ते मनसि जाता।
तेन निजं जीवनमिह सफलं ते साधु मन्वानाः।।६९२५।।

महाभारतं युद्धं परिणमयन्ती हसनवाणी।
द्रौपद्याः संजाता दुर्योधनकर्णसंपतिता।।६९२६।।

न केवलं वाक्कलहः संसारेष्वन्तिमः कलहः।
संजातोऽसौ साक्षात् वाचां विभवोऽपि सन्दृश्यः।।६९२७।।

सांसारिकसंचारे वाक्कलहानां सुविस्तारे।
वाचां विलसितरूपाण्यायान्त्येवाऽत्र पत्रेषु।।६९२८।।

एतादृशदृश्यावलिभूषितरूपाणि पत्राणि।
नित्यसमाचाराणां यानान्येव प्रजातानि।।६९२९।।

मन एव वाक्प्रवाहं संप्रेरयतीति पाणिनिर्भगवान्।
शिक्षाग्रन्थे कथयति तस्मान्मनसैव कल्पते वाणी।।६९३०।।

मनसि मनसि सुविलासाः फुल्लां वाणीं विलासयन्त्येते।
मनसि कलहसद्भावे सेयं कलहात्मिका वाणी।।६९३१।।

कलहानां संसारे संजाता भूयसी संख्या।
वाणीनामपि तावत्ततोऽपि संख्या परैवाऽस्ते।।६९३२।।

परिवारव्यवहारे लोके संसारसंचारे।
कलहप्रादुर्भावाः सद्यो भावान्विता दृष्टाः।।६९३३।।

एतैः सद्यः कलहैर्दैनिकपत्राणि भूयांसि।
सम्पुष्टिं तां स्वीयां लोकेलोकेषु वितरन्ति।।६९३४।।

अद्य तु निर्वाचनमिह चायातं वाक्कलहपूर्णम्।
नित्यनूतना कलहे कलना कां कां न संमदं धत्ते।।६९३५।।

निर्वाचिताः सदस्या लोकसभायां समन्विताः सन्तः।
लोकोत्तरं तु कलहं कलिताऽकारं प्रकुर्वन्ति।।६९३६।।

विवशा तेषां कलहं नित्यं दृष्ट्वापि जनतेयम्।
एतत्सर्वं कर्तुं ते तेऽस्माभिर्मतोन्मत्ताः?।।६९३७।।

संविधाननिर्माणानन्तरमेतद्विधानं हि।
देशे तथा विदेशे भारतवर्षं विधारयति।।६९३८।।

संविधानगतशासननियमावलिमेव सत्कृत्य।
निर्वाचनं तु नियते काले सर्वत्र संजातम्।।६९३९।।

संविधाननिर्मात्रिभिरेवं तत्कल्पितं चासीत्।
निर्वाचिताः सदस्याः सभ्यतमाः स्युः सुपूर्णाः स्युः।।६९४०।।

सर्वे देशास्तानथ संपश्यन्त्यद्य सत्काले।
एते त एव पुरुषा ये मूर्धन्याः सन्ति देशेऽस्मिन्।।६९४१।।

वाणीविलसितमत्र हि वाचां कलहे विपरिणामितम्।
कियदपकारपरायणतायां नीत्वा समापयति।।६९४२।।

वाग्देवतासुमन्दिररूपाण्येतानि पत्राणि।
पुस्तकानि च ग्रन्था यन्त्रारूढाः विनिर्गता यान्ति।।६९४३।।

एतत्संकलने वाद्याप्यात्मावलोकने काचित्।
संतृप्तिः संजाता वाणी तत्रामृता भाति।।६९४४।।

१९९.सुविधाः

सुविधा सुखं प्रयच्छति सुविधा संसारसर्वस्वम्।
सुविधाऽलिङ्गितकाया सर्वे ते ते भवन्ति वै देवाः।।६९४५।।

सुविधा सेयं जननी संसारे सारतां याता।
सुविधासहस्रयुक्ताः सर्वत्रैव प्रमोदन्ते।।६९४६।।

सुविधा नित्यं काम्या सुविधा साराभिरामरमणीया।
सुविधायाः साम्राज्यं सम्पूर्णं सर्वसंसारे।।६९४७।।

सुविधा जीवनतत्त्वान्करेऽर्पयति संविशन्तीव।
जीवननवसौभाग्यं सुविधैवेयं समीपगं कुरुते।।६९४८।।

सुविधाशतैरियं सा दृष्टिः साकूतमायाता।
यत्सुविधैव तु जगतां पालनभावं समीकुरुते।।६९४९।।

सुविधास्वरूपघटना जायेताऽम्रेडितैव नित्यमियम्।
क्षणशः क्षणशः सुविधा कणशः कणशस्तथा सुविधा।६९५०।

काचिद्रमणीयाभा या चेयं विद्यते पुरतः।
क्षामाङ्गी गौराङ्गी विशदङ्गी सैव सुविधेयम्।।६९५१।।

या चेयं वर्षाया ग्रीष्मस्याथोऽपि शीतस्य।
अनुभववैशद्यानां भोगक्षमता च सुविधा सा।।६९५२।।

जीवनमरणविवाहे सुविधेयं जीवने सरणिः।
सुविधाऽभावे नूनं मरणस्थितिरेव संजाता।।६९५३।।

अत एव सृष्टिकर्ता ब्रह्मा वा विष्णुरूपो वा।
शिवरूपो वा नित्यं सुविधां संसेव्यमानास्ते।।६९५४।।

ते तु तदानीं तत्तत्संसारान्सम्प्रकल्पयन्तोऽपि।
तेषां तेषां सुविधाशतरूपाणामनन्तरूपाणाम्।।६९५५।।

प्रकल्पनं कुर्वन्तो नो वा गणयन्ति खेदं वा।
स्वेदं वा ग्लानिं वा पराभवं दैन्यभावं वा।।६९५६।।

नाना नवनवविश्वान्प्रकल्पयन्तोऽपि विश्वासैः।
पुनरन्यं नव विश्वं क्षणशः क्षणशः प्रकल्पयन्तितराम्।।६९५७।।

सैषा सर्वा सुविधा येयं सर्वं विभावयते।
सम्पोषयते सर्वान्निखिलानेतान्विबोधयते।।६९५८।।

सततोत्थानपुरस्सरमभितो वेगेन संचरणम्।
संभाषणे रसानां वर्षणमेषाऽपि सुविधैव।।६९५९।।

आमूलादपि सानोराच समुद्रात्प्रकामनिष्णाता।
संसारेष्वन्येष्वपि सुविधाया एव साम्राज्यम्।।६९६०।।

देवो यदि बोभूयान्मानव एषोऽत्र किं कुर्यात्।
सुविधानामथ भोगे स्वर्गत्वं विद्यते सर्वम्।।६९६१।।

यद्यत्सर्वं काम्यं मनसा वचसाथ कर्मणा वाऽपि।
तस्योपलब्धिरूपा सुविधेयं सर्वदा जयति।।६९६२।।

काम्यात्काम्यतराणां कामानां वा पदार्थनाम्।
सुविधाशब्दावल्यां भोगाख्यः शब्द आयाति।।६९६३।।

सुविधाया ये भोगास्तेषामाभोग एवाऽयम्।
सम्पूर्णः संसारो विलसत्यूर्ध्वं तथाऽधस्तात्।।६९६४।।

सुविधैवेयं सर्वान्निखिले विस्तीर्णरूपे वा।
विस्तारितविभवाभा नाना संप्रस्तुतीः कुरुते।।६९६५।।

मातेवेयं जननी सर्वस्यास्याऽथ विश्वस्य।
मातेव पालयित्री सुविधेयं सर्वतो वन्द्या।।६९६६।।

राजा भवति यथार्थं कर्तुमकर्तुं तथाऽन्यथा कर्तुम्।
यस्य तु वशंवदा स्यात्सुविधा राजा स बोभूयात्।।६९६७।।

जनतन्त्रेऽस्मिन्सुविधासंसाराणां परां काष्ठाम्।
पश्यन्तो वयमेते मुदिता हृष्टाश्च भीताश्च।।६९६८।।

एतावन्ननु सौख्यं सुविधाभिः सर्वमादिष्टम्।
किं कुर्मः किं वा स्यादेतेषां सौख्ययोगानाम्।।६९६९।।

कियती शक्तिरिहेयं प्रगुणीभूता च सुविधानाम्।
भोगाय कल्पते वा तदभावे भीतिरायाति।।६९७०।।

सुविधाऽऽभोगे भीतिः काचित्सेयं समायाता।
भीतेरपि सुविधेयं दूरीकुरुते दुरन्तानि।।६९७१।।

निर्वाचनवेलायां ये ये सन्तः समस्तसंसारे।
सुविधाऽऽभोगे चकिताः क्लेशे सुविधां तु पश्यन्ति।।६९७२।।

अहर्निशं सम्भ्रान्ता मतानि गृण्हन्ति जयकाले।
संसत्सदस्यतायां प्रयान्ति सच्छासनं कर्तुम्।।६९७३।।

तत्र च सुविधानां यः संसारः प्रस्फुटो भवति।
तत्कृत एव समस्ता सरणिः संसेवितैवाऽऽसीत्।।६९७४।।

या सन्धानविधुरता या चेयं चातुरी नम्रा।
सुविधासौभाग्यानां संवर्धकतत्त्वसंभूतिः।।६९७५।।

अनुकूलताविभावाः प्रकृतौ संसारसंभाराः।
नाना नवसंमानैर्विभूषितेयं सदा सुविधा।।६९७६।।

दैन्ये विनयः सुविधा धनित्वरूपे च गर्वोऽयम्।
विद्वत्तायां भाषणधारायां जायते सुविधा।।६९७७।।

लेखनकलाविलासप्रसारमाधुर्यरचनायाम् ।
शब्दानामर्थानां वाक्यानां वा परा सुविधा।।६९७८।।

ग्रीष्मे शैत्यसमर्पकयन्त्राणां या समुपलब्धिः।
शैत्ये तथोष्णकारकयन्त्राणां काऽपि सुविधैव।।६९७९।।

अध्यापकवर्या ये विद्यार्थिन एव सुविधा स्यात्।
तेषामानीतानां तेभ्यो दानं परा सुविधा।।६९८०।।

मठदेशे विनिवासे स्थानप्राप्तिस्तथाऽन्याऽन्या।
सुस्वादुभोजनानामुपलब्धौ सर्वथा सुविधा।।६९८१।।

सर्वकारसेवायां सर्वविधा जायते सुविधा।
धनलाभः परिपूर्णः परिपूर्णा वाऽपि संभाराः।।६९८२।।

सहजस्वभावभाषासंस्काराणां वा समुद्योतैः।
नियतं सुविधाभागाः संसर्गैरेव साध्यन्ते।।६९८३।।

निम्नतरैः सहयोगे सुविधा निम्नान्विता जाता।
भव्यतरैः सहयोगे सुविधाऽपि च जायते भव्या।।६९८४।।

सहयोगोऽपि तु सुविधारूपेणैवाऽत्र संयाति।
सहयोगे सिद्धानां सुविधा संजायते सर्वा।।६९८५।।

सुविधावैभवभेदा एते गणितुं न शक्यन्ते।
एकैका वीचिरियं सुविधायां स्यादनन्तैव।।६९८६।।

सुविधासहस्रयोगो येषां सञ्जायते सहजः।
नूनं त एव पुरुषाः संसारे सन्ति धौरेयाः।।६९८७।।

सेयं गाथा चान्या सुविधा स्वत एव संयाता।
यद्वा सर्वा सुविधा स्वयं परिश्रम्य सम्प्राप्ता।।६९८८।।

सहजा या वै सुविधा जन्मादेवाऽस्ति संलब्धा।
तां वर्धयितुं ये वा जानन्त्येते जगद्वन्द्याः।।६९८९।।

जन्माऽसादितसुविधावैभवभरितास्तथा ते ते।
तासां भोगे नित्यं स्वीयं जन्मैव चार्पयन्तितमाम्।।६९९०।।

सर्वसमुपभोगानां सौविध्येऽस्मिन्समागते सहजे।
सात्त्विकराजसतामसभोगानां रूपमायातम्।।६९९१।।

सहजानां सुविधानां सात्त्विकभोगे समुत्पन्ने।
लोकानामुपकारे सुविधासंयोग आयाति।।६९९२।।

लोकानामुपकारे सुविधासौभाग्य उन्नेयः।
तेनैवोत्तरकालिकतायां परमार्थतो लाभः।।६९९३।।

अर्थाऽगमोऽथ नीरोगत्वं स्त्रीस्नेहसम्प्राप्तिः।
पुत्रस्य वश्यभावो विद्याभिश्चार्थसम्प्राप्तिः।।६९९४।।

एते तु जीवलोके सुविधासौभाग्यसंभाराः।
गणितास्तावन्नीतौ सत्कविभिः सर्वसाक्षित्वे।।६९९५।।

सत्त्वेन यदा योगस्तदा तु लोकोपकारेषु।
शंसाभावः कश्चिन्नैवाऽयातस्तु लक्ष्यसन्दोहे।।६९९६।।

लौकिकसंसिद्ध्यर्थं यशोवितानं करे कर्तुम्।
सुविधा यदा प्रयोज्या रजोगुणस्तत्र युक्तः स्यात्।।६९९७।।

सुविधा रजोगुणानां रूपाणां काऽप्यनन्तता जाता।
सर्वत्र तु संसारे रूपाणीमानि दृश्यन्ते।।६९९८।।

अत्र तु सुविधा सौख्यं कष्टं वा मिश्रितं रूपम्।
उल्लासयति नितान्तं शान्ता सेयं कुतो न वा भूयात्।।६९९९।।

सुविधा यदा गुणत्रयतमोगुणेद्युक्तसंचया जाता।
नूनं तदैव जातोऽन्येषामध पीड़नोद्योगः।।७०००।।

अस्माकं या सुविधा साऽन्येषां स्यादसुविधैव।
अन्येषां या सुविधा साऽस्माकं स्यादसुविधैव।।७००१।।

सुविधाऽसुविधासंकरभावे तामसगुणोद्रेके।
संम्मिश्रणेषु सुविधारूपा दृश्यावलिः स्फुरति।।७००२।।

एकैकस्या अस्या दृश्यावल्यास्तु सुविधाया।
रूपाण्यनन्तायां संयातानीव बाभान्ति।।७००३।।

मन्त्रित्वे सम्प्राप्ते सर्वं सुविधास्वनुस्यूतम्।
सर्वे महामहान्तो नम्रतया सम्मुखे यान्ति।।७००४।।

मुखनिस्सारणमात्रात्सर्वं समुपस्थितं भूयात्।
द्रव्यस्याऽप्यागमनं द्वैतीयिकतासमर्पितं भूयः।।७००५।।

वेतनमात्रविनिमये नो वा किञ्चित्तु गणनीया।
या तत्रत्या सुविधा वेतनतः शतगुण सा स्यात्।।७००६।।

वेतनतो लक्षगुणा केन्द्रे मन्त्रित्वगतसुविधा।
क्षणे क्षणे संसारे देशानां दर्शनं भूयात्।।७००७।।

यदि सुविधेयं स्वीयं क्रोड़ं नो वा प्रयच्छेत।
नूनमिदं लोकानां शासनकरणं विरुध्येत।।७००८।।

शासनसंस्थासंस्थितिकाले या सेव्यते नाम।
सा सुविधाऽन्यत्र न कुत्राप्यालोकनीया स्यात्।।७००९।।

इत्थमेव सुविधानां शासनसौभाग्यमालोक्य।
निर्वाचनसंग्रामेऽवतरन्त्येवाऽत्र नेतारः।।७०१०।।

निर्वाचनविधिकाले नानासन्धानकार्येषु।
सुविधैव यत्र शरणं तेषामेवाऽत्र जायते विजयः।।७०११।।

राजतन्त्रपद्धत्यां या सुविधा राजपरिवारे।
भोग्या संजाताऽसीत्साऽद्यत्वे मन्त्रिणां जाता।।७०१२।।

सुविधासमुद्रमन्थननिर्गतपीयूषपरिवेशे ।
बहुशो राहुविभूषितपरम्परा वर्धिताऽद्यत्वे।।७०१३।।

सूर्यश्चन्द्रमसोऽपि तु तत्सङ्केतप्रकारेषु।
पीयूषपानसुविधां राहूणां छेदयन्त्येव।।७०१४।।

अन्येषां सुविधानामन्यैः संभोगवेलासु।
द्वन्द्वानामपि सुविधा सहसैवोपस्थिता भवति।।७०१५।।

समाचारसंचयने सुविधेयं पत्रकाराणाम्।
चरितोत्थापनपातनसुविधा संजायते नाम।।७०१६।।

कस्यामपि संस्थायां सुविधाऽभावेऽथ संजाते।
संस्थायाः परिवर्तनमथ सुविधायां समायाति।।७०१७।।

सर्वैरेव विभावैरनुभावैश्चाथ संचारैः।
सुविधाया उपयोगोपभोगयोग्यत्वमानेयम्।।७०१८।।

उन्नतमध्यमनिम्ना वर्गा ये लौकिके दृष्टाः।
जनजनजातिनिविष्टास्ते सुविधामभिमुखीकृत्य।।७०१९।।

एकैकस्मिन्वर्गे सुविधायास्तारतम्यानाम्।
भेदान्संकेतयितुं पुनरुपभागाः प्रकल्प्यन्ते।।७०२०।।

एवमनन्ता भेदा जायन्ते तस्य सर्वस्य।
मानवजातिविशेषे प्रयत्नमासेवमानस्य।।७०२१।।

सुविधानां सौभाग्यावलिरेषा तादृशी भवति।
नो मानवमात्राणामपि पशुपक्ष्यादिनां सर्वा।।७०२२।।

कुक्कुर एको वीथ्यां जातो मृत एव तत्रैव।
अपरश्चायं निखिलं सौख्यं सर्वं प्रभुञ्जानः।।७०२३।।

तरुणीवक्षाऽलिङ्नमपि शयने कुक्कुराऽभ्यासः।
सुविधासौभाग्यवशान्न स्याद्वा कुक्कुरे भेदः।।७०२४।।

पक्ष्यादीनां पुनरथ सुविधासौभाग्यसंसारे।
भेदाऽभेदविभेदे सत्ताऽसत्ता समवलोक्या।।७०२५।।

परमेश्वरस्य या वा शक्तिर्माया महामाया।
प्रकृतिः प्रतिकृतयो वा सा तस्याऽस्ते महीयसी सुविधा।।७०२६।।

नेदं किमपि समस्तं व्यस्तं वा चित्रमयविश्वम्।
सर्वप्रकल्पनायां विकल्पितं सुविधयैवेदम्।।७०२७।।

यस्य तु सविधे सुविधा यादृग्भावेषु परिणमिता।
तस्य तथैवाऽस्वादो जीवनकाले प्रजायते नित्यम्।।७०२८।।

सुविधायाः क्षणमात्रे वियोग एवाऽन्न मृत्युरित्युक्तः।
सुविधाविरामभाषा जीवनधारां विलोपयति।।७०२९।।

अयमस्ति विप्रभावे स्थैर्याणां स्थापको मनुजः।
अस्य तु सुविधासौख्यं सर्वेषां मोदमावहति।।७०३०।।

तुल्यन्यायादपरः सोऽयं सुषमासमुद्योतः।
यस्य तु सुविधामात्रादितरेषां वेदना महती।।७०३१।।

एकोऽयं सर्वेषां सेवायां सन्नतो भूत्वा।
सुविधाऽऽलिङ्गितदेहः सर्वान्सर्वं प्रयच्छति वा।।७०३२।।

अन्यास्तावदयं भोः विद्वानर्थोपपत्त्यर्थम्।
सर्वेषां सुविधानामात्मन्येवाऽगमं मनुते।।७०३३।।

सर्वाऽन्यत्राऽन्यत्र तु या सुविधा सा ममैव ननु।
सुविधा नव नव रूपे वशयितुमाक्रामते नित्यम्।।७०३४।।

एवं सुविधाशतशतबन्धैरापूरिते बन्धे।
विभ्रष्टास्ते मनुजाः प्रकाशभाषां समालपन्त्याहो।।७०३५।।

सर्वविवर्धितरूपाण्येवंभूतानि सुविधानाम्।
विश्वमिदं वञ्चयितुं सद्यः प्रद्योतितानि जातानि।।७०३६।।

कुतो नवैतल्लभ्यं कथं हि तेनेदमालब्धम्।
प्रत्यहमेवंरूपाः सुविधायाः सन्ति संग्रामाः।।७०३७।।

सुविधा सुविधैवेयं दौर्विध्यं तत्र वा सह्यम्।
सुविधा सहस्रतायां सहस्रशीर्षो भवेत्पुरुषः।।७०३८।।

आस्वादितनानाविधमाधुर्याणां समुद्रेके।
वाचंयमत्वकरणे सुविधेयं मूलभूतैव।।७०३९।।

नाना सार्थसमीरितभावोद्रेकेषु जायमानेषु।
सुविधाशास्त्रं तदिदं सर्वेषां मौलिभूतं स्यात्।।७०४०।।

नामानि यानि नव्यान्यालोक्यन्ते च सुविधानाम्।
रूपाण्यपि च नवीनान्येतान्यालोक्य को न मोदेत।।७०४१।।

सुविधाऽधारितविश्वे विमोहनं केवलं सुविधा।
जगदीशोऽप्यवतरितुं सर्वां सुविधां विलोकयते।।७०४२।।

तस्मादेवाद्यत्वे सुविधायाः पूर्णसाम्राज्ये।
सर्वाभरणविभूषितकाया सैषा प्रणम्यते सुविधा।।७०४३।।

२००.श्रीनेहरुः

भारतधरणीभूषणभूतो भाग्यैर्विनिर्मितः कश्चित्।
दिव्यजवाहरलालेत्याख्यामण्डिमहापुरुषः ।।७०४४।।

मोतीलालसुपुत्रो जवाहरो निखिलविश्वविख्यातः।
सेवाव्रतिनां प्राज्ये साम्राज्ये राजमान एवाऽसीत्।।७०४५।।

अयमेव लोकमहितो हीनं दीनं च भारतं वर्षम्।
पुनः सजीवं कृतवान् देशं नवचेतनाऽऽवेशम्।।७०४६।।

संसारमञ्चमध्ये ज्योतिःपुञ्जोऽयमाबभौ नितराम्।
सर्वेषां हृदयानां तादात्म्यं तत्र संजातम्।।७०४७।।

के वा भारतदेशं द्रष्टुं तावत्समुत्सुका नाऽसन्।
यत्र जवाहरलालो जनताहृदयाजिरे दृष्टः।।७०४८।।

साऽऽनेकलक्षजनतादृश्याली यन्मुखं द्रुष्टुम्।
स्वरमाधुरीं च पातुं नेत्राग्रेऽद्यापि संस्फुरति।।७०४९।।

स्वीये जीवनकाले किं न कृतं वा जवाहरेणाऽत्र।
स्पृहणीया त्रिदशैरपि सुषमा देशे समानीता।।७०५०।।

सत्याग्रहसंग्रामे साधारणसैनिको भूत्वा।
यूनामुत्साहोदधिमन्थेऽयं मन्दरो जातः।।७०५१।।

गान्धीहृदये न्यवसज्जनता वा भारतीयेयम्।
तस्या हृदये नियतं जवाहरो राजते दीप्तः।।७०५२।।

भारतवर्षेऽस्मिन्नथ वयं स्वतन्त्राश्च निवसामः।
सर्वमभीष्टं कुर्मो जवाहरस्य प्रसादोऽयम्।।७०५३।।

क्षणमपि वृथा न नीतं नैजे व्यस्तेऽथ जीवने तेन।
यत्न-सहस्रैः पूरित आसीत् क्षणसंचरणशीलः।।७०५४।।

यत्प्रावीण्यैर्देशे सर्वे देशाः स्वसौभाग्यम्।
मन्वाना साहाय्यं सर्व-विधं प्रेषयामासुः।।७०५५।।

लब्धा स्वतन्त्रताऽसीद् दुःखैर्दैन्यैरलंभरिता।
तामथ परिवर्तयितुं जवाहरोऽग्रे समायातः।।७०५६।।

अद्य तु सोऽयं देशः सर्वविधाभिः समुन्नतिभिः।
परिमेदुरितशरीरो विलोक्यते तन्मयो निखिलः।।७०५७।।

क्रूराणामांग्लाना देशान्निष्कासनायाऽलम्।
युद्धेऽर्जुनोऽयमासीत्सारथिरासीत्तु मोहनोऽस्यापि।।७०५८।।

द्वापरकाले मन्ये पार्थेन न कापि निर्मितिः प्रथिता।
तेनात्रैव तु काले सोऽयं पुनरर्जुनः प्राप्तः।।७०५९।।

नरनाराणमध्ये नराऽवतारोऽर्जुनः ख्यातः।
अनुकूलैः किल तर्कैरयमपि नरतां दधान एवाऽसीत्।।७०६०।।

लोके प्रथितैवाऽस्ते तस्योत्पत्तौ कथा दिव्या।
जन्मनि यद् दिव्यत्वं साऽप्यवतारत्वगाथैव।।७०६१।।

तेजोंशैः संभवनं गीतायां यत् समादिष्टम्।
गांधी-जवाहरौ तन्नरनारायणरुचाऽऽलसताम्।।७०६२।।

राष्ट्रभुवः कमनीये कलेवरे राजमानोऽसौ।
साफल्यानां शीर्षे क्रीड़ति नित्यं प्रमोदमयमूर्तिः।।७०६३।।

बालेषु बाल आसीद् युवकानां कीर्तिरिवाऽसीत्।
ज्ञानगरिमभरितानां मध्ये विज्ञाननिधिरासीत्।।७०६४।।

दुःखविशोषितदेशे सद्यो नूनं निपातिता येन।
पुरुषार्थमयी गङ्गा प्रभातरङ्गैः परिव्याप्ता।।७०६५।।

सा साम्यवादसरणिः परीक्षिता तेन सा चाऽपि।
सामाजिकवादानां सरणिरियं पूर्णमामृष्टा।।७०६६।।

अद्य जवाहरलालो नेहरूवर्यो न कैर्वन्द्यः।
जीवनमेतन्निखिलं शुष्यद् येनैव पल्लवितम्।।७०६७।।

तस्य प्रभावभाषादीप्तीनां माननीयानाम्।
सर्वस्मिन् संसारे विभासिताऽसीद् विभा नित्यम्।।७०६८।।

भारतवर्षे सर्वामुन्नतिमानेतुमेतेन।
नैव किमपि सन्त्यक्तं प्रयत्नजातं स्वशौर्येण।।७०६९।।

सिंहसदृशवीर्याणामाविष्कर्ता स्वशौर्याभै-।
र्निजरूपैर्नीराजित एवाऽसीन्नेहरूवर्यः।।७०७०।।

एकस्मिन् सत्कार्ये शतशः कार्याणि संसाध्य।
विपुलां जनतां लाभैः प्रपूरितां नित्यमातेने।।७०७१।।

भारतराष्ट्रमिदं नो विशोषितं भिन्नदेशीयै-।
र्नैकशतकपर्यन्यं दारिद्र्यं तेन संजातम्।।७०७२।।

दुःखं दारिद्र्यं चोन्मूलयितुं वा प्रधानमन्त्रिपदे।
श्रीमान् जवाहरोऽसौ समागतो दिव्यसंचारः।।७०७३।।

पञ्चानां वर्षाणां योजनमथ च प्रवर्तयितुम्।
रशियादेशं दृष्ट्वा कृतमतिरेषोऽथ संजातः।।७०७४।।

भारतवर्षे विपुलां सामाजिकबुद्धिमातन्वन्।
सर्वस्मिन्नपि देशे संयोजनपद्धतिर्न्यस्ता।।७०७५।।

बृहन्नदीनां स्थाने विद्युत्प्रायं विलासमानेतुम्।
बन्धानां निर्माणं स्वीकृतवान् कौशलाऽवाप्त्यै।।७०७६।।

नव्ययुगीना धारा विद्युन्मयरूपमास्थाय।
प्रावर्तत निखिलेऽस्मिन्संसारे नव्यसंचारा।।७०७७।।

नूतनयन्त्रविरचनावलिरेषा नव्यजीवने दृष्टा।
नन्दनवनसाम्राज्यं भूमौ सर्वं समानयति।।७०७८।।

अयं जवाहरलालो विद्युच्छक्तिं समेधयितुम्।
यन्त्राणां संभारं निर्मापितवान् सुसिद्धविद्वद्भिः।।७०७९।।

निर्बलराष्ट्रं सबलं संस्कर्तु वा समस्तसहयोगः।
सम्प्राप्तो ननु वीरेणाऽनेनैवात्र नेहरुणा।।७०८०।।

बल्लभभाइपटेलो गृहमन्त्री सर्वकार्याणा-।
मान्तरिकाणां पूर्तौ संलग्नः सर्वभावेन।।७०८१।।

भगवत्कृपया सम्यग्गठितं तन्मन्त्रिमण्डलं दिव्यम्।
मध्यमणिर्यत्राऽसीज्जवाहरोऽसौ प्रकामपरिपूर्णः।।७०८२।।

सर्वस्मिन्नपि देशे भ्रमणं कृत्वा स जनतायाः।
सर्वां स्थितिमालोकितवान्संस्कारैः प्रपूरयितुम्।।७०८३।।

सर्वस्मिन्नपि देशे शासनसंस्था तथा दृढ़ा जाता।
सर्वा जनता शासकसंचयने वा स्वयं प्रवृत्ताऽसीत्।।७०८४।।

स्वतन्त्र्यात्पूर्वं ननु भारतवर्षं समस्तमिदम्।
शतशो राज्यानां वा मध्ये प्रविभक्तमेवाऽसीत्।।७०८५।।

भारतसंघे तेषां राज्यानां विलयनं कर्तुम्।
वल्लभभाइपटेलो विलक्षणां नीतिमातेने।।७०८६।।

काश्मीरेष्वाक्रमणं पाकिस्तानेन यत्कृतं घोरम्।
तस्य प्रत्याक्रमणे सन्नद्धो लौहपुरुषोऽयम्।।७०८७।।

सा वै रक्षा जाता भारतराष्ट्रीयशीर्षभागस्य।
नो चेच्छिरोविहीनं राष्ट्रमिदं समभविष्यद्वा।।७०८८।।

एकीभूता सरणिश्चासीन्नेहरूपटेलयोः सम्यक्।
गांधी सर्वासामथ नीतीनां देशिको जातः।।७०८९।।

संसारेषु भ्राम्यन् यद् यद् वा सुन्दरं सुखदम्।
सन्दृष्टं तत् सर्वं जवाहरोऽत्र प्रचालितवान्।।७०९०।।

आर्थिकविपन्नतायाः संबाधां वा विदूरयितुम्।
स्वीयैः प्रभावयोगैः साहाय्यं प्राप्तवान् सोऽयम्।।७०९१।।

भारतराष्ट्रं तदिदं पुरा युगे पूर्णसम्पन्नम्।
गुरुताप्रभाप्रदीप्तं विराजितं सर्वतो भावैः।।७०९२।।

इतिहासानां सेयं सर्वा गाथापि तेन संकथिता।
लोकोत्तरसद्ग्रन्थे स्वीये नव्येऽथ परिवेशे।।७०९३।।

साहित्यसाधनायामपि सा सा तेन निर्मितिः प्रथिता।
श्रीनेहरूणा स्वीयैर्बृहदाकारैर्महाग्रन्थैः।।७०९४।।

निखिले विश्वाऽध्ययनग्रन्थे कथिता नवीनसंगाथा।
सोऽयमपूर्वो ग्रन्थः साहित्ये शीर्षतां यातः।।७०९५।।

आग्लायां भाषायां यत्प्रावीण्यं प्रकाशितं तेन।
आंग्लीया विद्वांसश्चकिता आसन स्वयं दृष्ट्वा।।७०९६।।

नेहरूवाङ्मयमेतन्निखलं सम्यक् प्रकाशितं दृष्ट्वा।
मोदामहे नितान्तं जीवनमथ कर्मपुरुषस्य।।७०९७।।

लक्षलक्षजनताया मध्ये स्थित्वाऽथ भाषमाणेन।
सुविचार्य यद्यदुक्तं देशस्तेन प्रकाशितो जातः।।७०९८।।

यस्मिन् यस्मिन् देशे चमत्कृतो गच्छति स्माऽयम्।
तत्रैव सर्वलोकश्चमत्कृतस्तं परं दृष्ट्वा।।७०९९।।

को नाम तादृशोऽभूत्संसारे मार्मिकः पुरुषः।
यस्तं दृष्ट्वा श्रुत्वा निर्मथितो नान्तरङ्गेषु।।७१००।।

देशे चास्मिन् ये ये विद्वांसो माननीयाऽसन्।
शासनसंस्था द्वारा तेषां सत्पूजनं चक्रे।।७१०१।।

शासनकर्मणि कुशलानाह्वानैः स्वैर्नियोजितवान्।
शासनसंस्थामध्ये सम्यक् संचालनं कर्तुम्।।७१०२।।

नव्यं च संविधानं भारतराष्ट्रस्य निर्मितं विद्भिः।
अम्बेडकरप्रमुखा यत्राऽसन्नित्यसंलग्नाः।।७१०३।।

स्वातन्त्र्यं यत् प्राप्तं सत्याग्रहरूपमास्थाय।
संसारे सा घटना निरुपमदीप्त्या प्रकाशितैवाऽस्ते।।७१०४।।

संरक्षणमभिवृद्धिस्तस्य स्वातन्त्र्यभावस्य।
श्रीनेहरोरभावे कथमेवासादिता भूयात्।।७१०५।।

अयमेकस्तु जवाहरलालो नूनं हि काव्यमयपुरुषः।
यस्य चरित्रविचारे काव्यान्यासन् प्रदीप्तानि।।७१०६।।

कविता रूपं दृष्ट्वा जवाहरस्य प्रकामरमणीयम्।
सर्वाङ्गाऽलिङ्गनमथ सम्प्राप्तुं नित्यमेव सोत्कण्ठा।।७१०७।।

शतशः सहस्रशो वा काव्यान्यद्यापि तस्य चरितानाम्।
नैपुण्येन विरचितान्यद्याप्यालोकितानि जायन्ते।।७१०८।।

नेहरुचरित्रचर्चामध्ये निखिलं नु भारतं वर्षम्।
मुखरं दीप्तिसमृद्धं विभासते पूर्णरूपेषु।।७१०९।।

श्रीमालवीयवर्यैर्यो दृष्टः पुत्रनिर्विशेषतया।
तस्य तु भाग्यसमृद्धिं देवा अपि कामयन्ते नु।।७११०।।

श्रीराजेन्द्रो नित्यमस्य च सन्मित्रतां यातः।
प्रथमे राष्ट्रपतित्वे सम्मान्यः पूजितश्चासीत्।।७१११।।

श्रीमान् सुभाषचन्द्रो वसुर्यदीयेन मित्रभावेन।
संतुष्टो निजशौर्यं प्रकटयितुं प्रेरणां लेभे।।७११२।।

आबालवृद्धजनताकोटीनामादरेण संयुक्तः।
को वा पुरुषविशेषः सन्दृष्टो भूमिवलयेऽस्मिन्।।७११३।।

वन्द्यो जवाहरोऽसौ यस्य स्पन्दनविभावेषु।
भारतवर्षं तदिदं सम्पूर्णं स्पन्दितं जातम्।।७११४।।

स्वीयेऽन्तिमे च लेखे भारतजनतैव लिखिताऽस्ते।
भारतजनतां सोऽयं नमतितरामन्तिमे लेखे।।७११५।।

स्वीये जीवनचरिते स्वयं लिखितवानसौ दिव्यम्।
नैजं स्वरूपममलं सम्यक् सम्प्रेरणां कुरुते।।७११६।।

पुत्रीसम्पाठनमथ पत्राणां माध्यमेन तेनैव।
यत्संपादितामास्ते साहित्ये साऽद्य सम्पत्तिः।।७११७।।

एका काचन धारा पाठनमध्ये प्रवर्तिता तेन।
पत्रद्वाराऽध्यापनकौशलसन्दर्शनोत्कण्ठा ।।७११८।।

यत्रैव तेन दत्ता स्वीया दृष्टिर्नु तत्रैव।
काचिन्नव्याः सरणिः प्रकटितविभवा विभासते दिव्या।।७११९।।

कारागारनिवासोऽपि च यस्याऽत्रैव बहुमतो जातः।
लोकोत्तररचनानामेषा भूमिः प्रशंसनीयैव।।७१२०।।

कारागारनिवासे रचनां कर्तुं प्रवर्तिता सरणिः।
श्रीलोकमान्यतिलकैर्गीतायां सा रहस्यमयी।।७१२१।।

कारागारे कालं लेखिन्या नीतवन्तस्ते।
विश्वविदितधौरेया विद्वांसः सत्यसंकल्पाः।।७१२२।।

मिलति तु कारागारे कालस्तावत्प्रकामसंपूर्णः।
तत्र विरचनायां जातायां चिन्तिता सरणिः।।७१२३।।

एतासां रचनानामन्तर्लोकोत्तरत्त्वं यत्।
संजातं नैवाऽस्ते सा दीप्तिस्त्वन्यसाहित्ये।।७१२४।।

जीवनसर्वस्वानां समर्पणं दिव्यताभरितम्।
भाषायां यज्जातं सा काचित् प्रेरणा पूर्णा।।७१२५।।

जवाहरो नैवाऽसीत्पश्चात्पदतां समापन्न-।
स्तस्यामपि धारायं कारायं तस्य लेखनी चलिता।।७१२६।।

बुद्धो भगवान् पूर्णं समृद्धरूपं समास्थाय।
बुद्धत्वं ननु भेजे रेजे नेहरूस्तथैवायम्।।७१२७।।

पूर्णसमृद्धकुटुम्बे सर्वविधे साधनाऽवेशे।
सर्वं त्यक्त्वा रूपं समागतोऽयं स्वतन्त्रताऽवाप्त्यै।।७१२८।।

येन स्वतन्त्रतेयं सम्प्राप्या तेन सर्वसुखम्।
सन्त्याज्यं तत्संमुखमास्ते नूनं कियत्कार्यम्।।७१२९।।

सुखसंभागे निरताः स्वीयं सर्वत्र मन्वानाः।
सर्वविधं प्राकाम्यं स्वीकृतवन्तः सुबहुजाताः।।७१३०।।

किन्तु न तेषां चर्चा कुत्राऽप्याऽस्ते मृताः सर्वे।
जीवति जवाहरोऽयं चर्चायां चर्चितो दीप्तः।।७१३१।।

निखिलेऽपि च संसारे श्रीनेहरुरेष मुख्यतां भेजे।
रूसा आंग्ला अथवा अमेरिका मानयन्ति स्म।।७१३२।।

यात्राः शतशः कृतवान् विश्वगुरुत्वं विधारितवान्।
सर्वत्राशा जाता "नेहरूरद्याऽत्र किं वक्ति"।।७१३३।।

श्रीनेहरुणा सार्धं राष्ट्राऽध्यक्षाः सुमित्रतां याताः।
अहमहमिका समासीत्तन्मैत्रीमादरात्प्राप्तुम्।।७१३४।।

व्यक्तित्वे च तदीये सौम्याकर्षणविभावसुषमानाम्।
रिङ्गत्तरंगमाला खेलन्ती व्याहृतिं याता।।७१३५।।

क्षिप्रं सर्वं कार्यं विलम्बरूपं विषं वृक्षम्।
स्वल्पः समयस्तावत् श्री नेहरोरादिमं सूत्रम्।।७१३६।।

तेनैव तत्र कार्ये यत् शीघ्रत्वं समायातम्।
नूतनमिव सञ्जातं निखिलमिदं भारतं वर्षम्।।७१३७।।

सर्वा नूतनरचना देशे सर्वत्र सञ्जाता।
एकात्मताविहारी श्रीनेहरुरत्र मूर्धन्यः।।७१३८।।

शतशो भाषाभेदाः शतशो वा धर्मभेदाः स्युः।
शतशश्चान्ये भेदाः जवाहरे तत्र नो भेदाः।।।७१३९।।

एकस्तावद्देशश्चैका भाषाऽस्ति धर्म एकोऽयम्।
भारतानाम्ना ख्यातः सर्वं तत्रैव समवेतम्।।७१४०।।

श्रीलोकमान्यतिलकः श्रीमान् वन्द्योथ गोखलेवर्यः।
श्रीलाजपत्रायः स देशबन्धुश्च मौक्तिकोलालः।।७१४१।।

पालश्च विपिनचन्द्रः दासो वा चित्तरञ्जनश्चैते।
सर्वकलासंयुक्तो गांधी तत्रैव समवेताः।।७१४२।।

जवाहरव्यक्तित्वे सर्वेषामेव चैतेषाम्।
प्राचामाधुनिकानां समन्वयो नित्यमायातः।।७१४३।।

तेनाकर्षणमसमं तद्व्यक्तित्वे समायातम्।
निखिलः संसारोऽयं धन्यं मनुते जवाहरे प्राप्ते।।७१४४।।

वन्दामहे जवाहरलालं तं पण्डितं कमपि।
पण्डित खण्डोपाधिर्धन्योऽखण्डत्वमायातः।।७१४५।।

२०१.डॉ.राधाकृष्णनः

ब्रह्मर्षि-मालवीयैः सार्धं सहचारितामाप्तम्।
राधाकृष्णन्वर्यं राष्ट्रपतिं संस्मरति देशः।।७१४६।।

वाणीवशंवदासीद्यस्य विलासोन्मुखी सततम्।
चकितान्व्यधत्त लोकान् लोकोत्तरतामुपागता काचित्।।७१४७।।

आसीत्तस्मिंश्चित्राऽलंकारः कोऽपि मूर्धन्यः।
यो हि विरोधाभासः कथितो मान्यैस्तथाऽचार्यैः।।७१४८।।

दिव्ये धौते वेशे लसदुष्णीषे विलोकनीये वा।
विष्णोः काचित् शोभा समुच्छलन्ती जनैर्दृष्टा।।७१४९।।

देशस्यास्य वरेण्यस्यास्ते यो दक्षिणो भागः।
राधाकृष्णन्वर्यस्तत्रैवाऽसीत्समुद्भूतः ।।७१५०।।

धन्यः पिता तदीयो माता चासीत्सुधन्यतमा।
भूमिः सा धन्यतमा यत्रासौ सत्पदं लेभे।।७१५१।।

बंगे कलिकातायां प्राध्यापकतां गतस्यास्य।
ख्यातिर्नितान्तमारात् आयाता मालवीयनिकटेऽपि।।७१५२।।

श्रीमालवीयवर्यास्तस्मिन्काले स्वसन्दर्भे।
काशी-हिन्दू-विश्वक-विद्यालयमामनन्ति स्म।।७१५३।।

सोऽयं विद्वत्प्रवरो यदा समक्षं समायातः।
ब्रह्मर्षिणां तदैव तु निमन्त्रितः काशिकायां सः।।७१५४।।

शिरसा साधु दधानो महर्षिणां तां विशेषाज्ञाम्।
त्यक्त्वा स्वसुखं रूपं काश्यामायात एवाऽयम्।।७१५५।।

आगतमात्रे तस्मिन् श्रीमालव्यस्य मुखदीप्तिः।
नन्वर्जुनस्य लाभात् श्रीकृष्णेनैव संगता जाता।।७१५६।।

संचालनादिभारं समर्पयित्वा च तद्हस्ते।
अस्या महामहत्या वाग्देव्याः संस्तवं चक्रे।।७१५७।।

सर्वे चकिता आसन् दृष्ट्वा तत्कार्यपरिपाटीम्।
श्रीमालवीयवर्यो बाह्यं सर्वं प्रसाधयामास।।७१५८।।

राजानोऽपि तदात्वे सेवन्ते मुक्तहस्ततया।
श्रीमालवीयवर्यं तद् विष्णोः पूर्णविग्रहं साक्षात्।।७१५९।।

सोऽपि महात्मा गान्धी प्रभावितस्तेन संजातः।
प्रशशंस मालवीयं राधाकृष्णं समानेतुम्।।७१६०।।

प्रारंभिकेऽथ काले महामहिम-भावपरिपूर्णा।
सेयं संस्था काशीः हिन्दूविश्वक-विद्यालया चासीत्।।७१६१।।

ज्ञानस्य काऽपि धारा न त्यक्ता वा प्रशिक्षणात् तस्मात्।
विद्वांसश्चाहूता ये यत्रैव स्थिता आसन्।।७१६२।।

राधाकृष्णान्वर्यस्य तु संसर्गेऽथ संजाते।
विश्वस्ताऽस्मद्देशे सर्वा जनता मुदं सुखं लेभे।।७१६३।।

नैकदशकपर्यन्तं कुलपतिपदमर्थसात्कृत्वा।
सर्वस्मिन्नपि विश्वे स्वीयान् शिष्यान् समेधितवान्।।७१६४।।

श्रीमालवीय-निर्मितिरेषा ख्याता कथं न स्यात्।
राधाकृष्णन् सदृशः कुलपतिरस्याः स्वयंवृतो नु यदा।।७१६५।।

सर्वस्मिन् संसारे विख्यातो विश्वविद्याना-
मालय एष नितान्तं राधाकृष्णं सभाजयाञ्चक्रे।।७१६६।।

राधाकृष्णन्वर्यस्य च सेवामीहमानेयम्।
श्रीमालवीय-रचना संसारं दीपयाञ्चक्रे।।७१६७।।

ख्यातिः काचिदनुपमा संजातासीद्वरेण्यस्य।
प्रथमः प्रधानमन्त्री नेहरुरपि मित्रतां यातः।।७१६८।।

सोवियतनाम्निदेशे भारतराष्ट्रस्य शान्तिदूतत्वम्।
निर्वाहयितुं प्रेषित आसीद्वै जागरूकोऽयम्।।७१६९।।

स्टालिनसदृशं नायकमादायासौ चलन्देशः।
तां लौहमयीं भित्तिं निर्मायोल्लासितश्चासीत्।।७१७०।।

राधाकृष्णन्गुरुणा राष्ट्राध्यक्षस्तु तादृशोऽपूर्वः।
दिव्यैर्विभाविलासैर्नूनं सच्छिष्यतां नीतः।।७१७१।।

उपनिषदां सन्दर्भान् सम्यक् संप्रकथयामास।
सोवियत-राष्ट्र-शासक-मुख्याय स्टालिनायाऽसौ।।७१७२।।

तुष्टान्तरङ्गभावेन च तेन स्टालिनवरेण्येन।
गुरुभावेनैवायं सततं नीतो विदांवर्यः।।७१७३।।

भारतराष्ट्रोन्नेता नेहरूवर्योऽथ देशेऽस्मिन्।
उपराष्ट्रपतिपदे तं दार्शनिकं प्रस्तुतंचक्रे।।७१७४।।

रूसं त्यक्त्वा च पुनः सोऽसौ नवदेहलीं प्राप्तः।
उपराष्ट्रपतिर्जातो महतो महतः स्वदेशस्य।।७१७५।।

आङ्लायामथ वाण्यां सर्वान्भावान् प्रकाशयामास।
चकिताः श्रुत्वा वाणीमासन् सर्वेऽपि चाङ्गलीयाः।।७१७६।।

धाराप्रवाहभाषणमाला याऽनेन दत्ताऽभूत्।
देशे चाऽथ विदेशे चकिताः सर्वेः समाऽशृण्वन्।।७१७७।।

उपनिषदां गीताया रामायण-भारतादीनाम्।
बौद्धानां जैनानां सिद्धान्तान् विशदयाञ्चक्रे।।७१७८।।

सिक्खानामथ मुस्लिममान्यानां मतमुपस्थातुम्।
राधाकृष्णन्वर्यो नित्यमयं जागरूक एवाऽसीत्।।७१७९।।

वैज्ञानिकसंसारे विचरन् विज्ञानदीप्तीनाम्।
विश्वासेषु प्रकटितवैभवसंयुक्त एवाऽसीत्।।७१८०।।

श्रीराजेन्द्रप्रसादे विनिवृत्तेऽथ राष्ट्रपतिभावात्।
राधाकृष्णन्वर्यो राष्ट्रपतित्वे स्वयंवृतः सर्वैः।।७१८१।।

दार्शनिकैर्व्याख्यानैः सुस्फीता वाङ्नदीधारा।
राधाकृष्णवराणामाप्लावयतिस्म संसारम्।।७१८२।।

श्रीगान्धिनो विचारान् व्यवहारान् कार्यशैलीं वा।
सम्यङ्मननं कृत्वा साधु समासादयाञ्चक्रे।।७१८३।।

मैत्रीभावं बध्नन् प्रधानमन्त्री जवाहरो नेहरूः।
विद्वत्प्रकाण्डमेनं सम्मानैः पूजयामास।।७१८४।।

राष्ट्राध्यक्षः सोऽयं भारतसदृशस्य राष्ट्रस्य।
सर्वस्मिन् संसारे देशगुरुत्वं प्रसाधयामास।।७१८५।।

स्वीये देशे स्वीयो वेशस्तेनादृतः सततम्।
वेशाङ्गीकारोऽयं सुषमामसमां समेधयते।।७१८६।।

भारतवर्षीयाणां दीप्ता याऽस्ते परम्परा काचित्।
तस्यामेवाऽयं भोः राधाकृष्णन् समभिभूतः।।७१८७।।

आपादमस्तकमयं भारतवेशेष्वलंकृतो देशे।
केषांचित् सौभाग्यादांग्लायां प्रीतिमावहन्नासीत्।।७१८८।।

भारतराष्ट्रकृते या सहिष्णुता दर्शिता तेन।
या च विचाराधारा सरणिः सा गौरवं देयात्।।७१८९।।

परमां काष्ठामङ्गीकृतवान् तत्रैव सम्प्राप्तः।
परमोज्वलस्वरूपं प्रकटीकृतमेव तत्तदा तेन।।७१९०।।

सर्वेषामथ विपुलं श्रमिकाणां राजनीतिविदुषां वा।
नेतॄणामपि दीप्तो नवसंदेशप्रदानैः स्वैः।।७१९१।।

नित्यमयं संदीप्तो नवसंदेशप्रदानैः स्वैः।
राष्ट्रस्य परां कोटिं सम्प्राप्यासौ सुजागरूकोऽपि।।७१९२।।

दार्शनिकसार्वभौमो पाश्चात्यानां च विदुषां यः।
सत्यसमालोचनमथ कुर्वन् भातिस्म देशिकः साक्षात्।।७१९३।।

राधाकृष्णान्वर्ये राष्ट्रपतौ चाऽस्य देशस्य।
सर्वं व्यवस्थितमभूदासीद्यद्वै विशृंखलं राष्ट्रम्।।७१९४।।

श्रीनेहरुर्यदीये सहचरभावे स्थितः सत्यम्।
कामपि प्रसन्नतायाः परमां काष्ठामिहाऽभ्यस्तः।।७१९५।।

कार्यसहस्रैराकुलचित्तोऽपि तु विश्वमूर्धन्यः।
नो केनापि कदाचन चिन्तितरूपेषु सन्दृष्टः।।७१९६।।

यस्याऽऽस्ये सुसमाना स्मितरेखा सर्वकालेषु।
खेलन्ती वशकरणे सर्वेषां धारयति शक्तिम्।।७१९७।।

यस्य विचित्रचरित्रैः प्रभामहत्त्वप्रदीप्तस्य।
लोकोन्नतिः प्रकाम्या काम्याऽसीद् देशसम्पत्तिः।।७१९८।।

निम्नतरं संसारं प्रोन्नतभावे समानेतुम्।
ये वा गृहीतकायास्तेषां नो जायते क्लेशः।।७१९९।।

राधाकृष्णननामा जयति चिरात् संचितं धाम।
शिवदं सुखदं नित्यं कामप्रदमोक्षदं चापि।।७२००।।

राधाकृष्णसमीरे वहतितरां यत्र संसारे।
चन्दनवृक्षसदृक्षा सर्वेप्येते सुसंजाताः।।७२०१।।

राष्ट्रपतित्वे सोऽयं शतशः संस्थाः समर्चितवान्।
प्रोद्घाटनादिविधयः सम्यक् सम्पादितास्तेन।।७२०२।।

अद्य समस्ताः संस्थास्ता एता निर्मला दीप्त्या।
भव्यतमं निजरूपं संसारे संविलासयन्त्येव।।७२०३।।

ग्रन्थविरचनाकार्ये राधाकृष्णन्वरेण्यानाम्।
सा निर्मला प्रखरता केषां नो तोषमावहते।।७२०४।।

विद्याया ये भेदा ये भेदाः सन्ति कार्याणाम्।
सर्वेषामपि तेषां पटुता चैकत्र संस्थिता दृष्टा।।७२०५।।

श्रीमालवीयवाचां संसिद्धीनां परंपरां दिव्याम्।
प्राप्तो राधाकृष्णन्वर्यो नम्यो निखिललोके।।७२०६।।

महामहीयसि तस्मिन् राष्ट्रपतौ सर्वपल्लीति।
राधाकृष्णन्रूपे चकास्ति देशस्य सर्वस्वम्।।७२०७।।

चीनेनाक्रमणं तद् देशस्योपरि कृतं यदैवाऽसीत्।
राधाकृष्णन्सिंहो जगर्ज दैत्यान् विमूर्च्छयितुम्।।७२०८।।

निस्तेजभावयातः शत्रुः शस्त्राणि सन्त्यज्य।
विनमत्कंधर आसीदेषा दीप्तिस्तु राष्ट्रपतेः।।७२०९।।

भगवति कृष्णे यो वा सारथिभावः समायातः।
राधाकृष्णन् रूपे नूनं देशस्य सारथित्वं तत्।।७२१०।।

राधाकृष्णन् सदृशा निर्द्वन्द्वा देशनेतारः।
यदा-कदैवात्रायान्त्यहो अहो वाक्यसंवलिताः।।७२११।।

सा वाणी कल्याणी ऋ नु खलु पुनरपि निपीता स्यात्।
यया वशीकृतमेतज्जगतीतलमद्भुतं जातम्।।७२१२।।

विद्वन्मानसहंसः श्रीराधाकृष्णनः सोऽयम्।
संसारस्थान् विदुषः काले-काले समाह्वयाञ्चक्रे।।७२१३।।

नाना-ललितकलानां संगीतानां च रुचिरा सा।
सम्मेलनस्य माला भारतभूमौ समानीता।।७२१४।।

दुर्लभ-पाण्डुलिपीनां वेदान्ते बौद्धदर्शने वापि।
सत्संपादनविधया सम्यङ्मुद्रणमथाऽदिष्टम्।।७२१५।।

एवं राष्ट्रध्यक्षो भारतवर्षस्य सर्वस्य।
सर्वेषु प्रान्तेष्वथ विपुलं भ्रमणं समातेने।।७२१६।।

उत्तरदेशे वङ्गे विहारदेशेऽसमे देशे।
उत्कल-नगप्रदेशे हिमवत्प्रान्तेषु निखिलेषु।।७२१७।।

राधाकृष्णन्वर्ये भूभागे भ्रम्यमाणे सा।
द्वापरयुगस्य दीप्तिः प्रकटीभूता विलोकिता सर्वैः।।७२१८।।

राष्ट्रपतित्वे देशे सरस्वती संस्थिता साक्षात्।
राधाकृष्णन्रूपे सर्वेषामस्ति चाऽत्र संवादः।।७२१९।।

परमधुरीण-महोत्सव-नानाविध-संविधानानाम् ।
धुरिकीर्तनीयरूपो राष्ट्रपतिः कृष्णनो नम्यः।।७२२०।।

आंग्लायां निष्णातो संस्कृतभाषाधुरन्धरः सोऽयम्।
दक्षिण-भारत-भाषा-गृहीतदीक्षः समाख्यातः।।७२२१।।

देशे चाऽथ विदेशे यस्यास्ते सद्यशः प्रथितम्।
यं वा नमन्ति लोकाः सदसद्बुद्धौ बृहस्पतिं साक्षात् ।।७२२२।।

राधाकृष्णन एको भातितरां भूमिवलयेऽस्मिन्।
भारतभूमी-भूषणभूतो विद्वान् सदा मान्यः।।७२२३।।

देशोन्नतिसंघर्षे सर्वैः संचालिते विषमे।
सोऽयं प्रभावपूर्णः सेनानी सर्वतो दृश्यः।।७२२४।।

नानाविधसन्तमसैरावृत्ते भूमिवलयेऽस्मिन्।
दार्शनिकी या दृष्टिः सैवाऽलोकं ददाति संचलितुम्।।७२२५।।

दर्शन-विज्ञानानां प्रचुरो यत्र प्रदृश्यते महिमा।
सर्वविधोन्नतिदृश्यावलिरेषा तत्र बाभाति।।७२२६।।

विश्वस्मिन्निजकाले मूर्धन्यो दार्शनिकदृष्टि-
सम्पन्नः श्रीराधाकृष्णन्वर्यः समादृतः सर्वैः।।७२२७।।

वैज्ञानिकोन्नतीनामत्यन्तं प्रेरणापुञ्जः।
श्रीनेहरूः स्वदेशस्योन्नयने नित्यसंलग्नः।।७२२८।।

उभयोरनयोर्मैत्रीभावे सोऽयं पुरातनो देशः।
नित्यसमुन्नतिशीलः कामपि काष्ठां परां प्राप्तः।।७२२९।।

पर्यटितभूमिवलयो देशान् सर्वान् सनाथितवान्।
राष्ट्रध्यक्षैर्निखिलैः संप्रणतः सर्वभावेन।।७२३०।।

देशस्य काऽपि सेवा तथाविधा संमता तस्य।
यस्यां सुखोपलब्धिः सर्वविधा संविभासते सततम्।।७२३१।।

सर्वेऽपि तेन चकिताः संभाषन्ते मिथश्चैवम्।
राधाकृष्णन् सदृशो नो भूतो नो भविष्यति वा।।७२३२।।

संस्कृतसाहित्ये वा या सेवा तेन धारिताऽपूर्वा।
भाषायामांग्लायां संस्कृतविषयाः समुत्कीर्णाः।।७२३३।।

श्री मालवीयगांधीतिलकपटेलास्तथा सुभाषो वा।
श्री नेहरूस्तथासौ राजाजी चात्र नम्यन्ते।।७२३४।।

शतशः सहस्रशो वा विद्वांसो देशनेतारः।
राजानश्च तदात्वेऽभिन्नत्वं संगतास्तेन।।७२३५।।

यश्च महामहिमत्वं बिभ्राणोऽसौ विराजितः साक्षात्।
स्वीयां भूमिं धन्यां कृत्वा विख्यातिमुपयातः।।७२३६।।

सर्वे देशे काले सर्वक्षेत्रेषु विद्यायाः।
यस्य प्रखरा बुद्धिः सर्वत्रैवाऽनिवारितप्रसरा।।७२३७।।

एतादृशलोकोत्तरविद्याशीलप्रजागरूकस्य ।
श्रीराधाकृष्णस्य स्मृतिरद्यत्वे समायाता।।७२३८।।

देशस्येदं हर्षं सन्तनुते वा तदीयसंस्मरणम्।
जन्मशती च तदीया विपुलान् भावान् समाह्वयते।।७२३९।।

उत्कण्ठिताश्च सर्वे तदीयविज्ञानवैभवं स्मर्तुम्।
तद्विषये यत्किञ्चिद् गौरवपूर्णं समालपितुम्।।७२४०।।

श्रद्धासमर्पणानामद्यत्वे कोऽपि संरम्भः।
नितरां स्तुत्यो जातः स्वतन्त्रायाः फलं त्विदं लब्धम्।।७२४१।।

देशे निखिलजनानां चिन्ता यस्याग्रगण्याऽसीत्।
राधाकृष्णान्वर्यो राष्ट्रपतिर्माननीयो नः।।७२४२।।

यन्मुखकमले नित्यं विद्वत्तायाः प्रसन्नता काचित्।
नृत्यविधानं रचयति केनाऽसौ नो समाराध्यः।।७२४३।।

यद्व्याख्यानवशीकृत-जनता-हृदयेषु संस्फुरणम्।
एकीभावोन्मेषे संजातं कैर्न वन्द्योऽसौ।।७२४४।।

उत्तरदक्षिणभारतसेतुं सुदृढं विनिर्माय।
राधाकृष्णान् देवो सर्वं देशं समीचक्रे।।७२४५।।

राष्ट्रपतिश्रीराधाकृष्णान्वर्यं वयं नमामोऽद्य।
तस्य चरित्रस्मरणेनात्मानं पावयामोऽद्य।।७२४६।।

२०२.महाकविर्माघः

संस्कृत-वाङ्मय गगने सूर्याचन्द्रायितं येन।
सिद्ध-गुण-त्रय-लसितो निखिल श्रेष्ठो महाकविर्माघः।।७२४७।।

रैवतकहस्तिपार्श्वे घण्टाद्वयलम्बिताऽऽकारौ।
सूर्याचन्द्रौ रचयत् घण्टामाघोऽत्र विख्यातः।।७२४८।।

शिशुपालवध-महाकाव्ये शब्दास्तथाऽऽयाताः।
शिशुपालवधमहाकाव्याऽध्ययने प्रपूर्णता याता।।७२४९।।

साहित्यशब्दवारिधिरेवं वश्यस्तदा भवति।
नवसर्गात्मकमेवाऽध्ययनं कृत्वा नवाः शब्दाः।।७२५०।।

नवतां दूरीकृत्य स्वीयत्वेनैव बुद्ध्यन्ते।
शब्दार्थालङ्कारा विद्योतन्तेऽत्र दिव्यातरकाव्ये।।७२५१।।

वाग्गुम्फमाधुरीणां सीमा कश्चन समुल्लसितः।
सर्वासां रीतीनां शैलीनां वा विशेषभव्यत्वम्।।७२५२।।

माघीयमहाकाव्ये पदे पदे स्वाद्यतां नाम।
वक्तव्यार्थव्यक्तिः प्रौढ़तया पूर्णतां नीता।।७२५३।।

सा माद्यकवेर्वाणी सत्यं नित्यं समास्वाद्या।
गहनतरवाक्यगुम्फे रसनिर्झरिणीं सदैव या वहति।।७२५४।।

माघमहाकविरद्याऽप्यानन्दं नित्यमाह्वयते।
नानाछन्दोनिर्मितिरेवाऽत्यन्तं सुखप्रदा जाता।।७२५५।।

कस्यान्यस्य तु सुकवेर्वक्तुं युक्ता मधुरिमेयम्।
माघमहाकविशब्दैर्नित्यं यैषा समुच्छलति।।७२५६।।

नव्यप्रपाणकोऽयं महाकवेर्माघलहरीषु।
क्षिप्रं प्रसाधनीयः स्वाद्यश्चैवाऽथ सद्यत्नैः।।७२५७।।

शिशुपालवधाऽख्येऽस्मिन्सर्वोत्कृष्टे महाकाव्ये।
श्रीकृष्णो भगवानथ पूर्णतया राजते नित्यः।।७२५८।।

श्रियः पतिर्हरिरेव च साक्षाच्छन्दस्सु चर्चितो नित्यः।
नवरसपूजितकायः काव्येऽस्मिन् पूर्णसंकायः।।७२५९।।

देवर्षेर्नारदवरवर्णनविख्यातविन्यासः ।
विश्वस्मिन्साहित्ये समुच्चचित्रे समाभाति।।७२६०।।

आकाशादवरतणं श्रीकृष्णाग्रे तु नारदस्य यत् कथितम्।
सहृदयहृदयाऽऽकाशे सर्वं संस्फूर्तिदं जातम्।।७२६१।।

मानवशरीररचना प्रजापतेरनुमा सृष्टिः।
अनयैवाऽथ रचनया प्रजापतेः पूर्णपरितोषः।।७२६२।।

संसारे ये भावाः पृथक्पृथङ्निर्मिता जाताः।
मानवशरीररचनायां ते चैकत्रिताः सन्ति।।७२६३।।

तेनैव मानवोऽयं सर्वोच्चं स्थानमालभते।
देवा असुरा ऋषयो मुनयश्चात्रैव राजन्ते।।७२६४।।

षट्चक्राणि यथाऽस्मिन्मनुजशरीरे विरचितानि।
सम्पूर्णतया शक्तिः कुण्डलिनी चाऽत्र जागर्ति।।७२६५।।

सर्वमपि स्थितमेतन्नतमां विज्ञायते मनुजैः।
ज्ञानाऽभावे तेष्वथ मालिन्यं कार्यरोधश्च।।७२६६।।

सहजःसंजायेत सैषा महती विडम्बना जाता।
मानवमात्रे माया ह्यज्ञानं वा निबोधयति।।७२६७।।

मानवशरीरसंस्थितशक्तीनां जागरेषु यत्नानाम्।
या गाथा आरब्धा निखिला विद्या समुल्लसिताः।।७२६८।।

तत्राऽपि काव्यविद्या नवरसरसिताऽस्ति पूर्णतमविद्या।
साङ्गोपाङ्गा सर्वा निर्मितिरेषा प्रजापतेः सुकवेः।।७२६९।।

संसारेषु विधाता यत्कर्तुं नैव शाक्नुयान्नाम।
नूनं तदपि तु सर्वं कविभिः कविताविरचनायाम्।।७२७०।।

रचितं वा नहि काचित्तत्रोल्लासात्मिका सरणिः।
सर्वोल्लासे कवयो मोदन्ते रसमयीभावे।।७२७१।।

साक्षात्कृतधर्माणो ऋषयः प्रथमा हि सत्कवयः।
तस्मादपि वा पूर्वं परमेश्वर एव सत्कविः कथितः।।७२७२।।

निखिलं जगदेवैतत्तस्य तु काव्यं समाम्नातम्।
प्रथमः कविः स भगवानेवेति श्रुतिसमारूढ़म्।।७२७३।।

तस्यैव प्रेरणया ऋषयः संधारयाञ्चक्रुः।
मन्त्रमयं सत्काव्यं वेदाख्यं तत्परं ज्योतिः।।७२७४।।

वाल्मीकिर्व्यासोऽयं कविकुलगुरुरेष कालिदासो वा।
काव्याऽनन्ताऽकाशे दिव्यविभाभिर्विभासन्ते।।७२७५।।

उपजीव्यमहाभारतरामायणवाक्यरचनानाम् ।
संसारे विचरन्तः सन्तो जाता महाकवयः।।७२७६।।

भारविमाघश्रीहर्षाद्या वन्द्यास्तथा जाताः।
तेषां वाक्यकदम्बैः सुगन्धितो निखिलसंसारः।।७२७७।।

श्रीमद्भागवते वा महन्महाभारते दिव्ये।
कृष्णाऽवतारचित्रणमत्यद्भुतमेव संजातम्।।७२७८।।

तत्सर्वं संधार्य प्रकटनमथवा नवैर्गुम्फैः।
कविभिः कृतमेवेत्थं स्वीयां शक्तिं विकस्वरां कर्तुम्।।७२७९।।

तत्र महाकाव्यानां बृहत्त्रयी या सुपरिगणिता।
माघमहाकविनिर्मितिरेषा तत्राऽपि श्रीर्षण्या।।७२८०।।

शिशुपालश्च स कंसः जयस्य विजयस्य चाऽवतारौ स्तः।
श्रीविष्णोरेवैतौ द्वारस्थिततां समायातौ।।७२८१।।

सनकादीनां शापाद् भूलोके जन्म लेभाते।
वारत्रयं तदान्ते शापे संपूर्णता जाता।।७२८२।।

शापाक्षरेष्वमर्षाऽभिव्यक्त्या रक्षसां योनौ।
जन्मगृहीतं ताभ्यां जयविजयाभ्यां समुद्दण्डम्।।७२८३।।

प्रथमे जन्मनि स जयो हिरण्यकशिपुस्वरूपेण।
प्रादुर्भूतो विष्णुर्नृसिंहरूपेण चाऽयातः।।७२८४।।

द्वैतीयके शरीरे जय एषोऽत्रैव रावणो भूत्वा।
निखिलचराचरमथने रक्षोरूपं प्रकाशितवान्।।७२८५।।

विष्णुरपि तु स भगवान् रामं रूपं समास्थाय।
तत्संहारं कृतवांस्तृतीयजन्मनि स एव शिशुपालः।।७२८६।।

तस्य वधार्थं विष्णुः स्वयं तथा कृष्णरूपेण।
प्रादुर्भूतो भगवान् सर्वं संवर्णितं कविना।।७२८७।।

गहनराजनीतिः सा प्रकटैवाऽस्तेऽथ वर्णने दिव्ये।
माघीयकाव्यशैलीवर्णनमत्यद्भुतं जयति।।७२८८।।

बलदेवोद्धवसार्धं विप्रतिषेधं द्विकार्ययोः कथितम्।
उभयोर्वार्तागुम्फेष्वामूलं राजनीतिरामृष्टा।।७२८९।।

पूर्वं हि राजसूये गन्तु स्वमतिं समास्थाय।
यात्राऽज्ञा कृष्णस्य प्रसारिता द्वारकावत्याम्।।७२९०।।

श्रीकृष्णस्य यदैषा यात्रा सुमनोहरा जाता।
नैके ननु तत्रत्या सर्गाः स्वयमेव संरचिताः।।७२९१।।

पुरसुन्दरीसमूहः श्रीकृष्णं द्रष्टुमुपयातः।
तद्वर्णने विवरणं रसराजं नित्यमाह्वयते।।७२९२।।

तदनु द्वारावत्या निकटे तद्वर्णनं समुद्रस्य।
रैवतकपर्वतस्य च वर्णनमत्यद्भुतं जयति।।७२९३।।

तत्रैव षड्तूनामहमहमिकया परापतन्तीनाम्।
चित्राणि शब्दगुम्फैराविर्भूतानि सौभाग्यैः।।७२९४।।

बृहत्त्रयी जगतीतल-सौभाग्यैरेव संभूता।
कमनीयमहाकाव्यात्मकरूपं धृत्वा समायाता।।७२९५।।

राजसूय-यात्रायां श्रीकृष्णस्याथ शोभायाः।
माघमहाकविरचितं वर्णनमत्यद्भुतं जयति।।७२९६।।

पाण्डवपक्षज्येष्ठो युधिष्ठिरः स्वागते सर्वम्।
प्राणाधिके भगवति प्रेरयितुं वा समुत्सुको जातः।।७२९७।।

श्रीराजसूययज्ञे सर्वेषां पादपूजायाम्।
श्रीकृष्णः स्वयमेव स्वात्मानं संनियोजितवान्।।७२९८।।

तत्रैव च प्रसङ्गे समागते ह्यग्रपूजायाः।
स हि सर्वान्तर्यामी स्वीकृतवानग्रिमां पूजाम्।।७२९९।।

वेदव्यासमहर्षिः स्वीये भारतमहाग्रन्थे।
शिशुपालस्य वधमिदं चर्चितवांस्तत्सभागारे।।७३००।।

माघेन महाकाव्ये युद्धस्याप्यभिनवं रूपम्।
वर्णयितुं संग्रामः परिकल्पित एव काव्येऽस्मिन्।।७३०१।।

श्रीकृष्णस्य च पुनरथ शशुपालस्यापि युद्धसंरम्भे।
लोकोत्तरचित्राणां काचित्संप्रस्तुतिर्विहिता।।७३०२।।

माघमहाकविकाले युद्धान्यत्यद्भुतान्यासन्।
लोकस्य रूपमुग्रं संग्रामेषु प्रकटितं जातम्।।७३०३।।

अग्रे सर्वेऽपि रसाः स्वस्वस्थाने यथाकामम्।
परमाल्हादाऽस्वादे सहयोगं संप्रयच्छन्ति।।७३०४।।

श्रीकृष्णः संपूर्णः स्वयं रसो वै स आख्यातः।
सर्वे रसाश्च तस्मिन्स्वस्वस्थाने प्रतिष्ठिताः, सन्ति।।७३०५।।

श्रीकृष्णस्य भगवतो वीररसे चित्रणं स्तोत्रम्।
नव्यमहाकाव्येऽस्मिन् रचना संचारिता महाकविना।।७३०६।।

माघस्य काव्यविश्वे विचरणशीलस्य मनुजस्य।
सर्वानन्दमयत्वं विगलितवेद्यान्तरं सिद्धम्।।७३०७।।

भारविरप्येकोऽसौ महाकविर्विश्वपटले यः।
स्वीयात्किरातकाव्यान्मौलौ सिद्धः समाभाति।।७३०८।।

भारविमाघौ समये चैकस्मिन्नेव संस्थितावास्ताम्।
पूर्वं भारविकाव्यं तदनु च माघस्य संभूतिः।।७३०९।।

उभयोरेव रचनयोरन्तर्भागे सुसंयोगाः।
सामान्येनालोच्याः स्थाने स्थाने प्रदृश्यन्ते।।७३१०।।

राजस्थानप्रान्तेऽकादेमीत्यादि संस्कृतस्य खलु या सा।
तत्प्रान्ते जनितत्वान्माद्यं स्वात्मीयमामनुते।।७३११।।

प्रतिवर्षं काव्यानां शुभ्रपुरस्कारसंरम्भे।
माघपुरस्कारेण च कवयः सत्कारमर्हन्ति।।७३१२।।

उत्तरप्रदेशसंस्थाऽकादेमी संस्कृतस्यैव।
प्रददाति प्रतिवर्षं पुरस्कृतिं कालिदासनाम्नाऽपि।।७३१३।।

बाणपुरस्कारेण च पूज्यन्ते ग्रन्थकर्तारः।
शोधे लेखाश्चायोज्यन्तेऽथ सर्वत्र।।७३१४।।

शोधनिबन्धाश्चैतेऽनेका काव्यस्य चर्चासु।
ये निर्मिताः प्रकामं पाण्डित्येन प्रदीप्यन्ते।।७३१५।।

ते ते प्रकाशका अपि ग्रन्थानेतान्प्रकाशयितुम्।
स्वीयत्वं स्थापयितुं सर्वे चेष्टन्त एवाऽद्य।।७३१६।।

नानाविधकक्षाणां पाठ्ये निर्धारिते जाते।
केचित्सिद्धास्तावद् ग्रन्थांशास्तत्र योज्यन्ते।।७३१७।।

केचन सर्गास्तावच्छिशुपालवधस्य केचन वा।
रघुवंशस्य च केचन कुमारसंभवमहाकाव्यात्।।७३१८।।

सर्गाः मध्यमकक्षाशास्त्र्याचार्ये च दृश्यन्ते।
छात्राश्च तावतैवाध्ययने जाते प्रकथयन्ति।।७३१९।।

रघुवंशाद्यस्माभिः काव्यान्येतानि पठितानि।
यत्र महाकाव्यानां केचन चांशाः प्रपठितास्तैः।।७३२०।।

पूर्णतया नहि पठितः कश्चनग्रन्थस्तु तैर्नूनम्।
अस्माकमत्र किंचिदावेदनं श्रूयतां विज्ञैः।।७३२१।।

पाठ्यक्रम-निर्धारण-काले ध्यानं प्रदेयं स्यात्।
कस्यापि महाकाव्यस्य तु पाठ्यं निर्धारितुं कर्तुम्।।७३२२।।

द्विशती वा त्रिशती वा श्लोकानां पाठ्यसंस्थिता भूयात्।
एते श्लोकास्तावत्संपूर्णाद्वा महाकाव्यात्।।७३२३।।

संग्राह्या व्याख्येया प्रकाशनीयाश्च सर्वेभ्यः।
संपूर्णग्रन्थस्य च तेन स्यात् परिचयश्चेत्थम्।।७३२४।।

सम्प्रतिवक्तुं शक्तः काव्यमिदं नूनमापठितम्।
कथानकाग्रेसरणं सविशेषा वा चमत्कृतीस्तास्ताः।।७३२५।।

संगृह्याऽऽस्ता तस्मात्तस्मान्नूनं महाकाव्यात्।
शिशुपालवधाद्विशती श्लोकानां संगृहीता स्यात्।।७३२६।।

सर्वस्मादेतस्माच्छिशुपालवधान्महाकाव्यात् ।
व्याख्यासम्पादनमपि कार्यं तेषां समस्तपद्यानाम्।।७३२७।।

तस्य प्रकाशनाद्यपि सम्पाद्यं तद् विचारार्थम्।
दिव्यानीमानि महाकाव्यानि नव्यतररूपे।।७३२८।।

सम्पन्नानि भवेयुर्येन महदुपकृतं भूयात्।
सम्पूर्णमहाकाव्यानामध्ययनेषु प्रवृत्तिरपि।।७३२९।।

यत्नेनानेनैव च संसाधितवैभवा भूयात्।
माघे सन्तु प्रणामाः सर्वेषां कविवरेण्यानाम्।।७३३०।।

येनाऽत्यन्तं दीप्त्या समाजरूपाणि रचितानि।
नो केवलं कथानकमात्रं कविना विकस्वरे रूपे।।७३३१।।

चित्रीक्रियते तत्र च समाजरूपाणि चित्र्यन्ते।
सर्वं विविधं विश्वं कविवरशब्देषु चित्रितं जातम्।।७३३२।।

नतरां काचन कुंठा कुत्राऽप्यत्राऽनुसन्धेया।
आनन्दमग्नतार्थं कविवरमाघः समाह्वयते।।७३३३।।

सर्वेषामानन्दे मग्नत्वं कविवरः कुरुते।
विगलितवेद्यान्तरता सिद्धकवेरस्य वाणीनाम्।।७३३४।।

सफला सरसाऽप्यथवा सालंकारा विराजते नित्यम्।
शिशुपालवधमहाकाव्यं तदिदं नितान्तकमनीयम्।।७३३५।।

कविरत्रमाघनामा कविरपि तेनैव सुप्रसिद्धोऽस्ति।
केचन रचनाकारा नाना ग्रन्थान्विरच्य विख्याताः।।७३३६।।

केचन केवलमेकां रचनां व्याहर्तुमायाताः।
एकैकयाऽपि लोकोत्तरसाधनसम्पत्तिमाह्वयन्त्येव।।७३३७।।

दिव्यरचनया ते ते सिद्धा जाता महाकवयः।
भारविरपि तादृश इति माघोऽपि च तादृशो दृष्टः।।७३३८।।

एकैकया रचनया द्वावप्येतौ बभूवतुः प्रथितौ।
अन्ये पाणिन्याद्या भरताद्या वा तथा दृष्टाः।।७३३९।।

एकैका रचना वा यैर्दत्ता लोकलोचनायालम्।
धन्यो महाकविरयं माघो धन्यश्च तस्य परितोषः।।७३४०।।

धन्या चाद्य वयं स्मो तस्य रसे मग्नमग्ना ये।
रसमयनवसाम्राज्ये सर्वेषां धन्य-धन्यत्वम्।।७३४१।।

माघसदृक्षाः कवयः संसारे दुर्लभा एव।
सहृदयसद्भाग्यानां पुञ्जीभूतो महाकविर्माघः।।७३४२।।

शिशुपालवधमहाकाव्यस्यासीमा शब्दलहरीयम्।
जीवननवधन्यत्वं हृद्देशे स्थापितं कुरुते।।७३४३।।

भारवर्षचरित्रस्योज्वलरेखासमाहरणे ।
माघमहाकविनिर्मितसाम्राज्यं सर्वतो जयति।।७३४४।।

अमितविभावविशेषैर्विभावनाऽभ्याससंरचिते ।
माघमहाकविविश्वे रमतां चेतो मदीयमिदम्।।७३४५।।

रसनिर्झारिणीरङ्गोत्तुङ्गतरङ्गाकुलोल्लासे ।
माघे सहृदयहृदयोत्सवावलिः संप्रवर्ततां नित्यम्।।७३४६।।

सप्तदशद्वीपः

२०३.राष्ट्रपिता

संसारस्य तु कोणे कोणे व्याप्ता यदति विमला।
क्षीराम्भोदसुलहरीशुभ्र कीर्तिः प्रकाम विस्तीर्णा।।७३४७।।

मोहनदासं गान्धिनमत्रावाहयामि हृदेशे।
यस्यावदातकृत्यैरासादित मस्ति निखिलमिदम।।७३४८।।

निखिलं राष्ट्रं यमिमं स्वीयपितृत्वेन संमनुते।
तं श्रीगान्धिमहात्मानं प्रणताःस्मो नितान्तपरितुष्टाः।।७३४९।।

कोट्यर्बुदशब्दानां धारा अपि यद्विवरणे न्यूनाः।
अवताररूपमेवं प्रणतास्मो गान्धिनं देवम्।।७३५०।।

गान्धीति जात्युपाधिर्यस्यास्य प्रोज्ज्वलोऽपि।
शासन यन्त्रविधारकव्यक्तिषु चलितोऽभिनन्द्य एवाऽस्ते।७३५१।

यत्संस्पर्शमवाप्यैवासादितमेव देशसाम्राज्यम्।
नाना नेतृवरेण्यैः स्वयं तु दूरं समातिष्ठत्।।७३५२।।

सेवाया रूपमिदं स्वयमेवाऽस्ते यदा योगः।
तदा तु सेवामृतमिदमतिदूरे सत्वरं याति।।७३५३।।

गान्धीवाङ्मयनाम्ना मुद्रितमास्ते विशालसाहित्यम्।
निखिलयुगेषु सुदीप्ता सैषा शब्दावलिर्जयति।।७३५४।।

यस्मिञ्जना नितान्तं निजपितरं भ्रातरं मित्रम्।
सम्पश्यन्तश्चित्रेष्वथ शब्देषु प्रकामनम्योऽयम्।।७३५५।।

यस्य विचित्रचरित्रं सहस्रशो लेखकैर्लिखितम्।
शतशो विधीविलसितं कुतो न वन्द्यो महानात्मा।।७३५६।।

२०४. वसुसुभाषचन्द्रः

स्वातन्त्र्यसमरदीक्षाप्रदानवेलापरामृष्टः ।
श्रीमान् सुभाषचन्द्रो वसुभूतो निखिलदेशस्य।।७३५७।।

सुचिरं देशेस्थित्वा तां तां वा दुर्दशां समालोच्य।
आंग्लबहिष्करणेऽसौ सर्वां सम्पत्तिमालेभे।।७३५८।।

पराधीनता सेयं सर्वं सुखमात्म सम्भूतम्।
पददलितं कुर्वन्ती भारं कंचित्समादिशति।।७३५९।।

सेनामेकां कुर्वन् युद्धं घोभरंतथापि संकुर्वन्।
दुर्दमतामथ तेषां मार्गे सचालयाञ्चक्रे।।७३६०।।

मह्यं स्वीयं रक्तं प्रदेहि भोस्त्वामहं निजत्वं वा।
स्वामित्वं किल सर्वं समर्पयिष्ये न सन्देहः।।७३६१।।

अद्याऽहोभावानां भूमिरसौ भारतस्य निखिलस्य।
आश्चर्यकरकर्मजालैरापूरित एव वन्दनीयोऽस्ति।।७३६२।।

२०५.वल्लभभाइपटेलः

'सरदारे'ति समाख्यां निखिलजने धारयन्नयं नेता।
वल्लभभाईपटेलः केनाद्यात्यादरणे नो दृश्यः।।७३६३।।

लौहपुरुष इति संज्ञा यस्य कृते ख्यातिमायाता।
दिव्यं पटेलरूपं नमत्ययं सर्वदा देशः।।७३६४।।

गान्धिनमेवादर्शं जीवनकाले समाधार्य।
निखिलं निजसर्वस्वं दत्तं येनान्वितं जातम्।।७३६५।।

स्वतन्त्रदेशस्यासौ संजातो द्वितीयसत्कोटौ।
समुपप्रधानमन्त्री निखिलोन्नीतस्य राष्ट्रस्य।।७३६६।।

सप्तशतादप्यधिका ये राजानस्थिता आसन्।
भारतसंघे विलयनमेतेषां यो हि साधितवान्।।७३६७।।

पाकिस्तानाक्रमणे संजातो यस्य भूरिसंघोषः।
पलायितास्ते सर्वे क्रूरा दुष्टास्तथा दैत्याः।।७३६८।।

असेतुराहिमाचलमेकमिदं भारतं देशः।
पुनरेकवारमत्रानीतो वल्लभभाईपटेलेन।।७३६९।।

अशोककालानन्तरमेकमिदं भारतं पुनर्जातम्।
कर्मठबुद्धिविभावैवल्लभभाईपटेलेन ।।७३७०।।

अद्यात्र वयं स्वतन्त्रा जीवमो मानयामश्च।
गाथां पटेलवर्यस्यात्मीयां वा प्रकटयामः।।७३७१।।

२०६.लालबहादुरशास्त्री

जवाहरादूर्ध्वं कः सर्वेषां प्रश्न एवासीत्।
उत्तररुपेणायं समागतो वा बहादुरः शास्त्री।।७३७२।।

लालबहादुरशास्त्री प्रधानमन्त्री स्वदेशस्य।
महिमानं वर्धयितुं दिवानिशं वा परिश्रान्तः।।७३७३।।

पाकिस्तानेनासीद् युद्धं यद् भारतीयानाम्।
विजये जाते यत्र हि संसारेषु प्रसिद्धोऽभूत्।।७३७४।।

श्रीमान् लालबहादुरशास्त्री काश्याः प्रसाद एवाऽसीत्।
रामनगरसंस्थाने सुरक्षिता जन्मभूमिरिह तस्य।।७३७५।।

आशासहस्रभरितो नित्यं नूनं बहादुरः शास्त्री।
निखिलं देशं किमपि तु साधूल्लासैः प्रसाधयायाम।।७३७६।।

२०७.देवर्षिश्रीकलानाथाः

अनुजो मित्रमथाऽयं गुरुरूपे धारितोऽपीत्थम्।
मत्कृत एकः सोऽयं नानारूपे प्रणम्यतां यातः।।७३७७।।

राष्ट्रपतीनां भवने सम्प्राप्तुं सत्पुरस्कारम्।
येनैवादिष्टोऽहं गतवानद्यापि तं लभे वर्षे।।७३७८।।

यत्र निवेदनकरणे मदीयमुपहासमेव कुर्वन्तः।
हितचिन्तका निकामं सन्दृष्टा वा स्वयं हसितुम्।।७३७९।।

तत्रैवोत्साहेन प्रवर्तिता सर्वपरिपाटी।
संपूरिता नितान्तं देवर्षिश्रीकलानाथैः।।७३८०।।

यत्र यत्र काचित्सा चर्चा मद्भावसंश्रिताऽयाता।
तत्रैव पूर्णतायां मदीयरूपं स्फुटीकृतं चैतः।।७३८१।।

एतत्प्रेरितरूपः वैदिकाविज्ञान स्वार्थम् सेवार्भम्।
कर्पूरचन्द्रकुलिशो मामप्याकारयामास।।७३८२।।

देवर्षिणामनुपमकथनैर्व्यवहारशालायाम् ।
स्फूर्तिः कामं जाताऽनुभूतिमसमां पुरस्कुरुते।।७३८३।।

अद्यापि दूरभाषणपत्रादौ लेखने काले।
साखनप्रप्तिर्लब्धा देवर्षीणां विचार परिपाटी।।७३८४।।

देवर्षिकलानाथाः प्रतीच्यपौर्वात्यदीक्षिता एते।
राज्याध्यक्षत्वे वा शीघ्रसम्यक् प्रतिष्ठिताः स्युर्हिः।।७३८५।।

संस्कृतविद्वद्वर्ये सापीयं योग्यता निखिला।
प्रतिष्ठिताऽस्तेऽघत्वे जानन्त्वेतज्जनाः सर्वे।।७३८६।।

२०८.रेवाप्रसादाः

वाराणम्यां पूर्वं जयपुरनगरे पुनःकाश्याम्।
रेवाप्रसादविबुर्धैरासीत्सुमहान् परीतोषः।।७३८७।।

छात्राऽवस्थायामप्येते सम्यक् सुविख्याताः।
श्रीकालिदासशब्दान् पदशः कलितान् निरूपयित्यैव।।७३८८।।

श्रीवासुदेवशरणाग्रवालवर्यैः समाहूताः।
तन्निर्देशेष्वेते सम्यङ् व्यास्तायिता भाताः।।७३८९।।

हिन्दीसंस्कृतइंग्लिशविख्यातै स्तैर्विदां वर्यैः।
सम्परिपूर्णा काशी रसपरिपूर्णैव भात्यद्य।।७३९०।।

अघ पुनस्ते काश्यां दिव्यायां वा महामनापुर्याम्।
श्रीकालिदासभवने स्थित्वा विश्वे विभासन्ते।।७३९१।।

स्वं विश्ववन्द्यविद्वत्प्रवरं रूपं समाश्वास्य।
आलम्बन्ते मार्ग महामनोमालवीयानाम्।।७३९२।।

काश्यां तावदिमे ते रेवावर्याः सुविख्याताः।
निखिलां प्रसादमालां वितरन्तो वा विलोक्यन्ते।।७३९३।।

नाना ग्रन्थप्रवचनसम्पादनकार्यसंलग्नाः।
नवनवनवतर नवतम शैली गुरवोऽपि दर्शनीया वा।।७३९४।।

श्रीकालिदासरचनावलिसम्पादनसमीकरणे ।
शतशः पाण्डुग्रन्थान् देशे संस्थापितानवदन्।।७३९५।।

कालिदासरचनावलिरेषा पाठभेद्परिपूर्णा।
चमत्कृतिं तां कांचित्कुरुते सहृदयसमीकारे।।७३९६।।

पुनरथ भोजं विधिवत् निकटे संस्थाप्य निकषानाम्।
प्रकटीकरणव्याप्ता नवनवतायां विलोक्यन्ते।।७३९७।।

व्यक्तिविवेके पूर्वं स्वव्याख्यानं प्रतिष्ठाप्य।
अलंकारसर्वस्वे हिन्दीव्याख्यां रचितवन्तः।।७३९८।।

निजजीवनसंभाषां साहित्येथो सुरक्षन्तः।
सर्वविधं साहाय्यं स्वगृहे संदीपयन्त्येते।।७३९९।।

स्वातन्त्र्यसंभवाख्यं दिव्यमहाकाव्यमीहितं रूपम्।
धृत्वा प्रकटा एते चमत्कृतेश्चारुतां याताः।।७४००।।

सीताचरितं नीत्वा पूर्वमथ प्रकटमानानाम्।
श्रीमद्रेवाद्यानां प्रसादमाला प्रदृश्यते नव्या।७४०१।।

अद्याध्येषा यात्राऽलंब्रह्मेत्यादिका चलति।
भोजराजवशगेयं यात्रा किञ्चिमनोहरं देयात्।।७४०२।।

वाराणस्या मस्यामद्यत्वे भ्राजमानानाम्।
प्रथमे परिगणनीया एते रेवाप्रसादा नः।।७४०३।।

२०९.एनीबेसेन्टवन्दनम्

प्रणमाम्येनिविसेन्टां साक्षाद्देवीं सरस्वती वन्द्याम्।
या हि मदनमोहननवयोजनयाऽयोजनां चक्रे।।७४०४।।

हिन्दूस्कूलोन्नमितां निजनवसंस्थां समृद्धिमतीम्।
काशीहिन्दूविश्वे सोल्लासा या समर्पयाञ्चक्रे।।७४०५।।

येनोद्दीप्तस्वान्तो महामनाः कोऽपि दिव्योऽसौ।
विश्वे विद्याशाली संसारे भास्वरां चक्रे।।७४०६।।

साक्षात्सरस्वती सा कथिता गङ्गाधरैः काश्याम्।
वासन्तिकदर्शननवकलया विभ्राजितस्वान्ता।।७४०७।।

आंग्ले देशे लब्ध्वा स्वीय वपुरत्र सा काश्याम्।
आयाताऽखिलसुधियां तोषकरी दिव्यदेवीव।।७४०८।।

भारतवर्षे महती श्रद्धां संधारयन्ती सा।
धर्माणां सद्रूपं विलुप्तगुप्तं प्रकाशयामास।।७४०९।।

उपनिषदादिसमस्तानां तेषां दिव्यसन्दर्भान्।
आंग्लायामथ वाण्यां प्रभावपूर्णान्समाख्ययाञ्चक्रे।।७४१०।।

लन्दननगरे जाता वपुषा वाचा समृद्धिसम्पूर्णा।
गार्हस्थ्यं ननु त्यक्त्वा समाजसेवां पुरश्चक्रे।।७४११।।

ब्रह्मविचारसभाया साभापत्यं चिराल्लब्ध्वा।
संसारे सर्वत्र भ्रममाणा तं तत्प्रचारयामास।।७४१२।।

संसारे धर्माणामनेकता या विलोक्यते सततम्।
एक एवा सत्यो धर्मः सर्वत्र लब्धसंचारः।।७४१३।।

ब्रह्माण्डे निखिलेऽस्मिन्सततं सद्धर्मदर्शिनीमेकाम्।
एनीबेसेन्टदेवीं सेवासंसारभास्वरां वन्दे।।७४१४।।

अज्ञानाऽवृतमनुजान्बालान्महिलाः सुशिक्षयितुम्।
मनसा वाचा क्रियया क्षणं क्षणं या समर्पयामास।।७४१५।।

वाराणस्यामस्यामागत्यात्रैव निवसन्ती।
हिन्दू केन्द्रीयाख्यं विद्यालयमास्थितं कुरुते।।७४१६।।

केन्द्रीयो विद्यालय एकस्तन्निर्मितो भव्यः।
काशी-हिन्दू-विश्वक-विद्यालायनाम संधत्ते।।७४१७।।

काश्यां निर्माणार्थं संकल्पं धारयन्यदाऽऽयातः।
श्रीमालवीयवर्यस्तस्मै संस्थां ददौ स्वीयाम्।।७४१८।।

त्यागतपोमयमूर्तिर्वाचां विस्तारकारिणी तन्त्री।
आत्माऽऽकाशविहारे विचरणशीला सदैव संजाता।।७४१९।।

गार्गी वा मैत्रेयी स्वयं समवतीर्य यस्यां वा।
ज्ञानैर्विज्ञानैरपि विबोधयन्ती जगद् दृष्टा।।७४२०।।

नो दृष्टाऽप्यस्माभिः साक्षात्कारेण कुत्रापि।
किन्तु सदा दृष्टा सा स्फुरतितमां चेतनाकुञ्जे।।७४२१।।

संसारस्य प्रमुखे पाश्चात्ये सन्निधाने सा।
निरन्तरं भ्रममाणा व्याख्यानैः पूजनं चक्रे।।७४२२।।

आंग्ला वाणी या वा तन्मुखनिर्गलितनवधारा।
पीयूषधारणा वा तुलनीया नास्ति सन्देहः।।७४२३।।

भारतकोकिलवर्या सरोजिनी नायडू यस्याः।
शिष्याऽग्रगण्यतायां प्रतिष्ठिता विश्वविख्याता।।७४२४।।

श्रीकृष्णमूर्तिवर्यो दत्तकपुत्रस्तया स्वयं क्लृप्तः।
स्वीयानमरान्संदेशानाकुरुतेऽद्यापि संसारे।।७४२५।।

अडियार-नाम्नि भागे संस्थां सुदृढां विनिर्माय।
नानासेवाकार्यं साऽत्रत्यैव कल्पयाञ्चक्रे।।७४२६।।

ब्रह्मर्षिमालवीयो यस्याः सन्निध्यमासाद्य।
सत्त्वमये विद्यायाः प्रसारकार्ये परमसफलः।।७४२७।।

शतशश्चाङ्ग्ला महिला भारतदेशं स्वमातृभूत्वेन।
स्वीकृत्येहाऽऽयाताः एनीबेसेन्टदर्शिताध्वन्याः।।७४२८।।

भारतराष्ट्र-सुसेवा या संजाता वसन्तदेव्या वा।
सा नहि भारतपुत्रैरमितोजस्कैः सुसम्पाद्या।।७४२९।।

संसारे दीप्ततया भातितरां काशिका नगरी।
यस्यामेनिबिसेन्टा मूर्तिमती ज्ञानगङ्गाऽऽसीत्।।७४३०।।

यां वर्णयितुं वृत्तैः प्रवर्तमाना स्वयं वाणी।
नाऽन्तं याति कदाचन काव्यमयी सा स्वयं देवी।।७४३१।।

शतशः सद्ग्रन्थानां रचयित्री स्वात्मचरितस्य।
सन्दात्री सर्वानथ कृतार्थयित्री निखिलवन्द्या।।७४३२।।

विश्वस्य नेतृवर्गैर्मानितविज्ञानवैभवा देवी।
एनीबेसेन्टनाम्नी भारतवैभवभरा जयति।।७४३३।।

शतशो निर्मायाऽथो सिद्धसमिद्धान्सुदिव्यविज्ञानान्।
विदुषो नेतॄनपि तान्भारतसेवां सुसाधयामास।।७४३४।।

तद्गौरवसंस्मरणोद्यतशब्दानामियत्ता न।
भवति कदाचित्काचित् शब्दमयी चित्ररेखेयम्।।७४३५।।

सर्वे तत्स्मृतिकाले कृतार्थतां यान्ति सन्मनुजाः।
भारतमातुः पूजा सम्पाद्या तादृशैर्गुम्फैः।।७४३६।।

२१०.तिरस्कारः

तद्वस्तु सत्यमथवाऽलीकं भूयोऽथ सामान्यम्।
यदि तु तिरस्कृतियुक्तं नूनमयं स्यान्महान्लाभः।।७४३७।।

पदे पदे सर्वाङ्गैर्भूषितनववस्तुजातानाम्।
मध्ये या व्याकुलता तिरस्कृतिस्तां निवारयति।।७४३८।।

विलक्षणं हृद्देशं कुरुते सद्यस्तिरस्कारः।
कामं संप्रेषयते सर्वजग त्सारसाम्राज्ये।।७४३९।।

यस्य तिरस्कारः स्यात् स तु नितरां मलिनरूपे स्यात्।
यश्च तिरस्कर्ताऽयं तुष्टे रूपे समायाति।।७४४०।।

यद्यपि पापीयानयमास्ते सर्वः परीवादः।
यत्र तिरस्काराणां चर्चा काचित्समानीता।।७४४१।।

पुनरपि विश्लेषेष्वथ तत्तत्वं भासमानं स्यात्।
यद्दर्शनवेलायां दूरे याता तमोमयी तुष्टिः।।७४४२।।

पूर्वमान्यरूपाणामपि तु तिरस्कारसंशुद्धौ।
आत्मानमुन्नतौ वा नयतितमामेष वीरवरः।।७४४३।।

श्रीकृष्णस्यापि तु यद् भगवत्तत्वं न जानानः।
दुर्योधनस्तिरस्कृतिभावे संयात एवाऽसीत्।।७४४४।।

रावणोऽपि श्रीरामं नित्यं सद्यस्तिरस्कृतवान्।
तेन च जाता तृप्तिःक्षणिकी पार्यन्तिकी चापि।।७४४५।।

एवमेव सत्पुरुषानपि साक्षाद् वा तिरस्कारैः।
संयोजयन्ति पुरुषाः स्वात्मानं धन्यतां नेतुम्।।७४४६।।

ये त्वथ पापीयांसः पुरुषाः सत्यं प्रजायन्ते।
ते नित्यं हि तिरस्कृतिसेवायां यापयन्ति निजकालम्।।७४४७।।

तेऽपि तिरस्कारैः स्वैः स्वात्मानं शोधयन्तु वा सततम्।
तैः शब्दैरथ काचिच्चमत्कृतिस्तत्र संयातु।।७४४८।।

तिरस्कारसाम्राज्यं तावद्विस्तीर्णममाभाति।
सद्योलाभार्थं यत्तस्मै संधारणां कुर्मः।।७४४९।।

कार्ये किमपि द्वैतं द्वैते चैक्यं सुसञ्जातम्।
तत्र हि भूयान् लाभः संप्रेष्यो वा प्रयत्नशतैः।।७४५०।।

२११.तद् दूरे तदु अन्तिके

परमब्रह्मावेदनमिह संस्तोतुं प्रवृत्तास्ताः।
श्रुतयः प्रायो 'नेति' तु शैलीमाराधयामासुः।।७४५१।।

पुनरपि यत् यत् वक्तुं तद् पर्याप्ते परमविषये।
विरुद्धधर्माश्रयतां कथयन्त्वेता परा श्रुतयः।।७४५२।।

यः संश्रुणते सर्वं विनाऽपि कर्णौ विना नेत्रम्।
पश्यति निखिलमिदं वा सर्वमपरोक्षविधयैव।।७४५३।।

योगैरप्यतिदूरे भक्तानामन्तिकेऽप्यसौ दृष्टः।
आत्माभूतः सोऽयं ततोऽन्तिकः कोऽनुभूयाद्वा।।७४५४।।

किन्तु सदैवात्रैव स्थितोऽपि नो वीक्ष्यते तैस्तैः।
यदुपरि कृपां प्रकुरुते तैरेवालोकनीयतां याति।।७४५५।।

अद्य पुनर्यन्त्रयुगे प्रभाष्यतां दूरभाषेण।
भूमेरन्तिमकोणे स्थितेन पुरुषेण चात्रैव।।७४५६।।

दूरदर्शने यन्त्रे समुद्रपारे स्थिता घटनाः।
तत्क्षणमेवाऽत्रैव प्रकोष्ठकोणेषु दर्शनीयाः स्युः।।७४५७।।

वैदिकसन्दर्भाणां या भाषाऽस्ते परमविषये।
वैज्ञानिकसंयन्त्रैस्ता एता स्थापिता पुरतः।।७४५८।।

अहं स्थितो देहल्यामनुक्षणं कालिकातायाम्।
क्षणमात्रेण तु बम्बय्यामुत्तरक्षण एव चेन्नईनगरे।।७४५९।।

दूरभाषणे ते ते क्षणमात्रेण स्थिताः शब्दाः।
करणीयानां मालाः कर्णे संवेशयन्तीव।।७४६०।।

यन्त्रब्रह्मणि तावत्तास्ता सर्वा विशेषताः पुरतः।
आभान्ति नूनमचिरात् तस्माद्यन्त्रं परं ब्रह्म।।७४६१।।

मनोमये संयन्त्रे यमनियमैः साधु चाऽऽयासैः।
यत्प्राप्यं तद् यन्त्रैरेभिः सर्वं पुरस्कृतं भाति।।७४६२।।

वैज्ञानिकास्तु तावन्नास्तिकरूपेण विख्याताः।
यन्त्रब्रह्म विहाय तु तेऽन्यान्नो वा विजानन्ति।।७४६३।।

वेदोदितं तदेतद् ब्रह्म तु नो नेत्रसंयोगे।
यन्त्रब्रह्मणि सर्वं नेत्रोन्मीलैर्विलोकयनीयं स्यात्।।७४६४।।

यन्त्रे नो वा किञ्चिद्दूरे स्थितमिव समाभाति।
किन्तु स्पर्शविशेषे नैवान्तिकतां समायाति।।७४६५।।

२१२.काण्डात्काण्डात्

एको विषयस्तावत् पूर्णे ग्रन्थे सुविस्तृतो जातः।
अन्वेषणपरिरम्भे एकत्रीभावमायातः।।७४६६।।

बालककाण्डे किञ्चिल्लिखितं तदनुत्वयोध्यायाम्।
तन्नामकेऽत्र काण्डे व्याख्यातं तद्विलासितं किञ्चित्।।७४६७।।

आरण्यकेऽर्थ काण्डे तस्य पुनः पल्लवो जातः।
किष्किन्धायां पुनरथ विषयोऽयं पोषितः सम्यक्।।७४६८।।

लंकाकाडे सोऽयं विषयशिखरमारूढः।
कामपि सन्दीप्तिं तां तनुते नानाविधाऽयोगे।।७४६९।।

उत्तरकाण्डे काचिन्नवैव दीप्तिः समायाता।
ग्रन्थस्य परिसमाप्तौ सोऽयं विषयः समापितो जातः।।७४७०।।

इत्थं काण्डाऽकाण्डात् प्रकीर्णविषयं समाहृत्य।
विषयस्तावदयं भोःनवतां तां विधारयति।।७४७१।।

काण्डात्काण्डाद् विषयग्रहणे तस्याः स्वरूपसंघटने।
सा काचित्संबुद्धिर्विलासमायासिता भाति।।७४७२।।

२१३.निर्माणम्

निर्माणानां काचिन्मिहती सन्दीप्तिरायाता।
स्वातन्त्र्यानन्तरमथ तदिदं दृश्यं समायातम्।।७४७३।।

पुरातनञ्चैतस्थितमेवाऽस्ते यथा स्थानम्।
तत्र तत्र वा परितो नवनिर्माणं च सजातम्।।७४७४।।

पुरातनस्य ध्वंसे तदा नवीनस्य निर्माणम्।
स्थानविशेषे सर्वापीयं साध्या समावस्था।।७४७५।।

नवनिर्मितौ नवीना जीवनधारा विलासिता जाता।
सुप्राचीना सैषा धारा काचिद्विलुप्तैव।।७४७६।।

अतएव निर्मितीनां साहाय्येषु प्रकाम्येषु।
नाना देव विशेषा प्रेरकरूपेषु संगता भान्ति।।७४७७।।

निर्माणानथ दृष्ट्वा तेषामुपभोगकार्यकारणेषु।
स्वातन्त्र्याणामनुभवभूमिरियं विस्तृता जाता।।७४७८।।

२१४.पाञ्चरात्रसिद्धान्तः

सात्वतसिद्धान्तेति प्रसिद्धिमासादितः पुरा चासीत्।
तस्यैवापरसंज्ञा विज्ञाता पाञ्चरात्रेति।।७४७९।।

एतस्मिन् निगमागमसारा विद्योतिता भाति।
परमानन्दनिमग्ना भक्ताः यत्राधिकारिणो जाताः।।७४८०।।

पाञ्चरात्रमार्गाणामुपदेष्टा वासुदेव एवास्ते।
देवर्षिर्नारदवर एवात्रोपदेश्यतां भजते।।७४८१।।

सैषा पुरातनी वा गाथा गीता तु पाञ्चरात्रेऽस्मिन्।
गाथानां विपुलत्वं संसिद्धं यत्र प्राक्तनत्वं स्यात्।।७४८२।।

आधुनिकेऽस्मिन्काले पुरातनानां तु ग्रन्थरत्नानाम्।
गवेषणायां सर्वं समुपादेयं तु भक्त्येव।।७४८३।।

मुद्रणविधिर्यदायं प्रारब्धो ग्रन्थरत्नानाम्।
संपादक-विदुषामथ कार्यं वृद्धिं परां प्राप्तः।।७४८४।।

पाठस्याथ सुरक्षा भ्रष्टे पाठे च संशुद्धिः।
नाना पाण्डुग्रन्थान्वेषणविधया समासोक्तिः।।७४८५।।

प्रारूपानां वारं वारं पठनमशुद्धेर्निराकरणम्।
सर्वशुद्धपठनीयग्रन्थे रूपे समासेव्यम्।।७४८६।।

एतत्सर्वं कार्यं जातं सम्पादकत्वं वा।
भारः सुमहांस्तावज्जातो सम्पादकानां तु।।७४८७।।

यदि सम्पादकवर्यः सुसावधानो न दृश्यते तत्र।
दिवसस्य-रात्रिरूपं सुनिश्चितं भाययत्येव।।७४८८।।

सैषा कदर्थनाऽपि च जाता वा ग्रन्थरत्नानाम्।
यत्र पाठमाहात्म्यं विलोपितं मुद्रितं दृष्टम्।।७४८९।।

अतएव विज्ञवर्याः प्राक्तनसद्ग्रन्थरत्नानाम्।
मुद्रापणमाहात्म्ये निपुणं धैर्यं विधारयन्त्येव।।७४९०।।

दुष्पाठपांसुनिकरैरारक्षणमुज्ज्वलीकरणम् ।
पुरातनग्रन्थानां मुद्रणमाहात्म्यमासूते।।७४९१।।

पांचरात्ररक्षेति ग्रन्थस्यात्रापि रक्षार्थं।
मेलापाक्कमदुरैस्वामी अय्यङ्गारः समायातः।।७४९२।।

वेदान्तदेशिकानां शताधिकाः सन्ति रचनास्ताः।
किन्तु सुशोभनमुद्रितरूपे गण्यास्तु पञ्चशोरचनाः।।७४९३।।

दक्षिणभाषालिपयश्चोत्तरभागे तु कठिनाः स्युः।
तेनैव पाठभेदा नानारूपाः प्रजायन्ते।।७४९४।।

पाञ्चरात्ररक्षाऽसौ ग्रन्थो वेदान्तदेशिकानां वा।
अय्यङ्गारमहाशयसम्पादितभूरिशोभितो जातः।।७४९५।।

सम्पादकवर्याणामेकं तावन्महत्त्वसंपूर्णम्।
कृत्यं भवति ग्रन्थारम्भे तद्भूमिकारूपम्।।७४९६।।

भूमिर्वाथोपोद्घातश्चाथात्र भूमिका नाम्ना।
अधुना तु पुरोवाङ्नाम्ना नाना नामसु विदृश्यते तदिदम्।।७४९७।

सम्पादकविद्वांसश्चैतस्मिन् भूमिकाभागे।
सम्पादित-सद्ग्रन्थस्यैतिह्यं सम्प्रकाशयन्त्येव।।७४९८।।

नानासद्ग्रन्थानां सम्पादक-भूमिकारूपाः।
कथानकास्ते ते ते चित्तं विस्तारन्त्येव।।७४९९।।

आश्चर्यसागरे वा मज्जनमासाद्यते तावत्।
भूमिकासु पठितासु च तेषां तेषां कवीन्द्राणाम्।।७५००।।

पाण्डुग्रन्थावाप्तौ कियती बाधा समायाति।
तेषां पठने तावत्प्रत्यक्षरशोधनाऽयासः।।७५०१।।

ये वा तावन्मुद्रितसद्ग्रन्थान् सम्पठन्ति तूर्णं तु।
कथमिह ते जानीयुः सम्पादक-विक्रमायासम्।।७५०२।।

अत एव प्राचीनैराम्नेड्डितमेतदत्रासीत्।
विद्वज्जनश्रमं वा विद्वानेवाऽत्र जानाति।।७५०३।।

पाञ्चरात्रसिद्धान्तागमसद्ग्रन्थप्रकाशनाऽयासे ।
ये विद्वांसो लग्नाः प्रणम्यतां ते प्रयान्ति निखिलानाम्।।७५०४।।

शांकरसिद्धान्तानां ग्रन्थानामन्तरं सोयम्।
श्रीरामानुजदेशिकदर्शितसद्भक्तिसिद्धान्तः ।।७५०५।।

द्राविड़देशे भक्तिरासादितवैभवा जाता।
निखिलार्यजनसुपूज्यो श्रीमान् रामानुजाचार्यः।।७५०६।।

तस्य विशिष्टाद्वैतः सिद्धान्तः सुस्फुटो जातः।
सहस्रशो ग्रन्थानां निर्मितिवेला समायाता।।७५०७।।

दार्शनिकेऽस्मिन् विश्वे विचारधाराप्रवर्तकास्ते ते।
दूरीकृतप्रपञ्चाः पञ्चास्यास्तावदाचार्याः।।७५०८।।

सेवाधर्मस्तेषां भगवति संजातमाधुर्यः।
मानवजन्मसफलता तत्रैवालक्षिता दृष्टा।।७५०९।।

नारायणे च भगवति या भक्तिस्तत्सुमाधुर्यैः।
निखिलजनानां तृप्तिर्मुक्तिश्चासादिता जाता।।७५१०।।

दर्शनसुदृढा भूमिर्जाता चात्रैव सिद्धान्ते।
अद्वैतोत्तरपदता विशिष्टतायां समासीना।।७५११।।

निखिलविश्वसद्वन्द्यैः श्रीमद्रामानुजाचार्यैः।
संसारेषु प्रदत्तः कोऽपि विशिष्टाद्वैतसिद्धान्तः।।७५१२।।

तैरेवात्राचार्यैश्चर्चित आसीत्तु पुण्यतमः।
पुरातनः कश्चिदयं विख्यातः पाञ्चरात्रसिद्धान्तः।।७५१३।।

अत्रापि ग्रन्थानां भक्तिप्रतिपादकानां वा।
भूयस्यथ संजाता संरचनाऽचार्यैर्नूनं समाश्वस्ता।।७५१४।।

वेदान्तदेशिकानां शताधिकग्रन्थरचनासु।
पाञ्चरात्ररक्षाऽऽख्यो ग्रन्थः सोऽयं सुविख्यातः।।७५१५।।

अनुवादानात्मुपरि तु नो जाने खड्गहस्तास्ते।
आलोचकमूर्धन्या अनुवादान्भर्त्सयन्तितराम्।।७५१६।।

सर्वेऽप्यनुजानन्ति तु मूलं नो पूर्णरूपेण।
अनुवादे सुलभं स्यात् काचित्तत्राऽस्तिन्यूनता नाम।।७५१७।।

ये तु न मूलं पठितुं जानन्त्येतेऽत्र विज्ञाने।
स्वीयं प्रवेशमासादयितुं नूनं प्रगल्भेरन्।।७५१८।।

सर्वे वाप्यनुवादा नैव च तादृग्विधा जाता।
यत्रालोचकवर्याः खड्गं संधारयेयुर्वा।।७५१९।।

परिनिष्ठितविद्वद्भिर्येषां वा ग्रन्थसार्थानाम्।
अनुवादाः सपरिश्रमसंस्कारैः प्रस्तुता मान्याः।।७५२०।।

क्वचित्तु मूलानामपि संशीतिं साधयन्तस्ते।
अनुवादसमारम्भाः कथमिह नो वन्दनीयाः स्युः।।७५२१।।

श्रीमद्रामानुजगतकैकर्यं धारयन्तो ये।
लक्ष्यलक्षसंख्यायां भक्तास्ते विश्वसन्त्यत्र।।७५२२।।

वैष्णवमतवादानामधिकाधिकसंख्यया तावत्।
सम्पुष्टिः संजाता नानाऽऽचार्याभिरामभूयिष्ठा।।७५२३।।

एतस्मिन्सिद्धान्ते भगवान् नारायणः स्वयं वक्ता।
देवर्षिप्रवरोऽसौ संश्रुतवान् पांचरात्र वा।।७५२४।।

इंशातः पूर्वं किलं प्रथितं मतमेतदासीद्वा।
सम्यक् प्रचालितं तु प्रचारमायातमेवाऽसीत्।।७५२५।।

काले गते बहुतिथे सिद्धान्ते किञ्चिदल्पत्वम्।
आक्रमणानां काचिल्लहरी परिवर्तनं कुरुते।।७५२६।।

ईहग्दुरवस्थायां सोऽयं दिव्यागमः शेते।
पुनरुत्थानं तस्य तु श्रीमद्वेदान्तदेशिकैः क्रियते।।७५२७।।

पाञ्चरात्ररक्षात्मकसद्ग्रन्थे दिव्यसंग्रहः सोऽयम्।
निखिलागमस्वरूपं भूयो मान्यं विलासयति।।७५२८।।

पाञ्चरात्रशब्देऽस्मिन्पदद्वयं पञ्चरात्रेति।
तत्रपञ्चशब्दस्य च रात्रस्य च पारिभषिकी गाथा।।७५२९।।

नैकेऽर्था अपि तत्रानुगतास्ते ते प्रकाशन्ते।
परिभाषार्थानां तावत् शास्त्रे शास्त्रे सुविस्तृतो महिमा।।७५३०।।

लोकेषु पञ्चशब्दः संख्यां संसूचको दृष्टः।
पञ्चास्यादिषु किन्तु स पूर्णत्वार्थं प्रकाशयन्नास्ते।।७५३१।।

सिंहोऽयं पञ्चास्यः कोशेकाव्येषु वा कथितः।
गणनायामथ नासौ पञ्चमुखान् संविधारयति।।७५३२।।

तस्य मुखे पूर्णत्वं शक्तत्वं वा विधोषयति।
एवमेव चात्रापि तु पञ्चाऽख्योयं सुशोभितः शब्दः।।७५३३।

स्वीयं पूर्णत्वं वा पवित्रतां वा समाह्वयति।
व्याख्याकारास्त्वथ ते संख्यायां पञ्चशब्दस्य।।७५३४।।

पञ्चायुधान् भगवतः काले भेदांश्च कथयन्ति।
रात्रिःकालः पूर्णस्तत्र तु कैङ्कर्यमथ विष्णोः।।७५३५।।

अभिगमनमुपादानमिज्यास्वाध्याययोगाश्च ।
पंचकृत्यसंकायाः सततं धार्याः स्वयं भक्तैः।।७५३६।।

श्रीमाननन्तगुणगणभूषितरामानुजाचार्यः ।
श्रीमन्नारायणपदभक्तिं जनतासु पूरयामास।।७५३७।।

श्रीशंकरमतवादेऽद्वैते कांत्रिन्नवां दृष्टिम्।
दोषदर्शनोद्युक्तां संलक्षितवान्नवीनसंभारैः।।७५३८।।

ज्ञानं यावन्नो वा संजायेताद्वैतसद्रूपम्।
आवागमनविनाशान्मुक्तिर्नो जायते तावत्।।७५३९।।

संसारोऽयं मायाविजृम्भणं निखिलमेव किल मिथ्या।
तस्य त्यागान्मोक्षः परमः पुरुषार्थं आम्नातः।।७५४०।।

इत्यं सन्यस्तानामखिलोद्योगै स्तु विरतानाम्।
सन्यासिनां विभूतिः प्रकटाऽसीद् भारते वर्षे।।७५४१।।

संसारस्य तु तावन् मायामिथ्यात्वरूपस्य।
त्यागान्मोक्षफलं ननु प्राप्तव्यं वा जीवने पुण्यम्।।७५४२।।

अग्रेतने च च काले वेशे सन्यासिनी बहुले।
कपटं प्रविष्टमासीदालस्यं चाथ भूयसा विपुलम्।।७५४३।।

वैचारिके तु विश्वे सोऽयं चाद्वैतसिद्धान्तः।
वैकृतिकीमपिधारां स्वस्मिन्नाहर्तुमारेभे।।७५४४।।

सर्वं चैतदृष्ट्वा भगवान् रामानुजाचार्यः।
सिद्धविशिष्टाद्वैतं सिद्धान्तं बोधयामास।।७५४५।।

निर्गुणब्रह्मस्थाने निखिलगुणै-सर्वथा स्तुत्यम्।
नारायणमाकारैः परिपूर्णं दर्शयामास।।७५४६।।

पाञ्चरात्रसिद्धान्तः प्राक्तनकालात् प्रचालितश्चासीत्।
तस्यैव समुद्धारं कुरुते रामानुजाचार्यः।।७५४७।।

भारतीयजनतायां विचारसारे प्रदीप्तायाम्।
प्राचीनत्वं सर्वं वन्द्यं संजातमेवाऽस्ते।।७५४८।।

ये नूतना विचारा या वै नव्यात्र परिपाटी।
विद्रोहाक्रोशे वा सद्यो भाषां तरंगयति।।७५४९।।

भारतबाह्ये विश्वे नूतनता सर्वथा वन्द्या।
नव्या सुषमा तत्र तु सर्वैरेवादृता जाता।।७५५०।।

यत्र तु पुरातनं चिद्रूपं वेदेषु विख्यातम्।
तत्र मूलरूपं यत् तद् दृष्ट्वा श्रद्धया धन्याः।।७५५१।।

अत्रत्याः किल सर्वे संजाताः पूर्णरूपेण।
ते हि विचारा मान्याः वेदे ये षांद्द हि विद्यते मूलम्।।७५५२।।

कालेनावरणानां पटली विभ्रंशयति मार्गम्।
भगवत्प्रेरितशोधनदक्षास्ते तावदाचार्याः।।७५५३।।

प्रादुर्भूय च वैदिकशब्दानामर्थसार्थानाम्।
नव्यां सरणिं धृत्वा मार्गं नूत्नं समादिशन्त्येव।।७५५४।।

श्रीशंकरनिर्दिष्टामद्वैताख्यां विचारसरणिं ताम्।
नव्यविशिष्टाद्वैते कृतवान् रामानुजाचार्यः।।७५५५।।

अनन्तरं देशेऽस्मिन्शुद्धाद्वैतं पुरस्कृत्य।
आविर्भूतः श्रीमान् दिव्यतमो वल्लभाचार्यः।।७५५६।।

पुनरथ च द्वैतं वा वादं चास्थाय दिव्यतमः।
मध्वाचार्यो जातस्तेनाम्नातश्च मतवादः।।७५५७।।

द्वैताद्वैतं वादं पुनरथ निम्बार्कवर्यैस्तैः।
प्रवर्तितं संख्यायां भक्ता विपुलास्तु तत्रापि।।७५५८।।

अचिन्त्यभेदाभेदं मतमेकं तं पुरस्कृत्य।
श्रीगौराङ्गमहाप्रभुरासीद्वा गौड़देशेषु।।७५५९।।

इत्थं विचाराधारा वैष्णवसत्संप्रदायानाम्।
प्रवाहिता राजन्ते लक्षजनैर्वन्दिता जाताः।।७५६०।।

दार्शनिकविचाराणामेषा काचित् परम्परा रचिता।
वेदानामाधारः कुत्राऽप्यथ तत्र न त्यक्तः।।७५६१।।

सर्वे मतवादास्ते वेदाधारे प्रवर्तिताः सन्तः।
भारतीयजनतायां कण्ठे हारायमाणाः स्युः।।७५६२।।

उपनिषदामाधारं धृत्वा कृत्वाऽधारं च वेदान्ते।
सूत्रं व्यासविरचितं गीतामथ तां विधारयन्त्येव।।७५६३।।

प्रस्थानत्रयमेतत्सर्वेषां वा समाराध्यम्।
तेनैव भक्तजनता वशीकृताभारते वर्षे।।७५६४।।

वेदाधारे तावत् प्रवर्तिता ज्ञान-कर्ममयी।
उपासनामयी धारा संसारेषु प्रकामसन्दीप्ता।।७५६५।।

निराकार-निर्गुणमथ ब्रह्माम्नातं तु वेदेषु।
सगुणं साकारं वा तत्रैवाऽस्ते च भक्तिमार्गेषु।।७५६६।।

श्रीविष्णुश्च शिवोऽथो शक्तिः सूर्योऽथ गणपतिर्भव्यः।
एते च पञ्चदेवा उपासनीयाश्च भारते देशे।।७५६७।।

तत्र ज्ञानं कर्म च उपासना चेति सर्वस्वम्।
सर्वेषां देवानां संधार्यं भक्तवर्यैस्तु।।७५६८।।

एकस्यैव परस्य त्वेतानि तु सन्ति रूपाणि।
तत्र मनोविज्ञानं प्रथते तांस्तान्निजान्कर्तुम्।।७५६९।।

शैवोपासनकर्मणि ये लग्नास्तद्धि दर्शनं निखिलम्।
नानाभेदविभिन्नं सन्दृश्यं ग्रन्थरत्नेषु।।७५७०।।

यथा द्राविड़े भागे विष्णोर्भक्तिः प्रवर्तिता भव्या।
काश्मीरेषु तथैव तु शिवभक्तिः पूर्णतां याता।।७५७१।।

शैवागमसद्ग्रन्थप्रवचनलेखनपरम्परा काचित्।
काश्मीरे संजाता शाक्ताम्नायेऽपि सा तत्र।।७५७२।।

आस्तांतावत्सेयं गाथा विपुला न संक्षेपैः।
कथितुं शक्या प्रौढा पुरातनी दिव्यदिव्याभा।।७५७३।।

तत्र तु शिरसा सेयं प्रणाममालासमर्पणीयास्ते।
तेनैव धन्यताया लाभः सुमहान् सुसंजातः।।७५७४।।

२१५.प्रतीक्षा

संजल्पननवचतुरामोदैराल्हादमुपयान्तीम् ।
वाणीकृपां समीहे तस्यैवाऽऽस्ते प्रतीक्षेयम्।।७५७५।।

सौकर्याऽधारतया सर्वं यद्यत्परामृष्टम्।
तदुपर्यपि काऽपि नवा संजायेत प्रतीक्षेयम्।।७५७६।।

मधुराऽमोदेषु सदा निषेवितं दिव्यमाधुर्यम्।
पर्यन्ते तु तदुत्तरमासाद्यं सा प्रतीक्षेयम्।।७५७७।।

भव्याऽकृतिसंवेगेष्वारोपणमेव संजातम्।
तस्या उन्मोचकतामुपागतानां प्रतीक्षेयम्।।७५७८।।

आकाशे नैर्मल्यं भानौ शीतोष्णतायुद्धम्।
सूर्यस्याऽस्तं गमनं काचित्काचित्प्रतीक्षेयम्।।७५७९।।

पाण्डित्यपोटलीं तां शिरसि सदैवाऽथ बिभ्राणः।
सन्निपातसाम्राज्ये तस्य दशायाः प्रतीक्षेयम्।।७५८०।।

आग्रेड़नैरपि मुहुर्व्यथमानायाः परस्मात्तु।
प्रारब्धान्तिमगमने सम्यग्जाता प्रतीक्षेयम्।।७५८१।।

आलोड़ितसीमानं प्रेक्ष्य जनं तावदन्तिके बहुशः।
किं दुष्काण्डं कुर्यादित्येतावत्प्रतीक्षेयम्।।७५८२।।

संप्रेक्ष्य पारिजातमर्वाचीनं च संस्कृतं दृष्टा।
स्वरमङ्गलाऽपि दृष्टा दूर्वायां स्यात्प्रतीक्षेयम्।।७५८३।।

गाण्डीवे टङ्काराः श्रूयन्ते वाऽखिलैर्यत्नैः।
सूर्योदये प्रतीक्षा केषां नो जागृयान्नाम।।७५८४।।

व्रजगन्धाऽपि सुगन्धं वितरति वृन्दावने स्थित्वा।
भारत्या अपि नूनं सत्यं सत्यं प्रतीक्षेयम्।।७५८५।।

तं परिजातमभितो वन्दे सत्कर्णपूराद्यत्।
किं पुण्यपत्तनाद्वाऽऽयान्तीं तां शारदां स्तौमि।।७५८६।।

सत्यानन्दमिदं वा कलिकत्तायाः समायाति।
सारस्वती च सुषमा विलम्बयन्ती प्रतीक्षासु।।७५८७।।

'विश्वसंस्कृतं' 'संविद्' सैषा वा विश्वभाषाऽपि।
'संस्कृतसञ्जीवनमपि' प्रतीक्षितं संस्कृते जगति।।७५८८।।

हिन्द्यामद्यत्वे वा पुरातनान्यथ च नूतनान्यपि वा।
सन्ति प्रतीक्षमाणान्यथ दैनिकसप्ताहमासिकानि पत्राणि।।७५८९।।

कादम्बिनी च तावन्नवनीतं चैव सप्तगिरिः।
मुक्तासरितामयता रचिता एतास्तु पत्रिका रुचिराः।।७५९०।।

हंसो हिन्दुस्तानो धर्मयुगश्चाथ पत्रेषु।
मूर्धन्यतादशायां प्रतीक्षया सन्ति संयुक्ताः।।७५९१।।

एष कहानीकारो वाराणस्याः समुद्भूतः।
आजकलेति च पत्रं तदपि कुरुक्षेत्रनामकं पत्रम्।।७५९२।।

'आज'नामकं पत्रं जागरणं गाण्डिवं चैव।
अमर उजालाऽपि च सा जनसत्ता संप्रतीक्षिता जाता।।७५९३।।

नवभारतहिन्दुस्तानादि च दैनिकान्यपि वा।
सप्ताहे सेवन्ते साहित्यं पुष्कलार्थेषु।।७५९४।।

राजस्थाने काचिद्दैनिकसंजातपत्रिका रुचिरा।
वैदिकविज्ञानानामधिकां कांचित्प्रतीक्षितां कुरुते।।७५९५।।

त्रैमासिकपत्राणामपि चैषा भूयसी संख्या।
समधिकप्रतीक्षमाणा शोधे कुरुते विमलरुचिम्।।७५९६।।

परिषत्पत्रिकेत्यपि नामाऽस्ते या हि पटनातः।
शोधप्रभेत्यपि तथा शोभितविभवा प्रतीक्षमाणास्ते।।७६९७।।

कल्याणस्त्वद्यापि प्रथमानो वार्षिकाङ्केषु।
मासि मासि वा दिव्यामातनुते तां प्रतीक्षां हि।।७६९८।।

राष्ट्रदूत इति नाम्ना जयपुरनगरात्प्रकाशितं पत्रम्।
साप्ताहिकमप्यङ्कं सम्यक् वा सम्प्रतीक्षितं जातम्।।७६९९।।

प्रादेशिकीषु भाषास्वपि पत्राणां महत्त्वमास्थाय।
काचित्प्रत्ययसारा जातैवेयं प्रतीक्षा नः।।७६००।।

एतेषामथ तेषां तेषां तेषामनेकेषाम्।
प्रातः काले नित्यं समये समये प्रतीक्षैव।।७६०१।।

परमाल्हादमयीयं यदा प्रतीक्षा सदा जाता।
सा तु तस्य परमस्य प्रकाशरूपस्य संजाता।।७६०२।।

भूयात्सैव प्रतीक्षा सच्चिन्मयशुभ्रसंसारा।
सत्यानन्दमयी सा कुरुतां जनुषां प्रतीकारम्।।७६०३।।

संजायतां नितान्तं काचिद्वाणी प्रसादमयी।
विनिवेद्यतां समस्तं सैषा दिव्या प्रतीक्षैव।।७६०४।।

कदा कदा कथयन्तः कवयः सर्वत्र गच्छन्तः।
तं चैव सर्वसुषमापारावारं प्रतीक्षन्ते।।७६०५।।

काले कलना सर्वा यस्य च भाषा विभासते सर्वम्।
अणुतोऽप्यतिलघुरूपो योऽस्ति महीयानपि सुमहतः।।७६०६।।

तस्यात्मरूपमात्रस्यास्तितमां सा प्रतीक्षा मे।
अहमेव सर्वकर्ता सर्वश्चारम्भवानस्मि।।७६०७।।

गच्छामि मन्दिरेष्वथ गङ्गास्नानादिकं कुर्वन्।
प्रणतोऽस्मि निजं रूपं यद् दूराद् दूरितं भाति।।७६०८।।

तत्सामीप्यमथैवं कुतो कुतो वा भवेन्नूनम्।
कथं च तत्राऽलिङ्गनलोलं मे मानसं भूयात्।।७६०९।।

सर्वत्रैव निजं तद्रूपं यदि बद्धिबिम्बितं भूयात्।
तदा कदाचिद् धन्या निखिलैवेयं प्रतीक्षा स्यात्।।७६१०।।

आसादितमाधुर्यैरङ्गीकृतशास्त्रसामर्थ्यैः ।
एतैरङ्कितदेहाः कुर्वन्त्येवाद्य साहित्यम्।।७६११।।

मानेनोन्नतरूपाण्यप्येतान्येव दिव्यानि।
कश्मिंश्चित्सद्रूपे प्राणानां भाषणं जातम्।।७६१२।।

माया मोचकतायामायाता केवलं पुंसाम्।
धन्या धन्या काचिन्माया सा भगवती दिव्या।।७६१३।।

सा माता मान्यतमा सैव नितान्तं समाह्वयति।
सैव समस्तं ज्ञानं कुरुते शब्दार्थसंचारैः।।७६१४।।

धन्योन्मुक्तविभावैराराध्या मानवैः साध्या।
केनाऽपि नैव साध्या सर्वेषां या समं कुरुते।।७६१५।।

नोच्छ्वासो नो वेगो नो वा काचित्प्रवीणतैवाऽसीत्।
नतमां काचिदनुपमा विच्छित्तिः सा प्रतीक्षैव।।७६१६।।

विश्वस्मिन्नपि तदिदं वेगाख्यं ज्योतिराह्वयते।
सम्पूर्णं संसारं प्रतीक्षितः कोऽपि तत्राऽसीत्।।७६१७।।

मान्यानामपि सरणिःस्वीकृतिसंभारसेवमानानाम्।
तत्रोन्मेषविशेषप्रसारभाषा समुन्नेया।।७६१८।।

नाम्नामप्येकेषामासीत्सा दीप्तिरत्युग्रा।
तेषामागमनेष्वथ दीर्घतमेयं प्रतीक्षाऽस्ते।।७६१९।।

प्रतीक्षिता सा दिव्याऽकृतिरेवाऽस्तेति मङ्गलैर्युक्ता।
यस्या दर्शनमात्रं पापानां नाशकं भवति।।७६२०।।

विद्युद्वेगविचालितमूर्ताऽमूर्ताऽपि कमनीया।
वैशेषिकविश्वासैरेषा भाषा प्रतीक्षितैवाऽस्ते।।७६२१।।

धारासंपातैरप्याश्वासैर्भावयित्वैव ।
गर्जनतर्जनभावैर्मेघानां सा प्रतीक्षैव।।७६२२।।

अट्टालिकाप्रतोलीदृश्यावलिरप्यमन्दविश्वासैः ।
आज्ञापितमाधुर्यैरास्वादानां प्रतीक्षेयम्।।७६२३।।

बाणा इमेऽर्जुनस्यैवं भीष्मस्य या प्रतीक्षाऽसीत्।
शरशय्यायां स्वापे परिणतिरस्याऽपि संजाता।।७६२४।।

अथवैवं कथनीयं परितोऽप्येवं समारचितम्।
विस्रब्धं सर्वमिदं संजातं सा प्रतीक्षाऽसीत्।।७६२५।।

द्वन्द्वयुद्धसंक्षेपे निमज्जितास्ते भवन्त्येव।
अवसरसमाप्तिसंख्याघोषणरूपा प्रतीक्षाऽसीत्।।७६२६।।

ऋतुराजोऽयं बाभात्यग्रेऽग्रे मोदितश्रीकः।
प्रतिभासौन्दर्याणामभितः प्राप्तौ प्रतीक्षैव।।७६२७।।

मानोन्नतौ विभावैर्विभासितं चारुसश्रीकम्।
विलसितमेतदशेषं विशेषरूपैः समाक्रान्तम्।।७६२८।।

स्वामिप्रवराऽन्दोलितभाससमानेषु कालेषु।
सद्यः परिवर्तयितुं प्रवर्ततेऽसौ चमत्कारः।।७६२९।।

वैदेशिकेषु कार्येष्वामोदानां विकासकालेऽपि।
परितः परिसर्पणमिदमनुचितमपि तु प्रतीक्षितं जातम्।।७६३०।।

यद्यनुचितमपि जातं कस्मिन्नपि कालसामान्ये।
तत्राऽपवादभूतं करणीयं सा प्रतीक्षैषा।।७६३१।।

शब्दब्रह्ममयी या संसृष्टिः काचिदेषैव।
रम्यतरा नो जाता द्युतिरूपाणां प्रतीक्षा सा।।७६३२।।

पुस्तकपठनसुवेलामध्ययनेषु प्रकाममुपयान्तः।
वाचाला अपि ते ते ह्यवसरलाभं प्रतीक्षन्ते।।७६३३।।

अवसरविन्यासानामेषा काचित्प्रतीक्षैव।
निर्मितसारसमादृतरूपेषु प्रस्फुरन्तीव।।७६३४।।

अद्यैव सा निकामं काचिल्लहरी समुत्प्रन्ना।
किन्तु नितान्तं काम्या तस्यैवैषा प्रतीक्षा स्यात्।।७६३५।।

मत्तं मनो यदेदं किञ्चित्तत्वं विजानाति।
तावद्विलोपमयते सा तस्येयं प्रतीक्षाऽस्ते।।७६३६।।

संभूतानां सर्वां धारां तां तां परामृशन्तीनाम्।
संघातपरार्थानां प्रतीक्षितं तत्र साहित्यम्।।७६३७।।

चन्द्रमुखीसौन्दर्याऽस्वादनसंयोजिते समये।
वंशस्थविलम्बितता सच्चिन्मयता समायाति।।७६३८।।

दिव्येन्द्रनीलशोभासम्यक्संभूष्यमाणानाम् ।
मत्तेन्द्रियकलुषाणां विलासितायां न सन्देहः।।७६३९।।

व्यवहारचालकानां पत्राणां कापि व्यग्रभावाढ्या।
नित्यं पत्राऽनेतुर्मार्गं द्रष्टुं प्रतीक्षेयम्।।७६४०।।

आयातेऽपि च पत्रे तद्दर्शनवेगिते काले।
नानाऽभ्यासकुशलतासूचनसंभाषिता सेयम्।।७६४१।।

पत्राणामागमने या या सा सा क्षतिर्जाता।
काचित्तत्र प्रतीक्षा प्रागेवावेदितैवाऽसीत्।।७६४२।।

समाचारसंचलनं सम्यक् सततं प्रतीक्षासु।
अग्रेतनं हि निखिलं निरुद्धमास्तेऽखिले रूपे।।७६४३।।

विरहविनोदनिवेदननिकटे संस्थितिमये समये।
पत्राऽगमनसुविधयाऽर्धं मेलनमेव संजातम्।।७६४४।।

फललाभादत्यधिकोत्सुकता जाता प्रतीक्षायाम्।
फललाभे संजाते शून्यत्वं स्यात्प्रतीक्षासु।।७६४५।।

युगाद्युगादायाता सत्यं सत्यं प्रतीक्षेयम्।
तत्तत्कालोल्लासैः सोत्कण्ठं जायते चेतः।।७६४६।।

भूयान्कालो यातः कष्टमयी सा प्रतीक्षेयम्।
प्राणनपि तृणयितुं जागरयत्यात्मलाभाय।।७६४७।।

तासु तासु दोलास्वथ चिक्कणपरिचुम्बनेषु निबिडेषु।
प्रारब्धेयं काचित्तत्राऽग्रे सम्प्रतीक्षैव।।७६४८।।

त्वमिहाऽद्य मत्समीपे सद्यः सान्निध्यमाधेहि।
नतमामियं प्रतीक्षा सह्या मादृग्विपन्नेन।।७६४९।।

रङ्गमयी सर्वेषं सृष्टिर्जाता प्रतीक्षायाम्।
परिपूर्तावपि तस्यां पुनरपि सा सैव संजाता।।७६५०।।

एका काचिज्जाता पूर्णा समुदीयमानेयम्।
साऽप्यराऽयातैवेत्यनुदिनमपि सा प्रतीक्षैव।।७६५१।।

आयतिमात्मनि रूपे क्रोडीकर्तुं प्रतीक्षेयम्।
वर्तमानकालस्य तु नैवेयं जायते नाम।।७६५२।।

मीलितमिलितविभावैरालोचितकार्यसन्ततिभिः ।
प्रोद्युक्तैर्नरवीरैः प्रतीक्षमाणा परा सिद्धिः।।७६५३।।

शतशः संकल्पानां सहस्रशो वाऽथवा तेषाम्।
लक्षकोटिसंख्यानां जीवनकाले प्रतीक्षैषा।।७६५४।।

तेनैवैतन्निखिलं जीवनमाऽस्ते प्रतीक्षाणाम्।
असमो व्यूहःकश्चिन्नवा नवास्ताः समीकुर्वन्।।७६५५।।

आरब्धा हि यदैषा काचिन्नव्यप्रतीक्षैव।
तत्पूर्तिमध्यसमये नैका जाताः प्रतीक्षाःस्युः।।७६५६।।

परिपूर्तावप्यथवा कस्यामपि सत्प्रतीक्षायाम्।
तदुत्तरं पुनरेकाऽभिनवा काचित्समुद्भूता।।७६५७।।

नानाऽवृत्तिमयीयं भिन्ना भिन्ना विभासते नित्यम्।
रंगमयी कर्ममयी ज्ञानमयी वा प्रतीक्षैव।।७६५८।।

कस्मादेकात्स्थानादपि मर्त्योऽत्राप्यथाऽऽयातः।
कुत्र तु वा गन्तव्यं प्रतीक्षमाणः स्थितिं लभते।।७६५९।।

सैषाऽपेक्षा कथिता पुनः प्रतीक्षाऽपि सा कथिता।
कौतूहलशब्देन च कथिता सेयं प्रतीक्षैव।।७६६०।।

आराधना च पूजा स्तुतिः परेशस्य सम्पूर्णा।
तस्याः कृपाप्रतीक्षभावेनोन्माथितं चेतः।।७६६१।।

रिक्तोदरस्य सततं भोजनमात्रे प्रतीक्षा स्यात्।
शुष्काऽस्यस्य नितान्तं शीतजले सा प्रतीक्षैव।।७६६२।।

तृप्तस्य तु मनुजस्य पुनः पाश्चात्ये सम्प्रतीक्षाऽस्ते।
भूमिष्ठस्य नितान्तं गगने गन्तुं प्रतीक्षा स्यात्।।७६६३।।

जाड्यं दूरीकर्तुं छात्राणां सत्प्रतीक्षायै।
विद्यालयास्तथैते विश्वस्मिन्सन्ति सन्नद्धाः।।७६६४।।

अधिकारपदाऽवाप्त्यै नाना सौख्योपभोगार्थम्।
सन्त्येवैके नित्यं प्रतीक्षमाणाः समुद्युक्ताः।।७६६५।।

परिपूर्तेः पूर्वमियं मधुरां वा वेदनां तनुते।
तेनैव सा प्रतीक्षा मधुरा मधुरा मिलत्येव।।७६६६।।

किन्त्वधिकाधिककालं यावदियं यदि प्रतीक्षा स्यात्।
कष्टं तेनाऽनुभवत्येव नितान्तं समोऽप्यसौ जन्तुः।।७६६७।।

पीडादायकतायामपि प्रसिद्धा प्रतीक्षेयम्।
प्राणानामपि संशयभावं वितनोति सा प्रतीक्षैव।।७६६८।।

बहुशो विचार्यमाणं निर्वक्तुं वाथवा लिखितुम्।
मुद्रापयितुं शंसां श्रोतुं काचित्प्रतीक्षैव।।७६६९।।

प्रातः काले येषां संस्मरणे सत्प्रतीक्षा स्यात्।
तेषां वन्दनविधया विनिर्मला निर्गता कविता।।७६७०।।

जलधाराणामभितः सन्तरणेषु प्रतीक्षायाम्।
दूरे दूरे गन्तुं सोत्साहो वा विलोक्यते सोऽयम्।।७६७१।।

मल्लानां स्मरणिरियं यन्मल्लस्यास्य सर्वस्य।
भूमौ पातनकार्ये तेषां नित्यं प्रतीक्षैव।।७६७२।।

वैदुष्यनिकषशोभाविस्तारितशेमुषीकाणाम् ।
लोकानाज्ञापयितुं सन्मार्गेषु प्रतीक्षा स्यात्।।७६७३।।

२१६.अथवा

अथ शब्दो वा शब्दः संयुक्तौ तौ यदा भवतः।
अथवेति तदा रूपं संगठितं सत्वरं भवति।।७६७४।।

अव्ययभावे संस्थौ द्वावप्यैतावनादिकालाद्वा।
पार्थक्येनापि सदा ह्युपलब्धावन्यसन्दर्भे।।७६७५।।

अथ शब्दोऽयं कश्चिन्मङ्गलरूपः परामृष्टः।
व्याकरणमहाभाष्यादिषु चैवं सुस्पष्टमाम्नातम्।।७६७६।।

अथ शब्दानामनुशासनमेतत्संप्रवर्तते नाम।
अत्रादिमोऽथ शब्दो मङ्गलभावं परामृशति।।७६७७।।

वेदव्यासविनिर्मितवेदान्तानां प्रथमसूत्रे।
अथशब्दोऽयं कंञ्चिदर्थविशेषं समर्पयन्नास्ते।।७६७८।।

अथ प्रजानामित्याद्यपि निगदन्कालिदासो वा।
रघुवंशमहाकाव्येऽप्यथ शब्दं चादितो लिखति।।७६७९।।

शतशः सहस्रशो वा ग्रन्थेष्वयमादिमः शब्दः।
अथशब्दः सम्प्रोक्तो मङ्गलभावं निबध्नाति।।७६८०।।

मूले कथितं शब्दं व्याख्यातारस्तु विद्वांसः।
अथशब्दं व्याख्यायां नानारूपं कथितवन्तः।।७६८१।।

अथशब्दे यस्त्वादिमवर्णो वा विद्यतेऽकारः।
सोऽसौ विष्णोर्वाचकरूपेणाङ्गीकृतस्तन्त्रे।।७६८२।।

सर्वेषां वर्णानामथ ये वाच्या भवन्त्यर्थाः।
तेषां रहस्यजातं तन्त्रग्रन्थेषु चर्चितं मृग्यम्।।७६८३।।

तन्त्रे दीक्षितमनसः स्वातन्त्र्येषु भ्रमन्तो वा।
वर्णसमाम्नायानां संसारे मोदमुपयाताः।।७६८४।।

अथ शब्दे चरमाक्षरभूतो योऽसौ थकारोऽस्ति।
विश्रान्तिं तु नितान्तं प्रददाति श्रूयमाणःसन्।।७६८५।।

वा शब्दस्तु विकल्पानां संकथने प्रसिद्धोऽस्ति।
एवं वा चैवं वेत्यादौ वैकल्पिकं कथनम्।।७६८६।।

नानाविधकोटीनां विनिश्चयं चापि वा शब्दः।
लेखकधुरीणकथनेष्वायातो दृश्यते बहुधा।।७६८७।।

छन्दोविरचनकाले तदा तदा पादपूरणायाऽपि।
तत्र तत्र वा शब्दो बहुभिर्योज्यो भवत्येव।।७६८८।।

अथवाशब्दविचारे तद्घटकीभूत शब्दयोर्गाथा।
स्वाभाविक्यपि नूनं नित्यत्वेन प्रकाशिता भवति।।७६८९।।

अथशब्दे वा शब्दः संयुक्तोऽयं यदा जातः।
विच्छित्तिरनुपमेयं संजाता वाक्यविन्यासे।।७६९०।।

अथवा शब्दं वक्तुं लिखितुं वा सम्प्रवृत्तास्ते।
विश्रामस्थलमेनं सम्यग् संस्थापयाञ्चक्रुः।।७६९१।।

नानाविधबुद्धीनां तर्काणां वा चमत्कारे।
निष्णाता विद्वांसः प्रयुञ्जते वाऽथवा शब्दम्।।७६९२।।

रिङ्गच्छब्दतरङ्गेष्वारचितेयं विचारमणिमाला।
वारं वारं गुम्फत्यथवा शब्दं समृद्धविस्तारे।।७६९३।।

उत्तमतरसम्बन्धे या काचित् संगतिर्जाता।
'तत्राऽन्यतराऽधानेष्वथवा' मार्गप्रदर्शको भवति।।७६९४।।

नैकासां व्यक्तीनामाध्याने यत्र संतुष्टिः।
संजायते ह्यभीष्टाप्यथवा शब्दः प्रयुज्यते तत्र।।७६९५।।

अधिकाधिकप्रयोजनकाले संजातहर्षाणाम्।
उच्छ्वासैर्निष्क्रान्तोऽप्यथवा शब्दः परिभ्रमति।।७६९६।।

अथवेत्येषा बुद्धियत्रैव प्रीतिसंयुक्ता।
परिवर्तनं प्रजातं तत्रैवानन्दसंसारे।।७७९७।।

नव्यन्यायोन्मुक्ता भाषा येषां मुखे याता।
ते चाप्यथवा शब्दं प्रयुञ्जते श्वासधारणायाशु।।७७९८।।

व्याकरणभाष्यरचनासंचारे शेमुषीं तन्वन्।
पतञ्जलिर्भाष्येऽपि स्वीये ह्यथवां प्रयुक्तवान्बहुधा।।७७९९।।

शेवधिसंसेवायां ये ये नित्यं प्रजागरूकाः स्युः।
ते त्वनियतसंस्थानेप्यथवाम्रेड़नसजातीयाः।।७७००।।

नानाव्याख्यानेष्वथ विकल्परूपान्समाचरन्नास्ते।
वैकल्पिकरूपाणामुत्थापनमात्मसात्कर्तुम् ।।७७०१।।

अथवाप्यथवाप्यथवेति तु वारं वारमभ्यासात्।
तेनानन्दान्दोलनमयता सा काचिदायाता।।७७०२।।

कारणकार्यविभागे तेषां लक्षणसमीकरणे।
विद्युद्वनितालतिकां परामृशन्ती विभासते ह्यथवा।।७७०३।।

सेवां बहुधाप्यथवा तन्वन् कुर्वंश्च बहुविधां सेवाम्।
अथवाप्येवं वक्तुं शक्यं चैवाऽपरेषु शब्देषु।।७७०४।।

नामोन्नतिं च विविधां व्यातन्वानाश्च ते बहुशः।
संस्कृतिऽवन्तोप्यथवा भाषाव्याकरणसंलग्नाः।।७७०५।।

अधुनामधुकरपुञ्जे वित्रासितशब्दमयकुञ्जे।
पुञ्जे पुञ्जे विहरन्जातीयो जायते ह्यथवा।।७७०६।।

लोकाऽलोकविलोकनसंसारेऽप्यप्रमत्तेषु ।
तेषु तेषु संदेशेष्वथवाप्यथवा समालपन्धन्यः।।७७०७।।

चायं नु वा पिबेयं भोजनमास्वादयाम्यथवा।
शयनं वाऽनुष्ठेयं ध्यानं देयं मयाप्यथवा।।७७०८।।

शकटीमार्गेणैवाद्यहमागच्छेयं नु वायुमार्गेण।
बसयानेनैव मया यात्रा सम्पाद्यतामथवा।।७७०९।।

एकस्यामेकस्यां शालायामत्र गत्त्वैव।
पुनरावर्तनकालं गोप्यं गोप्यं तथाप्यथवा।।७७१०।।

भृकुटीनां विन्यासे वित्रासे वा जगत्यां तत्।
लोके श्लोकानां सा रचना संजायतामथवा।।७७११।।

एते वानरशूरा मन्दिरमाक्राम्य तिष्ठन्तः।
दर्शकवृन्दं सर्वं भीषणभावेषु निक्षिपन्त्यथवा।।७७१२।।

तैलं पातितमेतत्पुनः समान्दोलितं सर्वम्।
गृहमध्ये समाराङ्गणसंस्थितिराभासतेऽप्यथवा।।७७१३।।

निखिलैवैषा यात्रा प्रत्यग्रत्वे समाप्तिमायाता।
आदिमभूमिरियं साप्यथवाऽग्रिमयात्रायावृता काचित्।।७७१४।।

अयमस्त्येको बालः सुकुमारः सर्वकमनीयः।
संचेष्टते सहस्रैर्व्यापारैः शोभितोऽप्यथवा।।७७१५।।

स्थापितसंस्काराणामवलिं तां तां प्रपश्यन्तः।
विचरन्तो दृश्यन्ते शुष्कत्वं जयतामथवा।।७७१६।।

एते ते विनदन्तो मृत्युं वा दूरयन्तोऽपि।
कूपेनिपतितरूपे दृश्यन्ते वा विपन्नतायुक्ताः।।७७१७।।

अतिदूरे संस्थाने स्थापितमेतच्चिरनं चित्रम्।
चित्रसचित्रविचित्रैः प्रपञ्चसार्थो विलोक्यते ह्यथवा।।७७१८।।

आतोद्यानां विभवैः प्रसादमासाद्य गायन्तः।
केचित्ते तत्रैवोन्मुखतामथवा समायाताः।।७७१९।।

मोघाऽशाकर्माणोऽप्येते चौर्याख्यदस्युमार्गेऽस्मिन्।
अग्रे गत्वा प्राणानपि विकिरन्तोऽथवा जाताः।।७७२०।।

विभवैरप्यतिशयितैरेते चैवाऽमुखं तृप्ताः।
नानारोगाऽक्रान्ताः संजायन्तेऽथवा प्रथिताः।।७७२१।।

दारिद्र्यैरालिङ्गितसर्वाङ्गाः कानने विषमे।
विषमापूरितशरणास्तेऽप्यथवैवं प्रमोदन्ते।।७७२२।।

द्विचक्रिका संचलितास्ते एते सत्यसाधनाशीलाः।
वार्धक्येऽपि नितान्तं मोदन्ते तीव्रताऽप्यथवा।।७७२३।।

हीनैर्भावैर्भरिता अपि ते नित्यं प्रमोदन्ते।
यावज्जीवनमथवा तेषामेषा कथैव पृथक्।।७७२४।।

अथवोदधिसंभूतं किञ्चित्तदिदं प्रकाशते ज्योतिः।
यत्र प्रकामनिरताः सेवन्ते सत्यसम्बन्धम्।।७७२५।।

अथवा घटितैर्वाक्यैः स्थितिरेषा संस्थुला भवति।
यत्र प्रभावभाषासंलापैः प्रोच्छलन्तीव।।७७२६।।

आरोपणकुशलास्ते नाना संलापसंस्तुतस्वान्ताः।
नाराधयन्ति नूनं त्वथवेत्यादि प्रयोगसंयोगान्।।७७२७।।

श्रद्धारहितैरेभिः किं स्याद्वाचां विनिःश्वासैः।
अथवैवं संजाते जीवनभाषा समायाति।।७७२८।।

विकृताविकृतं रूपं किञ्चिकिञ्चिद् विलोपितं जातम्।
अथवा पुनः समस्तं प्रागूरूपं नूनमायातम्।।७७२९।।

मरणादूर्ध्वं यद्यत्करणीयं तत्समीकृत्य।
एते वयं प्रयामो रक्षति जगदीश्वरी सर्वान्।।७७३०।।

सत्योपाख्यानैरप्यरुचिर्जातैवमथवेयम् ।
घटनावली विचित्रा मथितस्वान्तैव सञ्जाता।।७७३१।।

हरहरशिवशिवबमबमस्वरसंवेगे समुच्छलनम्।
यदि विनियुक्तं सम्यग्जीवनमेवाऽस्ति धन्यतमम्।।७७३२।।

काऽपि चमत्कृतिरन्या माऽस्तुतरां श्वासकालेषु।
श्रीमद्भगवत् स्मरणे सर्वाऽवस्थास्वमृतकरणम्।।७७३३।।

संसारातिक्रमणे मर्त्योऽन्यैर्वा पृथग्भूयात्।
गन्तव्यं किन्त्वेकं स्फूर्तिप्रदमस्ति संजातम्।।७७३४।।

अद्य किलाऽत्र वियुक्तास्ते ते तत्रैव मिलिताः स्युः।
जागर्ति कामनेयं हृद्देशे संस्थिताऽप्यथवा।।७७३५।।

जीवनवेला सेयं घटनालिरेव नित्यतां याता।
प्रवहतितरां समस्ता धारा संवेगसम्पूर्णा।।७७३६।।

कियती वैषा धरणी व्याप्ता स्वीयैश्चरणचिन्हैः।
अथवा किमेतदेवं निरूपणीयं हि हृदेशे।।७७३७।।

नतमामथवा मयका किमपि तदात्वे निरूपणीयं स्यात्।
स्वयमेव तान्तु हृदये जगदीशः सत्कृपां कुरुते।।७७३८।।

सर्वेषां भूतानां हृद्देशे संस्थितो योऽसौ।
ईश्वर इत्याऽख्यातः कुरुते क्षणशःसुरक्षितं निखिलम्।।७७३९।।

रोगादीनामथवा निवारणानां नियामको नित्यम्।
हृद्देशस्थितमूर्तिः सोऽसावीश्वर इहाऽध्यातः।।७७४०।।

सर्वासां शक्तीनां सिद्धीनां पुञ्जमादाय।
सोऽसावीश्वरभावे हृदयस्थो वा विराजते नित्यम्।।७७४१।।

द्रष्टुं स्प्रष्टुं वक्तुं तेनैवाऽद्यपि जायते सर्गः।
योगे वेदान्ते वा कर्मणि वा सैव प्रक्रिया चलति।।७७४२।।

तस्यैव हृदयदेशे नित्यं नित्यं विराजमानस्य।
परमेश्वरस्य नित्यं यात्रा सम्पादनीयैव।।७७४३।।

सैषा सर्वा यात्रा जीवनमूला समर्पणोद्युक्ता।
सर्वां स्वीयां सरणिं संस्कारैर्वा प्रदीपयति।।७७४४।।

भारतसंस्कृतिचित्रे ये चैते सन्ति संस्काराः।
तेषां विभूतिमयतैवेश्वरसामीप्यमातनुते।।७७४५।।

संस्कारैरथ तैस्तैरेतस्यैवात्मभूतस्य।
परमेश्वरसद्रूपस्यालम्बनता समामिलिता।।७७४६।।

अज्ञानावृतकायाः सर्वे जीवाः स्वयं नित्यम्।
परमेश्वरसद्रूपस्यालम्बनतासमामिलिता ।।७७४७।।

सा यवनिकैव विभवैर्दूरयितुं सन्तनोति बिम्बानि।
संध्याभासितबन्ध्याकरणे यत्राऽमृता तृप्तिः।।७७४८।।

समुदीर्णाऽस्मच्छून्यं कुरुते जीवनमथातनुते।
विक्षोभं विस्मरणं विच्छित्तिभिरप्यतः शून्यम्।।७७४९।।

अथवैतत्पृच्छमो सा वा वार्ताऽस्ति हृदये नः।
तच्चैवैतत्सकलं संजायेताथवा व्याप्तम्।।७७५०।।

अथवा कृतवाग्द्वारेत्यादि प्रथमे परिस्पन्दे।
कविकुलगुरुरप्यथवा प्रेम प्रकटीकरोत्येव।।७७५१।।

वाचालता नितान्तं शोभितरूपे समायाति।
यत्राऽथवाऽख्यनृत्यं संजायेतैव भाषमाणानाम्।।७७५२।।

अथवा अथवा कथने नीरसभावः प्रजायतां नाम।
तत्राप्यथवाऽवेशैर्विशेषितं सुन्दरं जातम्।।७७५३।।

विद्वत्तासन्दर्भे नित्यं विभ्राजिते दिव्ये।
मानाऽपमानभाषा सहसाऽविर्भावमायाता।।७७५४।।

अथवैवं संकथनं प्रशस्ततरमेव बाभाति।
नत्वेवं संकथने पर्यायः प्रोच्यतां यातः।।७७५५।।

किञ्चिच्चायं कुरुते सर्वान्भावान्सुशोभनान्रुचिरान्।
सन्तोषिता नितान्तं विद्योतन्ते परैर्यत्नैः।।७७५६।।

कृतवाग्द्वारविशेषोल्लासितवैदग्ध्यमाधुरीरम्यैः ।
कविभिःपुनरयमथवा प्रयुज्यते वाग्विधानेषु।।७७५७।।

वैकल्पिकशैलीनां मधुरतरो भाति महिमाऽयम्।
यत्र हि सारल्यं स्यादवबोधेषु प्रगल्भेषु।।७७५८।।

दिव्यतरोन्मादानामप्येषोऽद्यापि विद्यते महिमा।
यस्य प्रभावमयता विवादविच्छेदमातनुते।।७७५९।।

आसादितसत्सौरभमव्याकुलमेव भाति किल सर्वम्।
विश्वविशेषविशेषितवैदुष्यं वा विभासितं दिव्यम्।।७७६०।।

नव वैचित्र्यसमुज्ज्वलसज्ज्योत्याख्यानके चित्रे।
नानाऽध्यासाऽध्युष्टप्रगल्भतायाः पराकाष्ठा।।७७६१।।

कमनीयकाव्यमयतासंचारैः शोभिते रम्ये।
काञ्चनकमनीयानामप्याऽकृतयो विभासन्ते।।७७६२।।

आपत्तीनां विषये संग्रामे जायमानेऽपि।
मारणमोहनचक्रे पतितानां विजय एव संजातः।।७७६३।।

अज्ञानाऽवृतकायाः सर्वे जीवाः स्वयं नित्यम्।
परमेश्वरस्वरूपास्तेजोमयसंविधानसंसिद्धाः ।।७७६४।।

समुदीर्णमथ च शून्यं कुरुते जीवनमथाऽतनुते।
विक्षोमं विस्मृततावैनाशिकरूपसंयुक्तम्।।७७६५।।

अथवैवं संयुक्ते व्याहारे भासते मैत्री।
मैत्रीव्यवहाराणां नव्यो भात्यत्र चोन्मोषः।।७७६६।।

नानाऽभ्यासप्रगुणितसातत्येनाथ युक्तानाम्।
या शैली सा प्रथमा प्रथिमानं मोदयत्यथवा।।७७६७।।

मैत्रीभावं गमिते निखिलेऽप्यथ वाक्यसन्दर्भे।
वाचामन्तिमतायाः परिणामेवष्वस्ति नो भेदः।।७७६८।।

अथवैवं विज्ञाप्यं सेवायां सहृदयानां हि।
ते खलु स्वीये हृदये सर्व कुर्वन्तु बाल्यमपि।।७७६९।।

२१७.अधिकारः

अधिकारोऽयं साक्षादीश्वरतुलयत्वमापन्नः।
युगे युगे संसिद्धः संसारं सर्वमुन्नयन्नाऽस्ते।।७७७०।।

ईश्वररूपाणि यथा संसारे सन्त्यनन्तानि।
अधिकारस्य च रूपाण्यप्येवं सन्त्यनन्तानि।।७७७१।।

अधिकारस्य तु चर्चा संसारे सर्वदैव संजाता।
अद्यतनेऽस्मिन्काले विशिष्य जाताऽधिकारचर्चेयम्।।७७७२।।

प्राचीने ननु कालेऽधिकारचर्चा यदा जाता।
कस्मिन्कस्मिन्कार्ये कस्यास्त्यधिकारसद्भावः।।७७७३।।

वेदानामेवाऽसीत्कर्मक्षेत्रेषु साम्राज्यम्।
तत्राधिकारचर्चा कर्मानुष्ठानवेलासु।।७७७४।।

त्रैवर्णिकाधिकारोऽनुपनीतानां तु नाधिकारोऽस्ति।
एते सन्त्यादेशा वेदे किल चोदनासु सर्वासु।।७७७५।।

श्रेष्ठानामधिकारो नाऽश्रेष्ठानामधीकारः।
किं नाम श्रेष्ठत्वं भिन्ना भिन्ना गतिस्तत्र।।७७७६।।

मल्लानां तेषामथ युद्धेष्वेवं प्रवृत्तेषु।
प्राध्यापका वराका अधिकृतभावं न तत्रस्युः।।७७७७।।

भक्तिमये कीर्तननवसंसारे संप्रवाहिते तावत्।
कोटीशानामपि वाऽनधिकारित्वं प्रघोष्यतां नूनम्।।७७७८।।

यस्य यत्र नैर्मल्यं प्रावीण्यं योग्यता वाऽपि।
विज्ञैरङ्गीक्रियते तत्र स एवाधिकारवान्भवति।।७७७९।।

अधिकारिव्यपदेश्या ये वैते संप्रदृश्यन्ते।
तेषामन्यैर्योगे सङ्गतिरस्थायिनी नास्ति।।७७८०।।

कश्चिद्विशेषभावस्तत्राऽयातो न सन्देहः।
सर्वस्मिन्परिवेशे ते पार्थक्येन गण्यन्ते।।७७८१।।

अधिकारे परिभाषाहीनत्वं भूषणं भवति।
परिभाषास्वीकारे नास्त्येवाऽस्माकमधिकारः।।७७८२।।

अधिकारिणोऽपि तावत्परिभाषन्ते यदि स्वरूपं तत्।
तत्राऽव्याप्त्यादीनामवकाशो दृश्यते विपुलः।।७७८३।।

बाह्यानां चिह्नानामप्यधिकारेषु वैशद्यम्।
बाह्यैरेतै रूपैरधिकाराणां महत्त्वमासाद्यम्।।७७८४।।

सर्वदर्शिरूपाणामधिकारे जागरूकत्वम्।
निखिललोकसंलोक्यं नानामयतात्मसद्रूपम्।।७७८५।।

अधिकारपरामर्शे संजातेऽसौ जनोऽतिदीनोऽपि।
पीनं मनुते वैभवमखिलं चात्मीयभावेषु।।७७८६।।

आधारोऽयं निखिलस्यापि स्थूलप्रपञ्चस्य।
यस्मात्प्रगुणितरूपा दूरीभूता महात्मानः।।७७८७।।

राजनीतिरधिकारव्याख्यामन्यां पुरस्कुरुते।
सा राजनीतिरास्ते सर्वाऽप्यधिकारसर्वस्वा।।७७८८।।

अधिकारारम्भाणां यदा समाप्तिः प्रजायते नियता।
विषम उपन्यासोऽयं जीवनवेलासु सङ्गतो भवति।।७७८९।।

वैषम्येऽवस्थानेऽवस्थितिरेषा यदा यदा भवति।
तदा तदा भवतितरामभ्यन्तरभाववैभाव्यम्।।७७९०।।

अधिकारपरामर्शे संजाते यद्यदाज्ञप्तम्।
अधिकारविघटनेषु तु तद्वैरूप्यं समायातम्।।७७९१।।

अधिकारोतुङ्गानां शिखराणां याऽस्ति दृश्यालिः।
सा सर्वान्वै चकितान्संस्कुरुते पूर्ववत्तुल्या।।७७९२।।

अधिकारस्थितपुरुषा ऋद्धिं स्वीयां समश्नुवते।
इतरेषां तत्सर्वं नूनं स्वप्नायितं भवति।।७७९३।।

वेतनतोऽप्यत्यधिका सहस्रलक्षाधिकैर्गुणिता।
सम्पत्तिर्निजसेवासामीप्यायैव शोभते दिव्या।।७७९४।।

अधिकाराणां चयने नित्यं ये जागरूकाः स्युः।
ते नूनं मोदन्ते समाजसेवानिकामविस्तारे।।७७९५।।

अद्यत्वे ह्यधिकारः सेवाशब्देन विख्यातः।
जनतन्त्रात्मकशासनपद्धतिरेषाऽखिला सेवा।।७७९६।।

सेवाया अधिकारे सर्वैषां विद्यते सेवा।
अधिकारिणश्च पुरुषाः सेवालग्नाः समाख्याताः।।७८९७।।

अधिकारपरिसमाप्तिः सेवाविनिवृत्तिराख्याता।
अधिकारपरामर्शे सेवेयं सुप्रतिष्ठिता जाता।।७८९८।।

नेत्रविलोकन-वैलक्षण्यादारभ्य चाधिकारोऽमयम्।
शब्दोच्चारणवेलाप्रहृष्टरूपे परामृष्टः।।७८९९।।

उच्चारणेषु काचित्स्फूर्तिः सा वै समायाता।
येनाऽस्त्यधिकारोऽयं लोके सम्यक् प्रचारमायातः।।७८००।।

वेशाऽवेशाऽदेशेष्वधिकारस्यैव साम्राज्यम्।
ते ते वेशास्तावत्तत्तत्पदतारतम्याभाः।।७८०१।।

यानानामप्येषामधिकारस्यैव सेवासु।
विनिवेशेन विशेषणरूपत्वं सम्प्रयुज्यतां नाम।।७८०२।।

दिव्यमरुत्तरयानैर्वायौ वा संचरणशीलैः।
यानैर्विचरन्त्येते तत्तत्कार्येषु संलग्नाः।।७८०३।।

अधिकारसमारूढैरावासास्तावदिह लभ्याः।
सर्वाभिः सुविधाभिः परिपूर्णाः सुप्रसन्नाभाः।।७८०४।।

कन्दानां मूलानां नानाविधसत्फलानां वा।
आवासे ह्युपलब्धिः केषामानन्ददा न स्यात्।।७८०५।।

अधिकारिपुरुषसविधे भृत्यानां भूयसी संख्या।
अहमहमिकया ते ते भृत्याः समुपस्थिता एव।।७८०६।।

अधिकारगतं पुरुषं सर्वे लोका नमस्यन्ति।
अधिकारारूढानां निखिलो लोकोऽयमात्मीयः।।७८०७।।

पूर्वं येऽपरिचिततामुपगता एव तिष्ठन्ति।
अधिकारे सम्प्राते ते परिचेतुं विचिन्वन्ति।।७८०८।।

अधिकारे ते सर्वे भावाः समुपस्थिताः सन्तः।
प्रगुणीकुर्वन्त्यथवा नम्रत्वं धारयन्त्यथवा।।७८०९।।

लोके वेदे दैवे सर्वे कार्येऽधिकाराणाम्।
अधिकारः सन्तोषं कञ्चिदनुपमं समीकुरुते।।७८१०।।

व्याकरणेऽपितु तु सैषाऽधिकारचर्चा गरीयसी जाता।
पाणिनिसूत्राणामथ भेदोऽस्त्येकोऽधिकारसूत्राख्यः।।७८११।।

अधिकारणामेषां परिभाषाणान्तु भिन्नत्वम्।
तत्र तत्र संलोक्यं भिन्ने भिन्ने तु परिवर्ते।।७८१२।।

परिवेशानां रूपेऽधिकारभेदाः प्रवर्तन्ते।
तत्र च पुनरेतेषामुपभेदा वा प्रजायन्ते।।७८१३।।

अधिकाधिकाऽधिकारे समागते व्यस्ततायां वा।
हृद्रोगस्याऽक्रमणं भूयो भूयोऽभिवर्धते तावत्।।७८१४।।

अधिकाराणां दोषा एते स्वास्थ्यस्य शोषकाः सन्तः।
अधिकारधारिपुरुषं दूषयितुं चाक्रमन्त्याहो।।७८१५।।

विद्वानपि मुह्यति वाऽधिकारसंस्थां समारुह्य।
मानाऽपमानसूक्ष्माऽनुभवोऽप्यायाति तत्रत्यः।।७८१६।।

विक्षोभानां महती संस्था परिवर्धते नित्यम्।
अधिकारे संस्थानां विक्षोभे क्षोभ आयाति।।७८१७।।

पुनरप्यधिकाराणां यत् सौख्यं तत्र मुग्धतमाः।
सर्वविधामपि पीडां सोढुं सन्त्येव सन्नद्धाः।।७८१८।।

भूयोऽधिकारधाराप्रवाहमालासु पतितानाम्।
अन्यादृशा विलासाः प्रायः प्रादुर्भवन्त्यत्र।।७८१९।।

चयनाऽख्यसत्क्रियायां सर्वत्रापि प्रवृत्तायाम्।
उच्चतमा अधिकाराः पञ्चषु वर्षेसु सीमिता जाताः।।७८२०।।

निर्वाचने तु जाते पुनरपि ते तेऽधिकारा वा।
आयत्ताः स्युस्तावत्सैषा सर्वा समीक्रिया दृष्टा।।७८२१।।

ननु वस्तुतोऽधिकारस्तेषामेव प्रदृश्यते सततम्।
कर्तव्यमार्गनिष्ठा ये नित्यं जागरूकाः स्युः।।७८२२।।

ये न कदापि पदेष्वथ मनसाऽपि च नूनामारूढाः।
किन्तु निजे कर्तव्ये सततं चाग्रे प्रदृश्यन्ते।।७८२३।।

हृदये हृदये तेषामधिकारो जायते तावत्।
इतिहासपृष्ठानां भवन्ति चैते त्वलङ्काराः।।७८२४।।

सर्वोच्चपदस्था अपि तान्वै प्रणमन्ति नित्यमेव ननु।
रामे वनं प्रयाते भरतस्य तु दृश्यमाध्येयम्।।७८२५।।

ज्ञानक्षेत्रे त्यागे वदान्यतायां समासीनाः।
सर्वपदेभ्यो दूरस्थास्तेऽधिकाराधिकारितामाप्ताः।।७८२६।।

आसीद् भगवान् बुद्ध आद्यः श्रीशङ्कराचार्यः।
पदैः सुदूरे स्थित्वा पददानाय प्रगल्भन्ते।।७८२७।।

तेषामेषां तावत् को वा संख्यातुमीशीत।
अधिकाराणां संख्या विपुलैवेयं समाभाति।।७८२८।।

परमवरेण्ये रूपे प्रियप्रियो माननीयश्च।
सर्वेषां मनुजानामभीष्टदो नित्यमधिकारः।।७८२९।।

सर्वे ते ते भावाः स्वभावरूपेषु संस्पृष्टाः।
सर्वेषामेतेषां संमोहं नूनमाह्वयन्तीव।।७८३०।।

केचित्किञ्चिच्चान्येऽन्यत्किञ्चिद्वा प्रकुर्वन्तः।
दृष्टिं तत्र निरन्तरमादधते यत्र चाधिकारः स्यात्।।७८३१।।

भाषाणां शैलीनां परिभाषाणाञ्च संसारे।
येषामस्त्यधिकारस्ते जगदेतद्विचालयन्त्येव।।७८३२।।

इयमधिकारसुचर्चा यदा यदा जायते गोष्ठयाम्।
तदा तदा कः कालो गतवानेतन्न विज्ञातम्।।७८३३।।

कस्याधिकारलोभो न्यूनीकरणं तिरस्करणम्।
कथमेषामधिकारो वृद्धिं गच्छेत नित्यमयम्।।७८३४।।

यतस्ततः संकुचिता एते श्वानोऽपि युद्ध्यन्ति।
स्वस्वाधिकाररक्षां कुर्वन्तो धावमाना वा।।७८३५।।

अधिकारो वर्धिष्णुर्भोभूयान्न प्रहाणिः स्यात्।
एतेन साधितेन तु तास्ता धाराः प्रवाहिता जाताः।।७८३६।।

सन्त्येवैते सर्वे ह्यधिकारा दोषसंयुक्ताः।
वृद्धिर्जायत एव च कः संकोचोऽधिकारेऽस्ति।।७८३७।।

सन्त्येवैते सर्वे ह्यधिकारा दोषसंयुक्ताः।
दोषोन्मुक्तदशायामधिकारस्यैव हानिः स्यात्।।७८३८।।

तेनैव त्वधिकारा संघर्षान्नूनमाह्वयन्त्येव।
यद्वा प्रकृतिरियं सा तत्रत्या यो हि संघर्षः।।७८३९।।

ते लघुभूताः परमा निम्नत्वे जायमाना वा।
परमोच्चानधिकारान्नो वा सोढुं प्रगल्भन्ते।।७८४०।।

अधिकारारूढत्वे केवलमेषां परा दृष्टिः।
द्रव्याऽकर्षणविद्याविषये संजागरूकैव।।७८४१।।

अधिकाराणामेषां हेयत्वापादिका चर्चा।
सर्वत्रैवाऽचरिता अधिकारान्न प्रदूषयति।।७८४२।।

अधिकारे सम्प्राप्ते शत्रौ मित्रे च बन्धुवर्गे च।
नापकृतं नोपकृतं न सत्कृतं किं कृतं तेन।।७८४३।।

संख्यायां यत्र पुनर्द्धितीयता वै विराजमानाऽस्ते।
तादृग्धनसंग्रहणेऽधिकारभाषा प्रयुज्यते सर्वा।।७८४४।।

जनगणसंरचनायां ते ते दोषा विराजन्ते।
पुनरपि स्वातन्त्र्याणामनुभवरूपं तु सर्वरमणीयम्।।७८४५।।

भूलोकवासनानामधिकारे सम्प्रसक्तानाम्।
विद्रोहेऽभिरुचिः स्यात्तेषां येषां विशोषणं जातम्।।७८४६।।

न्यायालयाश्च ते ते दोषाणां दूरणायैव।
ये सम्यक् संघटितास्तेष्वपि दोषाः प्रसज्यन्ते।।७८४७।।

संसारे विपरीताः संयुक्ता वाऽपि येऽधिकाराः स्युः।
सर्वेषामपि तेषामीश्वरपूजैव केवलं शरणम्।।७८४८।।

मनसि वचसि कार्येष्वपि येयं समता समादिष्टा।
योगेन तेन युक्तो ह्यधिकारेषु प्रसन्नः स्यात्।।७८४९।।

जनतन्त्रात्मकशासनपद्धतिरेषा समृद्धिमयी।
यद्यधिकाराः सर्वे समतायां योजिता वा स्युः।।७८५०।।

सर्वत्रैवाऽस्त्यथवा ह्यधिकारक्षेत्रमास्तीर्णम्।
अधिकारेण विहीना नो केचिन्मानवा दृष्टाः।।७८५१।।

जीवितुमस्त्यधिकारः सर्वेषां मानवानां वा।
लेखनभाषणरुचयः सर्वेषामेव भिन्नाः स्युः।।७८५२।।

जीवन्तु श्रीमन्तोऽन्यानपि वा जीवितुं प्रयच्छन्तु।
सैषाऽधिकारसरणिः सर्वेषां मोददात्री स्यात्।।७८५३।।

अधिकारः कर्तव्यः स्वाभाविक एव वाऽधिकारोऽयम्।
जन्म यदा वै जातं तदैव जातोऽधिकारोऽपि।।७८५४।।

यावज्जन्म प्रचलत्यधिकारोऽनन्तरूपेषु।
मरणोत्तरमपि तु चलत्यधिकारोऽयं स्ववंश्येषु।।७८५५।।

अधिकारोऽयं प्रणमति चरणस्पर्शेष्वधीकारः।
नम्रतरोद्योतानां प्रियः प्रियः कामरूपश्च।।७८५६।।

प्रेम्णापूरितरूपाऽधिकारसंसारसंचरणशीलाः ।
जगद्गुरुत्वाऽलपिताऽशेषावेशाः सुशोभन्ते।।७८५७।।

आधाराऽधेयानामधिकाराराधितानां वा।
पुण्योपार्जितविश्वेष्वधिकाराणां स्थितिर्मान्या।।७८५८।।

२१८.भगवान् बुद्धः

भगवन्तं सर्वज्ञं बुद्धं करुणाभिरापूर्णम्।
मानवताविस्तारं संसारेषु प्रकाशमयकुंजम्।।७८५९।।

विज्ञानमयं विभवं प्रत्यक्षीकृत्य तेनैव।
जनतासु तद्वितीर्णं विपुलः कालोऽपि धन्यतां नीतः।।७८६०।।

भगवान् बुद्धः शुद्धः सम्पूर्णः सत्परामर्श-
दाता सद्गुरुवर्यः संसारं भूषयाञ्चक्रे।।७८६१।।

भ्रान्त्या प्रदग्ध-कायानेतान् क्लेशाश्रुभिर्व्याप्तान्।
लोकान्दीनान्ज्ञात्वा लोकोद्धारे मतिं चक्रे।।७८६२।।

ज्वलदङ्गर-प्रतिमा तथाऽपि शान्ताऽन्तरा सदा मूर्तिः।
संसारे देशेऽस्मिन्स्तथा विदेशेषु दृश्यतां निखिला।।७८६३।।

अयमेव बुद्धभगवान् भारतसीमानमुल्लङ्घ्य।
स्वीयानमृतमयानथ दिव्यानुपदेशभावान्वा।।७८६४।।

पर्वतसमुद्रमालामुल्लङ्घ्यान्येषु देशेषु-।
सम्प्रेषयन् विजयते कृतकृत्यास्तेन सर्वे स्युः।।७८६५।।

स्वात्मज्योतिश्चिन्वन् समाधिधाराभरैः पूर्णः।
वैराग्यपूर्णनिष्ठो बुद्धो भगवान् समायातः।।७८६६।।

मोहान्धकारपटलीविलोपदक्षां मतिं समास्थाय।
सर्वैश्वर्य-निधानो लोकोद्धारे मतिं चक्रे।।७८६७।।

राजानो विद्वान्सो विचारकाः सत्परामर्शैः।
सम्यक् पूजितविश्वास्तस्यैवासन्वशंवदा नित्यम्।।७८६८।।

जीवनदुःखं मूलत उन्मूलयितुं कृतप्रतिज्ञोऽसौ।
भगवान् बुद्धः सिद्धः साधयितुं चेष्टते सर्वान्।।७८६९।।

नानाजन्मसहस्रैरासादितमस्ति यत्पुण्यम्-।
बुद्धविचाराऽवाप्तिस्तस्यैवाऽसादितं फलं सुभगम्।।७८७०।।

ज्ञानं यत्तज्ज्योतीरूपं नो वीर्यहीनं तत्।
आसादितेन तेन तु जीवनसाफल्यशान्तिरायाता।।७८७१।।

तादृशविज्ञानस्य च सम्प्राप्तिर्नो तथा सरला।
संधारयितुं शक्या सर्वस्वं तत्र हातव्यम्।।७८७२।।

भौतिकताया आत्मनि लीनाऽवस्थां समाधिसंस्कारे-।
सम्यक्संपश्यन्तो संख्यावन्तः स्वयं बुद्धाः।।७८७३।।

तदिदं शुभ्रं दिव्यं स्वस्थं विद्वत्सु विज्ञानम्।
येनासादितविभवा रोमाञ्चाः संचरन्ति संकाये।।७८७४।।

परमानन्दनिमग्नं त्वां सन्द्रष्टुं समायाताः।
निखिलविश्वसन्मण्डलमध्यस्था ये विचारपरिपूर्णाः।।७८७५।।

आध्यात्मिकसंसारे त्वेते ह्यधिकारिरूपाणाम्।
सर्वेश्वरस्य तावन्म्रदिमानं दिव्यमाह्वयन्त्येव।।७८७६।।

बुद्धानां या भाषा या वा व्यवहारसंचये शैली।
गीतायां सर्वा सा विभूतिमयता समाम्नाता।।७८७७।।

गीता मया न पठिता नाऽहंज्ञाताऽस्मि गीतायाः।
गीतेयं तु मदीयान्प्राणान्मामर्पयति नित्यम्।।७८७८।।

बुद्धस्य वचनजातं सम्यङ् नो संश्रुतं मयका।
नित्यं यत्तत्पुनरपि मदीयपार्श्वे सदा जातम्।।७८७९।।

बौद्धास्त्यजन्तु सर्वं श्रीमता बुद्धदेवेन।
बौद्धानामाचराः सर्वे शब्देषु, सन्दिष्टाः।।७८८०।।

बुद्धस्य भगवतोऽयं महिमा तद्दिष्टधर्मेण।
बौद्धेतिनाम धृत्वा विख्यातः पूर्णरूपेण।।७८८१।।

संसारे देशानां ध्यानाकर्षणनिमज्जनोत्सर्गे।
नीताः सर्वे भक्तिं यद्यप्येते न कुर्युस्तत्।।७८८२।।

धर्माचरण-सरलता समर्पिता बुद्धदेवेन।
चेतो निर्मलतायां सारल्यं नित्यमाकूतम्।।७८८३।।

चेतो निर्मलतायामानन्दाऽनुभववेलायाम्।
लोकोपकारबुद्ध्या बुद्धिः स्वात्मनि निषेधयामास।।७८८४।।

अज्ञानावृतकाया जीवाः सर्वे प्रतप्तसर्वाशाः।
पर्याऽवरणाऽक्रान्ता दुःखसहस्रैः प्रपीड्यन्ते।।७८८५।।

सर्वं दृष्ट्वा ज्ञात्वा स्वीयं सामर्थ्यमाध्याय।
रागात्मिकां तु नौकां वैराग्यनदे विसर्जयामास।।७८८६।।

आकर्षणसंकोचे रागः सीमाहीनं हि तद्दिव्यम्।
प्रेमाऽमृतं प्रभवितुं संसिद्धं सर्वमान्यानाम्।।७८८७।।

सर्वजनानां निकटे गमनं श्रीबुद्धदेवस्य।
सर्वसौख्य-सम्पूर्णान्प्रासादान्सम्परित्यज्य ।।७८८८।।

रागत्यागप्रेमप्रधानं तस्य दर्शयति।
लोकस्य सकलपीडापरिणामः प्रकटितो जातः।।७८८९।।

साक्षादनुभवसिद्धं वाक्यं बुद्धस्य सिद्धस्य।
एकीकृतस्वरूपं त्रिपिटकनाम्ना समादृतं निखिलैः।।७८९०।।

वेदत्रयी प्रथायां त्रिपिटकरूपेण निर्मितिः सैषा।
बौद्धाऽनुयायिवर्गे संजातावेदवन्मान्या।।७८९१।।

सरलं प्रकाशपूर्णं तदिदं वाक्यात्मकं ज्योतिः।
सच्छिष्यानासाद्य प्रकाशितं सर्वलोकेषु।।७८९२।।

लोकोत्तरप्रभावाऽपूर्णं बुद्धस्य व्यक्तित्वम्।
सर्वान् राज्ञो विदुषश्चाचार्यानाह्वयामास।।७८९३।।

नो शास्त्रार्थविचारो संग्रामास्तेन वा रचिताः।
भ्रान्ताः सर्वे ते ते भ्रमणं कुर्वन्ति किं कुर्युः।।७८९४।।

सैषा करुणापूर्णा सिद्धा सर्वा सुसंस्थितिर्बुद्धे-
भगवद्रूपं तस्य तु सर्वत्रोद्घोषयामास।।७८९५।।

तस्मिन्विशाल-हृदये दयासमुद्रं तरङ्गितं दृष्ट्वा।
मनुजेतरा अपि सदा सन्तुष्टाः स्वां स्थितिं चक्रुः।।७८९६।।

जडचेतनसंकाये संव्याप्ता बुद्धकरुणेयम्।
निखिलां पृथ्वीमन्तर्निबद्धभावे समाह्वयते।।७८९७।।

बुद्धविचाराऽवाप्तिर्जीवनधारोर्ध्वसंचारः ।
कालिकसत्ताऽतीतः सत्कीर्त्यासनविराजितो बुद्धः।।७८९८।।

कविकुलशेखरमणिना श्रीभदन्ताऽश्वघोषेण-
दिव्यमहाकाव्यनामाधारः स्थापितो बुद्धे।।७८९९।।

भगवद्बुद्धचरित्रे स्वीयां वाङ्निर्झरीं धन्याम्।
संचारयन्महाकविरसमां सृष्टिं समातनुते।।७९००।।

यज्ञेष्वथ युद्धेष्वपि हिंसायास्ताण्डवं दृष्ट्वा।
बुद्धेन किल भगवताऽहिंसा सर्वोत्तमोद्घुष्टा।।७९०१।।

मैत्री करुणा मुदिता भावानां वा परीवाहम्।
भगवति बुद्धे श्रद्धां बद्धुं विवशीचकार लोकज्ञान्।।७९०२।।

राजानः कति जाताः कश्चिद् बुद्धो न संजातः।
कालगतेः परिवर्तनसामर्थ्यं यत्र विश्वस्तम्।।७९०३।।

जीवनदानप्रगुणितसंदेशानां समाहर्ता।
करुणा जीवनिकायो बुद्धः शुद्धः सदा वन्द्यः।।७९०४।।

देवैरपि नाऽऽवाप्तुं शक्या सा काऽपि परिपाटी।
भगवद्बुद्धोन्मेषप्रवणायामभयमुद्रायाम् ।।७९०५।।

मानवतासाम्राज्याऽविष्कारः कोऽपि बुद्धस्य।
जीवननवसंचारे समग्रदृष्टिं समालभते।।७९०६।।

यत्सविधे सर्वेषां लोकानां पूर्वजन्मनां गाथाः।
साकारा दृश्यन्ते कस्तं द्रष्टुं समुत्सुको न स्यात्।।७९०७।।

नायं ज्योतिर्विद्याप्रवणः कश्चिद् भविष्यसद्वक्ता।
नूनमयं बहिरन्तः साक्षात्कर्ता क्षणस्य निखिलस्य।।७९०८।।

बुद्धाऽवतरणकालोद्भासनविभवादनन्तरं यदिदम्।
साहित्यं संरचितं बुद्धः सर्वत्र विद्यते तेषु।।७९०९।।

बुद्धचरित्रं श्रुत्वा चित्रे बुद्धस्य दर्शनं कृत्वा।
मूर्तीनां दिव्यानां भव्योत्सवदर्शनानि सम्प्राप्य।।७९११।।

बौद्धसमाजे गत्वा तेषामेषां गतिं ध्यात्वा।
सुबहुमान्यता चेतस्याऽविर्भूता विभूतिसंभूषा।।७९११।।

दिव्याऽवदानगाथासहस्रसंक्षालिताऽन्तरङ्गकालुष्यः ।
नायकतामुपयातो भगवान्बुद्धो विभूतिसंभूतिः।।७९१२।।

निखिला प्रेमप्रवणा प्रेरणभावे समारूढा।
मानसरचनामयता संसारे बुद्धमूर्तिर्नः।।७९१३।।

कामं विवदन्तुतरामुपदेशार्थागमे धीराः।
बुद्धस्य काऽपि करुणा समाह्वयन्ती चिराज्जयति।।७९१४।।

ईश्वर एव स भगवान्बुद्धे रूपे प्रकट एव।
सर्वस्मिन्नथ विश्वे बुद्धत्वं सर्वथा जातम्।।७९१५।।

नानाऽमृतोपदेशैः प्रभावभाषास्वरैः प्रसन्नास्यैः।
सर्ववशीकृतभावे समागतो जीवलोकोऽयम्।।७९१६।।

यदि पाखण्डनिकायेऽसुरसंवासैः परिव्याप्ते।
कोऽपि विरोध विभावो न प्रकटः स्यात् तदा कथं ज्ञानम्।७९१७।

लोकस्य जायतां वा यदेश साक्षाज्जगन्नियन्तैव।
रूपेऽस्मिन्नुद्धर्तुं करुणापूर्णः समायातः।।७९१८।।

भगवति बुद्धे भक्तिः शरणग्रहणाय लोकेषु।
विचरन्ती भुवनानामाभोगान् पावयति नित्यम्।।७९१९।।

सच्चारित्र्याऽऽव्याप्तिः सारो बुद्धोपदेशानम्।
चारित्र्याख्यं ज्योतिः संसारं निर्मलं कुरुते।।७९२०।।

योग-समाधिसमेधितसंसाधितसर्वसाम्राज्ये ।
सर्वेषां सन्तोषे हृदयस्थितमेव बुद्धत्वम्।।७९२१।।

योगसमाधिनिमग्ना बौद्धा स्तेऽतिब्बतोद्देशे।
स्वीयशरीरेणैवायुर्वर्धनसंयमनशीलाः ।।७९२२।।

बुद्धं त्वतिशयशुद्धं समृद्धिसारं विनाशकं तमसाम्।
साम्राज्यानां रक्षकरूपे सद्रूपमापन्नम्।।७९२३।।

एकं लोकोत्तरतामुपागतं दिव्यदिव्याभम्।
ध्यायन्स्तुवन्नमस्यन्जनो जनो दिव्यतामेति।।७९२४।।

बुद्धो युद्धानामयमासीद्वा सर्वथा निषेद्धा वा।
संसारे ननु मैत्रीः सत्याऽहिंसासमुपदेष्टा।।७९२५।।

जन्ममरणदुःखानां क्लेशानां दूरतां कृत्वा।
बुद्धत्वं लोकानां सम्प्रापयिता समाख्यातः।।७९२६।।

नो तत्राऽऽसीत्काचित् त्रुटिः प्रभुत्वस्य वा सीमा।
निखिलोऽयं संसारस्तस्य विभूतौ वशंवदो जातः।।७९२७।।

वर्णाश्रमनिरतानां लोकानां रूढरूपाणाम्।
प्रतिषेद्धा कश्चिदयं बुद्धो भगवान् समीक्षितः सर्वैः।।७९२८।।

वैराग्यत्यागानां क्लेशविशेषप्रकल्पानाम्।
कष्टानि च संसोढुं तस्याऽऽसीद् वीरसंभूतिः।।७९२९।।

श्रीरामचन्द्रभगवान् सूर्ये वंशे समुत्पन्नः।
श्रीकृष्णोऽपि क्षत्रियरूपं वर्णं समानीतः।।७९३०।।

बुद्धः क्षत्रियवर्णं धन्यं कर्तुं पुनर्निखिलम्।
संसारे सर्वत्राऽऽस्वादितविभवाऽन्वितो जातः।।७९३१।।

बुद्धो भगवान्नतमां भारतवर्षाद् बहिर्यातः।
किन्तु तदीयाः सर्वे यान्ति नितान्तं सदुपदेशाः।।७९३२।।

सम्राड़शोककालेऽजातशत्रुबिम्बिसारकाले वा।
राज्याश्रयभूतास्ते बुद्धस्यासन् सदुपदेशाः।।७९३३।।

वर्णानां जातीनां, जन्मनि जन्मनि गृहीतानाम्।
जन्मन्यस्मिन् कश्चन् परमो लाभः समायातः।।७९३४।।

यत्र हि बुद्धो भगवान् रूपे रूपे स्वरूपेषु।
चित्रे मूर्तौ स्थाने मठे विहारे समवतीर्णः।।७९३५।।

साधकनवसरणीनां कोऽपि सुयोगः समामिलितः।
बौद्धं तन्त्रं किञ्चिद्विकासभाषां समालपति।।७९३६।।

एषा काऽपि विराजति क्रियात्मिका नित्यसंसृष्टिः।
या हि विचारान्सर्वान्मूर्तत्वे नूनमाह्वयते।।७९३७।।

सेयं मूर्तीभूता विचारसरणिस्तु बुद्धस्य।
सर्वजनं स्वात्मीयं कर्तुं सर्वत्र संक्रान्ता।।७९३८।।

अन्येषामपि तेषां वैदिकतायां प्रतिष्ठितानां वा।
आचार्याणां काचिन्मर्यादाऽसीत्तु वैदिके देशे।।७९३९।।

वेदानां या वार्ता सा मर्यादां पुरस्कृत्य।
प्रवहतितमां समाजे धर्मं कर्म च समवबोद्धुम्।।७९४०।।

किन्तु स भगवान् बुद्धो ज्ञाने सर्वान्वशीकुरुते।
उपदेशानां श्रवणे नो वाऽस्ते काऽपि मर्यादा।।७९४१।।

बुद्धस्य भगवतः सा वाणी ते ते सदुपदेशाः।
आध्यात्मिकसंसारे नव्यं रूपं विधारयन्त्येते।।७९४२।।

बुद्धो भगवान् पीडितजनसंपीडां हरन् भाति।
विश्वपरित्राणाय हि स्वात्मानं सर्वदा क्लिश्यन्।।७९४३।।

सुप्रसन्नचरितानां बुद्धानां वाक्यविस्तारैः।
सर्वा धरणी सैषा विलसति काव्यात्मके जगति।।७९४४।।

जयति सदा कवि वर्योऽश्वघोष इत्याख्यया लसितः।
तस्याऽमरवाणीनां बुद्धे वैपुल्यमायातम्।।७९४५।।

निखिलेयं मानवता धन्या बुद्धं समासाद्य।
विश्वस्मिन्नेतस्मिन्प्रणाममाला समुल्लसिताः।।७९४६।।

बुद्धे युद्धविरामे विलसन्तितमामगाधसन्देशाः।
राज्ञामपि सर्वेषां मानसमुन्माथयाञ्चक्रे।।७९४७।।

गणतन्त्रात्मकशासनपद्धतिरेषा हि बुद्धवरदानम्।
बुद्धोपदेशकाले प्रथमे गणराज्यतां याताः।।७९४८।।

विश्वस्मिन्नतिघूर्णनसंजातां तां भ्रमिं शान्ताम्।
कर्तुं स्वीकरणीयाः सन्धार्यास्ते सदुपदेशाः।।७९४९।।

शौद्धोदनिः स देयात्परमसमृद्धिं समस्तेभ्यः।
भक्तवृन्दसेवाया समर्पिताऽशेषवित्तेभ्यः।।७९५०।।

अष्टदशद्वीपः

२१९.परिक्रमा

क्रमुपादक्षेपेति प्रकथ्यमानेऽपि परितो या।
विधिपूर्वकमेवाऽस्ते परिक्रमा सैव सम्मान्या।।७९५१।।

भगवन्मन्दिरमूर्तेः परितो यश्चङ्क्रमणभावः।
सैषा सर्वा काचिद्विशुद्धा रूपा परिक्रमा दिव्या।।७९५२।।

सेऽयमस्ति काचिद्वाऽभिव्यक्तिर्भक्तिभावानाम्।
परिक्रमा पुनरेषा सञ्चालयतेऽथ सुस्वास्थ्यम्।।७९५३।।

अभितो यत्सञ्चरणं करौ निजौ सम्पुटीकृत्य।
भक्ते धाराबद्धं मानसिकं प्रोन्नतं विश्वम्।।७९५४।।

पर्यङ्कपंक्तिरेषा कथयन्ती वाऽखिलं तत्त्वम्।
परिक्रमायां मधुमयमेवास्तां स्वस्वरूपेषु।।७९५५।।

रसपरिपन्थिप्रवणं वीरं तं वा समालोक्य।
तस्याऽपि या परिक्रमसरणिःसा गर्हणीया मे।।७९५६।।

आचारान्वितकायान्सच्चरितान्या समालोच्य।
दिव्यपरिक्रममाला सम्पाद्या या मनोहरताम्।।७९५७।।

आशाऽसादितवैभवविक्रान्तानां विशालसम्पत्तिः।
कोशाऽगारेष्वधिकामधिकां तां तां परिक्रमां सूते।।७९५८।।

पर्यन्तपातितानां तेषां का वा परिक्रमाऽपि स्यात्।
अन्धत्वे संपातैर्यैः पन्था एव दूषितो निखिलः।।७९५९।।

नव्यग्रन्थविलेखनकर्मण्यपि ये समासीना।
प्राचीनग्रन्थानां परिक्रमा तैरपि क्रियते।।७९६०।।

किन्तु विहाररसिकता चैषां सम्यक् समीचीना।
उच्चाधिकारपूर्णे जनस्य गेहे परिक्रमा तेषाम्।।७९६१।।

तेषां कुक्कुरतोऽपि च कर्त्तव्या चाटुतारीतिः।
स्वेष्टानां लाभानां सम्प्राप्तौ स्यात्परिक्रमा सेयम्।।७९६२।।

जीवन्तोऽपि तथैते सर्वे चङ्क्रमणसंसिद्धाः।
येषां परिक्रमायां सर्वो लोकः सुखी भवति।।७९६३।।

निर्याताऽयातमुखी येषां सर्वा परिक्रमा जाता।
ते ससुखं सेवन्ते संसारे सर्वसन्दोहान्।।७९६४।।

दिवसागमश्च सायं काचिद् गाथाप्रथाऽवसानीया।
पुनरपि शयने शोधः परिक्रमा कापि नित्यमियम्।।७९६५।।

प्रणयः कलहोद्देश्यैरामृष्टो भाति संवेगैः।
पुनरपि सैषा कट्व्यपि मिष्टा भासा परिक्रमा कथिता।।७९६६।।

यात्राप्रारम्भे वा यात्रायाः परिसमाप्तौ वा।
तत्सर्वं सञ्जातं परिक्रमायां समाचर्यम्।।७९६७।।

यशसामम्युपलब्धौ कश्चिद्वाऽयं विशेषविन्यासः।
काचिच्च सा पराक्रममयसरणिर्वा परिक्रमते।।७९६८।।

अन्यार्थेऽप्युपयुक्ते विशेष एषोऽथ विज्ञेयः।
स्वार्थे तस्य समाप्तिः परिक्रमा तत्र परिपूर्णा।।७९६९।।

आकाशस्था सेयं काचिद्वाऽस्ते परिक्रमा रम्या।
यस्यां दूरे संस्था अपि सामीप्ये समाभान्ति।।७९७०।।

नानाविधता सेयं परिक्रमाणां च तासां वा।
पुनरपि पुनरपि पुनरपि करणे सा साधुता जाता।।७९७१।।

यद्यपि सर्वेषां नो परिक्रमाप्याचरितुमपि शक्या।
किन्तु बौद्धिकी सेयं मानसिकी वा परिक्रमा सुलभा।।७९७२।।

तस्या महत्त्वकथने का वा भाषा विरचनीया।
अहोस्वित्तु प्रणामाः समर्पणीयाः परिक्रमायां ते।।७९७३।।

नानाविधप्रभावैः परिष्कृतेष्वेषु पुरुषेषु।
नानाविधैव नित्यं परिक्रमा चाप्युपास्यते तैस्तैः।।७९७४।।

यानं यदि ते वाञ्छन्त्यथ यानेनैव तेषां स्यात्।
परिक्रमाणां तोषः सोऽसौ साधारणो धर्मः।।७९७५।।

इष्टमनसि यज्जातं तत्पूरयितव्यमेव मुख्यत्वे।
नो चेदिष्टफलानां सम्प्राप्तिर्दूरतो यायात्।।७९७६।।

घटनावलिश्च येयं मुद्रितरूपेषु संगता पुरतः।
काचित्परिक्रमा सा पुरतः पूर्वं समादिष्टा।।७९७७।।

अर्थोपार्जकाले येयं काचित्परिक्रमा क्रियते।
तस्यामेतस्यां खल्वायतिरेव प्रतिष्ठिता जाता।।७९७८।।

नवयुगनवविस्फोटैर्नाना परिदृश्यतां याते।
नव्या परिक्रमाऽपि तु संकोचैरेव निर्ध्याता।।७९७९।।

त्वं नेत्रोत्सवभूता भवसि नितान्तं हृदिस्थाऽपि।
हृदये तवैव नित्यं ज्ञाताऽज्ञाता परिक्रमा चलति।।७९८०।।

प्राणेभ्योऽपि गरीयसि करणीयेऽस्मिन्समाज्ञप्ते।
मयाऽपि संस्करणीयं सर्वमिदं स्यात्परिक्रमाकाले।।७९८१।।

अथ यदि नित्यमियं स्यात्सन्तोषेणैव सोत्साहम्।
अध्ययनमननचिन्तनपरिक्रमा सर्वकमनीया।।७९८२।।

आस्ते सैषा दिव्या दिव्यतमा वाऽथ दिव्यतरा।
दिव्याऽप्यद्य तु नो वाऽवशेषभावे परिक्रमा गणिता।।७९८३।।

गङ्गानिकटतटेऽस्मिन्परिक्रमा या समारचिता।
देवानामपि सेवा तेन सुयत्नेन सञ्जाता।।७९८४।।

अथवैवं सति कामं विक्रमतायां प्रजातायाम्।
क्रमसंगेऽपि सकामा परिक्रमा वा कुतो न स्यात्।।७९८५।।

या विद्यते पुरस्तात्सा भवतीहैव परितुष्टा।
येयं परोक्षविधया संपठिता सा परिक्रमाऽन्यैव।।७९८६।।

अद्यत्वदर्शनानां मर्यादाभङ्ग आयाते।
जाते दर्शनलोपे क्वाऽऽस्तामस्मत्परिक्रमा काले।।७९८७।।

सत्याग्रहेऽपि सेयं नित्यं जाता परिक्रमा शेषे।
कुत्र किमन्वेष्टव्यमित्यासीत्प्रेरणा निखिला।।७९८८।।

ऋतुपरिवर्तनकाले वातानां वा कफादिपित्तानाम्।
शारीरिकसंस्थाने परिक्रमा काऽपि विषमेयम्।।७९८९।।

व्यापारोच्चावचता नाऽद्यत्वे सा विशालैव।
तस्यामपि सोल्लासं द्रष्टव्या सा परिक्रमा शैली।।७९९०।।

संशयरहितमुदाऽस्ते कामानां पूरणे काचित्।
परिक्रमा सन्तोषैराच्छादितसर्वमाधुर्या।।७९९१।।

यद्यंशतोऽपि जाता परिक्रमा तेषु शिष्टेषु।
ते ननु तां मन्वाना बहुतरमेवाऽदिशन्ति किल सर्वम्।।७९९२।।

मृत्युक्रोडे वेशे योऽयं निकटः समृद्धसत्पुरुषः।
दाहात्पूर्वं तस्य त्वन्तिमकाले परिक्रमा जाता।।७९९३।।

जपकाले मालाया संख्यानेषु प्रसक्तेषु।
काचित्परिक्रमेयं कामानाह्वाययन्तीव।।७९९४।।

तेषामथ तेषामपि ये चैते कोणसंस्थानाः।
ये सम्मुखे स्थिता वा तेषामथवा परिक्रमा कार्या।।७९९५।।

आपाततस्तु सर्वं शोभनरूपं विभासमानं स्यात्।
किन्तु विशेषविचारे काचित्सा वै परिक्रमा कार्या।।७९९६।।

स्थूलं सूक्ष्मं कारणमाभात्यथ देहसद्रूपम्।
गुणत्रयाणां प्रतिनिधिभूतेष्वेषा परिक्रमा जाता।।७९९७।।

भासीकृतदुरवस्थासंस्थानैः स्तंभिते देशे।
परिक्रमैव तु शरणं मर्माणां स्फोरणे जाते।।७९९८।।

दक्षिणभारतमन्दिरदर्शनकालेषु दिव्येषु।
तत्र च विशालतायां परिक्रमा चापि सुविशाला।।७९९९।।

काश्यां पञ्चक्रोश्याः परिक्रमा पुण्यमासूते।
नाना समूहरूपे सम्पाद्या सा परिक्रमा रुचिरा।।८०००।।

चतुरशीतिक्रोशानां व्रजभूमौ सा परिक्रमा जाता।
भक्तगणा अपि चैते तत्र तु नितरां प्रगल्भन्ते।।८००१।।

परिक्रमेण सर्वा चाविर्भावैस्तिरोभावैः।
पुनरप्याऽविर्भावैः पुरनप्यथवा तिरोभावैः।।८००२।।

न्यायालयवाक्कलहे वाक्कीलानां परिक्रमा सा सा।
सर्वस्या अपि तस्या मर्यादाया निरूपणं कुरुते।।८००३।।

पृथ्वीपरिक्रमा वा विज्ञैस्तैस्तैः समाचरिता।
लेखपुस्तकादीनां प्रकाशने सा समायाता।।८००४।।

सिद्धपराक्रमरूपेऽवताररसतां समासीनैः।
सिद्धा परिक्रमाऽपि तु निषेव्यते काव्यमयपुरुषैः।।८००५।।

सर्वस्याऽप्यथ नित्यं व्यवहारस्य प्रवर्तिका सेयम्।
राजनीतिरपि शुभ्रां विविधां सुविधापरिक्रमां सहते।।८००६।।

सुस्वच्छधौतवेष्टनचन्दनवन्दनमये काले।
विल्वार्यणैर्विधानैः परिक्रमा पुण्यसंचारा।।८००७।।

आविष्टमानसानामपि नित्यं सा परिक्रमा जयति।
हुं फट् स्वाहाकारे येषां प्रावीण्यमुद्घुष्टम्।।८००८।।

परिक्रमापरिपूर्तिः पूजायास्तां प्रणामोत्थाम्।
सर्वाङ्गे कुर्वाणा दिव्यामनुभूतिमातेनेः।।८००९।।

कारणमाला सेयं सौभाग्यानां प्रवर्तमानैव।
तत्रैव मध्यमणितासुपागता या परिक्रमा सैषा।।८०१०।।

परिक्रमाया महिमा परिगणनीयः परम्पराप्राप्तः।
सेयं परिक्रमाऽपि तु परिक्रमैवाऽखिला जाता।।८०११।।

आस्तामेतत्सर्वं मया तु कार्या परिक्रमैवेयम्।
यावत्काव्यविनिर्मितिपरिपूर्तिर्नो विजायेत।।८०१२।।

इयमपि काचिद्विद्या परिक्रमैवाऽखिला जाता।
सिद्धाऽक्षरमालाया आवर्तनसिद्धिरेषैव।।८०१३।।

लीला परिक्रमायां यैर्यैरेतैः समारचिता।
ते ननु परिक्रमायां लीलारूपा भवन्त्येव।।८०१४।।

अद्य प्रयातमेतेस्तैस्तत्पूर्वं प्रयातमेव ननु।
एवं विकासमयतामायाता सा परिक्रमा धन्या।।८०१५।।

छात्राणामपि जीवनमेतद्वै स्यात्परिक्रमापूर्णम्।
शब्दब्रह्मणि रूपे तेषां सैषा परिक्रमा जयति।।८०१६।।

पदपदार्थयोर्नित्यं बोध्यत्वं बोधकत्वं वा।
क्षणक्षणप्रकटाभा तयोरनाख्या परिक्रमा जाता।।८०१७।।

के ते स्युर्नो यैर्वा कदापि कुत्रापि सा सेयम्।
विन्दुमती सिन्धुनिभा जीवनकाले परिक्रमा विहिता।।८०१८।।

नाना विचाररूपा वीचय एताः समालोक्याः।
प्रज्ञासमुद्रहृदये काचित्सेयं परिक्रमा जाता।।८०१९।।

सैषाऽपि कापि नूनं परिक्रमास्याद्विचाराणाम्।
यत्रैव नित्यनिरताः सेवन्ते वा पुरातनं निखिलम्।।८०२०।।

एका ज्ञानविशेषेष्वाम्नाता सत्यतायुक्ता।
परिक्रमाऽपरिमाणा न ज्ञाता किन्तु सञ्जाता।।८०२१।।

पद्भ्यामथ संचारे सर्वा सेयं परिक्रमा जाता।
बुद्धिसागरे नित्यं वीचय एता परिक्रमन्ते वा।।८०२२।।

वैचारिकेऽथ विश्वे ये नित्यं संचरणशीलाः।
परिक्रमां कुर्वन्तो नो तृप्यन्ते परैर्यत्नैः।।८०२३।।

सर्वस्मिन्नपि विश्वे विलोक्यतां वा विचारार्थम्।
नाना विधे विचारे बाधावैषा परिक्रमायां स्यात्।।८०२४।।

यस्मात्स्थानाद्यात्रा प्रारब्धा चाऽथ तत्रैव।
भूयो गमनसुयोगे परिक्रमा कथ्यते विज्ञैः।।८०२५।।

परिक्रमाणामेषा काचिद्वै शृंखला जाता।
एतास्वेव भ्रान्त्वा चायुः सर्वं व्यतीतं हि।।८०२६।।

भ्रमिरेव संभ्रमेष्वपि विनिपातयतीति विदितं नः।
विदिताऽपि काऽपि नित्यं परिक्रमामेव केवलां सूते।।८०२७।।

परिकल्पनाप्रभावे परितो जाते समोद्यमैर्नित्यम्।
याऽराधिता नितान्तं नियतिं प्रच्छन्नतां नयति।।८०२८।।

सत्यानामपि शिखरे शिखरे काचित् परिक्रमा जाता।
येन सदैव निकामं संसारे तृप्तिरुद्भूता।।८०२९।।

अलमलमथवा नित्यं प्रियसंस्थाना परिक्रमैवेयम्।
वाञ्छितसिद्धिविभावे सिद्धीनां सर्वथाऽऽराध्या।।८०३०।।

आराध्यस्य नितान्तं वशे मदीयं मनः सर्वम्।
तत्रैव तु संवेगः परिक्रमायां प्रजायतां नाम।।८०३१।।

यद्वाऽऽराध्यस्य कृते भ्रमिः कृतेयं समस्तैव।
तस्यैव पूजया तत्सत्यं संभासतेऽखिले स्वान्ते।।८०३२।।

मान्यानामेषामपि सम्मान्या सा परिक्रमा जाता।
सर्वे विष्णुशिवेन्द्रा जगदम्बायाः परिक्रमानिरताः।।८०३३।।

परिक्रमाया येयं विनियुक्ता काऽपि परिपाटी।
तस्यामथ निष्णाताः सर्वे लोके प्रसीदन्ति।।८०३४।।

परिक्रमायां केवलमाराध्यस्यैव चिन्तनं भूयात्।
सद्यः फलं ततः स्यात्परिक्रमायां प्रपन्नायाम्।।८०३५।।

यदि फलदृष्टिर्नस्यात्परिक्रमायां कृतायां वा।
संसारेष्वपि दृष्टिर्नस्यात्सा केवले राध्ये।।८०३६।।

ततस्तु सर्वविधीनां परिपाके वाऽथ सम्प्राप्ते।
सद्यो विमुक्तिमयता परिक्रमा स्थयिनी भूयात्।।८०३७।।

पूजाक्रमसंधाने सर्वाऽन्ते या परिक्रमा विहिता।
पूजास्वीकरणार्थं सैषा सर्वा समर्पणाकाङ्क्षा।।८०३८।।

सद्योजातविनिर्मितविघटितनानान्तरङ्गसम्भूता ।
सद्यो विमुक्तिदात्री परिक्रमा माननीयैव।।८०३९।।

आराधिता नितान्तं सिद्धिविधानेषु तन्त्रेषु।
परिक्रमा सामान्यैर्भावैर्नैवाऽत्र संकथिता।।८०४०।।

सर्वेषामथ पूजानिरतानां नाऽधिकारोऽसौ।
परिक्रमायाः कथितो गुरुभिर्यो नूनमादिष्टः।।८०४१।।

गुरुरेव विजानीयादधिकारिणमेवमायान्तम्।
कुत्र यावदधिकारः संजातो वा स एव जानाति।।८०४२।।

अत एव सर्वयत्नैः श्रीगुरुरेवाऽथ संसेव्यः।
तस्य च पूजा कार्या तत्रैवैषा परिक्रमा कार्या।।८०४३।।

गुरौ प्रसन्ने जाते सर्वं सर्वत्र सम्प्राप्तम्।
जानीयादिति नूनं निश्चयभावः समायाति।।८०४४।।

नाना विधानसिद्धाः सर्वत्रैव स्थिता गुरवः।
तेषां प्रवचनमाला सद्ग्रन्थेषु स्थिता भान्ति।।८०४५।।

तासामथ वाणीनां परिक्रमा सा यदा कदापि स्यात्।
नूनं विनोदमयता यदा तदैव प्रसन्ना स्यात्।।८०४६।।

भारतसंस्कृतिचित्रं येषां सर्वं प्रतिष्ठितं जातम्।
परिक्रमायास्तात्वं तेषां हृदयेषु जागर्ति।।८०४७।।

सत्यब्रह्मणि निखिला भावाभिव्यक्तिरमणीया।
परिक्रमाया रूपे प्रमुदितसाराः समाचाराः।।८०४८।।

श्रीविष्णोःपरमं पदमतेत्स्थानं समासाद्य।
प्रगुणा परिक्रमेयं संसाध्या सर्वतो यत्नैः।।८०४९।।

सर्वे ते ते पूज्याः संसारे माननीया वा।
नित्यं प्रणाममाला परिक्रमाभिश्च पूज्यतां याताः।।८०५०।।

२२०.सम्बन्धः

सम्बन्धकाव्यमेतन्मयका प्रारभ्यते तावत्।
यत्र तु सम्बन्धाख्यं तत्त्वमिदं रूपणीयं स्यात्।।८०५१।।

द्वावनिवार्यौ स्यातां सम्बन्धोत्पादने पुंसाम्।
न्यूनातिन्यूनेयं संख्या तत्रापि निर्ध्येया।।८०५२।।

एकस्मादधिकानां सम्बन्धोऽयं त्वनिर्बाधः।
द्वैतस्यैवाऽभावे ह्येकस्मिन्नेव नाऽस्ति सम्बन्धः।।८०५३।।

अत एव ग्रन्थेषु च सम्बन्धानां द्विनिष्ठत्वम्।
घोषितमास्ते नित्यमेकाधिकमद्धि द्वित्वं स्यात्।।८०५४।।

एकोऽहं तु बहुस्यामित्यकारा यदेच्छेयम्।
संजाता परतत्त्वे तदैव सम्बन्धसंस्थितिर्जाता।।८०५५।।

कुत्रचिदेको द्वौ वा त्रयोऽथवा स्युश्च सम्बन्धाः।
तन्निष्ठगणनिका सैषा निरूपणे रूपमादत्ते।।८०५६।।

यदा वयं विश्वस्मिन् विलोकयामोऽथ सम्बन्धान्।
नूनं तदा तु सम्बन्धानां गणनैव दुश्शका जाता।।८०५७।।

संसारोऽयमसीमः कस्याऽस्ते कुत्र सम्बन्धः।
किं रूपो वा सोऽयं कथमेतद्वा निरूपणीयं स्यात्।।८०५८।।

एकैकस्यापि यदा सम्बन्धस्यादिमा भूतिः।
अन्वेषणविधया वा गवेष्यते भासिता सा स्यात्।।८०५९।।

अद्यापि चाऽत्र विश्वे ये सम्बन्धा विलोक्यन्ते।
तेषां लक्षणकरणे विफलाःस्युस्तार्किकास्ते ते।।८०६०।।

सम्बन्धमन्तरा वा नो कार्यं कस्यचिच्चलति।
सर्वस्मिन्व्यवहारे सम्बन्धोऽयं परं शरणम्।।८०६१।।

एष ममाऽयं नाऽयं मम एष सम्बन्धः।
सामान्यो भवति महाभाग्यैः परिपूरितश्चायम्।।८०६२।।

सम्बन्धस्य महिम्ना त्वैकस्यैवाथ पुरुषस्य।
नानात्वं सञ्जातं को वा सम्बन्धमहिमा स्यात्।।८०६३।।

गुरुरहमहं च शिष्यः पिताऽहमस्मीति पुत्रोऽहम्।
श्यालः श्वसुरश्चाहं पतिः पुरोधा च नित्यमहम्।।८०६४।।

अध्यापकोऽस्मि तावच्छात्रोऽप्यहमस्मि नित्यमेव ननु।
यन्ता गन्ता चाऽहं तेषामहमस्मि मित्रं हि।।८०६५।।

एतेषां शत्रुरहं पत्रं सम्पादयामि नित्यमहम्।
लेखनभाषणकर्ताभावे संस्थापितश्चाहम्।।८०६६।।

एतादृशा हि शतशो भङ्गिमभावाऽभिरामरमणीयाः।
एकस्मिन्नेव भवन्त्यखिलास्ते ते तु सम्बन्धाः।।८०६७।।

सम्बन्धमहिमभावे संयात्येवाऽखिले मनुजे।
सम्बन्धशब्दमाला सर्वोच्चं शिखरमामृषति।।८०६८।।

रविरयमविरततायामुज्ज्वलतायां निमज्जयति।
किरणैर्बन्धनमपि वा सम्बन्धः सर्वकमनीयः।।८०६९।।

आश्वासनसम्बन्धो वैरूप्यं वाऽपि सम्बन्धः।
सम्बन्धो वा कश्चिद् सत्यशिवं सुन्दरं वाऽपि।।८०७०।।

समवायः सम्बन्धो यद्वा समवेतसमवायः।
पुनरथ सोऽयं जातो संयुक्तः समवेतसमवायः।।८०७१।।

विशेषणानां योगे विशेषणविशेष्यभावेषु।
सम्बन्धः परिणमते व्यवहारेषु प्रदीप्तेषु।।८०७२।।

कस्मिन्नप्यथ युग्मे संगतिभावेन सम्प्राप्ते।
सम्बन्धो निर्धार्यो मनसा वाचाऽथ कायेन।।८०७३।।

सम्बन्धमात्रसारासृष्टिरियं जीवलोकस्य।
तावदेव सन्तिष्ठेद्यावत्सबन्धमाला स्यात्।।८०७४।।

प्रेमाऽख्यः सम्बन्धो मोहयते निखिलसंसारम्।
प्रेमाऽख्ये सम्बन्धे विनिबद्धः सर्वसंसारः।।८०७५।।

श्रद्धाभावसमीहितसम्बन्धैरेव विस्तीर्णा।
जगद्गुरूणामभिधा सर्वेषां सम्प्रसक्तैव।।८०७६।।

भक्तिरयं सम्बन्धो भूयोऽभिव्याप्य सन्तिष्ठेत्।
यत्रैव मनुजसत्ता तत्रैवाऽस्तेऽथ भक्तिसम्बद्धः।।८०७८।।

एकैकस्मिन्नथवा सम्बन्धेऽस्मिन्विविच्यानेऽपि।
विपुलानां काव्यानां सृष्टिः सामीप्यमायाति।।८०७९।।

सम्बन्धे सम्बन्धस्तत्राऽप्याऽस्ते सुसम्बन्धः।
सम्बधानां बन्धस्तथा मनोहारितां यातः।।८०८०।।

शिवसायुज्यमवाप्तैरास्ते ह्यद्यापि सम्बन्धः।
तेषामहं हि पुत्रः पौत्रस्तेषामहं कश्चित्।।८०८१।।

किं वा सम्बन्धानामवलिरियं सर्वतो रूपे।
यद्येकत्रीभावे संयुक्ता स्यात्तदा विपुला।।८०८२।।

एकं विराट्स्वरूपं सम्बन्धानां विभासते पुरतः।
सर्वस्मिन्संसारे निवसन्तो वै प्रजानन्ति।।८०८३।।

यैरस्माकं न कदाप्यासीत्कश्चित्तु सम्बन्धः।
ते वाऽत्यन्तं निकटैः सम्बन्धैरद्य शोभन्ते।।८०८४।।

कथयन्तु श्रीमन्तः कामपि सम्बन्धनवगाथाम्।
तत्राऽलोचनकाले सर्वे प्रगुणीकृता जाताः।।८०८५।।

तेनाऽत्रैवाऽग्रेडनमपि तावद्भूयसा जातम्।
सम्बन्धसूचकास्ते शब्दास्तत्रैव शोभन्ते।।८०८६।।

इयमस्ति भगिनिका मे पुत्रीयं पौत्ररूपोऽयम्।
गुरुरयमथवा शिष्योऽधिकारिवर्योऽयमाभाति।।८०८७।।

किञ्चित्साम्ये जातेऽप्यास्ते सम्बन्धसद्भावः।
अथ बादरायणाख्यः कश्चित्सम्बन्ध इष्यते कैश्चित्।।८०८८।।

अपि सम्बन्धे यूयं यत्रापि च यूयमेव ननु।
वयमपि तस्मिन्जाते वयमेवाऽत्र स्थितिस्तुल्या।।८०८९।।

तुल्यन्यायदुभयोः काचित्समरूपतापत्तिः।
तत्र तत्र सञ्जाता तेनाऽस्त्येवात्र सम्बन्धः।।८०९०।।

कश्चित्किञ्चिद् ब्रूतेऽन्योऽन्यन्नूनं समालपति।
प्रकृतिविकृतिसंस्कृतिनवसेवानां विलसितं सर्वम्।।८०९१।।

काचित्प्रतिकृतिरन्याऽन्यस्मात्सा काऽपि प्रतिकृतिर्दृष्टा।
आस्ते नूनं कश्चित्तत्राऽपि तु साम्यसम्बन्धः।।८०९२।।

अविरामघोषणायां स्वरमालासंप्रसक्तानाम्।
नास्ति कापि संभाषा स्वरमात्रेणैव तुष्टानाम्।।८०९३।।

संसारे सम्बन्धो नूनं तत्तत्त्वमाभाति।
यत्सर्वथा प्रधानं गौणत्वेऽन्यत्प्रतिष्ठितं निखिलम्।।८०९४।।

किं नाम विश्वरचनासंञ्चारणचातुरीप्रवृत्तानाम्।
देवानां संसारे सम्बन्धो दष्टुमपि शक्यः।।८०९५।।

अथ वैखर्यपि सेयं सम्बन्धानां हि सेवायाम्।
समुपस्थितिसद्भावे सम्बन्धोद्बोधने लग्ना।।८०९६।।

जगतां गुरवो ह्येते काले काले समुन्नता दृष्टाः।
जनजनहृदये स्वीयं गुरुत्वमास्थापयन्त्येते।।८०९७।।

गुरुशिष्यनामकोऽयं सम्बन्धः श्रेष्ठतां यातः।
परिपूतः सम्बन्धः संसारे सर्वविख्यातः।।८०९८।।

सुखयतितमां नितान्तं विमलः सम्बन्धसद्भावः।
उभयत्र नित्यतात्वं विलासभाषां समातनुते।।८०९९।।

मम तावत्सम्बन्धो याभिर्वा व्यक्तिसत्ताभिः।
ज्ञाने वाऽप्यज्ञाने जातो जातो विलोक्यते दीप्तः।।८१००।।

स्त्रीपुंसोस्तु विवाहे योऽयं सम्बन्ध आभाति।
संसारेऽखिलसत्ता तत्रैवाऽस्ते प्रतिष्ठिता सर्वा।।८१०१।।

एतस्मिन्सम्बन्धे प्रेम्णः काचित्प्रकृष्टनवदीप्तिः।
आविर्भवति नितान्तं जन्मसफलताऽत्र दृष्टचरा।।८१०२।।

पतिपत्न्योः सम्बन्धे या काचिद्दीप्तिरथ महिमा।
प्रादुर्भवति तया ननु पृथ्वीयं नवनवा भाति।।८१०३।।

एते सर्वे भावा अहमहमिकया पतन्त्यत्र।
सोऽयं सुमानुषः स्याद्भद्रं तस्यैव बोभूयात्।।८१०४।।

ये वा कवीन्द्रवर्यास्तेषामथवाऽस्ति संसारे।
कविकाव्याख्योऽयं सम्बन्धो रामणीयकैर्जुष्टः।।८१०५।।

रमणीयतया वर्णनमाऽस्ते कविता कलायां यत्।
तेनैव सर्वजनता धन्या धन्या प्रफुल्ला च।।८१०६।।

युगे युगे नवनवतामुपागतानां तथा तेषाम्।
सम्बन्धानां गाथा नवानवाः संप्रजायन्ते।।८१०७।।

विष्णुः कृष्णो रामः बलभद्रो वा शिवः साक्षात्।
काली दुर्गा देवी गणपतिरेषोऽत्र वा हनुमान्।।८१०८।।

भैरवदेवो नित्यं कुमार एषोऽथवा दिव्यः।
देवी सरस्वतीयं जगतां मातृत्वसम्बन्धे।।८१०९।।

पितृत्वेऽपि च ते ते भावाः सर्वे प्रतिष्ठिता जाताः।
नो चेत्कथं मनुष्यस्तेषां पूजां समातनुते।।८११०।।

सम्बन्धमन्तरा वा नोत्सुकभावोऽत्र दृष्टचरः।
सर्वौत्सुक्यमयीयं गाथा सम्बन्धसापेक्षा।।८१११।।

न कदापि यस्य मनसाऽपि तु संस्मरणं कृतं मया कामम्।
नित्यं सम्बन्धेन तु बद्धोऽसावस्मदीयवर्गस्थः।।८११२।।

गच्छन्तु तत्र सर्वे न कदापि तु तत्र गच्छेयम्।
वैपरीत्यसम्बन्धस्तत्राऽविर्भावमायातः ।।८११३।।

जगतो मायाया वा योऽयं सम्बन्ध आख्यातः।
षोढा तत्र विनिर्मितिरास्ते सम्बन्धसत्तायाः।।८११४।।

एकैकं सम्बन्धं सम्यक् चादाय वेदान्ते।
अद्वैतद्वैताद्याः विशिष्टशुद्धादिवादाः स्युः।।८११५।।

सर्वान्ते तावदयं नो वाच्योऽस्त्येव सम्बन्धः।
प्रारम्भिकी तु सत्ता सर्वत्रैवाऽस्त्यनुस्यूता।।८११६।।

नवपरिचयप्रदाने सम्बन्धं ज्ञातुमिच्छन्तः।
सर्वे जनास्तु चकिताः सन्तिष्ठन्तेऽथ सम्बन्धे।।८११७।।

ज्ञाताऽज्ञातविलोपप्रकटनभावाख्यसम्बन्धे ।
वैदेशिका अपि मुहुर्मूर्च्छामेवाऽभिनन्दन्ति।।८११८।।

ते चाऽप्यविदितकर्मानुष्ठानानां प्रकृष्टसंयोगे।
सुखकरनवसंसारे सम्बन्धं संगिरन्ते वा।।८११९।।

ननु नैतदस्ति किञ्चित् सम्यक् सम्प्रेष्यतां सर्वम्।
तेषामत्राऽपि तु तन्मनसा वाचाऽथ कायेन।।८१२०।।

सम्बन्धोऽयं सुदृढ़श्चाऽस्ते सर्वेषु कालेषु।
देशे काले पात्रे देयं दानं विनापि सम्बन्धात्।।८१२१।।

दातृत्वं ग्रहणायोद्युक्तानां चाऽपि सम्बन्धः।
तत्रैव नवः कश्चित्सम्बन्धो नूनमाद्रियते।।८१२२।।

विद्युद्वनिता गर्भे या सा संस्फुरति नवलेखा।
तत्राऽस्ति गरिमभावैरापूर्णः कोऽपि सम्बन्धः।।८१२३।।

गौरवपूर्णास्त इमे इतिहासाः सम्प्रकल्पन्ते।
नाना प्रभावपूर्णाः सर्वेषां माननीयाश्च।।८१२४।।

ते ते सर्वे तावन्मनीषिमूर्धन्यतां याताः।
नैवेत्थं कथयन्तो मुक्तौ लीना विलोक्यन्ते।।८१२५।।

भाषाभावधुरीणा भूषितसत्कायदिव्यतानिवहाः।
सत्कर्माश्रितजीवनपद्धतिरूपाः प्रगल्भन्ते।।८१२६।।

माया सेयं काचित्परिणामे शुभ्रतां याता।
ननु ननममता युक्ता विभासते सत्यमेव पुरतो मे।।८१२७।।

अशुचिरयं संजातः पुरुषो दोलाधिरूढत्वात्।
कलकलनिनादमधुरो विभ्राजितदिव्यतारूपे।।८१२८।।

अथ मानुषे स्वरूपे राक्षसतां संप्रदर्शयन्तो ये।
सञ्चालयन्ति नित्यं कर्म जुगुप्साऽन्विताः सन्तः।।८१२९।।

सर्वैर्निर्भर्त्स्यन्ते नाना विगुणस्वरूपाणि।
नाना संमान्यानां भूषणतामाप्नुवन्ति नित्यं ते।।८१३०।।

सा कामनाऽपि तेषां दुर्ग्रहदुःस्था दुरालोका।
दौर्गत्यदुःखमयता तेषां साद्याऽपि भूयसी जाता।।८१३१।।

अथ सर्वपरामर्शैर्यैनाद्यापीत्थमेव ननु।
किमपि किमपि जल्पन्तो मन्दं मन्दं प्रयान्त्येव।।८१३२।।

आस्माकीना काचित्प्रवृत्तिरेषा समाख्याता।
यत्र च सम्बन्धानां विलीनता नूनमाज्ञप्ता।।८१३३।।

एते च ते च तुल्यास्तत्र तु नूनं विलोक्यन्ते।
येषां दोषाः सर्वे दूरीकरणाय चरितार्थाः।।८१३४।।

अनुरागोऽप्येतेषामनुकरणीयोऽस्ति सम्बन्धे।
अनुकरणे तु समस्तः सम्बन्धो बन्धनं जातम्।।८१३५।।

स्वादुरयं सम्बन्धः किञ्चिन्नित्यं समातनुते।
सम्बन्धानां क्रोडे सानन्दा काऽपि विद्यते धारा।।८१३६।।

अविदितगुणगणगरिमप्राघुणिकीनां च विद्यानाम्।
अभिरूपः सम्बन्धो विज्ञैराराध्यते नित्यम्।।८१३७।।

अनुरूपाः सम्बन्धा विरूपतां यान्ति चैवैते।
किञ्चिद् भृकुटीभङ्गे विच्छिद्यन्तेऽथ सम्बन्धाः।।८१३८।।

प्राचीनाः सम्बन्धाः सर्वेऽप्येते प्रपूज्यन्ते।
नूतनतामायातास्ते ते नूनं सुसम्बन्धाः।।८१३९।।

संबन्धास्तावदिमे संसारं संसरणशीलम्।
नित्यं स्वभावमयतासंभारैः पोषयन्येव।।८१४०।।

नानाभावं याता नाना नवपुष्टिमापन्नाः।
नानारूपे दृश्या नित्यं चैते तु सम्बन्धाः।।८१४१।।

कथमपि पुरतो दृष्ट्वा मन्त्रिणमेकं समायान्तम्।
सम्बन्धकल्पनायां सर्वविधा जागरूकता जाता।।८१४२।।

सादरमुपसर्तव्यं सम्बन्धे ज्येष्ठतां प्राप्ते।
पादावुपसंग्राह्यौ ज्येष्ठाऽगमशुभ्रवेलायाम्।।८१४३।।

सम्बन्धोऽयं पूर्णां पद्धतिमसमां निरूपयति।
कस्मिन्खलु सम्बन्धे केन कदा किं समाचर्यम्।।८१४४।।

सात्त्विकराजसतामससम्बन्धानां विभागा ये।
संसारेऽखिलधाराप्रवाहभाषा समालपिताः।।८१४५।।

प्रातस्ते सम्बन्धा माध्यान्हिककालसम्बन्धाः।
सायं काले रात्रौ विभिन्नरूपास्तु सम्बन्धाः।।८१४६।।

वैज्ञानिके समाजे विज्ञानेन प्रकल्पिते निखिले।
वैज्ञानिकसम्बन्धा अत्युन्मुक्ता विभासन्ते।।८१४७।।

भृशमुपकुरुतां कोशः कश्चित्परिकल्पितः सुविद्वद्भिः।
यत्र तु सर्वे शब्दाः सम्बन्धोद्बोधकाः समाविष्टाः।।८१४८।।

सर्वास्वपि भाषासु तु ये वा सम्बन्धवाचकाः शब्दाः।
सर्वे संकलिताः स्युर्यदि सम्बन्धः प्रसन्नःस्यात्।।८१४९।।

संबन्धनामकोऽयं देवः कश्चित्प्रदीप्ततरः।
स्वीये प्रकाशमयतासाम्राज्ये सर्वमीप्सितं कुरुते।।८१५०।।

२२१.अकस्मात्

श्रीविष्णोः संस्मरणे नाम स्मरणेऽपि चाऽकस्मात्।
संशुद्धिः संजाता मानवदेहस्य धन्यता सेयम्।।८१५१।।

सर्वं जगदिदमारात्समुद्भवति लीयतेप्यकस्मात्।
किमपि न तादृशकारणमेकं किञ्चिद्विलोकयिष्यामः।।८१५२।।

यदि किमपि कारणं स्यात्संसारस्यास्य संजनने।
तत्त्वमेव तन्नाम्ना कथितुं वा शक्यतेऽकस्मात्।।८१५३।।

आकस्मिकमिदमखिलं जन्मान्मृत्योः परिक्रमा सर्वा।
पुनरपि तथा तथैवेत्यावर्तनभावमासाद्य।।८१५४।।

आवर्तनमिदमखिलं नित्यमकस्मात्सदैव संजातम्।
दुःखसुखाऽस्वादमपि त्वकस्मात्सुसंयोगः।।८१५५।।

संयोगा अपि तत्र तु वियोगयोगा अपि त्वेते।
सर्वेऽकस्माज्जाता जायन्ते जायमानास्ते।।८१५६।।

त्वमहं मिलितावेतावाकस्मिकयोगता जाता।
अन्येषां कोटीनां लोकानां नाऽस्ति तादृशो योगः।।८१५७।।

नियमाः केचित्तावत्प्रकल्प्य संयोज्य संसारः।
परिचाल्यते तु कैश्चित्तत्राऽप्याकस्मिकत्त्वं स्यात्।।८१५८।।

कुत एव तादृशा वा नियमाः संकल्पितास्तैस्तैः।
अन्ये नियमा भिन्ना कुतो न वा स्वीकृता भान्ति।।८१५९।।

कुत एव सौम्यसरणैः शोभनभावः समायातः।
तद्विपरीता भावाः कथं न शास्त्रेषु सन्दृष्टाः।।८१६०।।

सर्वाऽकस्मादेव तु संघटना जायते सैषा।
नो वा नियमाः केचित्तत्राऽविर्भावमर्हन्ति।।८१६१।।

नियमानां निर्धारणमपि वा क्रियते पुरस्तैस्तैः।
तेषामपवादानं संख्या तावद्विवृद्धिमायाति।।८१६२।।

स्वीकृतनियमविरुद्धास्तेत्वपवादाः समाभान्ति।
तेषां नियमस्थलतोऽत्यधिका संख्याऽथ किं ब्रूते।।८१६३।।

नियमा एते मिथ्याभूताः संकल्पिताः सन्ति।
नियमाभावे नित्यं सर्वमकस्मात्सुसम्पन्नम्।।८१६४।।

एको नियमोऽकस्मात् भावः सर्वः समाम्नातः।
सर्वमकस्माज्जातं भवति भविष्यत्यकस्माद्वा।।८१६५।।

पूर्णेऽकस्माद्भावे नो वा कस्यापि वार्तायाः।
अवकाश एव कश्चित्संम्मुखयोगे समायाति।।८१६६।।

कुतो भवानिह देशे काले वा जात इत्येवम्।
प्रश्नावल्या उत्तरमेकमकस्माद् विजायते सर्वम्।।८१६७।।

समुत्तराऽनन्तरमथ न कोऽपि पुनरागतः प्रश्नः।
यद्यागच्छति कश्चित्तत्राऽपि तदुत्तरेऽकस्मात्।।८१६८।।

इत्थमकस्माद्दर्शनमसमं वै धार्यतां सहजम्।
के वा यूयं धारणदूरीकरणेषु शक्ता वा।।८१६९।।

संसारे सारोऽयं संजातः सर्वसंयोगः।
सर्वमकस्मादेतत्सर्वमकस्माद्वियोगसंगमनम् ।।८१७०।।

नो वा विनोदभाषा काचिदिहप्राक् प्रयुज्यमानाऽस्ते।
सोऽयमकस्माज्जातः प्रवाहमयता परिश्रान्तः।।८१७१।।

यदि नायं बोभूयान्नित्यमकस्मात्सुसंयोगः।
वैचित्र्यं जगति तु यद् दृष्टं सर्वं विलुप्येत।।८१७२।।

तदिदं जगद्विचित्रं सचित्रतायां समारब्धम्।
आकस्मिकतायां वा जगदिदमाभासते दिव्यम्।।८१७३।।

काव्यान्येतानि सदैवाकस्मिकभावमायान्ति।
सौगन्ध्यैरापूर्णं सर्वं संजायतेऽकस्मात्।।८१७४।।

विभ्रष्टता कदाचित्संशुद्धिर्वा पवित्रता वाऽपि।
सिद्धीनां संयोगस्तावत्संजात एवाऽद्य।।८१७५।।

प्रातः सायं रात्रिर्मध्यान्हं तावदेतेषु।
कालानां कलनायां विभ्रष्टा सर्वसंकलना।।८१७६।।

आरादियमतिघोरा सम्पत्तिः सर्वतो मुख्या।
यदि वा संशोभयते सर्वमिदं करगतं भवति।।८१७७।।

सामरस्यभित्तीनामुपर्युपरि गीयमानानाम्।
कुत्रापमानसत्ता तत्रैवोन्मत्तता जाता।।८१७८।।

सर्वत्राऽनन्दानामुन्मत्तानां च दृश्यमानानाम्।
ऋाऽस्तेऽनुपमा भूतिः सर्वोऽप्यैश्वर्यसंसारः।।८१७९।।

एतेषामपि सर्वं सर्वत्राल्हादमायातम्।
किञ्चित्कैश्चित्कथितं दृष्टं कैश्चित्तथाऽन्यत्र।।८१८०।।

अयमस्त्येकस्तु पुमान् पूर्वेद्युर्योऽतिदीनः सन्।
सम्प्रति दीनानाथः सञ्जातः सद्य एव वाऽकस्मात्।।८१८१।।

अत्यन्तसुन्दरीयं परितः सौगन्ध्यमालाभिः।
चर्चितनिखिलावयवा संजाता सर्वथाऽकस्मात्।।८१८२।।

काचित्कमनीयतरा कान्तिः कालं परामृशती।
वेविद्यते पुरस्तात्स्मृतिस्तदा विद्यतेऽकस्मात्।।८१८३।।

अहो जनानां सौहृदमेवं संवर्धयन्सोऽयम्।
श्वासाऽवरोधघटनासंघटितो वा शवोऽकस्मात्।।८१८४।।

पश्चाद्भावः कश्चिन्नित्यमयं संमुखस्थोऽस्ति।
पूर्वं यद्वै जातं प्रारम्भस्तस्य जायतेऽकस्मात्।।८१८५।।

प्रारम्भिके विधाने तस्मात् प्राङ्नैव मुद्राऽसीत्।
प्रथमक्षणवेलायां चकितत्त्वं जायतेऽकस्मात्।।८१८६।।

दौर्बल्यातिशयानां यत्र वपुषि संचयो दृष्टः।
कालव्यवधानानामनन्तरं पुष्टिदृष्टिरियम्।।८१८७।।

नो किञ्चिदिहाकस्मात्संजायेतेति संस्मरणे।
दार्शनिकानां दृष्टिर्नूनं संजायतेऽकस्मात्।।८१८८।।

या या बुद्धिर्जाता ततोऽधिको निन्हवो जातः।
तेनैव लोपितं यल्लिखितं पुरतस्ततोऽकस्मात्।।८१८९।।

एवंविधलेखनतो न काऽपि तृप्तिः समारब्धा।
नो वा काचित् प्रैषा नो परिपूर्तिस्तथाऽकस्मात्।।८१९०।।

नूनमयं परितोषो नो परिपोषः प्रकामविश्वासैः।
प्रगुणीकृतसत्कायः सन्दूरितसर्वथामायः।।८१९१।।

कामं प्रगुणितसत्कृतसमीकृतादिस्वभावानाम्।
एषा सा परिपूर्तिर्जातैवेत्येवमेवाऽस्मात्।।८१९२।।

अंसस्थापितभाराऽवनतेर्ये गात्रसंस्पर्शाः।
हारादवनतभावं संश्रयते सैव धावमानाऽसीत्।।८१९३।।

अहो अहो संघर्षणभावः प्रोन्मीलितो दृष्टः।
कायं निश्छलमायं प्रगुणीकुरुते तथाऽकस्मात्।।८१९४।।

सद्यस्तरां समस्ता वाग्धारा दिक्परीवर्ते।
हेतुं विचारयन्तः केतुं तत्राऽपि पश्यन्ति।।८१९५।।

आसादितमाधुर्यैरेभिः परिरभ्भणैः किमथवा स्यात्।
आलिङ्गनादिभाषा व्यवहारेणाऽपि किं भूयात्।।८१९६।।

काव्यानां भाषेयं चित्रस्था वाऽपि वर्धयत्येव।
शरीरिकसंस्थानं मदनं नो वा विनिस्तारः।।८१९७।।

आकस्मिकदर्शनमिदमाम्नातं पूर्वतः पुरुषैः।
सर्वत्राऽनुस्यूतं प्रादुर्भूतं तथाऽकस्मात्।।८१९८।।

लेपः कोऽपि न शोच्यो गीतायां नूनमादिष्टः।
श्रीकृष्णवचनरचनाऽमृतेन नो वा विलिप्यतेऽकस्मात्।।८१९९।।

भाग्याधारितदर्शनमास्ते सम्यक् सुबोधभाषायाम्।
सन्दृब्धं परिपूर्णं सर्वं तत्र प्रजायतेऽकस्मात्।।८२००।।

न्याये सांख्ये योगे वेदान्ते वाऽपरत्र सिद्धांते।
सर्वे ते ते वादाः प्रोक्ता ऋषिभिस्तथाऽकस्मात्।।८२०१।।

श्रीकृष्णेन च गीताऽर्जुनाय येयं समादिष्टा।
मोहग्रस्तार्जुनसम्बोधनरूपा कुतो न साऽकस्मात्।।८२०२।।

यद्यद्वाऽस्मिंल्लोके प्रोन्नतरूपं परं दृश्यम्।
समुपस्थितं समाऽस्ते तस्योद्भूतिः प्रदृश्यतेऽकस्मात्।।८२०३।।

विद्युल्लोपेऽकस्माद् दृश्यावलिरेव दूरदर्शने लुप्ता।
मानसिके विक्षोभे किमिदं संजायतेऽकस्मात्।।८२०४।।

धाराणां सम्पाते बिन्दव एते समीपस्थाः।
प्राकृतिकसौभगानां दृश्यावलिरेवमादिष्टा।।८२०५।।

नूनं कृतमुपरिष्टात्सर्वं सम्मुखमिहाऽऽयाति।
निगदन्ति धूर्ततायामाश्लिष्टास्तेऽपि चाकस्मात्।।८२०६।।

नो सन्दर्शनलाभः स्पर्शानां नाऽस्ति काऽपि वार्तेयम्।
केवलमेवाऽस्तित्वे बोधः संजायतेऽकस्मात्।।८२०७।।

प्रचरन्त्येव नितान्तं ऋत्विग्भावेषु संस्थितास्ते ते।
सायं तेषां रूपं विपरीतं दृश्यतेऽकस्मात्।।८२०८।।

पञ्चाशद्वर्षेभ्यः पूर्वं यज्जातमासीत्तत्।
संस्मृतिवशात्पुरस्तात्परिस्फुरद् दृश्यतेऽकस्मात्।।८२०९।।

सर्वेऽपि तु विद्वांसः काले काले विषीदन्ति।
सोऽयं विषादयोगस्तेषां संजायतेऽकस्मात्।।८२१०।।

आपादमस्तकं यो स्वेदानां धारया स्नातः।
परमेश्वरकृपातः सफलः संजायतेऽकस्मात्।।८२११।।

नतमां सिद्धेराशाऽप्यासीत्तेषां तु केषांचित्।
जंगमरूपे जाते सा सिद्धिर्लभ्यतेऽकस्मात्।।८२१२।।

प्रगुणीकृतक्तिताढ्या एते दूरे क्षिपन्तोऽन्यान्।
अन्यापमानयोगे दारिद्र्यैः शोषिता जाताः।।८२१३।।

ते तु पुनर्ये दौर्गत्यालिङ्गितसर्वसत्कायाः।
सम्मानैः सर्वेषां पूजां तन्वन्ति नम्रतराः।।८२१४।।

न च तेषां विक्षोभः समतायां ये स्थिता नित्यम्।
सर्वविधा सम्पत्तिस्तोषां संजायतेऽकस्मात्।।८२१५।।

असामयिकघटनानामन्यासां संगतिर्दृष्टा।
संसारे निखिलानामुत्पत्तिजार्यतेऽकस्मात्।।८२१६।।

वेशस्थां वनितां प्रति या दृष्टिः कामपूर्णाऽसीत्।
आवरणस्य विनाशे वैरस्यं जायतेऽकस्मात्।।८२१७।।

निर्धनतैव वरेण्या वरणीयास्ते तिरस्काराः।
धनाऽगमे संजाते दूरीभूतास्तु तेऽकस्मात्।।८२१८।।

एषाऽस्माकं निन्दा स्तुतिरेषा वा यथार्थकथनं वा।
किं प्रस्तुतं भवत्या दृष्टिः परिवर्तिताऽकस्मात्।।८२१९।।

तैलेन चालितानां यानानां मोद एवाऽयम्।
दुर्गतिदुःस्थितिभावे मृत्योर्द्वारं विलोक्यतेऽकस्मात्।।८२२०।।

सभ्यानामादेशाः सततं नूनं शिरोधार्याः।
तेषामेवाऽदेशे समुन्नतिर्दृश्यतेऽकस्मात्।।८२२१।।

गलविवराऽधो गमने पेयं तुष्टिं परां कुरुते।
अलसश्लथाऽपगमे संस्फूर्तिर्जायतेऽकस्मात्।।८२२२।।

बाला सैषा नित्यं वर्धनशीला प्रदृश्यते पुरतः।
नेदानीन्तनकाले सैषा भारायिताऽकस्मात्।।८२२३।।

विद्यत एव पुरस्तान्मृत्युस्ताण्डवितवेगाढ्यः।
परमेश्वरकृपात; सुदूरमपसार्यतेऽकस्मात्।।८२२४।।

आसेन्केऽपि विलक्षणभाषा वेदादिविन्यासाः।
किन्तु समस्तमपीदं विसंगतं दृश्यतेऽकस्मात्।।८२२५।।

सन्ततिमात्राऽभावो येषां शूलायितो जातः।
आशीर्वादविशेषैः सन्ततिरेषा प्रजायतेऽकस्मात्।।८२२६।।

वपुषि नियोजनभावे सततं जातैव सा रेखा।
यस्यां संगीतानां परिणतिरेषा प्रजायतेऽकस्मात्।।८२२७।।

गमनागमनविभेदाऽभ्यासोपशमितविभासमानानाम् ।
रेखावलीव संस्फुटतायामाभासिताऽकस्मात्।।८२२८।।

प्राणानां रक्षायां वृद्धो जागर्ति सर्वदा सोऽयम्।
सायंकाले सुप्तः प्रातर्मृत्यौ विलीयतेऽकस्मात्।।८२२९।।

नमो नमो वादानमवकाशेषु प्रलम्बेषु।
सद्यो विरामवेलाऽवसानरूपा प्रजायतेऽकस्मात्।।८२३०।।

विद्युल्लतेव वनिता लीनाङ्गाऽङ्गेऽपि मृद्वीयम्।
पुनरथ परिपोषाणां गाथेयं जायतेऽकस्मात्।।८२३१।।

नर्तनवेलोपार्जितकोटीनां काऽपि सा छाया।
मायामयीव भित्तिः सहसा प्रविलुप्यतेऽकस्मात्।।८२३२।।

गंगास्नानविलापनहरिस्मरणसौख्यसंसारे ।
परिवेशसंप्रवेशे प्रवृत्तिरासादिताऽकस्मात्।।८२३३।।

आलेखनबहुलानां प्रसादमासादयन्तोऽपि।
परिचितविभावविभवा द्योतन्तो ते पुरोऽकस्मात्।।८२३४।।

परिचयदूरीकरणे पदोन्नता जागरूकाः स्युः।
परिचयचयने वृत्तिस्तोषामपि जायतेऽकस्मात्।।८२३५।।

संचारे माधुर्यं नमयितुमावेदितास्ते ते।
कुतो न वा संग्राह्या जायन्ते वा निषिध्यतेऽकस्मात्।।८२३६।।

सन्त्रासे संन्यासः संग्राह्यो वाऽथ सुविधेयम्।
संन्यासे पुनरेवं सन्त्रासो जायतेऽकस्मात्।।८२३७।।

माधुर्यैरापूर्णे कोलाहलकाल आयाते।
कुक्कुररावैरेषा निद्रा प्रविलोपिताऽकस्मात्।।८२३८।।

बालानामथ शिक्षा कोलाहलमेव वा सर्वम्।
धनसंवर्धनरूपा सर्वा संजायतेऽकस्मात्।।८२३९।।

चायाख्यपानकाले मैत्री सैषा दृढ़ा जाता।
प्रतिदिवसचायपाने मैत्री संजायतेऽकस्मात्।।८२४०।।

गंगागंगारटने गङ्गा शान्तिं समातनुते।
सर्वविधा सम्पत्तिः करतलगा दृश्यतेऽकस्मात्।।८२४१।।

काश्यामेषा गङ्गा येषामुपरि कृपां कुरुते।
धन्यास्ते तु जगत्यामामुष्मिकमार्गगामिनोऽकस्मात्।।८२४२।।

पद्धतिरन्या चान्या श्रेष्ठश्रेष्ठा विविच्यते विज्ञैः।
विवेचनासंचारे नव्या शैली विलासिताऽकस्मात्।।८२४३।।

विलिखाम्यहं च तदिदं विलोकयति पार्श्वगा चेयम्।
सैषा संबाधा वा कथमिव समुपस्थिताऽकस्मात्।।८२४४।।

तस्य च तस्य च तस्य च कृतेऽपि नूनं विभिद्यतां दृष्टिः।
अस्माकं तु समस्तानन्देयं जायतेऽकस्मात्।।८२४५।।

तव-मम-दृष्टिः सर्वा भेदकरी सर्वमोहिनी सेयम्।
संप्राप्तस्वातन्त्र्ये विलुप्यते दूरतोऽकस्मात्।।८२४६।।

२२२.गालीप्रथा

मनसः स्वतन्त्रता यदि वाण्यां निखिला समागता भवति।
तत्रैव काऽपि धारा सैषा परिकथ्यते गाली।८२४७।

मानसिकोल्लासमये समये याऽसौ समादृता भवति।
विज्ञैरपि सम्मान्या नूनं परिदीयते गाली।।८२४८।।

स्नेहमयं संसारं समुच्छलन्ती प्रदर्शयति सेयम्।
सन्मनमां संयोगं कुरुते सद्यो विनिर्मिता गाली।।८२४९।।

गालीगलविराधः समुत्पतन्ती कतिपयैर्निमिषैः।
कर्णेषु संविशन्ती मुखमालिन्यं विदूरयति।।८२५०।।

निखिलोऽयं संसारः शून्यः सर्वः प्रजायेत।
सा यदि मानसमध्ये नो रचयेद्वाटिकां गाली।।८२५१।।

वीथी काऽपि नितान्तं परितृप्तिं या समादिशति।
हृदये समुच्छलन्ती वाचि नवाऽयात्यसौ गाली।।८२५२।।

अटतितमां निखिलेऽपि ब्रह्माण्डेनन्तरूपैः स्वैः।
मोहयति सर्वलोकान् प्राणेऽभ्योऽपि प्रिया गाली।।८२५३।।

नानोन्मादवशीकृतमनसा वाचाऽथ कायेन।
सर्वाङ्गैरपि सेयं नूनं सम्पूज्यते गाली।।८२५४।।

नाना भावविलासेष्वासाद्या वा परा तृप्तिः।
तत्परिणतिप्रसूता हृदये सन्धार्यते गाली।।८२५५।।

लक्षमितयोनिमध्ये केवलमानवकृते सुलभा।
देवैरपि नो देया मनुजैराराध्यते गाली।।८२५६।।

मानववाग्रचनायां पुरातनायां नवीनायाम्।
सा रचना नो लभ्या यत्र न संदृश्यते गाली।।८२५७।।

क्रोधविनोदाभ्यां सा विस्तारयते वपुः स्वीयम्।
एका घोराऽऽरावा चरमा स्मितहास्यदा गाली।।८२५८।।

निर्गुणसगुणविभेदे यद्वद् व्याप्तं परं ज्योतिः।
तद्वद् द्वयस्वरूपे सर्वत्रात्राहिता गाली।।८२५९५९।।

अधिकारिभेदभिन्ना निम्नोन्नतमानसाऽधारे-
ष्वास्तेऽनन्तविभेदा चैका परतत्त्ववद् गाली।।८२६०।।

येन न जीवनकाले स्वीये कर्णे समानीता।
परकर्णे न वितीर्णा तस्य व्यर्थत्वमादिशेद् गाली।।८२६१।।

नाना विभावविभवाऽनुभावसंभारविभ्रमैर्भरिता।
व्यभिचारिभिर्नितान्तं परिपुष्टा विद्यते गाली।।८२६२।।

स्थूला थुलथुलकाया स्थूलोच्चारणभरैर्विनता।
मूलाऽधिकारिवर्गे स्थूलाकारा भवेद् गाली।।८२६३।।

सूक्ष्मा सूक्ष्मताराऽभा सूक्ष्मेक्षिकया समालोक्या।
परमाणुत्वप्रतीता कारणलीलामयी गाली।।८२६४।।

आस्ते सहस्रशीर्षा सहस्रपादाक्षकरभरैर्भरिता।
विभ्रमसहस्रधारावर्षास्वासाद्यते गाली।।८२६५।।

रक्ते नवप्रवाहं कुर्वन्तीयं विलोक्यते सहसा।
शल्यक्रियामपि निराकुर्वन्ती केन नाऽप्यते गाली।।८२६६।।

वाग्व्याहरान्निखिलानलंकरोति प्रयोगसंयोगैः।
रसरहितान् व्याहारान् रसयति रोमाञ्चिता गाली।।८२६७।।

अश्लीलताऽख्यदोषं भूषणरूपे विपरिणमयन्ती।
विकृतिं विदूरयन्ती प्रकृतौ संस्थापयति गाली।।८२६८।।

हा हा ही ही हो हो हं हो हू हू स्वरैः सुविस्तीर्णा।
नवपरिवेशनिवेषैर्मण्डितरूपा भवति गाली।।८२६९।।

प्रेमाऽमृतवाग्धाराऽवर्तमयग्रन्थिसदृशीयम् ।
दम्पत्योः प्रणयानां परिपाके राजते गाली।।८२७०।।

'श्रीमद्' 'भवत्' सदृक्षानर्गलरूपान् परान् शब्दान्।
सद्यो विदूरयन्ती त्वंकारं श्लेषयति गाली।।८२७१।।

बहुवचनव्यवहारेष्वसमञ्जसमनुभवन्तीयम् ।
पाणिन्युक्तं वचनं सम्बुद्धावाश्रयति गाली।।८२७२।।

भगवत्स्तोत्रेष्वपि सा समुच्छलन्ती विशत्येव।
अत्यन्तोत्सुकमिव भगवन्तं सेवते गाली।।८२७३।।

चौरं शठं च धूर्तं गर्दभमथ चेश्वरं दिशती।
व्यभिचारिणमपि कथयति कविवचनेषूद्धृता गाली।।८२७४।।

दुस्साध्यानपि कामानिङ्गितमात्रेण या सूते।
सर्वत्रैवाऽप्रतिहतसाम्राज्येषु प्रतिष्ठिता गाली।।८२७५।।

बह्मणि यो विस्तारः सर्वस्तस्या विराजते वपुषि।
पुरनप्यणोरणीयसि वपुषि च राराजते गाली।।८२७६।।

पूर्वं राज्ञां तन्त्रेष्वासादितवैभवा सेयम्।
शासनचक्रं सर्वं सम्यक् संचालितवती गाली।।८२७७।।

नवगणतन्त्रमयेऽस्मिन् समये समलंकरोति सर्वमपि।
शासनसूत्रधराणां सर्वेषां प्रेयसी गाली।।८२७८।।

प्रचलितचुनावरचनाऽधारस्तंभायमानेयम् ।
ध्वनिविस्तारकयन्त्रैर्दिशासु विस्तार्यते गाली।।८२७९।।

निर्बलमनुजशरीरे सर्वबलाधायिका सेयम्।
बलविस्मापितमनुजान् नीचैः कुरुते क्षणाद् गाली।।८२८०।।

भूकम्पं हृत्कम्पं नभसः कम्पं तथा च जनयन्ती।
प्रलयस्य दृश्यजातं प्रकटीकुरुते क्षणाद् गाली।।८२८१।।

नव्यां नाटकरचनां प्रदर्शनीयां विनाऽयासम्।
क्षणमात्रे रचयन्ती सद्योजाता विलोक्यते गाली।।८२८२।।

कोमलतमस्वरूपं भीषणरूपे समानयन्तीयम्।
कारणरहिताऽपीयमनभ्रवृष्टिप्रभा गाली।।८२८३।।

अन्धस्यान्धः पुत्रो दुर्योधन इति तु वाक्यविहिता सा।
भीषणभारतयुद्धं प्रदर्शयामास सा गाली।।८२८४।।

सत्कारतिरस्कारौ नाना द्वन्द्वाख्ययोगान् वा।
रागद्वेषसमुत्थान् स्थानेष्वालोकते गाली।।८२८५।।

मदिरागांजाभङ्गाऽलिङ्गितनानास्वरूपेषु ।
स्वीयाऽसनं विदधती विलासमुल्लासयति गाली।।८२८६।।

संक्षिप्ताऽपि सुविस्तृतरूपं पूर्णं निजं वहन्तीयम्।
जलधारावत्प्रवहनशीला वेगं समाह्वयति गाली।।८२८७।।

लघुतमवदनपराजितपुष्टप्रोद्घुष्टतुन्दिलानपि या।
परमाण्वस्त्रक्षेपणमपि किं न प्रेरयेद् गाली।।८२८८।।

औचित्याऽनौचित्यं सामान्येनैव दर्शयन्तीयम्।
समतानिर्मितकाया समतामाराधति गाली।।८२८९।।

स्तुतिनिन्दासमतायामपि या सर्वत्र सन्दृश्या।
अप्रस्तुतप्रसंशा व्याजस्तुतिमध्यगा गाली।।८२९०।।

वश्येष्वासनसंस्था नो वश्येष्वपि च काल उच्छलिता।
निजचरणं सर्वत्राऽप्रतिहतरूपेषु निक्षिपेद् गाली।।८२९१।।

एकान्ते सन्दृष्टा द्वित्वे वा केवलं दत्ता।
यद्वा संख्याबहुलं क्षेत्रं वृणुते स्वयं गाली।।८२९२।।

परिणयमहोत्सवेषु प्रणयं परिपूर्णमादधती।
दम्पत्योर्नवजीवनपाथेयं प्रक्षिमति गाली।।८२९३।।

वैवाहिकगीतावलिलयविनिबद्धामृतं किरन्तीयम्।
परिवाराणां बन्धनमसमं संशोभयति गाली।।८२९४।।

शिवपार्वतीविवाहे श्रीरामस्यापि परिणये कविभिः।
विश्वविमोहकरचनाऽवलिमध्ये गुम्फिता गाली।।८२९५।।

विघटनकर्मणि लग्ना संघटने वा स्वयम्प्रोक्ता।
नानाऽतानवितानप्रथिता प्रोद्भासिता गाली।।८२९६।।

गरलं मदममृतं या श्रोतुर्नयने विलासयति।
सत्वरजस्तमपूर्णा साम्यावस्था स्थिता गाली।।८२९७।।

स्फोटयति या शिरांसि प्रथमैरेव प्रकाशमायाता।
विकटप्रभावपूर्णा विषमाऽवस्था स्थिता गाली।।८२९८।।

धिक्कारताप्रगुणिताधारागतसेव्यमानेयम् ।
धिग् धिग् धिगिति निनादा धिक्काराऽवेष्टिता गाली।।८२९९।।

सभ्यत्वयोगसंमतशब्दावल्या परामृष्टा।
मिष्टं रसमयगोलकमाविष्कुरुते मधुरगाली।।८३००।।

विष्कंभकसदृशीयं नाटकमध्ये समुत्थिता भवति।
सूचयति किमपि मधुरं फलजातं प्रकटिता गाली।।८३०१।।

अत्र च तत्र च दृश्या देशे देशे विदेशे च।
पाताले गगनेऽपि च किं न व्याप्ता स्वयं गाली।।८३०२।।

न मतापि मता सर्वैरनादृताऽप्यादृता जयति।
संमोहनशीलेयं मनसिविलासं गता गाली।।८३०३।।

वैमत्येऽथ विलसिते सद्यो लास्यं प्रदर्शयन्तीयम्।
विकटोच्चारणसमयं संप्रादुर्भावयति गाली।।८३०४।।

शब्दानामथ चयने सर्वां बुद्धिं समाहितां कुरुते।
मनसि च वचसि च काये चैक्यं संवाहयति गाली।।८३०५।।

परमेश्वरस्य साक्षात्कारे या चित्स्थितिः प्रोक्ता।
तामेकाग्रां संस्थितिमत्रैव प्रापयति गाली।।८३०६।।

सच्चिन्मयस्वरूपे भावानन्देऽथ संस्थिता सेयम्। ।
सर्वाभीष्टं रूपं शिष्टान् प्रति पूरयति गाली।।८३०७।।

भालस्थिता पुरस्तादायाता कण्ठदेशमथ पश्चात्।
स्खलिता पुनरथ कर्णावलिमध्ये दीप्यते गाली।।८३०८।।

दानानि सन्ति यद्यपि शास्त्रप्रोक्तानि भूयांसि।
सर्वेषु तेषु पूर्णं स्वीयं दानं विबोधयति गाली।।८३०९।।

सद्यः सर्वं देयं ग्राह्यं सर्वं पुरस्ताच्च।
श्वस्तनिकीं पाश्चात्यां वा संगाथां विलोपयति गाली।।८३१०।।

शकटीमध्ये जनसम्मर्देष्वेषा प्रवाहमायाता।
सौरभसाराऽक्रान्ता गतिमच्छकटीं विधारयति गाली।।८३११।।

मध्ये मध्ये रुद्धा मध्ये मध्ये पुनर्दीप्ता।
मध्ये मध्ये प्रहरणसाधनसघना भवति गाली।।८३१२।।

गलविवरसंनिरुद्धा वैवश्यवशंगता सेयम्।
अप्रकटितनिजरूपा भविष्यदेवाऽमृषेद् गाली।।८३१३।।

दशवर्षानन्तरमपि पूर्वैः पुरुषैरथो दत्ता।
तद्वंशोद्भवजन्तौ फलवर्षां वर्षयेद् गाली।।८३१४।।

संस्कारानथ सर्वान् पुरातनान्नूतनानखिलान्।
निजरूपालंकरणान्धन्यान्न स्वीकरोति सद् गाली।।८३१५।।

प्रागध्यापकमुखतः शिष्येभ्यो या प्रदत्ताऽभूत्।
सा छात्राणां मुखतोऽद्यत्वे गुरुषु प्रदीयते गाली।।८३१६।।

एकैकस्मिन् मनुजे यस्या दाने न विद्यते क्षमता।
संघे समुत्थितैस्तैरुच्चैरुच्चार्यते गाली।।८३१७।।

या घोषणा कृताऽसीच्चुनावचर्चासु चलितासु।
सा चेन्नो परिपूर्णा मतदात्रा दीयते गाली।।८३१८।।

शासकतामुपयाते संघे नवयोजनासु संलग्ने।
प्रतिपक्षस्थितसंघैः सततं परिदीयते गाली।।८३१९।।

नानाऽरोपप्रकरणपरिपुष्टा यत्र शासकैर्नित्यम्।
वर्षिष्ठाऽपि विपक्षे सूक्ष्मा निक्षिप्यते गाली।।८३२०।।

नैकट्ये संप्राप्ते चुनाव कालस्य या तूर्णम्।
नाना यन्त्रसमुत्थं कलेवरं धारयति गाली।।८३२१।।

प्रतिकूले प्रतिकूला विकारभाराभिरामरमणीये।
नाट्ये दर्पणचरिता सर्वानेवाऽमृशेद् गाली।।८३२२।।

गालीरुपाणां का गणना कर्तुं हि केन वा शक्या।
शतकोटिमिते रूपेऽपि च नो मात्येव सा गाली।।८३२३।।

गालीभक्षणकर्मणि दक्षा ये पुरुषशार्दूलाः।
अणुमात्रमपि विकारं न लभन्ते तं नमति गाली।।८३२४।।

मुखमालिन्यविशोषणनीरसताऽपादिकापीयम् ।
प्रतिपक्षे स्फूर्तिमयी स्फोटं विस्फोटयति गाली।।८३२५।।

नग्नाऽचरणविमण्डितकाया नग्नैः परामृष्टा।
संपूर्णे नग्नत्वे सुभगा शिवरूपगा गाली।।८३२६।।

कर्णे प्रतप्तसैकतराशिरिवाऽभाति या क्षिप्ता।
जीवनमरणान्दोलनखेलायां खेलते गाली।।८३२७।।

सर्वपरीक्षितभक्ते सिद्धैः पुरुषैः स्वयं वितीर्णेयम्।
रचयति नवसंसारं सिद्धमुखान्निःसृता गाली।।८३२८।।

प्रागासीद्या केवलमासेकैर्वर्धिता सम्यक्।
वेश्यावेश्मसु सेयं गृहे गृहे दृश्यते गाली।।८३२९।।

आस्ते स्वतन्त्रतायां लेखनभाषणगता निखिला।
नव्यविधानसुधाराखेलननिपुणात्मिका गाली।।८३३०।।

गोली गाली मध्ये कियदन्तरमिति न जानामि।
एवं यो वा निगदति तस्य शिरः स्फोटयति गाली।।८३३१।।

परिणामदानकाले नानारूपाणि धारयन्तीयम्।
केषांचित् तोषकरी परमनुजान् शोषयति गाली।।८३३२।।

शतसंख्यापरिपूर्णं शिशुपालं वीक्ष्य भगवन्तम्।
श्रीकृष्णं निजचक्रं प्रेषयितुं प्रोत्सुका गाली।।८३३३।।

आश्रमसंस्थितमुनिवरसंत्रासैः खेदमापन्ना।
श्रवणेऽपि संप्रतप्ता श्रीरामेषूत्तरमयी गाली।।८३३४।।

नामाक्षरपरिरम्भणछेदनकर्मणि कृताऽस्पदा सेयम्।
सर्वसभङ्गश्लेषोन्नतगोलकसंगता गाली।।८३३५।।

सरेगमपधनिरतान्ता ढोलाढक्कासुमध्यभागान्ता।
परिवर्तितोत्तमाङ्गा संगीतान्ता प्रणम्यते गाली।।८३३६।।

हेया सर्वाऽपीयं नोपादेया च कुत्राऽपि।
शालीने तु समाजे सर्वा तुच्छायिता गाली।।८३३७।।

दोषोद्घाटनवेलादर्षितकुत्सिततमोमयी सेयम्।
विज्ञैर्निन्दितरूपा क्वचित् क्वचिद् दुःखिता गाली।।८३३८।।

संकेतमात्ररुद्धप्रवेशभीत्या पलायिता सेयम्।
शीलधनानतिदूराद्विलोकयति दुःखिता गाली।।८३३९।।

वैकारिकसंसारे सर्वत्रैव कृताऽस्पदाऽपीयम्।
समभावप्राकृतिके संसारे संकुचति गाली।।८३४०।।

शिष्टाऽदृतान्विभावाननुभावान्वाऽथ संचारीन्।
इङ्गितचेष्टितनमितान् स्वीकुर्यात् तोषिता गाली।।८३४१।।

सम्मानदानयोग्ये श्रद्धेये न प्रदत्ता चेत्।
सम्मानं साऽनुक्ताऽप्येषा दत्तैव ननु गाली।।८३४२।।

वाच्या लक्ष्या व्यंग्याऽनन्तविभेदे विराजिताऽपीयम्।
नानाभाषाऽवरणे भिन्ना भिन्ना भवति गाली।।८३४३।।

उक्तानुक्तदुरक्ता द्विरुक्ततायां समाऽस्वादा।
शतके सहस्रके वा पुनरुक्ता नैव दूश्यते गाली।।८३४४।।

प्रेम्णः परमा काष्ठा स्नेहाद्रेः शिखरचुम्बिनी सततम्।
सा मानिनीव किञ्चिद् दूरे निकटे लसति गाली।।८३४५।।

२२३.स्वातन्त्र्यस्वर्णजयन्ती

भारत-स्वतन्त्रतायाः स्वर्णजयन्तीमहोत्सवोल्लासे।
जन-जन-हृदयो-त्साहो गच्छति चरमामहो काष्ठाम्।।८३४६।।

भारतदेशस्यैतस्याऽप्यासीद्दुर्गतिः क्रूरा।
यत्र पारतन्त्र्याणामुल्लासेष्वास सञ्चारः।।८३४७।।

सर्वस्वतन्त्रतोद्घोषणमासीदन्तिमा श्रेणिः।
उपनिषदि परामृष्टा मन्त्रेष्वेवोल्लसत्स्वान्ता।।८३४८।।

सर्वविधोल्लासानामाद्या चैवाऽन्तिमाऽवस्था।
स्वातन्त्र्येत्याख्याता तत्राऽऽसन्दीक्षिताः सर्वे।।८३४९।।

परतन्त्रता-मलिनता-क्षालन-नव-साधनोपायाः ।
ऋषिभिर्मुनिभिर्मान्यै-राचार्यैस्तावदादिष्टाः ।।८३५०।।

वैदिकमन्त्रविभागे ब्राह्मण-सद् ग्रन्थसन्दोहे।
उपनिषदामारामेष्वपि सेयं वा स्वतन्त्रता जयति।।८३५१।।

स्वातन्त्र्य-पारतन्त्र्यौ गणनाऽनन्त्यं समायातौ।
भेद-प्रभेद-गणने चैकैकोऽयं न गणनार्हः।।८३५२।।

योऽयं स्वतन्त्रताया सुवर्णवर्णोत्सवः कालः।
शासनसंस्थाऽऽधारित-गणना जागर्ति तत्रत्या।।८३५३।।

ऋषिभिर्नाना रूपं यत्स्वातन्त्र्यं समाम्नातम्।
तस्यैकः प्रविभागः शासनसंस्थां परामृशति।।८३५४।।

शासन-निकाय-जागृति-सेवा-संसार-साम्राज्ये।
भारत-पुत्रा दीक्षित-संज्ञानाः संविभासन्ताम्।।८३५५।।

पूर्वं मुहम्मदीयैर्वैदेशिकयुद्धसंरम्भे-
ष्वासादित-परतन्त्रप्रान्तेयं भारते भूमिः।।८३५६।।

ग्रीकानां हूणानां यावनानामाक्रमणकाले।
नाना राज्यविभक्तं निखिलमिदं भारतं वर्षम्।।८३५।।

स्मृतिपथमद्याऽगच्छति सा वा भारत-समर-भूमिः।
सर्वे भारतवीराः सपुत्रपौत्रा यदा लुप्ताः।।८३५८।।

सर्वा शासन-संस्था क्रमशो निस्तेजतां याता।
पारस्परिके कलहे युद्धाऽभ्यासोऽभवत्तेषाम्।।८३५९।।

दौर्गुण्य-दुर्विलासाऽऽयत्ता सा राजसत्ताऽऽसीत्।
वैदेशिकशत्रूणां प्रतिरोधे साऽसमर्थाऽऽसीत्।।८३६०।।

स्वर्णजयन्ती स्वातन्त्र्यस्यैषा या समायाता।
तस्या संस्तुतिकाले पुरातनं नव्यतां यातम्।।८३६१।।

सपरिकरा राजानो वैभवमूलं तदात्मीयम्।
पाताले पश्यन्तो निश्चिन्ता भूरिशो जाताः।।८३६२।।

आङ्गलदेशीयैः सह शतशो युद्धप्रदर्शनावल्याम्।
सर्वे राजानस्ते मत्ताश्चासंस्तथा च विक्षिप्ताः।।८३६३।।

सुरा-सुन्दरी-सेवन-संसक्ता-भारतस्य राजानः।
रजसा तमसा व्याप्ता जन-जन-धिक्कारतां याताः।।८३६४।।

झांसीराज्ञी तु तदा शिवाजिराजः प्रतापश्च।
भारतीय-शौर्याणां प्रतीक-भूता व्यजायन्त।।८३६५।।

एतादृशैः कतिपयैर्नरशार्दूलैस्समस्त इतिहासः।
स्वर्णाक्षरमालाभिः संविद्रूपः प्रकाशितो जातः।।८३६६।।

भारतशूराणां या गाथावलिरद्य सम्प्राप्ता।
सैवाऽद्यापि प्राणान्संचारयतीति नो चित्रम्।।८३६७।।

यावद्धरा समस्ता यावच्चन्द्रो दिवाकरो यावत्।
तावत् शौर्याणां सा गाथावलिरप्यपारधारैव।।८३६८।।

गीतायां श्रीभगवान् श्रीकृष्णो यन्महद्दिव्यम्।
गीतं संश्रावितवानर्जुनभावे प्रदीप्तेभ्यः।।८३६९।।

सा सर्वा शब्दानां धारा काचित्समुज्ज्वलाऽद्यापि।
गान्धी-नेहरू-वर्यानसमान्संप्रेरयामास ।।८३७०।।

गीता-रहस्यकर्त्ता तिलकमहर्षिर्विभूतिरूपोऽसौ।
श्रीकृष्ण-वचन-रचना-संचारेषु प्रवर्तयति लोकम्।।८३७१।।

कारागार-निवासे दिव्यं गीतारहस्यनामानम्।
ग्रन्थे रत्नं नीत्वा तिलको बहिरागतः स्तुत्यः।।८३७२।।

स्वातन्त्र्यघोषणायां जन्मनि सिद्धोऽधिकारोऽस्ति।
सा घोषणा प्रविहिता तेनोच्चैस्तिलकवर्येण।।८३७३।।

श्रीमालवीयसदृशा महर्षयः प्रादुरासन्वा।
सर्वं विश्वं वाणीविलाससभाषासु मज्जयामासुः।।८३७४।।

तैश्च तथा धर्माणां वर्णानामाश्रमाणां वा।
परा प्रतिष्ठा विहिता शिक्षायाः सम्प्रसारेषु।।८३७५।।

श्रीसुभाषचन्द्राणामसमा दीप्तिः समायाता।
संसारेषु प्रथिता नाना नवरूपतामाप्ता।।८३७६।।

नव्या सेना घटिता गत्वा गत्वा विदेशेषु।
तच्छौर्यं क्व नु लभ्यमासीद्यादृक्सुभाषचन्द्रे तत्।।८३७७।।

सत्याग्रहझंझायां या भीषणता प्रकटिताऽसीत्।
भारतीयजनताया श्रीगान्धिप्रेरिताया वा।।८३७८।।

क्रान्तिः क्रान्तिरितीत्थं सततं जोघुष्यमाणेन।
नवयुवकेनात्रैवोन्माथितमभवत्समस्तनवविश्वम् ।।८३७९।।

गुप्तसंगठनभाषेङ्गित-संयारेषु या क्रान्तिः।
जीवनसमर्पणैरथ सुस्वातन्त्र्यं समानेतुम्।।८३८०।।

बालैरपि नवयुवकैः प्रारब्धा भारते देशे।
निखिलेऽपि तु संसारे नैवाऽस्ते तस्य कापि तुलना वा।।८३८१।।

प्राणानामर्पणमथ हास्यं स्वमुखे समानीय।
युवकमृगेन्द्रैर्विहितं स्वतन्त्रतायाः समाह्वानम्।।८३८२।।

सा कम्पितवत्यखिला गौराङ्गाणां प्रभुत्वभावानाम्।
सम्भावना समस्तां व्यस्तां ध्वस्तां तथाऽकार्षीत्।।८३८३।।

धर्मोन्मादस्वार्थान्धीकरणेषु प्रजागरूकेषु।
जिन्ना प्रचालितेयं सञ्जाता खण्डिता भूमिः।।८३८४।।

पाकिस्तानस्य तदा निर्मितिरासीद्विरोधेऽपि।
सम्प्रदायसद्भावान्दोलनमयता समापत्तौ।।८३८५।।

जाता भारतभूमिः स्वतन्त्रतन्त्रा प्रधानमन्त्री च।
पण्डितपदप्रतिष्ठो जवाहरो भूमिभूषणं जातः।।८३८६।।

श्रीसरदारो वल्लभभाईपटेलश्च कर्णधारो वा।
वृतः समस्ता जनता तत्र स्फूर्तिं समाश्रयन्त्यासीत्।।८३८७।।

परमयोग्यतासंपद्विभूषितैर्भारतीयशार्दूलैः ।
संसारेगुणगर्जनमाविष्कृतमादिमैर्यत्नैः ।।८३८८।।

विश्वगुरुत्वं सततं बिभ्राणं भारतं तदिदम्।
नाद्यापि प्रोन्नतनवविचारधारा पराङ्मुखं दृष्टम्।८३८९।।

स्वामिविवेकानन्दः प्रथिते तस्मिन्नमेरिकादेशे।
व्याख्यानानां गुम्फैर्विभूषयामास नवविश्वम्।।८३९०।।

योगाऽकाशविहारेऽरविन्दघोषोऽतुलो भातः।
संसारसभ्यतानामत्रैवाऽस्ते परा सम्पत्।।८३९१।।

जनतन्त्रात्मकशासनपद्धत्या संविधाननिर्माणे।
अम्बेडकरप्रमुखा विधान-परिषत्सुसंगठिता।।८३९२।।

दिव्यं विधानममलं निर्मितमासीत्समीकृतं सभया।
स्वीकृतमथतत्सर्वैः प्रचालितं चात्रगणराज्यम्।।८३९३।।

अत्रत्या सा चेयं जनता साधुस्वभावपरिपूर्णा।
नो जानाति कुटिलतां सम्यगसम्यग्विभावनाभरिताम्।।८३९४।।

तत्रोत्सवसंभारान्प्रकल्पयन्तो दिवाऽनिशं लग्नाः।
नवनवसंगठनान्यपि नेतृणामुत्सवायालम्।।८३९५।।

प्रभुतासम्प्राप्तानां ये दोषाः पूर्वमुद्घुष्टाः।
दोषास्तेऽप्यत्र पदं कृतवन्तो मन्त्रिमुख्येषु।।८३९६।।

नानाधिकारिवर्गोऽयमद्य संसेवते सुखं किन्तु।
सर्वाऽप्यन्या जनता दुःखान्वितरूपमाधते।।८३९७।।

नानानूतनतमदलनिर्माणानां प्रकृष्टपरिपाटी।
नेनृणामद्यत्वे विचारधारां प्रकाशयति।।८३९८।।

सा साम्यवादसंस्था रशियादेशे समुत्तीर्णा।
भारतवर्षेप्यसमां धारां सम्यक् प्रवर्धयति।।८३९९।।

राजनीतिकुशलानां स्वार्थसमाराधने दोषाः।
शतशः प्रादुर्भूता विमोहयन्त्यद्य दुःखाय।।८४००।।

स्वार्थान्धकुप्रवृत्तिप्रपूरिता शासनस्थेयम्।
रीतिर्नीतिर्नितरां दुर्गतिरूपं समानयति।।८४०१।।

नानाविधकष्टानामङ्गीकारेण लब्धेयम्।
देशस्वतन्त्रताया धारा पूरयतु सर्वाशाम्।।८४०२।।

सत्याऽहिंसाऽऽधारित संग्रामे भारतीयानाम।
या धारणा प्रजाता तयैव सर्वे स्वतन्त्राःस्मः।।८४०३।।

नैतच्चित्रं यदिदं स्वातन्त्र्यं चाऽद्य नवनवोन्मेषे।
शासकसंस्थाऽस्थिरताभावे संचेष्टते सततम्।।८४०४।।

परिवर्तन-प्रवाहे पतिता शासकपदाऽऽरूढाः।
यावत्कालं स्थित्वा धनमाहर्तुं समासक्ताः।।८४०५।।

कुतो नु धनमागच्छेद् धनस्य कुत्रोपयोगः स्यात्।
चारित्र्यं भ्रंशयितुं सर्वाऽप्येतादृशी दृष्टिः।।८४०६।।

भारतीयजनतायामेकीभूताऽस्ति तादृशी शक्तिः।
या विश्वं मोहयते ज्ञानेनात्मोन्नतिं कुरुते।।८४०७।।

असमचरित्रोन्मेषेष्वासादितवैभवो देशः।
नव्यां सर्वां धारां विज्ञानाराधितां भजते।।८४०८।।

केषां वा दौर्बल्यं केषां प्राबल्यमित्येषा।
स्वीयजनेष्वपि दृष्टिर्नो कुत्राऽप्यादृता भूयात्।।८४०९।।

उल्लासोत्साहभरैरेतद्देशस्य मानवैर्निखिलैः।
सम्पूर्णा श्रमशक्तिर्देशोन्नत्यै सुविस्तीर्णा।।८४१०।।

संसारस्य च ते ते समुन्नताऽमेरिकारशाद्याश्च।
सर्वविधं साहाय्यं कृतवन्तो भारतोन्नत्यै।।८४११।।

तेन वयं स्मोऽद्यत्वे नाना नवभावना पुष्टाः।
सत्यं शिवतायुक्तं सुन्दरमिदमस्ति जीवनं धन्यम्।।८४१२।।

नास्तितमां सा भीतिर्यद् वा देशो विखण्डितो भूयात्।
जनतन्त्रपद्धतिरियं सद्यो वा क्वाऽपि लीना स्यात्।।८४१३।।

सैषा सर्वा धारा याऽस्ति समागतविचाराणाम्।
सा त्वायाति च याति च विज्ञा नो तत्र मुह्यन्ति।।८४१४।।

अनुकूलमेव सर्वं यत्प्रतिकूलं विभासते पुरतः।
निःश्रेणिकैव सेयं समृद्धिमयता समाह्वाने।।८४१५।।

भारत-वर्षस्याऽद्य तु स्वरूपमेतादृशं जातम्।
भूयः कष्टं सोढ्वाऽप्यानन्दो नूनमाभाति।।८४१६।।

यद्यप्यत्र च तत्र च वैसादृश्यं विलोक्यते निखिलम्।
पुनरपि सर्वविधोद्यमसन्नद्धाः सन्ति सर्वेऽपि।।८४१७।।

स्वतन्त्र्याणां युद्धे देशे देशे प्रवर्तमानेऽस्मिन्।
विश्वस्य तादृशी सा शक्तिः प्रथिता तथा भुवने।।८४१८।।

कस्याऽप्येतादृशता नो दृष्टाऽऽस्ते यथाऽत्रदेशे सा।
भरतोत्तमभूमेर्वा महिमाऽहिंसा समाराद्धा।।८४१९।।

कृतकार्यद्वेषाणामद्यत्वे भूयसी संख्या।
प्रत्यहमुपसर्पन्ती ग्रसनोन्मत्तेव संयाति।।८४२०।।

राजनीतिरिति शब्देनाऽद्यत्वे यद्विजानीमः।
रागद्वेषवशीकृतवैभवमेवाऽत्र जानीमः।।८४२१।।

सिद्धान्तोऽस्त्येकोऽयमहं स्वतः सर्वमूर्धन्यः।
एतादृशस्वरूपस्वीकारे मम दले गणना।।८४२२।।

एवं तावदिहैकायत्तं शतसहस्रलक्षमतम्।
मतमत्रपेटिकायास्तदिदं शास्त्रं हि राजनीतिरिह।।८४२३।।

एतेनाऽपि च भूयाँल्लाभो परितोऽपि संजातः।
दीना हीना जनता किञ्चित्सुखिताऽपि संजाता।।८४२४।।

मर्यादाया अर्थो यादृशभावेषु सुनिरूढ़ः।
अद्य तु सोऽयं सर्वस्तिरस्कृतः पूर्णरूपेण।।८४२५।।

नव्येनोत्तमदीप्तेनाद्य विधानेन संचलिता।
जनतन्त्रात्मकशासनपद्धतिरसमां श्रियं तनुते।।८४२६।।

सर्वविधस्वातन्त्र्योद्दीप्त्यै सर्वेऽपि जागरूका वा।
दृश्यन्ते देशेऽस्मिन्नगरे नगरेषु ग्रामसद्ग्रामे।।८४२७।।

आंग्लैर्यच्चरित्र्योन्मूलनमत्यर्पितं व्यवस्थासु।
तेषामेवोन्मेषाः शासनकर्तरि समुन्मिषन्तीव।।८४२८।।

अलिखितधनलाभानां गोपनतायां परां काष्ठाम्।
कृत्वाऽनल्पफलायां नीतावस्यां निलीयते सर्वैः।।८४२९।।

दोषा एते सर्वां समुच्छिनन्त्येव मूलतोऽवस्थाम्।
वित्तानां दुरवस्था सम्पूर्णं क्षुब्धमातनुते।।८४३०।।

विघटन-संगठनानां प्रचुरा दृश्यावलिः सेयम्।
प्रजातन्त्रपद्धत्याः श्रृंगारः केवलं भाति।।८४३१।।

सर्वेऽप्येतेऽद्यत्वे वयं स्वतन्त्राः समालपितुम्।
लिखितुं पठितुं व्यवसायानां काष्ठां परां प्राप्तुम्।।८४३२।।

विज्ञानानां प्रचुरा प्रवाहमालामरिस्फूर्तिः।
निखिलं मानवकायं स्वात्मन्येव प्रशामयति।।८४३३।।

स्वर्ण-जयन्तीवर्षे सुवर्णवर्णाङ्कितं निखिलम्।
मनसां मनसां वर्णःसुवर्णलीलां समातनुते।।८४३४।।

स्वर्ण-जयन्ती वर्षे भारतवर्षस्य कथमियं धारा।
नवता-प्रवाह-युक्ता नो वा सर्वं समीहितं देयात्।।८४३५।।

राजनीतिरथ सैषा स्वीयान्दोषानपाकृत्य।
भारतवसुन्धराया गौरवमावाहितं कुर्यात्।।८४३६।।

संस्कृत-भाषा सैषा केन्द्रीभूता समस्तभावानाम्।
परिपूर्णा सौन्दर्ये सत्ये शिवसामरस्येऽस्मिन्।।८४३७।।

स्वातन्त्र्यस्याऽद्य पुनः सुवर्णवर्षस्य सम्पूर्तौ।
संस्कृतभाषाया अपि सर्वोत्तमरूपसंस्था स्यात्।।८४३८।।

संस्कृतमेव तदेतत्सर्वं वा भारतं वर्षम्।
निखिलं चैतद्विश्वं संस्कृतरूपे प्रतिष्ठितं दृश्यम्।।८४३९।।

वेदा वेदान्ता वा दर्शनगाथाः पुराणानि।
सूत्रं भाष्यं विपुलं काव्यमहाकाव्यसर्वस्वम्।।८४४०।।

कुत्राऽन्यत्र विलोक्या सैषा सर्वाऽपि सम्पत्तिः।
स्वर्णे सौरभरूपं तदिदं सर्वं विलोक्य संधार्यम्।।८४४१।।

यद्यप्यत्र कलियुगे संस्कृतगाथाप्रबोधिते काले।
सामञ्जस्यं नो वा प्रजायते सत्यसन्धानाम्।।८४४२।।

पुनरपि दृष्टैवेयं सरणिः काचित्प्रकृष्टता पूर्णा।
मोदामहे नितान्तं यामाश्रित्याद्य सर्वेऽपि।।८४४३।।

२२४.श्रीकरपात्रस्वामी

आबाल्याद्यद्दर्शनचरणस्पर्शादिविश्वासैः ।
आत्मा पावित आस्ते करपात्रस्वामिचरणास्ते।।८४४४।।

निखिले भारतवर्षे विख्याता वक्तृतायां ये।
मत्पूज्यपितृचरणा अपि जाता यच्चरणसंलग्नाः।।८४४५।।

शास्त्रार्थमहारथिनो विख्याता माधवाचार्याः।
तेऽपि यदाज्ञायत्ता पूर्णतरैर्वा मनोभावैः।।८४४६।।

अखिलानन्दा आसन्ये कविरत्नेत्युपाधिसंयुक्ता।
तेऽपि यदाज्ञावशगा नम्यन्ते स्वामिचरणास्ते।।८४४७।।

श्रीमद्भिरथाऽनन्तैः कृष्णैर्बोधाश्रमैः परमहंसैः।
सार्धं विहरन् स्वामी श्रीकरपात्रो विरेजेऽसौ।।८४४८।।

गार्हस्थ्यं स्वं जीवनमेकाऽपत्यान्तरं वियोजितवान्।
गुरुकृपातो हरिहरभावेनाख्यां नवां दध्यौ।।८४४९।।

घोरतपस्यानिरतो हिमालये विन्ध्यशिखरे च।
सिद्धीः सर्वास्तास्ताः करतलगा यस्य संजाताः।।८४५०।।

एकां दृष्टिं दत्त्वा सर्वान्ग्रन्थान्हृदि स्थितान् कुर्वन्।
तेषामथ सर्वस्वं नव्यैर्वचनैः प्रकाशयामास।।८४५१।।

शास्त्राऽम्भोऽधिनिमग्ना अपि विद्वांसोऽथ यज्ज्ञानम्।
सम्यक् प्रकाशनार्थं विमुखा आसंस्तदेवायम्।।८४५२।।

श्रीकरपात्रस्वामी शास्त्राणां मर्मवाणीं ताम्।
जनजनहृदये निखिलां सर्वां सम्बोधयामास।।८४५३।।

ये वेदान्ताः सर्वे तान्नूनं मूलतो दृष्ट्वा।
हिन्दीमाध्यमतायां सर्वान् विस्तारयामास।।८४५४।।

एकाञ्जलिपर्याप्तं भोजनमासीत्तु करपात्रे।
'श्रीकरपात्रस्वामी' इति तत एव प्रसिद्धिमगात्।।८४५५।।

पद्भ्यां भ्रमणं नित्यं निखिले देशे कृतं येन।
नगरान्नगरं ग्रामाद् ग्रामं प्रति सत्कृपावशतः।।८४५६।।

पञ्चपञ्चहोरात्मकनैरन्तर्येण व्याख्यानम्।
नाऽसीद् विरामभाषा साऽग्रेऽग्रे धावमानाऽभूत्।।८४५७।।

यत्र स देशे गतवान् धर्मस्यासीज्जयस्तत्र।
तत्राऽधर्मविनाशो विलोकितः पूर्णरूपेण।।८४५८।।

निखिलप्राणिनिकाये सद्भावं चाऽथ घोषयामास।
विश्वस्य च कल्याणं कोणे कोणे श्रुतं जातम्।।८४५९।।

स्वीये कथाप्रवाहे दैनन्दिनवाक्यसंचारे।
धर्मोपदेशमखिलं स्वामी सोऽयं विबोधितवान्।।८४६०।।

धर्माऽचरणविमुखता हेया निरयाय कल्पते सत्यम्।
धर्मः कश्चित्सोऽयं संसारे जीवनं तत्त्वम्।।८४६१।।

धर्मान्तर्गतभावे विलोक्यते शुभ्रसंसारः।
जीवनसाफल्यं तद्धर्माऽचरणेन जायते नितराम्।।८४६२।।

इत्थं देशविशैर्विबोधयन्भारतीयान्स्तान् ।
निद्राऽवस्थावशतो जागर्ति तां समानयति।।८४६३।।

जागरणं तज्जातं श्रीस्वामीवाक्यविस्तारैः।
निखिला भारतजनता धर्माऽचरणे समुन्मुखा जाता।।८४६४।।

कस्मिंश्चिद् व्याख्याने वार्तालापप्रसङ्गेषु।
श्रीमान् गिरिधरशर्मा करपत्रस्वामिनं निवेदितवान्।।८४६५।।

'कोटिहोम' इति संज्ञा काचित्संलोक्यते शास्त्रे।
नो वा प्रयोगरूपं तस्याऽथो दृष्टिमायातम्।।८४६६।।

श्रीचरणैरथ तस्य तु संकल्पो गृह्यतेऽथ होमस्य।
तेन महत्कल्याणं जगतां संजायतां नूनम्।।८४६७।।

आस्तां तावत्सर्वं स्वीकृतमासीत्तु करपात्रैः।
त्यागतपोमूर्तिभिरथ श्रीमद्भिः स्वामिचरणैस्तत्।।८४६८।।

दृश्यं दर्शितमासीद् देहल्यां राजधान्यां वा।
यमुनातीरे पारे धर्मं नगरं विनिर्माय।।८४६९।।

कोटिहोमसंकल्पः संसाधयितुं समारब्धः।
सर्वस्मादपि देशात्समागता भूरिविद्वांसः।।८४७०।।

वैदिकमर्मोद्घाटनसन्नद्धा विज्ञधौरेयाः।
दिव्यातिदिव्यशोभे परमविशालेऽथ मण्डपे रुचिरे।।८४७१।।

शतयज्ञकुण्डनिर्मितिरासीद्देवैः समीहिता सुखदा।
कोट्याऽहुतिप्रदानैः शतकुण्डेषु प्रदीप्तेषु।।८४७२।।

देवाः सर्वे नित्यं स्वसन्निधानं प्रयच्छन्ति।
परतन्त्रता प्रयाता देशस्यास्याथ दुर्दशामूला।।८४७३।।

नवजागरणं प्राप्तं यज्ञीयैर्धूमसंधानैः।
निखिला भारतजनता तुष्यन्ती धर्ममार्गेऽस्मिन्।।८४७४।।

निजचारित्र्योन्मेषे विशेषरूपे विशश्राम।
वैदेशिकशासकगणसन्तुलने भिन्नरूपत्वम्।।८४७५।।

व्याप्तं किमपि नितान्तं स्वातन्त्र्यायैव यज्जातम्।
देहल्यां तद् दृश्यं विलक्षणं जनसमुद्रोऽसौ।।८४७६।।

परितो व्याप्तश्चासीत्का तुलना तस्य संसारे।
दातारो नो दद्युः किमपि धनं वा पदार्थं वा।।८४७७।।

ध्वनिविस्तारकयन्त्रे सैषाऽसीद् घोषणा नित्यम्।
सर्वं धनं पदार्था आयाताश्चाधिकाऽधिकास्तत्र।।८४७८।।

स्थानाऽभावो जातस्तेषां संस्थापनायाऽपि।
जनतानिवेदितं तत्पदार्थसार्थं स्मरति लोकः।।८४७९।।

शोभायात्रा याऽसीद्देहलिनगरे विशाले वा।
तद् दृश्यजातमासीज्जन्मफलं सुकृतचयनाय।।८४८०।।

श्रीकरपात्रस्वामी निर्लिप्तः सर्वदेशिको नितराम्।
सन्निधिमात्रेण तदा सर्वं यज्ञं प्रसाधयामास।।८४८१।।

भक्तानां तु समूहश्चरणस्पर्शैश्च रोमाञ्चैः।
परितः प्रगुणीभूतः सदा सदालोकितस्तत्र।।८४८२।।

धर्माऽऽचार्याः सर्वे सर्वे ते तेऽथ शङ्कराऽचार्याः।
सर्वेऽपि च विद्वांसो व्याख्यातारः समायाताः।।८४८३।।

शास्त्रार्थानां कश्चिद् विमतैः क्रमभाव आयातः।
विमतैर्मतभेदानां समापनं सर्वतो लाभः।।८४८४।।

धर्मोद्घोषपराणां लोकानां कोऽपि महिमानम्।
तस्मिन्समये नहि नहि वक्तुं शक्तो विचक्षणो जातः।।८४८५।।

संस्था चाऽपि समग्रा संजाता धर्मसंघाऽख्या।
यमुनातटेऽद्य यावत्संस्था सा विद्यते पुरतः।।८४८६।।

कर्णपुराऽख्ये नगरे पुनरासीत्कोटिहोमोऽयम्।
श्रीकरपात्रस्वामिभिरादिष्टे यज्ञमण्डपे विशदे।।८४८७।।

कोट्याऽहुतिप्रदानैरत्राऽप्यासीच्च देवसंतुष्टिः।
धर्मसंघसंस्थापनमपि तावत्तत्र संजातम्।।८४८८।।

इयमस्ति कापि नगरी वाणिज्ये विश्वविख्याता।
तत्राऽपि कोटिहोमो जातः करपात्रनिर्दिष्टः।।८४८९।।

वाराणस्यां गंगातटे पुनर्यज्ञदृश्याली।
प्रादूर्भूताऽसाधारणसौभाग्यप्रदायिनी याऽसीत्।।८४९०।।

प्रातर्मध्यान्हेऽपि च सायाहनि यज्ञकार्याणि।
सम्यक् सम्पन्नानि च विश्वेदेवाः प्रसन्नाः स्युः।।८४९१।।

भारतस्वतन्त्रताऽख्ये भूयस्तस्मिन्महायज्ञे।
वैदिकयज्ञैरेतैः पूजितभावः सुसंप्राप्तः।।८४९२।।

कालिन्दी गङ्गा वा गोदा वा गोमती नद्यः।
स्वीये तटप्रदेशे नैकान्यज्ञान्प्रर्दयाञ्चक्रुः।।८४९३।।

नानाविधा चमत्कृतिरादिष्टा दृष्टमात्रा या।
श्रीस्वामिनां प्रकृष्टां सिद्धिसमृद्धिं प्रकाशयामास।।८४९४।।

लक्ष्मणपुरेऽपि सैषा लक्षा चण्डी प्रजाताऽसीत्।
तात्राऽवरोधभावः शासकवर्यैः समादिष्टः।।८४९५।।

श्रीकरपात्रवरेण्यैः सप्तशतीसाधनायां तत्।
सर्वाऽऽपत्तिनिवारणकार्यं सद्यः सुसञ्जातम्।।८४९६।।

एवं सद्यो बाधादूरीकरणेषु चैतेषाम्।
अवताराणां साक्षाद्दर्शनभावः समायाति।।८४९७।।

नाऽसीत्किञ्चिन्नगरं नो वा किञ्चन्महानगरम्।
नो वा ग्रामः कश्चिद् यत्र न जातं हि स्वामिसंचरणम्।।८४९८।।

सर्वत्र परिभ्रमणं जनताभ्रमशोधनं सदुपदेशाः।
विदुषां शास्त्रार्थानां परिपाटी चैव चालिता काचित्।।८४९९।।

नाना नवपत्रणां दैनिकसाप्ताहिकादीनाम्।
प्रकाशनं प्रारब्धं श्रीस्वाम्युपदेशपूर्णानाम्।।८५००।।

''सन्मार्ग'' नामकं तद्दैनिकपत्रं प्रकाशितं जातम्।
'सिद्धान्त' नामकमथ प्रकाशितं शोभनं पत्रम्।।८५०१।।

तत्रच्छटा समासील्लेखानां स्वामिचरणानाम्।
धारावाहिकरूपेणऽसीत्काचित्प्रकृष्टपरिपाटी ।।८५०२।।

भगवत्तत्त्वसुनाम्ना प्रकाशितो ग्रन्थः एकोऽयम्।
भक्तानामथ विदुषां परमां तुष्टिं प्रकुर्वाणः।।८५०३।।

शतशःसद्ग्रन्थास्ते विद्यन्ते चेतनापुञ्जाः।
ज्ञानाऽवतारकरपात्रस्वामिश्रीकृपाप्राप्ताः ।।८५०४।।

कार्लो मार्क्सो जातः नवार्थशास्त्रैर्विचारशीलो यः।
नास्तिकमण्डलधुर्यस्तत्खण्डनमत्र भाषया लिखितम्।।८५०५।।

रामायाणमीमांसानामा दिव्योऽस्त्ययं ग्रन्थः।
निखिलं रामचरित्रं यात्राऽस्ते वर्णितं सम्यक्।।८५०६।।

विमतध्वंसपुरस्सरमेषा काचित्सुशृंखला जयति।
श्रीकरपात्रस्वामिभिरारचिता सुप्रकाशिता जाता।।८५०७।।

मन्त्रशास्त्रपाथोनिधिमालोडितुमपि च तादृशो भावः।
सद्ग्रन्थेष्वारचितो मूर्धन्यैस्तैर्महापुरुषैः।।८५०८।।

न कदाचित्सीमानो द्रष्टुं शक्याः समिद्धास्ताः।
स्वामिचरणसत्सेवापरायणानां परा सम्पत्।।८५०९।।

एतादृशास्तु लोकोत्तरचारित्र्येण सम्पूर्णाः।
गाथाः प्रचारमाप्ता जने जने भारते वर्षे।।८५१०।।

काश्चित्कैश्चित्कथिता अन्याश्चान्यै प्रकाशितास्तास्ताः।
श्रीकरपात्रस्वामीगाथावलिरेव भासते चित्ते।।८५११।।

यशो विभूषा सेयं श्रीमत्करपात्रचरणानाम्।
महामहद्भिःकथिताः श्रुतास्तथा तादृशैरेव।।८५१२।।

श्रीकरपात्रस्वामी भूयो लेखांस्तथा च सद्ग्रन्थान्।
विलिखन्धन्यतरां तां भारतजनतां सुशिक्षितवान्।।८५१३।।

वेदानां व्याख्यानं स्वामिचरणचर्चितं जयति।
"वेदार्थपारिजातः" सोऽयं ग्रन्थात्मको राशिः।।८५१४।।

काचिच्चमत्कृतिरियं प्रथिता श्रीस्वामिवर्यैर्वा।
भाष्याणां सर्वेषां नवशैली सम्प्रकाशिता प्रथिता।।८५१५।।

वैदेशिकमतवादा वचसा सामूलमामृष्टाः।
सनातनोऽयं धर्मः सम्यक्संस्थापितो जातः।।८५१६।।

भारतवर्षे तादृशमहिमानं वा निरूपयन्कश्चित्।
नैव प्रादुर्भूतो भविष्यतीत्यत्र सन्देहः।।८५१७।।

नाना नवता युक्तान्सुधर्मसंघान्विनिर्माय।
त्यागतपः संयुक्तान्श्रेष्ठांस्तत्र प्रवेशयामास।।८५१८।।

गंगाशंकरदीक्षितवर्योऽसौ दीक्षितश्चैतैः।
विविधलेखविन्यासैर्धाराभिर्वर्षको मेघः।।८५१९।।

मार्कण्डेयाऽख्येयस्य तु भाग्यं सर्वमहिमानम्।
प्रगुणीकृतवन्तस्ते स्वसन्निधानेषु निखिलेषु।।८५२०।।

सारस्वतकृपायाः सागर एवाऽयमामृष्टः।
श्रीकरपात्रस्वामीवन्दनशब्दावलीचयने ।।८५२१।।

अहमहमिकेयमास्ते भावानां चैव वाक्यानाम्।
रसरीतिशब्दरचनाऽलंकाराणां च निखिलानाम्।।८५२२।।

श्रीस्वामिचरणवन्दनशब्दावलिमामृशन्धन्यः ।
मनुजो जयति नितान्तमाचामितधैर्यधौरेयः।।८५२३।।

धर्मतरङ्गैः सततं समावृतो दिव्यदिव्याभैः।
सृष्टि-विभूषण-भावे प्रतिष्ठितः कोऽपि सन्यासी।।८५२४।।

धरणिरियं धन्यतरा संजाता यस्य सान्निध्ये।
धन्या सृष्टिर्निखिला संजातास्ते यदीयमाधुर्यैः।।८५२५।।

यं दृष्ट्वा भारविकविनिर्मितमाभासते चरितम्।
यत् व्यासस्यागमने वर्णितमास्ते किरातसत्काव्ये।।८५२६।।

देवर्षेरागमने यच्चित्रितमस्ति माघसत्काव्ये।
श्रीकरपात्रस्वामीदर्शनतो भाति तच्चित्रम्।।८५२७।।

शङ्करदिग्विजयाऽख्ये विख्याते वा महाकाव्ये।
या वर्णनशैली सा श्रीकरपात्रे समानैव।।८५२८।।

सोऽयमनन्तैः काव्यैः स्तव्यचरित्रः पवित्रतापुञ्जः।
श्रीकरपात्रस्वामी प्रसन्नतायाः पराकाष्ठा।।८५२९।।

भारतस्वतन्त्रताया अनन्तरं जागरूकत्वम्।
तत्राऽनेतुं शासन सरणिं तां तां समेधितवान्।।८५३०।।

धर्माऽधारितशासनसरणिः सुखदा समृद्धिसंचारा।
धर्मप्राधान्ये वा कामार्था मोक्षदा जाताः।।८५३१।।

विश्वस्मिन्नथ मैत्री धर्मे तु यास्य संजाता।
कामानामर्थानां प्राधान्ये मैत्री सम्प्रेषिताऽनर्थे।।८५३२।।

धर्माऽविरुद्धकामः संसेव्यो वा प्रयत्नेन।
श्रीकृष्णस्य तु रूपं तदेव गीता समादिष्टम्।।८५३३।।

श्रीस्वामिनां समासीदुपदेशानां विसृत्वरी धारा।
जनजनहृदयाऽवासे सा सर्वा सुप्रतिष्ठिता जाता।।८५३४।।

भूयोऽपि रामराज्यं भारतवर्षे प्रतिष्ठितं भूयात्।
एषाऽपि मनीषैका स्वामिनमासाद्य मोदमायाता।।८५३५।।

देशे चुनावचर्चा यदा प्रजातन्त्रचालिताऽऽरब्धा।
रामराज्यपरिषत्सा स्वामिभिरादेशिता काचित्।।८५३६।।

निखिले भारतवर्षे भ्रामं भ्रामं स्वयं स्वामी।
श्रीकरपात्रप्रवरो निखिलां जनतां प्रबोधितवान्।।८५३७।।

मा भूच्छैथिल्यं वा धर्मे चार्थे च कामे च।
धर्मनियन्त्रितसरणावपि शैथिल्यं न मर्षणीयं स्यात्।।८५३८।।

अन्ये ये कलिकाले नेतारो वा समायाताः।
स्वीयाभिमतो धर्मस्तैरारब्धः प्रसाधयितुम्।।८५३९।।

पुरातनी देशेऽस्मिन्या सरणिस्तां द्विषन्तस्ते।
शासनयन्त्रे स्वीयं विस्तारं साधयामासुः।।८५४०।।

श्रीस्वामिभिरुपदिष्टं मार्गं ते चापि शृण्वन्तः।
स्वीयान्तरङ्गतायां सर्वं संसाधयाञ्चक्रुः।।८५४१।।

वर्णाश्रमव्यवस्था भारतवर्षस्य सर्वस्वम्।
तत्रोन्मूलनकार्यं विरोधितं स्वामिभिः सम्यक्।।८५४२।।

धर्मस्याथ स्थापनमुद्देश्यं स्वामिचरणानाम्।
पूर्णतया संसिद्धं देशेऽस्मिंश्चापि विश्वस्मिन्।।८५४३।।

प्रतियोगी।

कवि परिचयः

पञ्चपञ्चहोरात्मकमैरन्तर्येण व्याख्यानम्।
नाऽसीद् विरामभाषा साऽग्रेऽग्रे धावमानाऽभूत्।।८४५७।।

यत्र स देशे गतवान् धर्मस्यासीज्जयस्तत्र।
तत्राऽधर्मविनाशो विलोकितः पूर्णरूपेण।।८४५८।।

निखिलप्राणिनिकाये सद्भावं चाऽथ घोषयामास।
विश्वस्य च कल्याणं कोणे कोणे श्रुतं जातम्।।८४५९।।

स्वीये कथाप्रवाहे दैनन्दिनवाक्यसंचारे।
धर्मोपदेशमखिलं स्वामी सोऽयं विबोधितवान्।।८४६०।।

धर्माऽचरणविमुखता हेया निरयाय कल्पते सत्यम्।
धर्मः कश्चित्सोऽयं संसारे जीवनं तत्त्वम्।।८४६१।।

धर्मान्तर्गतभावे विलोक्यते शुभ्रसंसारः।
जीवनसाफल्यं तद्धर्माऽचरणेन जायते नितराम्।।८४६२।।

इत्याऽदेशविशैर्विबोधयन्भारतीयान्स्तान् ।
निद्राऽवस्थावशतो जागर्ति तां समानयति।।८४६३।।

जागरणं तज्जातं श्रीस्वामीवाक्यविस्तारैः।
निखिला भारतजनता धर्माऽचरणे समुन्मुखा जाता।।८४६४।।

कस्मिंश्चिद् व्याख्याने वार्तालापप्रसङ्गेषु।
श्रीमान् गिरिधरशर्मा करपत्रस्वामिनं निवेदितवान्।।८४६५।।

'कोटिहोम' इति संज्ञा काचित्संलोक्यते शास्त्रे।
नो वा प्रयोगरूपं तस्याऽथो दृष्टिमायातम्।।८४६६।।

श्रीचरणैरथ तस्य तु संकल्पो गृह्यतेऽथ होमस्य।
तेन महत्कल्याणं जगतां संजायतां नूनम्।।८४६७।।

आस्तां तावत्सर्वं स्वीकृतमासीत्तु करपात्रैः।
त्यागतपोमूर्तिभिरथ श्रीमद्भिः स्वामिचरणैस्तत्।।८४६८।।

दृश्यं दर्शितमासीद् देहल्यां राजधान्यां वा।
यमुनातीरे पारे धर्मं नगरं विनिर्माय।।८४६९।।

कोटिहोमसंकल्पः संसाधयितुं समारब्धः।
सर्वस्मादपि देशात्समागता भूरिविद्वांसः।।८४७०।।

वैदिकमर्मोद्घाटनसन्नद्धा विज्ञधौरेयाः।
दिव्यातिदिव्यशोभे परमविशालेऽथ मण्डपे रुचिरे।।८४७१।।

शतयज्ञकुण्डनिर्मितिरासीद्देवैः समीहिता सुखदा।
कोट्याऽहुतिप्रदानैः शतकुण्डेषु प्रदीप्तेषु।।८४७२।।

देवाः सर्वे नित्यं स्वसन्निधानं प्रयच्छन्ति।
परतन्त्रता प्रयाता देशस्यास्याथ दुर्दशामूला।।८४७३।।

नवजागरणं प्राप्तं यज्ञीयैर्धूमसंधानैः।
निखिला भारतजनता तुष्यन्ती धर्ममार्गेऽस्मिन्।।८४७४।।

निजचारित्र्योन्मेषे विशेषरूपे विशश्राम।
वैदेशिकशासकगणसन्तुलने भिन्नरूपत्वम्।।८४७५।।

व्याप्तं किमपि नितान्तं स्वातन्त्र्यायैव यज्जातम्।
देहल्यां तद् दृश्यं विलक्षणं जनसमुद्रोऽसौ।।८४७६।।